CC0. In Public Domain. Digitizagtion by eGangotri

श्रीमद्भागवतम्

सप्तमः स्कन्धः

आम्नाय-ग्रन्थालय,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

3.2/10
825
3.2/10
आम्नाय—ग्रन्थालय,
भारतनिधि, करौंदी
वाराणसी-5

श्रीलक्ष्मीनृसिंहाय नमः ।

श्रीमद्भागवतम् ।

सप्तमस्कन्धः ।

प्रथमोऽध्यायः ।

॥ ॐ नमो भगवते वासुदेवाय ॥

राजोवाच ।

समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयम् ।
इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥

नह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ।
नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥

इति नः सुमहाभाग ! नारायणगुणान्प्रति ।
संशयः सुमहान्जातस्तद्भवांश्छेत्तुमर्हति ॥ ३ ॥

श्रीशुक उवाच ।

साधुपृष्टं महाराज ! हरेश्चरितमद्भुतम् ।
यद्भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगणेशाय नमः ॥

स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥ १ ॥

प्रथ[illegible]रः पञ्चदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ।
लोकना[illegible] वासनाप्रोक्ता तत्तत्कर्मानुसारिणी ॥ २ ॥

अशुभा च शुभाचेति द्विधा सा हेतुभेदतः ।
अशुभा महतां कोपाच्छुभा मद्वनुग्रहात् ॥ ३ ॥

हरेर्द्वारपयोर्यद्वद्वैकुण्ठे वसतोरपि ।
चतुःसनरुषा विष्णुद्वेषाद्यशुभवासना ॥ ४ ॥

यथा च दैत्यगर्भेऽपि प्रह्लादस्य सतः स्थिरा ।
नारदानुग्रहादास विष्णौ सद्भक्तिवासना ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभक्तंच सदा विष्णुर्द्विषन्तमपिरक्षति ।
तृतीयेऽथभवे ह्यास्थावकरोदात्मसात्पुनः ॥ ६ ॥
अतोमनीषिणा यत्नः कार्योमहदनुग्रहे ।
इत्येतदर्थंमूतीनामत्र लक्षणमुच्यते ॥ ७ ॥
तत्रादौ दशभिर्दैत्यतत्पुत्रमतिभेदतः ।
महत्कोपानुकम्पोत्थवासनाभेद उच्यते ॥ ८ ॥
सद्वासनाच युज्येत कर्मभिः शुद्धचेतसः ।
परैस्तु पञ्चभिस्तस्मात्क्रियते धर्मनिर्णयः ॥ ९ ॥
तत्रतु प्रथमेऽध्याये हिरण्यकशिपोः सुते ।
विष्णुभक्ते विरोधस्तु विप्रशापजईर्यते ॥ १० ॥

यदुक्तम् पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" इति । तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति—समइति त्रिभिः । न हि समस्य सुहृदश्च वैषम्यं नामास्ति नच प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः ॥ १ ॥

किञ्च यस्य यैः प्रयोजनं सिध्यति स तत्पक्षपातीभवति येभ्योबिभेति तान्द्वेषेण हन्ति नतु तदत्रास्तीत्याह—नहीति । निःश्रेयसं परमानन्दएव आत्मा स्वरूपं यस्य असुरेभ्यश्चोद्वेगो भयं नास्ति अतोविद्वेषोपि नास्त्येव. तत्र हेतुः, अगुणस्येति । गुणाधीनौ प्रीतिद्वेषावित्यर्थः ॥ २ ॥

श्रीनारायणस्य गुणाननुग्रहनिग्रहादीन् प्रति तत्त्वं संशयम् ॥ ३ ॥
भागवतस्य प्रह्लादस्य माहात्म्यं गीयत इतिसम्बन्धः ॥ ४ ॥

नह्यात्मनः किञ्चिच्छरीरं हितमन्यदहितमात्मत्वादेव च निरतिशयप्रियः एवम्भूतः स्वयं साक्षादेवेन्द्रस्यार्थे प्रयोजनाय कथं दैत्यानवधीद्धतवान्, यथा विषमो रागद्वेषादिप्राकृतगुणयुक्तस्तद्वत् ॥ १ ॥

साक्षान्निःश्रेयसात्मनः पुरुषार्थस्वरूपस्य निरतिशयानन्दरूपस्येत्यर्थः अस्य भगवतः सुरगणैरिन्द्रादिभिर्नह्यर्थः तदनुगृहीतेन्द्रादिभिः साध्यः कश्चित्पुरुषार्थो न तस्यास्ति स्वयमेव सक्षान्निःश्रेयसात्मत्वादिति भावः तथा असुरेभ्य उद्वेगो भयं तेषु विद्वेषश्च नास्त्येव तत्र हेतुं वदन् तं विशिनष्टि, अगुणस्येति. हि यस्मादगुणस्य सत्त्वादिगुणतन्मूलकरागद्वेषभयरहितस्य ॥ २ ॥

इतित्थं हे महाभाग ! निर्गुणस्य श्रीनारायणस्य गुणान्प्रति गुणविषयकोमहान् संशयो जातो वर्तते तद्गुणास्तु समत्वादयश्चेष्टातु, गुणानुगुणेत्येतत्संशयात्मकमज्ञानं छेत्तुमपोहितुं भवानेवार्हति नान्य इत्यर्थः ॥ ३ ॥

एवमापृष्टो मुनिस्तावद्राज्ञः प्रश्नमभिनन्दति--साध्विति । हे महाराज ! अद्भुतं प्राकृतचेष्टासजातीयत्वेन चिन्तयितुमशक्यं हरेश्चरितंप्रति साधु पृष्टं हरिचरित्रविषयकसंशयोद्घाटनरूपत्वात्प्रश्नः साधीयानित्यर्थः । साधुत्वमेव प्रश्नस्य स्पष्टयितुं चरित्रं विशिनष्टि—यदिति. यद्धरेश्चरितं भागवतानां माहात्म्यं यस्मिन्तादृशं भस्त्वेवं ततः किं तत्राह, भगवद्भक्तिं वर्द्धयतीति, भगवद्भक्तिवर्द्धनं भगवद्भक्तेर्वर्द्धनं वृद्धिर्यस्मादिति वा भागवतमाहात्म्येन भगवद्भक्तिवर्द्धकेन युक्तत्वाद्भगवच्चरित्रस्य तद्विषयकः प्रश्नः साधुरिति भावः ॥ ४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

॥ श्रीमते रामानुजाय नमः ॥

पूर्वस्मिन् स्कन्धे अष्टादशेऽध्याये "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना" इति विष्णोरिन्द्रस्य पक्षपातित्वमुक्तम् तत्र सर्वान्तरात्मनः सर्वभूतसुहृदोनिरतिशयप्रियरूपस्यावाप्तकामस्य निरस्ताखिलदोषस्य परमकारुणिकस्य श्रीभगवतः कथं प्राकृतवद्वैषम्यनैर्घृण्यादिकम् ? इति पृच्छति राजा—सम इत्यादिना त्रिभिः श्लोकैः । यद्यपि तत्तज्जीवकर्मगुणानुगुण्येनान्तरात्मतया नियन्तुर्न वैषम्यादिदोषप्रसक्तिरिति तत्रतत्र बहुवार मुक्तमिति न शङ्कावकाशः, तथापि तत्रतत्रप्रसङ्गादुक्तमेव तद्दृढयितुं किं गुणानां कर्मणां च प्रत्येकं सुखदुःखादिनिमित्तत्वम् उत समुच्चितानाम्, अथवा कर्मणामेवनिमित्तत्वं, गुणानां तु तद्धेतुत्वमुत गुणानामेव तन्निमित्तत्वं कर्मणां तु गुणोपचयापचयादिनिमित्तत्वमित्यादिशङ्का परिहारान् श्रोतुं च प्रश्नः, सम इति. हे ब्रह्मन् ! भगवान् पूर्णषाड्गुण्यो निरस्तनिखिलदोषश्च अनेनाप्तकामत्वं सूचितम् तत एव स्वप्रयोजननिरपेक्षत्वञ्च समः निरस्तनिखिलदोषत्वादेव द्वेष्यप्रियविभागरहितः स हि रागद्वेषादिमूलकः तदभावात्सम इति भावः । किञ्च सर्वभूतानां देवादीनां चासुरादीनां च सुहृद्धितैषी आत्मत्वादितिभावः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ श्रीवायुपुत्रायनमः ॥

षष्ठस्कन्धाभिधे तीर्थे स्नातः सप्तमनाम्न्यथ ।
श्रीमद्भागवते स्नातुं प्रयते तत्त्वसम्विदे ॥ १ ॥
सेवा येषामपवर्गगतिर्जगताममलास्ते—
श्रीमद्विष्णवङ्घ्रिसरोरुहयुगले भ्रमन्तः ।
सन्तः कुर्वन्तु दयां मयि विजयध्वजतीर्थे—
नित्यानित्याश्रयस्तादितिजाङ्घ्रितनुनखतीर्थसुतीर्थे ॥

सन्ततवेदान्तपरिनिष्ठितानामपिश्रीनारायणपरमप्रसादमन्तरेणानापादितसमीचीनज्ञानामृतकलानां क्वचित्क्वचिदसुरजनमोहाय प्रदर्शितशुक्रशोणितसम्पर्कादिभिरिवभगवतः प्रादुर्भावैस्तत्त्वे संशयालूनां सतां विसंशयार्थं श्रीनृसिंहावतारस्तत्प्रसक्तये नानाविधवर्णाश्रमाचारभेदविचारस्तत्पूजाप्रकारश्च निरूप्यते ऽस्मिन्स्कन्धे. तदर्थं परीक्षित्प्रश्नपूर्वकमुपोद्घातं रचयति—सम इ[illegible] यो भगवान् भूतानां योग्यतातिरेकेण पक्षपरिग्रहशून्यः आ[illegible] प्रियश्च "तदेतत्प्रेयः" इति श्रुतेः सत्त्वादिप्रदत्वात्स्वरनुष्ठि[illegible] नादिसुकृतस्य सुखलक्षणफलदातृत्वेनोपकर्तृत्वाच्च म[illegible]जय० इति तत्राह, स्वयमिति. स स्वयं [illegible]म इवेन्द्रस्यार्थे [illegible] रेण परप्रयोजनार्थङ्कथन्दैत्यानव[illegible] दित्यन्वयः ॥ [illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, सुरगणैः क्रियमाणस्य स्वप्रयोजनस्य सम्भवादवधीदिति किं न स्यादिति तत्राह—न हीति । हि शब्दो हेत्वर्थः कुतो नास्तीत्यत्राह—निःश्रेयसात्मन इति, नित्यनिर्दुःखानन्दस्वरूपस्य तादृशत्वं मुक्तस्याप्यस्तीति तत्राह--साक्षादिति, नित्यनिर्दुःखानन्दानुभवस्वरूपस्य परप्राप्यप्रयोजनाभावान्मुक्तस्य तदभावात्. नन्वसुरप्रद्वेषात्सुरहितं क्रियत इति तत्राह--नैवेति, विद्वेषश्च तत्तत्स्वरूपद्योतनायासुरेभ्य इति पञ्चमी 'वृक्षात्पर्णं पतति' इतिवत्कादाचित्कत्वाभावान्नित्ये द्वेषे वधानुपपत्तिरन्यथा वधस्यापि सन्ततानुवृत्तिः स्यादतो नोपपत्तिः स्यादिति भावः स्वाभिभवलक्षणभयात्सद्वध इति तत्राह—नेति, उद्वेगो भयलक्षणं कुत इत्यत उक्तम् अगुणस्येति "प्राकृतगुणसम्बद्धस्य तादृक्स्वभावत्वाद्धरेस्तदभावान्निर्गुणश्च" इतिश्रुतेः अनेन निःश्रेयसात्मनोपि गुणसम्बन्धेन जीववत्तथात्वं स्यादिति शङ्कापि निरस्तेति ज्ञायते ॥ २ ॥ ३ ॥

प्रामाणिकत्वद्योतनाय प्रश्नं स्तौति—साध्विति। तत्र हरिचरिते भागवतानां माहात्म्यं भगवद्भक्तिवर्द्धनमित्यनेन तन्माहात्म्यं भगवन्माहात्म्याविनाभूतमित्यवगन्तव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ श्रीश्रीकृष्णोजयति ॥

अथ सप्तमस्कन्धस्यक्रमसन्दर्भः ।

सप्तमक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।

क्रियते यन्निदेशेन स मे ऽनन्यगतेर्गतिः ॥

परमात्मत्वेन समः सुहृद्धितकारी प्रियः प्रीतिविषयो भगवान् एवं सति साम्येनैवोपकर्तव्यत्वेन प्रीतिविषयत्वेन च सर्वेष्वेवप्राप्तेषु कथं विषमइव दैत्यानवधीत् विषमत्वमुपलक्षणम् । असुहृदिवाप्रिय इव चेति ॥ १ ॥ २ ॥ ३ ॥

साधु पृष्टमिति सार्द्धमेवान्वितम् । हे महाराज ! इदं यत् पृष्टं तत् साधु सुविचारितमेव. किन्तु हरेश्चरितमद्भुतमपूर्वम् अवैषम्येपि विषमतया प्रतीयमानत्वेन विचारातीतत्वात्. यत् यत्र हरेश्चरितं भगवद्भक्तिवर्द्धनं भागवतमाहात्म्यं भागवतानां श्रीप्रह्लादोपलक्षितभक्तवृन्दानां माहात्म्यं वर्ण्यते । अनेन भागवतार्थमेव सर्वं करोति भगवान् नत्वन्यार्थमित्यस्यैवार्थस्य पर्यवसानं भविष्यतीति व्यञ्जितं । टीकाच स्वभक्तपक्षपातेनेत्यादिना । अतः गीयतइति। परमं पुण्यं यथास्यात्तथा या गीयते तां कथामिति यत्तदोरध्याहारेणान्वयः । अत्र च तैर्गीयमानत्वेन भक्तैकसुखप्रयोजनत्वमेव व्यञ्जितम् ॥ ४ ॥

चेहे

दयः पंचे

भूतप्रकृति श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ श्रीकृष्णाय नमः ॥

श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।

जगच्चक्षुः श्री[illegible]कं तमुपाश्रये ॥

गोपरामाजनप्राणप्रेयसेतिप्रभूष्णवे ।

तदीयप्रियदास्याय मां मदीयमहं ददे ॥

ऊतिः स्याद्वासना सात्र सप्तमे कथ्यते द्विधा ।

अशुभाच शुभाचापि कोपतोऽनुग्रहात् सताम् ॥

सन्तश्च त्रिविधाः शुद्धभक्ता ज्ञानादिमिश्रिताम् ।

भक्तिंदधानास्तन्मिश्रज्ञानवन्तश्च कीर्त्तिताः ॥

हिरण्यकशिपोः स्वाभाविकीया वासनाऽशुभा ।

तत्र हेतुः सनन्दादिकोपः प्राचीनएव सः ॥

तस्यापि पुत्रो यस्तस्य प्रह्लादस्य शुभोत्तमा ।

शुद्धभक्तौ वासना श्रीनारदाङ्घ्रिकृपाभरात् ॥

तत् संरक्ष्य सतामागः कुञ्जरात् तत्प्रसादजा ।

दीनता मानदत्वादि शिखाक्लृप्तमहाकृतिः ॥

भक्तिवल्ली नृभिः पाल्या श्रवणाद्यम्बुसेचनैः ।

एवं कथादशाध्यायां भक्तेः कैवल्यमीक्षयेत् ॥

पञ्चाध्यायां कथाभक्तेः प्राधान्यं गुणभूतताम् ।

तादृग्भक्तगुरोर्लभ्यं दर्शयेत्तादृगास्पदे ॥

स्युस्त्रिषु क्रमतः प्रेमशान्तभक्तत्वमुक्तता ।

एवं पञ्चदशाध्यायस्सप्तमः साधु सेव्यते ॥

तत्रतु प्रथमे विष्णोर्वैषम्यं वारयन्मुनिः ।

तस्य पार्षदयोराह सङ्क्षेपात्त्रिजनोः कथाम् ॥

पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" इतीन्द्रपक्षपातलक्षणं विष्णोर्वैषम्यमसहमान इव स्वयमवगतसिद्धान्तोऽपि महामुनेस्तस्य मुखादपि समाधानामृतमास्वादयितुमाह--समइतित्रिभिः । समस्य कथं वैषम्यं ! प्रियस्य कथमसुरेषु प्रीत्यभावः ? सुहृदश्च कथं तेष्वसौहार्दम् ? ॥ १ ॥

न चेन्द्रादिभिस्तस्य सुखं सिद्ध्यतीत्यतस्तत्पक्षपात इतिवाच्यमित्याह--नेति। निःश्रेयसं परमानन्दएव आत्मा स्वरूपं यस्य तस्य नहिसुखस्वरूपस्य कश्चिदन्यः सुखंसाधयेदितिभावः। न चासुरादिभिरुद्वेजकैस्तस्य दुःखं भवेद्यतस्तेषु विद्वेष इत्याह, नैवेति. असुरेभ्य उद्वेगो नास्त्यतो न विद्वेषस्तत्र हेतुः अगुणस्येति ॥ २ ॥

गुणान् अनुग्रहनिग्रहादीन्प्रति ॥ ३ ॥

यद्यतः प्रश्नात् हरेश्चरितं तदुत्तरत्वेनावश्य वाच्यं गीयते ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

॥ श्रीकृष्णाय नमः ॥

श्रीकृष्णं नियमानन्दं प्रणम्येह सुखप्रदः ।

सिद्धान्तद्योतको दीपः सप्तमेऽथ विरच्यते ॥

विविधावासनास्त्वत्र कामद्वेषादिकारिताः ।

कृष्णे कृष्णप्रदाः प्रोक्ता अन्येष्वन्यप्रदास्तथा ॥

हरेर्ज्ञानं च भक्तिश्च तथा वर्णाश्रमक्रिया ।

अन्तःकरणशुद्ध्यर्था वर्ण्यते परमादरात् ॥

अतिक्रान्तस्कन्धस्याष्टादशाध्याये"हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना। मन्युना शोकदीप्तेन ज्वलंती पर्य्यचिन्तयत्" इति विष्णोरिन्द्रपक्षपातित्वं श्रुत्वा पृच्छति-सम इति त्रिभिः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीयते परमं पुण्यमृषिभिर्नारदादिभिः ।
नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ ५ ॥
(१) (जिह्वां लब्ध्वापि यो विष्णुं कीर्त्तनीयं न कीर्त्तयेत् ।
लब्ध्वापि मोक्षनिश्रेणिं स नारोहति दुर्मतिः ॥ ० ॥
तस्माद्गोविन्दमाहात्म्यमानन्दरससुन्दरम् ।
शृणुयात्कीर्त्तयेन्नित्यं स कृतार्थो न संशयः ॥ ० ॥
तस्मादिमां कथां पुण्यां गोविन्दचरणाश्रिताम् ।
महापुण्यप्रदां यस्माच्छृणुष्व नृपसत्तम ! ॥ ० ॥)
निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ ६ ॥
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद्राजन् ! ह्रास (२) उल्लास एव वा ॥ ७॥
जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ।
तमसोयक्षरक्षांसि तत्कालानुगुणोऽभजत् ।
ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अगुणस्य उद्वेगादिकारिणीभूततमोरज आदिगुणरहितस्य ॥२॥

नारायणस्य गुणान् निग्रहानुग्रहरूपान् प्रति सुमहान् संशयो जातस्तं भवान् छेत्तुमर्हति ॥ ३ ॥

एवमापृष्टोमुनिः राजप्रश्नाभिनन्दनपूर्वकम् नहि भगवति वैषम्यादिदोषगन्धवातस्पर्शोऽपि प्रकृतिगुणविमोहितजीवकर्मानुरूपं निग्रहादिकं जीवोपकारार्थं स्वकृतधर्मसेतुरक्षार्थं सर्वकर्त्ता सर्वनियन्ता सर्वात्मा सर्वेश्वरोभगवान् करोतीत्युत्तरमाह-साधुपृष्टमिति सार्द्धैरष्टभिः श्लोकैः । अद्भुतं सर्वपुरुषार्थप्रदत्वेनाश्चर्यभूतं हरेश्चरितं मां प्रति त्वया साधु पृष्टम्. यद्धरेश्चरितं भागवतमहात्म्यं भागवतानां माहात्म्यं यस्मिन् तथाभूतं भगवद्भक्तिं वर्द्धयतीति तथा ॥ ४ ॥

भाषाटीका ।

॥ श्रीरुक्मिणी रमणो जयति ॥

॥ श्रीकालीयफणमाणिक्यरञ्जितश्रीपदाम्बुजाय नमः ॥

नत्वा श्रीरुक्मिणीकान्तं ध्यात्वा रामानुजं हृदि ॥
वृन्दावनोद्भवान् गुल्मलतावृक्षान् प्रणम्य च ॥ १ ॥
सप्तमस्कन्धभावार्थबोधिनी भक्तसम्मता ॥
भाषा भागवतार्थेण क्रियते साभिवर्द्धताम् ॥ २ ॥

राजो वाच ॥

हे ब्रह्मन् ! भगवान् स्वयं प्राणियों का सम और प्रिय है । फिर इन्द्र के लिये विषम के तरह दैत्यों को क्यों मारा ? ॥ १ ॥

साक्षात् परमानन्द स्वरूप इस भगवान का देवताओं से कुछ प्रयोजन नहीं तथा असुर लोगों से कुछ द्वेष नहीं तथा प्राकृत गुण शून्य के कुछ उद्वेग नहीं ॥ २ ॥

हे महा भाग ! इस प्रकार श्री नारायण के निग्रह अनुग्रहादि रूप गुणों का मुझ को वडा संशय उत्पन्न हुआ है इस संशय के छेदन करने को आपही योग्य हैं ॥ ३ ॥

श्रीशुक ववाच ॥

हे वड भागी हे राजन् ! आपने हरिका अद्भुत चरित्र भला पूंछा । क्योंकि जिसमें भगवद्भक्ति के वढाने वाला भागवत (भक्त) का माहात्म्य है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णाय व्यासाय कृष्णं मुनिं नत्वेत्यर्थः ॥५॥-

(१) व्याख्यानमन्तरा एते श्लोकाः अधिकाः दृश्यन्ते—वीर९ (क) पुस्तके । (२) उन्नाः इतिपाठान्तरम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्मात्प्रकृतेः परः अतोनिर्गुणः अतएवाजः अतएवाऽव्यक्तोरागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः सोऽपि स्वमायागुणं सत्त्वादिकमाविश्याधिष्ठाय बाध्यान्प्रति यद्वा देवासुराणां परस्परं या बाध्यबाधकता तां गतः प्राप्तः तत्र हेतुर्जात इत्यर्थः॥ ६ ॥

तत्र गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यात्तत्तु नास्तीत्याह—सत्त्वमिति । ननु, स्वेच्छया गुणाधिष्ठानेनापि पक्षपातवैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह—न तेषामिति सार्द्धेन । उल्लासोवृद्धिः ॥ ७ ॥

सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् तत्तद्देहं प्रविश्य वर्धयतीत्यर्थः रजसोजयकाले यक्षरक्षांसि तस्य कालस्यानुगुणस्सन् ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतस्तत्परमं पुण्यमतीवपुण्यतमं चरित्रं नारदादिभिः ऋषिभिर्गीयते यतस्त्वत्प्रश्नः साधुस्ततोहं कृष्णाय व्यासाय मुनये नत्वा हरेः कथां कथयिष्ये हरिगुणविषयकसंशयरूपत्वात्प्रश्नस्य तद्गुणवर्णनरूपकथाकथनेनैवोत्तरयामीत्यभिप्रायेण कथां कथयिष्ये इत्युक्तम् ॥ ५ ॥

एवं कथाकथनं प्रतिज्ञायाथ सत्त्वादिगुणोद्भवाभिभवादिना देवादीनां जयपराजयौ सत्त्वादिगुणाश्च तत्तज्जीवकर्मायत्तोद्भवाभिभववन्तः प्रसिद्धाः "कर्मवश्या गुणाह्येते सत्त्वाद्याः पृथिवीपते" इत्यादिभिः, अतः सर्वान्तरात्मतया अवस्थाय तत्तज्जीवकर्मानुगुणं गुणान्प्रेरयतः ईश्वरस्य न वैषम्यादिकमिति परिहरति—निर्गुणोपीति । निर्गुणः हेयगुणरहितः रागद्वेषादिरहित इत्यर्थः अव्यक्तः प्रमाणान्तराणामगोचरः अनेन प्रत्यक्षादिप्रमाणगोचररागद्वेषादिहेयगुणयुक्तप्राकृतवैलक्षण्यमुक्तम्, अत एव ह्यजः कर्मायत्तोत्पत्त्यादिरहितः भगवान्पूर्णषाड्गुण्यः प्रकृतेः परः"भूमिरापोनलोवायुः" "अपरेयमितस्त्वन्याम्" इत्युक्ताचिदचिदात्मकप्रकृतिद्वयाद्विलक्षणः अपिशब्देनैवंविधस्य वैषम्याद्यनर्हता सूच्यते. यद्यप्येवंविधः तथापि स्वमायागुणमाविश्य स्वांशभूतां गुणविशिष्टां प्रकृतिमाविश्येत्यर्थः, आवेशश्चात्र प्रेरणपर्यन्तः "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः । ईरयतीति वक्ष्यमाणत्वाच्च बाध्यबाधकतां गतः बाध्यबाधकदेवासुरवर्गयोरन्तरात्मतया तत्तच्छरीरकत्वेनावस्थित इत्यर्थः गुणकर्मानुगुणप्रेर्यमाणशरीरभूतदेवासुरवर्गगतो बाध्यबाधकभावः, न प्रकृतिद्वयविलक्षणतदात्मभूतपरमात्मगतः । यथा, देहादिगतावस्थाः नात्मगताः तथेति भावः ॥ ६ ॥

एतदेव प्रपञ्चयितुं तावद्गुणानां प्रकृतेरेव सम्बन्धित्वं तेषां तत्तज्जीवकर्मानुसारेण परिणामस्वभावत्वञ्चाह-सत्त्वमिति । सत्त्वादयः प्रकृतेरेव गुणाः, न त्वात्मनः; परमात्मनः परमात्मशरीरभूतप्रकृतिस्वरूपगताः न तु परमात्मस्वरूपगता इत्यर्थः तेषां सत्त्वादीनां सर्वेषां ह्रासोऽभिभवः उल्लास उद्भवश्च युगपन्न भवति किन्तु तत्तत्कर्मपरिपाककालानुगुणं कदाचित्कस्यचिद्ध्रासः कदाचिदुल्लासश्च भवतीत्यर्थः ॥ ७ ॥

ततः कथं वैषम्यपरिहारः ? इत्यत आह--जयकालेत्विति । सत्त्वस्य जयकाले उत्कर्षकाले कर्मायत्तसत्त्वगुणोपचयकाले इत्यर्थः देवानृषींश्चाभजत्तदनुग्राहको भवति रजसो जयकाले इत्यनुषङ्गः असुरानभजत् तमसोजयकाले तु यक्षान् रक्षांसि च तत्कालानुगुणस्तत्तत्कर्मविपाककालानुगुणोऽभजत्. अयं भावः—

"गुणप्रवाहपतितो भूतवर्गोपि यात्ययम् ।
कर्मवश्या गुणाह्येते सत्त्वाद्याः पृथिवीपते ॥ "

इति भगवत्पराशरवचनात्. सत्त्वादिगुणानां तत्तज्जीवकर्मविपाककालानुगुणह्रासोल्लासरूपपरिणामप्राचुर्यञ्च प्रसिद्धम्"आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे । धरां रजः स्वभावेन" इत्याद्युक्तरीत्या देवादीनां स्वस्वकर्मायत्तसत्त्वादिगुणप्राचुर्यञ्च प्रसिद्धम्. सत्त्वादिगुणानामुल्लासः सुखदुःखमोहाद्यापादक इति भगवता गीतम्—

"ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ।
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ॥
रजस्येतानि जायन्ते विवृद्धे कुरुनन्दन ।
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥
तमस्येतानि जायन्ते विवृद्धे पुरुषर्षभ !" ॥ इति

ईश्वरस्य तु सर्वान्तरात्मत्वं बहुप्रमाणप्रतिपन्नम् एवं सत्येतदुक्तं भवति. सर्वान्तरात्मतयावस्थित ईश्वरः सर्वदा कस्यचिदेव विजयं कस्यचित्सर्वदा पराजयं च न प्रतिदिशति. अपि तु तत्तद्देवादिकर्मपरिपाककालानुगुणसत्त्वादिगुणोद्भवकालेषु देवादीनां विजयं प्रतिदिशति अन्येषां तु पराजयं.सत्त्वादयुद्भवाभिभवयोश्च कर्माधीनत्वात्तदनुरूपप्रवृत्तेरीश्वरस्य न वैषम्यमिति. ननु, कर्मपरिपाककालानुगुणोल्लाससुखकरसत्त्वोपचयदशायां तद्गुणप्रचुराणां देवादीनां जयमावहतीति युक्तम्. इदन्त्वयुक्तं, रजस्तमसोरुपचयदशायामसुरक्षआदीन्भजत इति । तदुपचयस्य दुःखमोहादिफलकत्वेन पराजयाद्यावहत्वादुच्यते रजस्तमसोरुल्लासकालेऽसुरादीन् भजतीत्यस्य तेषां जयमावहतीत्यर्थः अपि तु रजस्तमसोरुल्लासफलभूतदुःखमोहादिनिमित्तपराजयादिकमावहतीत्येवञ्च यद्देवासुरादीनामपि स्वकर्मविशेषपरिपाकानुगुणं सत्त्वोल्लासस्तदा जयं प्रदिशत्यन्यथा तु पराजयम्. एवं देवादीनामपि कर्मविशेषपरिपाकानुगुणसत्त्वोद्रेकदशायां जयं, तेषामेव पुनः कर्मविशेषपरिपाकानुगुणरजस्तमसोरुल्लासे सति दुःखादिकरं पराजयादिकमिति. इयांस्तु विशेषः, देवादीनां पुण्यकर्मणां सत्त्वप्रचुरत्वात्प्रायशः तस्यैवोल्लासात्प्रायशो विजयः, कादाचित्कः पारजयः; असुरादीनां त्वपुण्येन रजस्तमःप्रचुरत्वात्तयोरेव प्रायश उल्लासात्प्रायशः पराजयः कादाचित्को विजय इति ॥ ८ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रश्नप्रतिवचनं भगवदनुग्रहमन्तरेण सुवचं न स्यादिति प्रकटनाय भगवन्तं प्रसाद्य वक्तव्यार्थं प्रतिजानीते नत्वेति ॥ ५ ॥

हरेर्हन्तृत्वधर्मो न घटत इति वदन् लोकेष्वेकत्वादुत तद्विलक्षणत्वादिति वावदीषि समत्वादिधर्मोपन्यासानुपपत्तेर्न प्रथमः अघटितघटकशक्तिमत्त्वेन सर्वस्योपपत्तेर्द्वितीयो युक्त एवेति भावेनाह—निर्गुण इति. अयं भावः । भगवान् स्वमायागुणं स्वेच्छागुणमनुसृत्य स्वाधीनप्रकृतिगुणनिर्मितदेवासुरदेहं वाविश्य तत्र स्थित्वा बहिश्च नृसिंहादिप्रादुर्भावरूपेणासुरादिबाधकतामसुरादिबाध्यवस्तुषु नियामकत्वेन स्थित्वा बाध्यतां गतो भवति किमत्र मानमितीयं शङ्का बाध्यादिस्थो हरिर्नित्यं बाध्यतादिगतेष्वपि गीयते । ननु, बाध्यत्वाद्यदोषयुतत्वत इति भविष्यत्पर्ववचनेन परिहर्तव्येति, हिशब्देन "लोकवत्तु लीलाकैवल्यम्" इति सूत्राल्लीलां प्रयोजयति निर्गुणत्वादिकं वैलक्षण्ये लिंगमिति ज्ञापनाय प्रयुक्तं पुरुषाणां गुणदोषानुसारेण रक्षाद्यभावेन समत्वादिकमपि न युज्यत इति प्रदर्शनायापिशब्दः तर्हि कुतोऽविविच्य न ज्ञायत इत्यतोऽव्यक्त इति—

"दधिस्थघृतवत्काष्ठे वह्निवच्च जनार्दनः ।
देहेन्द्रियासु जीवेभ्यो विविच्य ज्ञायते ननु ॥

इति । अतो विविच्या ज्ञानं युक्तम् ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्तं विवृणोति—सत्त्वमित्यादिना । प्रकृतेः स्वरूपभूता आत्मनः परमात्मनो ज्ञानादिवन्न स्वरूपभूताः किन्त्वधीनाः जीवस्याप्यभिमानादेव गुणानां भिन्नस्वभावत्वाद्युगपत्प्रवृत्त्यनुपपत्तेरित्यतः शक्तिप्रकटनप्रकारं दर्शयति नतेषामिति—ह्रासोऽनुद्भूतत्वमुत्साहउद्भूतत्वं क्षयवृद्धिक्रमेणेति परिहारः ॥ ७ ॥.

तं क्रमं विविनक्ति—जयेति । सत्त्वस्य जयकाले उत्साहविषये देवर्षीन् भजमानाभासीत्यन्वयः रजसउत्साहविषये असुरान्वर्द्धयन् तमस उत्साहविषये यक्षादीन्वर्द्धयन्नेवं गुणानां शक्तिं जृम्भयतीत्यर्थः । तत्रापीत्थं भावोऽस्तीत्याह—तत्कालेति, तत्तत्कालगुणमनुसृत्य वर्तमानः ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नत्वेत्यर्द्धकम् ॥ ५ ॥

तत्र तावद्व्यञ्जितार्थानुरूपमेव प्रश्नोत्तरमाह—निर्गुणोऽपीति । निर्गुणः प्राकृतगुणरहितः अत एवाजो नित्यसिद्धः अत एव चाऽव्यक्तः । प्राकृतदेहेन्द्रियादिरहितत्वादन्येन व्यज्यत इति स्वयं प्रकाशदेहादिरित्यर्थः । ततश्च प्रकृतिगुणेषु रागद्वेषादिरहितश्चेति भावः । एवमेवम्भूतोऽपि स्वेषु भक्तेषु या माया कृपा तत्रोचितो यो गुणो लीलाकौतुकमयविशुद्धोऽर्जितसत्त्वाख्यस्तमाविश्य आलम्ब्य भगवान् नित्यमेव प्रकाशितषड्गुणैश्वर्यस्सन् एतदप्युपलक्षणं कदाचिददित्यादौ जातः संल्लोकेन्द्रियेषु व्यक्तोऽपि सन् बाध्यबाधकतां गतः, कदाचिदसुरैर्बाध्यतां पराजयं कदाचित्तु तेषां बाधकतां जयं प्राप्त इत्यर्थः । अत्र सत्यप्यर्थान्तरे भागवतानुग्रहप्रयोजनत्वेनोपक्रान्तत्वादुपसंहरिष्यमाणत्वादूगति सामान्याच्छलमयमायया तत्कर्तृत्वेऽप्यधिकदोषपाताच्च तन्नापेक्ष्यते. तस्माद्भक्तविनोदैकप्रयोजनकस्वैरलीलाकैवल्येनान्यत्र रागद्वेषाभावान्नात्र वैषम्यमिति भावः । अत एव बाध्यतामपि यातीति बाधकतया सहैवोक्तम्, तथा निजस्वरूपशक्तिविलासलक्षणलीलाविष्कारेण सर्वेषामेव हितं पर्यवस्यतीति सुहृत्त्वादिकञ्च नापयातीति ध्वनितम् ॥ ६

अथ तस्य बाध्यबाधकताव्यवस्थां स्थापयति द्वाभ्याम्—तत्र ये तु सत्त्वादयो गुणास्तेषु न तदीयत्वं न तदावेशो न च स्वदैकावस्थात्वं यतः पूर्वत्र पद्ये तस्य गुणस्यान्यतमत्वदर्शनाय स्वेति आविश्येति च विशिष्य स्वमायागुणमाविश्येत्युक्तम्. न तु मायागुणमुपधायेत्याह—सत्त्वमित्यर्द्धकेन; सत्त्वादयो गुणाः प्रकृतेरेव नात्मनः परमेश्वरस्य तु ये सर्वेऽपि नित्यमेवोल्लासिनो गुणास्ते तु ते न भवन्तीत्यर्थः । तदुक्तम्

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।
स शुद्धःसर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु इति ॥
ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंस्थितौ ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" ॥

इत्यादिवचनानि भगवत्सन्दर्भे दर्शितानि न तेषामिति सार्द्धकम् । यस्मान्नात्मनस्ते तस्मादेव युगपद्ध्रास एव उल्लास एव वा नास्ति । किन्तु विकारित्वेन परस्परमुपमर्द्योपमर्दत्वात् कस्यचित् कदाचिद्ध्रासः कस्यचित् कदाचिदुल्लासो भवतीत्यर्थः । ततश्च देवादीनां तत्साहाय्ये असुरादीनां तद्युद्धे योग्यतां दर्शयति तथा सत्त्वाद्युल्लासकाले तल्लीलायास्तदधीनत्वमेव यत् प्रतीयते न तदनुवदन् परिहरति सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् भजति भगवांस्तत्तद्देहेषु सत्त्वोपाधिकं निजं तेजः सञ्चारयति येन च तान् सहायमानान् करोतीत्यर्थः । एवं रजसो जयकाले असुरेषु रज उपाधिकं तमसो जयकाले यक्षरक्षस्सु तमउपाधिकमिति योजनीयम् । ततश्च येन तान् यक्षादीन् प्रतियोद्धॄन् भगवान् कुर्वन् देवादीन् पराजितान् करोति स्वमपि तथा दर्शयतीत्यर्थः । तदेवं भक्तरसपोषकलीलावैचित्र्याय बाध्यबाधकतां यातीति दर्शितं यच्च क्षीरोदमथने श्रूयते । "तथासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः" इति । अत्रापि तद्वैचित्र्यार्थमेव तथा तत्तदावेशस्तस्येति लभ्येत नन्वायाता तस्य तत्तद्गुणोद्बोधककालपारवश्येन स्वैरलीलाहानिः । ततश्च गुणसम्बन्धातिशये वैषम्यादिकञ्च स्पष्टमेवेत्याशङ्क्याह—तत्कालानुगुण इति । तेषां सत्त्वादीनां काल एवानुगुणो यस्य सः भगवच्चरण इतिवत्. समासः स्वैरमेव क्रीडति तस्मिन् नित्यमेव तदनुगतिक्रयया मायया यया तदनुसारेणैवानादिसिद्धप्रवाहं तं तं जगत्कर्मसमुदायं प्रेर्य, स्ववृत्तिविशेषरूपत्वेन प्रवर्त्यमानः सत्त्वादिगुणानां काल एव तदधीनो भवतीत्यर्थः । कालस्य मायावृत्तित्वमुदाहृतं कालो दैवमित्या[illegible] त्वन्मायैषेति । यद्वा तेषां कालोऽपि सदानुगतो भक्ता[illegible]हमात्रार्थस्वैरचेष्टात्मकप्रभावलक्षणो गुणो यस्य स इ[illegible]ः । ततोऽपि तच्चेष्टानुसारेणैव मायया तत्तत्प्रवर्त्तनमिति भा[illegible] । तदु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

क्रम् ।"योऽयं कालस्तस्यते व्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वम्" इति । तथा चोभयथापि न पारवश्यमित्यायातम्. इत्थमेव श्रीकपिलदेवेनापि "यः कालः पञ्चविंशकः" इति । "प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्" इति च तत्र मायाऽव्यक्तचत्वपुरुषगुणात्वलक्षणमतद्वयमुपन्यस्तवान् । अत्र चास्य चेष्टा प्रभावस्य भक्तिविनोदायैव मुख्यावृत्तिः गुणोद्बोधादिकार्यन्तु तत्र स्वत एव भवतीति तत्र प्रवृत्त्याभास एव ततश्च पूर्वांशः स्वयमेवेति स्वरूपशक्तेरेव विलासः । परस्तु तदाभासरूप एवेत्याभासशक्तेर्मायाया एवान्तर्गतः । योऽयं काल इत्यादौ निमेषादिरित्युक्तिस्तु द्वयोरभेदविवक्षयैवेति ज्ञेयम । अत एवं व्याख्येयं यथा भृत्यस्यानुगतो भृत्यः अनुभृत्यः तथा तत्र तत्प्रभावलक्षणस्य गुणस्याऽनुगत आभासरूपो गुणः अनुगुणः तथा च तेषां कालोऽपि अनुगुणो न तु साक्षाद्गुणोऽपि यस्येति ॥ ७ ॥ ८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णाय व्यासाय ॥ ५ ॥

स्वमायागुणं सत्त्वादिं प्रविश्य अधिष्ठाय बाध्यत्वं बाधकत्वञ्च गतः प्राप्तः गुणानां परस्परबाध्यत्वबाधकत्वलक्षणं वैषम्यगुणाधिष्ठातरि भगवत्यारोपितमित्यर्थः ॥ ६ ॥

स्वरूपतस्तु भगवान् सर्वत्र सम एवेत्याह—सत्त्वमिति । प्रकृतेरेव गुणाः न त्वात्मनो भगवतः प्रकृतेःस्वशक्तित्वेऽपि स्वरूपभूतत्वाभावादिति भावः तस्मात् सर्वत्र दृश्यमानं भगवतो वैषम्यं गुणवैषम्यमूलकमेव तच्च गुणवैषम्यं गुणानां ह्रासाधिक्यरूपं तच्च ह्रासाधिक्यं न यौगपद्येन भवति किन्तु क्रमेणैवेत्याह--न तेषामिति । ह्रासो बाध्यत्वहेतुः उल्लास आधिक्यं बाधकत्वहेतुः । तेच सत्त्वादीनां ह्रासाधिक्ये तदुद्भवानां देवासुररक्षसां ह्रासाधिक्याभ्यामनुमेये ॥ ७ ॥

तत्र गुणानांस्वतो जाड्यादेव ह्रासाधिक्ययोरप्यकिञ्चित्करत्वात्तत्र तत्राधिष्ठातृत्वेन भगवत्प्रवेशमाह—जयेति । सत्त्वस्य जयकाले आधिक्यसमये देवानृषींश्च अभजत् । तदा सत्त्वं यथा अधिकमभूत्तथा तत्राधिष्ठानमपि तस्याधिकमभूदिति स तत्तद्देहं प्रविश्य तत्तद्बलमधिकयन् असुरराक्षसादीन् बाधत इत्यर्थः । एवं रजसो जयकाले असुरान् तमसो जयकाले यक्षरक्षांसि तस्य कालस्य अनुगुणः अनुरूपः सन्निति गुणाधिक्यस्यापि कारणं काल एव न तु स इत्यर्थः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नारदादिभिर्गीयते यतः परमम् पुण्यम् यतोहरेश्चरितम् इति पृश्नः कुतोऽतस्तत्प्रत्युत्तरदानार्थं हरेः कथां कथयिष्ये कृष्णाय मुनये कृष्णद्वैपायनं तत्त्वावगन्तारं तथा ॥ ५ ॥

निर्गुणः प्राकृतगुणतन्निबन्धनकर्मतज्जन्यदेहादिरहितः अत एवाऽजः प्राकृतगुणहेतुकजन्मरहितः अतएव अव्यक्तः व्यक्तश्चिदचिदात्मकं विश्वं तद्भिन्नः सर्वदोषास्पृष्ट इत्यर्थः भगवान् स्वाभाविकैश्वर्यादिषड्गुणयुक्तः प्रकृतेरिति पदं सामान्यतया पराऽपरशब्दवाच्यप्रकृतिद्वयपरम् ।

"भूमिरापोनलोवायुः खं मनोबुद्धिरेवच ।
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" ॥

इति प्रकृतिद्वयात्परस्तदाश्रय इत्यर्थः अत एव स्वमायागुणं स्वमायागुणपरिणामं जीवविशिष्टं देहेन्द्रियसंघातमाविश्य अन्तर्यामितया प्रविश्य बाध्यबाधकतां जीवानां देवासुरादीनां परस्परं या कर्मयोगाद्बाध्यबाधकता तां हेतुतया गतोभवति तत्तत्कर्मानुसारेण तां तां बाधकतां च देहिभ्यो ददाति स्वयं तु समएवेत्यर्थः ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्त्या शक्तिगुणाः कार्यकारणरूपाः शक्तिमन्तं सर्वात्मानं न विमोहयन्ति तदात्मकत्वात् जीवात्मानं तु ह्रासवृद्ध्यादिरूपैर्विमोहयित्वा शुभाशुभानि कर्माणि तेन कारयन्ति अतदात्मकत्वादित्याह सत्त्वमित्यादिना सत्वंरजस्तमइति गुणाः प्रकृतेः भगवच्छक्तेः, अतोभगवति न प्रभावं कुर्वंतीतिभावः आत्मनोजीवस्य तु न तदात्मका न भवन्ति तस्य सर्वात्मत्वाभावात् अतस्ते न साधु असाधु च कर्म कारयन्तीतिभावः गुणास्ततज्जीवकर्मपरिपाककालानुसारेण विषमाभवन्ति न तु युगपदित्याह न तेषामिति ॥ ७ ॥

सत्त्वस्य जयकाले देवादिकर्तृकसात्त्विककर्मपरिपाककाले भगवान् तत्कालानुगुणः सन् देवादीन् अभजत् तद्बृद्धिहेतुर्भवति रजसोजयकालेऽसुरान् तमसो जयकाले यक्षरक्षआदीन् अभजदित्यन्वयः ॥ ८ ॥

———

भाषाटीका ।

जो परम पुण्य माहात्म्य नारदादि ऋषियों से गाया जाता है । अब मैं श्रीकृष्ण मुनि (वेद व्यासजी) को नमस्कार करके हरि कथा को कहता हूं ॥ ५ ॥

जो पुरुष जिह्वा को पाकर कीर्त्तनीय विष्णु का कीर्त्तन नहीं करता है वह दुर्मति मोक्ष की निसेनी को प्राप्त होकर भी आरोहण नहीं करता है ॥ ० ॥

तस्मात् आनन्द रस सुन्दर श्रीगोविंद के माहात्म्य को नित्य जो श्रवण करते हैं कीर्त्तन करते है वे पुरुष कृतार्थ हैं इस में संशय नहीं ॥ ० ॥

तिसी से गोविंद चरणाश्रित महापुण्य प्रद इस कथा को हे नृपसत्तम ! आप श्रवण करौ ॥ ० ॥

प्रकृति से पर अज अव्यक्त भगवान् निर्गुण होकर भी अपने माया के गुणों में। प्रविष्ट होकर, बाध्य बाधक भाव को प्राप्त हुए हैं ॥ ६ ॥

सत्त्व रज और तम ये तीनो प्रकृति के गुण हैं आत्मा के नहीं। हे राजन् | उन गुणों का ह्रास वा उल्लास एक ही बार नहीं होता है ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

विदन्त्यात्मानमात्मस्थं मथित्वा कवयोन्ततः ॥ ९ ॥

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।

सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥

कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव ! सत्यकृत् ।

(१) (सतत्रतत्रोभयसिद्धिमाप्नुयाल्लिङ्गात्मनोलिङ्गगुणाश्च सन्ति ॥ ० ॥)

य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ।

तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥ ११ ॥

(स वा पुनः स्वसृष्टस्य स्थितिरक्षानुवृत्तये ।

सत्त्वं सुरगणान्विष्णुरुपबृंहयते मुहुः ॥ ० ॥)

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ।

प्रीत्या महाक्रतौ राजन् ! पृच्छतेऽजातशत्रवे ॥ १२ ॥

भाषाटीका

सत्त्व गुण के वृद्धिकाल में ईश्वर देव और ऋषियों के शरीर में प्रविष्ट होकर, और रजो गुण के वृद्धिकाल में असुरों के देह में प्रविष्ट होकर, तथा तमो गुण के वृद्धि काल में यक्ष राक्षसों के देह में प्रविष्ट होकर, तिस २ काल के अनुगुण उनकी वृद्धि करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

समस्यापि निमित्तभेदेन वैषम्ये दृष्टान्तः ज्योतिरादिरिव ज्योतिरग्निर्यथाकाष्ठादिषु जलं यथा पात्रेषु आकाशो यथा घटादिषु तथा भगवान्नानारूपआभाति. ननु, तर्हि तद्वदेव विवेकेन किं न प्रतीयते तत्राह, संघातात्सुरादिदेहात्र विविच्यते न पृथक् प्रतीयते तर्हि तान्भजतीति कुतोज्ञायते तत्राह, विदन्तीति, आत्मस्थं परमात्मानं कवयोनिपुणाः मथित्वा कार्यदर्शनलिङ्गेन विचार्य जानन्ति अन्ततःस्वभावकालकर्मादिवादनिषेधेन विदन्तीति पाठे लाभोपि ज्ञानमेव यत्रापि ज्योतिरादिरिवेतिदृष्टान्तं यथा सूर्यकान्तादौ दाहदर्शनाज्ज्योतिर्ज्ञायते यथा च गन्धदर्शनाद्वायुरित्यादि ॥ ९ ॥

तदेवं मायागुणवशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तम्. तर्हि गुणपारतन्त्र्यादनीश्वरत्वमाशङ्क्याह—यदा आत्मनोजीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुर्यदा तदा सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन्यदा तदा तमः पृथगीरयति प्रेरयति आधिक्यं नयतीत्यर्थः ॥ १० ॥

यदासिसृक्षुरित्यादिनिर्देशात्प्रतीतं कालपारतन्त्र्यं वारयन्प्रधानपुरुषपारतन्त्र्यमपिवारयति-कालमिति । हे नरदेव ! प्रधानपुम्भ्यां निमित्तभूताभ्यां सत्यकृदमोघकर्ता ईशस्तयोः सहकारित्वेनाऽऽश्रयभूतं चरन्तं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वात्कालस्य न तत्पारतन्त्र्यमित्यर्थः । तथाऽपि प्रस्तुते किमायातं तत्राह यएषकालः सत्त्वमेधयति वर्धयत्यतोहेतोरीशिताऽपीश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीव तत्प्रत्यनीकानसुरान्सुरप्रतिपक्षान्प्रमिणोति हिनस्ति चेत्यन्वयः उरु प्रभूतं श्रवः कीर्तिर्यस्य सः कालशक्तिक्षुभितगुणगतवैषम्यमिह सन्निधिमात्रेणतदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥ ११ ॥

तदानीं तयोर्न सुरपक्षपातेन वधः किन्तु ब्रह्मशापेनासुरीं योनिं प्राप्तयोरनुग्रहार्थं एवेति वक्तुमितिहासमुपक्षिपति—अत्रैवेति । अत्र द्वेषादिरहितस्यापि दैत्यवधे नारदेनेतिहासः प्रस्तावितः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"स्वमायागुणमाविश्य बाध्यबाधकतां गतः" इत्यनेन तत्तद्बाध्यबाधकेषु देवासुरादिवर्गेषु ईश्वरस्यानुप्रवेश उक्तः कथमनुप्रविष्टो विज्ञायत इत्यपेक्षायां तत्तदनुप्रवेशे अनुप्रविष्टस्य विविच्य द्रष्टुमशक्यत्वे सम्यगुपायेन विवेचनीयत्वे च दृष्टान्तमाह-ज्योतिरिति । काष्ठादिषु ज्योतिःप्रभृतिवस्तुवत् अनुप्रविष्टोप्याभाति तद्गततदोषास्पृष्टः प्रकाशते. "अनश्नन्न्यो अभिचाकशीति" इतिश्रुतेरिति भावः सङ्घातात्काष्ठादिसङ्घातादिव देहेन्द्रियभोक्तृवर्गक्रा

(१) इदमधिकत्वेन पठ्यते-विजय० ।

Dr. Urmila Sharma Collection, Varanasi

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सङ्घातान्न विविच्यते प्रकृतिपुरुषेश्वरतत्त्वयाथात्म्यविद्भिः प्रकृतिपुरुषाभ्यां विलक्षणत्वेन न ज्ञायते इत्यर्थः कवयस्तत्त्वत्रययाथात्म्यविदस्त्वात्मस्थं जीवात्मनि स्थितम् "य आत्मनि तिष्ठन्, यो विज्ञाने तिष्ठन्" इति श्रुतेः आत्मानं परमात्मानं मथित्वा विवेकपूर्वकं तद्भक्तियोगमभ्यस्येत्यर्थः अन्ततोऽनेकजन्मावसाने विदन्ति साक्षात्कुर्वन्ति स्वमायागुणमाविश्येत्यनेन प्रेरणपर्यन्तानुप्रवेशोऽभिसंहितः ॥ ९ ॥

तदेवगुणप्रेरकत्वं विवृणोति–यदेति । एषः परः पुरुषो भगवान्यदा स्वमायया स्वसङ्कल्परूपज्ञानेन प्रकृत्या वा आत्मनो जीवस्य, जात्यभिप्रायमेकवचनम् आत्मनामित्यर्थः । पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छुस्तदा रजः सृजति प्रेरयतीत्यर्थः तम ईरयतीत्यनेनैकार्थ्यात् यदा सृष्ट्यनन्तरं विचित्रासु पूर्षु देहेषु रिरंसुः रन्तुमिच्छुः रिरक्षिषुरित्यर्थः । तदा सत्त्वं सृजति. यदाचेश्वरः शयिष्यमाणः उपसञ्जिहीर्षुस्तदासौ परमपुरुषस्तम ईरयति ॥ १० ॥

अथ तदा तत्कालानुगुणोऽभजदिति सूचितं कालप्रेरकत्वं विवृणोति—कालमिति । हे नरदेव ! ईशः परमात्मा चरन्तं प्रवर्त्तमानमाश्रयं स्वव्याप्यतया शरीरभूतं कालं सृजति निमेषकाष्ठाद्यवस्थं करोति एवं कालं सृष्ट्वा प्रधानपुरुषाभ्यां चिदचित्समष्टिभ्यां सत्यकृत् सत चिद्व्यष्टिः त्यत् अचिद्व्यष्टिः तदुभयं करोतीति तथा सत्यच्छब्दयोश्चिदचिद्व्यष्ट्योः प्रयोगः "तदनुप्रविश्य सच्चत्यच्चाभवत्" इत्यादि श्रुतौ प्रसिद्धस्तथा सत्यच्छब्दयोस्तत्परत्वे श्रुतिः । "अथ यद्देवेभ्यःप्राणेभ्यश्च तत्सत्, अथ यद्देवाः प्राणाश्च तत्यं तदेकया वाचा समभिव्याहृयते सत्यमिति" इति. देवाः देवाधिष्ठितानीन्द्रियाणि तेभ्यः परः तत्संसृष्टश्चेतनः सत् देवाद्यचिद्व्यष्टिस्तु त्यं तदेतदुभयं सत्यमित्येकया वाचा एकशब्देन समभिव्याहृयते बोध्यते इति तदर्थः । एवमीश्वरस्य तत्तज्जीवकर्मपरिपाकानुगुणकालप्रेरकत्वमुक्तं तच्चात्मत्वेन तदनुप्रवेशपूर्वकमिति च, ईश्वराधीनः कालो देवादीनां तत्तत्कर्मपरिपाकानुगुणसत्त्वादिगुणवृद्धिहेतुरिति वदन् सर्वान्तरात्मतया देवादिकर्मानुगुणं गुणान् प्रेरयतो नेश्वरस्य वैषम्यमित्युत्तरमुपसंहरति--यइति । हे राजन् ! ततः कर्मानुगुण्येनेश्वरस्य गुणकालप्रेरकत्वात् य एषः गुणप्रेरकः कालः कालशरीरकः तत्प्रेरकश्चेशिता ईश्वरः सत्त्वं कर्मपरिपाकायत्तकालकृतगुणोन्मेषसत्त्वगुणप्रचुरं सुरानीकमिव सुरानीकमेव 'इवशब्दोऽवधारणे' वर्द्धयति तस्यैव जयमावहतीत्यर्थः तद्वृद्धेस्तत्प्रतिपक्षक्षपणपूर्वकत्वात्सुराणां प्रियस्सन् तत्प्रत्यनीकान् सुरानीकप्रतिपक्षरूपान् रजस्तमःप्रचुरान् प्रमिणोति विनाशयति उरुश्रवाः विपुलकीर्तिः असुरानीकविनाशनेन वैषम्यादिसम्भावनया नापकीर्त्तिमानीश्वरः, किन्तु विपुलतमकीर्त्तिमान् इत्यर्थः ॥ ११ ॥

एवं सर्वभूतसुहृदः समस्येश्वरस्य देवासुरादिजयापजयहेतुत्वेपि कर्मानुगुण्याद्वैषम्याभाव उक्तः इदानीं तस्य सर्वभूतसुहृत्वे इतिहासं दर्शयति—अत्रेति । अत्रैव तस्य सर्वभूतसुहृत्व एव हे राजन् ! महाक्रतौ राजसूये प्रीत्या त्वादरेण पृच्छते अजातशत्रवे युधिष्ठिराय सुरर्षिणा नारदेनेतिहास उदाहृतः ॥१२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इममर्थमनुमानिकं करोति–ज्योतिरादिरिति । अयमर्थः ज्योतिरादीत्युत्तरायणादिकालादिगुणः केषाञ्चित्फलानामुत्साहं केषाञ्चिद्ध्रासं कुर्वन् यथा सत्त्वादिजयादिविषये उत्साहादिकालमनुवर्तमानो भाति तथेतिकथमव्यक्तत्वं हरेरिति तत्राह—संघातादिति, देहेन्द्रियादिकार्यकारणसंघातान्न विविच्यते पृथग्भूतो न ज्ञायते अत्रापीदमेवोदाहरणं ज्योतिरादि घृतादि द्रव्यं दध्यादिभ्यो मथनात्पूर्वं न विविच्यते पृथग्भूतं न ज्ञायते न प्रतीयते तथात्मापीतिभावः "तेजोऽसितंत्रेधाविधीयते" इतिश्रुतेः । घृतस्य ज्योतिःशब्दाभिधेयत्वं प्रामाणिकं "दधिस्थघृतवत्काष्ठे वह्निवच्चजनार्दनः" इत्यादेश्च. ननु, यदि केनचिद्देहादिव्यतिरिक्तत्वेनायं ज्ञायते तर्हि दधिस्थघृतवदित्यादिनिदर्शयितुं शक्यं, तदेव कुत इत्याह—विदन्तीति । कवयः ब्रह्मादयः शास्त्रेण मथित्वा ततो निर्णीयात्मस्थं देहादिस्थमात्मानं विदन्ति जानन्ति किंचान्ततश्चरमनाशे विदन्ति लभन्ते "लभनिष्पत्तौ" इतिधातोः नितरां प्राप्नुवन्तीत्यर्थः अनेन कवीनां ज्ञानमस्मिन्नर्थे प्रमाणमुक्तं भवति ॥ ९ ॥

देहादेर्विविक्तत्वेन ज्ञानं कस्मान्नोत्पद्यत इति आशंक्य सृष्टिशरीरेषु जीववत्प्रतिष्ठत्वान्न तद्विषयं ज्ञानमित्यभिप्रेत्याह—यदा सिसृक्षुरिति । यदा परमात्मात्मनोर्थे निवासाय पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छति तदा गुणवैषम्यन्यायेन स्वेच्छया नियतो रजोगुणमुपादाय महदहंकारपञ्चमहाभूतानि सृष्ट्वा तैः प्रथक् तत्तद्योग्यतानुसारेण शरीराणि सृजति । यदा चेश्वरस्तासु विचित्रासु. सुरनरतिर्यक्संज्ञितासु पुरीषु रिरंसुः जीवगतस्वादृष्टयोग्यतामनुसृत्य सुखादिकमुत्पाद्य तत्साक्षित्वेन क्रीडितुमिच्छति तदा स्थितिहेतुत्वात्सत्त्वगुणमुपादत्ते यदा शयिष्यमाणो योगनिद्रां चिकीर्षति तदाऽसौ तमोगुणमीरयति तच्छक्तिमुज्जृम्भयति ॥ १० ॥

किञ्च चरन्तमतीतानागतवर्तमानभेदेन वर्तमानं कालं सृजतीत्यर्थः ईश आश्रय इत्येताभ्यां पदाभ्यां सर्जनसामर्थ्यं सूचयति अत्र प्रमाणमाह—सत्यकृदिति, सत्यं मीमांसाशास्त्रं तस्य कर्ता ॥ इदानीं स्वसृष्टानामन्तःशयनप्रकारमाह—स तत्रेति, तत्र तत्र देहेषु स्थितम् उभयसिद्धि महति वस्तुनि महत्परिमाणम् महासामर्थ्यप्रकटनमणुपरिमाणमणुसामर्थ्यं वाप्नुयात् "अणोरणीयान्महतोमहीयान्" इतिश्रुतेः अत्रेदं लिङ्गात्मनो लिङ्गगुणाश्च सन्तीति निदर्शनं चशब्द एवार्थे यथा लिंगं शरीरस्थानीयं काष्ठं व्याप्य तिष्ठन्नग्निर्लिंगात्मेत्युच्यते तस्याग्निर्लिंगस्य काष्ठस्य गुणाः महत्त्वाणुत्वलक्षणाः सन्ति महति काष्ठे महान् अणुनिकाष्ठे अणुरग्निरिति "लिङ्गं शरीरे चिह्ने च साधने शेफसस्मनि" इत्यभिधानं. ननु सृष्टौ प्रवर्तमानेश्वरस्य निरपेक्षत्वात्स्वातंत्र्येण किञ्चित्कारणापेक्षासम्भवः तदनपेक्षत्वे मृदंडादेरिवशक्त्यभावेन कार्यसामग्र्यभाव इति तत्राह—लिङ्गात्मनः प्रधानादेः कारणस्य ये लिङ्गगुणाः कार्यजनकशक्तिलक्षणाः सन्ति ते च लिङ्गात्मनः शरीरस्वामिनो हरेः सन्ति विद्यमानास्तदधीनत्वादिति क्रियावृत्त्या योजनीयं "द्रव्यं कर्म च कालश्च" इत्यादेः यद्वा लिङ्गस्य प्रधानादेर्गुणाः कार्योत्पादनशक्तिलक्षणाः लिङ्गात्मनः पूर्णज्ञानैश्वर्यत्वाक्षरूपस्य

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेः सन्ति तेषां स्वरूपाभिन्नत्वद्योतनाय चशब्दः ऊर्णनाभिस्तुरीवेमादिविना स्वरूपभूतलीलयैव यथा जालं करोति तथायमित्यर्थपरोवा प्रधानसृष्टिर्ब्रह्मणोऽस्तु अवान्तरसृष्टिरवान्तरकारणात्स्यात् कुलालादेर्दृष्टत्वादित्यतोवाह—स इति, तत्रतत्र कार्यकारणेषु प्रातिस्विकेषु स्थित्वोभयसिद्धिं जगत्कारणस्य जनकत्वलक्षणां कार्यस्य जन्यत्वफलं प्रापयति उभयोः शक्त्योरेतदधीनत्वादित्याह--लिंगात्मन इति, लिङ्गात्मनो मृदादेर्लिंगगुणाः कार्यजननशक्तयः सन्ति ते चानेन नियता इति शेषः, लिङ्गात्मनः कार्यस्य ये लिंगगुणा पृथुबुध्नोदराकारादिलक्षणाः सन्ति ते च "तत्रतत्रान्वितो विष्णुस्तत्तच्छक्तिप्रबोधकः" इत्यादेः अनेन बाध्यबाधकताङ्गत इत्येतत्स्पष्टीकृतं तथाहि तत्रतत्र देवासुरेषु उभयसिद्धिं जयपराजयलक्षणां कार्यसिद्धिं प्राप्नोति शिरस्त्राणवर्मादिलक्षणां वहतो भटस्य ये लिङ्गगुणाः शौर्यादिलक्षणाजयापजयौ वा ते च हर्यधीनाः "स वै बलं बलिनां चापरेषाम्" इत्यादेः। अत्र सर्वस्य हर्यधीनत्वदर्शनाय प्रधानपुंभ्यां कार्यकारणाभ्यां कालः सृजतीत्यङ्गीकारे प्रधानपुरुषावन्तरेण कालसृष्ट्यशक्तिर्हरेःप्रकटिता स्यादित्यन्यथा प्रतीतिनिरासायाचार्यैस्ताभ्यां सहेति व्याख्यातम् ॥ ० ॥

नन्वत्र साम्यगुणाधिकरणस्य हरेर्वैषम्याधिकरणत्वं कथमित्यस्य प्रश्नस्य परिहारः कथं स्फुटमायात इत्याशंक्य स्वतो देवप्रियत्वमसुराप्रियत्वं मनुष्याणामुभयत्वमेव समत्वं तत्तद्योग्यतावतां तेषामन्यथा तदतिलंघने त्वदभिमतवैषम्यप्राप्तिसाम्यहानी स्यातामित्याशयवानाह--य एष इति। य एष हरिः काले कालविषयेपि ईशिता कालस्यापि प्रवर्त्तनसमर्थः प्रधानपुरुषयोरीशितृत्वं किं वक्तव्यमित्यपिगदं स विष्णुः सुरानीकमिवस्थितं सत्त्वमेधयति सत्त्वस्य देहादिकारणत्वात्सत्त्वगुणप्रधानान् देवान् समेधयतीत्यर्थः रजस्तमस्कान् रजस्तमःस्वभावान् तत्प्रत्यनीकान् तेषां सुराणां शत्रुभूतान् असुरान् प्रमिणोति निहन्ति 'मिञ् हिंसायाम्' इति धातुः सुरप्रिय इत्यनेनासुराणामप्रियो मनुष्याणामुभयात्मकः स्वभावत इति ध्वनितं तदुक्तं—

"स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः।
अप्रियश्चासुराणां स स्वभावाच्चूभयं नृणाम्" इति ।

सत्त्वमेधयति इत्यनेन या सुखयोग्यता रजस्तमस्कानित्यनेन या वधयोग्यता ये च देहेन्द्रियादेः कारणभूतास्त्रयोगुणाः यश्च गुणानामुत्साहकरः कालः यच्च तेषां त्रयाणां गुणानां पुण्यपापोभयलक्षणं कर्म यच्च मूलकारणभूतं प्रकृतिपुरुषस्वरूपं यश्च भक्त्यादिकमेतत्सर्वमवेक्ष्य देवानां भक्त्यादिगुणानितरेषां द्वेषादिदोषान्मनुष्याणामुभयात्मकमुत्पाद्यसुखासुखजयापजयजननमरणादिफलदातृत्वेन समइत्युक्तं। तदुक्तं—

"देशकालौ गुणांश्चैव भक्त्यादीनप्यवेक्ष्य तु।
योग्यताश्च तथा कर्म सम इत्यभिधीयते ॥
स्वतः प्रियोपि देवानामुत्पाद्यैव गुणानिमान्।
इतरेषां तथा दोषान्सुखदुःखे ददात्यजः॥
उभयं तु मनुष्याणामतः सम इतीरितः" ॥ इति

ननु सुरादिषु स्थितानां गुणदोषाणां तत्तत्कालीनत्वेनोत्तरकाले नाशसंभवेनानित्यत्वे नियमो न स्यादित्याशंक्य शास्त्रविहितत्वान्नियमोस्त्येवेत्याशयवानाह--उरुश्रवा इति, उरु बहु श्रूयते इत्युरुश्रवाः शास्त्रं नियमप्रतिपादकं यस्यस तथा तदप्युक्तम्—

"अनादिनियताश्चैव गुणदोषाः सुरादिषु।
यथाक्रमं पुनश्चैव नियमाद्वर्द्धितास्तथा ॥

"विष्णुनैव ततो नित्यं विषमश्च जनार्दनः" इति नियमाद्वर्द्धितास्तथेत्येतत्कुत्रप्रमाणीक्रियते इत्यस्य उरुश्रवाइत्यत्रेति वक्तव्यम्. उरु वर्द्धनलक्षणां श्रवो यस्य स तथेत्यर्थः। ननु, वैषम्यं तदवस्थमेवाभूदिति चेन्न योग्यतानिमित्तत्वात्तदुक्तम् "नविष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित्" इति हरेर्योग्यतानियत्यायत् आगच्छद्वैषम्यलक्षणमुरुश्रवस्तदा तदस्तुविहितत्वादतउक्तं उरुश्रवा इति तदप्युक्तं "योग्यतायास्तन्नियत्या विषमत्वं भवेदिति" नन्वेवंतर्हि क्वापि वैषम्यं नेत्यापन्नमिति चेदुच्यते शुभाशुभयोर्विपर्यये शुभवतामशुभकर्म अशुभवतामसुराणां शुभकर्मानुष्ठतफलदानेसति विषमत्वं विष्णोर्दोषाय स्यादिति यदतस्तत्तद्योग्यताबलविहितशुभाशुभोभयकर्मानुसारेण तत्तत्फलस्य विकर्मेन्द्रियार्थे अशुभकर्मदैत्यबललक्षणस्य दानेनेश्वरवैषम्यामित्यत उरुश्रवाइति जयस्तम्भकल्पनाम हरेर्युक्तं "इन्द्रस्यार्थेकथं दैत्यानवधीद्विषमो यथा" इत्यादि प्रश्नपरिहार इति सिद्धं "विषमत्वन्तु दोषाय शुभाशुभविपर्यये। अतस्तादृशवैषम्यम् ब्रह्मसूत्रे निराकृतम् ॥ शुभाशुभनियंतृत्वं न दोषो गुण एव सः। अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोः" इतिवचनात् ॥ ११ ॥

सुरप्रिय इत्येतद्विवृणोति-सवा इति। अयमर्थः सत्त्वं सत्त्वगुणःसम्पन्नान् मुहुरनुयुगमुपबृंहयते सम्यक् वर्द्धयति किं कारणमत्राह--पुनरिति। स्वेन सृष्टस्य जगतः पुनःपुनः स्थितिरक्षानुवृत्तये स्थितिपालनयोः प्रवर्तनार्थं वा इत्यनेन सृष्ट्यादिकर्तृकमपि हरेरेवेति दर्शयति-यदा सिसृक्षुरित्यनेन, यः प्रस्तुतस्तं स इति तच्छब्देन परामृशति तत्रापीश्वरशब्देन रुद्र उपक्रान्त इति भ्रान्तिनिवारणाय विष्णुरिति यद्वा यत्र क्वापि रुद्रादुत्सर्जनादिकं प्रतीयते तदपि तत्स्थहरिणेति प्रकटनाय विष्णुरिति० ॥

सुरप्रिय इत्येतदितिहासेन दर्शयति-अत्रेति। सुरप्रिय एव नासुरप्रियो हरिरिति अन्ययोगव्यवच्छेदार्थ एव शब्दः ॥ १२--१४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, तेषुतेषु तेनाविश्यमानं तेजः कथं न लक्ष्यते? तत्राह--ज्योतिरिति। यद्यपि तेषुतेषु निजतेजोंशेनाविष्टोऽसौ सङ्घातात् संमिश्रत्वात् न विविच्यते लोकैर्विवेक्तुं न शक्यते तथापि कवयो विवेकनिपुणाअन्ततो मथित्वा तस्यापि साहाय्यं तेनापि युद्धमित्यादिकासम्भावर्थानिषेधेन विविच्य तदंशमात्मस्यं तत्तदात्मनि प्रविष्टं आत्मानमीश्वरं विदन्ति तत्र हेतुगर्भो दृष्टान्तः, यस्मात्तेजः ज्योतिरादिपदार्थे इवाभाति दृष्टिष्विति शेषः। अयमर्थः यथानेदं मणेस्तेजःपूर्वमदर्शनात्। किन्तु तदातपसंयोगेन सौरं तेज एवात्र प्रविष्टमिति सूर्यकान्तादौ तूलादिदाहेन तदनुभविषु तदाभाति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारतनिधि, करौंदी वाराणसी-5

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथाच्च पूर्ववदेव वायावयंगन्धः पार्थिवएव प्रविष्ट इति तेष्वाभाति तथात्रापीति अथवा नन्वेवं तत्रतत्रावेशितैः स्वतेजोभिरेव क्रीडतीत्यागतं कथं तर्हितैरपि क्रीड़तीति दृश्यते तत्राह--ज्योतिरिति । यथा चक्षुरादिज्योतिर्भिः स्वांशे रूपमात्रे प्रकाश्यमाने गन्धादि गुणपञ्चका मृदेवासौ प्रकाशत इति प्रतीयते यथा कर्णादिनभसा स्वांशे शब्दमात्रेऽपि गृह्यमाणो दुन्दुभिरेवासाविति प्रतीयते । तच्च तत्तद्गुणानां संमिश्रत्वादेव भवति न वस्तुतः। तथाकवय आत्मानम् ईश्वरं तत्तत्संघातस्थत्वेनान्यैरजानन्ति विविक्तमपि आत्मस्थं स्वांश ज्योतिर्भिरेव क्रीडन्तं जानन्तीत्यर्थः ॥ ९ ॥

तदेवं युद्धादिनिजलीलाभिर्भक्तविनोदनमेव प्रयोजनं विश्वपालनन्तु स्वत एव ततः सिसृक्षतीत्युक्त्वा सृष्टिप्रलययोः प्रकृतीक्षणादावपि सर्वशङ्कानिरासार्थमिति दिशन् त्रिष्वप्यविशेषमाह--यदेति । यदा यत्र स्वचेष्टालक्षणे काले एष परः परमेश्वरः स्वमायया भक्तकृपया आत्मनः पुरः प्राचीनसृष्टिगतसाधकभक्तरूपाणि स्वस्याधिष्ठानानि सिसृक्षुर्भवति । प्रकृत्या सह तेषु लीनेषु आविर्भावनार्थमीक्षां करोति । तदा पृथक् स्वरूपशक्तेरितरा असौ जीवमायाख्या शक्तिः पूर्ववत्तच्चेष्टात्मकप्रभावाभासोद्दीप्ता रजः सृजति स्वांशभूताद्गुणत्रयसाम्यादव्यक्तात्तद्विक्षिपति उद्बोधयतीति वा । यथा वा पृथङ्मायानुगत एष काल एव सृजति तथाऽसौ पदेन च काल एवोच्यते अथ विचित्रासु नानागुणवैचित्र्यवतीषु तल्लक्षणासु पूर्षु यदा रन्तुमिच्छुर्भवति तदा सत्त्वं सृजति । यदा पुनस्ताभिरेवामिलित्वा शयिष्यमाणः शयितुमिच्छुर्भवतीत्यर्थः । तदासौ तमः सृजतीति । ततो भक्तनिमित्तमेव सर्वा एव सृष्ट्यादिक्रियाः प्रवर्त्तन्त इति भावः । यथाङ्गीकृतमेकादशस्य तृतीये टीकाकृद्भिरपि किमर्थं ससर्ज । स्वमात्रात्मप्रसिद्धये । स्वं मिमीते प्रमिमीते य उपास्ते स स्वमाता । तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धय इति । शयनमत्र पुरुषावतारस्य कदाचित् प्रलयोदधौ योगनिद्रा कदाचिद्भगवत्प्रवेशो वा यद्यपि सर्वेष्वपि जीवेषु अन्तर्यामितया परमेश्वरस्तिष्ठति तथापि तत्रासंसक्तत्वादस्थित एव भवति । स्वभक्तेषु तु समासक्तत्वान्न तथेति । न च तत्सङ्गादौ तस्येच्छेति यथोक्तव्याख्यानमेव बलवत् । तथा च श्रीगीतासु "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इति च । उक्तञ्च हरिभक्तिसुधोदये । "भक्तानां हृदयं शान्तं सश्रियो मे प्रियं गृहम् । वसामि तत्र शोभैव वैकुण्ठाख्यादिवर्णना" इति ॥ १०

ततो य एष चेष्टारूपः कालः स सत्त्वम् । सत्त्वप्रधानं सुरानीकमेधयतीव तत एव तत्प्रत्यनीकान् रजस्तमःप्रधानानसुरान् प्रमिणोतीव हिनस्तीव । ये तु देवेषु भक्ता असुरेषु भक्तद्वेषिणश्च तान् स्वयं पालयति हिनस्ति चैवेति पूर्वमेवोक्तम् । तस्मात्तच्चेष्टालक्षणस्य कालस्यैवं वार्त्ता तस्मादीशितापि एधयतीव प्रमिणोतीव चेति । हे राजन्निति पूर्वाभिप्रायमेव । ननु यदि चेष्टितुः प्रयोजनं न भवति तर्हि कथं कदाप्यसुरानपि स्वपक्षान् विधाय देवैर्न युज्येतेति तत्राह-सुरप्रियः सुरेषु वर्त्तमानाः प्रिया भक्ता यस्य सः । सत्त्वप्रधानेषु सुरेषु प्रायशस्तेषां सर्वेषामनुगमनेनैव तस्यानुगमनम् । कदाचिद्बृहस्पत्यादिषु महत्स्वपराधे तेषामाभिमुख्येन सुरत्वाच्छादनात्तेषां तस्य तेष्वनुगमनं न स्यादिति जयकाले तु सत्त्वस्येत्याद्युक्तमिति भावः । ननु कथं तेऽपि तान्नानुगच्छन्ति तत्राह----रजस्तमस्कानिति । अत्यन्तभगवद्बहिर्मुखताकर्यास्तयोर्गुणयोररोचकत्वादेवेति भावः ।; तर्ह्यसौ सदैवासुराणां निग्रहमेव करोतीत्यथाप्यसामञ्जस्यमेवेत्याशङ्क्याह उरुश्रवाः वैरेण यं नृपतय इत्यादि । अहोबकीयमित्यादिभिः उरु सर्वतो विस्तृतं महत्तमं वा श्रवः कीर्तिर्यस्य सः । तेषामप्यनुग्रहं करोतीति भावः ॥ ११ ॥

तदेवं सिद्धान्तं प्रदर्श्य तत्र स्वभक्तानुग्रहमात्रप्रयोजनस्तत्तत्करोति परेश इति प्रतिज्ञातार्थोदाहरणाय प्रह्लादजयविजयादिकृपासूचकमितिहासविशेषमाह---अत्रैवेति । अत्र विद्वेषादिराहित्येन भक्तानन्दनार्थं स्वैरलीलामात्रत्वे असुराणामपि परमहितपर्य्यवसायकस्वभावत्वेच । एवकारेण सिद्धान्तान्तरं व्यावर्त्यते ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सत्त्वादीनामाधिक्यन्यूनताभ्यामेव तदधिष्ठानस्याप्याधिक्यन्यूनते इत्यत्र दृष्टान्तमाह—ज्योतिर्यथा—काष्ठेषु जलं—यथा—पात्रेषु आकाशं यथा घटेषु अधिकेष्वधिकरूपं न्यूनेषु न्यूनरूपं तिष्ठदपि न विषममुच्यते । तथैव देवनिष्ठसत्त्वेऽधिके सति सोऽपि देवेष्वधिकरूपः तदैवासुरनिष्ठे रजसि न्यूने तत्र न्यूनरूप इत्यसुराणां देववाध्यत्वे देवानामसुरवाधकत्वे सति सोऽपि देवपक्षपाती असुरबाधक इत्युच्यते । एवमसुरनिष्ठरजस्यधिके सोऽप्यसुरपक्षपाती देववाधक इति लोकप्रतीत्या विषमोऽप्यविषम एवेत्यर्थः। जयकाले तु सत्त्वस्य देवर्षीनऽभजादित्याधिकभजनमेव तत्र विवक्षितं तदेव देवपक्षपातित्वव्यञ्जकम् । नत्वजयकाले केवलमभजनमेवेति ज्ञेयम् । ननु काष्ठादिषु ज्योतिरादिर्यथाऽस्मिन् काष्ठेऽयं वह्निरित्येवं विवेकेन प्रतीयते तथा देवादिदेहेऽपि भगवान् किं न प्रतीयते तत्राह सङ्घातात् देवादिदेहात् न विविच्यते सत्वन्य इव न पृथक् प्रत्यक्षीभवतीत्यर्थः । तर्हि स नात्र भजतीति कुतो ज्ञायते तत्राह—विदन्तीति । आत्मस्थं देहस्थं परमात्मानं कवयो निपुणा मथित्वा कार्यदर्शनलिङ्गनानुमानाज्जानन्ति । अन्ततः स्वभावकर्मादिवादनिषेधेन विन्दन्तीति पाठेऽपि लभन्ते जानन्तीत्येवार्थः । नन्विन्द्रादिपक्षपाती भगवान् कदाचित् सर्वैः प्रत्यक्षीभूत एवासुरान् हन्ति । तथैव रजस्तमसोरपि वृद्धौ सत्यां कदाचिदसुरादीनामपि पक्षपाती भवन् देवादीन् हिनस्तु तदैवोक्तयुक्त्या तस्य साम्यं सिद्ध्येदित्यत आह—ज्योतिरादिरिवेति तमेव श्लोकं तन्त्रेणार्थान्तराभिधायकं ज्योतिरादिरिव ज्योतिरादिगतं रूपरसगन्धस्पर्शं यथा सङ्घाते तद्वति वस्तुनि आभाति स्पष्टतया भासते किञ्चित्तथा किञ्चित् सङ्घातात्तस्मान्न विविच्यते न पृथक् स्पष्टमाभाति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भातिच किन्तु तदन्तर्गततयैव भाति एवमेव जगत्यस्मिन् देवासुरादिषु मध्ये भगवान् क्वचित् स्पष्टं भासते। क्वचिच्छद-न्तर्गतश्च तिष्ठतीत्यर्थः । तत्र ज्योतिषः सत्त्वप्राधान्यादनाव-रकत्वात् तद्गतं रूपं यथा किञ्चिद्दूरेऽपि शुक्लमिदं चीरमिति सुदूरे लक्षद्वयेऽपि चन्द्रोऽयं शुक्ल इति तत्र तत्र नयनेन्द्रियेण गृहीतं स्पष्टमाभाति तथैव देवादेः सत्त्वप्राधान्यात् सत्त्वेना-नावरणात्तद्गतो भगवांस्तत्पक्षपाती स्पष्टमेवोपेन्द्रादिरूप आभाति यथा च जलादेस्तमोरजःप्राधान्यात्तेनावरणात्तद्गतं शब्दरसगन्धस्पर्शं न स्पष्टमाभाति किन्तु तद्गतः पदार्थस्य योग एवेन्द्रियगोलकेषु तमोरजसोरपि किञ्चित् सत्त्वसत्त्वात् सर्वथा आवरणाभावादेव तथाहि रसनायां रसवतो योग एव रसः। श्रोत्रे शब्दवत् आकाशस्य योगे सत्येवशब्दः । त्वचि शैत्यादिमद्वस्तुयोग एव स्पर्शः । नासायां गन्धवतो वायो-र्योग एव गन्ध इति तथैवासुरराक्षसादेरजस्तमःप्राधान्यात्ते-नावरणात्तद्गतो भगवांस्तत्पक्षपाती न स्पष्टमाभाति 'अत्र मेघातपाभ्यामावरणानावरणे सूर्यस्य यथा तथैव तमःसत्त्वाभ्यां भगवतो ज्ञेये । ननु तर्हि स्पष्टमानाभावे असुरादिपक्षपा-तित्वं तस्य कथं प्रतीमस्तत्राह—विदन्तीति । देवपराभवादिकार्य दर्शनलिङ्गेन जानन्तीत्यर्थः ॥ ९ ॥

नचैवं गुणतारतम्येन तस्याधिष्ठातृत्वतारतम्यलक्षणयन्त्र-त्वेन गुणाधीनत्वमाशङ्क्यं किन्तु गुणानामपि स्रष्टुस्तस्य तत्तत् सर्वैश्वर्यलीलामयमेवेत्याह--यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति । विचित्रासु तासु पूर्षुरिरंसु शिष्टपालनलक्षणं रमणांचिकीर्षुः सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति ॥ १० ॥

यदा सिसृक्षुरित्यादिनिर्देशात् प्रतीतं कालपारतन्त्र्यमपि वारयति—कालमिति । हे नरदेव ! सहकारित्वेनाश्रयभूतं चरन्तं वर्त्तमानं स्वयमेव सृजति कालस्य तदिच्छारूपत्वात् । अयमर्थः । जगत् सृष्ट्यादिकं हि तस्य लीलयैव. सा च स्वेच्छाधीनैव तत्र यदा सिसृक्षा भवति तदा रजो वृद्धिसृष्टिकालो जायते यदा पिपालयिषा तदा सत्त्ववृद्धिपालनकालः । यदा सं जिहीर्षा तदा तमोवृद्धिनाशकाल इति कालविशेषस्तेनैव सृज्यते तत्र यदा सृष्ट्यादिकालस्तदैव सिसृक्षादिकं स्यादिति यदा शब्दवाच्यः कालविशेष एव स तु सृज्य एव इति. जयकाले तु सत्त्वस्येत्यादिनापि प्रतीतं कालपारतन्त्र्यं वारितमिति-प्रधानेन मायाशक्त्या पुरुषेण स्वांशेन च सह वर्त्तमानः एवं स सर्वकारणत्वात् तस्यैव स्वातन्त्र्यं तत्कार्यत्वाज्जगतस्त-दधीनत्वं । ननु, तत् कार्यं जगदवस्त्वेव अवस्तुनः किमधीन-त्वानधीनत्वविचारेणेति केचिदाहुस्तत्राह सत्यकृत् भगवच्छ-क्तिकार्यस्य विश्वस्य मिथ्यात्वानर्हत्वात् । कार्यमात्रस्यैव मिथ्यात्वे तदनुमेये भगवत्यपि प्रमाणत्वाभावः प्रसज्जेदिति भावः "सत्यं ह्येवेदं विश्वमसृजत" इति माध्वभाष्य प्रमाणिता श्रुतिश्च अतः कालस्य तत्कार्यत्वात्कार्यधर्मः कारणेप्युपचर्यत इत्याह--य एष इति। अतएवईशः परमेश्वरोपि सत्त्वं सत्त्वप्रधानं सुरानीकमेध-यतीवेत्यर्थः तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्ती-वेत्यर्थः । तदेवं वैषम्यं गुणस्यैव नान्यस्य तत्र कालएव निमित्तं यथा पुरुष सृज्यत्वाधीनत्वाधिष्ठेयत्वेपि गृहाणामुच्चत्व शैत्यादिकं गृहाणामेव न पुरुषस्य तथा, किञ्च सुरप्रिय इति अथवा सुराणां भक्तत्वाद्वैषम्यमपि भूषणमेव ननु दूषणमेवेति पृथगेव सिद्धान्तः यदुक्तम् "समोऽहं सर्वभूतेषु" इति । कदाचित् सुराणामसुरपरा-भूतत्वन्तु हितैषिणा भगवतैव तन्मत्ततानिवारणार्थं क्रियेत इति ज्ञेयं । ननु, तस्य सर्वप्रियत्वं सर्वसुहृत्त्वञ्च कथमित्यत आह—उरुश्रवाः "अहो बकीयं स्तनकालकूटम्" इत्यादि वाक्य-प्रकाशितानि महादुश्चेष्टितपूतनादिगतिप्रदत्वलक्षणयशांस्येव सर्वप्रियत्वं सर्वसुहृत्त्वञ्च विख्यापयन्तीतिभावः ॥ ११ ॥

उक्तमेवार्थं । स्पष्टमेव बोधयितुमितिहासमुपाक्षिपति अत्रैव साम्य सौहार्द्दप्रियत्वेष्वर्थेषु ॥ १२—१४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वमायागुणमाविश्येत्युक्तं तत्र प्रविष्टस्तद्दोषाऽस्पृष्टएव भगवान् वर्त्तते अज्ञैर्दुर्ज्ञेयोपि तत्त्वज्ञैर्ज्ञायते इत्याह— ज्योतिरा-दिरिवेति । काष्ठादिषु ज्योतिरिव वनादिषु वायुरिव जलादिषु खमिव सज्जीवेषु मायागुणकार्येषु देहेन्द्रियादिसंघातेषु तत्तद्दो-षास्पृष्टएव भगवान् आभाति प्रकाशते तथापि संघातात् न विविच्यते भोक्तृभोग्यदेहविलक्षणतया भोक्तृभोग्यनियन्तृपदार्था-नभिज्ञैर्न ज्ञायते कवयः क्रान्तदर्शिनो भोक्तृभोग्यनियन्तृस्वरूपया-थात्म्यज्ञाः आत्मस्थं देहेन्द्रियादिसहिते आत्मनि "य आत्मनि तिष्ठन्" इत्यादिश्रुतिप्रसिद्धे जीवे प्रेरकतया स्थितम् आत्मानं परमेश्वरम् मथित्वा अन्नमयादिभ्यो चेतनेभ्यो भोग्यभूतेभ्यः भोक्ता विज्ञानमयोऽते वर्णितस्तदन्ते नियन्तानन्दमय इत्येवं मथनं कृत्वा चतुर्भ्यः कोशेभ्योते वर्त्तमानं विदन्ति जानन्ति साक्षात्कुर्वन्तीत्यर्थः ॥ ९ ॥

किञ्च जीवहितायैव सृष्ट्यादि कालानुसारेण गुणानपि वै-षम्यादिदोषास्पृष्टोभगवानेव प्रेरयतीत्याह यदेति एषः परः परमात्मा आत्मनः समष्टिव्यष्टिजीवानां जातावेकवचनम् नित्यो नित्यानां चेतनश्चेतनानामेको बहूनामिति श्रुतौ जीवानां बहुत्वात् पुरः सिसृक्षुः समष्टिशरीराणि सिसृक्षुर्भवति यदा तदा स्वमायया स्वकीयया प्रकृत्याख्यया शक्त्या हेतुभूतया पृथक् रजः सृजति प्रवर्तयति विचित्रासु तासु पूर्षुरिरंसुः पालनली-लया क्रीडितुमिच्छुः सत्त्वमीरयति प्रेरयति शयिष्यमाणः संहरि-ष्यन् पृथक् पृथक् तम ईरयति ॥ १० ॥

कालमपि स्वशक्तिभूतं भगवानेव परमाण्वादिरूपेण सृजति ननु तावतापि विषमोभवतीत्याह—कालमिति । चरन्तमित्युपलक्षणं जङ्गमं स्थावरं च प्रति आश्रयं तेषामुत्पत्तिस्थित्यादिनिमित्तं परमाण्वादिद्विपरार्द्धान्तरूपं सृजति किंबहुना विविधविचित्र-विश्वकर्तृत्वेपि भगवतो वैषम्यादिदोषलेशवातगन्धस्पर्शित्वं नास्ती-त्याशयेनाह हे नरदेव ! प्रधानपुंभ्यां स्वप्रकृतिभ्यां सत्यमेव विश्वं करोतीति सत्यकृत् अथैनमाहुः सत्यकर्मेतिसत्यं ह्येवेदमसौ सृजते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ।
वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥
तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ ।
पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १४ ॥
युधिष्ठिर उवाच ।
अहो अत्यद्भुतं ह्येतद्दुर्लभैकान्तिनामपि ।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥
एतद्वेदितुमिच्छामः सर्व एव वयं मुने ! ।
भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥
दमघोषसुतः पाप आरभ्य कालभाषणात् ।
सम्प्रत्यमर्षी गोविन्दे दन्तवक्रश्च दुर्मतिः ॥ १७ ॥
शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् ।
श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥ १८ ॥
कथं तस्मिन् भगवति (१) दुरवग्राह्यधामनि ।
पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥ १९ ॥
एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ।
ब्रूह्येतदद्भुततमं (२) भगवांस्तत्र कारणम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इतिश्रुतेः । उक्तार्थमुपसंहरति, हेराजन् ! एष भगवान् यत ईशिता तत्तत्कर्मफलदानादिना सर्वभोक्तृभोग्यवस्तुनियन्ता अतः काले असुरक्षयस्य सुरवृद्धेश्च काले सत्त्वं सत्त्वप्रधानं सुरानीकम् । एधयत्येव इवशब्द एवकारार्थे तत्प्रत्यनीकान् सुरानीकविरोधिनोऽसुरान् प्रहिणोति हिनस्ति ॥ ११ ॥

एवं सामान्यतः तत्तज्जीवकर्मानुसारेणानुग्रहादिकं भगवान् करोति न तु वैषम्यादिदोषवान् भवतीत्युक्तम् । अथेन्द्रार्थे दैत्ययोर्वधं तु तयोरनुग्रहायैव कृतवानित्याह—अत्रैवेति । अत्र इन्द्रार्थदैत्यवधे इतिहासः सुरर्षिणा नारदेन अजातशत्रवे युधिष्ठिराय उदाहृतस्तं शृणुवेति शेषः ॥ १२ ॥

———

भाषा टीका ।

जैसे तेज (अग्नि) आदि पदार्थ काष्ठादि में नाना प्रकार प्रतीत होता है वैसेही परमात्मा भी नाना देहों में प्रकाशित होता है । और देह से भिन्न नहीं प्रतीत होता। निपुणजन अन्त मे आत्मा में अन्तर्यामि रूप से स्थित परमात्मा को जानते है ॥ ९ ॥

जिस समय परमात्मा जीवों के सुखादि भोग के लिये सृष्टि की इच्छा करता है तव समता से स्थित रजोगुण को पृथक् प्रकट करता है । ऐसे ही उन विचित्र शरीरों में रमण की इच्छा वाला सत्त्व गुण को तथा शयन की इच्छा वाला तमो गुण को प्रकट करता है ॥ १० ॥

हे राजन् ! यह कालस्वरूप ईश्वर सत्त्व की वृद्धि करते हैं तव सत्त्व प्रधान देव समूह को भी वढाते हैं और सुरप्रिय श्री हरि, उन देवताओं के वैरी रजोगुण तमोगुण वाले जो असुर हैं उनका नाश करते हैं ॥ ११ ॥

हे राजन् ! इस विषय में देवर्षि [श्रीनारदजी] ने राजसूय यज्ञ में पूर्वकाल में राजा युधिष्ठिर के पूछने से यह इतिहास कहा था ॥ १२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

चेदिभूभुजः शिशुपालस्य ॥ १३ ॥ १४ ॥

(१) दुरवग्राह्य धामनि-इति पाठान्तरम्. विज० वीर० शुक० । (२) भगवन्नत्र कारणम्. इति पाठान्तरम्. वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकान्तभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदत्यद्भुतं हि ॥ १५ ॥

तस्य तु वेनवन्नरकपात एवोचित इत्याह—भगवन्निन्दयेति । तमसि नरके ॥ १६ ॥

दमघोषस्य सुतः शिशुपालः कलभाषणाद् बाल्ये कोमलभाषणमारभ्य सम्प्रत्यधुनाऽप्यमर्षी क्रोधी मत्सरी वा ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राहं दुष्प्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यमीयतुर्जग्मतुः अभूतस्यापि दन्तवक्त्रलयस्य तज्जातकप्रामाण्येन सिद्धवन्निर्देशः ॥ १९ ॥

एतदद्भुततममत एतत्प्रति मे धीर्भ्राम्यति भगवान् सर्वज्ञस्त्वं ब्रूहि ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नं तन्निमित्तञ्च विवृणोति—दृष्ट्वेति । राजसूयाख्ये महाक्रतौ चेदिभूभुजः शिशुपालस्य भगवता छिन्नशिरसः वासुदेवे भगवति श्रीकृष्णे सायुज्यं संश्लेषं महाद्भुतं दृष्ट्वा विस्मितचित्तः पाण्डुसुतो राजा युधिष्ठिरः तत्र क्रतौ यज्ञसभायामासीनम् उपविष्टं देवर्षिं नारदं मुनीनां शृण्वतां सतामिदं वक्ष्यमाणं पप्रच्छ पृष्टवान् ॥ १३ ॥ १४ ॥

तदेवाह—अहो इति षड्भिः, अहो एतदद्भुतं तदद्भुतत्वे हेतुः, एकान्तिनामनन्यप्रयोजनेन भगवन्तं भजतामपि दुर्लभम्. किंतत् ? परे तत्त्वे प्रकृतिपुरुषविलक्षणेश्वरतत्त्वरूपे श्रीकृष्णे विद्विषः चैद्यस्य प्राप्तिरित्येतत् ॥ १५ ॥

मुने नारद ! एतत्सर्वं वयं वेदितुमिच्छामः केनापि भावेन भगवन्तं स्मरतां तत्प्राप्तिर्भवत्येव किमत्र चित्रं, तत्राह—भगवन्निन्दयेति । वेनः पृथोःपिता भगवन्निन्दयैव निन्दामात्रेण हेतुना तमसि नरके द्विजैः ऋषिभिः पातितः ॥ १६ ॥

दमघोषसुतश्चैद्यस्तु कलभाषणात् बाल्यमधुरभाषणादारभ्य बाल्यादारभ्येत्यर्थः सम्प्रति एतत्कालपर्यन्तं गोविन्दे श्रीकृष्णे अमर्षी क्रोधी अतोऽयं नितरां पापात्मा तथा दन्तवक्त्रोपि दुरात्मा ॥ १७ ॥

अनयोः परब्रह्मभूतं निर्विकारं श्रीकृष्णमसकृच्छपतोः शिशुपालदन्तवक्त्रयोः जिह्वायां श्वित्रः श्वेतकुष्ठरोगोवापि न जातः नाप्येतावन्धं तमो नरकमपि विविशतुः किन्तु भगवन्तमेव विविशतुः ॥ १८ ॥

अतः सर्वलोकानां पश्यतां सतां दुरवगाह्यधामनि दुरवगमज्योतिर्मयस्वरूपे भगवत्यञ्जसा अनायासेन तत्प्राप्तिसाधनानुष्ठानमन्तरेणेत्यर्थः कथं लयमीयतुः ? भगवत्सायुज्यं कथं प्रापतुरित्यर्थः ॥ १९ ॥

इतीत्थं वायुना दीपशिखेव मम बुद्धिर्भ्राम्यति. हे भगवन् ! एतन्महदद्भुतमतोऽत्र कारणं ब्रूहीति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एक एवान्तो निर्णयः येषामस्तीति भक्तिरेव पुरुषार्थसाधनं नान्यत्कर्मादिकमिति निर्णयवतां विष्णुरेव मुमुक्षुभिर्निषेव्य इति निश्चयवतां वा ॥ १५ ॥

श्रीहरिनिन्दनं सतां कर्णशूलायमानमप्येतच्छ्रोतुं तच्चित्रमित्याशयवानाह—भगवन्निन्दयेति ॥ १६ ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य स तथा तस्मिन् लयं सायुज्यलक्षणम्; ननु, "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति वचनात् श्वित्रो न जात इत्यादिवाक्यं कथं संगच्छते ? भगवद्द्वेषिणोऽपि बहुविधाः, तत्र केचिन्मरणानन्तरं पापफलं भुञ्जते, केचिदत्रैव. तत्कुतः ? इतिचेन्न ॥

"नियमाद्भुज्यते पुंभिर्धर्माधर्मफलं मृतौ ।

कैश्चिदत्रापि भुज्येत तस्मान्नाधर्ममाचरेत्" ॥

इतिवचनात् अनेन धर्मिणोपि व्याख्याताः धर्मी स्वर्गं विधर्मी निरयमितिच अत्र कश्चिद्विशेषोप्यस्ति जयविजययोः सात्त्विकत्वेन भक्तत्वेनहरेरतिप्रियत्वात्सनकादिशापादसुरजन्मन्यपि क्वचिद्भक्त्यलोपात् द्वेषफलभोक्तुरन्यत्वाच्च द्वेषस्य पापिष्ठासुरत्वादनयोरुपचारितत्वाच्च अनेन स्वापराधनाशलक्षणानुग्रहपात्रत्वेन प्रतिज्ञातश्रपथत्वेन च हरेः सुरप्रियत्वं च विशदमभूदिति रहस्यम् ॥ १९ ॥ २० ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दृष्ट्वेति युग्मकम् ॥ १३ ॥ १४ ॥

एकां नितरां परमज्ञानिनां "एकान्तमतिरुन्निद्रो गूढो मूढइवेयते" इति पाप इत्यादिना तद्गुरुक्ते निन्दनञ्च तदोपाधिकानुकरणमात्रमवलम्ब्येति ज्ञेयं । दन्तवक्त्रस्यापि भूतत्वेन निर्देशो मुनिगण वचनेन निश्चितत्वात् ॥ १५—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकान्तिनां निष्परिग्रहाणामपि ॥ १५—१६ ॥

कलभाषणात् बाल्यकोमलभाषणमारभ्य यत् परं ब्रह्म तं विष्णुं कृष्णम् ॥ १७—१८ ॥

प्रत्युत लयं तात्कालिकलोकप्रतीत्या सायुज्यं किञ्चित् कालमेव सहयोगं सह युज्यत इति सयुक् तस्य भावः सायुज्यं ततः परं सारूप्यमीयतुः भाविनमपि दन्तवक्त्रलयं नारद

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशुक उवाच।

राज्ञस्तद्वच आकर्ण्य नारदो भगवान् ऋषिः।
तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः॥ २१॥

नारद उवाच।

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम्।
प्रधानपरयोराजन्नविवेकेन कल्पितम्॥ २२॥
हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा।
वैषम्यमिति भूतानां ममाहमिति पार्थिव!॥ २३॥
यन्निबन्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः।
परस्य दमकर्त्तुर्हि हिंसा केनास्य कल्प्यते॥ २४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मुखादेव श्रुत्वा तस्य जातप्रायत्वमननादद्भुतनिर्देशः। पश्यतामित्यसम्भवे वस्तुनि प्रामाण्यसिद्ध्यर्थमित्यर्थः॥ १९॥

एतत् फलं प्रति भ्राम्यति अत एतदद्भुततमं ब्रूहि यतो भगवान् सर्वज्ञः नन्वेतत्पदवाच्यमेव, किं तत्राह तत्र जये कारणम्॥ २०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चेदीनां देशविशेषाणां भूभुजः शिशुपालस्य भूपतेः॥ १३॥ १४॥

परे तत्त्वे वासुदेवे श्रीकृष्णे एकान्तिनामपि दुर्लभा प्राप्तिः विद्विषो जातेत्यद्भुतमत्याश्चर्यम्॥ १५॥ १६॥

कलं मधुरं भाषणं यस्मिन् तस्माद् बाल्यात् आरभ्य सम्प्रति अद्यापि गोविन्दे अमर्षी विद्वेषी॥ १७॥

अव्ययं नित्यशरीरिणं परं ब्रह्म यद् ययोः शपतोः जिह्वायां श्वित्रः कुष्ठं न जातः अन्धन्तमो नरकं न विविशतुः॥ १८॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य तस्मिन्॥ १९॥ २०॥

भाषा टीका।

महा यज्ञ राजसूय में युधिष्ठिर महाराज ने श्रीवासुदेव भगवान् के विषें परमाद्भुत शिशुपाल का सायुज्य देखकर वहां बैठे हुए नारदजीसे सब मुनि लोगों के सुनते२ यह प्रश्न किया॥१३॥१४॥

युधिष्ठिरजी बोले, कि अहो यह अति अद्भुत है परमैकांति लोगों को भी दुर्लभ परतत्त्व श्रीवासुदेव की प्राप्ति द्वेषी शिशुपाल को कैसे हुई॥ १५॥

हे मुने! यहबात हम सब लोग जानने की इच्छा करते हैं क्यों कि भगवान् की निन्दा करने से वेनराजा को ब्राह्मणों ने नरक में गिराया था॥ १६॥

यह पापी दमघोष का पुत्र शिशुपाल तो बोलना सीखा तब से लेकर अबतक गोविन्द के विषय द्वेष करनेवाला और दुर्मति दन्तवक्र भी ऐसाही था॥ १७॥

ये साक्षात् परब्रह्म अव्यय विष्णु को कुवाक्य कहने वाले इनदोनों के जिह्वा में कुष्ठ न हुआ और दोनो को नरक न हुआ॥१८॥

दुःख से ग्रहण हो तेज जिनका ऐसे भगवान् में सब लोकों के देखते २ ये दोनों कैसे लीन होगये॥ १९॥

वायु से दीपकी जोत के सदृश मेरी बुद्धि भ्रमको प्राप्त होती है यह अति आश्चर्य बात का उत्तर आप दीजिये। इस में भगवान् ही कारण हैं॥ २०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

आभाष्य सम्बोध्य सीदन्ति निषीदन्त्यस्यामिति सद् सभा तस्याः सदः सदसः शृण्वत्याः सत्याः कथाः प्राहेत्यन्वयः॥ २१॥

अहोभगवान्निन्दकस्य नरकपातेन भाव्यमिति वदतस्तव कोऽभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेऽपि सुरापानादिवद्विहितनिन्द्याचरणाद्वा तत्र तावद्देहाभिमानकृतनिन्दादिनिमित्तत्वान् पीडादीनां भगवतश्च तदभावान्न पीडाशङ्कास्तीत्याह—निन्दनेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

सार्द्धैस्त्रिभिः । निन्दनं दोषकीर्तनम् न्यक्कारस्तिरस्कारः निन्दास्तुत्यादिज्ञानार्थं प्रधानपुरुषयोराविवेकेन कलेवरं कल्पितं रचितम् ॥ २२ ॥

तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्येत्युत्तरेणान्वयः दण्डस्ताडनं पारुष्यं निन्दा तयोर्हेतुभूतयोर्हिंसा पीडा च भवति ॥ २३ ॥

यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा तथा यस्याभिमानोनास्ति अतोऽस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापीति अभिमानाभावे हेतुः कैवल्यादद्वितीयत्वेनाभिमन्तव्याभावात् वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मनइति तर्हि किमिति हन्ति दैत्यांस्तत्राह—परस्य दमकर्तुः हितार्थं दण्डं करोतीत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमापृष्टो नारदः प्राहेत्याह मुनिः—राज्ञइति । राज्ञो युधिष्ठिरस्य तत्प्रश्नरूपं वचः श्रुत्वा भगवान्नारदस्तुष्टः समीचीनप्रश्नेन हृष्टः सदसः सभायाः शृण्वन्त्याः सत्यास्तं युधिष्ठिरमाभाष्य स्ववचःश्रवणाभिमुखं कृत्वा प्रश्नपरिहाररूपां कथां प्राह ॥ २१ ॥

तामेवाह—निन्दनमित्यादिना दशभिरध्यायैः । अस्य प्रश्नस्य मुख्यमुत्तरं वक्तुं तावत्संसारिचेतनानामिवेश्वरस्य देहात्माभिमानप्रयुक्तस्तुतिनिन्दाद्यभिमानित्वं नास्तीति चैद्यस्य मुक्तिं ददाविति कश्चित्परिहारमाह—निन्दनेति. हे राजन् ! निन्दनं दोषकथनं स्तवो गुणकथनं सत्कारश्चन्दनलेपादिः न्यक्कारः पांसुक्षेपणादिरेषामर्थो विषयः कलेवरं प्रधानशब्दो देहावस्थप्रधानवचनः परशब्दो देहात्परजीववचनः तयोराविवेकेन परस्परविलक्षणत्वविषयकज्ञानाभावेन देहात्माभिमानेनेति यावत् तेनाविवेकेन हेतुना कल्पितं कलेवरस्य निन्दनादिविषयत्वमविवेककृतं, न तु स्वतो जडत्वात्. न हि काष्ठं चन्दनलेपादिरूपसत्कारादिकं मन्यते इति तावन्निर्विवादमित्यर्थः ॥ २२ ॥

एवं स्थिते हे पार्थिव ! यथेह संसारे भूतानां देहात्माभिमानिनां देवमनुष्यादीनां ममाहमिति वैषम्यं ममेयं निन्दा निन्दितोऽहमित्यभिमानरूपवैषम्यं तदभिमानेन ममेयं निन्देत्यभिमानेन दण्डपारुष्ययोर्निमित्तयोर्हिंसा च स्यात् दण्डः ताडनं पारुष्यं निन्दनं परेण दण्डपारुष्ययोः कृतयोः सतोस्तत्प्रयुक्तो ममेयं निन्दा निन्दितोहं ममायं दण्डो दण्डितोहमित्येवंरूपो नानाविधोभिमानस्तत्प्रयुक्तं परेषु निन्दादिकारिषु हिंसाचरणं च यथा लोकानां दृश्यते न तथा यस्येत्युत्तरेणान्वयः देहविषयमपि दण्डपारुष्यादिकं परकृतं देहात्माभिमानेनात्मगतं मत्वा तदभिमानेन परेषु हिंसास्यादित्यनेन यथा हिंसाकारिषु दण्डपारुष्यादिकं देहगतमेव नत्वात्मगतम्. देहात्मनोरविवेकेन स्वात्मगतं न मन्यते तथा हिंस्यमानेष्वपि हिंसा च देहगतैव नत्वात्मगता. देहात्माभिमानात्तु हिंसितोहमित्यभिमान इति सूचितम् ॥ २३ ॥

तदेव स्पष्टमाह—यन्निबन्ध इति । अयमभिमानो दण्डितानां च लोकानां यथा दण्डितोहं निन्दितोहमित्यभिमानः यन्निबन्धो यद्धेतुको देहहेतुक इत्यर्थः देहात्माभिमानस्य देहहेतुकत्वाद्देहात्माभिमानहेतुको दण्डितोऽहमित्यभिमानो देहहेतुक एवेत्यभिप्रायेण यन्निबन्धोऽभिमानोऽयमित्युक्तम्. एवं तद्वधाद्धन्यमानेषु तस्य देहस्य वधादेव प्राणिनां देहात्माभिमानिनां वधः देहगत एव वधः नत्वात्मगतो देहात्माभिमानात्तु हतोऽहमित्यभिमान इत्यर्थः । एवं संसारिणां निन्दनादिकं सर्वं देहात्माभिमानकृतमित्युक्तम् अथोक्तार्थविषयमीश्वरे दर्शयति—तथेति । यथा संसारिणां देहात्माभिमानस्तन्मूलको निन्दितोऽहमित्याद्यभिमानश्च यस्येश्वरस्य नास्ति तस्यास्य अभिमानप्रयुक्ता परेषु हिंसा केन हेतुनाव कल्प्यते इत्यन्वयः, अभिमानाभावे हेतुः—अखिलात्मन इति, सकलजगदात्मत्वादभिमानो नास्तीत्यर्थः । नत्वात्मत्वेपि तस्य जीववदभिमानः स्यादेव तत्राह—कैवल्यादिति । निरस्तनिखिलदोषत्वादित्यर्थः "अनृतेन हि प्रत्यूढा" इति श्रुत्युक्तरीत्या जीवानामनादिपुण्यपापात्मककर्ममूलको हि देहात्माभिमानः तस्य तु परमपुरुषस्य सर्वान्तरात्मनो निरस्तनिखिलकर्मवश्यत्वादिदोषत्वादभिमानाभाव इति भावः । निन्दितोहमित्याद्यभिमान एव नास्ति किं पुनस्तत्प्रयुक्तं परेषु निन्दकेषु हिंसादिकरणं नास्तीत्याह—हिंसेति. अस्य निन्दनादिना प्रयुक्ताभिमानरहितस्य हिंसा निन्दककर्मिका केन हेतुना कल्प्यते हिंसाहेतोरभिमानस्याभावाद्धेत्वन्तरस्यादर्शनात्सा नास्त्येवेत्यर्थः । ननु, कथमुच्यतेऽभिमानस्तत्प्रयुक्ता हिंसा च तस्य नास्तीति, यतोस्मदादिसमक्षमेव निन्दकं चैद्यं हतवानित्याशङ्कां निराकुर्वन्नीश्वरं विशिनष्टि—परस्य दमकर्तुर्हीति । परस्य निन्दकादेर्दमकर्तुः शिक्षाकर्तुः परस्य हितार्थमेव दण्डं कुर्वत इत्यर्थः शिक्षया परस्मै हिताचरणं च चैद्यस्य निहीनामासुरीं योनिं परिहार्य निरतिशयपुरुषार्थस्वरूपस्वप्रापणेनेदानीमेवास्मदादिभिरपरोक्षं दृष्टमिति भावः । एवं देहात्माभिमानाभावात्परमपुरुषस्य संसारिणामिव स्तुतिनिन्दाद्यभिमानित्वराहित्यमुक्तम्. एवञ्च निरभिमानित्वाच्चैद्यस्य मुक्तिं ददौ इति कश्चित्परिहारः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहाद्यभिमानवतः स्तवनिन्दनादिना मनःखेदहर्षादिसम्भवेन क्रोधादिकं स्यादुरेस्तदभावान्निन्दनादिनावशेषानुदयात् स्वतो नित्यतृप्तत्वेन परप्राप्यप्रयोजनाभवात् तत्तद्योग्यतानुसारेण तत्तत्फलदातृत्वं युक्तमित्यादिकं वक्तुमुपक्रमते—निन्दनेति । निन्दनं दोषसंकीर्तनं स्तवः स्तुतिर्गुणलक्षणासत्कारः कायिकपूजा न्यक्कारः कायिकावज्ञा तेषां निन्दनादीनामर्थं विषयभूतं कलेवरं प्रधानपरयोः प्रधानाद्देहेन्द्रियाद्यात्मकात्परस्य जीवस्याविवेकेनाभेदेन कल्पितं स्वतश्चिदानन्दस्य प्रकृतेरात्मनो भेदाग्रहादिदं जडशरीरं क्लृप्तमित्यर्थः ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः किंफलतीति तत्राह—हिंसेति । तदभिमानेन देहाभिमानेन भूतानामविवेकज्ञानिना ममाहमितीह देहे हिंसा ताडनादिलक्षणा दण्डपारुष्ययोर्निमित्तयोर्वैषम्यं विषमावस्था फलतीत्यर्थः ॥ २३ ॥

ततश्च किं तत्राह—यन्निबन्धइति । ममाहमित्यभिमानो यन्निबन्धः यस्मिन् देहे निबद्धः तद्वधात्तस्य देहस्य वधाद्धिंसादिलक्षणात् प्राणिनां चेतनानां वध इत्युपचारः इति यत्तस्मान्निन्दनादिकं देहस्यैव फलति, नात्मनः; तस्य निष्फलमित्याशयः यथा, जीवस्य ममाहमिति देहाभिमानादनर्थपरम्परा तथा हरेरपि देहस्यत्वाविशेषात्साम्यात्किनेत्याह—तथेति, अखिलात्मनोऽखण्डस्वामिनो यस्य न तथा जीववद्देहाभिमानो नास्ति. कुतः ? कैवल्यात् देहाद्यभावादेव. ननु, प्रकृत्यात्मकस्य देहस्याभावो हेतुः क्रियते सच्चिदानन्दात्मकदेहस्य वेत्येतयोरिदमेवोत्तरं प्रकृत्यात्मकदेहादेरभावात्प्रकृतिप्राकृतवैकृतामिश्रविरहितसच्चिदानन्दात्मकदेहसद्भावात् स देहः सुखगन्धश्चेत्यादेः ॥ अस्य प्रत्ययात्मनः इदमेषा हिंसा केन निमित्तेनास्तीति कल्प्यते निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः । अन्यस्मिन् हिंसादिकर्तरि सति हरेर्हिंसादिकमस्तीति कल्पयितुं शक्यते स च नास्तीत्याशयेनोक्तम् अकर्तुरिति, तस्यान्यः कर्ता न विद्यत इत्यकर्ता तस्य हिशब्देन यद्यस्यायुधादिना प्रहर्ता दृश्यते तत्फलं छेदादिकन्नास्तीत्याह“अच्छेद्योऽयमदाह्योऽयम”इत्यादेः । तत्सर्वं कथमित्यत उक्तं परस्येति, लोकविलक्षणस्य तर्ह्ययं शून्यकल्प इत्यस्यापीदमुत्तरं परस्य ब्रह्मणः “ब्रह्मविदाप्नोतिपरम” इतिश्रुतेः । इदं हिंसेति लिङ्गव्यत्ययो हिंसायाः कुत्सितत्वद्योतनाय “व्यत्ययोऽतिशयकुत्सनभेदेषु” इतिसूत्राज्ज्ञायते हरौ हिंसाशङ्का कुत्सितेत्यर्थः “नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपरम्‌ हन्यते हन्यमाने शरीरे” इत्यादेश्च ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्रोत्तरं श्रीनारद उवाच–निन्दन इति । तत्र विमूढैर्जनैर्निन्दादिकं प्राकृतान् तमआदिगुणानुद्दिश्यैव प्रवर्त्यते । ततः प्रकृतिपर्य्यन्ताश्रयस्य तत्कृतनिन्दादेः अप्राकृतगुणविग्रहादौ तस्मिन् प्रवृत्तिर्नास्त्येव न च जीववत् प्रकृतिपर्य्यन्ते वस्तुजाते भगवदभिमानोऽस्ति । ततश्च तेन तस्य पीडा नास्त्येवेति भगवतस्तन्निन्दाद्यस्पर्शतया सिद्धान्तश्च पूर्ववत् ॥ २२ ॥

ततश्च हिंसेति सार्द्धयुग्मकम् । इह प्राकृते लोके यथा तत्कलेवराभिमानेन न तथेति कैवल्यात् “देहेन्द्रियासु हीनानां वैकुण्ठपुरवासिनाम्” इति कैवल्यादिप्राप्तशुद्धत्वात् तादृशनिन्दाद्यगम्यशुद्धसच्चिदानन्दविग्रहादित्यर्थः तस्य तदगम्यत्वञ्च । “नाहं प्रकाशः सर्वस्य योगमायासमावृतः” इति श्रीभगवद्गीतादिभ्यः तादृशवैलक्षण्ये हेतुः, अखिलानामात्मभूतस्य, तत्र हेतुः परस्य प्रकृतिवैभवासङ्गरहितस्य । हिंसायाम् अविषयत्वे हेत्वन्तरम्. । दमकर्त्तुः परमाश्चर्य्यानन्तशक्तित्वात् सर्वेषामेव शिक्षाकर्त्तुरिति ॥ २३—२४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सीदन्ति निषीदन्त्युपविशन्त्यस्यामिति सत् सभा तस्याः शृण्वन्त्याः तस्यां कथाः शृण्वन्त्यामित्यर्थः । आभाष्य हे राजन् ! अवधेहीति सम्बोध्य ॥ २१ ॥

शिशुपालकृतनिन्दादिकं न भगवत्पीडाकरमिति वक्तुं प्रथमं निन्दास्तुत्यादिकं ज्ञानिनां न दुःखसुखदं किन्तु देहाभिमानिनामेवेत्याह—निन्दनस्तवौ वाचिकौ दोषगुणौ सत्कारन्यक्कारौ कायिकौ मानसौ च सम्माननासम्मानने तदर्थं तत्सिद्ध्यर्थं प्रकृतिपुरुषयोरविवेकेन आत्मानात्मविवेकाभावेन कल्पितं विरचितम् ॥ २२ ॥

तदभिमानेन देहाभिमानेन मामयं निन्दति स्तौतीत्यादिभिर्यथा दुःखसुखे भवतस्तथैव मामयं हिनस्तीति हिंसापि भवति कस्मिन् सति दण्डस्ताडनं पारुष्यं त्वामहं ज्ञातयिष्यामीति तर्ज्जनं तयोः सतोः एवञ्च भूतानामिह संसारे वैषम्यं सिद्धं ममैते शत्रवो ममैते बन्धवश्च अहमेतान् हन्मि एतान् पालयामि चेति प्रकारकम् ॥ २३ ॥

यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा अज्ञानिनां तथा यस्य कृष्णस्याभिमानः प्राकृतो नास्ति अस्य परमेश्वरस्य हिंसा केन कल्पते न केनापीत्यर्थः । अभिमानाभावे हेतुः, कैवल्यात् केवलपरमात्मत्वात्. अयं भावः । यथा सर्वजीवानां अनात्मा देह आत्मा जीवश्चेत्युभयं वर्त्तते । तथा यदि कृष्णस्याप्यस्थास्यत् तदा कृष्णस्यापि जीवानामिव आविद्यकोऽभिमानोऽभविष्यदेव । कृष्णस्य तु देहस्तदभिन्नः परमात्मैव तस्मिन् स्वरूपभूते कृष्णोऽहमित्यभिमानोपि तन्मय एव अखिलात्मन इति तदंशस्यान्तर्य्यामिणोप्यस्वरूपभूते जीवे जीवदेहे वाभिमानो नास्तीति भावः । अत एव परस्य मायामायिकवस्तुजीवेभ्यो भिन्नस्याऽतस्तेष्वस्वरूपभूतेष्वभिमानाभावात् कस्तस्य द्वेष्यः को वा द्वेष्टा परमात्मभूते देहे यस्तस्याभिमानः परमात्मैवाहमित्यात्मकस्तेन स कं वा द्वेष्टुं परमात्मानं जानन् तं वा को द्वेष्टु । तर्हि किमिति स्वद्वेषिणः शिशुपालादीन् हिनस्ति तत्राह—दमकर्त्तुस्तेषां हितार्थमेव दण्डं कुर्वतः तस्य सर्वसुहृत्त्वादिति भावः ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

राज्ञः तद्वचः प्रश्नरूपं वचः आकर्ण्य सीदन्ति निषीदन्त्युपविशन्ति यस्यामिति सत्सभा तस्याः शृण्वन्त्याः हे युधिष्ठिर ! इति आभाष्य सम्बोध्य कथाः प्राह ॥ २१ ॥

निन्दनादिना देहात्मबुद्धेर्जीवस्य पीडा भवति न तु तत्त्वविदः भगवतस्तु सुतरां न भवति किन्तु निन्दनादिनापि भग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात्कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक् ॥ २५ ॥
यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥
कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ।
संरम्भभययोगेन विन्दते तत्सरूपताम् ॥ २७ ॥
एवं कृष्णे भगवति मायामनुजईश्वरे ।
वैरेण पूतपाप्मानस्तमीयुरनुचिन्तया ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वति मनोनिवेशनं मोक्षहेतुरित्याह—निन्दनमित्यादिना । न्यक्कारस्तिरस्कारः निन्दनाद्यर्थं कलेवरं प्रधानपरयोर्मायाजीवयोरविवेकेनाबोधेन कल्पितम् आत्मतयारोपितमित्यर्थः ॥ २२ ॥

तदभिमानेन कलेवरं आत्मत्वाभिमानेन यथा ममाहमिति वैषम्यं भवति तथा दण्डपारुष्ययोः दण्डे ताडने सति पारुष्ये निन्दायां च सत्यां हिंसा पीडा भवति ॥ २३ ॥

तथा यस्मिन् कलेवरेऽयमभिमानो निबद्धस्तस्य वधात् प्राणिनां वधो लोके प्रसिद्धः स अभिमानः यस्य कैवल्यात् देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणकेवलक्षेत्रज्ञस्वरूपज्ञानात् नास्ति तस्य हिंसा केन कथ्यते अस्य प्रकृतस्य परस्य सर्वचेतनविलक्षणस्य अखिलात्मनः अत एव दमकर्तुः हितार्थं तदनुरूपं दमं दण्डं कुर्वाणस्य केन हिंसा कथ्यते इत्यन्वयः ॥ २४ ॥

भाषाटीका

श्रीशुक उवाच ।

भगवान् नारद महर्षिभी राजा युधिष्ठिर का वचन सुन कर संतुष्ट हो राजा को संबोधन देकर सभा के सुनतें २ कथा कहने लगे ॥ २१ ॥

नारद उवाच ।

निंदा स्तुति सत्कार और तिरस्कार इत्यादि के ज्ञानार्थ यह कलेवर प्रकृति पुरुष के अविवेक से रचा गया है ॥ २२ ॥

उस देह में अभिमानहोने से में मेरा इस प्रकार की विषमता है और उसी विषमता से निन्दा ताडनादि हेतुक हिंसा अर्थात् पीडा और जिस देह में यह अभिमान बँधा है उस देह के वध से प्राणियों का वध जैसे है। ऐसा अखिलात्मा परमेश्वर को अभिमान नहीं तब हितार्थ दूसरे को दंड देने वाले परमात्माकों शत्रुहिंसा किस प्रकार कल्पन की जाय ॥ २३—२४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्माद्भगवतोनिन्दादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपायेन ध्यायतस्तेनैव ध्यानेन निन्दादिकृतपापस्यापि नाशात्तत्सायुज्यं युक्तमित्याशयेनाह—तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिंस्तेन भक्तियोगेनेत्यर्थः युञ्ज्यान्मन इति शेषः यस्मादेतैरुपायैः पृथङ्नेक्षते ॥ २५ ॥

तेष्वपि वैरानुबन्धः श्रेष्ठइत्याह—यथेति । न तथा भक्तियोगेनापि ॥ २६ ॥

अत्र दृष्टान्तः, कीटः पेशस्कृता भ्रमरेण संरम्भोद्वेगोभयं च सएव योगस्तेन ॥ २७ ॥

वैरेण यानुचिन्ता चिन्तनं तयैव पूतः पाप्मा येषां ते तं प्रापुः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवं भगवन्निन्दासु कस्यचिदपि पापं न स्यान्न च निन्दाप्रयुक्ताभिमानरहितनिन्दया नितरां पापित्वप्रसङ्ग इति वाच्यं तादृशस्यापि चैद्यस्य परमपुरुषप्राप्तिदर्शनेन निन्दाया अपापरूपत्वादन्यथा तादृशे निरतिशयमुक्तिप्रतिबन्धे पापे सति तस्य मुक्त्यसम्भवात् किञ्चैवं भगवत्स्तोत्रादिषु पुण्यमपि न स्यात्तथा च सर्वशास्त्रार्थविरोधप्रसङ्गः । किञ्च—

"मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥

इति भगवद्वचनविरोधश्च स्यात्. भगवतः स्तुतिनिन्दाभिमानि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वाभावकथनाद्वेनचैद्ययोर्वैषम्यं च न सिध्यति अतो वेनचैद्ययोर्वैषम्यप्रश्नस्य किमुत्तरमित्यपेक्षायां साक्षात्परिहारमाह—तस्मादिति । निन्दादिभाक्संसारितुल्यत्वदोषप्रसङ्गनिराकरणार्थं संसारिचेतनानामिव देहस्तुतिनिन्दाद्यभिमानित्वं भगवतो नास्तीति तद्वैलक्षण्यमात्रमुक्तं "निन्दनस्तवसत्कार" इत्यादिभिः श्लोकैरिता वक्ष्यमाण एव साक्षात्परिहारो वेदितव्यः तस्मादीश्वरस्यैवंविधस्वभावत्वाद्वैरानुबन्धनिर्वैरभयस्नेहकामानां पञ्चानामन्यतमेन केनचिद्युंज्यात् भगवति मनोयुञ्जीतेत्यर्थः "यथा भक्त्येश्वरे मनआवेश्य" इत्युत्तरग्रन्थैकार्थ्यात् वैरानुबन्धो वैराविच्छेदः निर्वैरेणेति न वैराभावो विवक्षितः अपि तु भक्तिर्विवक्षिता उत्तरग्रन्थे परिगणितहेतुषु पञ्चसु भक्तेरुक्तत्वात् स्नेहः सौहार्दं बाल्यादारभ्यैतत्पर्यन्तमविच्छिन्नवैरेण भगवति मनो युंजतश्चैद्यस्य भगवत्प्राप्तिः, वेनस्य तूक्तानामन्यतमेनापि भगवत्ययुक्तमनसो न मुक्तिः प्रत्युत निरयप्राप्तिरिति वैषम्यमिति भावः । मनोयोजनस्य काष्ठामाह—कथंचिन्नेक्षते पृथगिति । पृथग्भगवतोऽन्यद्वस्तु किञ्चिदपि केनापि प्रकारेण नेक्षते न विषयीकरोति मनस्तथा तद्युञ्जीत विजातीयप्रत्ययान्तराव्यवहितचित्तवृत्तिर्भवेद्यथा तथेत्यर्थः ॥ २५ ॥

वस्तुतः प्रीतिपूर्वकानुध्यानात्मकभक्तियोगादपि वैरानुबन्धानुध्यानमेव श्रेय इति मया निश्चितमित्याह—यथेति । मर्त्यः संसारी जीवः भगवति यथा वैरानुबन्धेन आशु तन्मयताम् इयात् प्राप्नुयात् तथा भक्तियोगेन आशु नेयादिति मे मया मतिर्बुद्धिर्निश्चिता. मयैवं बुद्धिनिश्चय इत्यर्थः । तन्मयतां तच्चिन्तनप्रचुरतामित्यर्थः । विकारावयवार्थासंभवात् प्राचुर्यमेवात्र मयडर्थः । पूर्वपूर्वचिन्तनादुत्तरोत्तरचिन्तनस्य प्राचुर्यं तच्च प्रत्ययान्तराव्यवहितत्वरूपम. यद्वा तन्मयतां तद्धर्मप्राचुर्यं प्राप्नुयादित्यर्थः मुक्तानां प्राचुर्येण भगवद्धर्मसाम्यश्रवणात् ॥ २६ ॥

यथा वैरानुबन्धयोगः श्रेयानेवं भययोगोऽपि भक्तियोगाच्छ्रेयानिति वदन्वैरानुबन्धभययोगयोर्भगवद्विषयकचिन्तासन्तानात्मकयोस्तत्साम्यापत्तिहेतौ दृष्टान्तमाह—कीट इति । पेशस्कृता भ्रमरेण कुड्यायां निरुद्धः कीटो यथा तमेव पेशस्कृतं संरम्भभययोगेन वैरानुबन्धभययोगाभ्याम् अनुस्मरन् तत्स्वरूपतां पेशस्कृता साम्यं विन्दते तथा संरम्भभययोगिनौ भगवत्स्वरूपतां विन्देते इत्यर्थः । तस्येव स्वरूपं यस्य तत्स्वरूपस्तस्य भावस्तत्स्वरूपता तां तुल्यरूपतां नत्वैक्यमित्यर्थः न हि पेशस्कृता रुद्धः कीटस्तेनैकीभवति उभयोरप्युपलभ्यमानत्वात् अतः साम्यमेव दृष्टान्तात्सिध्यति ॥ २७ ॥

उक्तार्थं दार्ष्टान्तिके दर्शयति—एवमिति । भगवति पूर्णषाड्गुण्ये मायामानुषे स्वसंकल्पोपात्तमनुजाकृतौ साक्षादीश्वरे श्रीकृष्णे विषये वैरेणानुचिन्तया वैरपूर्वकानुध्यानेन पूतपाप्मानः निरस्तवैरादिदोषाः तं कृष्णमापुः प्रापुः पूतपाप्मान इत्यस्यायमभिप्रायः । यद्यपि "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति श्रुत्यक्तरीत्या निरतिशयप्रीतिरूपया अविच्छिन्नस्मृतिसन्ततिरूपया भगवद्भक्तेरेव तत्प्राप्तिहेतुत्वम. तथा चोक्तम् भगवता—

> "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
> भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ! ॥
> ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ।
> तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ॥
> ददामि बुद्धियोगं तं येन मामुपयान्ति ते" ॥ इति.

श्रुतिश्च "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते" इत्यादिका. भक्तिश्च प्रीतिपूर्वकमविच्छिन्नमनुध्यानम् "प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति भक्तिलक्षणात्. संरम्भभययोगयोस्तु प्रीतिरूपत्वाभावात्प्रत्युत तद्विपरीतरूपत्वाच्च न भगवत्प्राप्तिहेतुत्वं तथाप्यत्यन्तसंरम्भकृतभावनाप्रकर्षेण स्वहेतुभूतसंरम्भभययोरपि विस्मरणाद्भावनायाश्च निरतिशयानन्दावहशुभाश्रयविषयत्वेन प्रीतिरूपापन्नत्वात्तस्या अपि भगवत्प्राप्तिसाधनत्वमिति. एवञ्च येषां भावनाप्रकर्षेण स्वहेतुभूतवैरादिविस्मरणादिभावो वेनादीनां तेषां भगवन्निन्दादिप्रयुक्तभगवद्विषयकभावनाप्रकर्षाभावेन तन्मूलकनिन्दादिदोषाविस्मृतेर्भगवत्प्राप्त्यभावः प्रत्युत तन्निन्दादिदोषेण निरयप्राप्तिश्चेति वेनचैद्ययोर्वैषम्यमुक्तं भवति, अत एव न स्तुतिनिन्दयोः पुण्यापुण्यत्वप्रतिपादकशास्त्रविरोधोऽपि भावनाप्रकर्षेणाविस्मृतवैरादिदोषवत्पुरुषविषयत्वात्पुण्यापुण्यप्रतिपादकशास्त्राणाम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रैवं हरिस्वरूपे स्थिते स्वगोग्यानन्दाविर्भावलक्षणमोक्षसाधनक्षमा क्षीणा भक्तिरेव द्वेषादिकमर्थवादलक्षणं तत्तत्स्वभावज्ञापनार्थमुच्यत इत्याशयेनाह—तस्मादिति । यस्माज्जडशरीरेन्द्रियाद्यभावेन हरेरहं ममाभिमाननिमित्तोपद्रवो दूरं निवारितः तस्माद्वैरानुबन्धादिना यो हरौ मनो युञ्ज्यात्प्रयुङ्क्ते स कथञ्चित्पृथङ्नेक्षते मनसस्तत्राभिनिवेशेन हरेरन्यं न चिन्तयति तमेवानुस्मरतीत्यन्वयः अनेन वैरादीनामेकतमेनापि हरौ मनो युञ्जानो वैरादिमानेव भवतीति तत्तद्वस्तुस्वभावस्तथोच्यत इति ज्ञातव्यं तदुदितमाचार्यैः "कथञ्चिन्नेक्षते पृथक् तत्रैवमनसोऽभिनिवेशेन तदन्यं नेक्षते वैरादीनामेकतमेनापि यो मनो युञ्ज्यात्स तदन्यं नेक्षत" इति स्वभावकथनम. नन्वत्र संयुञ्ज्यादित्यस्य प्रथमप्राप्तं विध्यर्थपरित्यज्यान्यार्थं कल्पनायामश्रुतकल्पनास्यादितिचेन्न "भक्त्यात्वनन्यया शक्यः" अहमेवंविधोऽर्जुन" "यमेवैष वृणुते तेन लभ्यः" "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्यादिना भक्तेरेव भगवत्प्रीतिजनकत्वोक्तेः "अननुभूतिरवधुन्वानः" इत्याद्यनर्थश्रुतेश्च अतो न विध्यर्थाङ्गीकारयोग्यः तदप्युक्तं न विधिरिति न केवलं द्रष्टुः स्वस्यैवानर्थोऽपि तु तत्पितॄणामपि तदुक्तम्—

> कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् ।
> मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः" ॥ इति.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेकदा कृतद्वेषप्राप्तनरकोपभोगेन क्षीणदोषस्य पुनः शुद्धान्तःकरणतया भक्तिकरणयोग्ययोनिप्राप्तिः स्यादिति तत्राह—

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" ॥ इति.

कीदृशो द्वेष इति तत्राह—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परम्भावमजानन्तो मम भूतमहेश्वरम्" ॥ इति.

'स्वर्गकामोयजेत' इत्यादेः सत्कर्मणा तेषां सद्गतिः स्यात्किन्नेत्याह—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैवं प्रकृतिं मोहिनीं श्रिताः" ॥ इति

ननु तर्हि हिरण्यकशिप्वादेर्दुरन्ताघादुत्थितिः कथमभूदिति तत्राह—

"यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ।
तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः" ॥ इति

इति नन्वेवं तर्हि भक्तद्विषणोः शापवराभ्यां विपर्ययः स्यात्किन्नेत्याह—

"वरतोपि न मुच्यन्ते द्वेषिणः शापतोपि तु ।
भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः ॥

इति योग्यताया बलवत्त्वादिति शेषः । नन्वेवं चेत्पुनश्चानर्थ आपन्न इति तत्राह—"अन्यावेशकृतं यत्तु तद्वराद्यैरपोह्यते । तद्विरुद्धस्वभावानामन्यथानकथञ्चन" इत्यादि हिरण्यकशिप्वाद्याविष्टासु कृतपापं प्रह्लादादिभिः परिहृतं न तु स्वतो सुरस्येत्यर्थः ॥ २५ ॥

कुतः स्वतो सुरस्यपापं नपरिह्रियत ? इत्याशङ्क्य द्वेषाभिनिविष्टमनस्कत्वेन तद्योग्यत्वेन भगवत्प्रेरितत्वेनाभीष्टनिवृत्तित्वेन तदात्मकत्वादित्याशयेनाह–यथेति । मर्त्यस्तमोयोग्यो वैरानुबन्धेन निरन्तरं वैरस्मरणेन तन्मयतां तत्तद्द्वेषविषयवस्तुनि यथा मनसोभिनिवेशम् इयात् प्राप्नोति तथा भक्तिलक्षणोपायेन भक्तिविषये वस्तुनि मनोभिनिवेशं न करोति अत्र किं प्रमाणमिति तत्राह—इतीति । निश्चिता मतिरित्यनेन सार्चिलक्षणा मतिर्गृह्यते भक्तियोगेन इति इत्यत्र सन्धिकार्याभावो द्वेषाभिनिवेशिनां बाहुल्यं भक्त्यभिनिवेशिनां कनीयस्त्वं च दर्शयितुं कुतः एतद्वगतमिति चेन्न यथा वैराभिनिवेशिन इत्याद्याचार्योक्तेः वैरिणां बाहुल्यं अन्येषामल्पसङ्ख्यात्वं कथमिति चेन्न हरिणा भक्तानां बाहुल्याकरणात् एतदप्युक्तं कथमन्यथेत्यादि ततः कनीयांस एव देवाः ज्यायांसः असुरास्तत इति च भक्त्याऽभिनिवेशिष्वपि कश्चिद्विशेषोऽस्तीति ज्ञापनाय वा सन्ध्यभावः "ऋते ब्रह्मणमव्ययम्" इत्युक्तेः असुराणां नित्यद्वेषाग्राहित्वप्रकटनायानुबन्धनेति "मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ । न तथाग्रहिणो भक्ता ऋते ब्रह्माणमव्ययम्" इत्युक्तेः ॥ २६ ॥

ननु तन्मयतामित्यस्य तादात्म्यार्थः किं न स्यादिति तत्राह–कीट इति । द्वेषेण निन्दतश्चैद्यस्य कृष्णेन सायुज्यं कथमभूदिति प्रश्नस्य परिहारः कथमागत इत्यतो वाह, कीट इति यथा पेशस्कृता भृङ्गेण कुड्ये भित्तिसुषिरे रुद्धः कीटः श्यामनामा कृमिः तस्यभृङ्गस्य सरूपतां समानाकारतां विन्दते न तु तादात्म्यं ततो भिन्नत्वेन दृश्यमानत्वात् कीदृशः यान्तं उपर्यागत्य गभीरं नदन्तं भृङ्गं सरम्भभययोगेन ईषत्कोपभययुक्तस्नेहेनाक्षं सन्ददातीति स्नेहेन स्वात्मानमाकृष्य क्लिश्नातीति कोपयुक्तभयेन चानुस्मरन् अत्र स्नेहस्यैव प्राधान्यं प्राणधारणपोषणयोः सन्तताभिष्टत्वात् कोपभययोस्तात्कालिकत्वादप्राधान्यमित्यतो योगस्य संरंभभययोर्विशेषणतयोक्तेः योगस्य स्नेहार्थत्वम् ।

"प्रीतिस्नेहस्तथा योग प्रेमबन्धः इतीर्यते" । इति शब्दनिर्णये सिद्धम् ॥ २७ ॥

कृष्णे भगवत्येवं वैरेण युक्तया अनुचिन्तया भक्तिपूर्वं स्मृत्या धूतपाप्मानश्चैद्यादयः तं कृष्णमापुरित्यन्वयः अत्र सज्जीवानां शापादिनासुराविष्टानामेव मुक्तिः न केवलानां तस्मात्तदाविष्टासुरा वैरेण प्राप्तपाप्मानः "असुर्यानामतेलोकाः" इति श्रुतेः तं लोकसमुदायं प्रापुः सन्तो जयादयो अनुचिन्तया तं कृष्णमवापुरित्ययं विशेषो वैरयुक्तया अनुचिन्तयेत्याचार्योऽपि शब्देन गर्हाभिधायिना ज्ञातव्यः "अनुचिन्तेति तां प्राहुर्भक्तिपूर्वांतु या स्मृतिः" इति वचनात् भक्तिपूर्वैवानुचिन्ताऽत्राभिप्रेतेति ज्ञातव्यम् अतोऽत्र चैद्यादीनां भक्तियुतत्वं प्रतिपाद्यत इत्युपगन्तव्यम् अन्यथा कीटोदाहरणं निरन्वितं स्यात् उदाहरणस्यापि भक्त्यर्थत्वं कुत इति चेन्न ।

स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपि वा ।
विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा ॥
पेशस्कृद्रूपतां कीटो यथा याति तथैव तत् ।
चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि ॥
निजस्वभावया भक्त्या जाता हरिसरूपताम् ।
तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् ॥
हीयते किं ममानेन नित्यानन्दस्वरूपिणः ।
देहबन्धयुतानां हि द्वेषिणाऽपकृतं भवेत् ॥
ममकोह्यपराध्येत निर्दोषसुखरूपिणः ।
अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् ॥
अतो यद्यसुरावेशात्कृतमेतेन दुष्कृतम् ।
अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ॥
इति मत्वा मोचयति चैद्यादीनपि केशवः ।

इति वचनात् किं च निर्वैरेणेत्याद्युक्तमत्रानुसन्धेयं तेन स्नेहायतनस्य देहस्य नाशादिना कीटस्योपद्रवाभावाद्धरेरप्युपद्रवाभावोऽनुमीयते "तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् हीयते किं ममानेन नित्यानन्दस्वरूपिणः" इत्यादिना च ॥ २८ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं "सकृद्यदङ्गप्रतिमान्तराहिता" इत्यादिवत् तदाभासमपि ध्यायतस्तदावेशात् तत्र वैरेणापि ध्यायतस्तदावेशेनैव निन्दादिकृतपापस्यापि नाशात्. तत्सायुज्यादिकं युक्तमित्याशयेनाह—तस्मादित्यादिभिः, युञ्ज्यादिति । स्नेहकामादीनां विधातुमशक्यत्वात् सम्भावनायामेव लिङ् । वैरानुबन्धादीनामेकतरेणापि युञ्ज्यात् ध्यायेत् चेत् तदा भगवतः पृथक् नेक्षते तदाविष्टो भवतीत्यर्थः । वैरानुबन्धो वैरभावाविच्छेदः निर्वैरं वैराभावमात्रम् औदासीन्यमुच्यते तेन कामादिराहित्यमप्यायाति वैरादिभावराहित्यमित्यर्थः । तेन वा वैरादिभावराहित्येन युञ्ज्यात् । विहितत्वमात्रबुद्ध्या ध्यायेत्. ध्यानोपलक्षितं भक्तियोगं कुर्याच्चेत्यर्थः । स्नेहः कामातिरिक्तः परस्परमकृत्रिमः प्रेमविशेषः स तु तेषु साधकेषु तदभिरुचिरेव ॥ २५ ॥

तदेवं सर्वेषां तदावेश एव फलमिति स्थिते झटिति तदावेशसिद्धये तेषु भावमयमार्गेषु निन्दितेनापि वैरानुबन्धेन विधिमय्या भक्तेन साम्यमित्याह—यथेति । वैरानुबन्धेनेति भयस्याप्युपलक्षणं यथा शौरेण तन्मयतां तदाविष्टतां भक्तियोगेन विहितत्वमात्रबुद्ध्या क्रियमाणेन तु न तथा ॥ २६ ॥

अस्तां तादृशवस्तुशक्तियुक्तस्य तेषु प्रकाशमानस्य भगवद्विग्रहाभासस्य वार्त्ता प्राकृतेपि तद्भावमात्रस्य भाव्यावेशफलं महद्दृश्यते इति सदृष्टान्तं तदेव प्रतिपादयति—कीट इति । संरम्भो द्वेषो भयञ्च ताभ्यां योगस्तदावेशस्तेन तत्स्वरूपतां तस्य स्वम् आत्मीयं रूपं आकृतिर्यत्र तत् तां तत्सारूप्यमित्यर्थः ॥ २७ ॥

एवमिति । एवमपीत्यर्थः । नराकृतिपरब्रह्मत्वान्माययैव प्राकृतमनुजतया प्रतीयमाने. ननु, कीटस्य पेशस्कृत द्वेषे पापं न भवति अत्र तु तत्स्यादित्याशङ्क्याह, वैरेण यानुचिन्ता तदावेशः तयैव पूतपाप्मानः तद्ध्यानावेशस्य तादृक् शक्तित्वादिति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, मास्तु निन्दादेर्भगवत्पीडाकरत्वं निन्दकस्य दुरदृष्टजनकत्वन्तु स्यादेव. यदुक्तं कैमुत्येनापि "निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः" ॥ इति सत्यम्. निन्दा हि द्विविधा. आनुकूल्यमयी प्रातिकूल्यमयी च तत्र प्रथमा प्रेमविलासरूपैव "मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् । बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः" । इति वा सा तु पुरुषार्थचूडामणिमरीचिमञ्जरीव व्रजदेवी तां विना नक्कैरपिलभ्या. द्वितीया द्विविधा. भगवदभिनिवेशोत्था भगवदनभिनिवेशोत्था च, तत्र प्रथमया शिशुपालादिकृतनिन्दया जन्यमानमेव दुरदृष्टं तत्कारणेनैव भगवत्यभिनिवेशेन सद्य एव विनष्टीकृत्य भक्तियोगेनापि समकक्षतां प्राप्य, विधियोग्यत्वमपि प्राप्यत इत्याह—तस्मादिति सप्तभिः । यस्मान्निन्दाया भगवत्पीडाकरत्वं नास्ति, निन्दकस्य च पापक्षयः सम्भवेत् तस्मादभिनिवेशाद्वैरानुबन्धादिना युञ्ज्यात् भगवति मन इति शेषः । निर्वैरेण नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः; यद्वा, वैरं प्रतिपक्षत्वं निर्वैरं तत्प्रतियोगिस्वपक्षत्वं पुत्रादिभावः, यः खल्वग्रिमश्लोके सम्बन्धशब्दवाच्यत्वेन स्पष्टीभविष्यति तेन स्नेहादयः कामस्तेन प्रीतिजन्येन कामेनेत्येव व्याख्येयम्. न तु स्नेहस्य पृथक्साधनत्वं तृतीयान्तत्वप्रक्रमभङ्गापत्तेः फलमाह—कथञ्चिदपि तं भगवन्तं पृथक् नेक्षते. किन्तु स्वीयभावानुरूपमेव तं साक्षात् पश्यतीत्यर्थः । भयवैरभाववन्तावधिकारिणौ प्रति तु पृथक् नेक्षते किन्तु सायुज्यप्राप्त्या तं स्वाभिन्नमेवेक्षते इत्येवार्थः एकस्यापि वाक्यस्य पात्रभेदादर्थभेदः श्वेतो धावतीतिवदिति न्यायात् अत्र युञ्ज्यादिति लिङा वैरानुबन्धादिना भगवति मनोभिनिवेशं कुर्यादिति विधिरवगम्यते स च शिशुपालादिषु न सम्भवति तेषां रागप्राप्तत्वात् शिशुपालादिदृष्ट्या अन्येष्वेवैष विधिरित्यपि न शक्यते व्याख्यातुम् भगवत्प्रातिकूल्यस्य विधानानर्हत्वात्. यदुक्तम् "आनुकूल्यस्य ग्रहणं प्रातिकूल्यस्य वर्जनम्"इति. न च शिशुपालादिभ्यो ह्यन्येषु जनेषु विहितोपि वैरानुबन्धो भगवदभिनिवेशं जनयति "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु"॥ इत्यादि परस्सहस्रवचनविरोधात् नच रागप्राप्त एव वैरानुबन्धो नरकं जनयेन्न तु विहित इति वाच्यं शिशुपालादिषु व्यभिचारात्. न च शिशुपालादिभिन्नेष्वेवेयं व्यवस्थेति वाच्यं विधिदृष्ट्या वैरानुबन्धस्य शिष्टानुष्ठानादर्शनात् तस्यैव वैरानुबन्धो भगवदभिनिवेशं जनयति यस्य हन्तृत्वेनाभिज्ञातः श्रुतो दृष्टो वा भगवान् सम्भावितोऽभवति यथा लोके स्वहन्तृत्वेन निर्द्धारितेष्वेव वैरिव्याघ्रसर्पादिषु भीतस्य चित्ताभिनिवेशो नान्येष्विति तस्मादेतत् पद्यमेवं केचिद्व्याचक्षते यस्मात् स वैरभाववतामपि हितं करोति तस्मादत्र वैरस्यानौचित्यात् वैरभावव्यतिरिक्तेनैव भावेन मनोऽभिनिवेशयेदित्याह— तस्मादिति । निःशब्दस्य नञर्थत्वान्निर्वैरेण वैरभावभिन्नेन बन्धुमित्रपुत्रादिभावेन मनो युञ्ज्यात् कीदृशेन वैरानुबन्धेन वैरे इव अनुबन्धश्चित्ताभिनिवेशो यत्र तेन यो यस्मिन् अनुबन्धः स तस्मिन्नभिनिविष्ट एवेति ताटस्थ्यभावो वारितः तथा स्नेहात् कामेन स्नेहैकहेतुको यः कामस्तेन कीदृशेन भयेन स्वजनार्यपथत्यागोत्थभयवता व्रजयुवतिकानुगामिना कामेनेत्यर्थः भयेन चेतिवा शब्दात् निर्भयेन कामेन च रुक्मिण्यादिकामानुगामिना कामेनेत्यर्थः औपपत्यं दांपत्यञ्चोर्द्वयोरप्यस्ति प्रमाणम्. तथाहि "जारभावेन सुस्नेहं सुदृढं सर्वतोधिकम्"इति बृहद्वामनम् "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम्"इति कूर्मपुराणञ्च॥२५॥

परमनिन्द्यस्यापि वैरभावस्य चित्ताभिनिवेशकत्वांशेनैव महिमा अपार एवेत्याह—यथेति । वैरे वैरभावे योऽनुबन्धः सातत्यन्तेन मर्त्यः पूर्वोक्तयुक्तेः स्वस्य भगवद्ध्यत्वज्ञानविशिष्ट एव नान्यः । तन्मयतां स्त्रीमयः कामुक इतिवत्तदेकाभिनिवेशवत्वं न तथेति सद्य इति शेषः निश्चिता मतिरिति ममायं निश्चय एव कृत इत्यतोऽत्र प्रमाणं न प्रष्टव्यं मद्भक्तियोगादपि वैरभावो मनो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ २९ ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ! ॥ ३० ॥
कतमोऽपि न वेनः स्यात्पञ्चानां पुरुषं प्रति ।
तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥
मातृष्वस्रेयो वश्चैद्यो दन्तवक्त्रश्च पाण्डव ! ।
पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भिनिवेशकत्वांशेनाधिकस्तदा किमुत वक्तव्यं तादृशाभिनिवेशवान् स भक्तियोग इति भावः । तेन श्वित्रो न जातः जिह्वायां नान्धं विविशतुस्तम इति त्वया शिशुपालादीनाम् निष्टसाधनत्वबुध्या वैरानुबन्धो निन्द्यते मयात्विष्टसाधनीशरोमणेर्भक्तियोगादपि स्तूयते इति, कुतः शिशुपालादीनां दुर्गतिसंभावनापीति ध्वनिः तेन भावमार्गेष्वतिनिन्द्योपि वैरभावो भगवदभिनिवेशशीघ्रसम्पादकत्वांशेनैव भक्तियोगात् शुद्धात् यदि स्तूयते तदा भावमार्गेष्वतिवंद्यो वसुदेवादीनां वात्सल्यसख्यादिः किमुततरां नंदादीनामात्यन्तिकतदभिनिवेशं प्रतिच्छयातिभूमसम्पादकः सस इत्यनुध्वनिः तेनार्वाचीनानामपि श्रीनन्दादिभावानुसारेण वात्सल्यादिभावेप्सूनां रागानुगा भक्तिर्वैधभक्तेः सकाशादुत्कर्षवतीति पर्यनुध्वनिः ॥ २९ ॥

तत्र वैरभाववतां मध्ये केचित् शिशुपालादयः सारूप्यमापुरितिसदृष्टान्तमाह–कीटइतिद्वाभ्याम् । पेशस्कृता भ्रमरविशेषेण संरंभोद्वेषः भयश्च तयोर्योगेन ॥ २७ ॥

माया कृपा सद्गतिप्रापणी मनुजेषु स्वद्वेष्टृष्वपि यस्य तस्मिन् यद्वा मायया स्वरूपयैव "मनुजे स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः" इति श्रुतेः । वैरेण वैरजनितध्यानावेशेन पूतोनष्टपाप्मा तन्निन्दनातिरस्कारादिर्येषां ते ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्माद्भगवतो निन्दनादिना पीडा न भवति प्रत्युत तत्पादपद्मप्राप्तिसाधनं स्मरणं भवति तस्माद्धेतोः वैरानुबंधेन निर्वैरेण सर्वात्मभावेन भक्तियोगेनेत्यर्थः । युञ्ज्यात् भगवति मनो योजयेत् पृथक् भगवदन्यत् वस्तु कथञ्चिदपि नेचते नेक्षेत. किन्तु, भगवति सर्वात्मभावेन मनो युञ्ज्यादित्यर्थः ॥ २५ ॥ २६ ॥

पेशस्कृता भ्रमरेण कुड्यायां रुद्धः कीटः संरम्भो द्वेषो भयश्च ताभ्यां योगो न स एकाग्र्यं तेनानुस्मरन् तस्य पेशस्कृतः सरूपतां विन्दते ॥ २७ ॥

मायया कृपया भक्तवात्सल्येनेत्यर्थः । मनुजे मनुवंशे आविर्भूते चन्द्रवंशस्यापीलाद्वारा मनुवंशत्वात् वैरेण यानुचिन्ताऽनुध्यानं तेन पूतपाप्मानस्तमापुः ॥ २८ ॥

भाषाटीका ।

तस्मात् वैर के संबंध मे भक्ति से भय से स्नेह से अथवा काम से कृष्ण भगवान् में मन लगावै वे किसी प्रकार पृथक् नहीं देखते हैं ॥ २५ ॥

राजन् ! हमारा तो निश्चय ऐसा है कि मनुष्य जैसे वैर से तन्मयता को प्राप्त होता है वैसा भक्ति योग से नहीं ॥ २६ ॥

जैसे भींत में भ्रमर का रोका हुआ कीट (कीडा) संरंभ (द्वेष) और भय के योग से उसका स्मरण करते २ भ्रमर स्वरूप हो जाता है ॥ २७ ॥

ऐसेही कृपा से मनुष्य रूप को धारण करने वाले साक्षात् ईश्वर ऐसे श्रीकृष्ण भगवान मे वैर से पवित्र होकर सदा उन के चिन्तन करने से कृष्ण ही को प्राप्त हो गये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदघं कामादिनिमित्तं पापं हित्वा ॥ २९ ॥

तानाह—गोप्यइति ॥ ३० ॥

तर्हि वेनः किमिति नरके पातितः ? तीव्रध्यानाभावात्पापमेव तस्य फलितमित्याह–कतमोऽपीति । पुरुषं श्रीहरिंप्रति पुरुषे पुरुषस्य कामासम्भवाद्भयादिभिश्चिन्तयतां पञ्चानां मध्ये वेनो न कतमोऽपीत्युक्तम् ॥ ३१ ॥

तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णे शिशुपालस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युधिष्ठिर उवाच ।

कीदृशः कस्य वा शापो हरिदासाभिमर्शिनः ।
अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः ॥ ३३ ॥
देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् ।
देहसम्बन्धसम्बद्धमेतदाख्यातुमर्हसि ॥ ३४ ॥

नारद उवाच ।

एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ।
सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ॥ ३५ ॥
पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः ।
दिग्वाससः शिशून्मत्वा द्वास्स्थौ तान्प्रत्यषेधताम् ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

वैरानुबन्धे कोहेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह—मातृष्वस्रेय इति । पदाद्वैकुण्ठाच्च्युतौ ॥ ३२ ॥

हरिदासावभिमृशत्यभिभवतीति तथा कस्य शापः कीदृशो वा अश्रद्धेयोऽनादरणीयइव असम्भवात् भवोजन्म ॥ ३३ ॥

असम्भवमेवाह—जन्महेतुभूतैः प्राकृतैर्देहेन्द्रियासुभिर्हीनां शुद्धसत्त्वमयदेहानामित्यर्थः । प्राकृतदेहसम्बन्धेन सम्बन्धमेतदाख्यानमाख्यातुमर्हसि ॥ ३४ ॥ ३५ ॥

कथम्भूता पञ्च वा षड् वा हायनानि वर्षाणि येषां ते अर्भा बालास्तद्वदाभा येषां ते पूर्वेषां मरीच्यादीनामपि पूर्वजास्तेभ्यः प्रथमं जाताः दिग्वाससो दिगम्बराः अतः शिशून् मत्वा ॥ ३६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्तार्थे दार्ष्टान्तिके निदर्शनं कैश्चिल्लब्धमित्याह—कामादिति । यथा भक्तियोगेनेश्वरे मन आवेश्य भगवतो गतिं जग्मुस्तथा कामादिभिरपि तस्मिन् मन आवेश्य तदघं मनस आवेशननिमित्तं कामादिरूपमघं हित्वा अत्यन्तभावनाप्रकर्षेण कामादिकं विस्मृत्येत्यर्थः बहवस्तद्गतिं प्राप्ताः ॥ २९ ॥

एतदेवोदाहरणविशेषेषु दर्शयति—गोप्यइति । भगवति कामाद्गोप्यस्तद्गतिं गता इत्यनुषङ्गः भयात्कंसस्तद्गतिं गतः इति विभक्तिविपरिणामः । यद्वा, गोप्यादयः सर्वे प्रतिनियतकामादिगिरूपायैस्तद्गतिं गता इति यौगपद्येनान्वयः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयमिति वृष्णयो यूयञ्च देहसम्बन्धकृतस्नेहादित्यर्थः । अन्यथा पञ्चप्रकारान्तर्भावायोगात् भक्त्या वयं नारदादयस्तत्र स्नेहस्तुल्यसन्निकृष्टविषयः प्रेमा भक्तिरुत्कृष्टविषयेतिभेदः ॥ ३० ॥

एवमुक्तेनार्थेन सिद्धं वेनचैद्ययोर्वैषम्यमाह—कतमइति । उक्तानां पञ्चानां कामुकद्वेषिभिभयस्नेहवन्धकरूपाणां पञ्चानां मध्ये वेनस्त्वीश्वरं परमपुरुषंप्रति कोपि न भवति कामाद्यन्यतमो नभवत्यतस्तन्निन्दया निरयप्राप्तिरिति भावः । तस्मादुक्तानां पञ्चानां मध्ये केनाप्यन्यतमेनोपायेन भगवति श्रीकृष्णे मनो निवेशयेत् निवेशिते च मनसि मनोनिवेशननिमित्तं कामादिकमपि विस्मृत्य तं प्राप्नोतीति भावः, अत एव हि श्रीविष्णुपुराणे "अपगतदोषानुबन्धो भगवन्तमवाप" इति ह्युक्तम्. ननु, संरम्भभययोगादीनामपि भक्तियोगवद्भगवत्प्राप्तिसाधनत्वे यथा आरब्धविच्छिन्नभगवद्भक्तियोगः पुनर्जन्मान्तरे "पूर्वाभ्यासेन कौन्तेय" इत्यादिभगवदुक्तरीत्या पूर्वाभ्यासेनोपसंहृतसम्पूर्णभगवद्भक्तियोगो भगवन्तं प्राप्नोति एवमारब्धविच्छिन्नसंरम्भभयादियोगोपि जन्मान्तरे पूर्वाभ्यासेन परिपूर्णतद्योगो भगवन्तं प्राप्नुयात् नचैवं युक्तम्, अन्यथा विष्णुद्वेषिणां सर्वेषामपि मुक्तिप्रसङ्गः । एवञ्च "यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम् । यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसम्" ॥ इत्यादिविष्णुदूषकनिन्दावचनानामनवकाशप्रसङ्गः । उच्यते, संरम्भभयादीनां तस्मिन्नेव जन्मनि स्वविस्मारकभावनाप्रकर्षावहानामेव मुक्तिहेतुत्वं न तु विच्छिन्नानां. जन्मान्तरसम्बन्धिनामपि; प्रत्युत तेषां निरयहेतुत्वमेव. भक्तियोगस्य तु विच्छिन्नस्यापि पुनर्जन्मान्तरे भावनाप्रकर्षावहनद्वारा मुक्तिसाधनत्वमिति. नचात्र मानाभावः धर्मिग्राहकमानस्य सत्त्वात् "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते" इत्यारभ्य "तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः" इत्यन्तेन भगवतैवारब्धस्यापि भक्तियोगस्य पुनः कालान्तरे फलसाधनत्वस्योक्तत्वात् नत्वेवं संरम्भभयादीनां सकृदारब्धानां पुनर्जन्मान्तरे भगवत्प्राप्तिसाधनत्वप्रज्ञापकं किञ्चिद्वचनं विद्यते प्रत्युत "योविष्णुम्" इत्यादिनिन्दा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वचनान्येव सन्ति यदि भगवन्निन्दादिकारिणामपि सर्वेषां द्वेषादिविस्मारकभावनाप्रकर्षः स्यात्तर्हि स्यादेव तेषां मुक्तिरिति न कोपि विरोधः ॥ ३१ ॥

एवं संरम्भयोगादीनामपि भगवत्प्राप्तिसाधनत्वेन चैद्यदन्तवक्त्रयोर्न मुक्तौ विस्मयः कार्य्य इत्यभिधाय न केवलं तयोर्भगवद्विषयकभावनाप्रकर्षे तद्विषयकसम्बन्ध एव हेतुरपि तु पूर्वसिद्धं भगवदानुकूल्यञ्चेति वक्तुमितिहासं प्रतुष्टूषुः प्रश्नावसरप्रदानाय तयोस्तावद्विष्णुपार्षदत्वं विप्रशापाद्भ्रंशञ्चाह–मातृष्वसेय इति । मातुः स्वसा भगिनी तस्या अपत्यं पुमान् मातृष्वसेयः हे पाण्डव युधिष्ठिर ! यो भवतो मातृष्वसेयः चैद्यो दन्तवक्त्रश्च द्वाविमौ पूर्वं विष्णोः पार्षदप्रवरौ द्वारस्थितौ विप्रशापाद्धेतोः पदात्स्वस्थानाच्च्युतौ भ्रंशौ एवञ्च तयोः पाश्चात्यद्वेषातिशयात्प्राक्तनात्यन्तभगवदानुकूल्याच्च शापान्ते भावनाप्रकर्षसिद्ध्या मुक्तिरिति भावः । भगडान्तर्वर्त्तिन्युपेन्द्रादिविष्णुलोके कस्मिंश्चित् "तदुपर्यपि बादरायणः सम्भवात्" इति न्यायेनोपेन्द्राद्युपासनया तद्द्वारपत्याधिकारं गतौ कौचिज्जीवौ स्थितौ पश्चाद्विप्रशापात्पदच्युताविति नारदस्याशयः ॥ ३२ ॥

इममाशयमजानन्नेवं प्रश्नावसरे दत्ते पृच्छति युधिष्ठिरः—कीदृशइतिद्वाभ्याम् । कीदृशः शाप इति शापप्रकारप्रश्नः कस्य वेति तत्कर्तृप्रश्नः, तस्य विशेषणं हरिदासाभिमर्शिन इति हरिदासानभिमृशति पराभवतीतिहरिदासाभिमर्शी तस्य अनेन तस्यानौचित्यं सूचितम्. हरेरेकान्तभक्तानां निकटवर्त्तिनां भवो जन्म :अश्रद्धेय इव अनादर्त्तव्य इवाभाति प्रतीयते. अयं भावः "एतं देवयानं पन्थानमापद्य न च पुनरावर्त्तते न च पुनरावर्त्तते' इति श्रुत्युक्तरीत्या मुक्तानामेव पुनरावृत्तिर्न विद्यते किम्पुनर्नित्यसिद्धानां भगवत्पार्षदानां भगवत्स्थानाद्भ्रंशाभाव इह जन्माभवश्चेति अत इदं भगवत्पार्षदयोः तत्पदाद्भ्रंशयोरूच्यमानमिह जन्मानादर्त्तव्यम् तज्जन्मप्रतिपादकं वाक्यम् "जरद्गवः कम्बलपादुकाभ्याम्" इत्यादिवाक्यवदसङ्गतार्थमिति ॥ ३३ ॥

तयोर्जन्मासम्भवमेव विवृण्वन्पृच्छति—देहेन्द्रियासु हीनानामिति । कर्माधत्तप्राकृतदेहेन्द्रियप्राणरहितानां वैकुण्ठपुरवासिनां नित्यसिद्धानामित्यर्थः । अनेन पूर्वमप्यसम्भावितप्राकृतदेहेन्द्रियप्राणसम्बन्धानामित्युक्तम् एवंविधानां देहसम्बन्धः प्राकृतदेहसम्बन्धस्तदनुबन्धिरागद्वेषादिसम्बन्धश्च तयोः समाहारः तद्देतदघटमानं मह्यमाख्यातुं कथयितुमर्हसि ॥ ३४ ॥

एवमापृष्टो भगवान्नारदः प्रश्नस्योत्तररूपमितिहासं वक्तुमुपक्रमते-एकदेत्यादिना । ब्रह्मणश्चतुर्मुखस्य पुत्राः सनन्दनादयः आदिशब्देन सनत्कुमारसनत्सुजाता विवक्षिताः एते भुवनत्रयं चरन्तः कदाचिद्यदृच्छया विष्णोर्लोकं जग्मुर्ययुः अयं विष्णुलोकशब्दो ब्रह्माण्डांतर्गतविष्णुलोकविषयः न तु मुक्तप्राप्यपरमव्योमविषयः "वैकुण्ठः कल्पितो येन लोकोलोकनमस्कृतः" इति वक्ष्यमाणत्वात् मुक्तप्राप्ये अर्चिरादिमार्गेणैव गम्ये परमव्योम्नि योगिनामपि सनकादिकानां गमनासम्भवान्नित्यसिद्धानामिहोत्पत्त्यसंभवाच्च ॥ ३५

सनन्दनादीन् विशिंषन्नाह–पञ्चेति । पञ्च षड् वा हायना वत्सरा येषां ते अर्भा अर्भकास्तदाभासस्तद्वदवस्थिताः तान्, अर्भशब्दाभिप्रेतं विवृणोति पूर्वेषां रुद्रादीनामपि पूर्वं जातान् दिग्वाससो दिगम्बरानेवंभूतांस्तान्सनन्दनादीन् शिशून् शिशुत्वेनालक्ष्य विष्णोर्द्वारस्थौ द्वारि स्थितौ द्वारपौ प्रत्यषेधतां न्यवारयताम् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोपि भक्तिगर्भकामादिनैव भगवत्प्राप्तिरित्याह—कामादिति । तृतीयार्थे पञ्चमी कामादिभिरपि यथा यथावद् भक्त्या सहैव कृष्णे मन आवेश्य द्वेषादिना यदघमापादितं तदघं हित्वा तस्य कृष्णस्य गतिं लोकं गता इत्यन्वयः प्रथमतः कामादियुक्तया भक्त्या हरौ मनः आवेश्य पश्चाद्यथाभूतया भक्त्याऽघं हित्वेत्यर्थः ॥ २९ ॥

बहव इत्युक्तस्य विषयविभागमाह—गोप्य इति । कामात्कामयुक्तया भक्त्या कंसः कंसाविष्टो भृगुः भययुक्तया भक्त्या चैद्यादयः चैद्यादिराजवादयः द्वेषयुक्तया वृष्णयः सम्बन्धो बन्धुता तन्निमित्तया यूयं पाण्डवः समतुलितबहुमानयुक्तया वयं शुकादिशब्दवाच्याः केवलया भक्त्या अत्र कश्चन विशेषः—

"गोप्यः कामयुताभक्ताः कंसाविष्टः स्वयं भृगुः ।
द्वेषो भययुतो भक्तश्चैद्याद्याद्विया जयादयः ॥
विद्वेषसंयुता भक्ता वृष्णयो बन्धु (१) संयुताः ।
बहुमानस्नेहसाम्याद्देवा भक्ताः प्रकीर्तिताः ॥
स्नेहोपसर्जनादेव बहुमानान्मुनीश्वराः ।
बहुमानोपि देवानां ऋषिभ्योप्यधिको मतः ॥
ब्रह्मवीन्द्रेन्द्रकामाद्वैरितरेषां यथाक्रमम्" ॥

इति वचनादवगन्तव्यः ॥ ३० ॥

भक्त्यैव पुरुषार्थो न केवलद्वेषेणेत्याशयवानाह—कतम इति । कामाद्युपसर्जनभक्तियोगानां पञ्चानां मध्ये कतमोपि भक्तियोगो वेनस्य नास्ति असौ (२) कश्चन द्वेषात्मक एव यस्माद्भक्तियोगमन्तरेण पुरुषार्थो नास्ति तस्मात्केनापि प्रकारेणापाधितेनोपायेन भक्तिलक्षणेन कृष्णे मनो निवेशयेत् द्वेषादिना "उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायकः" इत्यभिधानादत उपायो भक्तिरेव अतो भक्तिमन्तरेणोपायो नास्तीत्यर्थः ॥ ३१ ॥

पैतृस्वस्रुता एव इत्यत्र चैद्यादयः स्वतो भक्ता असुरावेशाद्द्वेषिण इत्युक्तं तत्र हेतुमाह—मातृष्वसेय इति । पार्षदप्रवरत्वं स्वतो भक्तत्वे विप्रशापादसुरावेशित्वं द्वेषित्वे हेतुः ॥ ३२ ॥

हरिदासान् हरिभक्तान् अभिमृशति स्पृशतीति हरिदासाभिमर्शनः हरेरेकान्तिनां नियतभक्तानां भव उत्पत्तिः शारीरयोगलक्षणः स्वपदभ्रंशलक्षणः शापः अश्रद्धेय इवाभाति सयुक्तिकं निरूपयितुं न क्षममिति प्रतीयते ॥ ३३ ॥

तत्र कारणमाह-देहेति । देहाद्यभावश्च कुत्रत्यानामिति तत्राह–

(१) भावप्रधानोनिर्देशः (२) वेनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वैकुण्ठेति, तेषां प्राकृतदेहाद्यभावेन जन्मादिकं कथं घटत इति शङ्कयत इत्यर्थः। देहसम्बन्धः देहयोगः तस्य सम्बन्धः निमित्तभूतः शाप एतच्छापनिमित्तं अनेन देहयोगं तन्निमित्तशापं तन्निमित्तं च व्याख्यातुमर्हसीत्यर्थसमुदायो लक्ष्यत इत्यर्थः ॥ ३४ ॥

तदर्थजातं कुतोवगम्यत इतिपरिहारवचनादित्यत आदित वक्ति एकदेति ॥ ३५ ॥

पञ्चषड्ढायनार्भाभाः पञ्चवर्षाः षड्वर्षाः अर्भाः अर्भका बालास्तद्वदाभा दीप्तिर्येषां ते तथा तत्समाना इत्यर्थः। शिशून्मत्वा पुरप्रवेशकारणाय वेषान्तरमापन्नानित्याशङ्कयेत्यर्थः द्वाःस्थौ द्वारि स्थौ जयविजयौ तान् सनन्दनादीन् प्रत्यषेधतां वेत्रविधानेन न्यवारयतामित्यन्वयः द्वाःस्थावित्युक्त्या जयविजययोः अधिकारस्थत्वं सूचयति तेन वैकुण्ठे अधिकारस्थिताः मुक्ताश्चेति द्विविधा जनाः सन्ति। तत्राधिकारस्था देहादियोगित्वाद्वरशापयोग्याः पश्चान्नयोग्या इति ज्ञायते तदुक्तम् "अधिकारस्थिताश्चैव विमुक्ताश्च द्विधाजनाः। विष्णुलोकस्थितास्तेषां वरशापादियोगिनः। अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च। विमुक्त्यनन्तरं तेषां वरशापादयो न तु। देहेन्द्रियासु युक्ताश्च पूर्वंपश्चान्नतैर्युताः॥ अप्यमीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युताः" ॥ इति अनेन वैकुण्ठे मुक्तामुक्तस्थानद्वयमस्तीति ज्ञायते ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

नच शास्त्रविहितेनैव भगवद्धर्म्मेण सिद्धिः स्यात् न तदविहितेन कामादिनेति वाच्यम्. यतः कामाद्द्वेषादिति। यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छन्ति तथैवाविहितेनापि कामादिना बहवो गता इत्यर्थः। तदघं तेषु कामादिषु मध्ये यद्द्वेषभययोरघं भवति तद्धित्वैव भयस्यापि द्वेषसम्मिलितत्वादघोत्पादकत्वं ज्ञेयम्. अत्र केचित् कामेऽप्यघं मन्यन्ते। तत्रेदं विचार्य्यते भगवति काम एव केवलः पापावहः किं वा पतिभावयुक्तः अथवा उपपतिभावयुक्त इति. स एव केवल इति चेत् स किं द्वेषादिगणपातित्वात् तद्वत् स्वरूपेणैव वा, परम शुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यारोपणं तेनातिक्रमेण वा, पापश्रवणेन वा? नाद्येन. "उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथागतः। द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः"; इत्यादौ द्वेषादेर्न्यक्कृतत्वात्. तस्य तु स्तुतत्वात्. अतस्तत्र प्रिया इति स्नेहवत् कामस्यापि प्रीत्यात्मकत्वेन तद्वदेव न दोषः। तादृशीनां कामो हि प्रेमैकरूपः "यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु। तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः" इत्यादावातिक्रम्यापि स्वसुखं तदानुकूल्य एव तात्पर्यदर्शनात्. सैरन्ध्यास्तु भावोरिरंसाप्रायत्वेन श्रीगोपीनामिव च केवलं तत्तात्पर्य्याभावात्तदपेक्षयैव निन्द्यते नतु स्वरूपतः "सानङ्गतप्तकुचयोः" इत्यादौ "अनन्तचरणेन रुजोमृजन्ती" इति "परिरभ्य कान्तमानन्दमूर्त्तिम्" इति कार्य्यद्वारा तत्स्तुतेः तत्रापि "सहोष्यतामिह प्रेष्ठ! दिनानि कतिचिन्मया" इत्यत्र प्रीत्यभिव्यक्तेश्च। तदेवं तस्य कामस्य द्वेषादिगणान्तःपतितत्वं परिहृत्य तेन पापावहत्वं परिहृतम् अथ कामुकत्वाद्यारोपणाधरपानादिरूपस्तत्र व्यवहारोऽपि नातिक्रमहेतुः यतो "लोकवत्तु लीलाकैवल्यम्" इति न्यायेन लीला तत्र स्वभावत एव सिद्धा. तत्रच श्रीभूलीलादिभिस्तस्य तादृशलीलायाः श्रीवैकुण्ठादिषु नित्यसिद्धत्वेन स्वतन्त्रलीलाविनोदस्य तस्याभिरुचितत्वावगमात्. तादृशलीलारसमोहस्वाभाविकं भगवत्ताद्यनुसन्धानमपि तत्कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवावगम्येत. तथा तत्प्रेयसीजनानामपि तत्स्वरूपशक्तिविग्रहत्वेन परमशुद्धरूपत्वात् ततो न्यूनत्वाभावाच्च तदधरपानादिकमपि नाननुरूपम्। पूर्वयुक्त्या तदभिरुचितमेव। तासां तत्स्वरूपशक्तिविग्रहत्वं श्रीकृष्णसन्दर्भे दर्शितमस्ति दर्शयिष्यते च श्रीदशमे, नच प्राकृतरामाजने दोषः प्रसञ्जनीयः तद्योग्यं तादृशं भावं स्वरूपशक्तिविग्रहञ्च प्राप्यैव तदिच्छयैव तत्प्राप्तेः। अथ पापश्रवणेन च न पापावहोऽसौकामः तच्छ्रवणादेव. अतः पतिभावयुक्ते च तत्र सुतरां न दोषः प्रत्युत स्तुतिः श्रूयते "यास्सम्पर्यचरन् प्रेम्णा पादसम्वाहनादिभिः। जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः" इति महानुभावमतीनामपि तद्भावः श्रूयते। यथा श्रीमध्वाचार्यधृतं महाकौर्मवचनं "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे। भर्तारञ्च जगद्योनिं वासुदेवमजं विभुम्" इति अत एव वन्दितम् "पतिपुत्रसुहृद्भ्रातृपितृवन्मातृवद्धरिम् ये ध्यायन्ति सदोद्युक्तास्तेभ्योपीह नमो नमः" इत्यनेन अथोपपतिभावेन च न पापावहोऽसौ "यत्पत्यपत्यसुहृदामनुवृत्तिः" इत्यादिना ताभिरेवोत्तरितत्वात् "गोपीनां तत्पतीनाञ्च" इत्यादिना, श्रीशुकदेवेन "न पारयेहं निरवद्य संयुजाम्" इत्यनेन स्वयं श्रीभगवता तादृशानामन्येषामपि तद्भावो दृश्यते यथोदाहरिष्यते श्रीदशमे "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः" इत्यादि। अतः पुरुषेष्वपि स्त्रीभावेनोद्भवात् भगवद्विषयत्वात् न प्राकृतकामदेवतोद्भावितः प्राकृतकामोऽसौ किन्तु "साक्षान्मन्मथमन्मथः" इति श्रवणात् आगमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्भावितोऽप्राकृत एवासौ काम इति ज्ञेयम् अत एव मुमुक्षुमुक्तनित्यपार्षदानामपि वाञ्छनीयोऽसाविति दर्शितम् श्रीदशमे "एताः परं तनुभृतः" इत्यादिना. यतः श्रुतयोपि "नित्यसिद्धगोपिकाभावाभिलाषिण्यः सत्यस्तद्रूपेणैव तद्गणान्तःपातिन्यो बभूवुः" इति "निभृतमरुन्मनोक्ष" इत्यादि श्रुतिस्तवे दर्शयिष्यते। तदेवं साधु व्याख्यातं कामादित्यादौ द्वेषभययोर्यदघमित्यादि ॥ २९ ॥

अथ 'बहवस्तद्गतिं गताः' इत्यत्र निदर्शनमाह—गोप्य इति सार्द्धेकेन। गोप्य इति साधकचरीणां गोपीविशेषाणां पूर्वावस्थामवलम्ब्योच्यते, वयमिति. यथा श्रीनारदस्य "प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्." इत्याद्युक्तरीत्या पार्षददेहत्वे सिद्धे तेन स्वयं वयमिति निजपूर्वावस्थामवलम्ब्योच्यते। तत्रैव वैधी भक्तिः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधुना लब्धरागस्य तस्य "नमस्येकान्तभक्तानां गुणदोषोद्भवा-गुणाः। गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः"इति न्यायेन विध्य-नधीना रागात्मिकैव विराजत इति. अत एव तद्गतिं गता इति तेषां फलप्राप्तेरव्यतीतत्वनिर्देशः एवमेव वक्ष्यते स्वयं भगवता "केवलेन हि भावेन गोप्यः" इत्यादि। "मत्कामा रमणम्" इत्यादौ "सङ्गाच्छतसहस्रशः" इति च अत्र ता गोप्य इवाधुनिकयश्च तद्गु-णादिश्रवणेनैव तद्भावा भवेयुः यथोक्तम्. "श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः। उरुगायोरुगीतो वा पश्यन्तीनां कुतः पुनः"इति। अथ पार्षदचरस्यापि चैद्यस्यागन्तुकोपद्रवाभासदर्शनेनैव साधकत्वनिर्देशः। सम्बन्धाद्यः स्नेहो रागस्तस्माद्वृष्णयो यूयं चेत्येकम्. 'तस्माद्वैरानुबन्धेन' इत्यादौ कामादित्यादौ चोक्तस्यैवा-र्थस्योदाहरणवाक्येऽस्मिन् तदैकार्थ्यावश्यकत्वात् पञ्चानामित्यनु-रोधात् उभयत्रापि सम्बन्धस्नेहयोर्द्वयोरपि विद्यमानत्वाच्च। सम्बन्ध ग्रहणं रागस्यैव विशेषज्ञापनार्थं गोपीवदत्रापि सम्बन्धे स्नेहेच वृष्णिविशेषाः पाण्डवसम्बन्धिविशेषाश्च पूर्वाव-स्थामवलम्ब्य साधकत्वेन निर्दिष्टाः। अतः सम्बन्धे स्नेहोऽपि तदभिरुचिमात्रं ज्ञेयम्. 'भक्त्या विहितया' अस्या एव प्रतिलब्धत्वेन भावमार्गे निर्दिष्टुमुपक्रान्तत्वात् ॥ ३० ॥

यदि द्वेषेणापि सिद्धिस्तर्हि वेनः किमिति नरके पातित इत्याशङ्क्याह—कतम इति । पुरुषं भगवन्तं लक्षीकृत्य प-ञ्चानां वैरानुबन्धादीनां मध्ये वेनः कतमोऽपि न स्यात् तस्य तं प्रति प्रासङ्गिकनिन्दामात्रात्मकं वैरं. नतु वैरानुबन्धः ततस्ती-व्रध्यानाभावात् पापमेव तत्र प्रतिफलितमिति भावः। ततोऽसुर तुल्यस्वभावैरपि तस्मिन् स्वमोक्षार्थं वैरानुष्ठानसाहसं न क-र्तव्यमित्यभिप्रेतम् अत एव "ये वै भगवता प्रोक्ता उपाया ह्यात्म-लब्धये" इत्याद्यैरपि तेपु अतिव्याप्तिर्व्याहन्यते अनभिप्रेतत्वेनाप्रो-क्तत्वात् यस्मादेवं तस्मादिति अत्रापि पूर्ववन्निवेशयेदिति सम्मतिमात्रं न विधिः केनापि तेष्वन्यदुपायेषु युक्ततमेनैकेने-त्यर्थः । अहो यस्तादृशबहुप्रयत्नसाध्यभक्तिमार्गेण चिरात् साध्यते स एव चिराद्भावविशेषगात्रेण तत्र च द्वेषादी-नामपि तस्मादेवम्भूते परमसद्गुणसद्भावे तस्मिन् दू-रेस्तु पामरजनभाव्यस्य वैरस्य वार्ता को वाधमः औदास्यमवलम्ब्य प्रीतिमपि न कुर्यादिति रागानुगायामेव तच्च युक्ततमत्वमङ्गी-कृतं भवति ॥ ३१ ॥

चैद्यदन्तवक्रौ तु नासुरौ किन्तु हरेः स्वभक्तिप्रवर्त्तक-विप्रकुलदाक्षिण्यमयस्वैरलीलेच्छया तदनुकारिणावेवेत्यभिप्रायं प्रश्नोत्तराभ्यां दर्शयितुमाह—मातृष्वस्रेय इति । तत्र तयोरन्यथाभावः सर्वथा न सम्भवत्येवेति प्रश्नस्यार्थः "न च पुनरावर्त्तते" इति श्रुतेः । "अनावृत्तिःशब्दात्" इति न्यायात् "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति श्रीगीताभ्यः। सन्यायश्चैवासौ सिद्धान्तस्तु तत्रेतिहासमात्रम् तच्च पूर्वयुक्त्यैव सम्भवतीति तदभिप्रायः वक्ष्यते च स्वयम् 'विष्णु-चक्रहतांहसौ" इति व्याख्यास्यते च तैः तयोः पापमेव हतं न तु ताविति ॥ ३२—३४ ॥

एकदेति युग्मकम् । यदृच्छया केनापि भाग्योदयेन विष्णो-र्लोकं जग्मुः ॥ ३५ ॥ ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भद्राभद्रभाववन्तः सर्वे एव तं प्राप्नुवन्ति साधनतारतम्यात् फलतारतम्यन्तु युक्त्या स्वयं विवेचनीयमित्याह—कामादिति । तदेवं द्वेषजन्यमघं हित्वा द्वेषजन्येनैवावेशेन विनष्टीकृत्येत्यर्थः। न चात्र कामेऽप्यघं व्याख्येयम "द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः" इति तद्भक्तानां प्रियात्वेनाख्यास्यमानत्वात् तद्गतिं तदीयां गतिं प्रेमाणां मोक्षञ्च ॥ २९ ॥

भावानामास्पदानि नामग्राहमाह—गोप्यः कामात् पूर्वव्या-ख्या युक्त्यैव स्नेहोत्थादेव नतु सामान्यतः तादृगभिप्रायत्वे कुब्जाद्या इति प्रयुज्येत भयात् स्वस्य कृष्णवध्यत्वज्ञानत उद्भूतात् वृष्णयो यादवाः यूयं पांडवाश्च सम्बन्धात् पुत्रभ्रात्रादिभावात् मातुलेयभ्रातृस्वस्रेयादिभावाच्च, कीदृशात् स्नेहात् स्नेहमया-दिति सत्राजित्प्रसेनशतधन्वकर्णदुर्योधनादयो व्यावृत्ताः न चात्र स्नेहस्य पृथक् तत्प्राप्तिसाधनत्वं व्याख्येयम्, उत्तरवाक्ये पञ्चसंख्यत्वेनैव भावानां निरूपणात् वयं नारदादयो भक्त्या तद्गतिं गता इति पूर्वस्यैवानुषंगः तत्र गोप्यः प्रेमवत् प्रेयसीभावं कंसः सायुज्यं चैद्यदंतवक्रपौंड्रकाः सारूप्यं अन्येचारयो यथा-योग्यं सायुज्यसालोक्यादिकं वृष्णयः पांडवाश्च सख्यादिभावव-त्पार्षदत्वं नारदादय एश्वर्य्यज्ञानवत् पार्षदत्वमित्येवं यथा साधनं तत्तत्प्राकरणिकवाक्यदृष्ट्या निर्धारितां गतिं तदीयां गताः अत्र "यादवानां हितार्थाय धृतो गोवर्द्धनो मया" इति हरिवंशवाक्यात् नन्दादिगोपानामपि वृष्णिवंशत्वादैश्वर्य्यज्ञानशून्यत्वेन स्नेहव-त्वाधिक्यात् पुत्रादिसम्बन्धस्यातिदार्ढ्यमेषामेव प्राधान्यद्यो-तकं ज्ञेयम् । ननु, तर्हि शिशुपालवद्भगवन्निन्दान्यकारादिकर्त्ता वेनः किमिति नरके पतितस्तत्राह—पुरुषं भगवन्तंप्रति पञ्चानां पूर्वश्लोकोक्तानां भावानां मध्ये कस्याप्यनास्पदत्वात् कतमोऽपि न भवति नतावद्गोपीव स्नेहवत्कामवान् न च कंसवद्भीतः नच मां हनिष्यतीति बुद्ध्या भगवद्व्यन्तावेशमय्या शिशुपालवत् द्वेष्टा नापि वृष्ण्यादिरिव तत्र कमपि सम्बन्धन्दधानो नापि नारदा-दिरिव भक्त इत्यर्थः तेन शिशुपालादिभिन्नः प्रतिकूलभावं दिधीर्षुर्वेन इव नरकं यातीति भावः। यस्मादेवं तस्मात् केनाप्य-प्रतिकूलेनैव उपायेन कृष्णे मनो निवेशयेदिति विधेस्तस्माद्वैरानु-बन्धेनेति श्लोकोक्तविधिना सहैकार्थं ज्ञेयम् ॥ ३०—३१ ॥

तदेवं शिशुपालप्रस्तावादायातं भावमार्गसिद्धान्तं तं समाप्य श्रीकृष्णे शिशुपालस्य वैरानुबन्धे को हेतुरित्यपेक्षायामाह-मातृ-ष्वस्रेय इति। पदाद्वैकुण्ठात् च्युतौ ॥ ३२ ॥

हरिदासावप्यभिमृशति स्पृशति अश्रद्धेयः शापवाक्ये विश्वासो नोत्पद्यते असम्भवादिति भावः ॥ ३३ ॥

असम्भवमेवाह—देह इति। जन्म हेतुभूतैः प्राकृतैर्देहेन्द्रियासु-भिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसम्बन्धेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अशपन्कुपिता एवं युवां वासं न चार्हथः।
रजस्तमोभ्यां रहिते पादमूले मधुद्विषः।
पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः॥ ३७॥
एवं शप्तौ स्वभवनात्पतन्तौ तैः कृपालुभिः।
प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम्॥ ३८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

सम्बन्धम् एतदाख्यानमाख्यातुमर्हसीति श्रीस्वामिचरणानां व्याख्या॥ ३४॥ ३५॥

पञ्च वा षड्वा हायनानि येषां ते अर्भा बालास्तद्वदाभा येषान्ते च पूर्वेषां मरीच्यादीनामपि दिग्वाससः शिशून् मत्वा पुंवद्भावआर्षः॥ ३६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यथा भक्त्या तथैव कामादिना ईश्वरे मन आवेश्य तदघं भगवत्पदप्राप्तिप्रतिबन्धकं स्वपापं हित्वा तद्गतिं भगवत्पदं गताः प्राप्ताः॥ २९॥

तत्प्रकारभेदभक्तान् वर्णयति—गोप्य इति। वृष्णीनां युष्माकं च यः कृष्णे सम्बन्धस्तस्माद्यः स्नेहस्तस्मात् वृष्णयो यूयं च तद्गतिं गता इति योजना भक्त्या यथोक्तेन भजनेन॥ ३०॥

कामादिभिरेव भगवच्चिन्तनपराणां मुक्तिरित्यपि नियमो नास्तीत्याह—कतम इति। पुरुषं भगवन्तंप्रति कामादिभिश्चिन्तयतां पञ्चानां मध्ये वेनः कतमोपि न. स हि "भगवन्निन्दया वेनो द्विजैस्तमसि पातितः"इति वाक्यात्,द्विजैस्तमसि पातितोऽपि भगवता पुत्रीभूतेन तमसः पुनरुद्धृतः"पुत्रेणोप्यतरत्तमः"इति वचनात्. अतोभगवन्निन्दया भगवति मनोनिवेशनेन तत्कृपापात्रतां प्राप्त उक्तेभ्यः पञ्चभ्योऽन्यः तस्मात्केनाप्युपायेन कामादिपञ्चप्रकारैष्वेकतमेन निन्दयाच साङ्ख्यनामग्राहित्वादिना वा आर्त्तत्वजिज्ञासुत्वार्थित्वाद्यन्यतमेन वा मनः श्रीकृष्णे निवेशयेत् इति सिद्धान्तः॥३१॥

शिशुपालो दन्तवक्त्रश्चेति द्वौ न कर्मवशौ जीवौ किन्तु भगवत्पार्षदप्रवरौ भगवदिच्छया भगवदवतारभूतसनत्कुमारशापव्याजेन वैकुण्ठादागतौ, पुनर्वैकुण्ठं गतौ इत्याह—मातृष्वस्रेय इत्यादिना; पदाद्वैकुण्ठात्॥ ३२॥

हरिदासौ अभिमृशति विपर्यीकरोतीति तथा किञ्च हरेः एकान्तिनां भवो जन्म च अश्रद्धेय इवाभाति॥ ३३॥

प्राकृतदेहादिहीनानाम् अप्राकृतदेहादिमतामित्यर्थः। देहसम्बन्धेन जन्ममरणार्हाप्राकृतदेहसम्बन्धेन सम्बन्धमेतदाख्यानमाख्यातुं वर्णयितुमर्हसि॥ ३४॥ ३५॥

पञ्च वा षड्वा हायनानि संवत्सराः यस्य तथाभूतो योऽर्भो बालस्तद्वदाभा येषां ते पूर्वेषां मत्वादीनामपि पूर्वजाः॥ ३६॥

भाषा टीका।

बहुत जन काम द्वेष भय स्नेह और भक्ति से ईश्वर में मन लगा कर कामादि से होने वाले पाप को त्याग कर परमात्मा की गति को प्राप्त हुए॥ २९॥

काम से गोपी, भय से कंस, द्वेष से शिशुपालादि राजा लोग, संबंध से यादव लोग, स्नेह से तुमलोग हे राजन्! तथा भक्ति से हम लोग गोविन्द को प्राप्त हुए॥ ३०॥

इन पाचों में से राजा वेन तो भगवान के प्रति कोई भी नहीं हो सका है इसलिये वह नरक में गिराया गया तस्मात् किसी न किसी प्रकार से श्रीकृष्ण में मन लगाना चाहिये॥ ३१॥

हे युधिष्ठिर! तुमारी मौसी का पुत्र शिशुपाल और दंतवक्त्र ये दोनों विष्णु के पार्षदों में श्रेष्ठ थे, ब्राह्मणों के शाप से अपने पद से च्युत हो गये॥ ३२॥

युधिष्ठिर उवाच।

युधिष्ठिरजी बोले, कि हरिदासों को स्पर्श करने वाला कैसा शाप और किस हेतु से शाप हुआ, भगवान के एकही भक्तों का इस संसार में जन्म लेना तो कुछ ठीक नहीं मालूम पडता॥ ३३॥

क्योंकि प्राकृत देह इन्द्रिय प्राणों से हीन ऐसे वैकुण्ठ को इस प्राकृत देह के संबंध से होने वाले इस आख्यान को आप कहने योग्य है॥ ३४॥

नारद उवाच।

नारदजी बोले, कि। एक समय ब्रह्मा के पुत्र सनंदनादिकों ने विष्णु के लोक की जाने की इच्छा की, और तीनों भुवनों में विचरते २ वैकुण्ठ लोक में पहुंचे॥ ३५॥

देखने में पांच छः वर्ष के बालक से जाने जाते परंच अवस्था में तो पूर्व (मरीच्यादि) लोगों के भी पहिलें उत्पन्न हुए हैं दोनों द्वारपालों ने इन को नग्नदेखकर बालक जान भीतर जाने को रोक दिये॥ ३६॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वासमपि नार्हथः कुतः पुनस्तत्सेवामिति चकारार्थः हे बालिशौ! अतो हेतोराशु यातम्॥ ३७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥
हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥ ४० ॥
हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥
सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम् ।
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४२ ॥
ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवस्सुतौ ।
रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥
तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ।
रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ! ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये कल्पतां तावताऽयं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः ॥ ३८ ॥ ३९ ॥

धरोद्धारे निमित्ते तत्प्रतिघाती हतः ॥ ४० ॥

हिरण्यकशिपोर्वधे कारणं सूचयति--हिरण्यकशिपुः पुत्रमिति ॥ ४१ ॥

सर्वभूतानामात्मभूतं कुतः समं ब्रह्मैव पश्यतीति तथा ततः प्रशान्तं द्वेषादिरहितं अत एव भगवत्तेजसा स्पृष्टं व्याप्तम् उद्यमैः शस्त्रास्त्रप्रहारादिभिः ॥ ४२ ॥

विश्रवसः सुतौ ॥ ४३ ॥

न्यहनत् हतवानित्यर्थः । तर्हि तदेवकथनीयमित्युत्सुकं प्रत्याह—रामवीर्यमिति ॥ ४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताभ्यां प्रतिषिद्धास्ते कुपिताः सन्तः एवं वक्ष्यमाणरीत्या अशपन्. शापप्रकारमेवाह—युवामित्यादिना । रागद्वेषादिरहिते भगवतः पादमूले वासं कर्त्तुं युवां नार्हथः अप्राकृतं भगवत्पादारविन्दमूलमुपाश्रित्यात्र स्थातुं प्राकृतरागद्वेषादियुक्तौ युवां नार्हथः इत्यर्थः किन्तु बालिशौ मूर्खौ युवामतो भगवत्स्थानादाशु शीघ्रं पापिष्ठां रागद्वेषादिबहुलामासुरीं योनिमासुरजन्मेत्यर्थः यातं प्राप्नुतम् ॥ ३७ ॥

एवमित्थं शप्तौ तौ पार्षदौ स्वस्थानात्पतन्तौ कृपालुभिस्तैः सनकादिभिः प्रोक्तौ. तदेवाह—पुनरिति । पुनर्वां युवयोस्त्रिभिर्जन्मभिर्लोकाय पुनरेतल्लोकप्राप्त्यै कल्पतां शापमोक्ष इति शेषः तावता कालेन शापः समाप्यतामित्यर्थः ॥ ३८ ॥

तावेव पार्षदौ विप्रैः शप्तौ इह लोके दितेः पुत्रौ जज्ञाते जातौ बभूवतुः तत्र हिरण्यकशिपुर्ज्येष्ठस्ततो हिरण्याक्षस्तस्यानुजः ॥ ३८ ॥

तत्र ज्येष्ठोहिरण्यकशिपुर्नृसिंहरूपिणा भगवता हतः हिरण्याक्षस्तु धरोद्धारे भूम्युद्धारे निमित्ते सौकरं वाराहं वपुर्बिभ्रता भगवता हतः ॥ ४० ॥

हिरण्यकशिपुवृत्तान्तप्रस्तावतरणाय तद्वृत्तान्तं संग्रहेणाह-हिरण्यकशिपुरिति । स केशवस्य भगवतो निरतिशयप्रियं प्रह्लादं पुत्रं जिघांसुर्हन्तुमिच्छुः पुत्रमरणनिमित्तं नानाविधा यातनाः अकरोत् ॥ ४१ ॥

यातनाः कुर्वाणोपि हिरण्यकशिपुस्तं पुत्रं हन्तुमुद्यमैः सर्वोपायैरपि नाशक्नोत्. तत्र हेतुं वदंस्तं विशिनष्टि—भगवतस्तेजसा स्पृष्टं व्याप्तं, तत्र हेतुः, प्रशान्तमशनायापिपासादिरहितं प्रशान्तेत्वेव भगवत्तेजस्पर्शइतिभावः। यद्वा, अत एव प्रशान्तं तत्र हेतुः समदर्शनं सुखदुःखादिषु द्वन्द्वेषु समदृष्टिर्यस्समः स एव प्रशान्त इति भावः। यद्वा, अत एव समदर्शनं सर्वभूतानामात्मा ईश्वरस्तत्कृतं तत्प्रकारकतया तदात्मतामापन्नम् "शास्त्रदृष्ट्यातूपदेशोवामदेववत्" इत्युक्तरीत्या यथा "वामदेवस्तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मिविप्रः" इति सर्वभूतान्तरात्मानं भगवन्तं स्वशरीरकं धीसारकृत्य सर्वप्रकारतया स एवावस्थित इति प्रकारभेदेऽपि प्रकार्यैक्यात्तदभिप्रायेण वामदेवो मन्वादिभिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सहात्मनोऽभेदमनुसंहितवानेवं प्रह्लादोऽपि "अहं हरिः सर्वमिदं जनार्दनः" इति प्रकार्यैक्याद्विशिष्टवस्त्वेकदेशत्वात्स्वस्मिन्स्वनिष्ठत्वाभावमालक्ष्याहमेव सर्वभूतान्तरात्मा भगवानित्यनुसंहितवानित्याशयेन तस्य विशेषणं सर्वभूतात्मभूतमित्युक्तम् ॥ ४२ ॥

ततस्तावेव हिरण्यकशिपुहिरण्याक्षौ द्वितीये जन्मनि केकस्यां भार्यायां विश्रवस्सुतौ जातौ तत्र ज्येष्ठो रावणोऽनुजस्तु कुम्भकर्णस्तावुभौ सर्वलोकानुपतापयतः स्वेदयत इति सर्वलोकोपतापनौ ॥ ४३ ॥

तत्रापि जन्मनि भगवान् राघवो भूत्वा शापमुक्तये तयोः शापोत्तारणाय न्यहनत्. अनेन हितकारित्वं भगवतः सूचितम् कोऽसौ राघवः? कीदृशं तद्वीर्यम्? कथं वा हतवान्? इत्यत्राह—रामवीर्यमिति । वीर्यग्रहणं तज्जन्मादीनामप्युपलक्षणं तदवतारतद्वीर्यादिकं सर्वं, हे प्रभो ! मार्कण्डेयमुखाच्छ्रोष्यसि अतो नात्र तन्मया वितन्यत इति भावः ॥ ४४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नानायातनाः बहुविधतीव्रवेदनाकारणानि ॥ ४१ ॥

सर्वभूतात्मनि चराचरान्तर्यामिणि हरावेव भूतं स्थितम् ॥४२॥

नन्वासुरीं योनिं यातम् इत्ययं शापः आसुरयोनिप्राप्तिहेतुः तत्र जयविजययोः दित्यां जन्म तदनगुणं कैश्चिन्यादिजन्म कथं युज्यते ? "राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः" इति भिन्नयोनित्वादितीमां मन्दाशङ्काम्—

"हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ।
अतो भयानको जातस्तत्र राजानमेव च ॥
मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः ।
मृतिकाले हरिश्चैव मत्वा भक्त्यैव केवलम् ।
द्वास्स्थत्वं हरिमाविश्य प्रापैवमनुजोऽपि तु" ॥

इत्यनेन परिहर्तव्यम्. "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय!" इत्यादेः सुरविरुद्धत्वमुभयोः सममिलतो हरिद्वेषश्च सम इति भावः ॥ ४३—४५ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अशपदिति सार्द्धकम् । रजस्तमोभ्यां रहिते प्राकृतसत्त्वादिराहित्येऽपि तन्मात्रराहित्यस्य विवक्षितत्वात्. प्राकृतसात्त्विकत्वेनैतादृशो दोषः सम्भवतीति ॥ ३७—४१ ॥

तमिति । यस्माद्भगवत्तेजसा स्पृष्टं नित्यतदाविष्टत्वात् तस्मात् सर्वेषां भूतानामात्मभूतं परमप्रेमास्पदं तस्मादेव प्रशान्तं विक्षेपरहितम् अन्यत्र समदर्शनं, रागद्वेषरहितञ्च तस्मादेव च नाशकनोदिति ॥ ४२—४५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वां युवयोस्त्रिभिर्जन्मभिर्वां युवां लोकाय वैकुण्ठं प्रापयितुं कल्पतां समर्थो भवतु शाप इति शेषः ॥ ३७—३८—३९ ॥

धरोद्धारे कर्त्तव्ये सति ॥ ४०—४१ ॥

सर्वेषां भूतानामात्मभूतम् आत्मवत्प्रेष्ठं स्वद्वेष्टर्य्यपि पितरि द्वेषाभावात् प्रशान्तं स्वपरदुःखादीनां तुल्यदर्शनात्समदर्शनम् ॥४२—४४॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रजस्तमोभ्यां रहिते रजस्तमोपलक्षितकार्यकारणप्रकृतिविलक्षण इत्यर्थः मधुद्विषः पादौ मूलमाश्रयो यस्य तस्मिन् वैकुण्ठे वासं युवां नार्हथ एवं ते कुपिता अशपन् ॥ ३७ ॥

बालिशौ मूढौ अतः आशु शीघ्रमासुरीं योनिं यातम् एवं शप्तौ पतन्तौ तैः कृपालुभिस्त्रिभिर्जन्मभिः पुनर्लोकाय वैकुण्ठाय कल्पतां प्राप्यताम् ॥ ३८ ॥

जज्ञाते जातौ ॥ ३९ ॥

धराया उद्धारे कर्तव्ये सति ॥ ४० ॥

यातनास्तीव्रवेदनाः ॥ ४१ ॥

सर्वेषां भूतानामात्मा भगवान् स भूतोऽनुभूतः साक्षाद्दृष्टो येन तम् अतएव भगवत्तेजसा स्पृष्टं व्याप्तम् अतएव उद्यमैर्हन्तुं नाशक्नोत् ॥ ४२ ॥

विश्रवस्सुतौ विश्रवः पुत्रौ ॥ ४३ ॥ ४४ ॥

———

भाषा टीका ।

तब उन्होने कुपित होकर शाप दिया कि तुम दोनों रज तम से रहित इस भगवान के लोक में वास के योग्यनही हौ । इस लिये हे मूर्ख हो तुम दोनो शीघ्र पापिष्ठ आसुरी योनि को प्राप्त हो ॥ ३७ ॥

ऐसे शाप देने पर जब अपने वचन से पतन होने लगे तब कृपालु मुनिलोगों ने कहा कि तुम फिर तीन जन्म में इस लोक को प्राप्तहो जावोगे ॥ ३८ ॥

वोही दोनों दैत्यदानवों से वंदित ऐसे दिति के पुत्र उत्पन्न हुए उनमें ज्येष्ठ हिरण्यकशिपु और छोटा हिरण्याक्ष हुआ ॥ ३९ ॥

हिरण्यकशिपुको हरिने सिंहरूप धारण कर मारा, और हिरण्याक्ष को पृथिवी के उद्धार करने के समय (सूकर रूप) वराहावतार धर कर मारा ॥ ४० ॥

गोविन्द के प्रिय और अपने पुत्र ऐसे प्रल्हाद को मारने की इच्छावाला हिरण्यकशिपु पुत्र को मारने के लिये नाना प्रकार की यातना (त्रास) देने लगा ॥ ४१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।
अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥
वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥

युधिष्ठिर उवाच ।

विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ।
ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे
प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

परंच सर्व प्राणियों का आत्मभूत प्रशांत और समदर्शी तथा भगवत्तेज से रक्षित ऐसे प्रह्लाद को हिरण्यकशिपु बहुत यत्नों से भी न मार सका ॥ ४२ ॥

फिर दूसरे जन्म में वे दोनों पार्षद विश्रवा ऋषि की पत्नी में सर्व लोकों को दुःख देने वाले रावण और कुंभकर्ण पैदा हुए ॥ ४३ ॥

उस जन्म में भी भगवान ने श्रीराघव होकर उनके शाप दूर करने के लिये उनको मारा. हे राजन् ! श्रीरामचरित्र तुम मार्कण्डेय जी के मुख से सुनोगे ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु ताविल्यर्थः ॥ ४५ ॥ ४६ ॥

येन कारणेन प्रह्लादस्याच्युतात्मता अच्युतैकचित्तत्वं तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावेव रावणकुम्भकर्णावेवाद्य अधुना तृतीये जन्मनि तव मातृष्वस्रात्मजौ क्षत्रियौ शिशुपालदन्तवक्त्रौ जातावद्य शापेन निर्मुक्तौ श्रीकृष्णचक्रेण हतमंहः पापमूलकं शरीरं ययोस्तौ ॥ ४५ ॥

वैरानुबन्धेन तीव्रमुत्कटं यद्ध्यानं भगवद्विषयकं तेनाच्युतस्य भगवतः सात्मतामात्मनो भावः प्रकारः आत्मता समाना आत्मता सात्मता तां साधर्म्यमित्यर्थः नीतौ प्रापितौ पुनर्विष्णुपार्षदौ भूत्वा हरेः पार्श्वं जग्मतुः ॥ ४६ ॥

यदुक्तं "हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् । जिघांसुः" इत्यादिना प्रह्लादस्य केशवप्रियत्वं हिरण्यकशिपोः प्रह्लादे मरणोद्योगपर्यन्तो द्वेषश्चेति तद्विस्तरेण बुभुत्सुः पृच्छति युधिष्ठिरः—विद्वेष इति । दयिते नितरां प्रीतिविषये तत्रापि महात्मनि सद्गुणाश्रये हिरण्यकशिपोर्विद्वेषः कथमासीत्केन हेतुना आसीदित्यर्थः तदेतत् या च येन कारणेन प्रह्लादस्याच्युतात्मता अच्युते भगवति आत्मा मतिर्यस्य सोऽच्युतात्मा तस्य भावस्तत्ता तां च हे भगवन्, मे मह्यं ब्रूहि ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैरानुबन्धेन वैरयुक्तभक्त्या तीव्रेणात्युत्कटेनाच्युतसाम्यतां श्रीकृष्णस्वरूपप्रवेशलक्षणां हरेर्वैकुण्ठगमनानन्तरं पार्षदौ जयविजयाख्यमूलरूपेणैकीभूय हरेःपार्श्वं जग्मतुरित्यन्वयः "अनुबन्धस्तु भक्तिस्याद्बन्धःस्नेह उदाहृतः" इत्यभिधानादनुबन्धशब्दस्य नैरन्तर्यार्थोऽनुपपन्न इति ॥ ४६ ॥

दयितत्वं महात्मत्वञ्च प्रश्नस्य कारणं येन केन निमित्तेन अच्युते आत्मा मनो यस्य स तथा तस्मिन् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

वैरानुबन्धेति । तदेवं ब्रह्मशापवर्णनेन ब्राह्मणादाद्विषयं मुहुर्युद्धवर्णनेन युद्धेच्छां च कारणत्वेनोपन्यस्तवान् युद्धेच्छैव तु मुख्या ज्ञेया यया पार्षदयोःमुनीनामपि मतिर्विपरीता जाता यथोक्तं तृतीये श्रीभगवतैव 'मतस्तु मे' इति । तथाप्यत्यन्तशापायसम्भवात्सदाभास एव तत्कार्यत्वेन दर्शितः विष्णुचक्रहतांहसावित्यनेन पूर्वोक्तसिद्धान्त एव विवेचनीयः ॥ ४६—४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीयस्य श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विष्णुचक्रेण हतमंहो ययोस्तौ तयोरपराध एव बहिः शिशुपालदन्तवक्त्राकारतया परिणतो हतो न तु तावित्यर्थः इति स्वामिचरणाः यथा वन्हिना कनकस्य मालिन्यमेव हन्यते न तु कनकं तथैव जयविजययोर्वाह्यमलिनावरणयोर्नष्टयोस्ततोः जयविजयावेव तेजः—पुञ्जाकारौ श्रीकृष्णं प्रविष्टौ जनैर्दृष्टाविति भावः ॥ ४५ ॥

अच्युतेन सहस्थितौ आत्मानौ आकारौ ययोस्तस्य भावस्तत्ता तां ध्यानेनैव नीतौ पुनर्मौषललीलांते हरेर्नारायणस्य पार्श्वे जग्मतुरिति मौषललीलातः पूर्वं श्रीकृष्णशरीर एव नारायणस्यापि प्रविष्टत्वात् पार्षदौ जयविजयावपि तत्रैव प्रविश्यस्थिता वितितत्त्वं शिशुपालदन्तवक्रौ कृष्णे सायुज्यं प्रापतुरिति तु लोकप्रतीतिः ॥ ४६ ॥

अच्युतात्मतामच्युतैकचित्तत्वं येन तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
सप्तमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कृष्णचक्रेण हतमंहः पापं ययोस्तौ ध्यानेन अच्युतसाम्यतां नीतावित्युत्तरेणान्वयः। अत्रेदं बोध्यम्, विष्णुपार्षदानां पापासम्भवात् देहपातासम्भवात् वैकुण्ठात्पुनरावृत्त्यसम्भवाच्च भगवतो बहुभिरवतारैर्विहर्तुमिच्छोरिच्छयैव मुनिशापेन रावणादिदेहयोगं प्राप्य बहुकालमासुरेण भावेन भगवन्तमाराध्य पुनर्भगवदिच्छयैव निर्मित इत्युक्तेर्भगवत्कारिताच्छापाद्विमुक्तौ आविष्कृतपार्षददेहौ वैकुण्ठं गताविति ॥ ४५ ॥ ४७— ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका।

वेही दोनों तुमारी माता की बहिन के पुत्र क्षत्रिय हुवे अब शाप से छूट कर श्रीकृष्ण के चक्र से नष्ट हुआ पाप जिन्हो का ऐसे वेही दोनो विष्णु पार्षद, तीव्र बैर के संबन्ध से उत्पन्न हुए ध्यान से कृष्ण की समता को प्राप्त होकर फिर भगवान के समीप पहुंच गये ॥ ४५ ॥ ४६ ॥

युधिष्ठिर बोले, कि—महात्मा प्रिय पुत्र में हिरण्यकशिपु का विद्वेष क्यों भया हे भगवन् ! जिस कारण प्रह्लाद की भगवान में प्रीति हुई सो आप मुझ से कहो ॥ ४७ ॥

इति श्रीमद्भागवत महापुराण सप्तस्कन्ध प्रथम अध्याय की भाषाटीका समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ द्वितीयोऽध्यायः ॥

नारद उवाच ।

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ।
हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा ॥ १ ॥

आह चेदं रुषा घूर्णः सन्दष्टदशनच्छदः ।
कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमम्बरम् ॥ २ ॥

करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ।
शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥

भो भो दानवदैतेयास्त्रिमूर्धंस्त्र्यक्ष शम्बर ।
शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥

विप्रचित्ते मम वचः पुलोमन् शकुनादयः ।
शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ।
पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥

तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ।
भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ।
रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये विष्णुरोषेण लोकं विप्लाव्य दानवैः ।
तद्धतभ्रातृपुत्रादीनितिहासैरसान्त्वयत् ॥ १ ॥

भगवद्द्वेषएव तद्द्वेषेपि कारणमित्याशयेनाह–भ्रातरीत्यादिना । एवं देवपक्षपातेन ॥ १ ॥

कोपेन उत अतिशयेन ज्वलद्भ्यां कोपाग्निधूमेनैव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्युक्तयोग्रया दृष्ट्या दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३ ॥ ४ ॥ ५ ॥

समेनाप्युपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णिग्राहेण सता ॥ ६ ॥

एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतेजोमयस्यापि मायया वनौकसो वराहरूपस्य सतः अस्थिरात्मनोऽव्यवस्थितचित्तस्य कुतः यो यो भजति तं तं भजमानस्यानुसरतः ॥ ७ ॥

तस्य रुधिरेण यावत्तर्पयिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तयोः केशवात्मस्वविद्वेषविस्तरबुभुत्सुना पृष्टो भगवान्नारद आह—भ्रातरीति । एवं देवपक्षपातिना क्रोडमूर्तिना वराहरूपिणा भगवता भ्रातरि हिरण्याक्षे विनिहते सति, हे राजन्! रोषेण शुचा शोकेन चार्पितो व्याप्तः पर्यतप्यत् परितापञ्चकार ॥ १ ॥

इदं वक्ष्यमाणमाह च कथंभूत आह तत्राह, रुषा पूर्णो अत एव सन्दष्टः दशनच्छदः अधरो येन कोपेन उदतिशयेन ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरमाकाशं कोपाग्निधूमेनैव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्भयङ्करदंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुष्प्रेक्ष्यं दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सदसि सभायां शूलमुद्यम्य उद्धृत्य अनेन स्वसामर्थ्यं सूचितम् दानवान्प्रति इदमुवाच ॥ ३ ॥

तदेवाह—भोभो इति । सामान्येन तावत्सम्बोधनं भोभो दानवा दैतेयाश्चेति विशेषतः सम्बोधनं द्विमूर्द्धन्नित्यादिना ॥ ४ ॥

एते सर्वे यूयं प्रथमं मम वचः शृणुत ततः श्रवणानन्तरमेव मदुक्तमाशु युष्माभिः क्रियतां चिरं विलम्बं मा कुरुत ॥ ५ ॥

किं तत्तत्राह—सपत्नैरिति । समेन देवासुरवर्गयोः समेनापि उपधावनैरनुवर्त्तनैः पार्ष्णिग्राहेण पृष्ठपोषकबलकेन देवानां सहायभूतेनेत्यर्थः । हरिणा प्रयोज्यकर्त्रा मत्सपत्नैः प्रयोजककर्तृभिः क्षुद्रैरल्पबलैर्देवैः प्रियः सुहृच्च मे भ्राता हिरण्याक्षो घातितः ॥ ६ ॥

तस्य हरेः कथंभूतस्य घृणेः सूर्यवत्तेजोमयविग्रहस्यापि मायावनौकसः मायोपात्तवराहरूपस्य अत एव त्यक्तः स्वभावो येन तस्य, देवतारूपत्यागादिति भावः । भजन्तं स्वमनुवर्तमानं भजमानस्यानुवर्त्तमानस्य बालस्येवास्थिरात्मनः अव्यवस्थितचित्तस्य ॥ ७ ॥

एवंभूतस्य हरेर्मम शूलेन भिन्ना ग्रीवा यस्य तस्य भूरिणा रुधिरेण रुधिरप्रियं मम भ्रातरं गतव्यथोऽहं यावत्तर्पयिष्ये तावद्यूयं भुवं यातेत्यन्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुः स्वतो विष्णुभक्तोऽसुरावेशात्तद्वेषीत्ययं विवेकः तद्वचनेन ज्ञातुं शक्य इत्येतदर्थमस्याध्यायस्य प्रारम्भः । तत्र प्रह्लादनाम्नि पुत्रे द्वेषः कथं पितुरभूदित्यस्य प्रश्नस्य परिहारं वक्तुमारभते—भ्रातरीति ॥ १ ॥

हरिविषयरुषा भ्रातृविषयशुचा दशनच्छदः ओष्ठः चक्षुषो रोचिषा यथा धूम्रं भवति तथा पश्यन् ॥ २ ॥

भ्रुकुट्या नीलशिरया युक्तमुखः ॥ ३ ॥

हे पाक ! ॥ ४ ॥ ५ ॥

क्षुद्रैरल्पैः कपटिभिर्वा पार्ष्णिग्राहेण पृष्ठावेक्षकेण बालकेन "देवानां दानवानां च सामान्यमधिदैवतम्" इत्यतः समेनाप्युपधावनैः स्वोदर्चनैः विषयेण ॥ ६ ॥

त्यक्तस्वभावस्य त्यक्तसाम्यावस्थस्य तत एवास्माभिः घृणेः शोच्यस्य "घृणिर्विभावसौ सूर्ये रश्मौ शोच्ये विघर्षयो" इत्यभिधानम्. भजन्तं स्वात्मानं सेवमानं भजमानस्य प्रत्युपकारं कुर्वतः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवं पर्यतप्यतेति सम्बन्धः । मूर्त्तिनेत्यत्र रूपिणेति क्वचित् ॥ १—२ ॥

आह चेदमिति यदुक्तं तदेव विशिनष्टि—करालेति । भो भो इति युग्मकम् ॥ ३—६ ॥

तस्येति युग्मकम् । वास्तवोऽर्थस्त्वयं त्यक्तः भक्तेभ्यो दत्तः स्वभावः सारूप्यादिकं येन 'घृणिग्रहणे' इत्यस्मात् घृणेः । कृपया स्वीकर्त्तुः माया कृपा मायेति छान्दसतृतीया लुक् ततः सर्वत्रान्वयः कृपयैव वनौकसः तल्लीलाविस्तारयितुः कृपयैव बालस्येवास्थिरात्मनः भक्तभावानुरूपनानाभावविस्तारयितुः मच्छूलाच्छिन्ना तदगोचरभूता ग्रीवा तदुपलक्षितो विग्रहो यस्य तस्य मे रुधिरेण श्रीनृसिंहतयाविर्भावे तस्माद्भूतमदीयरुधिरेण रुधिरप्रियं भ्रातरं तर्पयिष्ये 'यथा तरोर्मूलनिषेचनेन" इत्यादेः ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वितीये भ्रातृशोकेन धर्मनाशाय दानवान् ।
नियोज्य ज्ञानेति हासैर्मित्रादीन् सह्यसान्त्वयत् ॥

भगवद्द्वेष एव प्रह्लादद्वेषे कारणमभूदिति वक्तुं प्रथमतो भगवद्द्वेषमेव सहेतुक माह—भ्रातर्य्येवमित्यादिना ॥ १ ॥

अम्बरं निरीक्षन्निति हरेर्निवासं वैकुण्ठं हरिञ्च स्वहस्तेनैव ध्वंसयिष्यामीति भावः । धूम्रमिति चक्षोरग्न्योधूमैर्व्याप्तत्वादितिभावः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

समेनापीति यद्यपि स हरिः सर्वत्र समस्तदपि उपधावनैरुपासनैर्निमित्तभूतैः पार्ष्णिग्राहेण लोभवशाद्देवपक्षपाती संवृत्त इत्यर्थः ॥ ६ ॥

वयमप्युपधावाम इति चेन्नैवं ब्रूध्वं यूयं तावन्मन्नियुक्ते कर्मणि तिष्ठत अहमेक एव तं हनिष्यामीत्याह—तस्येति द्वाभ्याम् । ननु, हरिर्हि परमात्मोच्यते शास्त्रैरतस्तं कथं हनिष्यसि ? तत्राह, त्यक्तस्वभावस्य सर्वत्रोदासीन्यरूपः स्वभावो हि परमात्मनः प्रसिद्धः स यदि तेन त्यक्तस्तदा कुतस्तस्य सम्प्रति परमात्मत्वमितिभावः । प्रत्युत स परमात्मत्वं त्यक्त्वा पशुरभूदित्याह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ।
विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥
तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम् ।
सूदयध्वं तपोयज्ञस्वध्यायव्रतदानिनः ॥ १० ॥
विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।
देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥
यत्र यत्र द्विजा गावोवेदावर्णाश्रमाः क्रियाः ।
तं तं जनपदं यात सन्दीपयत वृश्चत ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

घृणेः पूर्वं शुद्धतेजोमयस्यापि सम्प्रति मायापारतन्त्र्याद्वनौ-
कसः मत्स्यकच्छपादिरूपस्य च किञ्च भजन्तञ्जनमात्रमेव
भजमानस्य बालस्येव एकेनैव खण्डलड्डुकेन वशीकृतस्येत्यर्थः ।
वस्तुतस्तु तस्य भक्तवात्सल्यादेव स्यक्तत्यादिविशेषणपञ्चकस्मघाति
तञ्च तस्य भूषणमेव न तु दूषणमिति भावः । घृणेः शुद्धतेजो-
मयस्यापि मायया कृपया इत्यादि योज्यम् । मच्छूलाछिन्ना पृथ-
ग्भूता ग्रीवा यस्येति प्राकृतस्य मच्छूलस्य तत्र प्रवेशोऽपि न
सम्भवेदिति भावः "कुङ्कुमं रुधिरं प्रोक्तम्" इत्यभिधानात् रुधिरेण
नदङ्गरागकुङ्कुमेन रुधिरप्रियं तन्निर्माल्यकुङ्कुमप्रियं मद्भ्रातुर्भक्तत्वा-
दितिभावः ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्णुना हिरण्याक्षे हते सति क्रुद्धो हिरण्यकशिपुर्दानवदै-
तेयैर्लोकं विद्राव्य भ्रातृपुत्रादीनितिहासैरसान्त्वयदिति भ्रातर्वै-
वमिति द्वितीयाध्यायेन वर्णयति—क्रोडमूर्त्तिना वराहरूपेण ॥ १ ॥

संदष्टौ दशनच्छदावोष्ठौ येन सः कोपेन उत् उत्पतन्तः
ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरं निरीक्षन्निदमाह ॥ २ ॥

करालदंष्ट्राभिर्भयजनकदंष्ट्राभिर्युक्तया उग्रदृष्ट्या दुष्प्रेक्ष्यं
दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३—५ ॥

समेनापि उपधावनैराराधनैः पार्ष्णिग्राहेण सहायेन
हरिणा ॥ ६ ॥

घृणेस्तेजोमयविग्रहस्येश्वरस्यापि भजन्तं भजमानस्य अत
एव त्यक्तः स्वभावः समत्वरूप ईश्वरस्वभावो येन तस्य अत
एवास्थिरात्मनश्चञ्चलचित्तस्य मायया दम्भेन कापट्येन वनौकसः
वराहरूपस्य ॥ ७—८ ॥

भाषाटीका ।

श्रीरुक्मिणीरमणो जयति ॥

नारदजी बोले, कि हेराजन् ! वाराह रूपधारी हरीने इस
प्रकार भ्राता के मारने पर हिरण्यकशिपु रोष और शोक से
बहुत हीं तप्तहुआ ॥ १ ॥

और क्रोध से प्रचलित होकर दांतों से होठ काट कर
कोप से जलते हुए नेत्रों से धुआँधार आकाश को देखता हुआ
बोला ॥ २ ॥

कराल डाढें और उग्र दृष्टि से न देखी जाय मुख और
भ्रुकुटि जिसकी ऐसा हिरण्यकशिपु सभा में दानवों से
यह वाक्य बोला ॥ ३ ॥

हे २ दैत्य दानवो ! हे द्विमूर्द्धन् ! हेऽयक्ष ! हे शम्बर !
हे शतबाहो ! हे हयग्रीव ! हे नमुचे ! हे पाक ! हे इल्वल ! ॥ ४ ॥

हे विप्रचित्ते ! हे पुलोमन् ! हे शकुनादिको ! तुम सब लोग
मेरा वचन सुनो और पश्चात् जल्दी करो देर न करो ॥ ५ ॥

यद्यपि विष्णु सबों को सम था; तौ भी क्षुद्र वैरी देवताओं
ने उसके पीछे पड सहाय बनाकर उसी हरि के द्वारा मेरे
प्रिय सुहृत् भ्राता को मरवा डाला ॥ ६ ॥

अब अपने समत्वरूप स्वभाव को छोडने वाले, और अपने
सेवक को भजने वाले, बालक के तरह अस्थिरमन वाले उस
विष्णु के गले को अपने शूल से काट कर उसके बहुत से
रुधिर से रुधिरप्रिय अपने भ्राता का तर्पण करूंगा तब मेरी
व्यथा दूर होगी ॥ ७—८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, देवैस्तद्वधः कारितोऽतस्ते किं न हन्यन्ते ? तत्राह—
तस्मिन्हरौ कूटे कपटे अहिते प्रतिपक्षे कूटमीहितं यस्येति वा
नष्टेऽदृष्टे सति देवाः शुष्यन्ति स्वयमेव नाशं यास्यन्ति, कुतः ?

Dr. Urmila Sharma Collection, Varanasi

इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥
पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ।
खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥ १४ ॥
केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ।
आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः ।
प्रादहञ्छरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥
एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः ।
दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विष्णुरेव प्राणो येषां ते यथा कृत्तमूले वृक्षे शाखाः स्वयं शुष्यन्ति तद्वत् ॥ ९ ॥

तपोयज्ञादियुक्तान्सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह—विष्णुरिति । द्विजानां क्रिया अनुष्ठानं मूलं यस्य सः यतोऽसौ यज्ञो धर्ममयश्च देवादीनां परायणं परम आश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वान्मामनादृत्य तदाश्रयणाच्च ते वध्या इति भावः ॥ ११ ॥

तस्मात्परं गन्धं शृणुतेत्याह–यत्रयत्रेति । सन्दीपयत दहत वृश्चत आजीव्यानां वृक्षाणां छेदं कुरुत ॥ १२ ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामोऽकृत्रिमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी ॥ १४ ॥

खनित्रैः खननसाधनैः आजीव्यानुपजीव्यान् जम्बाम्रकपित्थादीन् शरणानि गृहान् ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावाद्दिवं परित्यज्यालक्षिताः सन्तो भुवि चेरुः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, देवैस्तद्वधः कारितः अतस्ते किं न हन्यन्ते ? तत्राह–तस्मिन्निति । अस्माकमहिते शत्रौ कूटे देवानामाश्रये तस्मिन् विष्णौ नष्टे सति यथा वनस्पतौ छिन्नं मूलं यस्य तस्मिन् सति शाखाः शुष्यन्ति, तद्वद्विष्णुरेव प्राणो जीवनहेतुर्येषां ते दिवौकसः देवाः स्वयमेव नङ्क्ष्यन्ति अतःतन्नाशाय न पृथग्यत्नः कार्य इति भावः ॥ ९ ॥

यावत्पर्यिष्ये तावद्यूयं ब्रह्मक्षत्रकुलाभ्यां समेधितां ब्रह्मक्षत्रबहुलामित्यर्थः । भुवं पृथ्वीं यात, गत्वा किं कर्त्तव्यम् ? तत्राह–सूदयध्वमिति, तप आदीनां द्वन्द्वे ततो मत्वर्थीयइनिः । तप आदिभिर्युक्तान् सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह–विष्णुरिति । द्विजानां क्रियामूलो यो यज्ञः स एव धर्मस्तन्मयस्तदाकृतिः पुमान् विष्णुर्द्विजक्रियामूल इति भिन्नपदत्वे द्विजानां क्रिया स्मार्त्ती मूलं यस्य श्रौतयज्ञरूपधर्ममयश्चेत्यर्थः । पुमान् श्रौतस्मार्त्तधर्मशरीरक इत्यर्थः । तथा देवर्षिपितृभूतानां धर्मः देवाद्युद्देश्यको यो धर्मस्तस्य च परायणं परम आश्रयः निर्वाहकः देवाद्युद्देश्यको यो धर्मस्तदाश्रय इत्यर्थः । द्विजेषु तत्तत्कर्तृकयज्ञादिधर्मेषु च विनाशितेषु शरीरविनाशेन विष्णुरपि विनाशितो भवति तद्विनाशे चाश्रयविनाशादाश्रिते धर्मे विनष्टे सति यज्ञधर्मीयचरुपुरोडाशादिहविर्भागादिरूपजीविकाया अभावाद्देवादयोऽपि स्वयमेव विनष्टा भवन्तीति भावः ॥ ११ ॥

तस्माद्यत्रयत्र देशे ब्राह्मणादयो वर्त्तन्ते तं तं जनपदं देशं यात गच्छत सन्दीपयत दहत वृश्चत लुनीत ॥ १२ ॥

इतीत्थं भर्तुर्हिरण्यकशिपोर्निर्देशमाज्ञाम् आदृता आदरयुक्ताः शिरसा आदाय स्वीकृत्य कदनप्रियाः कदनं भूतद्रोहस्तद्दुःखं वा तदेव प्रियं येषां ते दानवा दैतेयाश्च प्रजानां कदनं चक्रुः ॥ १३ ॥

कदनक्रियामेव प्रपञ्चयति-पुरेति । तत्र पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनम् क्षेत्रं व्रीह्यादेः आरामः अकृत्रिमं वनम् आश्रमं ऋषीणां स्थानम् आकरो रत्नानां वासः खेटः कर्षकग्रामः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी एतानि केचिद्ददहुः अग्निप्रक्षेपेण दग्धवन्तः ॥ १४ ॥

केचित्खनित्रैः खननसाधनैः सेतून् प्राकारान् गोपुरांश्च सेत्वादींश्च बिभिदुः तत्र सेतवो जलबन्धार्थं निर्मितास्तटाकादयः केचिच्च परशुः पाणौ येषां ते आजीव्यानुपजीव्यान् फलिनश्चूतादिवृक्षांश्चिच्छिदुः अन्ये च शरणान् गृहान् प्रादहन् प्रदग्धवन्तः केचिज्ज्वलितोल्मुकैः साङ्गारकाष्ठैः प्रजान् जनान् जज्वलुः ॥ १५ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन्द्रस्य हिरण्यकशिपोरनुचरैर्मुहुर्मुहुर्लोके विप्रकृते उपद्रुते सति सर्वे देवाः स्वर्गं परित्यज्य असुरैरलक्षितास्तत्र-तत्र भुविप्रदेशे विचेरुर्जग्मुः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्तर्दुष्टं दृश्यमानरमणीयं कूटम् अस्थिरात्मनः कूटत्वादि-भाववचनं मोहनार्थमासुरमतमुदीरितमिति ज्ञातव्यं, तदुक्तम्—

"विष्णुभक्तश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः ।
विष्णोर्गुणाभासवाचः श्रीब्रह्मादेस्तथा क्रमात् ॥
विष्ण्वादिद्वेषिणश्चैव सुखवाचस्तथा खिलाः ।
मोहनार्थाः समुद्दिष्टास्तथार्थद्योतकास्तथा" इति ॥ ६ ॥ १० ॥

द्विजक्रियमूलः द्विजाश्च यज्ञादिक्रियाश्च मूलं यस्य स तथा भक्तिज्ञानादिमन्तरेण केवलं यागादिक्रियया प्रसन्नो भव-तीति एतदासुरं मतम् "विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवा-चकाः" इत्येतदत्रापि प्रमाणम्, द्विजैः क्रियमाणां यागादि-क्रियां मूलयति प्रतिष्ठापयति इति द्विजक्रियमूल इत्येतद्देव-मतम् 'मूलप्रतिष्ठायाम्' इतिधातुः इज्यत इति यज्ञः धर्ममयः धर्मप्रधानः दानादिधर्मैर्या प्रसीदतीत्येतदप्यासुरमतम् "यथार्थ-द्योतकः" इति वचनाद्धारकतम इत्यन्योऽर्थः । परायणमुत्तमाश्रय-मित्येतद्देवमतम् ॥ ११ ॥

सन्दीपयत दहत वृश्चत छिन्त ॥ १२ ॥

कदनं कदर्थिंसायाम् ॥ १३ ॥

गवामावासस्थानं व्रजः गोपालवसतिर्वा आश्रमो मुनिनिवासः आकरो रत्नाद्युत्पत्तिस्थानं खेटः नास्थस्थानं खर्वटा वसनवि-क्रयस्य स्थानं घोष आभीरपल्लिः वणिग्भिरधिष्ठितं पत्तनम् ॥ १४ ॥

आजीव्यान् वृक्षान् नारिकेलक्रमुकाप्रनसादीन् ॥ १५ ॥

विप्रकृते विपरीतमापादिते विनाशिते ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यतस्तस्मिन्निति । यद्वा ननु, तस्य तद्वत्तमरणाद्दिव्या गति जातैवास्ति किं तत्प्रयोग तत्राह—अस्मिन्निति । कूटे कूटस्थे एकरूपतया सर्वकालव्यापिनि हिते भक्तसुहृदि नष्टे अद-र्शनं गते सति सर्वेऽपि प्राकृताप्राकृतदिवौकसस्तदेकप्राणा-त्वाच्छुष्यन्ति सुखदनानासम्पद्यपि शोषं प्राप्नुवन्ति तस्मा-त्तदाराधनमेव कार्यमिति भावः । ततश्च यदि युष्माकमिच्छा तर्हि यावत्तद्दर्शनं तावदेव यातेति ॥ १० — १४ ॥

प्रादह्ननित्यर्द्धकम् ॥ १५ ॥

दिवं विमानस्वर्गं भुवं यातेति हिरण्यकशिपुना पूर्वमुक्तत्वात् तस्य सुमेरुस्थितिप्राप्तेः ॥ १६ — १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कूटेहिते कपटचेष्टिते वस्तुतस्तु कूटेषु कपटिष्वपि मद्विधेषु ईहितं युद्धचेष्टा यस्य तस्मिन्नित्यहो मम भाग्यमिति भावः । देवानां तु सौभाग्यं कियद्वर्णनीयं ते तु तदेकप्राणा एवेत्याह तस्मिन्नष्टे दैवात् कदाचिददृष्टे सति नष्टेरदर्शनार्थत्वात् छिन्नमूले वनस्पतौ यथा विटपाः शुष्यन्ति तथा शुष्यन्ति ते विष्णुरेव प्राणा येषान्ते किं वा विष्णोरपि प्राणतुल्यास्ते परमधन्या एवेति भावः ॥ ९ ॥

ब्रह्मक्षत्राभ्यां तपोबलप्रभावाभ्यां सम्यगेधितां वर्द्धितां भुवं यात किमर्थं सूदयध्वं घातयध्वम् ॥ १० ॥

यतस्तेषां नाशे सति विष्णुः स्वयमेव नङ्क्ष्यतीत्याह-विष्णुरिति । द्विजानां नाशे सति तत्क्रियालोपात् विष्णोर्मुखो-त्थातः यज्ञस्य धर्मस्य च नाशात् तत्स्वरूपस्य नाशो भावी किञ्च देवर्ष्यादीनां परायणं परम आश्रय इति देवर्ष्यादीनां वधे तच्छो-कादपि स मरिष्यतीति भावः ॥ ११ ॥

सन्दीपयत दहतेति जनपदस्य दाहे तद्वासिनान्तेषां स्वतएव दाह-सिद्धेः वृश्चत तदुपजीव्यवृक्षाणां छेदं कुरुत ॥ १२ ॥

कदनं कष्टम् ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजोगवांवासः उद्यानं पुष्प-प्रधानं वनं क्षेत्रं ब्रीह्यादेः आरामः फलप्रधानं वनम् आश्रमः ऋषी-णां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटोगि-रिद्रोण्याश्रयो ग्रामः घोषः आभीराणां वासः पत्तनं राज-धानी ॥ १४ ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कूटे कपटे ॥ ९ ॥

तप आदीनि सन्ति येषां तान् सूदयध्वं घातयध्वम् ॥ १० ॥

तप आदिनाशे विष्णुरपि न भविष्यतीत्याशयेनाह—विष्णु-रिति । द्विजाः तत्कर्तृकाः क्रियाश्च तप आद्या मूलं यस्य सः किञ्च यतोऽसौ यज्ञः धर्ममयश्च देवादीनां परायणं परम आश्रयः ॥ ११ ॥

सन्दीपयत अग्निना दहत वृश्चत आयुधैः छेदयत ॥ १२ ॥

आहताः भर्त्रा मानिताः कदनं कष्टम् ॥ १३ ॥

पुरादीन् ददहुः तत्र पुरं हट्टादियुक्तम् ग्रामस्तद्रहितः व्रजो गवामालयः उद्यानं कृत्रिमं वनम् क्षेत्रं ब्रीह्यादेः आरामो कृत्रिमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादेः खेटः कृषीवलवासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीरवासः पत्तनं राजधानी ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः ।
कृत्वा (१) कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥ १७ ॥
शकुनिं शम्बरं धृष्टं भूतसन्तापनं वृकम् ।
कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥
तन्मातरं रुषाभानुं दितिं च जननीं गिरा ।
श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ! ॥ १९ ॥

हिरण्यकशिपुरुवाच ।

अम्बाम्ब हेवधूः पुत्रा वीरं माऽर्हथ शोचितुम् ।
रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥
भूतानामिह सम्वासः प्रपायामिव सुव्रते ! ।
दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २१ ॥
नित्यआत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः ।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन्गुणान् ॥ २२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खनित्रैः खननसाधनैः आजीव्यान् जीवनहेतून् शरणानि गृहान् ॥ १५ ॥

विप्रकृते पीडिते यज्ञभागानामप्राप्तौ दिवं त्यक्त्वा अलक्षिताः दानवदैतेयाद्यज्ञाताः भुवि चेरुः ॥ १६ ॥

भाषाटीका ।

उस कपटी शत्रु विष्णु के नष्ट हुए पर, वृक्ष की जड उखाडने से जैसे शाखायें आपही सूख जातीं हैं इसी प्रकार विष्णु जिनके प्राण है वो देवता लोग भी आप से नष्ट होजाँयगे ॥ ९ ॥

अच्छा तो अब तुम सब लोग ब्राह्मण और क्षत्रियों से पूरित पृथिवी पर जाओ और तप, यज्ञ, स्वाध्याय, व्रत, और दान करने वालों को मार डालो ॥ १० ॥

क्योंकि ? यज्ञ स्वरूप विष्णु का मूल ब्राह्मणों की क्रिया ये हैं और विष्णु धर्म मय पुरुष है, देव ऋषि पितर भूत [प्राणि] और धर्म का वही परायण [उत्कृष्ट आश्रय] है ॥ ११ ॥

इससे जहां २ ब्राह्मण गायें वेद वर्ण आश्रम और वैदिक क्रिया होती हैं उसी २ देश को जाकर अग्नि से जलादो और काट डालो ॥ १२ ॥

कदन (नाश) करने में प्रीति वाले वे दैत्य लोग भी बडे आदर से अपने भर्त्ता की इस तरह की आज्ञा को शिर से ग्रहण कर प्रजा का नाश करने लगे ॥ १३ ॥

और पुर, ग्राम, व्रज, उद्यान क्षेत्र, वाटिका आश्रम खान किसानों के निवास, पर्वतों के समीप के ग्राम, घोष और राजधानी इत्यादि को जलाने लगे ॥ १४ ॥

कितने एक दैत्य कुदालों से सेतु प्राकार गोपुर द्वारों को और जीविका के वृक्षों को परसाओं से काटने लगे अन्य दैत्य प्रजा ओं के निवास स्थानों को जलाने लगे ॥ १५ ॥

जब हिरण्यकशिपु के अनुचरों ने ऐसा लोक का बहुत विप्रिय किया तब देवता लोग भी स्वर्ग को छोड अलक्षित होकर पृथिवी पर विचरने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवांस्तदाह—हिरण्यकशिपुरित्यादिना । कटोदकं प्रेताय प्रदेयमुदकम् आदिशब्दात्प्रेतश्राद्धादिकम् ॥ १७ ॥ १८ ॥ १९ ॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

भवतुनाम तस्य श्लाघ्यो वधः तथाप्यस्माकं तावद्बन्धुर्गत एवेति चेत्तत्राह—भूतानामिति । दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैः कर्मभिः उन्नीतानां वियोजितानाम् ॥ २१ ॥

(१) करोदकादीनि. इति पाठान्तरम्. वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथाऽम्भसा प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥ २३ ॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ।
याति तत्साम्यतां भद्रे ! ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं लोकदृष्ट्या शोकं निवार्य्य तत्त्वदृष्ट्या वारयति—नित्य इति । नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगतः सर्ववित् सर्वज्ञः, सर्वत्र हेतुः, परो देहादिव्यतिरिक्तः अतो मृत इति कृश इति मलिन इति वियुक्त इति अज्ञ इति च मत्वा शोको न कार्य्य इत्यर्थः । कथं तर्हि तस्य संसारः? तत्राह—धत्ते इति । आत्मनो मायया स्वाविद्यया लिङ्गं मूर्तिं धत्ते गुणान् उच्चावचान् देहान् सुखदुःखादीन् वा विशेषेण सृजन् स्वीकुर्वन् लिङ्गशरीरोपाधिः संसार इत्यर्थः ॥ ॥ २२ ॥

एतत्सदृष्टान्तं प्रपञ्चयति—यथेति चतुर्भिः । तरवः प्रतिबिम्बिनाः उपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वा ग्राहकधर्माग्राह्ये भवन्तीति दृष्टान्तमाह, चक्षुषेति ॥ २३ ॥

अविकलः परिपूर्णएव तत्साम्यताम् मनःसम्मतामित्यर्थः ॥२४॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततो दुःखितो हिरण्यकशिपुः संपरेतस्य मृतस्य भ्रातुः हिरण्याक्षस्य करोदकादीनि प्रेतोद्देशेन करेण हस्तेन देयं सलिलं जलं करोदकं तत्प्रभृतीनि प्रेतोद्देशेन कर्त्तव्यानि कृत्वा भ्रातुः हिरण्याक्षस्य पुत्रान् असांत्वयत् ॥ १७ ॥

भ्रातुः पुत्रानुद्दिशति—शकुनिमिति ॥ १८ ॥

तथा देशकालाभिज्ञो ऽसुरेश्वरो हिरण्यकशिपुस्तेषां शकुन्यादीनां मातरं रुषद्भानुं स्वमातरं दितिञ्च श्लक्ष्णया मृद्व्या निपुणया वा गिरा इदं वक्ष्यमाणमाह ॥ १९ ॥

तदेवाह—अम्बाम्बेत्यादिना, यावदध्यायसमाप्ति । अम्बाम्बेति दितेः सम्बोधनम्, हे वधूरिति भ्रातुर्भार्यायाः, हे पुत्रा इति तत्पुत्राणाम्. वीरं हिरण्याक्षंप्रति शोचितुं यूयं नार्हथ कुतो यतो रिपोरभिमुखे शूराणां वधः श्लाघ्यः प्रशस्तः ईप्सितः प्रशस्तत्वेनाभिमतइत्यर्थः ॥ २० ॥

भवतुनाम तस्य वधः श्लाघ्यस्तथाप्यस्माकं तावद्बन्धुर्गत एवेत्यत्राह—भूतानामिति । इह संसारे भूतानां संवासः सहावस्थानं प्रपायामिव प्रपिबन्त्यस्यामिति प्रपा पान्थानां पिपासूनां जलादिपानेन विश्रान्त्यर्थं धार्मिकैर्निर्मिता शाला तस्यां यथा पान्थानां सहावस्थानमस्थिरं तद्वदिह भूतानामपीत्यर्थः । अस्थिरत्वे हेतुं वदन् भूतानि विशिनष्टि, स्वकर्मभिर्हेतुभिर्दैवेन तत्सञ्चितकर्मानुगुणं प्रवृत्तेनेश्वरेणेत्यर्थः । एकत्र नीतानां संयोजितानां पुनरन्यत्रोन्नीतानां वियोजितानाम् ॥ २१ ॥

ननु, जीवतामेव संयोगवियोगौ प्रपादिषु दृष्टौ, कथं पुनरजीवतोऽत्रैव दग्धस्य तत्रतत्र संयोगवियोगौ? इत्यत्राह—नित्य इति । देहस्यास्थिरत्वेऽप्यात्मनः स्थिरत्वात् तत्तत्कर्मायत्तशरीरत्यागोपादानाभ्यां तैस्तैः संयोगवियोगौ उपपन्नाविति भावः । तदेतदुपपाद्यते, आत्मा अनित्यस्तत्र हेतुरव्ययः विनाशाद्यवस्थारहितः, तत्कुतः? शुद्धः प्रकृतिपरिणामानाश्रयस्वरूपः प्रकृतिपरिणामो हि प्रकृतिगतः तत्कुतः परदेहादिलक्षणः तत्कुतः सर्ववित् देहेन्द्रियमनःप्राणादीनां वित् अजडत्वेन देहादिलक्षण इति भावः । कथमेकदेशस्थः सर्वं वेत्ति? तत्राह—सर्वगः स्वधर्मभूतज्ञानद्वारा कृत्स्नदेहादिव्यापीति भावः । स्वतः एवम्भूतोऽप्यसावात्मा मायया स्वसम्बन्धिविचित्रपुण्यपापात्मककर्मणा गुणान् सत्त्वादीन्विसृजन्कर्मानुरूपं क्षोभयन्नित्यर्थः । आत्मनः स्वस्य कर्मफलभोगार्थमिति शेषः । लिङ्गं शरीरं धत्ते बिभर्ति गुणक्षोभस्य कर्मानुगुणत्वात्कर्मणः स्वात्मनः कर्तृत्वगुणनिसर्गेऽपि कर्तृत्वमुक्तं गुणान्विसृजन्निति, उक्तविधोऽप्यनादिपुण्यपापात्मककर्मफलभोगाय तदनुगुणपरिणामसत्त्वादिगुणपरिणामात्मकं देहं बिभर्ति इत्यर्थः तथाच तस्य तत्रतत्र कर्मायत्तदेहसौलभ्यात्तत्प्रयुक्तावेकस्यैव संयोगवियोगौ सम्भवत इति भावः ॥ २२ ॥

ननु, नायमात्मा देहादिलक्षणः किन्तु स एव यतो देवोऽहं मनुष्योऽहमिति देहाद्यभेदेन प्रतीयते तत्राह—यथेति । देवोऽहमित्यादिप्रतीतिर्भ्रान्तिरूपा न प्रमितिरूपेतिभावः । तदेवोपपादयति—यथेति, यथा प्रचलता अम्भसा उदकेनोपाधिना तरवो वृक्षा अपि चलाइव कम्पमाना इव दृश्यन्ते यथाच भ्राम्यमाणेन चक्षुषा भूरपि चलतीव दृश्यते यथा तरुभूम्यादिचलनप्रतीतिर्भ्रान्तिरूपेत्यर्थः ॥ २३ ॥

एवं तथा हे भद्रे, गुणैः सत्त्वादिगुणपरिणामात्मकैः देहेन्द्रियादिभिः सह मनसि भ्राम्यमाणे व्याप्रुवति, यद्वा, गुणैः शब्दादिविषयैर्हेतुभिस्तदर्थमित्यर्थः । मनसि भ्राम्यमाणे देवं विषयीकुर्वति सति पुमान् जीवः स्वयमविकलोऽपि निरवयवोऽपि देहादिभिन्नोऽपीत्यर्थः । तत्साम्यतां देहतुल्यतां याति देवोऽहं मनुष्योऽहमित्यादिदेहरूपेणात्मानं प्रत्येति इत्यर्थः । तत्तां यातीत्यनुक्त्वा तत्साम्यतां यातीतिवदतोऽयमभिप्रायः देवोऽहमित्यादिदेहाकारमात्मानं मन्यमानस्यापि कदाचिद्व्यतिरेकप्रतिपत्तिरस्त्येवेति. तदेव विशदयति, अलिङ्गो लिङ्गवानिवेति. लिङ्गाच्छरीरादन्यः अलिङ्गः आत्मा लिङ्गवानिवात्मानं प्रत्येति ममेदं शरीरमित्येवं रूपेण लिङ्गप्रतिसम्बन्धीवात्मानं प्रत्येतीत्यर्थः । ममेदं शरीरमिति शरीराद्यतिरिक्तत्वेनात्मनः प्रतीतावपि देहात्मभ्रान्तिमतां तत्प्रतीतेरस्फुटत्वद्योतनाय लिङ्गवानिवेतीवशब्दः प्रयुक्तः । अयं भावः, यद्यात्मनो देहाकारत्वेन प्रतीतिः प्रमितिरूपा स्यात्तर्हि तद्भिन्नत्वेन प्रतीतिर्भ्रान्तिरूपास्यात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथायुक्तं शरीरप्रतिभासदशायां तदप्रतीतिदशायाञ्च सुषुप्त्यादावहमर्थस्यात्मनोऽनुवृत्तत्वेन प्रतीयमानत्वादिति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कटोदकं प्रेतमुद्दिश्य दीयमानमुदकम् ॥ १८ ॥

तन्मातरं तेषां मातरं नाम्ना रुशाद्भानु विति जननीं च श्लक्ष्णया गिरा इदमाहेत्यन्वयः ॥ १९ ॥

हे वधूः हे सहोदरभार्ये हे पुत्राश्च परेता वध ऐहिकामुष्मिकजनश्लाघ्यो न भवतीति कृत्वा शोकं उताश्रेव कांश्चित्कालं जीवानीति अभीष्टहान्याप्राप्तः आहोस्वित्पितृमातृपुत्रभावस्य चणिकतेति तत्र प्रथमद्वितीयौ प्रत्याह रिपोरिति ॥२० ॥

तृतीयं मातरम् एकां कटाक्षीकृत्याह-भूतानामिति । इह कर्मभुवि दैवेन विधिनाऽन्यत्र हरिणा वा एकत्र नीतानां सम्मिलितानामुन्नीतानां पुत्रपौत्रादिप्रसृद्धिं प्रापितानां भूतानामेकत्र संवासः सहवासः प्रपायां पानीयशालायामिव यथाऽध्रुवस्तथाऽनित्यो भवतीत्यन्वयः । "प्रपा पानीयशालास्यान्मंत्रशाला प्रति श्रयः" इत्यभिधानम् ॥ २१ ॥

भूतानां सहवासोऽनित्यश्चेत्तर्हि केन सहवासो नित्यो भवतीत्याशंक्य सर्वगतत्वाज्जीवस्य मन आदीन्द्रियाधारत्वाद्धरिणा सहवासो नित्यः "सता सोम्य तदा सम्पन्नोभवति प्राज्ञेनात्मनान्वारूढ उत्सर्जयन्नि,,इत्यादिना सुप्तिमरणावस्थयोरपि सहस्थित्युक्तेरन्यथा किंवक्तव्यमित्याशयेन दैवं मतमाह-नित्य इति । असौ हरिरात्मनो जीवस्य मन आदीन्द्रियज्ञानं धत्ते तस्याधारभूत इत्यर्थः नित्यत्वादिकं स्वरूपत्वेनोच्यते, पर इति. जीवव्यावर्तकं मायया स्वेच्छया वासनया वा गुणान् शब्दादीन् विसृजन् ददानः संसारिणा इव चित्चिदूदेहेन मनआदीनां नित्यसम्बन्धो युज्यत इत्यतः सर्वगत इत्युक्तम. प्रपायां प्राणिसहवासवत् परमात्मनो देहसंबन्धो नित्य इत्याशयेनासुरमतमप्यनेनोच्यते गुणान् विसृजन् बुभुक्षुरसावात्मा आत्मनो भोगायतनं लिङ्गं कर्मज्ञानेन्द्रियपञ्चवायुमनसां समुदितरूपं शरीरं धत्ते मायेत्युक्त्वाऽनित्यो देहसम्बन्ध इति ॥ २२ ॥

इतोपि अविद्याबलादूब्रह्मैव संसरतीत्येतदासुरं मतमित्याशयेनाह-यथेति । एवं गुणैर्भ्राम्यमाणे इतस्ततश्चञ्चलीक्रियमाणे मनस्यविकलः पुमान्पूर्णपुरुषः श्रीनारायणः तस्य जीवस्य साम्यं दोषित्वं संसारित्वं यातीति प्रतीयते. कथमिव, लिङ्गवानिव जीव इव मनोदोषैराभासं ब्रह्मप्रतिबिम्बं जीवे दूषिते तद्विपयज्ञानहीने सति तन्महाभासिनो बिम्बभूतस्य ब्रह्मणोपि दुष्टत्वं कल्पयतीत्यर्थः । न चैतदुपपन्नमित्याह-अलिङ्ग इति । नीरूपं तस्मादघटिताविद्याकल्पितमित्यर्थः । अन्यत्र प्राकृतशरीररहितः, कथमिव, प्रचलिताम्भसा तरवोऽपि प्रचला इव दृश्यन्ते. यथा, जलसञ्चलनाज्जले प्रतिबिम्बितवृक्षसञ्चलनात्तटस्थनिश्चलवृक्षसञ्चलनं कल्पयत्यज्ञस्तथेति. नन्वत्र प्रतिबिम्बितवृक्षचलनेन तटस्थवृक्षचलनकल्पनमुन्मत्तकल्पनमेव. प्रत्यक्षेणान्यथा दृश्यमानत्वादित्युक्त्वा दृष्टान्तान्तरमाह-चक्षुषेति. यथा, परिभ्रमतः पुरुषस्य भ्राम्यमाणेन चक्षुषा भूर्भ्रमतीव दृश्यते—

"असमः समतामेति भ्रान्तिदृष्ट्यैव केवलम् ।
जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथञ्चन ॥
यथोदचालनाद्वृक्षप्रतिबिम्बप्रचालनात् ।
तटस्थवृक्षचलनं कल्पयेदबुधो नरः ॥
तथा मनसिजैर्दोषैराभासे दूषिते नरे ।
आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत् ॥
आत्मनश्चक्षुषो भ्रान्त्या यथा पश्येद्भ्रमं भुवः ।
तथैव स्वात्मनो दोषाद्दोषवद्ब्रह्म पश्यति,, ॥

इत्येतत्प्रमाणासिद्धत्वादुक्त एवार्थो न त्वितरः 'विष्णुर्द्विजक्रियामूलः' इत्यारभ्योच्यमानं दैवमासुरञ्चेत्युभयमतज्ञापनाय—

"विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् ।
हरिरेव हि सर्वस्य मूलं सम्यङ्मतं नृप" ॥

इत्येतद्वाक्यमाचार्यैरत्रोदाहृतमुपर्यप्यनुसन्धानाय चेति ॥ २३-२४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रिपोरप्यभिमुखे किमुत श्रीविष्णोरिति च ॥ २०—२१ ॥

नित्य इत्यत्र जीवेऽपीश्वरधर्मोक्तिरसुरौचित्यात् सर्वज्ञस्याज्ञानमिति युक्तिविरुद्धञ्च तदिति वास्तवार्थे तु सर्वं लोकं गच्छति सर्वगः सर्वं शरीरं विन्दति सर्ववित् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कटोदकम् । प्रेताय प्रदेयमुदकं आदिशब्दात् प्रेतश्राद्धञ्च॥१७-१९॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

बन्धुविच्छेददुःखञ्चैवं भावनायां निर्वाप्यतामित्याह-भूतानामिति । प्रपायां पानीयशालायां उन्नीतानां पुनर्वियोजितानाम् ॥ २१ ॥

युष्मत्प्रबोधार्थमुक्तमिदं लोकदृष्ट्या तत्त्वदृष्ट्यातु हिरण्याक्षः खल्वात्मैव न तु देहस्तस्यात्मनश्च स्वरूपं शृणुतेत्याह-नित्यः मृत्युरहितः अव्ययः अपचयशून्यः शुद्धः निर्मलः सर्वगः सर्वगतः इतीश्वरधर्मोक्ते औचित्यसुरस्वभावात् वस्तुतस्तु सर्वं लोकं गच्छतीति सः सर्वं सुखदुःखादिकं विन्दतीति सः परो देहादिव्यतिरिक्तः असावात्मा आत्मनः स्वस्य लिंगं देहं मायया स्वाविद्यया धत्ते किमर्थं गुणान् उच्चावचान् स्थूलदेहान् विशेषेण सृजन् स्वीकुर्वन् तथा तत्पदावृत्त्या विसृजन् त्यजन् स्थूलदेहान् स्वीकर्तुं त्यक्तुञ्चेत्यर्थः ॥ २२ ॥

एवं यल्लिङ्गं धत्ते तस्मात् सूक्ष्मदेहादप्यात्मा भिन्न एवेति दृष्टान्ताभ्यामाह-यथा अम्भसा चलता हेतुना अम्भस्सु प्रतिबिम्बितास्तरवोपि चला इवेक्षन्ते न तु चलाः अम्भोभ्यस्तेषां भिन्नत्वात् एवमेव लिङ्गधर्माः शोकमोहादयस्तदुपहिते आत्मन्यपि प्रतीयन्ते मत्वात्माशोकमोहादिमान्. तस्माल्लिङ्गाद्भिन्नत्वादित्यर्थः । एवमुपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वाभाहक्षपोऽप्याह्ये भवन्तीति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषआत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना ।
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥
सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः ।
अविवेकश्च चिन्ताचा विवेकाऽस्मृतिरेव च ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दृष्टान्तमाह—चक्षुषेति । भ्राम्यमाणेन भ्रमिदोषाक्रम्यमाणेन चल-ती भ्रमतीव यथा भूताविष्टः पुरुषो भूतग्राह्यउच्यते एवं देहाविष्ट-आत्मा देहग्राह्योदेहधर्माक्रान्तउच्यत इत्यर्थः । एवम् अविकलः शुद्धएवात्मा तत्साम्यतां मनःसमतां मनोधर्मग्राहित्वम् ॥ २३ ॥ २४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कटोदकादीनि प्रेतदेयतिलाञ्जल्यादीनि ॥ १७—१८ ॥'

तेषां हिरण्याक्षसुतानां मातरं रुषाभानुं श्लक्ष्णया मधु-रया ॥ १९—२० ॥

दैवेन प्राक्कर्मणा एकत्र नीतानां मातृपुत्रादिदेहसंयोजि-तानां पुनः स्वकर्मभिरुन्नीतानां मातृपुत्रादिसंयोगप्रददेहेभ्योवि-योजितानां संवासः संयोगः प्रपायामिव पानीयशालिकाया-मिव अनित्य इत्यर्थः ॥ २१ ॥

ननु, कः स आत्मा ? यः कर्मभिर्देहादुन्नीयते, केन देहेन ? त्यक्ता देहादुत्क्रमति केन च हेतुना तमपि देहं विभर्तीत्याकाङ्क्षाया-माह—नित्य इति । यः कर्मभिरुन्नीयते स आत्मा नित्यो ध्रुवः यत-अव्ययः विनाशाद्यवस्थारहितः अतएव शुद्धः सर्वगः "ह्युदय-मात्मा, बुद्धेर्गुणेनात्मगुणेन चैव, ह्याराग्रमात्रो ह्यवरोपि दृष्टः" इत्यादिश्रुतिभ्यो हृद्गतोऽणुस्वरूपोपि ज्ञातृत्वलक्षणात् गुणात् सर्वेषु पादशिरआदिषु व्याप्तः अत एव पादे मे सुखमित्येवं सर्ववित् परः देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणः एवंभूत-गुणान् प्रकृतिगुणपरिणामात्मकान् उत्तरदेहलब्धये पूर्वपूर्वदे-हान् विसृजन् लिङ्गं सूक्ष्मं देहम् आत्मनः स्थाने आत्मत्वेन मायया धत्ते बिभर्ति मायशात्मत्वेन धृतेन लिङ्गदेहेन देहाद्दे-हान्तरं यातीत्यर्थः ॥ २२ ॥

लिंगदेहे आत्मत्वभ्रान्तिमुपपादयति—यथेति द्वाभ्याम् । यथा-म्भसा प्रचलता हेतुभूतेन तत्तीरगास्तरवोपि जलगतस्वच्छाया-द्वारा चला इव प्रतीयन्ते, भ्रान्त्येति शेषः । यथा च भ्राम्यमाणेन चक्षुषा भूः भ्रमतीव प्रतीयते ॥ २३ ॥

एवं गुणैरनादिप्रकृतिगुणैर्भ्राम्यमाणे स्वरूपज्ञानात् चाल्य-माने मनसि मनोपलक्षिते आत्मनि अविकलः सुखरूपोपि अलिङ्गः देहभिन्नोपि पुमान् तत्साम्यतां लिङ्गदेहसाम्यतां देहो-हमिति भावं याति लिङ्गवानिव प्रसिद्धो देहवान् यथा स्थूलोऽस्मि कृशोस्मीति मन्यते तद्वत् ॥ २४ ॥

भाषा टीका ।

हिरण्यकशिपु ने भी अपने मृत भ्राता के शोक से दुःखित होकर उसको तिलांजली देकर भ्राता के पुत्रों को समुझाने लगा ॥ १७ ॥

शकुनि शंवर धृष्ट भूत सन्तापन वृक काल नाभ महा नाभ हरिश्मश्रु और उत्कच, इन सब हिरण्याक्ष के पुत्रों को ॥ १८ ॥

और उनकी माता रुषाभानु तथा हे जनेश्वर ! अपनी माता दिति को देशकाल के जानने वाला हिरण्यकश्यपु-मीठी वाणी से ऐसे कहना लगा ॥ १९ ॥

हिरण्यकशिपु बोला कि—हे जननि ! हे वधू ! हे पुत्रो उस वीर का शोक करने लायक नहीं है । क्योंकि शूरवीर का मरना तो शत्रु के सम्मुख ही श्लाघनीय है ॥ २० ॥

हे सुव्रते ! इस संसार में प्राणियों निवास [प्रपा] प्याउके निवास के तरह जानो क्योंकि सब लोग दैव योग [प्राचीन कर्म योग] से इकट्ठे होते हैं और उसी से फिर अलग २ होजाते हैं ॥ २१ ॥

क्योंकि ? आत्मा तो नित्य अव्यय शुद्ध सर्व (देहेन्द्रियादि) को जानने वाला और ज्ञान द्वारा सर्व (देहेन्द्रियादि) व्यापी है और देहादि से पर अर्थात् विलक्षण है ॥ एसा होकर भी अपने पूर्व कर्मों से सत्वादि गुणों को सृजता हुआ अपने प्रारब्ध भोग लिये शरीर को धारण तरता है ॥ २२ ॥

जैसे जल के चलते से वृक्ष भी चलते से मालूम पड़ते हैं ॥ और जैसे भ्रमते हुए नेत्रों से पृथिवी चलती सी मालूम पड़ती है ॥ २३ ॥

इसी प्रकार माया के गुणों से मनके भ्रमने से यह अविकल पुरुष जीवात्मा भी हे भद्रे असंसारी होकर भी संसारी की तरह मन समता को प्राप्त हो जाता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लिङ्गभावना देहाभिमानः एष आत्मनो विपर्यासोऽन्यथाभावः तमेवाह—प्रियैर्वियोगोऽप्रियैर्योगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥

ततश्च सम्भवउत्पत्तिः विवेकस्यास्मृतिरननुसन्धानम् ॥२६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य प्रेतबन्धूनां सम्वादं तं निबोधत ॥ २७ ॥
उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः ।
सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥
विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ।
शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥ २९ ॥
प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ।
रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥ ३० ॥
उशीनरेन्द्रं विधिना तथाकृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ।
हताः स्म नाथेति करैरुरो भृशं घ्नन्त्योमुहुस्तत्पदयोरुपापतन् ॥ ३१ ॥
रुदत्य उच्चैर्दयिताङ्घ्रिपङ्कजं सिञ्चन्त्य अस्रैः कुचकुङ्कुमारुणैः ।
विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि शोकहेतुं विना वृथैवायं शोक इत्यस्मिन्नर्थे प्रेतस्य मृतस्य कस्यचित् ये बन्धवस्तेषाञ्च सम्वादं शृणुत ॥ २७ ॥

उपासत तत्समीपे आवृत्य स्थिताः ॥ २८ ॥

विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेनाविलं लिप्तम् ॥२९॥

प्रकीर्णाः केशाः यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दच्छद ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य छिन्न-मायुधं भुजश्च यस्य ॥ ३० ॥

तस्य पदयोरुपसमीपे आ समन्तादपतन् ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहाद्विलक्षणस्य नित्यस्यात्मनः कर्मपरिपाकानुगुण-सत्त्वादिगुणपरिणामरूपदेहसम्बन्धस्तदनुध्याननिमित्तस्तदभिन्न-त्वप्रत्ययश्च भ्रमरूप इत्युक्तम्. अथ यथा देहसम्बन्धस्तदनु-ध्याननिमित्तस्तदभेदभ्रमश्च यथा कर्ममूलकः एवं सुखदुःखादिक-मपि सर्वं कर्ममूलकमेवेत्याह—एष इति । अलिङ्गे लिङ्गादन्यस्मिन् शरीराद्भिन्ने आत्मनि लिङ्गभावना देहत्वेनानुध्यानं देवोऽहमित्या-दिदेहाभेदप्रतीतिरित्येष आत्मनो विपर्ययः अन्यथा प्रतीतिः कर्म-संसृतिः कर्मकृतसंसारो भवतीत्यर्थः । एवं प्रियाप्रियैरिष्टानिष्ट-वस्तुभिर्योगो वियोगश्च सुखदुःखस्वरूप इत्यर्थः ॥ २५ ॥

सम्भवः उत्पत्तिः विनाशो मरणं नानाविधः शोकः अविवेकः चिदचिदीश्वरयाथात्म्याविवेचनं चिन्ता विपयानुध्यानं विवेकस्या-स्मृतिः कश्चिदाप्तोपदेशादिना जातस्यापि विवेकस्याननुसन्धानञ्चे-त्येष सर्वोऽपि कर्मसंसृतिरेव कर्मकृतसंसाररूप एव स्मृतः ॥२६॥

अत्र शोकनिमित्तमन्तरेणापि यः शोकः स व्यर्थ एवेत्य-स्मिन्नर्थे इतिहासमप्युदाहरन्ति तत्त्वविदः, इतिहासं विशिनष्टि— पुरातनं न त्वाधुनिककपोलपरिकल्पितं यमस्य प्रेतबन्धूनाञ्च सम्वा-दरूपं तमितिहासं निबोधत शृणुत ॥ २७ ॥

इतिहासमेवाह—उशीनरेष्वित्यादिना । उशीनरेषु देशेषु सुयज्ञ इति प्रसिद्धः कश्चिद्राजा बभूव स च सपत्नैः शत्रु-भिर्युद्धे निहतः तं निहतं ज्ञातयः सापिण्डाः उपासत परिवृत्यो-पविविशुः ॥ २८ ॥

कथम्भूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभर-णानि स्रक् च यस्माच्छरैर्नितरां भिन्नं हृदयं यस्य असृजा रुधि-रेण आविलं व्याप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य स्तब्धे निश्चले अक्षिणी यस्य संर-म्भेण क्षोभेण दष्टो दच्छदः दन्तच्छदः ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य मृधे युद्धे छिन्नमायुधं भुजश्च यस्य तम् ॥ ३० ॥

विधिना दैवेनैवं कृतमुक्तदशां प्रापितम् उशीनरेन्द्रं पतिं भर्तारं प्रसमीक्ष्य तत्पत्न्यः अतीव दुःखिताः हे नाथ ! वयं हताः स्मेति वदन्त्यः करैः पाणिभिः भृशं नितरामुरो मुहुर्मुहुर्घ्नन्त्यः तस्य भर्तुः पदयोश्चरणयोरुपापतन् समीपे समन्तादाप-तन् ॥ ३१ ॥

तत उच्चैस्स्वरेण रुदन्त्यः कुचकुङ्कुमेनारुणैः कुचयोः पतितत्वा ततः अरुणाङ्घ्रिरिति भावः । अस्रैः शोकजलबिन्दुभिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दयितस्य भर्तुरंघ्रिपङ्कजं सिञ्चन्त्यः विभ्रष्टाः केशाः आभरणानि च यासां ताः नृणामपि शुचं सृजन्त्यः शृण्वतां उत्पादयन्त्यः आक्रन्दनया रोदनेन सह विलेपिरे विलापञ्चक्रुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परमात्मानमेवं जानतः किं फलं ? तत्राह—एषइति । अलिङ्गे प्राकृतदेहेन्द्रियादिरहिते अत एव परतन्त्रत्वादिसर्वदोषरहिते परमात्मनि या लिङ्गभावना प्राकृतदेहेन्द्रियात्मत्वादिचिन्ता एष आत्मनः स्वस्यैवायोग्यस्य जनस्य विपर्यासस्तमःप्राप्तिलक्षणोऽनर्थो भवति इहापि यथा परत्र तमोलक्षणोऽनर्थं एवं प्रियाप्रियादियोगवियोगलक्षणापूर्वकर्मानुसारेण संसृतिर्भवति ॥ २५ ॥

कीदृशीति विशेष्याह–सम्भव इति । अज्ञानपूर्तिपर्यन्तं पुनः पुनः सम्भवस्तस्मिन्सति स्वरूपविनाशः विवेकस्मृतिः अविवेकिन एव विवेकभ्रान्तिः ज्ञानित्वभ्रान्तिः असुरसिद्धान्तनिष्ठितस्य हिरण्यकशिपोरेवं देवसिद्धान्तोपन्यासेन कथं स्वबन्धुबोधनमितीयमाशङ्का—

> "अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे ।
> असुरावेशतस्त्वन्यान् हरिस्तोतॄन् द्विषन्ति च" ॥

इत्यनेन परिहरणीयेति ॥ २६ ॥

पुत्रमित्रकलत्रादिभिः सह निवासो दैवाधीन इति मत्वा शोको न कार्य इत्यस्मिन्नर्थे इतिहासलक्षणकथास्तीत्याह—अत्रेति । प्रेतबन्धूनां कस्यचिन्मृतस्य ज्ञातीनाम् ॥ २७—२८ ॥

असृगाविलं रुधिररूषितम् ॥ २९ ॥

स्तब्धाक्षं निश्चलनेत्रं रजःकुण्ठं धूलिधूसरं मुखाम्बुजं यस्य स तथा तं छिन्नआयुधयुक्तौ भुजौ यस्य स तथा तम् ॥ ३०—३१ ॥

कुचकुंकुमधूलिभिररुणवर्णैराक्रन्दनया उच्चरोदनेन नृणां शुचः शोकान् विसृजन्त्यः कुर्वाणा विलेपिरे परिदेवनं चक्रुः ॥३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष इति युग्मकम् । अलिङ्गे देहातिरिक्ते आत्मनि ॥ २५—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अलिङ्गेऽप्यात्मनि लिङ्गभावना देहाभिमानः एष एवात्मनोविपर्यासः विपर्ययः तस्मादेवात्मनः एषः प्रियाप्रियैर्योगोवियोगश्च चकाराद्विपरीतश्च अप्रियैर्योगः प्रियैर्वियोगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥

विवेकस्य सतोऽप्यस्फूर्तिरस्फुर्तिः ॥ २६ ॥

अत्रापि अशोच्यत्वे [illegible] इतिहासमपि प्रेतस्य मृतस्य ये बन्धवस्तेषाञ्च ॥ २७ ॥ २९ ॥

रभसा क्रोधेन दष्टो दच्छदः अधरो येन तं तत्क्षण एव सपत्नैः शस्त्रहतत्वात्तथाभूतत्वेनैव मृत्वापि स्थितमित्यर्थः ॥ ३० ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहात्माभिमान एव संयोगवियोगादिस्याह—एष इति द्वाभ्याम् । अलिङ्गे देहभिन्ने लिंगभावना देहोहमिति भावना सैष आत्मनोविपर्य्यासः अन्यथाभावः हि हेतौ अत एव विपर्य्यासाद्धेतोः एष प्रसिद्धः प्रियाप्रियैर्योगोवियोगश्च कर्मभिः संसृतिः संसारश्च ॥ २५ ॥

सम्भवो जन्म विनाशो मरणम् अविवेकः कार्याकार्यविवेकाभावः कथञ्चिद्गुर्वादितो लब्धस्य विवेकस्य अस्मृतिरननुसन्धानम् ॥ २६ ॥

उक्तार्थे इतिहासमाह—अत्रापीति । अत्र आत्मनो ध्रुवत्वेनाशोच्यत्वे ॥ २७ ॥

उशीनरेषु देशेषु तस्य ज्ञातयः उपासत आवृत्य स्थिताः ॥२८॥

कथंभूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टानि आभरणानि स्रजो यस्य शरेण निर्भिन्नं हृदयं यस्य असृगाविलं रुधिरलिप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दच्छदो येन रजसा छन्नं मुखाम्भोजं यस्य छिन्नौ आयुधयुक्तौ भुजौ यस्य तम् ॥ ३० ॥

विधिना कर्मफलदेन तथा कृतं पञ्चत्वं नीतं तस्य पदयोः उप समीपे आ समन्तात् अपतन् ॥ ३१ ॥

नृणां पश्यतां शुचं सृजन्त्यः आक्रन्दनया वैकल्यवाचया विलेपिरे ॥ ३२ ॥

भाषा टीका ।

बस यही आत्मा का विपरीत पना है जो कि अशरीरी के विषय शरीरी की भावना हो जानी और इसी से प्रिय अप्रियों से संयोग और वियोग होता है । और इसी से कर्म निबन्धन संसार भी है ॥ २५ ॥

और इसी से शरीर की उत्पत्ति और विनाश और नाना तरह का शोक अविवेक चिन्ता विवेक और विस्मृति भी होती है ॥ २६ ॥

इस विषय में एक प्राचीन इतिहास कहते है ॥ उसमें यमराज और प्रेतबन्धुओं का सम्वाद है उसे तुम सुनो ॥२७॥

उसीनर देशमें एक सुयज्ञ नामक राजा हुआ । उसको युद्ध में वैरियों ने मारडाला उस के जाति लोग उसको चारों तरफ से घेर कर बेठे थे ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहो विधात्राऽकरुणेन नः प्रभो ! भवान् प्रणीतो दृगगोचरां दशाम् ।
उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥ ॥ ३३ ॥
त्वया कृतज्ञेन वयं महीपते ! कथं विना स्याम सुहृत्तमेन ते ।
तत्रानुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥
एवं विलपतीनां वै परिगृह्य मृतं पतिम् ।
अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥
तत्र ह प्रेतबन्धूनामाश्रुत्य परिदेवितम् ।
आह तान् बालकोभूत्वा यमः स्वयमुपागतः ॥ ३६ ॥

यम उवाच ।

अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ।
यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम् ॥ ३७ ॥
अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥
य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः ।
तस्याबलाः ! क्रीडनमाहुरीशितुश्चराचरं निग्रहसङ्ग्रहे प्रभुः ॥ ३९ ॥
पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥ ४० ॥

भाषा टीका ।

उस राजा का रत्नों का कवच बिखर गया था, आभरण और मालायें टूट गई थी। बाणों से हृदय विदीर्ण हो गया था शरीर रुधिर से भीग रहाथा ॥ २९ ॥

केश बिखरे हुए आखें वैठी हुई, रोष के मारे दांतों से होठों को दबायें हुएँ रज से धूसर है मुख जिसका औ युद्ध में कट गये आयुध और भुजा जिसकी ॥ ३० ॥

प्रारब्ध ने इस तरह जिसको कर दिया उस उशीनरेन्द्र राजा को रानियों नें देख कर बडा दुःख पाया ॥ और हे नाथ ! हम सब मरचुकीं ऐसे कह कर हाथों से छाती कूटते हुए उस के पैरों में गिर पडीं ॥ ३१ ॥

ऊचें स्वर से रोती हुई अपने प्रिय के चरणों को कुच कुंकुम से अरुण अपने अश्रुपातों से धोनें लगी। और खुल गये केश और आभरण जिनों के ऐसी वो रानियें बहुत ऊंचे स्वरसे चिल्लाकर मनुष्यों को शोक पैदा कराती हुई विलाप करने लगी ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विलापमेवाह—अहो इति द्वभ्याम् । अकरुणत्वमेवाहुः, येन विधात्रा दृशामगोचरां दशां भवान्प्रणीतो गमितस्तेन विधात्रा त्वमधुना शुचां विवर्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हेमहीपते ! त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेमेत्यर्थः । अतो हे वीर, यत्र त्वं यास्यसि तत्र तेऽनुयानम-नुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिश देहि ॥ ३४ ॥

निर्हारं दाहार्थं नयनमनिच्छन्तीनाम् अस्तमस्ताचलंप्रति ॥ ३५ ॥

परिदेवितं रोदनं स्वपुर्यामेव स्थित आश्रुत्य श्रुत्वा तत्र स्वयमेवोपागतो यमो बालकोभूत्वा तानाह—अहो इत्यादिना ॥ ३६ ॥

अहो आश्चर्यम् अमषां वयसाऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहः; मोहमेवाह, यत्र यस्मादव्यक्तादागतस्तत्रैव गतमपार्थं शोचन्ति तदुक्तं गीतासु,

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ।

किञ्च स्वयमपि सधर्माः मृतेन सह समानो मृत्युलक्षणो धर्मो येषां तथाभूतामपि ॥ ३७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

अबलाः दुर्बला अपि वृकादिभिरभक्ष्यमाणाः वयं न विचिन्तयामः तत्र हेतुः, यो गर्भे रक्षति स एव सर्वत्र रक्षिता ॥ ३८ ॥

ननु, तस्य रक्षणे किम्प्रयोजनम् ? न किञ्चिदपि; किन्तु क्रीडैव केवलमित्याह–य इति । य ईश इदं विश्वं सृजति रक्षत्यवलुम्पते संहरति च भो अबलास्तस्येशितुश्चराचरं क्रीडासाधनमाहुः अतः स एव निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । दिष्टेन दैवेनेश्वरेण रक्षितं तेनेश्वरेण विहतमुपेक्षितम् अस्य हतस्तेनोपेक्षितः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विलापमेवाह--अहो इति द्वाभ्याम् । अस्माकं प्रभो हे भर्त्तः ! अकरुणेन निष्कृपेण विधात्रा ब्रह्मणा दृगगोचरां दशां अद्यापीतो गमितः नः दृशामगोचरामवस्थां प्रणीत इति वान्वयः । येन विधात्रा पुरा उशीनराणां तद्देशोद्भवानां जनानां वृत्तिदः जीवनप्रदः कृतो भवानधुना तेनैव विधात्रा शुचां शोकानां विवर्द्धनः कृतोसि ॥ ३३ ॥

हे महीपते ! सुहृत्तमेन कृतज्ञेन च त्वया विना ते तव सम्बन्धिन्यो वयं कथं स्याम, कथं जीवेमेत्यर्थः । अतस्त्वं यत्र यास्यसि तत्रैव, हे वीर ! तव पदयोः शुश्रूषतीनां सेवाङ्कर्तुमिच्छन्तीनामस्माकमनुयानं सहगमनं दिश देहि ॥ ३४ ॥

एवं मृतं पतिं परिगृह्य विलपन्तीनां निर्हारं दाहार्थं नयनमनिच्छतीनां सतीनाम् अर्कः सूर्यः अस्तम् अस्ताचलंप्रति संन्यवर्त्तत सन्निकृष्टो बभूव ॥ ३५ ॥

प्रेतस्य मृतस्य ये बन्धवस्तेषां परिदेविनं रोदनमाश्रुत्य स्वपुर्यामेव श्रुत्वा भगवान् यमः स्वयमेव बालकोभूत्वा तत्राक्रन्दनस्थाने समुपागतस्तानाह, हेत्याश्चर्यं ॥ ३६ ॥

तदेवाह—अहो इत्यादिना । अहो इत्याश्चर्यं किन्तत् यद्वयसा मत्तः अधिकानामपि लोकविधिं जन्ममरणादिलोकपरिपाटीं पश्यतामप्यमीषां प्रेतबन्धूनां विधिवशो मोह इत्येतत्, विमोहमेवाह—यत्र भुवि सम्भवः उत्पत्तिः तत्रैव गतं पुनस्तत्रैव लीनं मनुष्यंप्रति स्वयं सधर्माः मृतेन तुल्यं जन्ममरणादिभाजोपि अपार्थं मुधा शोचन्ति ॥ ३७ ॥

न्यूनवयस्का अपि वयमेवाहो धन्या श्रेष्ठाः, कुतः ? यतः पितृभ्यां मातापितृभ्यां त्यक्ता अपि वयं न विचिन्तयामश्चिन्तां न कुर्मः अबला दुर्बला अपि बाला अपीति या वृकादिभिरभक्ष्यमाणा वयम्, तत्रहेतुः, यो हि गर्भे रक्षति जन्मनः पश्चादपि स एव हि ईश्वरो रक्षिता रक्षिष्यति ॥ ३८ ॥

कोसौ रक्षिता ? तत्राह—य इति । य ईश्वरः स्वेच्छयैव न तु कर्मणा इदं कृत्स्नं जगत्सृजति तर्हि सोप्यस्मदादिवत्किं जन्ममरणादिभाक् ? नेत्याह–अव्ययः अपक्षयादिविकाररहितः कर्मायत्तप्राकृतदेहरहित इत्यर्थः । यश्च स्वेन सृष्टं जगद्रक्षति यश्च स्वेन रक्षितं जगत्पुनरवलुम्पते संहरति तर्ह्येवंविध ईश्वरः कर्मवश्य इवेत्थं किमर्थं करोति ? तत्राह—हे अबलाः ! तस्यैवं जगदुत्पत्त्यादिकर्त्तुरीशितुरीश्वरस्यान्तरात्मतयावस्थितस्य चराचरात्मकमिदं जगत् क्रीडनं क्रीडापरिकरं जगद्व्यापारस्तस्य क्रीडारूप इति भावः । अत एव निग्रहसंग्रहयोः निग्रहानुग्रहयोः प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । यथा पथि च्युतं विसृष्टमपि दिष्टेन दैवेन ईश्वरेण रक्षितमनुगृहीतं सत् तिष्ठति पुनर्लब्धं भवतीत्यर्थः । गृहे स्थितमपि तेन दिष्टेन विहतं सन्विनश्यति एवमरण्ये अनाथः रक्षकान्तररहितोपि तेन दिष्टेन ईक्षितो जीवति तत्सङ्कल्पेन जीवति गृहे गुप्तोप्यस्य हतो अनेनोपेक्षितो न जीवति किन्तु विनश्यत्येव ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नो दृशां चक्षुषामगोचरमविषयं नीतः येन विधिना ॥ ३३ ॥

स्याम सत्तांप्राप्नुमः तर्हि किं कर्तव्यमत्राह—तत्रेति । यत्र यास्यसि तत्र पादयोरनुयानं दिश ॥ ३४ ॥

निर्हारं दाहम् ॥ ३५ ॥

हेत्यनेन कथांतरप्रसक्तिं सूचयति यमः ॥ ३६ ॥

मा कुरुध्वं यूयं शोकं युष्मभ्यं सुयज्ञो दत्त इत्यादेरिति तत्राह—अहोइति । लोकविधिं जन्ममरणादिप्रकारं विपश्यताममीषां प्रेतबन्धूनां विमोहः अहो धिक् स्वयं सधर्माः जन्मादिसमानधर्माः अमी बन्धवः यत्र यस्य मनुष्यदर्शनायोग्यात् स्वर्गनरकादन्यत्रोद्भव उत्पत्तिर्देहयोगलक्षणाभूत्तं तत्र तत् अस्मच्चक्षुरगोचरं स्वर्गादिकं गतं मनुष्यमनुशोचन्तीति यत्तदपार्थं व्यर्थं गतानुगतिकत्वात् “अदर्शनादिहायातः पुनश्चादर्शनं गतः” इति वचनात्. यत्र स्वर्गादेरुद्भवो यस्य स यत्रोद्भवस्तत्र गतं स्वर्गादिगतमितिवा अपार्थमनुशोचन्तीतिवा सर्वस्य दैवाधीनत्वं स्वानुभवसिद्धमिति ज्ञापयत्यहोइति, यद्वा यत्र उत्पन्नं तत्र पृथिव्यां गतं मनुष्यशरीरं प्रतिव्यर्थम् अनुशोचन्तीति ॥ ३७ ॥

तस्मात्सर्वं दैवाधीनमिति मत्वा न शोकः कार्य इत्याशयेनाह—अहोवयमिति । पितृभ्यां अबला दुर्बलाः कुतश्चिता नास्तीति तत्राह—सरक्षितेति, यो गर्भेऽस्मान् रक्षति स भगवानधुना बहिर्गतान् रक्षिता हि यस्मात्तस्मादिति शेषः ॥ ३८ ॥

न केवलं रक्षिताऽपि तु सृष्ट्यादिकर्तापीत्यतो न संशयः कार्य इतिभावेनाह—यदृच्छयेति, अवेच्छयेतीच्छाग्रहणेन सर्वत्र सृष्टिप्रसङ्गे मायाशब्दस्येच्छार्थो ज्ञायते हे अबलाः सृष्ट्यादिकर्ता यतो सतः मरणलक्षणस्य निग्रहस्य संग्रहे परिहारलक्षणे प्रभोः समर्थस्य तस्येशितुश्चराचरं क्रीडनं लीलासाधनम् ॥ ३९ ॥

“दैवाधीनं जगत्सर्वम्”इत्युक्तेः कथमीश्वराधीनं चराचरमित्याशंक्य दिष्टदैवादिशब्देन संस्तुतोच्युत इत्याशयेनाह—पथीति । भक्तायाभीष्टं दिशतीति दिष्टशब्दवाच्यो मुकुन्दः तेन रक्षितं वन विहतं भस्यानेन हतः सफाशाम्रा ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विलापमाह-अहो इति । प्रणीतो गमितः येन विधात्रा तेन अधुना उशीनराणां शुचां विवर्द्धनः कृतोसि ॥ ३३ ॥

यत्र त्वं यासि तत्र तेऽनुयानं अनुगमनं तव पादयोः शुश्रूषणार्थमित्यर्थः । दिश देहि वयमपि म्रियामहे इत्यर्थः ॥ ३४ ॥

निर्हारं दाहार्थं नयनम् अस्तम् अस्ताचलं प्राप्तो न्यवर्तत च-लनान्निवृत्तो विश्रान्तवानित्यर्थः ॥ ३५ ॥

स्वयमुपागत इति पुण्यवन्जीवानां निर्हारान्त एव यम-पुरगमनं प्रायः सम्भवतीति केचित् तासामेव मध्ये कस्याश्चि-द्वैष्णवस्त्रियः तत्समीपायमदूनैर्नेतुमशक्यत्वात् तत्सामीप्य-दूरीकरणार्थं स्वयं यम एवागत इत्यन्ये प्राहुः, बालको भूत्वे-त्यन्यथा तत्र प्रवेशासामर्थ्यात् बालभाषितस्य मधुरत्वात् तत्कर्तृक-त्वकथनस्यातिविस्मयावहत्वात्तत्त्वजिघृक्षोत्पादनसमर्थत्वाच्च ॥३६॥

यत्र यस्मादव्यक्तात् तदुक्तं गीतासु—

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ॥ ३७ ॥

अस्माकमल्पवयसामपि यो विवेकः सोप्येषां नास्तीति साश्चर्यमाह—अहो इति ॥ ३८ ॥

ननु, त्वां गर्भवासे ररक्ष इममस्मत्पतिं संग्रामे न ररक्षेत्यत्र को हेतुस्तत्राह—य इति । इच्छया स्वेच्छयैव न तु कस्याप्यनुरोधेनैवेति भावः । नन्वीदृशीच्छैव किं हेतुका तत्राह—ईशः अन्यानधीनपरमैश्वर्यवान् तत्कारणकल्पने तदैश्वर्यस्यैव तादृशत्वं न सिद्ध्येदिति भावः । नन्वेवं सृष्ट्यादिकं किमर्थं करोति ? तत्राह—हे अबलाः चराचरं तस्य क्रीडनमेवाहुः निग्रहे संहारे सङ्ग्रहे पालने च स एव प्रभवनशीलः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति—पथीति । दिष्टेन दैवेन ईश्वरेणेत्यर्थः । तेन ईश्वरेण विहतं तेन ईक्षितः अवेक्षितो ऽन्येनापि रक्ष्यते इत्यर्थः । अस्य हतः अनेनोपेक्षितः अन्येनापि हन्यते इत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहो इति खेदे येन पुरा उशीनराणां नोऽस्माकं च वृत्तिदो भवान् कृतः तेनैवाकरुणेन दृशामगोचरां दशां प्रणीतो गमितस्सन् शुचां विवर्द्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हे वीर ! ते त्वदीया वयं त्वया विना कथं स्याम भवेम जीवेम अतः तव पादयोः शुश्रूषतीनां शुश्रूषां कुर्वन्तीनां यत्र त्वं या-स्यसि तत्रानुयानमनुगमनं दिश देहि ॥ ३४ ॥

एवमुक्तप्रकारेण रुदन्तीनां निर्हारं दाहार्थं निस्सारणम् अस्तमस्ताचलंप्रति संन्यवर्तत ॥ ३५ ॥

यमः परिदेवितं रोदनमाश्रुत्य बालकोभूत्वा तत्र स्वयमेवो-पागतस्तान् राजदारान् आह अहो इत्यादिना ॥ ३६ ॥

अहो वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्म-मरणादिप्रकारं विशेषतः पश्यतामपि विमोहोभवति. विमोह-मेवाह-यत्र यतः आगतस्तत्रैव गतं मनुष्यं स्वय स्वधर्मा मर-णशीला अप्यपार्थं शोचन्ति ॥ ३७ ॥

एवंविधेभ्यो वयोवृद्धेभ्यो जनेभ्यः वयं बाला एव धन्या इति साश्चर्यमाह-अहो इति । अबला असमर्था एव पितृभ्यां त्यक्ता वृकादिभिः अभक्ष्यमाणाः सन्तः न विचिन्तयामोऽतो वयं धन्य-तमाः यतो य ईश्वरो गर्भे रक्षति स एव सर्वदा रक्षिता ॥ ३८ ॥

हे अबलाः ! स्वरूपतो निर्विकारः ईश्वरः प्रकृतिपुरुषनियन्ता इच्छया सङ्कल्पमात्रेणेदं विश्वं सृजति य एव रक्षति यो लुम्पते तस्ये-शितुश्चराचरं क्रीडनमाहुः स एव निग्रहसङ्ग्रहे निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमन्वयव्यतिरेकाभ्यामुपपादयति—पथीति । दिष्टेन दैवेनेश्वरेण रक्षितं चेत्पथि च्युतमपि तिष्ठति तेन विहतं ताडितं गृहेऽपि स्थितं विनश्यति तदीक्षितः तेन कृपादृष्टिविषयी-कृतः अनाथोऽपि जीवति अस्य हतो गृहे गुप्तोऽपि न जी--वति ॥ ४० ॥

भाषा टीका ।

हे प्रभो ! निर्दय विधाताने तुमको दृष्टि के अगोचर दशा को प्राप्तकर दिया ॥ जो आप पहिले उशीनर देश के जीविका देने वाले थे आज जिसने शोक के बढाने वाले कर दिये ॥ ३३ ॥

हे महीपते ! हम सब सुहृत्तम और कृतज्ञ ऐसे आपके विना कैसे रहेंगी । हे वीर ! आप जहां जांयगे आपके चरणों की शुश्रूषा करने वाली हम लोगों को भी उसी जगह अनुगमन की आज्ञा दीजिये ॥ ३४ ॥

मृतकपति को पकडकर ऐसे विलाप करने वाली और दाहादि कार्य की इच्छा न करने वाली उन रानियों के रोते २ सूर्य अस्त को प्राप्त हुए ॥ ३५ ॥

उस जगे उस मृतक के बंधुओं का विलाप सुनकर स्वयं यमराज एक बालक बनकर वहां आकर उन सबों से बोले ॥ ३६ ॥

यम उवाच ॥ यमराज बोले, कि – अहो बडे आश्चर्य की बात है लोक की रीति जानने वाले अवस्था से भी अधिक इन लोगों का बडा मोह है । जहां से आया वहीं जाने वाले मनुष्य को, आप भी वहीं जाने वाले होकर व्यर्थ शोच करते हैं ॥ ३७ ॥

अहो बडे खुसी की बात है कि हमही बडे धन्य है जो कि हमको माता पिताओं ने छोड दिये तौ भी हम चिन्ता नहीं करत हैं ॥ और हमको कोई वृक आदि बन के जंतु भी भक्षण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥

इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम् ।
यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥

यथाऽनलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक्स्थितः ।
यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ४३ ॥

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ।
यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४४ ॥

न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः ।
यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४५ ॥

भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान्विभुः ।
भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥

यावल्लिङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनम् ।
ततो विपर्ययः क्लेशो मायायोगोऽनुवर्त्तते ॥ ४७ ॥

वितथाऽभिनिवेशोयं यद्गुणेष्वर्थदृग्वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ॥ ४८ ॥

भाषा टीका ।

नहीं करते. क्योंकि ? रक्षक तौ वही है जिसने गर्भ में रक्षा की है ॥ ३८ ॥

जो ईश अपनी इच्छा से इस जगत को सृजता है और जो अव्यय रक्षा करता है और अंतमें जो इसका संहार करता है, हे अबलाओं ! सब चराचर जगत को उसी ईश्वर का खिलौना कहते हैं ॥ वही ईश्वर संहार और पालन में समर्थ है ॥ ३९ ॥

प्रारब्ध का रखाया हुआ पदार्थ मार्ग में गिरा हुआ भी स्थित रहता है ॥ और प्रारब्ध का मारा हुआ गृह में धरा हुआ भी नष्ट होजाता है ॥ ऐसे ही अनाथ भी वन में भी उससे रक्षित जीवता है और उस का मारा हुआ घर में भी रक्षित हो तौ भी नहीं जीता ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमात्मनो जन्ममरणादिकमङ्गीकृत्येश्वराधीनत्वान्न शोकः कार्य इत्युक्तमिदानीं तु देहानामेव जन्मादि न त्वात्मन इत्याह-- भूतानीति त्रिभिः । भूतानि देहा निजयोनिः स्वकारणभूतं लिङ्गशरीरं तन्निमित्तैः कर्मभिर्भवन्ति जायन्ते न भवन्ति नश्यन्ति च सर्वशो देवादिदेहा अपि तत्र ह तदा प्रकृतौ देहे स्थितोऽप्यात्मा तस्याः प्रकृतेर्गुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते न युज्यते यतोऽन्यतमो देहादत्यन्तविलक्षणः ॥ ४१ ॥

नन्वयं कुतः स्थूल इत्यादौ वैलक्षण्यं न प्रतीयते तत्राह-- इदमिति । इदं शरीरं मोहजमविवेकादात्मत्वेन जातम्, वस्तुतस्तु पृथगेव सत ईयते दृश्यते भौतिकञ्च यथा गृहमित्यन्वयः । अत्रैवं प्रयोगः द्रष्टुरभौतिकाच्च पुरुषाच्छरीरं भिन्नं दृश्यत्वाद्भौतिकत्वाच्च यथाऽत्यन्ताविवेकिन आत्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वदिति भौतिकत्वानुमानं विवृण्वन्नात्मनोजन्माद्यभावमुपसंहरति यथा औदकैः परमाणुभिर्जातो बुद्बुदादिर्यथा च पार्थिवैर्जातो घटादिर्यथा च तैजसैर्जातः कुण्डलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन्विनश्यति नत्वात्मेत्यर्थः ॥ ४२ ॥

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तद्वयमाह—यथेति । यथा अनलो दारुष्वेव स्थितोऽपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते. यथाच देहगतोऽप्यनिलो मुखनासिकादिषु पृथक् स्थित एव प्रतीयते. देहस्थत्वेप्यात्मनस्तद्धर्मयोगाभावे दृष्टान्माह— यथा नभो न सज्जते क्वापि सङ्गन्न प्राप्नोति तथा पुमानपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां गुणानां देहेन्द्रियानामाश्रयस्तेष्वाश्रितो वा परः पृथगेवेत्यर्थः ॥ ४३ ॥

किञ्च हे मूढाः, यमनुशोचथ सोऽयं युष्मद्भर्ता सुयज्ञः शेते किमिति शोचथ नन्वेतावन्तं कालमसौ शृणोत्यनन्तरं प्रतिवक्ति च, इदानीं तस्यादर्शनान्मृतइति शोचामेति चेत्स तु शोच्यो न भवति प्रागपि तस्यादर्शनादित्याह—यःश्रोतेति ॥ ४४ ॥

ननु, मुखनासिकासञ्चारी प्राणः श्रोता वक्ता च दृष्टएवेति चेन्मासौ श्रोता वक्ता वा चेतनत्वादित्याह—न श्रोतेति। महान्सर्वेन्द्रियचेष्टाहेतुः अत एव "मुख्यः प्राणो वै मुख्यः" इति श्रुतेः। कस्तर्हि श्रोता वक्ता च ? तत्राह—यस्त्विह देहेन्द्रियैस्तत्तदर्थद्रष्टा आत्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव स चेतनः ॥ ४५ ॥

ननु, चेतनत्वेऽन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादिदेहधर्मोपलब्धिः कुतस्तत्राह, भूतेन्द्रियमनोभिर्लिङ्गयन्ते लक्ष्यन्तइति तथा तान्देहांस्तेभ्योऽन्य एव भजत्यहमिति मन्यते तर्हि कथं मोक्षस्तत्राह, तच्च भजनं स्वेन तेजसा विवेकबलेनोत्सृजत्यपि हीत्यनुभवं प्रमाणयति ॥ ४६ ॥

ननु, विवेकानन्तरमप्याहाराादिकर्मसु प्रवृत्तेर्बन्धः स्यादेवेत्यतआह—यावदिति । यावल्लिङ्गशरीरेणान्वितस्तदभिमानवानात्मा भवति तावदेव तस्य तत्कर्मनिबन्धनं बन्धहेतुर्भवति ततो विपर्ययो देहधर्मभाक्त्वं ततः क्लेशश्चानुवर्तते ननु लिङ्गाभिमाने निवृत्तेपि यतोऽयं मायायोगो विपर्ययादिः मायया युज्यत इति तथा न परमार्थ इत्यर्थः ॥ ४७ ॥

ननु, सुखदुःखादीनां तत्साधनानाञ्च सत्यत्वप्रतीतेः कुतो मायामयत्वम् ? तथाच बहवो वादिनः सत्यत्वमेव वदन्ति तत्राह—वितथेति । वितथो मिथ्याभूतोऽयमभिनिवेशः कोऽसौ गुणेषु तत्कार्येषु सुखदुःखादिष्वर्थः परमार्थ इति हग्वचश्चेति यत् स कुत इत्यतआह—यथेति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं तर्ह्ययमीश्वरोपि विषमः ? नेत्याह—भूतानीति । सर्वाणि भूतानि देवमनुष्यादीनि तैस्तैर्निजयोनिकर्मभिः स्वस्वजातिप्राप्तिनिमित्तकर्मभिः काले निजयोनिकर्मपरिपाककाले भवन्ति पुनस्तत्कर्मक्षये न भवन्ति देवमनुष्यादिभूतानां भावाभावौ तत्तत्कर्मानुगुणप्रवृत्तेश्वरायत्तौ, इति न तस्य वैषम्यमितिभावः। ननु, मास्तु वैषम्यं तस्यापि त्वन्तरात्मतयाऽवस्थितः स्वानर्थरूपं संसारं स्वयमेवापादयन् किम् अयमज्ञः ? नेत्याह—नेति । तत्र प्रकृतौ देवादिशरीरे जीवान्तरात्मतया स्थितोप्यात्मा परमात्मा न बध्यते न संसरतीत्यर्थः। हेतिविस्मये देहस्थितस्याप्येकस्य न बन्धः अन्यतरस्य तु बन्धः इति विस्मयः इतरस्य बन्धमेवाह—तस्याः प्रकृतेर्गुणैः देवोऽहं स्थूलोहमित्यादिरूपप्रतीतिविषयैर्देहगतदेवत्वमनुष्यत्वादिभिर्देहात्मभ्रमादिभिरित्यर्थः अन्यतमो देहेन्द्रियादीनामन्यतमो जीवः इह परमात्मनोऽपीति च बोध्यम्. निबध्यते निबद्धो भवति संसरतीत्यर्थः। यद्वा, गुणैः शब्दादिभिर्विषयैर्हेतुभिस्तद्भोगहेतुभूतेषु वस्तुषु निबध्यत इत्यर्थः तद्भोग एव हि तस्य संसृतौ कारणमिति भावः । तथा च श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" ॥ ४१ ॥

एवं सर्वभूतानामुत्पत्तिलयादेस्तत्तत्कर्मानुगुणप्रवृत्तेश्वरायत्तत्वान्न शोकः कार्य इत्यभिधायेदानीं देहस्य विनाशस्वभावत्वादात्मनस्तु तद्विपरीतरूपत्वादुभावपि न शोकविषयाविति वक्तुं तावद्देहात्मनोः परस्परवैलक्षण्यमाह—इदमिति द्वाभ्याम् । इदं परिदृश्यमानं राजादिशरीरं पुरुषस्य जीवस्य मोहजमविद्यासञ्चितकर्मकृतं पुरुषस्य मोहजम् इदं शरीरम् इति व्यतिरेकनिर्देशेन देहात्मनोः परस्परभेदो दर्शितः तत्र देहस्यानात्मत्वं दृष्टान्तेनाह—यथा गृहं गृहिणः पृथक् भिन्नं तथा भौतिकं भूतसङ्घातपरिणामभिदं शरीरमपि पृथक् शरीरिणो भिन्नमीयते अवगम्यत इत्यर्थः। यथा गृहस्य गृहिस्वरूपत्वमत्यन्तासम्भावितं तद्वत् देहस्य देहिस्वरूपत्वामिति दृष्टान्ताभिप्रायः। एवं गृहदृष्टान्तेन जीवाद्देहस्य भेद उक्तस्तेनैव दृष्टान्तेन देहस्य विनाशिस्वभावत्वं चाह—तथेति । यथा मृत्काष्ठादिविकारारमकं गृहं कालेन विनश्यति तथा औदकैः पार्थिवैस्तैजसैश्चेदं वायवीयाकाशीययोरप्युपलक्षणम् उदकादीनामंशैः कालेन तत्तद्देवादिजातिप्राप्तिनिमित्तकर्मफलपरिपाककालेनेत्यर्थः। जातो जनो देहः जन्मनः पश्चादपि विकृतः बाल्ययौवनस्थविरत्वादिभिरवस्थाभिर्विकारं प्राप्तः पुनः स्वारम्भककर्मविनाशकाले विनश्यति ॥ ४२ ॥

अथात्मनो देहाद्भेदं सदृष्टान्तमाह—यथेति । यथा अनलोऽग्निर्दारुषु स्थितो भिन्न ईयते दारुगतह्रस्वत्वदीर्घत्वकुटिलत्वादिधर्मरहितस्तेभ्यो भिन्न एव दृश्यते यथा च देहगतोऽन्यनिलस्ततः पृथगेव दृश्यते यथा नभः सर्वत्र व्याप्तमपि न सज्जते सर्वगतधर्मैर्न सम्बध्नाति तथा सर्वगुणाश्रयः सत्त्वादिसर्वगुणपरिणामरूपदेहेन्द्रियाश्रयोऽपि पुमान् जीवः परः गुणेभ्यः देहाद्भिन्नः देहगतजन्ममरणादिभिरविकृतस्तस्माद्विलक्षणत्वेनावतिष्ठते इत्यर्थः। अविभागेनावस्थितस्यापि तद्गतधर्मास्पर्शे आद्यं निदर्शनं विजातीयस्यापि सहावस्थाने द्वितीयं तृतीयं तु तदवस्थानेपि पुनस्तद्गतधर्मास्पर्श इति भेदः ॥ ४३ ॥

एवं देहात्मनोः परस्परविलक्षणस्वरूपयोरभिहितयोरप्यतीवदेहात्मभ्रान्त्याऽनुशोचतां शोकमपनेतुं कः शोकविस्मयभयइत्याशङ्क्य प्रतिक्षिपति—सुयज्ञ इति । हे मूढाः ! भवत्पक्षे यमनु शोचथ सोयं सुयज्ञः शेते युष्माभिः शोच्यः सुयज्ञः शेते विद्यत एव किमर्थं शोक इति भावः । ननु, भवत्पक्षे शयान एव हि सुयज्ञ इति शङ्कार्थस्तत्प्रतिक्षिपति—य इति, य श्रोता भवद्भिलापश्रवणक्षमो यश्चानुवक्ता प्रतिवचनक्षमश्च स इह कर्हिचिदपि चिरं सुसूक्ष्मं निरीक्षमाणोऽपि न दृश्यते शयानो देह एव सुयज्ञश्चेद्भवद्भिलपितं किमिति न शृणोति न प्रतिवक्तीत्यर्थः ॥ ४४ ॥

मुख्यः प्राणोपि श्रवणप्रतिवचनक्षमो न स्यात्किंपुनर्देहो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नत्वम इत्याह—नेति । मुख्योऽप्यसुः प्राणो वा न श्रोता न भवाद्भिन्नपितस्य श्रोता नाप्यनुवक्ता किं पुनर्देह इत्यर्थः । ननु, श्रोतारं प्रतिवक्तारं प्रत्येवानुशोचाम इत्यत्राह—यस्त्विति । यस्त्विन्द्रियवान् श्रवणप्रतिवचनादिसाधनश्रोत्रवागादीन्द्रिययुक्तः स त्वात्मा इह शरीरे प्राणदेहाभ्यामन्य एवासीत्, स तु तत्र तेभ्यो देहेभ्यः अन्य एव सन्नित्यर्थः ॥ ४५ ॥

स्वेन तेजसा ज्ञानेनोपलक्षितो भूतैः पृथिव्यादिभिरिन्द्रियैः ज्ञानकर्मोभयेन्द्रियैः मनसा च लिङ्ग्यन्ते लक्ष्यन्ते इति तथा तान् उच्चावचान् उत्कृष्टापकृष्टान्देहान् भजति बिभर्त्ति उत्सृजति त्यजति च अपि हीत्यनुभवं प्रमाणयति इन्द्रियवानात्मा देहत्यागतदुपादानशीलः शयानमिमं देहं त्यक्त्वा गत इति सोऽपि इदानीं न शोच्य इति भावः ॥ ४६ ॥

नन्वस्माकमुपभोग्यमिमं देहमन्तरेणापि हेतुं त्यक्त्वा गत इत्यनुशोचामस्तत्राह—तावदिति । यावन्निबन्धनं देहसम्बन्धकारणं कर्म पुण्यापुण्यात्मकं कर्म वर्त्तते तावल्लिङ्गान्वितः देहेनान्वितो भवति आत्मा तत एव देहान्वयादेव हेतोर्विपर्ययो देहात्मभ्रान्तिः ततः क्लेशः इत्येवंरूपो मायायोगः प्रकृतिसम्बन्धरूपसंसृतिरनुवर्त्तते, अयं भावः, सति देहसम्बन्धनिमित्ते कर्मणि देहेनान्वयः, तस्मिंश्च सति ममायं पतिरहमस्य भार्या इत्याद्यात्मको देहात्मभ्रमः तस्मिंश्च सति क्लेशः तत्र निदानस्य कर्मण एव निवृत्तत्वादस्यात्मनः पुनः शयानदेहसम्बन्धस्यैवाभावान्निर्हेतुको व्यर्थश्च शोकः देहसम्बन्धावहकर्मनिवृत्तिरेव च देहोत्सर्गे हेतुरिति ॥४७ ॥

देहस्योपभोग्यत्वं प्रतीत्यपनि-वितथेति । अयमभिनिवेशोऽभिमानो वितथो व्यर्थः, देहादेरपुरुषार्थरूपत्वादिति भावः । कोऽसावभिनिवेशः ? यद्गुणेषु सत्त्वादिगुणपरिणामात्मकेषु देहादिषु तदुपभोग्येषु शब्दादिषु चार्थदृग्वचः प्रयोजनत्वदर्शनवचने इत्येषः देहादिपूपभोग्यत्वज्ञानं तद्व्यवहारश्चेत्यभिमानो व्यर्थः; वै तद्व्यमेव दृष्टान्तमुखेन विशदयति—यथेति यथा मनोरथरूपः स्वप्नदृष्टकर्मानुगुणमनोवृत्तिरूपः सङ्कल्पविकल्पात्मकस्वप्नानुगुणतयेश्वरसृष्टपदार्थः मृषा अनित्यः स्वप्नकालमात्रावस्थायी तथा सर्वमैन्द्रियकबाह्येन्द्रियविषयः शब्दादिकमपि मृषा अनित्यः अनित्यत्वादपुरुषार्थः स्वप्नदृष्टृकानुभाव्यतत्कालमात्रावस्थायिपदार्थसृष्टिनिमित्तकर्मानुगुणमीश्वरसृष्टं स्वाप्नं पदार्थं यतीव जाग्रदवस्थानुभाव्यसर्वेन्द्रियग्राह्यभोग्यभोक्तृदृष्टसमानकालिकपदार्थप्रत्युपभोग्यत्वाद्यभिमानो व्यर्थः अनित्यत्वेनापुरुषार्थरूपत्वादितिभावः । मृषाशब्दस्यानित्यत्ववाचित्वम्, 'अथ नित्यमनित्यञ्च' इत्यनन्तरग्रन्थादवगम्यते. "अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते" इति पराशरोक्तेश्च, परमार्थनाशादिशब्दानामनाशिपरत्वमवगम्यते ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्ट्यादिकं कुर्वन्नात्मा तत्तत्प्राणिकर्माण्युल्लङ्घ्य करोत्युत

तदनुसारेणेति तत्राह—भूतानीति । निजयोनिकर्मभिः स्वजातिविहितकर्मभिः भूतानि विहितकाले भवन्ति न भवन्तीत्यात्मप्रेरितैरिति शेषः "द्रव्यं कर्म च कालश्च" इत्यादेः * कालशब्दवाच्यपरमात्माधिकरणतया सृष्ट्यादिकमाप्नुवंतीति वा. ननु, जीवात्मनोरुभयोरपि देहस्थितेः कस्य संसारबन्धाभाव इति सुहृज्जीवन पृच्छन्तमाह—न तत्रेति, तत्र तयोर्जीवरयोरन्यतम आत्मा प्रकृतौ प्रकृतिनिर्मितशरीरे स्थितोऽपि तस्याः प्रकृतेर्गुणैः सत्त्वादिभिर्न निबध्यते ह किल—

> "सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
> ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत" ॥

इत्यादिवाक्योक्तबन्धो नास्तीत्यर्थः । हेत्यनेन "तुच्छ्येनाभ्वपि हितं यदासीत्तपसस्तन्महिमा जायतैकम्" इति वाक्यं सूचयति. सुखिरूपस्वरूपत्वाज्जीवादन्यतमो हरिरित्यतो हरेरन्यतमत्वं प्रामाणिकमेव परमात्मा न बध्यतेऽन्यतमो बध्यते इत्येतदुत्तरश्लोकेन पुनरुक्तं स्यादित्यन्यथा व्याख्यातमाचार्यैरन्यतम आत्मा परमात्मेति ॥ ४१ ॥

परमात्मनो बन्धाभाववचनेन जीवात्मनोर्यो भेदः अर्थादाप्तः स केन प्रकारेणेत्याशङ्क्याह—इदं शरीरमिति । पुरुषस्य संसारिणो मोहेनान्यथाज्ञानेन "मुह वैचित्त्ये" इति धातोः विपरीतज्ञानजं यस्मात्तस्मादात्मनो भिन्नमिति ज्ञातव्यम्, तथा हि, भौतिकं भूतविकृतैर्द्रव्यैर्विरचितं गृहं गृहस्थात्पृथग्भिन्नमीयते यथा विनश्यति च तथोदकैः पार्थिवतैजसैः परमाणुभिः कालनाम्ना हरिणा चोदितैर्विकृतो विकारं प्राप्तो जातो जन्यत इति जनो देहो विनश्यति स्वकारणावस्थितिमाप्नोतीति यस्मात्तस्माज्जीवाद्भिन्न इति निश्चीयते "नित्यो नित्यानाम्" इति श्रुतेः । जीवस्य नित्यत्वात् ॥ ४२ ॥

तदेव दृष्टान्तान्तरेण स्पष्टयति—यथेति । यद्वा ननु, जीवस्य शरीराद्भेदोऽस्तु तस्य नश्वरत्वात्परमात्मना जीवस्याभेदः किं न स्यादिति मन्दाशङ्कां परिहरति—यथेति । दारुषु स्थितो वह्निर्दारुभ्यो भिन्नस्तद्गुणैस्तेषु न सज्जते यथा देहिनां देहगतो वायुर्देहात् पृथक् स्थितस्तद्गुणैश्च न लिप्यते यथा सर्वगतं नभः सर्वस्माद्भिन्नं ज्ञायते सर्ववस्तुगुणैश्च न लिप्यते यथा तथा ज्ञानानन्दादिसर्वगुणाश्रयः परः परमात्मा सर्वेषां जन्तूनां गुणभूतं भोगायतनं शरीरमाश्रयो यस्य सः सर्वगुणाश्रयः सर्वजीवदेहगतः परो विलक्षणो भिन्न इति यावत् । जीवादिति शेषः । प्रकृतत्वाज्जीवगुणैर्न लिप्यत इति, देहाद्भेदस्य प्रकृतत्वात्स एवात्रोच्यत इति किं न स्यादितीयं शङ्का—

> "देहदारुगतौ प्राणवह्नी सर्वगतं नभः ।
> देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः ॥
> तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैः" ॥

इति वाक्येन परिहर्तव्या. अत्रायं फलितोऽर्थः भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात् स एव भजनीयो शोके न प्रयोजनमिति ॥ ४३ ॥

---

* तथा च कालइति सप्तम्या अधिकरणत्वमिति सूचितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च भवच्छोकयोग्यस्य सुयज्ञस्य दृश्यमानत्वात्तंप्रति शोको न कार्य इति गूढाक्षेपं करोति–सुयज्ञ इति । हे मूढाः ! यमनु शोचथायं सुयज्ञः शेते निद्रां करोति । ननु न मृतः "ननु च स्याद्विरोधार्थे" इत्यभिधानात्. शेत एव लोकान्तरं न गत इति वा "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यभिधानात्. अवधारणार्थो ननुशब्दः। श्रोत्रादीन्द्रियव्यापारादर्शनादिना मरणानुमानात्कथं न मृत इत्याक्षिप्यत इति तत्राह––यः श्रोतेति। इह सुयज्ञशरीरे यः श्रोता यश्चानुवक्ता स परमात्मा कर्हिचित्कदाचिदपि न दृश्येत तस्य सूक्ष्मस्वभावत्वात्"तदव्यक्तमाह"इतिसूत्राच्च. तस्यैव श्रोतृत्वादिकं कुत इति चेन्न"नान्योऽतोऽस्ति द्रष्टा नान्योतोऽस्तिश्रोता"इत्यादेः॥४४॥

ननु, सुयज्ञशरीरस्थस्य मुख्यप्राणस्य श्रोतृत्वादि संभवात् कथं तदन्ययोगव्यवच्छेदः क्रियत इति तत्राह—न श्रोतेति। अत्र सुयज्ञदेहे श्वासोच्छ्वासादिलक्षणेन मुखे व्यज्यमानत्वान्मुख्यो यो महानसुः मुख्यप्राणः सोपि स्वतो न श्रोता नानुवक्ता च "तस्य वाङ्मनसि सम्पद्यते मनःप्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" इतिश्रुतेरन्ययोगव्यवच्छेदो युक्त इति। ननु, तर्हि सुयज्ञनाम्नो जीवस्य श्रोतृत्वादिकमासीत्प्राक् तदिदानीं न तस्मान्मृत इति प्राचीनशङ्काशेषं कैमुत्यन्यायेन परिहरति—यस्त्विति, तु शब्देन नेत्यनुकृष्यते इह सुयज्ञइत्युपलक्षणं जीवराशिदेहे य इन्द्रियवान् यश्च प्राणदेहयोरन्यः स जीवात्मा श्रोतुं वक्तुञ्च न शक्य इति किं वक्तव्यम् "एतद्बाणमवष्टभ्य विधारयामि" इतिश्रुतेः। सर्वशक्तिमतोपि प्राणस्य स्वतः श्रोतृत्वाद्ययुक्तेरुक्तत्वात्तस्मात्सुयज्ञंप्रति शोकेन किं प्रयोजनं तस्माज्जीवतामपि श्रोतृत्वाद्यनुपपत्तेः प्रामाणिकत्वेन मृतोऽयमित्यस्य लक्षणान्तरं वक्ति अन्य इत्यनेन, हरेर्माहात्म्यातिशयः प्रकटित इति सूचितम्. न केवलं प्राणदेहयोरन्यः किं तु पूर्णश्रोतृत्वादिगुणयुक्ताद्धरेश्चान्य इति चशब्दार्थः॥ ४५ ॥

हरेर्देहस्थितिसद्भावे न तस्मादप्यन्य इति च वक्तुं युक्तं तत्कुत इति तत्राह—भूतेन्द्रियेति। भूतेन्द्रियमनांसि लिङ्गं रूपं येषां ते तथा तानुच्चावचान् सुरनरतिर्यगात्मन उत्तममध्यमाधमान् देहान् भजति पश्चादुत्सृजति हि यस्मात्तस्मादन्य इति वक्तुं युक्तं स्पष्टश्चाह–अन्य इति । देहयोगवियोगभाजो जीवादिति शेषः "लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव च" इति वचनाल्लिङ्गशब्दस्य स्वरूपार्थो युक्तः यदि देहभजनोत्सर्जने हरेस्तर्हि जीवात्को विशेष इति तत्राह—तच्चेति, परिच्छिन्नविषये भजनोत्सर्जने व्याप्तस्य विष्णोः कथं घटेत इत्यतो वाह—तच्चेति, ततश्च शब्देन जीवस्य पारतन्त्र्येणेति विशेषमाह, अपिशब्देन रूपान्तरेणेत्युपपत्तिमाह, अत्र जीवपरमात्मनोर्भेदस्य तयोरुभयोर्देहादेर्भेदस्यच हरेरेव मुख्यश्रोतृत्वादेश्च प्रकरणावान्तरभेदस्य च ज्ञापनायाचार्यैः पूर्वापरभावेनेन्द्रियवान् जीव इत्यादि व्याख्यातम्. ननु, जीवस्य प्राणदेहयोरन्यत्वे मरणे देहनाशान्मुक्तौ तदभावाद्विषयभोगाभाव इत्याशङ्कापरिहारायोक्तमाचार्यैः (१) अन्यो जीव इत्यादि॥ जडदेहादन्यत्वं न स्वरूपभूतावुच्यत इत्यर्थः।(२) अचितो जडात्इन्द्रियत्वं चामुख्यं तेषामवशत्वादभिमानादेव. ३)तद्द्वयं पश्यामीत्यभिमानोऽस्येत्यादेः तर्हि चक्षुरादीनि कस्याधीनानि इत्यतः प्राणाधीनानीति द्योतयितुम्"चक्षुराद्यामनोजीवः" इत्यादेः प्राणोपि न पर्याप्तमित्युक्तं तस्यापि ज्ञातृगन्तृत्वं न स्वतः शक्यते कचिदिति यस्तस्य ज्ञातृगन्तृत्वदाता स भगवानित्याद्यपि सूचितम्. यः श्रोतेत्यत्र प्रमाणम्, "ज्ञाता च मन्ता च" इत्यादि. ज्ञानादिदानं तस्यान्य इत्येतदन्विति सूचितम्"सर्वस्य ज्ञानदो हरिः"इत्येतत्"न स दृश्येत" इत्यनेन सूचितं स्वविषयज्ञानदातेति चेति दृश्य इत्यर्थः। भूतेन्द्रियमन इत्यादिना विष्णुरुच्यते न जीव इत्यत्र मानं "स देहान् भजत" इत्यादिना ॥ ४६ ॥

नन्वयं जीवः कियन्तं कालं देहान्वितो भवति इति चोद्यं परिहरति—यावदिति। यावन्तं कालमन्नमयप्राणमयमनोमयलक्षणेषु लिङ्गेषु अन्वितो भवति आत्मा परमात्मा तावन्तं कालं कर्मभिर्नितरां बन्धनं यस्य स तथा जीवः येषु देहेषु अन्वितो भवति, हि शब्दाद्धरिर्यदा त्रिविधदेहानुत्सृजति तदा स्वयमप्युत्सृजतीति ग्राह्यम्, अत्रायं विशेषः यदा परमात्मा देहं सर्वात्मनोत्सृजति तदा अयमपि सर्वात्मना तदनुग्रहेणोत्सृज्य संसारान्मुक्तो भवति. नचेदनेन सह देहान्तरं भजतीति. तस्मादद्यानेन रूपान्तरेण कृतदेहोत्सर्जनत्वादनेनापि सुयज्ञेन तदाचरितमिति देहोत्सर्जनलक्षणमरणस्य पराधीनत्वेनापरिहार्यत्वान्न शोकेन प्रयोजनमिति भावः। "यावद्देहान्वितो विष्णुस्तावज्जीवः" इत्येतदत्र मानं "यदोत्सृजति देहं स हरिः सर्वात्मना विभुः" इति च. ननु, परमात्मा जीवाभिन्नस्सन् देहान् भजत्युत्सृजतीत्युच्यते इति किं न स्यात् कल्पनालाघवादेकमेव ब्रह्माज्ञानात्संसरति मुच्यत इत्यङ्गीकाराच्चेति तत्राह—तत इति। तस्माद्धरेर्जीवो विपर्ययो विरुद्धः पर्ययः निश्चयो यस्य स तथा विरुद्धलक्षण इत्यर्थः "अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ" इत्यादेः अतो ब्रह्मणोऽज्ञानकल्पनमप्रामाणिकमिति भावः। "देहाभिमानी त्वेकोऽत्र न मानी मानदः परः" इत्येतद्धेतोपपादकम्, इतोपि भिन्नइत्याह–क्लेशइति, नानाक्लेशाधिकरणत्वाद्वा भिन्न इत्यर्थः। विपर्ययस्तावत् क्लेशादयश्चास्येत्यादेः क्लेशफलमाह—मायेति ॥ ४७ ॥

कोयं मायायोगोनाम येनासौ क्लेशफलः स्यादिति तत्राह—वितथेति, गुणेषु शब्दादिषु अर्थदृग्वचः प्रयोजनदर्शनं तद्वाचकं वचनञ्च स्वर्गे लोके न भयं किञ्चनास्तीत्यादिलक्षणं यत् अयं वितथाभिनिवेशः मिथ्याग्रहः भ्रान्तिज्ञानमित्यर्थः। क्लेशपरिजिहीर्षया शब्दादिष्विन्द्रियप्रवर्तनं तत्फलमित्युपचारः। वचनाद्धि वितथाभिनिवेशो भवति गुणेष्वर्थदर्शनस्यापि तथाभिनिवेशित्वं सदृष्टान्तमाह–यथेति, "स्वप्नस्तु प्रथमः"इतिसूत्रात्. मनोरथे कल्पितं राज्यं स्वप्ने दृष्टं रत्नं यथा मृषा वृथा तथा सर्वमिन्द्रियप्रवर्तनं मृषा सदसद्विलक्षणमित्यर्थं वृथेन्द्रियवृत्तय इत्येतद्विरुणद्धि—

"इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते ।
अतन्मानाद्धरिः प्रोक्तस्त्वदेहोऽनिन्द्रियस्तथा ॥
जीवानाभिमते देहे न विष्णुर्जीवतिस्थितः ।
अतस्त्वदेह उद्दिष्टः परमात्मा सनातनः" ॥

(१) अन्योजीवोऽचितोदेहात् तद्वशो देह उच्यते ।
(२) तात्पर्योक्तप्रमाणस्थमिदं पदम् ।
(३) चक्षुराद्यभिमानवान् । नतद्वशाश्चक्षुराद्याः नदृष्टयादौ स ईश्वरः । शेषतात्पर्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्येतज्जीवपरयोर्भेदस्य जीवस्येन्द्रियवत्वमौपचारिकमित्यस्य चोपपादने प्रमाणं, जीवस्येन्द्रियवत्वमुपचरितं चेत् कस्य तन्मुख्यमित्याशङ्का—

"लेपाभिमानी जीवस्तु स्वरूपानुभवी नच ।
मुक्तेः प्राक् तेन मान्युक्तो न मानी विष्णुरुच्यते ॥
सर्वं ममेति पश्यन्नप्यलेपाभिमतिर्यतः ।
सम्यक् स्वरूपानुभवात्स्वतन्त्रत्वाददोषतः" ॥

इत्यनेन परिहर्तव्या स्वानधीने वस्तुनि स्वाधीनता बुद्धिर्लेपाभिमानः सोऽस्यास्तीत्येतादृशदोषो वितथाभिनिवेश इत्युच्यते हरेर्जीवदेहेन्द्रियादिषु स्वाधीनेषु स्वाधीनताबुद्धिर्लेपाभिमानः स गुणो यथार्थज्ञानलक्षणः तस्माद्धरेर्देहेन्द्रियादौ स्वामित्वेन तद्वत्त्वं मुख्यं तत्राविवेकग्रहणं कर्मनिबन्धनं ततो विपर्यय इत्यादिलक्षणैर्जीवोऽनीदृशः श्रीनारायण इति स्मर्तव्यम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भूतेन्द्रियेति । विविधं भवतीति विभुः स्वतेजसा सर्वस्वरूपत्वेनोपासितस्य भगवतस्तेजसा अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् "स्वतो न सम्भवादन्यस्तत्त्वज्ञो ज्ञानतो भवेत्" इति श्रीभगवद्वाक्यात् ॥ ४६—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, तर्हि तस्मिन् ईश्वरे वैषम्यं प्रसक्तं कस्याप्युपेक्षणात् कस्याप्यपेक्षणादिति तत्राह-भूतानि मनुष्यपश्वादिदेहाः निजयोनिकारणीभूतैः कर्मभिस्तैस्तैरनेन कर्मणा गौर्भवत्यनेन कर्मणा सूकरो भवत्येवं शास्त्रप्रसिद्धैर्भवन्ति उत्पद्यन्ते न भवन्ति काले नश्यन्ति च सर्वशः सर्वापायेन तत्र ह स्पष्टं प्रकृतौ देहे स्थितोऽप्यात्मा परमात्मा अन्यतमः पृथग्भूत एवातस्तस्या गुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते केवलं तत्तत्कृतशुभाशुभकर्मफलं स्वसन्निधानमात्रेण जीवयतीत्येतदेव तस्यापेक्षणमुपेक्षणञ्चेति भावः ॥ ४१ ॥

तस्यान्यतमत्वमुपपादयति--इदमिति । मोहजं पुरुषस्य जीवस्य मोहादेव जातं अत्र स्यात् परमात्मनः पृथगेव यथा भौतिकं भित्तिद्वारादिमद्गृहं गृहस्थपुरुषात् पृथगीयते पार्थक्यं तदेवोपपादयति-यथा औदकैः परमाणुभिर्बुद्बुदादिः पार्थिवैर्घटादिः तैजसैः कुण्डलादिर्जायते नश्यति च तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन् विनश्यति नत्वात्मनेत्यर्थः ॥ ४२ ॥

पृथगवस्थानाभावेपि भिन्नत्वे दृष्टान्तमाह-यथा अनलो दारुष्ववस्थितोपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते यथा नभो न सजते क्वापि सङ्गं न प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयस्तेष्वाश्रितो वा परः पृथगेवेत्यर्थः । अतस्तेन परमेश्वरेणोपेक्षितमिमं स्वकर्मवशान्मृतं पतिं कथं नोपेक्षध्वे इति भावः ॥ ४३ ॥

नन्वयं राजा सङ्ग्रामलब्धपराजयः संप्रति शेते कथमिममुपेक्ष्य निःस्नेहा भवितुं शक्नुमस्तत्राह—सुयज्ञ इति । नन्वस्मद्विलापमेतावन्तं कालमसावशृणोदन्ववोचच्च, तत्राह—य इति । कर्हिचित् प्रागपि मद्दृश्यो नासीदित्यर्थः, यस्तु दृश्यः स इदानीमपि दृश्यते देह इति भावः ॥ ४४ ॥

ननु, यावत् प्राणः स्थितस्तावदेवश्रोतृत्ववक्तृत्वे दृष्टे न तु प्राणे गते सतीत्यतः प्राण एव श्रोता वक्तेति तत्राह—नेति । मुख्योपि "प्राणो वै मुख्यः" इति श्रुतेः । महान् सर्वेन्द्रियचेष्टाहेतुरपि न श्रोता । वक्ता च अचेतनत्वादिति भावः कस्तर्हि श्रोता वक्ता च तत्राह—यस्त्विह इन्द्रियवान् देहेन्द्रियादिमत्त्वेन प्रतीत आत्मा जीवः स च प्राणदेहयोः प्राणदेहेन्द्रियादिभ्योऽन्य एव सचेतनः ॥ ४५ ॥

तर्हि स संप्रति कुत्र गत्वा किं करोतीति तत्राह—भूतं प्राप्तम् इन्द्रियमनोरूपं लिङ्गं सूक्ष्मदेहो येषु तान् स्थूलदेहान् भजति प्राप्नोति त्यजति च यथेमं देहं प्राप्योदसृजदिति भावः । किञ्च स्वेन तेजसा भाग्यलब्धज्ञानबलेन तच्चापि लिङ्गं देहमपि कदाचिदुत्सृजति ॥ ४६ ॥

लिङ्गदेहत्यागे सत्येव कर्मबन्धान्मुच्यते नान्यथा इत्याह-यावदिति ॥ ४७ ॥

तस्माद्यूयमपि कर्मबन्धमोक्षायैव यतध्वं न तु कर्मफलाय स्वर्गाय वैषयिकसुख दुःख स्यास्थिरत्वेन स्वप्नतुल्यत्वादित्याह वितथो व्यर्थ एवाभिनिवेशोयं कोऽसौ यत् गुणेषु गुणकार्येषु सुखादिषु अर्थः वास्तव इति दृग् वचश्च "अपामसोममसृता अभूम अप्सरोभिर्विहराम" इत्यादिकमित्यर्थः । यथा मनोरथः स्वप्न इति मनोरथोपनीतस्य धनपुत्रादिलाभानन्दस्य स्वप्ने स्त्रीसंभोगादिसुखस्य च स्वर्गसुखस्य च तुल्यत्वादित्यर्थः । सर्वमैन्द्रियकम् इन्द्रियग्राह्यं जगदिदं मृषा मिथ्यैव ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथा कर्तृत्वेऽपीश्वरस्य वैषम्यं बन्धनञ्च नास्तीत्याह-भूतानीति । निजयोनयः भूतोद्भवहेतवः सत्त्वादयो मायागुणाः सन्निमित्तैः कर्मभिर्भूतानि मनुष्यादीनि भवन्ति विनश्यन्ति गुणानां निजशब्दवाच्यजीवयोनित्वमाह—अन्यतमः कर्मफलदातुरीश्वरात् भिन्नः कर्मकर्ता जीवः प्रकृतौ तस्या गुणैर्वध्यते तत्तत्कर्मफलभोगार्थं जन्ममरणप्रवाहलक्षणे संसारे पात्यते इत्यर्थः । तत्र प्रकृतौ देहरूपायां जीवकर्मफलादिदानाय स्थितोऽपि आत्मा गुणैर्नैव निबध्यते गुणानां तद्वश्यजीवानां च नियन्तृत्वात् ॥ ४१ ॥

सर्वेषां भूतानामुत्पत्तिमरणादिकं तत्तत्कर्मानुसारीश्वरायत्तमतः शोको न कार्य इत्युक्तमधुना यस्य जन्ममरणे भवतः स्वदेहोऽनित्यो नित्यस्वरूपाज्जीवादन्योऽतो मोहो न कार्य इत्याह—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः ।
नान्यथा शक्यते कर्त्तुं स्वभावः शोचतामिति ॥ ४९ ॥
लुब्धको विपिने कश्चित्पक्षिणां निर्मितोऽन्तकः ।
वितत्य जालं विदधे तत्र तत्र (१) प्रलोभयन् ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इदमिति द्वाभ्याम् । इदं प्रसिद्धं पुरुषस्य शरीरं मोहजं मोहहेतुभूतप्रकृतिगुणजं यथा गृहिणः पृथक् गृहं तथा शरीरिणः पृथगेवेयते प्रतीयते गम्यते इत्यर्थः । यथौदकैर्जलबिन्दुभिर्जातो विकृतः कार्यपदार्थः बुद्बुदादिः पार्थिवैर्मृत्पिण्डैर्जातो घटादिः तैजसैरग्निकणैर्जातः प्रदीपादिः कालेन विनश्यति तथा जनो देहः गुणैर्जातः कालेन विनश्यति न जीवः ॥ ४२ ॥

यथा दारुषु अनलोऽग्निः यथा च देहगतोऽनिलः प्राणवायुः पृथगेव स्थितो देहे यथा नभः सर्वगतं सर्वस्मिन् स्थितमपि न सज्जते तथा पुमान् जीवः सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयो धारकस्तेभ्यः परः पृथगेव ॥ ४३ ॥

नन्विति वितर्के. हे मूढाः ! यूयं यमनुशोचथ स देहरूपः सुयज्ञपदार्थोऽयं शेते यस्तुश्रोता योऽनुवक्ता श्रोतृत्वादिधर्मवान् सुयज्ञशब्दार्थः इह अस्मिन्देहे आसीत्स कर्हिचिदपि न दृश्यते ॥ ४४ ॥

ननु, तर्हि प्राणादिरूप आत्मा किमिति शङ्कां निवारयन् ज्ञानस्वरूपश्रोतृत्वादिधर्मकात्मतत्त्वप्रतिपत्तये प्राणादिजडवर्गवैलक्षण्यमात्मनो दर्शयति--न श्रोतेति द्वाभ्याम् ॥ ४५ ॥

विभुर्धर्मभूतज्ञानवत्त्वात् तथोक्तं भगवता "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत !" भूतेन्द्रियमनांसि लिङ्गानि चिह्नानि येषां तान् देहान् भजति स्वीकरोति उत्सृजति च अत एव स्वेन तेजसा स्वकीयेन ज्ञानरूपेण तेभ्योऽन्यः ॥ ४६ ॥

ननु, देहविलक्षणस्यास्य देहसंयोगकर्माचरणसुखदुःखभोगादिकं कियत्कालपर्यन्तं भविष्यतीत्यत्राऽवधिमाह—यावदिति । यावन्मायायोगः अनादिप्रकृतिसम्बन्धः तावदात्मा जीवात्मा लिङ्गान्वितः तावदेव बन्धनं निगडोऽयमशुभाशुभं कर्म अनुवर्त्तते ततः कर्मानुवृत्तेः तावदेवक्लेशः दुःखानुभवः अशुभकर्मफलम् विपर्ययः सुखानुभवः शुभकर्मफलम् अनुवर्त्तते ॥ ४७ ॥

तावदेव यथा मनोरथः अनीशस्य सोहमिति स्वप्नोऽमृगस्य मृगोहमिति च सङ्कल्पो मृषा असत्तादृशः वितथाभिनिवेशः देहे अहमित्यसदभिनिवेशः अनुवर्त्तते एत् यत एव गुणेषु गुणपरिणामभूतेषु दारापत्यादिषु अर्थदृग्वचः पुरुषार्थदृग्वचनं मम जीवनहेतव एते इत्येवंभूतं वाक्यं च अनुवर्त्तते । किञ्च यावन्मायायोगस्तावदेव सर्वमैन्द्रियकमिन्द्रियग्राह्यं कर्मफलमनुवर्त्तते इति पूर्वेणैवान्वयः ॥ ४८ ॥

भाषाटीका ।

ऐसे ही प्राणी लोग भी अपने २ जन्म देने वाले तिन २ कर्मों से समय पर होते हैं समय पर सब ही नहीं होते । तहां आत्मा प्रकृति में स्थित होकर भी उसके गुणों से देह से अत्यंत भिन्न होने से नही बंधता हैं ॥ ४१ ॥

मोह से उत्पन्न यह शरीर भी पृथिव्यादि से उत्पन्न गृहों के सदृश आत्मा से पृथक् है ॥ जैसे जल पृथिवी तेज (सुवर्णादि) बुद्बुदघटकटकादि होते हैं और काल पाकर नष्ट होजाते हैं इसी प्रकार यह शरीर भी है ॥ ४२ ॥

जैसे अग्नि काष्ठ में भिन्न मालूम होती है । जैसे वायु देह में स्थित होकर भी पृथक् रहता है ॥ और जैसे आकाश सर्वत्र वर्त्तमान होकर भी किसी में सक्त नहीं होता है ऐसे ही सर्व गुणाश्रय पुरुष भी इन सब से भिन्न है ॥ ४३ ॥

हे मूढ अबलाओ ! जिसका तुम शोच करती हो वही यह सुयज्ञ तुमारे सन्मुख सोरहा है । जो सुनने वाला और बोलने वाल है वह तो कभी देखा ही न जासका फिर शोक किसका है ॥ ४४ ॥

न इस देह में कोई सुनने वाला और न कोई बोलने वाला है, केवल एक इसमें मुख्य महा प्राण हैं, जो इन्द्रियोंसे वासना का ज्ञाता आत्मा है वह इस शरीर से संबन्ध ही नहीं रखता है ॥ ४५ ॥

भूत इन्द्रिय मन लिंग और ऊंचे नीचे देहको धारण करता है और त्यागता है, तो भी वह आत्मा अपने तेज से पृथक् प्रतीत होता है ॥ ४६ ॥

जब तक आत्माको लिंग शरीर का संबंध है तब ही तक कर्मकृत यह शरीर है और उसी से विपर्यय क्लेश और माया का संबन्ध भी लगा हुआ है ॥ ४७ ॥

जो कि गुणों में अर्थ की दृष्टि का वचन है यही मिथ्या अभिनिवेश है ॥ और जैसे मनोरथ तथा स्वप्न के पदार्थ अचिरयी है ऐसे ही सर्व इन्द्रियों के विषय भी अनित्य हैं ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपसंहरति—अथेति । अथ तस्मात् नित्यमात्मानमनित्यं देहं वा तद्विदोनित्यमनित्यं च जानन्तो न शोचन्ति नन्वेवमुपदेष्टारोपि

(१) प्रलोभनमिति श्री वीर० श्री विजय० श्री शुक० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुलिङ्गमिथुनं तत्र विचरत्समदृश्यत ।
तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ॥ ५१ ॥
साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता ।
कुलिङ्गस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ।
स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५२ ॥
अहो अकरुणो देवः स्त्रियाऽऽकरुणया विभुः ।
कृपणं मानुशोचन्त्या दीनया किङ्करिष्यति ॥ ५३ ॥
कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे ।
दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५४ ॥
कथं त्वजातपक्षांस्तान् मातृहीनान्बिभर्म्यहम् ।
मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥ ५५ ॥
एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ।
स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥ ५६ ॥

आम्नाय–ग्रन्थागारम्

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोचन्तो दृश्यन्ते तत्राह—नान्यथेति । ज्ञानदार्ढ्याभावात्स्वभावो न निवर्तत इत्यर्थः ॥ ४९ ॥

स्वयं सधर्मा अपीति यदुक्तं तत्रेतिहासमाह—लुब्धकइत्यादिना । पक्षिणामन्तक ईश्वरेण निर्मितस्सन् यत्र यत्र ते तत्र तत्र तान् कणादिभिः प्रलोभयन् जालं विस्तार्य विशेषेण धृतवान् पाठान्तरे तेषामामिषादिभिः प्रलोभनं कृतवानित्यर्थः ॥ ५० ॥

कुलिङ्गः कन्दभक्षी पक्षिविशेषः कुलिङ्गयोर्मिथुनम् ॥५१॥

शिचस्तन्त्यां जालस्य सूत्रेऽसज्जत बन्धं प्राप तामापन्नामापद्मप्राप्ताम् दृष्ट्वा कुलिङ्गः पक्षी तां मोचयितुमकल्पस्सन् पर्यदेवयद्वृक्षशाखामाश्रित्यविलापं चकार ॥ ५२ ॥

आकरुणया सर्वतोऽनुकम्प्या स्त्रिया किङ्करिष्यति ॥५३॥

आत्मनो देहस्यार्धेन अनेन विधुरायुषा भार्याशून्यजीवितेन दुःखं यथा भवत्येवञ्जीवता किं मे प्रयोजनम् अतो मामपि कामं नयत्वित्यन्वयः ॥ ५४ ॥

न जाताः पक्षा येषां तान्बालकान् कथं बिभर्मि पुष्णामि मन्दभाग्या मे प्रजा मातरं प्रतीक्षन्ते ॥ ५५ ॥

शाकुनिकः पक्षिहन्ता विलीनः सन् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहात्मनोरुभयोरपि शोकाविषयत्वमुक्तं सहेतुकमुपसंहरति–नथेति । अथ हे मयबाः! नित्यमात्मानम् अनित्यं देहं प्रत्यपि तद्विदः देहात्मयाथात्म्यविदो न शोचन्ति. कुतः इतिशब्दो-हेत्वर्थकः यस्मात्स्वभावः वस्तुनः स्वाभाविको धर्मः शोचतामपि शोचद्भिरप्यन्यथा कर्तुं न शक्यते न ह्यात्मनः स्वाभाविकं नित्यत्वमपनीयानित्यत्वं केनचिच्छोकाद्युपायेनापादयितुं शक्यं न वा देहस्यानित्यत्वमपनुद्य नित्यत्वम्. न हि वह्नेरौष्ण्यापनयेन शैत्यमापादयितुं शक्यमिति भावः ॥ ४९ ॥

यदुक्तं "स्वयं सधर्मा अपि शोचन्ति" इति तत्र दृष्टान्ततयेतिहासं प्रस्तौति–लुब्धक इति । कश्चिल्लुब्धको व्याधः पक्षिणामन्तकः मृत्युः निर्मितः ईश्वरेण मृत्युत्वेन निर्मितिः अत एव स तत्र-तत्र जालं वितत्य पक्षिणां प्रलोभनं वञ्चकं विदधे कृतवान् ॥ ५० ॥

एवं लुब्धके प्रलोभयति सति तत्र समीपे कुलिङ्गयोः पक्षिणोर्मिथुनं द्वन्द्वं सञ्चरत्सत् लुब्धकेनादृश्यत तयोः स्त्रीपुंसयोः मध्ये कुलिङ्गी स्त्री सहसा वञ्चनोपायेन लुब्धकेन प्रलोभिता बभूव ॥ ५१ ॥

सा महिषी कुलिङ्गभार्या कालवशा सती सिचस्तन्त्यां जालसूत्रे असज्जता लग्ना बभूव अथ ततस्ताम् आपन्नाम् आपदं प्राप्तां दीनां कर्मानुगुणेन कालेन यन्त्रितां सिचस्तन्त्यामासञ्जितां महिषीं भार्यां कुलिङ्गीं वीक्ष्य कुलिङ्गः पुमान् स्नेहादतीव दुःखितोऽकल्पो विमोचने ऽदक्षो अतएव केवलं स्वयमप्यातुरः दीनस्सन् कृपणां दीनं यथातथा पर्यदेवयत् परितस्तप्तो-बभूव ॥ ५२ ॥

तदेवाह—अहो इति त्रिभिः । अहो देवो विधाताऽकरुणो निर्घृणः, अकरुणत्वमेवाविष्करोति–स्त्रिया आकरुणयेति छेदः आकरुणया सर्वतोऽनुकम्प्या स्त्रिया मम भार्यया नितरां कृपणां दीनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, परमनिधि, करौंदी

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मां प्रत्यनुशोचन्त्या दीनया कुलिङ्ग्या विभुर्देवः किं करिष्यति न किमपि तस्य प्रयोजनम्. किन्तु मय्यकारुण्येन मां वियोज्य स्त्रियं नीतवान् इति भावः ॥ ५३ ॥

यतो मय्यकरुणो देवस्ततो मामपि कामं यथेष्टं नयतु आत्मनोऽर्द्धेन मम किं किं प्रयोजनम्. एकस्मिन्नर्थ्यर्द्धे भार्याख्ये नष्टम् अवशिष्टेनार्द्धेन नकिमपि प्रयोजनमस्तीत्यर्थः । अर्द्धं विशिनष्टि, दीनेन कृपणेन दुःखं यथा भवति तथा जीवता प्राणान्धारयता विधुरायुषा विधुरं भार्यारहितमायुर्यस्य तेन भार्याशून्यजीवितयुक्तेनेत्यर्थः । अनेनेति निस्स्पृहत्वमुक्तं कार्योपयोगित्वाभावादिति भावः ॥ ५४ ॥

किञ्च अजातौ पक्षौ येषां तान् मात्रा हीनान् रहितान् बालकान् कथमहं बिभर्मि पुष्णामि किञ्च मे मम प्रजाः नीडे मातरं प्रतीक्षन्ते ॥ ५५ ॥

एवं प्रियाया वियोगातुरं दुःखितम् अत एव विशेषेणारुदन्तम् अश्रुकण्ठमश्रुपूर्णकण्ठं तं कुलिङ्गं स एव शाकुनिकः शकुनीन्हन्तीति शाकुनिकः लुब्धकः आरात्समीपे निलीनस्तिरोहितस्सन् कालेन कर्मानुगुणेन प्रहितः प्रेरितः शरेण विव्याध ताडितवान् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्मात्सर्वस्येश्वराधीनत्वेन जन्तूनां मरणादिकमपरिहार्यं तस्मात्सर्वथा देहेन्द्रियादेरनित्यत्वं नित्यत्वं चास्तु तथापि शोककरणं न पण्डितमतम् " गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" इत्यादेरित्याह—यथेति, अतस्तन्मूर्खमतमिति सन्तोष्टव्यं स्वभावत्वादित्याह—नान्यथेति ॥ ४९ ॥

अस्मिन्नेवार्थे कञ्चनेतिहासमाह—लुब्धक इति । लुब्धको मृगयुर्निर्मितो विधिनेतिशेषः वितत्य विस्तृत्य प्रलोभनं वञ्चनम् ॥५०-५१॥

सिचा जालेन सह यन्त्रितया तन्त्या सूत्रेण महिषी कुलिङ्गभार्या कालयन्त्रिता कालाधीना अकल्पोऽसमर्थो, मोचयितुमिति शेषः, पर्यदेवयद्विलपितवान् ॥ ५२ ॥ ५३ ॥

दुःखं जीवता दीनेन क्षीणेनात्मनोऽर्द्धेन मे मम किं प्रयोजनं न किमपि कुतो विधुरायुषाऽऽयूरहितेनात्मनोऽर्द्धस्य नष्टत्वात् ॥५४॥

मे प्रजाः पुत्राः ॥ ५५ ॥

शाकुनिकः पक्षिमारकः कालेनान्तकेन प्रहितः प्रेरितः निलीनो वृक्षमूले छन्नः कुलिङ्गं दीर्घतुण्डं " दार्वाघाटो दारुकुट्टः कुलिङ्गो दीर्घतुण्डकः" इत्यभिधानम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तयोरिति । हे मद्विष्यः ॥ ५१—६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ नित्यं मीमांसकानां मते अनित्यं नश्वरं सत्यमिति साङ्ख्यानां मते ; ननु, तदपि न वयं प्रबुध्यामहे इति तत्राह—नान्यथेति ॥४९॥

शोकस्वभाववत्त्वेऽनर्थं इत्यत्रेतिहासमाह—लुब्धक इत्यादिना । निर्मितः ईश्वरेणेत्यर्थः । विदधे पक्षिणो विशेषेण दधार प्रलोभनमिति पाठे आमिषादिभिस्तेषां प्रलोभनं कृतवानित्यर्थः ॥५०-५१॥

सिचस्तन्त्यां जालस्य सूत्रे हे मद्विष्यः ॥ ५२ ॥

देवो विधाता करुणया मयि कृपावत्या ॥ ५३—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विदः नित्यानित्यविदः नित्यं चेत्रज्ञः अनित्यं देहादिकं नैव शोचन्ति शोचतामतद्विदां स्वभावस्तु अन्यथा कर्तुं न शक्यः ॥ ४९ ॥

तादृक्स्वभावस्य फलं नाश एवेत्याह—लुब्धक इत्यादिना । निर्मितस्तत्कर्मानुसारिणा ईश्वरेणेति शेषः । जालं वितत्य तत्र प्रलोभनमन्नादिना विदधे ॥ ५० ॥ ५१ ॥

सिचो जालस्य ॥ ५२ ॥

कृपणं मा मां कृपया अनुशोचन्त्या स्त्रिया किं करिष्यति ॥५३॥

देवः मामपि कामं यथेष्टं नयतु यतः आत्मनः देहस्य अर्द्धेन स्त्र्याख्यस्यार्द्धस्य विनष्टत्वादवशिष्टेन पुरुषाख्येन भागेन मम किंप्रयोजनम्. कथंभूतेन दीनेन दुःखं यथा भवति तथा जीवता विधुरं कलत्ररहितमायुर्यस्य तेन ॥ ५४ ॥

मे प्रजाः नीडे मातरं प्रतीक्षन्ते तान् कथं बिभर्मि पोष्यामि ५५॥

विलीनः वृक्षादिषु छन्नः सन् ॥ ५६ ॥

भाषा टीका ।

नित्यानित्य वस्तु विवेक वाले नित्य और अनित्य का शोक नहीं करते और शोक करने वालों के स्वभाव भी अन्य या नहीं कियो जासका है ॥ ४९ ॥

(एक दृष्टांत कहते हैं कि) परमेश्वर का निर्मित पक्षियों का वैरी एक लुब्धक वन में जाल लगाकर जहां तहां लोभ देता था॥ ५० ॥

इतने में वहां कुलिंग नामक पक्षियों का जोडा विचरता हुआ देखपडा उनमें से लुब्धक ने कुलिंगी को एक दम लुभालिया ॥ ५१ ॥

कालविवशहोकर वह कुलिङ्गी उस. जालमें फँस गई । उसको उस प्रकार फँसीहुई देखकर कुलिङ्ग अतिदुःखित और असमर्थ आप दीन उस विचारी दीन कुलिङ्गी का बहुत शोक करने लगा, ॥ ५२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं यूयमपश्यन्त्य आत्मापायमबुद्धयः ।
नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥ ५७ ॥

हिरण्यकशिपुरुवाच ।

बाल एवं प्रवदति सर्वे विस्मितचेतसः ।
ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८ ॥
यम एतदुपाख्याय तत्रैवान्तरधीयत ।
ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत्साम्परायिकम् ॥ ५९ ॥
ततः शोचत मा यूयं परं चात्मानमेव च ।
क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ।
स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ६० ॥

नारद उवाच ।

इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ।
पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे दितिशोकापनयनंनाम द्वितीयोऽध्यायः ॥ २ ॥

भाषाटीका।

और बोलाकि, अहो परमेश्वर तू बडा निर्दय है मुझ दीनको शोचनेवाली दयावाली उस विचारी दीन स्त्री के साथ मेरा वियोग कराकर तू क्या करेगा ॥ ५३ ॥

भलेहीं ईश्वर मुझे लेजाय क्योंकि ? अपने अर्द्धशरीर से मेरा क्या प्रयोजनहै इस दीन विचारी से वियुक्त इस आयुसे दुःख पूर्वक जीकर भी क्या होगा ॥ ५४ ॥

अब कहो जिनके पङ्ख नही जामें ऐसे विना माताके उन छोटे २ बच्चोंका मैं कैसे पालन करूङ्गा मन्दभागी मेरे बच्चे माकी वाट देखरहे हैं ॥ ५५ ॥

इस तरह प्रियाके वियोग से दुखित रोते हुए विलाप करने वाले उसी कुलिङ्ग को छिपे हुऐ उसीलुब्धकने बाणसे वेधदिया ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

आत्मापायं स्वमृत्युम् ॥ ५७ ॥

अयथोत्थितं मिथ्यैवाविर्भूतम् ॥ ५८ ॥

साम्परायिकं परलौकिककृत्यम् ॥ २९ ॥

अशोचतेतिपाठे अडागम आर्षः । स्वः पर इत्यभिनिवेश एवाज्ञानं तेन विना ॥ ६० ॥

सस्नुषा स्नुषासहिता ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् द्वितीयोऽध्यायः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवमितिहासं प्रस्तुत्य प्रकृतोपयोगित्वेनोपसंहरति--एवमिति । एवं यथा कुलिङ्गस्तथा यूयमप्यात्मापायं स्वमृत्युम् अपश्यन्तः अनालोचयन्तोऽत एव अबुद्धयः विवेकशून्याः वर्षशतैरपि शोचन्तः एनं पतिं न प्राप्स्यथ ॥ ५७ ॥

एवं प्रेतबन्धुयमसम्वादरूपमितिहासं प्रस्तुत्योपसंहरति दैत्यः--बालइति द्वाभ्याम् । एवम् इत्थं बाले प्रवदति सति सर्वे ज्ञातयः सुयज्ञस्य सपिण्डाः विस्मितं चेतो येषां ते अयथोत्थितमपुरुषार्थत्वेनाप्रतीतं किन्तु पुरुषार्थत्वेन विपरीतरूपेण प्रतीतं सर्वं देहादिकमनित्यमस्थिरमपुरुषार्थरूपं मेनिरे इति निश्चितवन्त इत्यर्थः ॥ ५८ ॥

यमस्त्वेतदुक्तमुपाख्याय कथयित्वा तत्रैवान्तर्दधे ततो ज्ञातयः सुयज्ञस्य यत्कर्त्तव्यं सांपरायिकं मृतोद्देशेन कर्त्तव्यं कर्म तत् चक्रुः ॥ ५९ ॥

एवमितिहासमुपसंहृत्य तत्फलितार्थमुपदिशन्नुपसंहरति-तत इति । यतो देहात्मनोरेवं विधस्स्वभावोऽतो हिरण्याक्षादिरूपं परमन्यमात्मानं स्वं प्रति वा यूयं मा शोचत अहो मां विहाय स गतस्तं विहायाहं कथं जीवामीत्येवं स्वं परं प्रति वा मा शोचतेत्यर्थः । स्वः पर इत्यभिनिवेशोऽभिमानो यस्मात्तेनाऽज्ञानेनानाद्यज्ञानमूलकेन कर्मणा विना देहिनां कः परः को वा आत्मा कश्च स्वकीयः पारक्यो वा स्वपरविभागः स्वीयपरकीयविभागश्च सर्वोऽप्यनाद्यविद्यामूलककर्मायत्तदेहसम्बन्धप्रयुक्तदेहात्माभिमानप्रयुक्त औपाधिक आत्मनान्तु केनापि प्रकारेण स्वाभाविकसम्बन्धः शोकहेतुर्नविद्यते अतो मा शोचतेत्यभिप्रायः ॥ ६० ॥

उपरितनं दैत्यस्य वृत्तान्तं वक्तुं तावद्वाक्यमुपसंहरन् दितेरवस्थितिप्रकारमाह भगवन् नारदः--इतीति । इतीत्थं दैत्यपतेर्हिरण्यकशिपोर्वाक्यमाकर्ण्य, स्नुषया पुत्रस्य भार्यया सहिता दितिः क्षणमात्रेण पुत्रशोकं त्यक्त्वा तत्त्वे देहात्मयाथात्म्ये चित्तमधारयत् तत्त्वचिन्तनपरा बभूवेत्यर्थः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनेन प्रकृते किमभूत्तत्राह-एवमिति । आत्मापायं युष्मन्नाशं देहनाशं वा ॥ ५७ ॥

किं ज्ञातयो बालभाषितमित्युपेक्षां चक्रुरिति तत्राह-बाल इति । यद्देहादिकं तत्सर्वमनित्यं मेनिरे यद्देहात्मत्वं यदयथोत्थितं स्वप्नजाग्रत्ववद्भ्रान्तिं मेनिरे "अहं ममाभिमानादित्वयथोत्थमनित्यकम्" इति स्मृतेः । नन्वेवं तर्हि महदादिजगतश्चित्प्रकृतेश्च भ्रान्तिकल्पितत्वमायातं तयोरपि सर्वान्तर्गतत्वादित्याशङ्का वानेन परिहर्तव्या तथा हि, यन्महदादि तत्सर्वं जगदकारणत्वस्य हरेरनुग्रहाधीनत्वं आद परमात्मनो यथार्थत्वेन सत्यत्वेनोत्थितं सृष्टं चित्प्रधानस्यापि नित्यत्वं भगवन्तमन्तरेण यथाऽस्वातन्त्र्येण स्थितत्वञ्च तदुक्तं च—

"महदादिर्यथोत्थं च नित्या चापि यथोत्थिता ।
अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च ॥
यथार्थभूतश्च पर एक एव जनार्दनः" ॥ इति.

अनेन महदादेरप्यनित्यत्वादिकं नास्तीति किमु हरेरिति कैमुत्यन्यायो दर्शितः ॥ ५८ ॥

साम्परायिकं मृतविषयम् ॥ ५९ ॥

आत्मपराबुद्धिश्य किमिति शोको न कार्य इति तत्राह—क आत्मेति । देहादिकमप्यपेक्ष्यात्मपराभावाक्षिप्येते तथा हि, आत्मपरयोश्चेतनत्वेन नित्यत्वाद्देहादेर्भौतिकत्वेन नश्वरत्वात्किं शब्दस्याक्षेपरत्वमेव, नत्वनिर्वचनीयः । तर्ह्यहं पर इति व्यवहारस्य किं मूलमिति तत्राह-स्वपरेति, स्वः पर इति दुराग्रहलक्षणमज्ञानमन्तरेण न किमपि कारणं तस्मादात्मनो वृद्धिः श्रीवासुदेवे दृढा मनोरतिरज्ञाननाशशत्रुनाशाश्चापादनीयौ पुरुषेणेति निश्चेतव्यम्—

"न हि देहादिरात्मास्यान्न च शत्रुरुदाहृतः ।
अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् ॥
यस्तु देहगतो जीवः स हि नाशं न गच्छति ।
अतः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः ॥
देहादिव्यतिरिक्तौ तु जीवेशौ प्रति जानताम् ।
अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा ॥
शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथञ्चन" ॥

इत्यनेन तात्पर्यमवगन्तव्यमिति सिद्धम् ॥ ६० ॥

प्रकरणसमाप्ताविति शब्दः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीयस्य
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
द्वितीयोध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मापायं स्वपं स्वमृत्युम् ॥ ५७ ॥

सर्वं जगदनित्यं यतो यथोत्थितं येन प्रकारेणोत्थितं तथा न तिष्ठतीत्यर्थः ॥ ५८—५९ ॥

स्वश्च पर इत्यभिनिवेश एवाज्ञानं तेन विना ॥ ६०—६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमस्य द्वितीयोयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनोऽपायं नाशमपश्यन्त्यः वर्षशतैरपि पतिं न प्राप्स्यथ ॥५७॥ एवं बाले प्रवदति अयथोत्थितम् अमृतेपि आत्मनि मरणाभ्रमेण वृथैवोत्पन्नं सर्वं शोकादिकम्, अनित्यं विवेकबाध्यं यद्वा एवमुक्तप्रकारेण बाले प्रवदति सति अयथैवोत्थितमात्मतयोपस्थितं सर्वं देहेन्द्रियादिकमनित्यं मेनिरे नत्वात्मानमित्यर्थः ॥ ५८ ॥

साम्परायिकं पारलौकिकं यत् तच्चक्रुः कृतवन्तः ॥ ५९ ॥

आत्मानं नित्यत्वात् परं देहादिकमनित्यत्वात् मा शोचत "अथ नित्यमनित्यं वा नैव शोचन्ति तद्विदः" इत्युक्तत्वात् ॥ ६० ॥

तत्त्वे "स रक्षिता रक्षति योहि गर्भे। बहच्छयेशः सृजतीदमव्ययः" इत्यादिना यमेनोपदिष्टे ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धातप्रदीपे
द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषा टीका ।

हे निर्बुद्धियो ! इसी तरह तुमसब भी अपना नाश न देखकर इसका शोच करते२ सैकड़ों वर्ष में भी पति को प्राप्त न होवेगी ॥ ५७ ॥

हिरण्य कशिपु उवाच ।

हिरण्यकशिपुबोला कि, उस बालक के ऐसे बोलने से सब ज्ञाति लोग बड़े विस्मित चित्त वाले होकर सब संसार को अनित्य मानते हुए ॥ ५८ ॥

यमराज भी इतना कहकर वहीं अन्तर्धान होगये जाति लोगों ने भी सुयज्ञ का जो मृतक का कर्म है उसे किया ॥ ५९ ॥

तिसीसे तुम भी सब दूसरे का और अपना भी कुछ शोच मत करो, इस संसार में कोन अपना और पराया कोन हैं । तथा आप कोन और दूसरा कौन है ॥ ६० ॥

प्राणियों ने ज्ञान के विना यह सब अपना और पराया मानलिया है ॥ नारद उवाच ॥ नारद जी बोले, कि--इस प्रकार हिरण्यकशिपु के वाक्य सुन कर बधू सहित दिति ने पुत्रशोक को क्षण मात्र में त्याग कर तत्त्व में चित्त लगाया ॥ ६१ ॥

इति श्रीमत्भागवत महापुराण सप्तस्कन्ध
द्वितीय अध्याय की भाषाटीका
समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ तृतीयोऽध्यायः ॥

नारद उवाच ।

हिरण्यकशिपूराजन्नजेयमजरामरम् ।
आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत ॥ १ ॥
स तेपे मन्दरद्रोण्यां तपः परमदारुणम् ।
ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः ॥ २ ॥
जटादीधितिभीरेजे सम्वर्तार्क इवांशुभिः ।
तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥
तस्य मूर्ध्नः समुद्भूतः सधूमोग्निस्तपोमयः ।
तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ॥ ४ ॥
चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः ।
निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥
तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ।
धात्रे विज्ञापयामासुर्देवदेव जगत्पते ! ॥ ६ ॥
दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ।
तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ।
लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तवा (१) भिभूः ॥ ७ ॥
तस्यायं किल सङ्कल्पश्चरतो दुश्चरं तपः ।
श्रूयतां किन्न विदितस्तवाथापि निवेदितः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः ।
आगत्य विस्मितस्तेन संस्तुतश्च वरानदात् ॥

तदेवं साधूनां कदने दानवानादिश्य बन्धूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवांस्तदाह— हिरण्यकशिपुरित्यादिना । अप्रतिद्वन्द्वं प्रतिपक्षहीनमेकराजमेकमेव राजानं व्यधित्सत कर्तुमैच्छत ॥ १ ॥

ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्येन ॥ २ ॥

जटानां दीधितिभिः कान्तिभिः अंशुभीरश्मिभिः प्रलयकर्ता अर्क इव रेजे पूर्वं खे अवञ्चिताः सन्तो भुवि विचेरुस्ते देवाः पुनः स्वानि स्थानानि भेजिरे ॥ ३ ॥

विष्वगीरितः सर्वतः प्रसृतस्सन् ॥ ४ ॥

द्वीपैरद्रिभिश्च सहिता भूश्चलिता ॥ ५ ॥ ६ ॥

---

(१) तव प्रभो इति पाठान्तरम्. विज०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

तव बलिहाराः करप्रदाः पूजाकारिणः इति वा अभितो भवतीत्यभिभूः हे सर्वाधिपते ! पाठान्तरे भो इति सम्बोधनम् अभितो यावन्न नंक्ष्यन्तीति सम्बन्धः ॥ ७ ॥

ब्रह्मणस्तस्मिन्द्वेषमुत्पादयितुं तत्सङ्कल्पमाहुः—तस्येति चतुर्भिः । तस्य सङ्कल्पस्तव किं न विदितोऽथाऽप्यस्माभिर्निवेदितस्त्वया श्रूयताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वोपदेशेन दित्यादीनां शोकं परिहृतवतो दैत्यस्योपरितनं वृत्तान्तमाह भगवान्नारदः—हिरण्यकशिपुरित्यादिना । हे राजन् युधिष्ठिर ! हिरण्यकशिपुरात्मानं व्यधित्सत विधातुमैच्छत् कथम्भूतम् अजेयमितरैर्जेतुमशक्यम् जरामरणरहितम् अप्रतिद्वन्द्वं प्रतिपक्षरहितम् एकराजम् एकः स्वयमेव राजा इत्येकराजस्तमेवंभूतमात्मानं साधयितुमैच्छदित्यर्थः । येन साधनेन स्वयमुक्तविधोभवेत्तादृशं साधनं कर्त्तुमैच्छदिति यावत् ॥ १ ॥

तत्साधनानुष्ठानप्रकारमेव प्रपञ्चयति—स इति । सः दैत्यः मन्दरगिरेर्द्रोण्यामत्युग्रं तपस्तेपे कृतवान् कथंभूतस्सन् ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्भूमिर्येन ॥ २ ॥

एवं तपः कुर्वन् दैत्यो जटानां दीधितिभिः कान्तिभिरंशुभिः रश्मिभिः सांवर्तकः प्रलयकालिकः सूर्य इव रेजे रराज. तस्मिन् दैत्ये एवं तपः कुर्वति सति ये देवाः पूर्वं दैत्यैरलक्षितास्सन्तो भुवि चेरुस्ते स्थानानि स्वस्थानानि भेजिरे प्रापुः प्रतिपक्षस्यासुरस्य तपःस्थितत्वादुपद्रवाभावात् स्वस्थानानि भेजिरे इति भावः । तस्य दैत्यस्य मूर्द्धनः सकाशात्समुद्भूतः निष्क्रान्तस्तपोमयः तपस आगतस्तपोमयः तत आगत इत्यर्थे "मयट्च" इति मयट्, तपःकार्यं भूतइत्यर्थः । धूमेन सहितोऽग्निः प्रवृद्धस्तिर्यगूर्द्ध्वमधश्च सर्वतो लोकानतपत् तताप ॥ ३ ॥ ४ ॥

नद्यः उदन्वन्तः समुद्राश्च चुक्षुभुर्द्वीपैरद्रिभिश्च सहिता भूः भूमिः चचाल ग्रहैः सहितास्ताराः नक्षत्राणि निपेतुः दश दिशो जज्वलुश्च ॥ ५ ॥

तेन तपोऽग्निना तप्ता देवा दिवं स्वर्गं त्यक्त्वा सत्यलोकं ययुः धात्रे ब्रह्मणे विज्ञापयामासुश्च. विज्ञप्तिमेवाह—हे देवदेव देवानामिन्द्रादीनामपि देव, हे जगत्पते, दैत्येन्द्रस्य तपसा तप्ताः वयं दिवि द्युलोके स्थातुं न शक्नुमः ॥ ६ ॥

हे भूमन्, यदि त्वं लोकानां क्षेमं मन्यसे तर्हि हे अभिभो सर्वाभिभवक्षम ! तव बलिहाराः हविर्भागप्रदाः पूजाकारिणो वा सर्वे लोकाः यावन्न नङ्क्ष्यन्ति नाशं न यास्यन्ति तावदेव ततःपूर्वमेव तस्य दैत्येन्द्रस्य तपोऽग्नेरुपशमं वरप्रदानरूपोपायेन विधेहि कुरु ॥ ७ ॥

दैत्यस्य गूढाभिसन्धिं ब्रह्मणस्तस्मिन् द्वेषमुत्पादयितुं विज्ञाप[illegible]मान्यैः कर्त्तुमशक्यन्तपश्चरतः कुर्वतः तस्य दैत्यस्यायं किल सङ्कल्पः यद्यपि सर्वज्ञस्य तवाविदितं किन्तु, किमपि नास्ति. तथाप्यस्मन्निवेदितं श्रूयतां त्वयेति शेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बहुकोटिसंख्या तत्कालेनानेकसंभारैरार्जितैरयोग्यं दुष्प्रापं योग्यञ्चानेकविधिसाधनैः सुसाध्यं तूष्णीं भावेनेत्यादिकं हिरण्यकशिपुतपश्चरणकथनव्याजेनाभिप्रेयतेऽस्मिन्नध्याये व्यधित्सत कर्तुमैच्छत् ॥ १-२ ॥

सम्वर्त्तार्कैः प्रलयसूर्यैः स्थानानि गमनवर्जनानीतस्ततो यात्रां मुक्त्वा स्वस्थानानि भेजुः ॥ ३—६ ॥

उपशमं परिहारम् बलिहारा उपहारार्थकाः ॥ ७—८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १——१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तृतीये स तपस्तप्त्वा देवान् सुस्थितदुःस्थितान् ।
कृत्वा धातुः समायातात् स्तुतात् प्राप वरान् वरान् ॥

आत्मानं स्वम् एकएव राजत इत्येकराट् तं वक्ष्यमाणाभिप्रायेण ब्रह्मलोकपर्य्यन्तं स्वस्यैवैकाधिपत्यं कामयमानोऽभूदित्यर्थः ॥ १ ॥

अतएव तेपे इति ॥ २ ॥

स्थानानि स्वस्वगृहान् शत्रोस्तस्य शात्रवमनालक्ष्येत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अभितो भवतीत्यभिभो हे सर्वाधिपते ! सविसर्गपाठे भो इति सम्बोधनं भाभि अभितः ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हिरण्यकशिपुतपःप्रसन्नो ब्रह्मा तस्मै वरानदादितिवर्णयति तृतीये—हिरण्यकशिपुः आत्मानमजेयत्वादिगुणकं नास्ति प्रतिद्वन्द्वः प्रतिपक्षो यस्य तथाभूतम् एक एव राजते इत्येकराट् तं व्यधित्सत विधातुमैच्छत् ॥ १ ॥

ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्येन स दारुणं तपस्तेपे ॥ २ ॥

सम्वर्तार्कः प्रलयार्कोऽशुभिरिव जटानां दीधितिभिः रश्मिभिः रेजे रराज पूर्वं ये शत्रुभयादलक्षिता भुवि चेरुस्ते देवाः स्थानानि स्वस्वगृहान् भेजिरे प्रापुः ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ।
अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥

तदहं वर्द्धमानेन तपोयोगसमाधिना ।
कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः ॥ १० ॥

अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ।
किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ॥ ११ ॥

इति शुश्रुम निर्बन्धं तपः परममास्थितः ।
विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ! ॥ १२ ॥

तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते ! ।
भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥

इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ! ।
परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्वगीरितः सर्वतः प्रसृतः तिर्यगूर्ध्वमधोलोकानतपत्ततताप ॥ ४ ॥

नद्यश्चोदन्वन्तश्च नद्युदन्वन्तः चुक्षुभुः द्वीपैरद्रिभिश्च सहिता भूश्चचाल ग्रहैः सह ताराः निपेतुः ॥ ५ ॥

तेन तन्मूर्द्धसमुद्भतेनाग्निना ॥ ६ ॥

अभितोभवतीत्यभिभूस्तत्सम्बोधने हे अभिभो ! सर्वाधिपते ! यावत्तव बलिहाराः पूजाकारिणः न नङ्क्ष्यन्ति ततःप्रागेव तस्योपशमं विधेहि कुरु ॥ ७ ॥

दुश्चरं तपश्चरतस्तस्यायं वक्ष्यमाणः सङ्कल्पः यद्यपि तव किं न विदितं सर्वं विदितमेव. अथाप्यस्माभिर्निवेदितं त्वया श्रूयताम् ॥ ८ ॥

भाषा टीका ।

नारदउवाच ।

श्रीनारदजी बोले, कि–हे राजन् ! हिरण्यकशिपुने अपने को अजेय अजर अमर और अप्रति द्वन्द्वी एक राजा कर लिया ॥१॥

क्योंकि ? उसने मंदरपर्वत की गुहा में ऊंचे को बाहू उठाकर आकाश में दृष्टि लगाकर पैरके अंगुष्ठ मात्र से पृथ्वी पर खडा होकर परमदारुण तप किया ॥ २ ॥

तब तौ वह अपने जटाओं की किरणों से सूर्य के तद्वत् दीप्त हुआ ॥ जब वह तप करने लगा तब देवता लोग फिर अपने २ स्थानों पर पहुंच गये जो कि पहिले पृथ्वी पर विचरते थे ॥ ३ ॥

उसके मूर्द्धा से निकला हुआ धुआं सहित तपो मय अग्नि नीचे ऊपर और चारों तरफ के लोकों को तपाता हुआ ॥ ४ ॥

उस समय नदी और समुद्र क्षुभित होगये द्वीपों सहित पृथ्वी कांपने लगी आकाश से ग्रहों सहित तारे टूट २ कर नीचे गिरने लगे और दशों दिशा भी जलने लगी ॥ ५ ॥

तिसी से तपे हुए देवता स्वर्ग को छोडकर ब्रह्म लोक पहुंचे । और विधाता से विज्ञापन करने लगे कि हे देव देव ! हे जगत्पते ! हिरण्यकशिपु के तप से तपे हुए हम लोग स्वर्ग में रहने को समर्थ नहीं हैं । यदि आप विचारो तौ उसकी शांति करो. हे सर्वाधिपते ! जब तक आपके भेट देने वाले लोक न नष्ट होजावे तिसके पूर्वमें शांतिकरो ॥ ६—७ ॥

घोर तप करने वाले उस हिरण्यकश्यप का ऐसा संकल्प है । आपको क्या नहीं विदित है ? तौ भी निवेदन सुनीइये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तपोयोगयोः समाधिना निष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथा अध्यास्तेऽधितिष्ठति ॥ ९ ॥

तथैवाऽऽत्मनः साधयिष्यामि. ननु, ब्रह्मणातिदीर्घायुषा तपस्तप्त्वा तत्साधितमन्यः कुतस्तत्साधयेत् [illegible] कुत [illegible] योमिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ।
पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितम् ॥ १५ ॥
तपन्तं तपसा लोकान् यथाभ्रापिहितं रविम् ।
विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्यायुषोऽल्पत्वेन देहो वारंवारं म्रियेत तथापि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्पदं साधयिष्यास्येवेति ॥ १० ॥

वर्धमानेनेति यदुक्तं तदभिप्रायमाह—अन्यथेति । अन्यथा सुरासुरादिव्यत्ययेन अयथापूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि अन्यैर्वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनमतस्तदेव साधयिष्यामि ॥ ११ ॥

इति त्वत्पदापहरणे तस्य निर्बन्धं शुश्रुमः अत एवासौ तपः परममास्थितो वर्तते यदत्रयुक्तं तदनन्तरमेव विधत्स्व ॥ १२ ॥

अन्यथा तव स्थानभ्रंशे सति साधूनामनिष्टं स्यादिति शोचन्त आहुः—तव पारमेष्ठ्यमिदमासनम् द्विजानां गवाञ्च भवायोद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयायोत्कर्षाय ॥ १३ ॥ १४ ॥

वल्मीकादिभिः प्रतिच्छन्नं प्रथमं न ददर्श पश्चात्कथञ्चिद्विलक्ष्य तं प्राहेति द्वयोरन्वयः। पिपीलिकाभिराचीर्णं समन्ताद्भक्षितं मेदश्च त्वक्च मांसं च शोणितं च यस्य ॥ १५ ॥

अभ्रैरापिहितं छन्नं रविमिव विलक्ष्य विस्मितः प्राह ॥ १६ ॥ १७ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ संकल्पस्तत्राहुः—सृष्ट्वेति । सर्वधिष्ण्येभ्यः इन्द्रादिस्थानेभ्यः परमे स्थाने तिष्ठतीति परमेष्ठी ब्रह्मा तपोयोगे यः समाधिर्निष्ठा तेन चराचरात्मकमिदं सर्वं जगत्सृष्ट्वा यन्निजासनं सर्वोत्कृष्टं सत्यलोकमध्यास्ते ॥ ९ ॥

तदेवासनमहमात्मनो मम वर्द्धमानेन तपोयोगसमाधिना साधयिष्ये इति. ननु, ब्रह्मणा दीर्घायुषा तपस्तप्त्वा तत्साधितम्. अन्यः कथं तत्साधयेत् ? तत्राहुः-कालात्मनोश्च नित्यत्वादिति। यद्यप्यायुरल्पं तथापि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिः साधयिष्ये इत्यभिसन्धिरित्यर्थः ॥ १० ॥

अभिसन्ध्यन्तरमाहुः-अन्यथेति । तपोबलेनाहमिदं जगदन्यथा अधरोत्तरमयथापूर्वं देवासुरादिव्यत्ययञ्च करिष्ये कल्पान्तैः कल्पावधिभिरत एव कालेन निर्वृत्तैर्विनाश्यैर्वैष्णवादिभिः पदैः वैकुण्ठादिभिः किं प्रयोजनं न किमपीत्यर्थः । अनेन "सर्वार्थान्विपरीतांश्च [illegible] तामसी" इत्युक्तरीत्या स्थायिनो वैष्णव-

पदस्यास्थिरत्वं सत्यादिलोकानां स्थिरत्वञ्चाभिसंहितवतो दैत्यस्य केवलतामसबुद्धिमत्त्वमावेदितम् ॥ ११ ॥

इतीत्थं त्वत्पदापहरणे तस्य निर्बन्धमभिसन्धिरूपं शुश्रुमः तदर्थमेव परमं तप आस्थितः अतो हे त्रिभुवनेश्वर ! अत्र कर्त्तु यद्युक्तं तदनन्तरमाश्वेव स्वयमेव विधत्स्व कुरु ॥ १२ ॥

हे जगत्पते ! तवेदं पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां गवाञ्च भवाद्यर्थं तव स्थानभ्रंशे द्विजानां गवाञ्च न भवादिकमस्तीति भावः। तत्र, भवः अलभ्यलाभः क्षेमो लब्धपालनं श्रेयो धर्मादिपुरुषार्थः भूतिरैश्वर्यं विजयः उत्कर्षः ॥ १३ ॥

इतीत्थं देवैर्विज्ञापितो भगवानात्मभूः परमात्मनो जातो ब्रह्मा भृग्वाद्यैः परिवृतो दैत्येश्वरस्याश्रमंप्रति ययौ ॥ १४ ॥

वल्मीकादिभिः वल्मीकैस्तृणैः कीचकैर्वेणुभिश्च प्रतिच्छन्नं तं दैत्यं प्रथमं हंसवाहनो ब्रह्मा न ददर्श ततश्च पश्चात्कथञ्चिद्विलक्ष्य विस्मितः प्रहसंस्तं प्राहेति द्वयोरन्वयः । कथंभूतं विलक्ष्य, पिपीलकाभिराचीर्णमासमन्ताद्भक्षितं मेदश्च त्वक्च मांसञ्च शोणितं च यस्य ॥ १५ ॥

तपसा तपोऽग्निना लोकांस्तपन्तं कमिव विलक्ष्याभ्रैः पिहितछन्नं रविं यथा सूर्यमिव ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किं तद्विज्ञापनमत्राह—सृष्ट्वेति । ब्रह्मा तपोज्ञानादिनेदं चराचरं सृष्ट्वा सर्वधिष्ण्येभ्यो रुद्रादिपदेभ्यः परं यन्निजासनमध्यास्ते "अधिशीङ्स्थासांकर्म" इति सप्तम्यर्थे द्वितीया. अहं तदात्मनः साधयिष्ये इत्यन्वयः ॥ स्वनाशे दुर्घटमत्राह—कालात्मनोरिति। कालस्यात्मनश्चेतनस्य च नित्यत्वात् अविनाशात् अन्यच्च त्वसाध्यत्वे हिरण्यकशिपोरीदृशं कर्म नादूभुतं यतो ब्रह्माणमेकमन्तरेणात्मयोग्याज्ञानेन रागादिना वा मोहिताः जानन्तोपि स्वासदृशं कर्माचरन्तो दृश्यन्ते, तदुदितम्—

"ज्ञानतामपि कर्तव्यं कर्मात्मसदृशं सदा ।
तत्रात्मसदृशाज्ञानाद्रागाद्यैर्वा विमोहिताः ॥
जानन्तोपि ह्यसदृशं कर्म कुर्युर्ऋते विभुम् ।
चतुरास्यं सनायोग्यं कर्म कुर्यात्कथञ्चन" ॥ इति

नचैतत्तपआदिसाध्यम् अयोग्यत्वात्—

"तपसा विद्यया वापि ज्ञानध्यानादिना तथा ।
व्यस्तैः समस्तैरथवा कुर्वता यत्तमुत्तमम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सम्भारविक्षेपशतैर्बहुकोटिभिरेव च ।
न शक्यते समारोढुं स्वात्माऽयोग्यपदं त्विति" ॥

तस्माद्योग्यमेवानुष्ठेयं नायोग्यमिति सिद्धम्. एवं तत्त्वं चेत्तर्हि किमर्थं तपआदेर्विघ्नं कुर्वन्तीति चेन्न. तपआदीनां निष्फलत्वपरिहारार्थत्वात्—

"तथाप्याचरतां कुर्युर्दैत्यानां सुरनायकाः ।
विघ्नं तु तपआदीनां वैयर्थ्यस्यापनुत्तये" ॥

इति वचनात् ॥ ९—१० ॥

वैष्णवो ब्रह्मादिः कर्ता येषां ते तथा तैर्ब्रह्मनिर्मितैरित्यर्थः । "ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतधृत्तथा" इतिशब्दनिर्णये. तथापि साक्षाद्विष्णोः पदमत्रोच्यते इति किं न स्यादत्राह—कालनिर्धूतैरिति । तर्हि कियन्तं कालं स्थिरैरिति तत्राह, कल्पान्तैरिति । मन्वन्तरादिकल्पावसानिकैः "न यत्र माया न रजस्तमश्च" इत्यादिना विष्णोः पदस्य वैलक्षण्योक्तेः ॥ ११ ॥

निर्बन्धमसदाग्रहम् ॥ १२ ॥

ननु, हिरण्यकशिपोरन्येषां पदानि विहाय तव पदाकाङ्क्षायां को विशेषहेतुरत्राह—तवेति । तवासनं सकलदुःखानि निरस्य स्थातुं योग्यं पदं पारमेष्ठ्यं अत्यन्तसुखकारणं यस्मात्तस्मात्ज्जगतां भवाय ज्ञानादिगुणसमृद्ध्यै भूत्यै समृद्धस्य पुनर्ह्रासराहित्याय श्रेयसे संसारान्मुक्तये क्षेमाय रक्षणाय विजयायेन्द्रियजयाय च भवति तस्मादत्युत्तमपदत्वाद्धिरण्यकशिपुरचीक्लृपत्. तदुक्तम्—

"भवाय श्रेयसे चैव न कश्चित्तदपेक्षते !
मधुकैटभयोश्चैव हिरण्यादेस्तथैव च ॥
नान्यो ब्रह्मपदं वाञ्छत्यृजून्योग्यान्विना क्वचित् ।
ततः श्रेयांसि वाञ्छन्ति न तु तत्पदमाप्तये ॥ इति.

भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः ।
वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यते" ॥ इति शब्दनिर्णये.

दिवि स्थातुं न शक्नुमः इत्यतो हिरण्यकशिपुना ब्रह्मपदावाप्त्यै सकामं तपसि स्थितमिति ज्ञायते. यः सकामं तप आचरति तस्य तपसा तत्र लोके स्थितिर्न घटते स्वन्तसकटाहान्तस्थितिवद्यस्तु निष्कामं तपः करोति तेन सुखावाप्तिः स्यात्. तदुक्तम् "सकामन्तु तपः क्रूरं लोकानां क्षोभकृद्भवेत् । इतरच्छान्तये सर्वलोकानां भवति ध्रुवम्" इति. "ब्रह्माणमभजद्ब्रह्मपदार्थं स हिरण्यकः" इति च ॥ १३—१४ ॥

कीचकैरनिलोद्धूतत्वेन स्वनद्वेणुभिः पिपीलिकाभिर्व्याप्तत्वात् क्वचिच्छरीरावयवैर्मेदसा क्वचित्त्वचा क्वचिच्छोणितेन च युक्तम् १५

तपन्तमित्यनेनापि तपसः क्रूरत्वमाह—भासा विततं अहो दैत्यानामयोग्ये वस्तुनि प्रयत्नातिशय इत्यालोच्य हसन् मन्दस्मितं कुर्वन् हंसवाहनो ब्रह्मा "विष्णुपद्मासनावुक्तौ पण्डितैर्हंसवाहनौ" इत्यभिधानम् ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किमन्यैरित्यासुरदृष्ट्या ॥ ११—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथास्माभिर्निवेदितं श्रूयतां सर्वधिष्ण्येभ्यः श्रेष्ठम् ॥ ९ ॥

वर्द्धमानेनेति । सांप्रतिकादपि परमेष्ठिनो मम प्रभावोऽधिको भविष्यतीति भावः । ननु, ब्रह्मणा अतिदीर्घायुषा तपस्तप्त्वा तत्साधितं त्वमेतावदायुष्कं कथन्तत्साधयिष्यसीति तत्राह—कालेति । यद्यप्यायुषोऽल्पत्वे मदीयस्थूलं देहो वा वारंवारं नङ्क्ष्यति तदपि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्तदात्मनः पारमेष्ठ्यासनं साधयिष्याम्येवेति ॥ १० ॥

ततश्च इदं जगदन्यथा विधास्ये इति ये ब्रह्मचर्यतपोव्रतादिभिरिह लोके दुःखिनस्ते परलोकेऽपि नरकभाजो दुःखिनः कर्त्तव्याः ये इह लोके वैषयिकसुखभोगमात्रनिरतास्त एव परलोकेस्वर्गिणः वैषयिकसुखभोगोन्मुख्यमेव पुण्यमिष्टसाधनं च तत्संकोच एव पापमनिष्टसाधनमित्यादिकं प्रवर्त्तनीयम् । नन्वेवं पूर्वपूर्वमहाकल्पेषु न प्रवृत्तं तत्राह—अयथापूर्वमपि ओजसा स्वतेजसा विधास्ये । ननु, स्वेन सिषाधयिषितं पारमेष्ठ्यासनमेव किं सर्वधिष्ण्येभ्यः श्रेष्ठं मन्यसे तत्राह—किमन्यैरिति । वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनं कालनिर्धूतैरिति ध्रुवपदस्यानित्यत्वमननमसुरस्वभावत्वात् ॥ ११ ॥

इति त्वत्पदाहरणे तस्य निर्बन्धं शुश्रुम अत एवायं तपः परममास्थितः ॥ १२ ॥

तव पारमेष्ठ्यमिदमासनं भवाय कीदृशाय श्रेयसे उत्तमसृष्ट्यर्थमित्यर्थः । स चेदिदं प्राप्स्यति तदा विरुद्धं स्रक्ष्यतीति भावः भूत्यै सृष्टानां लोकानां धर्मादिसम्पत्त्यै तदधिकारे त्वधर्मैर्विपत्तिर्भाविनीति भावः । क्षेमाय कल्याणाय विजयाय उत्कर्षाय तदधिकारे तु अकल्याणपराभवावेव भाविनाविति भावः ॥ १३ ॥

यथाविति तर्ह्यधुनैव वरदानैस्तत्तपसो निवर्तयामीत्याशयेन ॥ १४ ॥ १५ ॥

प्रथमं वल्मीकादिभिः प्रतिच्छन्नं तं न ददर्श ततः कथं चित्तं विलक्ष्य प्राहेति द्वयोरन्वयः । आर्चीर्णं समन्ताद्व्याप्तं मेघाच्छादितं रविमिव ॥ १६ ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा तपोयोगयोस्तपश्चित्तैकाग्र्ययोः समाधिना सम्पादनेन परमेष्ठी ब्रह्मा सर्वधिष्ण्येभ्यः श्रेष्ठमिति शेषः । निजासनं सत्यलोकम् अध्यास्ते तिष्ठति ॥ ९ ॥

तथा तपोयोगसमाधिना वर्द्धमाने[illegible]त्वेन तपः[illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्मोवाच ।

उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप ! ।
वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥
अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतम् ।
दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ॥ १८ ॥
नैतत्पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे ।
निरम्बुर्धारयेत्प्राणान्को वै दिव्यसमाः शतम् ॥ १९ ॥
व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् ।
तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ! ॥ २० ॥
ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव ! ।
मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ष्ठ्यासनमात्मनः साधयिष्ये । ननु, तद्धत्तवायुर्नास्तीत्यत आह—कालात्मनोर्नित्यत्वादिति ॥ १० ॥

अहमिदं विश्वमन्यथा परमेष्ठिरचनाप्रकारादन्यप्रकारेण अयथापूर्वं परमेष्ठिनिर्मिताद्विपरीतम् ओजसा स्वतेजसा विधास्ये कल्पान्ते कालनिर्धूतैर्वैष्णवादिभिर्लोकैः किं प्रयोजनम् कालनिर्धूतेषु वैष्णवस्यापि लोकस्य गणना तु तामसीबुद्धियोगात् "अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति श्रीमुखवचनात् ॥ ११ ॥

इति त्वत्पदापहरणे तस्य निर्बन्धं सङ्कल्पं शुश्रुमः अत एव परमं तप आस्थितः यदत्रयुक्तं तदनन्तरमेव विधत्स्व कुरु ॥ १२—१३—१४ ॥

वल्मीकादिभिः प्रतिच्छन्नम् पिपीलिकादिभिः आचीर्णं सर्वतो भक्षितं मेदश्च त्वक्च मांसञ्च शोणितञ्च यस्य तं प्रथमं न ददर्श ॥ १५ ॥

पश्चादभ्रैरपिहितं छन्नं रविमिव विलक्ष्य प्राह ॥ १६—१७ ॥

———

भाषा टीका ।

वह कहता है कि ब्रह्मा अपने तप योग और समाधि के बल से सब लोक से श्रेष्ठ सत्य लोक का अधिष्ठाता हुआ है ॥ ९ ॥

इस वास्ते में भी तप योग और समाधि के बल को बढाकर अपने को सिद्ध करूंगा क्यों कि ? काल का अंत नहीं और आत्मा भी नित्य है ॥ १० ॥

[illegible] पापादि के व्यत्यास करके अन्य प्रकार का ही करूंगा ॥ क्योंकि ? कल्पान्त में काल से नष्ट होने वाले अन्य ध्रुव लोक आदि से क्या प्रयोजन है ॥ ११ ॥

हम लोगों ने उसका ऐसा निर्बन्ध सुना है इसी कारण वह परम तप में स्थित है । आप स्वयं त्रिभुवन के ईश्वर हो जैसा युक्त समुझें तैसा यत्न करें ॥ १२ ॥

क्योंकि ? हे जगत्पते ! आपकी परमेष्ठीपने की गद्दी गौ ब्राह्मणों के वृद्धि सुख ऐश्वर्य पालन और उत्कर्ष के लिये है ॥१३॥

हे नृप ! भगवान् श्रीब्रह्माजी से देवताओं ने जब ऐसे विज्ञापन किया तब ब्रह्माजी भी भृगुदक्षादिकों के सहित दैत्येश्वर हिरण्यकश्यप जहां तप करता था उस आश्रम पर गये ॥ १४ ॥

वहां देखें तो वल्मीक तृण और बांसो से ढका हुआ, और पिपीलिकाओं ने चर लिया त्वक् मेद मांस और रुधिर जिस्का ॥ १५ ॥

और तप से लोकों को तपा रहा, जैसे मेघ से ढका हुआ सूर्य ऐसे उस दैत्य को देखकर हंस वाहन ब्रह्माजी विस्मय को प्राप्त होकर हंसते हुये बोले ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

हृत्सारं धैर्यं दंशैर्मक्षिकादिविशेषैर्भक्षितो देहो यस्य ॥ १८ ॥

निरम्बुर्निषिद्धमम्बु येन सः त्यक्तोदक इत्यर्थः ॥ १९ ॥

ते त्वया अनेन व्यवसायेनैव तावज्जितोऽहम् तपोनिष्ठेन भवता तु सुतराञ्जितः ॥ २० ॥

मर्त्यस्य तवामर्त्यस्य मम दर्शनमफलं निष्फलं न भवति ॥२१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नारद उवाच ।

इत्युक्त्वादिभवो देवो भक्षिताङ्गं पिपीलिकैः ।
कमण्डलुजलेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥
स तत्कीचकवल्मीकात्सह ओजोबलान्वितः ।
सर्वावयवसम्पन्नो वज्रसंहननो युवा ।
उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥
स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् ।
ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आदौ भवतीत्यादिभवो ब्रह्मा औक्षत्प्रोक्षितवान् ॥ २२ ॥

वज्रवत्संहननमङ्गदार्ढ्यं यस्य तप्तस्य हेम्न इवाभा देहकान्तिर्यस्य ॥ २३ ॥

तस्य दर्शनेन महानुत्सवो यस्य ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह—उत्तिष्ठेति । हे काश्यप ! उत्तिष्ठोत्तिष्ठ ते तव भद्रं कुशलमभीष्टमिति यावत् भविष्यति यतस्त्वं तपस्सिद्धः तपसा सिद्धः फलपर्यन्ततपस्सम्पन्नः अत एव च वरदस्त्वदभीष्टदोऽहमनुप्राप्तः "अत ईप्सित इष्टोऽर्थो व्रियतां याच्यताम् ॥ १७ ॥

ते तवैतत् हृत्सारं धैर्यं महदद्भुतमद्राक्षं दृष्टवानस्मि हि यस्माद्दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते अस्थीनि भक्षयन्तास्तिष्ठन्तीत्यर्थः ॥ १८ ॥

पूर्वर्षयो भृग्वादयोऽपि नैवंविधाः तपश्चक्रुः अपरे अर्वाचीना न करिष्यन्तीति किम्पुनर्वक्तव्यम्. को वै पुमान्देवमानेन शतं समाः वर्षाणि निरम्बु त्यक्तोदकं यथाभवति तथा प्राणान्धारयेत् ? न कोपीत्यर्थः ॥ १९ ॥

हे दितिनन्दन ! मनस्विभिर्योगिभिरपि दुष्करेण तेनानेन व्यवसायेनैव तावज्जितोऽहं तपोनिष्ठेन भवता तु सुतराञ्जितः ॥२०॥

यतोऽहं जितस्ततस्ते तुभ्यम् हे असुरश्रेष्ठ ! सर्वा आशिषः इष्टार्थान् ददामि मर्त्यस्य मरणधर्मवतस्ते तव अमर्त्यस्य तद्रहितस्य मम दर्शनमफलसाधनं न भवति किन्तु सफलमेवेत्यर्थः ॥ २१ ॥

इतीत्थमुक्त्वा आदिदेवो ब्रह्मा अमोघराधसा अमोघप्रभावेन दिव्येन कमण्डलुजलेन पिपीलिकैर्भक्षितमङ्गं यस्य तं दैत्यं औक्षत्प्रोक्षितवान् ॥ २२ ॥

ततः प्रोक्षणानन्तरं कीचकाच्छन्नवल्मीकादेधसः काष्ठनिचयाद्विभासुरग्निरिव उत्थितः वल्मीकं भित्वा बहिर्निर्गत इत्यर्थः । कथंभूतः सहसा प्राणबलेन ओजसा इन्द्रियबलेन बलेन देहबलेन चान्वितः तथा सर्वैरवयवैः पाणिपादादिभिः सम्पन्नो युक्तः वज्रवत्संहननमङ्गदार्ढ्यं यस्य स युवा यौवनयुक्तश्च तप्तस्य हेम्न इवाभा यस्य सः तप्तसुवर्णतुल्यकान्तिरित्यर्थः ॥ २३ ॥

एवंविधः उत्थायाम्बरे हंसवाहनमवस्थितमधिष्ठितं देवं ब्रह्माणं निरीक्ष्य स दैत्यस्तस्य ब्रह्मणो दर्शनेन महानुत्सवः सन्तोषो यस्य तादृशः शिरसा भूमौ ननाम ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हृदो हृदयस्य सारं दार्ढ्यं दंशाः सूचीमुखाः शूकाः ते तव अस्थिष्वेव शेरते इति यस्मात्तस्मादद्भुतम् ॥ १८ ॥

इतोत्यद्भुतमित्याह--नैतदिति । निरम्बुर्जलपानरहितः "निर्निश्चयनिषेधयोः" इत्यमरः "स्युरेव तु पुनर्वै वेत्यवधारणवाचकाः" इत्यभिधानाद्वा इत्यनेन दिव्यशतसमास्वेकापि किञ्चिदूना न भवतीत्याह ॥ १९ ॥

इनः समर्थः तेन व्यवसायेन अमनस्विभिर्मनोबलरहितैः दुष्करेण दुस्साधनेन जितो वशीकृतः "पराभूतं वशस्थञ्च जितमित्युच्यते बुधैः" इति शब्दनिर्णये ॥ २० ॥

ददामि दास्यामीतीच्छामि मर्त्यस्य मरणशीलमनुष्यशरीरं प्राप्तस्य ते तव अमर्त्यस्य जरामरणशून्यस्य देवस्य मम दर्शनमभूद्धि यस्मात्तस्मान्निष्फलं नैव ॥ २१ ॥

आदेर्हरेर्भवो जन्म यस्य स तथा विष्णुभूरित्यर्थः । सर्वस्यादौ भवतीति वा औक्षत् प्रोक्षितवान् दिव्यत्वमाह, अमोघेति ॥ २२ ॥

एधसः इन्धनात् ॥ २३ ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्तिष्ठेत्यनेन पूर्वं मूर्द्धस्थितस्य प[illegible]णः [illegible]तः ॥ [illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम्।
हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात् ॥ २५ ॥

हिरण्यकशिपुरुवाच।

कल्पान्ते कालसृष्टेन योऽन्धेन तमसा वृतम्।
अभिव्यनक् जगदिदं स्वयञ्ज्योतिः स्वरोचिषा ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

दंशभक्षितत्वं पूर्वं पिपीलिकाभक्षितत्वं पश्चादिति ज्ञेयम् ॥ ॥ १८—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

दुरत्सारं धैर्यम् ॥ १८ ॥ १९ ॥ २० ॥

असुरजातित्वेऽपि मरणधर्मवत्त्वान्मर्त्यस्य ते मर्त्येन त्वया ॥ २१ ॥

पिपीलिकैरिति । पिपीलिकादंशादिभिरित्यर्थः । आदिभवो ब्रह्मा अमोघमव्यर्थं राधः संसिद्धिर्यतस्तेन औक्षत प्रोक्षितवान् ॥ २२ ॥

वज्रस्येव संहननमङ्गस्य दार्ढ्यं यस्य सः ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

दुरत्सारं धैर्यं दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते तिष्ठन्ति ॥ १८ ॥

निरम्बु निर्जलं यथा स्यात्तथा दिव्यसमाः शतं मानेन शतं सम्वत्सरान् प्राणान् को धारयेत् कोऽपीत्यर्थः ॥ १९ ॥

मनस्विनां मनस्विभिर्दुष्करेण ते तव व्यवसायेन तपोऽर्थसङ्कल्पेन अहं जितः तपोनिष्ठेन भवता तु सुतरां जितोऽस्मीत्यन्वयः ॥ २० ॥

आशिषः वाञ्छितानर्थान् ॥ २१ ॥

दक्षादिप्रजापतिभ्यः आदौ भवो जन्म यस्य सः अमोघराधसा सफलप्रभावेन औक्षितवान् ॥ २२ ॥

राधसो विभावसुरिव तस्मात्कीचकवल्मीकात् सह ओजो बलान्वितः मनइन्द्रियदेहशक्तियुक्तः वज्रस्येव संहननमङ्गदार्ढ्यं यस्य स उत्थितः ॥ २३ ॥

तस्य दर्शनेन महोत्सवो यस्य सः ॥ २४ ॥

भाषा टीका।

ब्रह्मोवाच।

ब्रह्माजी बोले कि [illegible] पुत्र! हे हिरण्यकश्यप! तुम तपसे सिद्ध हुए तुमारा मंगल हो तुम उठो २ हम वरदान देने वाले प्राप्त हुए जो तुमारा इच्छित वर है उसे मांगलो ॥ १७ ॥

हमने तुमारा बड़ा अद्भुत धैर्य देखा देखो तुमारे देह को वन मक्षिकाओं ने भक्षण कर लिया तुमारे प्राण तो अस्थियों में सोरहे हैं ॥ १८ ॥

ऐसा पूर्व ऋषियों ने भी नहीं किया और भी कोई लोग न कर सकेंगे ॥ भला विना अन्न के देवताओं के सौ वर्ष तक कौन प्राण धारण करेगा ॥ १९ ॥

हे दितिनन्दन! मनस्वियों से भी दुष्कर तुमारे इस व्यवसाय से और तप में निष्ठावाले ऐसे तुम से हम जित हुए अर्थात् हार चुके ॥ २० ॥

हे असुर श्रेष्ठ! इसी से हम तुमारी सब कामनाओं को देते हैं तुमारे सदृश मरण धर्म वाले को हम सदृश देवताओं का दर्शन विफल नहीं हुआ करता है ॥ २१ ॥

नारद उवाच

नारदजी बोले, कि—श्रीब्रह्माजी ने ऐसे कहकर पिपीलिकाओंने भक्षण किया अंग जिसका ऐसे हिरण्यकश्यप के शरीरको अमोघ प्रभाव वाले दिव्य कमंडलु के जल से प्रोक्षण किया ॥ २२ ॥

वह हिरण्यकशिपु बांसों के वल्मीक से सह ओज बल से युक्त अवयवों से संपन्न वज्र सदृश पुष्टांग युवा सुवर्ण सदृश कांति वाला ऐसा इंधन से जैसे अग्नि इस प्रकार उठकर खड़ा हुआ २३

वह हिरण्यकशिपु आकाश में स्थित हंस वाहन श्रीब्रह्माजी को देखकर उनके देखने से बड़ा उत्सव युक्त होकर शिर से भूमि में प्रणाम करता हुआ ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हर्षेणाश्रूणि पुलकोद्भेदश्च यस्य सः ॥ २५ ॥

अन्धेन निबिडेन तत्र हेतुः । कालसृष्टेन प्रकृतिगुणक्षोभेण न तु ध्वान्तेन तमसा वृतमिदं जगद्योऽभिव्यनगभिव्यक्तमकरोत् यश्च त्रिगुणेनाऽऽत्मना इदं जगत्सृजत्यवति पालयति लुम्पति संहरति च तस्मै रजःसत्त्वतमसां धाम्ने आश्रयाय महते पराय परमेश्वराय नम इति द्वयोरन्वयः ॥ २६ ॥ २७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति ।
रजःसत्त्वतमोधाम्ने पराय महते नमः ॥ २७ ॥

नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ।
प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥ २८ ॥

त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ।
चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान् भूतगुणाशयेशः ॥ २९ ॥

त्वं सप्ततन्तून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ।
त्वमेक आत्माऽऽत्मवतामनादिरनन्तपारः कविरन्तरात्मा ॥ ३० ॥

त्वमेव कालो निमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥

त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद्व्यतिरिक्तमस्ति ।
विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्र च स्वप्रकाशत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्सृष्ट्यादिकर्तृत्वं परमेश्वरत्वं महत्त्वञ्चेति षड्विधत्वमुक्तम्. तदेव प्रपञ्चयन्नमस्करोति—नमइति चतुर्भिः । बीजाय कारणाय तत्र हेतुः आद्याय ज्ञानं ज्ञप्तिर्विज्ञानं विषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै अनेन स्वप्रकाशत्वं जगत्प्रकाशकत्वञ्च दर्शितम्. बीजायेति निमित्तत्वमुक्तम्. उपादानत्वमाह, प्राणादयो ये विकारास्तैरूपैर्व्यक्तिं कार्याकारमीयुषे प्राप्तवते ॥ २८ ॥

एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितम् महत्त्वमीश्वरत्वं चाह--त्वमिति । त्वमेव जगतो जङ्गमस्य तस्थुषः स्थावरस्य च ईशिषे नियन्ताभवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानांपतिः तासां चित्तस्य चित्तेश्च तत्परिणामभूतायाश्चेतनाया मनसश्च तद्विषयस्यानामिन्द्रियाणाञ्च पतिः अतस्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणामाशयानां तद्वासनानामीशश्च एतेनैव स्रष्टृत्वम् दर्शितम् ॥ २९ ॥

इदानीं यज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह—त्वमेव सप्ततंतूनग्निष्टोमादियज्ञान्विस्तारयसि, कथम् ? त्रय्या तन्वा वेदत्रयरूपेण कथम्भूतया चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म तद्विषयतया विद्यया आत्मवतां प्राणिनामात्मभूतस्त्वमेवान्तरात्मा चान्[illegible]र्यामी कुतः यतः कविः सर्वज्ञः तत्कुतः एकोऽखण्डः तत्र [illegible]तुः अनादिरनन्तपारश्चेति नास्त्यन्तः कालतः पारश्च देशत[illegible] [illegible] सः ॥ ३० ॥

कालरूपेण संहर्तृत्वमाह–त्वमेवेति । लवाद्यैः कालावयवैः क्षिणोषि क्षपयसि तदेवं सृष्ट्यादिकर्तृत्वेऽपि निर्विकारत्वमेवाह, कूटस्थइति. तत्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरः अजो जन्मशून्यः महान् अपरिच्छिन्नः किञ्च जीवलोकएव कर्मवशाज्जन्मादिभिर्विक्रियते त्वन्तु तस्य जीवो जीवनहेतुः यतस्तस्याऽऽत्मा नियन्ता ॥ ३१ ॥

तत्कुतस्तत्राह–त्वत्तइति । त्वत्तोव्यतिरिक्तं यदि किञ्चिद्भवेत्तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं वा भवेत्तत्तु नास्तीत्याह, परं कारणमपरं कार्यम् तत्र चैअज्जङ्गममनेजत्स्थावरञ्च त्वद्व्यतिरिक्तं नास्ति. ननु, मद्बोधकशास्त्रं व्यतिरिक्तमस्तीतिचेन्न यतो विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदङ्गानि तवैव तनवो ननु त्वद्व्यतिरिक्ताः तत्कुतः यतस्त्वं वृहद्ब्रह्मैवासि तदपि कुतस्तत्राह हिरण्यरूपं ब्रह्माण्डं गर्भे यस्य सः त्रिपृष्ठत्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः "अक्षरात्परतः परः" इत्यादि श्रुतेः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तत उत्थाय प्राञ्जलिः बद्धाञ्जलिः प्रह्वः नम्रः दृशा चक्षुषा विभुं ब्रह्माणं निरीक्षमाणः हर्षणाश्रूणि पुलकोद्भेदो रोमोद्गमश्च यस्य तादृशः गद्गदया गिरा अगृणात् अस्तौषीत् ॥ २५ ॥

तदेवाह कल्पान्त इत्यादिनवभिः । तामसत्वाद्ब्रह्माणमेव सर्वकारणं सर्वेश्वरञ्च मत्वा स्तौति. यद्वा, परमेश्वरधर्मारोपेण स्तौति–कल्पान्त इति । कल्पान्ते दैनं दिनकल्पान्ते कालेन निमित्तेन सृष्टेनान्धेन तमसा आवृतमिदं जगत्पुनर्यः स्वयंज्योतिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वप्रकाशरूपः स्वरोचिषा अभिव्यनक् अभिव्यक्तमकरोत् तस्मै नमः इत्युत्तरेणान्वयः ॥ २६ ॥

यश्च त्रिवृता सृष्ट्यादिशक्तित्रयवता आत्मना स्वेनैव इदं जगत्सृजति रक्षति लुम्पति संहरति च तस्मै रजआदिगुणत्रयस्य धाम्ने आश्रयाय पराय सर्वोत्कृष्टाय महते भूरिगुणाय तुभ्यं नमः ॥ २७ ॥

यतएवमत एव आद्याय बीजाय कारणकारणाय ज्ञानविज्ञानमूर्तये शास्त्रविवेकोत्थज्ञानगम्यमूर्त्तये प्राणैरिन्द्रियैरुभयेन्द्रियैः मनसा बुद्ध्या विकारैः पृथिव्यादिभूतैश्च व्यक्तिं कार्यरूपताम् ईयुषे प्राप्तवते तुभ्यं नमः ॥ २८ ॥

एवं कार्यकारणरूपेणावस्थितत्वमुक्तम् अथान्तरात्मत्वमाह—त्वमिति । जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे. अन्तरात्मतया नियमनधारकत्वमाह-प्राणेन मुख्येन मुख्यप्राणेनोपलक्षितस्त्वमेव, मुख्यप्राणनिर्वाहकस्त्वमेवेत्यर्थः । अत एव प्रजापतिः प्रजानां पतिः यत एव मनःपर्यन्तसकलेन्द्रियधारकमुख्यप्राणनिर्वाहकस्ततएव चित्तस्य चित्तवुंद्धेर्मनस इन्द्रियाणाञ्च पतिः निर्वाहकः न केवलं घटादेर्भूतलादिवद्धारकः किन्तु महाभूतानां पृथिव्यादीनां गुणानां शब्दादिगुणग्राहकाणामिन्द्रियाणामाशयस्यान्तःकरणस्य चेशोन्तःप्रविश्य नियन्ताऽन्तःप्रविश्य प्रशासनेन धारक इत्यर्थः ॥ २९ ॥

अन्तरात्मत्वमेव प्रपञ्चयति—सप्ततन्तून् सप्त विधान् तन्तून् तन्यते विस्तार्यन्ते इति तन्तवः वैदिकाः क्रियाः पशुसोमेष्टिसत्राहीनहोमेष्टक चिदांशरूपेण सप्तविधांस्तान्, यद्वा सप्तभिस्तन्यन्ते इति तथा तान्. अध्वर्युहोतृप्रस्तोतृप्रतिहर्तुद्गातृब्रह्मयजमानैः सप्तभिर्वितन्यते इति वा सप्ततन्तवस्तान् सप्त. संस्था वा वितनोषि अन्तरात्मतया प्रवर्त्तयसि. कया त्रय्या वेदत्रयेण कथम्भूतया चतुर्होतृकविद्यया चतुर्होत्रादिसंज्ञकमन्त्रविद्यायुक्तया, अनेन यज्ञादिकर्तृकत्वमन्तरात्मतयोक्तम्. अथोपासनात्मकज्ञानप्रवर्त्तकत्वमाह—आत्मवतां प्रशस्तमनस्कानां योगिनां त्वमेक एवात्मा अन्तरात्मतया योगप्रवर्त्तक इति भावः । त्वमेव सत्यादिवाक्यप्रतिपाद्यस्वरूप इत्याह—अनादीति । अनादिः कालतः परिच्छेदरहितः अनन्तपारः अन्तो देशतः परिच्छेदः पारो वस्तुतः परिच्छेदस्तदुभयं यस्य नास्ति सोऽनन्तपारः अनेनानन्तशब्दार्थउक्तः, कविः सर्वज्ञः अनेन ज्ञानशब्दार्थ उक्तः, अन्तरात्मान्तर्याम्य गतविकारास्पर्शेन नियन्ता त्वमेव, अनेन सत्यशब्दार्थ उक्तः ॥ ३० ॥

अथ कालान्तरात्मतया तन्नियन्तृत्वमाह—त्वमेवेति । त्वमेव अनिमिषः कालः कालशरीरकस्तन्नियन्ता अत एव लवाद्यैः कालावयवैस्त्वमेव जनानामायुर्जीवनं क्षिणोपि क्षपयसि त्वमेव कूटस्थो निर्विकार आत्मा परमात्मा परमेष्ठी निरतिशयस्थानवर्ती अजः कर्मायत्तजन्मादिशून्यः "महानज आत्मा" इति श्रुत्यर्थोऽत्राभिसंहितः । कृत्स्नस्य जीवलोकस्य जीवः जीवयिता आत्मा त्वमेव "कोह्येवान्यात्कः प्राण्यात्" इतिश्रुत्यर्थोऽत्राभिसंहितः॥ ३१ ॥

किंबहुना यत्किञ्चिदेजच्चरम् अनेजत् स्थावरञ्च त्वत्तः परमुत्कृष्टमपरं तुल्यञ्च नास्ति तथा व्यतिरिक्तमत्वदात्मकञ्च नास्ति त्वत्तोऽपकृष्टं त्वदात्मकञ्च सर्वं चराचरं जगदित्यर्थः । एवं रूपस्य तदात्मकत्वमुक्तम्. अथ नाम्नस्तदात्मकत्वमाह—विद्याः वेदाः कलाः उपवेदादयः सर्वाः शब्दात्मिकाः ते तव तनवः शरीरभूताः हिरण्यगर्भोऽसि हिरण्यात्मकं ब्रह्माण्डं गर्भे यस्य तथा भूतोसि "हिरण्यगर्भः समवर्त्तताग्रे" इत्याद्यष्टचंप्रतिपाद्यस्वरूपोसीत्यर्थः । स्वरूपेण गुणैश्च वृहत् त्रयाणां लोकानां पृष्ठो वहिर्भूतः परमव्योमनिलय इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रह्वः प्रवणः ॥ २५ ॥

मिश्रामिश्रभेदेन द्विविधा स्तुतिर्वर्तते तत्र हिरण्यकशिपुर्मिश्रया परोक्षात्मगतया स्तुत्या देवतातृप्तिर्भवतीति तादृश्या स्तौति—कल्पान्त इत्यादिना । अत्र ये चतुर्मुखस्यासम्भाविता गुणास्ते तदन्तर्यामिण्येककार्यत्वेनैकस्थानस्थिते सर्वोत्तमे हरौ योज्याः तद्योग्यास्तत्र योज्याः न चैतावता स्तुतेर्भिन्नाधिकरणत्वमापन्नं तस्य तदधीनत्वेन नित्योपसंह्रियमाणगुणान्तर्भूतत्वेन तच्छ्रवणस्मरणाभ्यामन्तःकरणस्योल्लाससम्भवात्. तदुक्तम्—

"प्रायस्तु स्तुतिशब्देषु मिश्रा वाचो हरिं विना ।
केचिज्जीवगुणास्तत्र तन्नियन्तुर्हरेः परे ॥
एकस्यानेककार्यत्वाद्विष्णोः प्राधान्यतस्तथा ।
जीवस्य तदधीनत्वान्नाभिन्नाऽधिकृतं वचः" ॥ इति.

प्रलयकालप्रवर्तकेन हरिणा सृष्टेनान्धेन तमसा दुर्गाभिमन्यमानेनावृतमिदं जगदभिव्यनक् अभिव्यक्तं कृतवान् स्वरोचिषा स्वसामर्थ्येन ॥ २६ ॥

एतदेव विवृणोति—आत्मनेति । आत्मना क्षोभितया त्रिवृता त्रिगुणात्मिकया तेजोबन्नात्मिकया वा प्रकृत्याचेदं जगत्सर्जनादिक्रियाविशिष्टं करोति तस्मै नम इत्यन्वयः "रजःसत्त्वतमोधाम्ने" इत्यनेन सृष्ट्यादौ रजआदिगुणानां प्राधान्यं सूचयति—पराय महत इत्यनेन । "अणोरणीयान्महतोमहीयान्"इति श्रुतिसिद्धोभयविधानं संस्मारयति दृश्यविषयमानया स्तुत्या किं स्यादिति नाशङ्कयं तथाहि, आत्मना परमात्मना प्रेरितो वा उपादानभूतया प्रकृत्या रजःप्रधानयेदं सृजति सत्त्वप्रधानया जातैर्मन्वादिभिरिदमवति, तमः—प्रधानया जातेन रुद्रेण संहरति, तस्मै महते महत्तत्त्वाभिमानिने पराय रुद्राच्छ्रेष्ठाय भगवते नमः ॥ २७ ॥

आद्याय पुरुषरूपेण जगदादौ व्यक्ताय अन्यत्रादिकर्ता श्रीनारायणस्तस्माज्जाताय वीजाय व्यञ्जकाय फलरूपायेति वा जगदुत्पत्तौ बीजशक्तियुक्ताय वा ज्ञानविज्ञाने एव मूर्तिर्विग्रहो यस्य स तथा तस्मै अन्यत्र ज्ञानविज्ञानयोरुपदेष्टृविग्रहाय प्राणेन्द्रियमनोबुद्धिलक्षणैर्विकारैः सप्तदशकैर्व्यक्तिमीयुषे ब्रह्माण्डान्तर्विराट्पुरुषतयेतिशेषः । उभयत्र समम् ॥ २८ ॥

मुख्येन प्राणेन सह त्वं स्थावरजङ्गमात्मकद्वयोशिषे प्रवर्तकोसि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चित्तस्य चित्तिः स्मरणशक्तिप्रदः साक्षी वा महाभूतानां शब्दादीनामाशयस्यान्तःकरणस्य प्रवर्तकः पुनर्वचनं दैनं दिनप्रवृत्त्यर्थम् २६

त्रय्या तन्वा प्रतिमास्थानीयेन वेदत्रयेण चातुर्होत्राख्यमन्त्रप्रकाश्ये चतुर्होत्रं तद्विषयया विद्यया च सप्ततन्तून् वितनोषि विस्तृत्य करोषि द्रव्यमन्त्रक्रियादेवतास्थत्वेन बहिरुपदेष्टृत्वेन कर्तृत्वेन कारयितृत्वेन शास्त्रेज्यास्तुतिप्रायश्चित्तादिरूपया च "अग्निमीळेपुरोहितं यज्ञस्यदेवमृत्विजं होतारं रत्नधातमम्" इत्यादिश्रुतेः । "यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इति आत्मवतामात्मज्ञानिनां प्रेष्ठः—

"आत्मा प्रेष्ठे स्वरूपे च जीवे ज्ञातरि केशवे ।
वायौ देहे स्वयं स्वान्ते नवसु प्रोच्यते बुधैः" ॥

अनादिः कारणशून्यः पुरातनो वा अनन्तपारोऽप्रमेयोऽव्यये हरावात्मा मनो यस्य स तथा "न भारती मेङ्ग मृषोपलक्ष्यते" इत्यादेरन्यत्राव्ययानां मुक्तानामात्मा स्वामी "असंसार्यव्ययो मुक्त आचिरानन्द उच्यते" ॥ ३० ॥

अनिमिष इत्यनेन नित्यं जाग्रत्स्वभाव उच्यते. कूटस्थो निर्विकारः आत्मा व्याप्तः परमेष्ठी सर्वोत्तमः महानजः ब्रह्मणोऽप्यधिक इत्यनेन सर्वोत्तमत्वं निर्णयति. अन्यत्र आत् जातोऽत एव महानव्यवधानेन तत्पुत्रत्वात् जीवलोकस्य जीवराशेर्जीवः प्राणधारकः "जीव प्राणधारणे" इति धातोः, कथं भक्त इत्यत उक्तम् आत्मेति इष्टादानादिकर्ता "अव सन्तर्पणे" इतिधातोरवतिरूपोयं शब्दः सामान्यविशेषाभ्यां योजनीयः ॥ ३१ ॥

इदानीं भगवत्येव सम्भाव्यमानैर्विशेषणैर्विशिष्टं तदंतर्यामिणमभिष्टौति-त्वमिति । परमतीतमपरमेष्यदपि वर्तमानं यत्किंचिदनेजत् स्थावरमेजज्जङ्गमञ्च वस्तु तत्सर्वं त्वत्तो व्यतिरिक्तं नास्ति त्वयैवांतर्बहिश्च व्याप्तत्वात्. त्वामन्तरेण स्वातंत्र्येण स्थितं नास्तीत्यर्थः "अन्तर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः" इतिश्रुतेः । "सर्वं खल्विदंब्रह्म" इति च—

"परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः ।
तस्मादव्यतिरिक्तस्त्वमित्याहुर्वेदवादिनः" इति. ॥

अतस्त्वत्तो भिन्नं नास्ति किन्तु त्वमेवेत्यर्थो न घटत इत्यत उक्त एवार्थः । ज्ञानं वेदादिविद्ययैव तदवाप्तिरपि तस्यास्त्वत्तनावाश्रितत्वात्त्वदनुग्रहमन्तरेण सुशका नस्यादित्यभिप्रेत्याह—विद्येति । विद्याश्च कलाश्च विद्याकलाः परविद्यापरविद्येति ते तनवः तव वपुषि स्थितत्वात्तथोच्यन्ते कलाः चतुःषष्टिलक्षणा वा विद्या कला वेदाङ्गानीत्यन्यथा प्रतीतिनिरासायाचार्यैर्विद्याश्च कलाश्चेति विगृहीतं एतस्मिन्नर्थे—

"महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः ।
विद्यातनुरितिप्राहुरतस्त्वां तत्त्ववेदिनः" ॥ इति मानञ्चोदाहरति.

तस्मादयमेवार्थइति इदञ्च माहात्म्यं हरेरेव युक्तमित्याह—हिरण्यगर्भ इति. हिरण्मयमण्डं गर्भे उदरे यस्य स तथा गर्भीकृतानन्तब्रह्माण्डत्वात्सन्नाम तवैव युक्तम् "हिरण्यकोशं रजसा परीवृतम्" इति श्रुतेः । हिरण्मयब्रह्माण्डोदराभिव्यक्तत्वाद्वा तन्नामासि. निर्गुणस्य हरेरेते गुणाः कथं सम्भवेयुरत्राह—बृहदिति, गुणपूर्तित्वाद्बृहद्ब्रह्म "अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणाः" इतिश्रुतेः । ननु, तर्हीदं शबलं किं न स्यादत्राह—त्रिपृष्ठ इति । जाग्रदाद्यवस्था अतिक्रम्य स्थितत्वात्त्रिपृष्ठइत्युच्यते त्रयाणां लोकानां पृष्ठे वर्तमान इत्यपव्याख्याननिरासाय तुरीय इत्याचख्युराचार्या इति चतुर्मुखादप्यधिकं विष्णुं जानता हिरण्यकशिपुना तदन्तर्यामियोग्यगुणैरयं ब्रह्मा न स्तूयते किन्त्वन्तर्यामी स्तूयत इति ज्ञापनाय.

तदुक्तम्—

"ब्रह्मणोप्यधिकं विष्णुं जानन्नपि हिरण्यकः ।
ब्रह्माणं तद्गुणैः स्तौति तद्गविष्णुविवक्षया" ॥ इति.

बृहच्चासि महत्तत्त्वात्मकं चासीत्येकदेशीयैरिति व्याख्यातं तत्संप्रदायज्ञैर्हरेर्महत्तत्वात्मकमेवं गुणत्वेन सङ्गच्छत इति निरूप्य "ब्रह्माणन्तद्गुणैः स्तौति तद्गविष्णुविवक्षया" इत्युक्तत्वात् न च तद्व्यापित्वेन तदात्मकत्वमुच्यत इति वाच्यं तर्ह्ययं व्याख्याता चतुर्मुखस्य तदभिमानित्वेन घटतां तस्याप्युक्तदोषानिस्तारादिति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अभिव्यनक् योऽभिव्यक्तमकरोत् त्रीन् गुणान् वृणोति स्वीकरोतीति त्रिवृत् आत्मा तेन ॥ २६ ॥ २७ ॥

प्राणादयो ये विकारास्तैर्व्यक्ति कार्य्याकारम् ईयुषे ॥ २८ ॥

ईशिषे नियन्ता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानां पतिः तासां चित्तस्य चित्तेश्च तत्परिणामभूतायाश्चेतनायाः मनसश्च तन्नियम्यानामिन्द्रियाणाञ्च पतिः तासां महाभूतानां तद्गुणानाम् आशयानां तद्वासनानामीशश्च ॥ २९ ॥

त्वमेव सप्ततन्तून् अग्निष्टोमादियज्ञान् त्रयी वेदत्रयं तद्रूपया तन्वा होता श्रोता उद्गागाता अध्वर्युर्ब्रह्मेति यत्र तच्चातुर्होत्रकं कर्म तद्विषयया विद्यया च आत्मवतां देहिनां आत्मा जीवः अन्तरात्मा अन्तर्य्यामी ॥ ३० ॥

कूटस्थः निर्विकारत्वेन कालव्यापी आत्मा अन्तर्य्यामी जीवलोकस्य जीववच्छरीरस्य जीवाख्य आत्मा, पूर्वश्लोके कर्मप्रयोज्यत्वप्रयोजकत्वाभ्यां कर्मिणामात्मत्वपरमात्मत्वे उक्ते अत्र त्वन्येषां सर्वेषामपि ॥ ३१ ॥

परं कारणं अपरं कार्यं अनेजत् स्थावरं एजत् जङ्गमं विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदङ्गानि ते तवैव तनवः हिरण्यरूपं ब्रह्माण्डं गर्भो यस्य सः बृहत् ब्रह्मैवासि त्रयाणां गुणानां पृष्ठे परतः स्थितत्वात्त्रिपृष्ठः ॥ ३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

व्यक्तं विभो ! स्थूलमिदं शरीरं येनेन्द्रियप्राणमनोगुणांस्त्वम् ।
भुङ्क्षे स्थितो धामनि पारमेष्ठ्य अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रह्वः नम्रः हर्षेणाश्रूणि पुलकोद्भेदो रोमाञ्चश्च यस्य सः अगृणात् अस्तौषीत् ॥ २५ ॥

चतुराननं भगवद्रूपं भगवत्तया स्तौति—कल्पांते इति नवभिः । किञ्च चतुर्मुख एव परमात्मेतिस्वीकारे "सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति भगवदुक्ता तामसीबुद्धिरेव हेतुः अन्धेनातिनिबिडेन तमसावृतमिदं जगत् यः स्वयंज्योतिः स्वप्रकाशः स्वरोचिषाऽव्यनक् प्रादुश्चकार ॥ २६ ॥

त्रीन् गुणान् वृणोति नियम्यतया स्वीकारोतीति त्रिवृत् तेन सृजत्यवति लुंपति च रज आदिधाम्ने आश्रयाय मन इति द्वयोरन्वयः ॥ २७ ॥

आद्याय बीजाय सर्वकारणकारणाय ज्ञानं शास्त्रीयं विज्ञानं तदनुरूपोऽनुभवः तेन मूर्त्तिर्यस्य तदुभयगम्यायेत्यर्थः । प्राणाश्चेन्द्रियाणि च मनश्च बुद्धिश्च विकाराः पृथिव्यादिभूतानि च तैर्व्यक्ति विराड्रूपमीयुषे नमः ॥ २८ ॥

प्राणेन मुख्येन सर्वेन्द्रियनायकेन सहितस्य जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे ईशिता नियन्ता भवसि प्रजानां पतिः चित्तस्य चित्तेर्बुद्धेर्मनसः इन्द्रियाणाञ्च पतिः भूतानां खादीनां गुणानां शब्दादीनामाशयस्याहङ्कारस्य च ईशः अत एव महान् सर्वश्रेष्ठः ॥ २९ ॥

त्वमेव सप्ततन्तून् तन्वन्ते विस्तार्यंते इतितन्तवस्तान् अग्निष्टोमादियज्ञान् चतुर्होत्रकविद्यया चत्वारोहोतारः होता उद्गाता अध्वर्युः ब्रह्मेति यत्र तच्चतुर्होत्रकं कर्म तत्प्रकाशकया विद्यया त्रय्या वेदत्रयरूपया तन्वा वितनोषि आत्मवतां देहवतां त्वमेक आत्मा आधारः अन्तरात्मा अन्तर्यामी च अनादिः कारणशून्यः नास्ति अन्तः कालतः पारो देशतो यस्य सः यद्वा अनन्तो निरवधिकस्वरूपः पारोऽन्येषामवधिभूतः स चासौ सचेत्यर्थः । कविः क्रान्तदर्शी सर्वविदित्यर्थः ॥ ३० ॥

कालादीनां परमात्मशक्तित्वेन तदनतिरिक्तं वदन् परमात्मनः सर्वात्मत्वं दर्शयति—त्वमेव काल इत्यादिना । त्वमेव लवाद्यवयवैर्जनानामायुः क्षिणोषि अतः कालोऽसि स्वयं तु कूटस्थः अक्षीणः आत्मा परमात्मासि यतो अजो कर्मनिमित्तजन्मशून्यः परमेष्ठी परमलोकस्थः अत एव महान् सर्वपूज्यः जीवलोकस्य बद्धजीवानां लोकस्य कार्यकारणरूपस्याचेतनपदार्थस्य आत्मा आश्रयः चकाराज्जीवलोकश्च त्वमेवासि जीवःचेत्रज्ञश्च त्वमेवासि ॥ ३१ ॥

त्वत्तः परं कारणं प्रकृत्यादिरूपमपरं कार्यं महदादिरूपमेजचेतनमनेजदचेतनञ्च व्यतिरिक्तं नास्ति भवतः सर्वात्मत्वात् विद्या वेदाद्याः कलास्तदङ्गानि ते तनवः तन्यन्ते विस्तार्यन्ते इति तनवः त्वन्निश्वासादिरूपा इत्यर्थः । हिरण्यं ब्रह्माण्डं गर्भस्यान्तः प्रविष्टं यस्य सोसि बृहत् विपुलस्वरूपोसि एवंभूतोपि त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके स्थितः मादृशानां हितायेति शेषः ॥ ३२ ॥

भाषा टीका ।

हिरण्यकशिपु भी उठकर नम्र हो हाथ जोड़ दृष्टि से ब्रह्माजी को देखता हुआ मारे हर्ष के अश्रु और रोमांच वाला गद्गद वाणी से स्तुति करने लगा ॥ २५ ॥

हिरण्यकशिपुरुवाच ॥

हिरण्यकशिपु बोला, कि,—कल्पके अंत में काल से सृष्ट ऐसे अंधतम से ढके हुए इस जगत को जिस स्वयं ज्योति ने अपनी कांति से प्रकाशित किया ॥ २६ ॥

और जो अपने त्रिगुण आत्मा से इस जगतको सृजता पालता और संहार करता है ऐसे त्रिगुण धाम परमेश्वर को नमस्कार है ॥ २७ ॥

आद्यबीज रूप ज्ञान विज्ञान मूर्ति और इन्द्रिय मन बुद्धि के विकारों से व्यक्ति को प्राप्त होने वाले ऐसे आपको नमः ॥ २८ ॥

आपही मुख्य प्राण रूप से स्थावर और जंगमों के नियंता हो। और प्रजाओं के पति हो, तथा चित्त चेतना मन और इन्द्रियों के पति हो, महान् हो, भूतगुण और आशय (अंतः करण) के ईश हो ॥ २९ ॥

आपही (चातुर्होत्रक विद्या) अर्थात् चार हवन करने वाले जिसमें ऐसे कर्म को प्रति पादन करने वाली त्रयी (वेदत्रयी) रूप तनु से अग्निष्टोमादियज्ञों का विस्तार करते हैं ॥ और आपही प्राणियों के अंतर्यामी आत्मा हैं. क्योंकि ? आप सर्वज्ञ होकर आद्यन्तसे रहित हैं ॥ ३० ॥

आपही बिना निमेष वाले काल हो जनों की आयु को लवालव आदि अवयवों से क्षीण करते हो। आप कूटस्थ आत्मा परमेष्ठी अज महान् और जीवों के जीव और नियंता हो ॥ ३१ ॥

जो कुछ पर अपर स्थावर जंगम जगत है सो आप से व्यतिरिक्त कुछ भी नहीं, सर्व विद्या और कला आपका तनू हैं आप हिरण्यगर्भ हो, और त्रिगुणात्मक ब्रह्मांड के ऊपर पृष्ठ पर-स्थित हो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, ब्रह्माण्डशरीरस्य जीवस्य मम कुतो ब्रह्मत्वं कुतोवा ब्रह्माण्डगर्भत्वादि ? तत्राह,व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा येन शरीरेण त्वमिन्द्रियप्राणमनसां गुणान्विषयान्भुङ्क्षे किञ्च पारमेष्ठ्ये पारमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे नत्वस्मदादिवत्स्वरूपतिरोधानेन अतस्त्वमव्यक्त आत्मा निरुपाधिर्ब्रह्मैव पुराणः पुरुषश्चेत्यर्थः ॥ ३३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्ताव्यक्तरूपेण येनेदमखिलं ततम् ।
चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥
यदि दास्यस्यभिमतान् वरान्मे वरदोत्तम ! ।
भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो ! ॥ ३५ ॥
नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः ।
न भूमौ नाम्बरे मृत्युर्न नरैर्न मृगैरपि ॥ ३६ ॥
व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः ।
अप्रतिद्वन्द्वतां युद्धे ऐकपत्यं च देहिनाम् ॥ ३७ ॥
सर्वेषां लोकपालानां महिमानं यथात्मनः ।
तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
सप्तमस्कन्धे हिरण्यकशिपोर्वरयाचनंनाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य ? तत्राह—अनन्तइति । हे अनन्त, येन त्वया व्यक्तेन मनोवचनागोचरेण रूपेणेदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवते अचिन्त्यैश्वर्याय नमः भगवत्त्वे हेतुः चिदचिच्छक्तियुक्ताय चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति ॥ ३४ ॥ ३५ ॥

अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि आयुधैर्मृत्युर्माभूत् ॥ ३६ ॥

व्यसुभिरप्राणैः असुमद्भिः सप्राणैः यथा आत्मनस्तवास्ति महिमा तथाऽप्रतिद्वन्द्वतादिकं देहीतिशेषः ॥ ३७ ॥

तपसा योगेन च प्रभावो येषां तेषां यदणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तम् कृत्स्नस्य तच्छरीरत्वं तस्य सर्वान्तरात्मत्वञ्च तदुपसंहरन्नमस्करोति—व्यक्तमिति द्वाभ्याम् । हे विभो देव ! स्थूलं चिदचिदात्मकमिदं जगत्तव व्यक्तं शरीरं, स्थूलशरीरमित्यर्थः । तर्हि किं सूक्ष्मं शरीरम् ? तत्राह—अव्यक्तः प्राकृतैरिन्द्रियैरगम्यः

आत्मा सर्वान्तरात्मा जगत्कारणपुरुषः एवंविधस्त्वं येन शरीरेण चतुर्मुखशरीरेण पारमेष्ठ्ये स्थाने स्थितः इन्द्रियादीनां गुणान्विषयान् शब्दादीन् भुङ्क्ते, तत्सूक्ष्ममिति शेषः । येन शरीरेण जीवानामिन्द्रियादीन् सृष्ट्वा तद्व्यापाराँल्लीलारसत्वेन भुङ्क्ते अनुभवसि तत्सूक्ष्मं शरीरमित्यर्थः ॥ ३३ ॥

अनन्तं त्रिविधपरिच्छेदरहितमतीन्द्रियं यत्स्वरूपं तदनन्ताव्यक्तरूपं येनानन्ताव्यक्तरूपेण इदमखिलं जगदन्तरात्मतया ततं व्याप्तं तस्मै चिदचिच्छक्तिभ्यां कार्योपयुक्तापृथक्सिद्धस्वविशेषेण भूताभ्यां चेतनाचेतनाभ्यां युक्ताय, तच्छरीरकायेत्यर्थः । भगवते पूर्णषाड्गुण्याय तुभ्यं नमः ॥ ३४ ॥

एवं परमात्मत्वाभिमानेन तद्धर्मारोपेण वा तद्गुणयुक्तत्वेन परम् आवेशावताररूपं ब्रह्माणं स्तुत्वाऽथ वरान्वृणुते—यदीति । हे वरदश्रेष्ठ ! यदि ममाभिमतान् वरान्दास्यसि तर्हि तावत्त्वया सृष्टेभ्यो भूतेभ्यः सकाशान्मम मृत्युर्मरणं माभूत् एवमनुगृहाणेत्यर्थः । विष्णोरपि चतुर्मुखसृष्टत्वाभिमानेन त्वद्विसृष्टेभ्य इत्युक्तम् ॥ ३५ ॥

तथान्तः गृहादीनामन्तः तेभ्यो बहिः दिवा अह्नि नक्तं रात्रौ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तात् त्वत्तोऽप्यायुधैरपि भूमौ पृथिव्याम् अम्बरे चाकाशे मृगैर्नरैश्च ॥ ३६ ॥

व्यसुभिरप्राणैः असुमद्भिः प्राणिभिश्च सुरैरसुरैर्महोरगैर्महासर्पैश्च मम मृत्युर्माभूत् अयमेको वरः । वरान्तरञ्च याचते—अप्रतिद्वन्द्वतामिति । युद्धे अप्रतिद्वन्द्वताम् अप्रतिपक्षताम्. अयं द्वितीयः । देहिनां प्रजानामैकपत्यमेकाधिपतित्वम्. अयं तृतीयो वरः ॥ ३७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तथा आत्मनो मम सर्वेषां लोकपालानाम् इन्द्रादीनां महिमानं माहात्म्यम्. अयं चतुर्थः । किञ्च तपसा योगेन च प्रभावो येषां तेषां योगिनां यन्न रिष्यति न नङ्क्ष्यति अणिमाद्यैश्वर्यं तदपि देहीति शेषः । पञ्चमोऽयं वरः ॥ ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानानन्दादिलक्षणगुणमूर्तिं निरूप्याधुनाव्यक्तमूर्तिं निरूपयति—व्यक्तमिति । हिरण्यगर्भ इत्यनेन ब्रह्माण्डस्य शरीरस्थानीयत्वं सूचितम्, तत्र तिष्ठन् हरिः सुखलक्षणान् गुणान् भुंक्ते न तु देवदत्तवद्दुःखलक्षणानित्यतो वाह--व्यक्तमिति । पारमेष्ठ्ये धामनि वैकुण्ठादिस्थाने सत्यलोके वा स्वरूपभूते महिम्नि वा स्थितः पुराणः पुरुषस्त्वं येन शरीरेणेन्द्रियप्राणमनसां गुणान्विषयानेव भुंक्ते न तु दुःखलक्षणान्,कुत एतत् ? अत्राहात्मेति "एष ह्यानन्दमादत्ते त आत्मेति" इतिश्रुतेः । आनन्दस्वभावत्वात्. तर्हि तद्विषयज्ञानं कथं नोत्पद्यते ? इति तत्राह—अव्यक्त इति ।"तदव्यक्तमाहाहि" इति सूत्रात्. हे विभो, तदिदं व्यक्तं ब्रह्माण्डलक्षणं तव स्थूलशरीरमाचक्षत इति शेषः । यद्वाऽनेन महात्म्यमेव तद्योग्यैर्विशेषणैः स्तौति. तथाहि, पुरं शरीरमणतीति पुराणः आत्मेत्यभिधानादात्मा चतुर्मुखः अवतारेषु व्यक्तिर्नास्तीत्यव्यक्तः जगत्सृष्ट्याद्यैश्वर्यलक्षणान् गुणान् इतरत्स्पष्टम् ॥ ३३ ॥

स्थावरजङ्गमाख्यं जगत्त्वद्व्यतिरिक्तं नास्ति त्वया व्याप्तत्वादित्यर्थतो व्याप्तिरुक्ता. तदिदं कीदृशेन रूपेण व्याप्तमिति मन्दाशङ्कापरिहाराय स्पष्टमाह—अनन्तेति। अनेन परिच्छिन्नस्य सर्वस्यापरिच्छिन्नाद्धरेर्बहिष्ठं युक्तिविरुद्धमित्युक्तं भवति "तम आसीत्तमसा गूढमग्रे" इति श्रुतेः । प्रकृत्या व्याप्तत्वप्रतीतेः कथं हरेरेवेति शिष्योक्तिर्घटते ? इति । तत्राह—चिदचिदिति। शक्तिपदस्य द्विरावृत्तिः कर्तव्या " शक्तपत्याच्छक्तयो भार्याः " इति वचनात् उभयविधा या शक्तिः प्रकृतिस्तस्याः या कार्येषु शक्तिस्तस्या अपि भगवच्छक्त्यविनाभूतत्वात्तद्व्याप्तिस्तन्नियतेत्यत एव युक्तायेत्युक्तं न चानेन गुणभूतत्वं हरेरिति वाच्यम् 'शिष्येणोपाध्याय आगतः' इत्यत्रोपाध्यायप्राधान्यवदुपपत्तेः। ननु, लोके प्रतिवस्त्वेकनियतत्वादर्शनात् चिदचिदात्मकप्रपञ्चे कस्यचित्तदनियतत्वसम्भवेन स्वातन्त्र्येण सर्वव्याप्तत्वं हरेः कथं युज्यते? इत्यतो वाह—चिदचिदिति, " द्रव्यं कर्म च कालश्च" इत्यादेः परमाणुमात्रवस्तुनोऽपि भगवदनियतत्वासम्भवात् एतादृशी शक्तिरस्यास्तीति कुत इत्यत उक्तं भगवत इति उक्तार्थपदम् "भूयिष्ठां ते नम उक्तिं विधेम " इति वाक्यार्थं स्मरता हिरण्यकेन नम इत्युक्तं तदुक्तेः फलाधिकत्वात् ॥ ३४ ॥

किं बहुनोक्तेन त्वदभीष्टं ददेत्याशङ्कित आह—यदीति । विविध-

अन्यस्मादपि कालात् अथवा भावात् अवयवविशिष्टात् भूतेभ्य इत्युक्तेऽन्येभ्यः किमित्यतो विशिनष्टि—न नरैरिति ॥ ३६ ॥

व्यसुभिर्विगतप्राणैः पाषाणादिभिः असुमद्भिर्मोहादिभिः ऐकपत्यं ऐकाधिपत्यम् ॥ ३७ ॥

महिमानं वृण इति शेषः । आत्मनस्तव यो महिमा स यथा न रिष्यति न नश्यति तथा मम महिमाऽस्तु यो महिमा यथा कर्हिचित् न रिष्यति तथात्मनो मम महिमा न नश्यत्विति- चेति ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वत्त इत्यस्य टीकायां वेदोपवेदादीत्यादि व्याख्यानात्. विद्याः कला इति द्वन्द्वसमासः अतो विद्याः कलाश्चेति पाठो न सभ्यः ॥ ३२ ॥ ३३ ॥

अनन्तेत्यस्य टीका वैष्णवसिद्धान्तानुगता तत्र चिच्छक्तिः स्वरूपभूता अचिच्छक्तिर्मायेति ज्ञेयम् ॥ ३४ ॥

अमरत्ववरो न प्राप्यत इति छलेन तं वृणुते—यदीति । त्वाद्विसृष्टेभ्यः साक्षात् त्वत्सृष्टेभ्यः ॥ ३५ ॥

अन्यस्मात् रुद्रप्रजापत्यादिसृष्टादित्यर्थः । ब्रह्मत उपर्यन्यामननात्. पुनः कर्तृगणं निषेधयति । न नरैरिति पादत्रयेण भगवतोऽप्राकृतप्राणत्वाद्व्यसुभिर्वासुमद्भिर्वेति तत्रैव सङ्गस्यते कर्तृकरणात् न चैतत्करणं निषेधपरम् अप्राणिभिः प्राणिभिर्वेत्युक्ते तस्यैव प्राप्तत्वात् । हन्तुर्जीवदेहस्यास्येऽपि सप्राणभागाद्विष्कान्तस्य कर्तनीयनखाग्रभागस्य त्यक्तप्राणत्वाच्च श्रीभगवति तु तन्निषेधितं श्रीरुक्मिण्यादिष्वा "त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तः" इत्यादिना प्राकृतानां निन्दयाऽप्राकृतानां तेषामानन्दरूपत्वं साधितम्. अत उक्तं वाराहे "न तस्य प्राकृता मूर्तिर्मेदोमज्जास्थिसम्भवा" इत्यादि ॥ ३६—३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीम-
ज्जीवगोस्वामिकृतक्रमसन्दर्भे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

व्यक्तं वैराजरूपं तव स्थूलं येन शरीरेण त्वमिन्द्रियप्राणमनसां गुणान् विषयान् भुंक्षे किन्तु पारमेष्ठ्ये परमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे न तु स्वरूपतिरोधानेन अतस्त्वमव्यक्तो ब्रह्मा आत्मा अन्तर्यामी पुराणपुरुषो भगवांश्च ॥ ३३ ॥

चिच्छक्तिरन्तरङ्गा स्वरूपभूता अचिच्छक्तिर्माया गुणमयी बहिरङ्गा ताभ्यां गुणातीतगुणमयलीलार्थं युक्ताय ॥ ३४ ॥

नन्वलमेतावत्या स्तुत्या वरांस्तावद्गृहाण तत्राह—यदीति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हिरण्यकशिपोरयमाशयः यद्यहममृत्युर्भूयासमिति वरं याचिष्ये तदा वरोऽयमसंभव एव यतः कल्पान्ते वयं ब्रह्मादयोपि मरिष्याम एवेति मद्वरं प्रत्याख्यास्यत एव तस्मादेवं युक्त्या वरं वृणोमि यत फलतोऽमरत्वमेव प्राप्तं भविष्यतीति त्वद्विसृष्टेभ्यः इति सर्वेषां भूतानां ब्रह्मसृष्टत्वादपरः कोऽवशिष्ट इति भावः ॥ ३५ ॥

मृत्युः स्वतोपि सम्भवेदत आह—नांतर्बहिर्दिवा नक्तमिति । सर्वदेशकालनिषेधेन स्वाभाविको मृत्युर्वारितः साकारो वराहादिरूपो विष्णुर्ब्रह्मसृष्ट एव स तु निराकारस्सन् यदि चक्राद्यस्त्रं चालयेत्तर्ह्यनर्थं इत्याशङ्क्याह—अन्यस्मादपि आयुधैर्न मृत्युः अन्तर्बहिःशब्दाभ्यां सर्वदेशस्य प्राप्तत्वेपि तयोः सम्बन्धिशब्दत्वेन प्रतियोगिविशेषोपस्थापकत्वेऽनर्थं इत्याशंक्य पुनर्देशं निषिद्धयति न भूमाविस्यनेन सप्तपातालानाम् अम्बरे इत्यनेन सप्तस्वर्गाणां च निषेधः, पुनर्दक्षादिसृष्टभूतेभ्यो भयमाशङ्क्याह—न नरैरिति ॥ ३६ ॥

सर्वजीवजातीनामुल्लेखनाऽशक्यत्वादाह—व्यसुभिः प्राणहीनैः असुमद्भिः प्राणसहितैः ॥ ३६ ॥

एवं वस्तुतोऽहममरएवाभूवमिति मत्वा वरान्तरं वृणोति अप्रतीति ॥ ३७ ॥

यथा आत्मनस्तवास्ति तथा तपोयोगाभ्यां प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्य्यं न रिष्यतिनं नश्यति तञ्च देहीति ॥ ३८॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
सप्तमे च तृतीयोऽयं सङ्गतः सङ्गतःसताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पारमेष्ठ्ये धामनि सत्यलोके स्थितः येन स्थितिरूपेण हेतुना अव्यक्तः पुराणः पुरुषस्त्वम् व्यक्तं स्थूलमिदं शरीरं वैराजम् इन्द्रियप्राणमनसां गुणांश्च गुङ्क्षेऽनुभवसि ॥ ३३ ॥
चिज्जीवरूपा अचित्कालादिरूपा ताभ्यां युक्ताय नमः ॥ ३४ ॥
त्वद्विसृष्टेभ्यः त्वन्निर्मितेभ्यः ॥ ३५ ॥
अन्यस्मात्त्वत्सदृशादपि ॥ ३६ ॥
व्यसुभिः प्राणहीनैः असुमद्भिः सप्राणैः ॥ ३७ ॥
लोकपालानां तपोयोगाभ्यां प्रभावो येषां तेषां मुनीनाञ्च आत्मनः स्वस्य च यत् येन लब्धेन कर्हिचिदपि न रिष्यति न हीयते, जन इति शेषः। तादृशं महिमानं देहि ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका ।

हे विभो! यह व्यक्त (कार्यरूप) आपका स्थूल शरीर है जिस शरीर से आप इन्द्रिय प्राण और मनके गुणों (विषयों) को पारमेष्ठ्य धाम में स्थित होकर भोगते हो, और आप साक्षात् अव्यक्त आत्मा पुराण पुरुष हो ॥ ३३ ॥

अनंत अव्यक्त रूपसे जिन आप से यह सब जगत् व्याप्त हो रहा है चेतन अचेतन शक्ति युक्त उस परमात्मा भगवान को नमस्कार हो ॥ ३४ ॥

हे वरदोत्तम ! यदि आप मुझे अभीष्टवर देते हो तो हे प्रभो! तुमारे रचे हुए प्राणियों से मेरी मृत्यु न हो ॥ ३५ ॥

और भीतर बाहर दिन में रात मे और किसी से तथा आयुधों से, भूमि में आकाश में मनुष्यों से मृगों से भी मेरी मृत्यु न हो ॥ ३६ ॥

विना प्राण वालों से अथवा प्राणवालों से मृत्यु न होवै और देवता असुर और महोरगों से युद्ध में अप्रतिद्वंद्वता को प्राप्त होजाऊं अर्थात् इनसे न हारूं और प्राणि मात्र का एक पति होजाऊं ॥ ३७ ॥

तप और योग से है प्रभाव जिनका ऐसे लोक पालों की जो महिमा और जो कभी किसी प्रकार नष्ट न हो ऐसी आपकी महिमा को भी दीजिये ॥ ३८ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध
हिरण्यकश्यप वरयाचन
तृतीयाध्याय समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ चतुर्थोऽध्यायः ॥

नारद उवाच ।

एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ।
प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥

ब्रह्मोवाच ।

तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम ।
तथाऽपि वितराम्यङ्ग ! वरान् यदपि दुर्लभान् ॥ २ ॥
ततो जगाम भगवानमोघाऽनुग्रहो विभुः ।
पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥
एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ।
भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥
स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः ।
देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान् ॥ ५ ॥
सिद्धचारणविद्याध्रानृषीन् पितृपतीन्मनून् ।
यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥ ६ ॥
सर्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ॥ ७ ॥
देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ।
महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा ।
त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थे तु वरॉँल्लब्ध्वा विजित्याखिललोकपान् ।
विष्णुद्वेषेण तान्सर्वान् दैत्येन्द्रः समपीडयत् ॥ १ ॥
शतधृतिर्ब्रह्मा ॥ १ ॥
मम मत्तः यदपि यद्यपीमे दुर्लभाः ॥ २ ॥
अमोघोऽनुग्रहो यस्य प्रजेश्वरैर्मरीच्यादिभिः ॥ ३ ॥
...............एवमित्यादिना ॥ ४—६ ॥
सर्वेषां सत्त्वानां प्राणिजातानां ये ये पतयस्तान् ॥ ७ ॥
त्रिविष्टपं स्वर्गमध्यास्ते स्माधिष्ठितवान् तत्र स्वर्गेऽपि महेन्द्रभवनमध्युवासाधिवसति स्म ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन वृतान् वरान् ददौ ब्रह्मेत्याह भगवान्नारदः—एवमिति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमित्थं वृतो याचितः शतधृतिर्ब्रह्मा हिरण्यकशिपोस्तपसा तोषितः तस्य दुर्लभान्वरान् प्रादात्॥ १॥

दत्त्वेदमाह ब्रह्मा—हे तात! मम मत्तो यान्वरान् वृणीषे ते इमे वराः पुंसो यद्यपि दुर्लभाः तथापि दुर्लभानपि तान्वरान् अङ्ग हे हिरण्यकशिपो! तुभ्यं वितरामि वर्त्तमानसामीप्ये लट् दत्तवानस्मीत्यर्थः॥ २॥

एवमुक्त्वा अमोघः सत्योऽनुग्रहो यस्य स विभुर्भगवान् ब्रह्मा असुरवर्येण पूजितः प्रजेश्वरैर्भृगुदक्षाद्यैः स्तूयमानः स्वस्थानं जगाम॥ ३॥

एवं लब्धा वरा येन स दैत्यो हिरण्यवत्प्रकाशबहुलं देहं बिभ्राणो भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतं स्मरन् भागवतद्वेषसहितं भगवति द्वेषमकरोत्॥ ४॥

तदेव प्रपञ्चयितुमुपोद्घातमाह--स इत्यादिना। स महासुरो हिरण्यकशिपुस्त्रींल्लोकान् सर्वा दिशश्च विजित्य तथा देवादीन् सर्वसत्त्वपतीन्सर्वभूताध्यक्षांश्च जित्वा वशमानीय विश्वजिदूबभूव लोकपालानां तेजसा सह स्थानानि जहारापहृतवान्॥ ५—७॥

देवोद्यानञ्च जहारेत्यनुषङ्गः श्रिया सर्वसमृद्ध्या जुष्टं युक्तं त्रिविष्टपं स्वर्गमध्यास्तेस्म अधिष्ठितवान् "अधिशीङ्स्थासां कर्म" इति कर्मत्वम्. विश्वकर्मणा निर्मितं त्रैलोक्यलक्ष्म्या आयतनमाश्रयं भोग्यभोगोपकरणादिसर्वसमृद्धिमन्महेन्द्रस्य भवनं साक्षाद्ध्युवास अध्युषितवान्॥ ८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वरदानादिना सम्भूतं लवणाब्धिजलवृद्धिह्रासवत् क्षणिकं भगवद्भक्तैश्वर्यं श्रीनारायणप्रसादाविर्भूतमनन्तकालीनं शाश्वतं स्यात्तदेवापायं बुभूषुभिरित्यादितात्पर्यं निरूप्यते कतिपयैरध्यायेषु, तत्र हिरण्यकशिपवे ब्रह्मवरदानप्रकारं तेनास्य सर्वविजयप्रकारञ्च निरूपयति-एवं वृत इत्यादिना। अथशब्देन न केवलं ब्रह्मणो वरदानमेवोच्यते अपि तु हिरण्यकशिपुविषया कथा साकल्येन कथ्यत इति सूचयति॥ १॥

मम सकाशाद्यदपि दुर्लभान् अन्ततो दुःखप्रापकान् "दुरशोभनदुःखयोः" इति यादवः॥ २॥

भगवान् पूज्यः अत्र प्रतिक्षणं दृष्टश्रुतविस्मरणशीलानां मन्दानां स्फुरणार्थं कृतव्याख्यानानां पदानां पुनरपि तथा वचनं न दोषाय तदर्थं हीदं प्रवृत्तमिति, अमोघानुग्रहः योग्यानामितिशेषः॥ ३॥

समग्रैश्वर्यादिगुणरत्नाकरे परे द्वेषमकरोदसुरावेशाज्जयांशत्वेन स्वतोभक्तोपीति तात्पर्यम्, तदुक्तम् "स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विषः" इति "परोरिपरमात्मनोः" इत्यभिधानादत्र परः शत्रुरसुरः तदावेशादित्यर्थः॥ ४॥ ५॥ ६॥

सर्वसत्त्वपतीन् सिंहादीन् बलश्रेष्ठान्वा किं बहुना विश्वं चराचरं विजितवानिति तेजसा प्रभावेन सह जहार॥ ७॥

त्रिविष्टपं स्वर्गं स्वर्गे त्रीणि स्थानानि सन्ति ततोपि श्रेष्ठं महेन्द्रभवनममरावतीनाम तत्स्थानापेक्षया साक्षात्तुरीयमित्युच्यते "साक्षात्प्रत्यक्षतुर्ययोः" इत्यभिधानात्. अत एवाखिलर्द्धिमदित्युक्तं साक्षात्प्रत्यक्षमध्युवासेत्यनेन वा सङ्गमयितव्यं त्रीणि विष्टपानि स्थानानि सकलसमृद्धिमन्त्यस्मिन्निति त्रिविष्टपशब्दार्थपर्यालोचनयाऽयमर्थस्सम्पद्यते त्रिदिवपदस्याप्ययमेवार्थः अन्यथा त्रिशब्दस्य गतिर्वक्तव्येति॥ ८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १-२४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

वरान् लब्ध्वा द्विषन् विष्णुं देवदेवानिरास सः।
प्रल्हादस्यगुणाः प्रेमभक्त्युत्थस्तुर्ये ईर्यते॥
हिरण्यकशिपोः हिरण्यकशिपुना तस्य तस्मै॥ १॥

यदपि यद्यपीमे दुर्लभास्तदपि इमान् दुर्लभान् वितरामीति व्यवहितान्वयः सोढव्यश्चेदेवं व्याख्येयं वरान् कीदृशान् यतां प्राप्नुवतामपि दुर्लभान् यान् प्राप्यापि न प्राप्नुवन्ति तानित्यर्थः॥ २——४॥

गरुडा गरुडजातयः पक्षिणः॥ ५॥ ६॥ ७॥ ८॥ ९॥ १०॥ ॥ ११॥ १२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

लब्धवरस्य हिरण्यकशिपोर्भगवति द्वेषं तत्पुत्रस्य प्रह्लादस्य च भक्तिं चतुर्थेऽध्याये श्रीनारदो वर्णयति—एवमिति। शतधृतिर्ब्रह्मा॥ १॥

मम मत्तो यान् वृणीषे ते इमे यद्यपि दुर्लभास्तथापि वितरामि तुभ्यं ददामि॥ २॥

अमोघः सत्योऽनुग्रहो यस्य स विभुर्विपुलज्ञानः॥ ३॥

हेममयं सुवर्णवत्प्रकाशमानम्॥ ४॥

स दिग्गजादीन् विजित्य लोकपालानां तेजसा सह स्थानानि जहारेति चतुर्थेनान्वयः॥ ५—६॥

सर्वेषां सत्त्वानां प्राणिजातीनां पतीन् जित्वा वशमानीय एवं विश्वजित् सन् लोकपालानामिन्द्रादीनां तेजसा तत्तन्महिम्ना सह स्थानानि जहाराऽपहृतवान्॥ ७॥

देवोद्यानानां श्रीभिर्जुष्टं त्रिविष्टपं देवलोकमध्यास्ते स्म अधिष्ठितोऽभूत् तत्रापि साक्षान्महेन्द्रभवनमध्युवासेत्युत्तरेणान्वयः॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र विद्रुमसोपाना महामारकता भुवः ।
यत्र स्फाटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः ॥ ९ ॥
यत्र चित्रवितानानि पद्मरागासनानि च ।
पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः ॥ १० ॥
कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः ।
रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम् ॥ ११ ॥
तस्मिन्महेन्द्रभवने महाबलो महामना निर्जितलोक एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥
तमङ्ग ! मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥ १३ ॥
जगुर्महेन्द्रासनमोजसा स्थितं विश्वावसुस्तुम्बुरुरस्मदादयः ।
गन्धर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधरा अप्सरसश्च पाण्डव ! ॥ १४ ॥
स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ।
इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥ १५ ॥
अकृष्टपच्या तस्याऽऽसीत्सप्तद्वीपवती मही ।
तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणाय नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि—जब हिरण्यकशिपु ने ऐसे वरमाँगे तब उसके तप से प्रसन्न होकर ब्रह्माजी ने हिरण्यकश्यप को अति दुर्लभ भी ये वर थे तौ भी दिये ॥ १ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि—हे तात ! जिन वरों को तू माँगता है ये पुरुषों को बड़े दुर्लभ हैं, हे भाई ! यद्यपि ये वर दुर्लभ हैं तौ भी मैं तुझ को देताहूं ॥ २ ॥

तदनंतर वर देकर असुरवर्य से पूजित होकर अमोघ अनुग्रह वाले प्रजेश्वरों से स्तूयमान श्रीब्रह्माजी भी अपने धाम को गये ॥ ३ ॥

दैत्य भी इस प्रकार वर पाकर सुवर्ण मय शरीर को धारण करता हुआ भ्राता के वध का स्मरण करता हुआ भगवान श्री विष्णु में द्वेष करने लगा ॥ ४ ॥

वह महासुर दशों दिशाओं को और तीनों भुवनों को जीत-कर देव असुर मनुष्येन्द्र गन्धर्व गरुड़ उरग सिद्ध चारण विद्याधर ऋषिगण पितर मनुष्य यक्ष राक्षस पिशाच भूत प्रेत और इनके अधिप तथा सर्व जन्तुओं के पतियों को जीत कर अपने वश में लाकर विश्व को जीत कर तेज सहित सर्व लोक पालोंके स्थानों को हरण करता हुआ ॥ ५ ॥ ६ ॥ ७ ॥

देवताओं के उद्यान की शोभा वाले स्वर्गका अधिष्ठाता होकर त्रैलोक्य की शोभा का एक स्थान अखिलसमृद्धिवाले साक्षात् विश्वकर्मा के रचे हुये महेन्द्रभवन में निवास करने लगा ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अखिलसमृद्धियुक्तत्वमेवाह-यत्रेति त्रिभिः ॥ ९ ॥
मुक्तादामानि परिच्छदाः परिकराः यासाम् ॥ १० ॥
सुदतीः सुदत्यः ॥ ११ ॥
ऊर्जितमधिकं चण्डं तीव्रं शासनं यस्य ॥ १२ ॥
अङ्ग हेराजन् ! उरुगन्धिनोऽग्रगन्धेन मधुना सुरया मत्तम् अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तम् अशेषधिष्ण्यपाः सर्वलोकपाला उपायनयुक्तैः पाणिभिरुपासत सेवन्ते त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका।

उपासनप्रकारमाह—जगुरिति ॥ १४ ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

महेन्द्रभवनं विशिनष्टि—यत्र भवने विद्रुममयानि सोपानानि यासु ताः भुवःस्थलानि वेदिकादीनि महामारकताः इन्द्रनीलमय्यः यत्र भवने स्फटिकमयानि कुड्यानि भित्तयः यत्र वैदूर्यमणिमयस्तम्भपंक्तयः सन्ति ॥ ९ ॥

यत्र च चित्रवितानानि चित्रकविस्तराणि पद्मरागरत्नमयान्यासनानि च पयःफेननिभाः दुग्धफेनवन्मृदुलाः शुभाश्च शय्याः मुक्तादामानि परिच्छदाः परिकराः यासां ताः ॥ १० ॥

यत्र च देव्यः देवानांसम्बन्धिन्यः सुदत्यः स्त्रियः कूजद्भिर्ध्वनद्भिर्नूपुरैःतत्रतत्र शब्दयन्त्यः शब्दं कुर्वत्यो रत्नस्थलीषु सुन्दरं स्वीयं मुखं पश्यन्ति ॥ ११ ॥

तस्मिन्नेवंभूते महेन्द्रस्य भवनेऽधिवसन्नपारबलः महामनाः अव्याहतसङ्कल्पः अतएव निर्जितो लोको येन स्वयमेक एव राजा ऊर्जितमधिकं चण्डं तापकं शासनं यस्य सः अत एव प्रतापितैः सुरादिभिर्वन्द्याङ्घ्रीयस्य तादृशो रेमे ॥ १२ ॥

अङ्ग हे युधिष्ठिर! उरुगन्धिनोग्रगन्धेन मधुना सुरया मत्तमतएव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तपोयोगस्य बलस्य देहबलस्य ओजस इन्द्रियबलस्य च पदमाश्रयं तं दैत्यं त्रिभिर्विना ब्रह्मविष्णुशिवैर्विना अन्ये सर्वे उपायनं पूजाद्रव्यं तद्युक्तपाणिभिरुपासत उपासितवन्तः ॥ १३ ॥

उपासनाप्रकारमेवाह— जगुरिति चतुर्भिः। ओजसा स्वबलेन महेन्द्रस्यासनमाश्रितमधिष्ठितं तं दैत्यं विश्वावसुतुम्बुरुनारदाद्यश्च जगुर्गानञ्चक्रुः, तद्गुणान् जगुरित्यर्थः। गन्धर्वाः सिद्धाः ऋषयश्च विद्याधरा अप्सरसश्च मुहुर्मुहुरस्तुवन् हे पाण्डव! ॥ १४ ॥

स एवाऽसुरो वर्णाश्रमनिष्ठैर्ब्राह्मणगृहस्थादिभिः क्रतुभिर्भूरिदक्षिणा येषु तैः क्रतुभिर्मुहुर्मुहुरिज्यमान आराध्यमानः स्वबलेन हविर्भागानग्रहीत् ॥ १५ ॥

तस्यासुरस्य सम्बन्धिनी या सप्तद्वीपयुक्ता पृथिवी अकृष्टपच्या कर्षणेन विना फलिन्यभूत् तथा द्यौः स्वर्गाभिमानिनी देवता यथाकामं यथेष्टं दोग्धीष्टार्थान्पूरयतीति तथा अभूत् तथा नभः अन्तरिक्षाभिमानिदेवता नानाश्चर्यमयं विविधविचित्रवस्तुप्रदमभूत् ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सोपानमारोहावरोहलक्षणं कुट्टिमम् ॥ ९ ॥

वितानमुपरिपिधानवस्त्रम् ॥ १० ॥

सुदतीः प्रशस्तदन्तपंक्तयः स्त्रियः ॥ ११ ॥ १२ ॥

त्रिभिरादित्यवसुरुद्रैर्मरुदादिदेवानामेष्वन्तर्भावविवक्षया त्रिधा भिन्नैः, तदुक्तम्—

"आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः।
मरुतश्चैव विश्वे च साध्याश्चैव च तद्गताः॥
अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृताः।
उपायनं ददुः सर्वे विना देवान् हिरण्यके" ॥

इति वचनात् न ब्रह्मविष्णुमहेश्वरैरित्यर्थो ग्राह्यः किञ्चानेदं तात्पर्यः तथा हि, द्विविधा देवाः, यज्ञभागभुजस्तदभुज इति. तत्र प्रथमे त्रिधा भिन्ना जातिभिन्नत्वान्मन्त्रेणाह्वाने समूहेनागमनाच्च, चरमेषु सुरशब्दमात्रं वर्तते, तदन्तेवासित्वच्च वर्तमानाः—

"अयज्ञभागेष्वपि तु सुरशब्दः प्रयुज्यते।
यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिताः" ॥

इति वचनादयं विशेषः कल्प्यत इति इतोप्यत्र त्रित्वसंख्यया आदित्यादय उच्यन्त इत्यङ्गीकर्तव्यम्. दैत्यस्य देवोपास्यत्वं देवानां सदा सद्यशोभाजामयशः स्यात्तदनुपपन्नम् प्रमाणाविरोधात्स्वदितरेषाम् उभयभाक्त्वमितीश्वरक्लृप्तमिदमिति—

"यत्र क्व यशः स्थानमन्येषामिति केशवः।
सर्वत्रापि तु देवानामित्यन्यान्पूजयेत् क्वचित्" ॥

इत्युक्तेश्च 'योगः सन्नहनः' इत्यभिधानादणिमादिनात्रोपायस्थानीभूतः ॥ १३ ॥ १४ ॥ १५ ॥

अकृष्टपच्या उल्लेखनमन्तरेण सस्यादिपरिपाकोपेता ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

उपायनयुक्तैः पाणिभिरुपासत त्रिभिः ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥ १३—१४—१५ ॥

तस्य वेनवदधर्मिष्ठत्वेपि तस्य राज्ये महीप्रभृतयोऽकृष्टपच्यत्वादिगुणयुक्ता यद्बभूवुस्तदतिभयादेव अन्यथा मह्यादीनां तत्कर्तृकः वधः सद्य एव सम्भवेत् वेनस्तु न तादृक्प्रभाव आसीत् यं भृग्वादय एव भस्मीचक्रुरयन्तु भृग्वादीनां तेजः प्रथममेवाजहारेति विवेचनीयम् ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्रैलोक्यलक्ष्म्या आयतनमाश्रयम् यत्र महेन्द्रभवने विद्रुमाणां सोपानाः आरोहमार्गाः ॥ ९ ॥

पद्मरागरचितान्यासनानि सिंहासनानि ॥ १० ॥

पयःफेननिभाः मृदुलाः सिताः शय्याः मुक्तादामानि परिच्छदाः परिकराः यासां ताः सुदतीः सुदत्यः ॥ ११ ॥

प्रतापितैः पराजितैः सुरादिभिरभिवन्दितमङ्घ्रियुगं यस्य सः ऊर्जितमधिकं चण्डं भयङ्करं शासनं यस्य स रेमे ॥ १२ ॥

हे अङ्ग! तं कशिपुं तप आदीनां प[illegible]म् उरुगन्धिना बहुगन्धेन मधुना सुरया मत्त[illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रत्नाकरश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ।
ह्वारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥
शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः ।
दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥
स इत्थं निर्जितककुबेकराड्विषयान् प्रियान् ।
यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ॥ १९ ॥
एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ।
कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥
तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ।
अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥ २१ ॥
तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ।
यद्गत्वा न निवर्तन्ते शान्ताः सन्यासिनोऽमलाः ॥ २२ ॥
इति ते संयतात्मानः समाहितधियोऽमलाः ।
उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अध्विर्णी यस्य तम् त्रिभिर्हरिविरञ्चिहरैर्विना अखिलधिष्ण्यपाः उपायनयुक्तपाणिभिरुपासत ॥ १३ ॥

उपासनप्रकारं दर्शयति--जगुरित्यादिना ॥ १४—१५ ॥

अकृष्टपच्या कर्षणं विनैव सम्पन्नसस्या ॥ १६ ॥

भाषाटीका ।

जिस भवन में मूगा की सीढी मरकतमणी की भूमि स्फटिक मणिके चौंतरे वैडूर्यमणी की खंभों की पंक्तियां हैं ॥ ९ ॥

और जहां पर विचित्र चँदेवा तन रहे पद्मरागमणि के आसन हैं ॥ दुग्ध के फेन के सदृश शय्यायें, मौतियों के मालाओं के सब परिकर जिनके ऐसी शब्दायमान नूपुरों से जहां तहां शब्द करती हुई सुंदर दंतपंक्तिवाली अपने सुंदर मुख को रत्नस्थली में देख रही हैं ॥ १०—११ ॥

उस महेन्द्रभवन में महाबली लोकों को जीतने वाला एक-राट् सुरादिकों से वंदितचरणयुगल प्रचंडशासन हिरण्यकशिपु रमण करता भया ॥ १२ ॥

हे राजन् ! बड़े सुगन्धि मधुसे मत्त, निकलेहुए लाल नेत्र ... कश्यप जो ब्रह्मा विष्णु महादेव को छोड़कर और सब लोकों के अधिपति हाथों में भेट लेलेकर उपासना करते थे। क्योंकि वह तप योग बल पराक्रम का एकही आश्रय था ॥ १३ ॥

हे पाण्डव ! जब अपने पराक्रम से वह इन्द्रासनपर बैठा तब विश्वावसु तुंबुरु और अस्मदादिक तथा गन्धर्व सिद्ध ऋषि विद्याधर और अप्सरा आदि हम सब लोग उसी का गान करते थे ॥ १४ ॥

उस समय वर्णाश्रम वाली प्रजाओं भूरि दक्षिणावाले यज्ञों से वही पूजित होकर अपने तेज से यज्ञ के भागों को ग्रहण करता था ॥ १५ ॥

उसके राज्य में भूमि बिना कमाई हुई फल को देती थी स्वर्ग भी कामनाओं को पूर्ण करता रहा और आकाश नाना आश्चर्य वाला होगया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पत्न्यो नद्यः ऊहुर्वहन्तिस्म रत्नाकरानेवाह--क्षारेति ॥ १७ ॥

आक्रीडं क्रीडास्थानम् द्रुमाः सर्वेषु ऋतुषु गुणान् पुष्पफलादीन् सच लोकपालानाम्पृथग्विधान्गुणान्वर्षणदहनशोषणादीनेकएव दधार ॥ १८ ॥

निर्जिताः ककुभो येन यथोपजोषं यथाप्रीति ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

❀ (ॐनमो भगवते तुभ्यम्पुरुषाय महात्मने ।
विशुद्धानुभवानन्दसन्दोहाय यतोऽभयम् ॥ ० ॥)
तेषामाविरभूद्वाणी अरूपा मेघनिस्वना ।
सन्नादयन्तीककुभः साधूनामभयङ्करी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महान्कालः एकसप्ततियुगानि किञ्चिदधिकानि ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

अरूपा वक्तृरहिता ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

रत्नाकराः समुद्राः तत्पत्न्यो गङ्गादिनद्यश्च ऊर्मिभिस्तरङ्गैः रत्नसमूहानूहुः प्रापयामासुः रत्नाकरानेवाह—क्षारेति. सीधुः सुरा क्षौद्रमिक्षुरसः अमृतं शुद्धं क्षारादिमयान्युदकानि येषां ते क्रमोऽत्र न विवक्षितः ॥ १७ ॥

शैलः पर्वतः जात्यभिप्रायमेकवचनम द्रोणीभिः कन्दरैर्द्रुमान् दधार कथंभूतान् सर्वर्तुषु वसन्तादिषु षट्सु सर्वे स्वेस्वे गुणाः फलपुष्पादयो येषां तानाक्रीडान् क्रीडास्थानोपयुक्तान् सर्वर्तुषु सर्वान् वृक्षान्, सफलपुष्पानेव दधारेत्यर्थः । तदेव स्पष्टयति–लोकपालानां तदाधिपत्यवेलायामित्यर्थः । एको द्रुमः वसन्तादिकालनियमेन पृथग्गुणान् फलपुष्पादीन्दधार अस्यत्वाधिपत्ये अनियतकालं सर्वान्गुणान् दधारेत्यर्थः । यद्वा अयमसुर एक एव सर्वेषां लोकानां पृथग्गुणान् प्रतिनियतान्गुणान् दधार सर्वेषामाधिपत्यमेक एव चकारेत्यर्थः ॥ १८ ॥

इत्थं निर्जिताः ककुभो दिशो येन स दैत्यः एक एव राजा सन् यथोपजोषं यथाप्रीति प्रियानिष्टान्विषयाननुभवन्नपि नातृप्यत् न तृप्तवान् यतोऽयमाजितेन्द्रियः ॥ १९ ॥

इत्थमैश्वर्येण मत्तस्याऽतएव दृप्तस्याऽतएव च उच्छास्त्रवर्त्तिनः वैदिकमार्गाननुवर्त्तिनः, उत्पथप्रतिपन्नस्येत्यर्थः । ब्रह्मशापं सनकादीनां शापमुपेयुषः प्राप्तवतः महान् कालो बहुवर्षात्मकः कालः व्यतीयाय अतिक्रान्तोऽभूत् ब्रह्मशापमुपेयुष इत्यनेन तज्जन्मावसानकालः प्राप्त इति सूच्यते ॥ २० ॥

तदेव वक्तुं तन्निमित्तं तावदाह— तस्य दैत्यस्योग्रदण्डेनोग्रशासनेन संविग्नाः भीताः सपालकाः सर्वे लोकाः अन्यत्राऽलब्धं शरणं निवासस्थानं यैस्ते अच्युतं भगवन्तं शरणं ययुः प्राप्ताः अन्यत्रालब्धशरणा इत्यस्यानन्यरक्षका इति वार्थः । पूर्वं दैत्यतपःपीडितास्तदुपशमनाय ब्रह्माणं शरणमुपगम्य वरप्रदापनेन स्वानिष्टमेव चक्रुः पुनरेतदनिष्टपरिहारो ब्रह्मणापिकर्त्तुमशक्य इत्यालोच्याऽनन्यशरणा भगवन्तमेव शरणं ययुरित्यर्थः ॥ २१ ॥

शरणवरणप्रकारमेवाह–तस्या इति । तस्यै काष्ठायै दिशे नमः काष्ठां विशिंषन्ति, यत्रेति । यत्र यस्यां काष्ठायामीश्वरः सर्वनियन्ता हरिराश्रितार्तिहरो भगवानास्ते शान्ताः रागादिरहिताः अत एव शुद्धान्तःकरणाः संन्यासिनः न्यासविद्यानिष्ठाः यत् याञ्च काष्ठां गत्वा प्राप्य न निवर्त्तन्ते पुनर्नावर्तन्ते न पुनः संसरन्ति तस्यै काष्ठायै नमः इति यस्यां दिशि प्रणतार्तिहरो भगवानास्ते तद्दिगधीनोऽस्मद्रक्षणोपाय इत्यध्यवसायपूर्वकं भगवन्तं शरणं ययुः, काष्ठायै नम इति दिक्शरणवरणकथनेन देवानामपि भगवत्स्वरूपं दुर्ग्रहमिति सूचितम् ॥ २२ ॥

इतीत्थं ते देवाः संयतात्मानः स एव भगवान् रक्षिष्यतीति विस्रम्भयुक्तमनसः समाहितधियः यद्वा संयतात्मान इति बाह्येन्द्रियजय उक्तः, समाहितधिय इत्यनेनान्तरिन्द्रियजयः, वायुभोजना इत्यनेन प्राणजयः, विनिद्रा इत्यनेन कायजयः एवंविधाः हृषीकेशमुपतस्थुस्तुष्टुवुः वक्ष्यमाणं मन्त्रं जेपुर्वा ॥ २३ ॥

भगवते षाड्गुण्यपूर्णाय पुरुषाय सर्वान्तरात्मने महात्मने महानुकम्पायुक्त आत्मा मनो यस्य तस्मै विशुद्धः अनुभवो ज्ञानम् आनन्दः सुखं तयोः सन्दोहः पूरः तद्रूपाय यतः यत्समाश्रयणादाश्रितानामभयं तस्मै नमः ॥ ० ॥

तेषां देवानामेवमुपतिष्ठतां वाणी शब्द आविरभूत्तैः श्रुतेत्यर्थः । कथम्भूता अरूपा अदृष्टवक्तृका मेघनिस्वना मेघघोषतुल्या ककुभो दिशः सन्नादयन्ती प्रतिध्वनयन्ती साधूनामभयङ्करी ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्पत्न्यः तेषां समुद्राणां पत्न्यो नद्यः क्षारं लवणम् ॥ १७ ॥ १८ ॥
यथोपजोषं यथासुखम् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥
यतो यस्माद्धरेरभयं भवति तस्मा इति अरूपा अशरीरिणी ॥२४॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्पत्न्यः नद्यः रत्नाकरानेवाह—क्षारेति । आक्रीडं क्रीडास्थानम् ॥ १७—२१ ॥

काष्ठायै दिशे यत्र दिशि हरिरस्तीति सर्वदेशस्यासुरतेजोग्रस्तत्वात् वयं क्वचित् पुण्यतीर्थे गत्वा तं स्तुमहे इति भावः । यद्वा तस्मै उत्कर्षाय नमः यस्मिन्नुत्कर्षे हरिरिति अन्ये सर्वे एवोत्कर्षाः

* श्लोकोऽयमधिकः पाठः । विज० वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ।
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥
ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ।
तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत ॥ २६ ॥
यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ।
धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥
निर्वैराय प्रशान्ताय स्वसुताय महात्मने ।
प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥

नारद उवाच ।

इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ।
न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनेनासुरेण जिता इति भावः "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः ॥ २२—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्पत्न्यः नद्यः ऊहुः प्रापयामासुः, रत्नाकरानाह—क्षारेति । क्षारादीन्युदकानि येषां ते तत्र सीधुः सुरा चौद्रमिक्षुरसः अमृतं शुद्धम ॥ १७ ॥

आक्रीडं क्रीडास्थानम् पुष्पफलादीन् ॥ १८ ॥

निर्जिताः ककुभो दिशो येन सः यथोपजोषं यथाप्रीति विषयान् भुञ्जानोऽपि नातृप्यत् यतोऽजितेन्द्रियः ॥ १९ ॥

उच्छास्त्रवर्तिनः शास्त्रमुल्लङ्घ्य वर्त्तमानस्य ॥ २०—२१ ॥

काष्ठायै दिशे संन्यासिनः सम्यक् न्यासः आत्मात्मीयभरस्य भगवति अर्पणं सोऽस्ति येषान्ते भगवत्प्रपन्नाः ॥ २२—२३ ॥

अरूपा वक्तृमूर्त्तिदर्शनरहिता हे विबुधश्रेष्ठाः ॥ २४ ॥

भाषा टीका ।

समुद्र और नदी भी रत्नों के समूह को अपनी लहरों से फैंकने लगीं समुद्रों से लवण मदिरा घृत मधु दधि दुग्ध अमृत और जल जो चाहो सो मिलनेलगा ॥ १७ ॥

और उस समय पर्वत भी गुहाओं से क्रीडास्थान को धारण करते हुए, वृक्ष सब ऋतुओं के गुणों को धारण करने लगे तथा हिरण्य कशिपु भी एकही पृथक् २ सबलोक पालों के गुणों को धारण करने लगा ॥ १८ ॥

वह हिरण्यकश्यप इस तरह सर्व दिशाओं को जीतकर यथेष्ट प्रिय विषयों को भोगता हुआ भी तृप्त न हुआ क्योंकि ? अजितेन्द्रिय था ॥ १९ ॥

ऐसा ऐश्वर्य से मत्त शास्त्र को छोड़कर वर्त्तनेवाले विप्र शाप को प्राप्त करनेवाले उस हिरण्यकश्यप का बहुत काल व्यतीत होगया ॥ २० ॥

उसके उग्र दंड से उद्विग्न होकर सबलोक लोकपाल अन्यत्र कहीं स्थान को न प्राप्त होकर गोविन्द के शरण गये ॥ २१ ॥

और ऐसा बोले, कि—उस दिशा को नमस्कार है जिसमें हमारा ईश्वर हरि है जहां जाकर शान्त सन्यासी लोग फिर नहीं निवृत्त होते हैं ॥ २२ ॥

इस प्रकार मनको रोक बुद्धि को समाहित कर हृषीकेश भगवान् का उपस्थान करनेलगे हैं कैसे कि ? रात दिन जिन को निद्रा नहीं आती और वायु का भोजन करते हैं ॥ २३ ॥

तब उन लोगों को मेघ सदृश शब्दवाली, साधुओं को अभय देनेवाली दिशाओं में नाद करती हुई, भगवान् की वाणी सुनपड़ी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम दर्शनं श्रवणं सर्वेषां श्रेयसामुपपत्तये भवति ॥ २५ ॥ २६ ॥ २७ ॥

ननु, देवादिविद्वेषेऽप्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात्तत्राह-निर्वैरायेति । सर्वमहं सहे न मद्भक्तद्रोहमितिभावः ॥२८॥

असुरश्च हतं मेनिरे तदानीं तद्वधे प्रवृत्तत्वादितिभावः ॥२९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ।
प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥
ब्रह्मण्यःशीलसम्पन्नः सत्यसन्धो जितेन्द्रियः ।
आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ३१ ॥
दासवत्सन्नतार्याङ्घ्रिः पितृवद्दीनवत्सलः ।
भ्रातवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ।
विद्याऽर्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमेव द्वेषं वक्तुमादौ सुतस्य महत्त्वमाह–तस्येति । गुणैर्महानभूत्. गुणानेवाह, महदुपासक इत्यादिना ॥ ३० ॥

सत्या सन्धा प्रतिज्ञा यस्य एकएव प्रियश्च सुहृत्तमश्च ॥ ३१ ॥

दासवत्सम्यङ्नना अर्य्याणामङ्घ्रयो येन गुरुषु ईश्वर इतिभावना यस्य ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वाणीमेवाह—माभैष्टेति । हे विबुधश्रेष्ठाः ! यूयं माभैष्ट भयं माकुरुत वो युष्माकं सर्वेषां भद्रं सुखमेवास्तु हि यस्मात्मम दर्शनं कटाक्षो भूतानां श्रेयसे उपपत्तये प्राप्तये भवति ॥ २५ ॥

दैतेयाधमस्य तस्य हिरण्यकशिपोर्यद्दौरात्म्यं तन्मया ज्ञातं विदितमेव तस्य दैत्यस्य शान्ति वधं करिष्यामि कालः तद्वधोचितकालस्तावत्प्रतीक्ष्यतां किञ्चित्कालविलम्बं सहध्वमित्यर्थः ॥२६॥

कोऽसौ तद्वधोचितः कालः ? तत्राह—यदेति । यस्मिन् काले देवादिषु तस्य नितरां द्वेषस्तदा स आशु विनश्यति ॥ २७ ॥

ननु, देवादिषु विद्वेषिनः तस्य नाशः, कथम् ? ब्रह्मवरेणोर्जितत्वादित्यत्राह—निर्वैरायेति । यदा प्रह्लादाय द्रुह्यत्तदा वरैरूर्जितमपि हनिष्ये हनिष्यामि कथम्भूताय महात्मने अहमेवात्मा यस्य स महात्मा तस्मै निर्वैराय सर्वभूतसुहृदे प्रशान्ताय रागादिरहिताय स्वस्यात्मजाय निरतिशयप्रियभक्ताय्रषये यदा द्रोहङ्करिष्यति आश्वेव तदा हनिष्यामि मद्भक्तविषयापराधस्य मम नितरामसह्यत्वादिति भावः ॥ २८ ॥

इतीत्थं लोकगुरुणा भगवता उक्ताः दिवौकसो देवाः भगवन्तं प्रणम्य गतोद्वेगाः गत उद्वेगो भयं येषां तादृशास्सन्तो न्यवर्तन्त. भगवदुपस्थितेरितिशेषः । असुरं हिरण्यकशिपुं हतप्रायञ्च मेनिरे अमन्यन्त ॥ २९ ॥

तस्य पूर्वमेव विप्रशापमुपेयुषः उचितकाले हनिष्यामीत्येवंविधभगवत्सङ्कल्पविषयस्य दैत्यपतेर्हिरण्यकशिपोः परमाद्भुताश्चत्वारः प्रह्लादानुह्लादसंह्लादह्लादाख्याः पुत्रास्तेषां मध्ये प्रह्लादो गुणैरक्रोधादिभिर्महाञ्छ्रेष्ठोऽभूत् माहात्म्यावहगुणैस्तं विशिनष्टि, महदुपासकइत्यादिना महतां भागवतानामुपासकः भागवतभक्तिपर्यन्तभगवद्भक्तिनिष्ठः इयमेव भगवद्भक्तेः परा काष्ठेति भावः ॥३० ॥

ब्रह्मण्यः ब्राह्मणकुले साधुरनुकूलो ब्रह्मण्यः यद्वा ब्रह्मणि परस्मिन्नितरां साधुः ब्रह्मण्यः शीलेन सुस्वभावसद्वृत्त्यात्मकेन युक्तः सत्यसन्धः सत्यप्रतिज्ञः जितानि इन्द्रियाणि अन्तर्बाह्यानि येन सर्वभूतानामात्मना तुल्यमात्मवत् एकएव असाधारणः प्रियतमः सुहृत्तमश्च प्रियसुहृत्तमः आत्मा यथा प्रियतमः स्वहितैकैषी च तद्वद्यमपि सर्वभूतविषयकप्रीतियुक्तस्तद्धितैषीत्यर्थः ॥ ३१ ॥

दासवत्सम्यङ्नताः नमस्कृताः आर्याणां महतामंघ्रयो येन पितृवद्दीनेषु वात्सल्ययुक्तः भ्रातृवत्सदृशेषु स्वतुल्येषु स्निग्धोऽनुरागयुक्तः गुरुषु ईश्वरत्वेन भावना दृष्टिर्यस्य विद्यादिभिर्हेतुभिर्योऽभिमानो गर्वो दम्भश्च ताभ्यां विवर्जितः तत्रार्थो वित्तं रूपं सौन्दर्यं जन्माभिजात्यम्आदिशब्दः प्रकारार्थः विद्यादिसदृशमन्यदपि मानादिनिमित्तं विवक्षितम् ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मद्दर्शनं मद्विषयज्ञानम् ॥ २५ ॥ २६ ॥

मस्य वेदादिषु विद्वेषःस आशु साधनसामग्र्याम् । २७ । २८ । । २९ । ३० ।

आत्मवत् परमात्मवत्—

"अन्येषां हरिसाम्यं तु किञ्चित्साम्यमुदीरितम् ।
सम्यक्साम्यं तु मत्स्यादेरितिशास्त्रस्य निश्चयम्"

इतिवचनादत्रहरिसाम्यकथनं तात्पर्याद्वगन्तव्यम् ॥ ३१ ॥

मानस्तम्भविवर्जितः अभिमाननिमित्तस्तम्भदोषरहितः ॥३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मद्दर्शनं श्रवणद्वारापि मदनुभवः ॥ २५ ॥ २६॥

यदा यस्य देवादिषु विद्वेषः स्यात् तदा स वै प्रसिद्धौ आश्वेव नश्यति ॥ २७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtioh by eGangotri

नोद्विग्नचित्तो व्यसनेषु निस्स्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ।
दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ॥ ३३ ॥
यस्मिन्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः ।
न तेऽधुनाऽपि धीयन्ते यथा भगवतीश्वरे ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तथाप्यमृतत्वाद्‌।श्चर्यप्रभावमपि सम्प्रति वरोर्जितमपि तं स्वयमहमेव हनिष्यामि । किन्त्वहमपि तत्प्रभावलोपकच्छिद्र-विशेषं प्रतीक्षमाणोऽस्मीत्याह निर्वैरायेति ॥ २८—३५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्दर्शनं हीति स्तम्भान्मद्दर्शनं यावदेव न भवति तावदेव युष्माकं दुःखमिति भावः ॥ २५—२७ ॥

ननु, ब्रह्मवरोर्जितोऽयं बहुकालेन एव देवादीन् द्विषन्नपि नैव नश्यति तत्राह-निर्वैरायेति । सर्वमहं सहे न भक्तद्रोहमिति भावः ॥ २८—३१ ॥

सम्यक् नता आर्य्याणां भङ्घ्रयो येन सः गुरुष्विति बहुवचनं गौरवेणैव श्रीभगवन्मन्त्रोपदेशके गुराविस्यर्थः । रहित आसुरो भावो मत्सरादिर्यस्य सः ॥ ३२—३३ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विबुधश्रेष्ठत्वमत्र भगवद्विषयकज्ञानवत्त्वं हे मज्ज्ञानवन्त इत्यर्थः । अतो माभैष्ट यतो मद्दर्शनं मज्ज्ञानं सर्वश्रेयसामुपपत्तये भवति सर्वश्रेयोपपत्तये इत्यत्र सन्धिरार्षः ॥ २५—२६ ॥

यदा यस्य देवादिषु विद्वेषस्तदा स आशु विनश्यति देवादिक्रोधादेवेति भावः ॥ २७ ॥

यदा तु मद्भक्तेषु यस्य विद्वेषस्तदा मद्भक्तानां समदर्शिनां क्रोधादिविकाराभावात् मद्भक्तद्रुहोहन्ताऽहमित्याशयेनाह--निर्वैरायेति ॥ २८—२९ ॥

निर्वैरायेति निर्वैरायेत्यनेन संक्षेपतो भगवता वर्णितान् प्रह्लादगुणान् मुनिर्विस्तरतो वर्णयति--तस्येत्यादिना ॥ ३० ॥

शब्दब्रह्मपरब्रह्मब्राह्मणेभ्यो हितकृत् ब्रह्मण्यः सत्यसन्धः सत्यप्रतिज्ञः सर्वभूतानामात्मवत् एक एव प्रियः सुहृत्तमश्च दासवत्सन्नता आर्याणां श्रेष्ठानामङ्घ्रयो येन गुरुषु ईश्वरमन्त्रस्वरूपगुणाद्युपदेष्टृषु ईश्वरवद्भावना यस्य सः ॥ ३१—३२ ॥

———

भाषा टीका ।

वाणी बोली, कि—हे देवता लोगों ! भय मतकरो तुम्हारा मङ्गल हो हमारा दर्शन प्राणियों की सर्व मङ्गल की सिद्धि के लिये होता है ॥ २५ ॥

दैत्यों में भी इस हिरण्यकश्यप की दुरात्मता मैं जानचुका तिसकी शांति मैं करूंगा तब तक कुछ काल की प्रतीक्षा करो ॥ २६ ॥

जिस समय यह देवताओं में वेदों में गौ ब्राह्मण और साधुजनों में तथा धर्म में और मेरे विषय में द्वेष करने लगेगा तब वह शीघ्र ही नष्ट होजायगा ॥ २७ ॥

निर्वैर प्रशान्त अपने पुत्र माहात्मा प्रह्लाद से जब द्रोह करेगा बस कैसे भी वरों से बढा हो मैं उसी समय उसको मारूंगा ॥ २८ ॥

॥ नारद उवाच ॥

नारदजी बोले, कि- देवताओं को लोक गुरु गोविन्द की जब ऐसी आज्ञा हुई, तब उद्वेग को छोडकर गोविन्द को प्रणाम कर वहां से लौटे और असुरको तो मरा समुझने लगे ॥ २९ ॥

उस दैत्य पति के परम अद्भुत चार पुत्र थे उन सब में प्रह्लाद गुणों से बडा था और महात्माओं की उपासना करने वाला था ॥ ३० ॥

और ब्रह्मण्य शील सम्पन्न सत्य प्रतिज्ञा वाला जितेन्द्रिय-तथा आत्मा के सदृश सर्व प्राणियों का एक प्रिय और सुहृतम भी था ॥ ३१ ॥

और श्रेष्ठजनों के चरणों का दासवत् सेवक, और दीनों का पितृवत् परिपालक, सदृश लोगों में भ्राता के तुल्य स्नेह वाला तथा गुरुजनों में ईश्वर भावना वाला विद्यार्थ रूप श्रेष्ठ जन्म युक्त और मान गर्व से वर्जित था ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यसनेषु प्राप्तेष्वपि नोद्विग्नचित्तः दृष्टेषु श्रुतेषु गुणेषु विषयेषु निःस्पृहः यतस्तेष्ववस्तुदृक् दान्ता इन्द्रियादयो यस्य रहित आसुरो भावो मत्सरादिर्यस्य सः असुरोऽपि सन् प्रशान्तकामः ॥ ३३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ॥ ३५ ॥
(१) गुणैरलमसङ्ख्येयैर्माहात्म्यं तस्य सूच्यते ।
वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥
न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥
आसीनः पर्यटन्नश्नन् शयानः प्रपिबन्ब्रुवन् ।
(२) नाऽनुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥ ३८ ॥
क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥ ३९ ॥
नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधुनाऽपि ते गुणा नापिधीयन्ते तिरोहिता न भवन्ति ॥ ३४ ॥

साधुगाथासदसि साधुकथाप्रसङ्गवत्यां सभायाम् यं प्रह्लादम् प्रतिमानं दृष्टान्तम् रिपवोऽपि सुराः कुर्वन्ति किं वक्तव्यं भवादृशा विष्णुभक्ताः ॥ ३५ ॥

सूच्यते मया केवलं द्योत्यते सुष्ठु कथ्यत इति वा ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इति षड्भिः । तन्मनस्तया तदेकचित्तत्वेन ॥ ३७ ॥

एतान्यासनादीनि गोविन्देन परिरम्भित आत्मना एकीकृतः ॥ ३८ ॥

रुदति रोदिति रौति वैकुण्ठस्य चिन्तया शबला व्यामिश्रा क्षुभिता चेतना यस्य तस्य चिन्तयाऽह्लादो यस्य ॥ ४९ ॥

क्वचिदुत्कण्ठो मुक्तकण्ठः सन् अनुचकार तच्चेष्टादिकं स्वयं कृतवान् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यसनेषु दुःखहेतुषु नोद्विग्नमभीतं चित्तं यस्य दृष्टेष्वैहिकेषु श्रुतेष्वामुष्मिकेषु च स्वर्गस्वाराज्यादिषु गुणेषु विषयेष्ववस्तुदृगनित्यबुद्धियुक्तोऽत एव तेषु स्पृहादिरहितः सदा दान्ताः नियमेन वशीकृताः इन्द्रियादयो यस्य प्रशान्ताः कामा यस्य, निस्पृह इत्यनेन सन्निहितेषु विषयेषु इच्छाराहित्यमुक्तम्. प्रशान्तकाम इत्यनेन त्वसन्निहितेष्वित्यतो न पौनरुक्त्यं. स्वयमसुरोऽपि रहितासुरः मात्सर्याद्यासुरभावरहितः ॥ ३३ ॥

हे राजन् ! यस्मिन् प्रह्लादे गुणा उक्ता वक्ष्यमाणा अन्ये च कविभिर्मुहुर्मुहुर्महद्यथा भवति तथा गृह्यन्ते बहुमन्यन्त इत्यर्थः । महदिति क्रियाविशेषणमन्यथा सामानाधिकरण्यसमासे "आन्महत"इत्यात्वापत्तिः महतः प्रह्लादस्य गुणा इत्यर्थे यस्मिन्नित्यनेन पौनरुक्त्यापत्तिः महतां गुणा इति वा, ते गुणाः अधुना अद्यापि नापिधीयन्ते न तिरोहिता भवन्ति, न विस्मृता भवन्तीति यावत्. यथा भगवतीश्वरे गुणाः पुनःपुनः कविभिर्गृह्यन्ते नापिधीयन्ते तद्वत् ॥ ३४ ॥

हे नृप युधिष्ठिर ! साधुगाथासदसि साधुकथाप्रसङ्गवत्यां सभायां रिपवः शत्रवोऽपि यं प्रह्लादं प्रतिमानं साधनत्वे दृष्टान्तं कुर्वन्ति किं पुनर्भवादृशा अन्ये प्रतिमानं कुर्वन्तीति ॥ ३५ ॥

मया परं केवलमसङ्ख्येयैर्गुणैस्तस्य माहात्म्यं सूच्यते, न साकल्येन तद्गुणा वर्णयितुं शक्या इति भावः । अलमिति पाठेऽधिकं तस्य माहात्म्यं सूच्यते. मया दिङ्मात्रं गुणप्रदर्शनेन माहात्म्यं सूच्यते, नत्वेतावत्तस्य माहात्म्यमित्युच्यते इत्यर्थः । अपारमाहात्म्ये हेतुं वदन् विशिनष्टि—वासुदेवेति. यस्य प्रह्लादस्य वासुदेवे भगवति नैसर्गिकी स्वाभाविकी उत्पत्तिसिद्धेत्यर्थः । रतिः स्वभावतः वासुदेवे रतानां वासुदेवस्यैवानन्तमाहात्म्यमिति भावः ॥ ३६ ॥

(१) गुणैः परमसंख्येयैः इतिपाठान्तरम्—वीर० (२) नाऽनुसन्दधएतानि इति पाठान्तरम्. वीर०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैसर्गिकलिङ्गानि वदन्विशिनष्टि—न्यस्तेत्यादिषड्भिः । बाल एव बालशःप्रभृतीत्यर्थः । तन्मनस्कतया भगवद्गतहृदयत्वेन न्यस्तक्रीडनकः परित्यक्तबालक्रीडः कृष्णग्रहः श्रीकृष्ण एव ग्रहस्तेन गृहीत आत्मा मनोयस्य, ग्रहगृहीतवद्वर्त्तमान इत्यर्थः । अत एव जगदीदृशं न वेद बाह्यवस्तुविषयकचिन्तारहित इत्यर्थः ॥ ३७ ॥

एतदेव प्रपञ्चयति—आसीन इति । आसनाद्यवस्थावस्थितोऽपि एतान्यासनादीनि नानुसन्दधे नानुसंहितवान् तत्र हेतुर्यतो गोविन्देन भगवता परिरम्भितः संश्लिष्टः गोविन्दानुसन्धानरूपतत्परिरम्भविस्मृतदेहधर्म इत्यर्थः ॥ ३८ ॥

क्वचिद्गोविन्दानुसन्धानविच्छेददशायां रुदति रोदिति आर्षत्वाच्छ्लुक्, इङ्गुणाभावश्च. गोविन्दचिन्तया शबला व्यामिश्रा क्षुभिता चेतना बुद्धिर्यस्य तादृशः क्वचिद्धसति. क्वचित्तच्चिन्तया आह्लादो यस्य तादृश उच्चैर्गायति गोविन्दगुणानिति शेषः ॥ ३९ ॥

क्वचित्तच्चिन्ताह्लादएव नदति ध्वनति क्वचिदुत्कण्ठः कण्ठोपरिव्याप्तहर्षः विगतलज्जो नृत्यति उत्कण्ठो मुक्तकण्ठस्सन् ध्वनतीति वा क्वचित्तद्भावनया भगवदनुस्मृत्या युक्तस्तन्मयस्तदात्मकः स्वात्मानं तदपृथक्सिद्धत्वेन पश्यन्नपि तदपि तदनुसन्धानेन विस्मृत्य तद्रूपतापत्त्यभिमानेनानुचकारानुकरोति भगवानिव चेष्टते इत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणेषु शब्दादिषु शरीरस्य दान्तत्वमुपवासादिना रहितासुरः असुरस्वभावकर्मरहितः जात्यासुरः ॥ ३३ ॥

यथा भगवतीश्वर इत्यत्रापि "अन्येषां हरिसाम्यन्तु किञ्चित् साम्यमुदीरितम्" इत्यादिप्रमाणमित्यत्रापि ज्ञातव्यमिति ॥३४॥

प्रतिमानं दृष्टान्तम् ॥ ३५ ॥ ३६ ॥

कृष्णाख्यो ग्रहस्तेन वशीकृतमनाः ॥ ३७ ॥

अनुसन्दधे सस्मार ॥ ३८ ॥

तद्भावनायुक्तः तस्य श्रीनारायणस्य ध्यानोपेतः तन्मयस्तत्प्रधानः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असंख्येयैर्गुणैरलमिति ते वक्तुं न शक्यामित्यर्थः । अतस्तस्य माहात्म्यं सूच्यते द्योत्यते मात्रम् । यद्वा, असंख्येयैरेव बालमत्यर्थं तस्य माहात्म्यं संसूच्यते, वक्तुं शक्यत इत्यर्थः । उभयत्र च हेतुः वासुदेव इति ॥ ३६ ॥

तन्मनस्तयाकृष्टमनस्तया न्यस्तक्रीडनकः तदनन्तरं तथैव जडवत्तस्थुवयः ततः पश्चात् कृष्णग्रहगृहीतात्मा ग्रहेणेव कृष्णेनाविष्टः सन् जगदीदृशं न वेद न ददर्श यथा लोकाः पश्यन्ति न तथा, किन्तु तत्स्फुर्त्तिकरत्वेनैव ददर्शेत्यर्थः । गोविन्देन परिस्फुरता परिरम्भित इवेत्यर्थः ॥ ३७ ॥

प्रथमा चिन्ता वियोगे स्फुरिते द्वितीया संयोगे एवं वियोगे क्वचिद्रुदति । संयोगे हसति । वियोगे नदति उच्चैराहूयते । संयोगे वियोगे क्वचित्तद्भाव[illegible] ॥ ३८—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महतो भगवतो गुणाः अप्राकृता धैर्यगाम्भीर्यादयः स्वभावेनैव स्थिताः काविभिर्विवेकिभिर्गृह्यन्ते एते गुणा जीवनिष्ठा न भवन्ति किन्तु भगवदीया एवेति शुद्धैर्मनआदीन्द्रियैर्विषयीक्रियन्ते इत्यर्थः । गुणानां नित्यत्वमाह--ते गुणा अधुना एतत्कालपर्यन्तं नापिधीयन्ते कालकर्मादिभिर्नाच्छाद्यन्ते एतावत्सु कालेषु गतेष्वपि प्रह्लादस्तादृग्गुणविशिष्ट एव वसुतले तथा वैकुण्ठे महावैकुण्ठे च विराजत एवेति भावः ॥ ३४ ॥

प्रतिमानं दृष्टान्तं प्रह्लादतुल्योऽयं भक्त इत्येवम् ॥ ३५ ॥

असङ्ख्येयैः सङ्ख्यातुमशक्यैरेवंगुणैस्तस्यालं कः खलूत्कर्ष इत्यर्थः । अन्ये पुरुषा गुणैरुत्कर्षयन्तां नाम न तु प्रह्लादस्तस्य तूत्कर्षहेतुरन्यद्वस्त्वन्तरं वर्तत इति भावः । तदेव किं तत्राह--माहात्म्यं सूच्यते सुष्ठु उच्यते किन्तत् वासुदेव इत्यादि. यद्वा तस्य माहात्म्यं सूच्यते तत अभिधातुमशक्यत्वाद्व्यज्यते मात्रं । कृष्णग्रहगृहीतात्मेत्याद्युत्तरग्रन्थे ग्रहादिशब्देनेति भावः । तस्य कीदृशस्येत्यपेक्षायामाह—वासुदेवे इति । नृसिंहाकारे इति केचित् प्रह्लादस्तुत्यनन्तरम् "आविर्बभूव भगवान् पीताम्बरधरो हरिः" इति वैष्णवोक्तेः कृष्णग्रहगृहीतात्मेति गोविन्दपरिरम्भितेत्यग्रिमोक्तेश्च वासुदेवे वसुदेवनन्दनाकार एवेत्यन्ये प्रह्लादस्य पूर्वोत्तरदशयोः क्रमेण वासुदेवनृसिंहनिष्ठत्वमित्यपरे नैसर्गिकी नरकस्येषामिव पूर्वजन्मकृतैः साधनैः सिद्धेत्यर्थः ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इतिषड्भिः । बालोऽपि त्यक्तबाल्यलीलस्तन्मनस्तया कृष्णैकाग्रमनस्कत्वेन जड इवान्यैर्वीक्ष्यमाणः नचान्यभक्तैरिव तेन स्वमनः कृष्णविषयकं कृतं, किन्तु कश्चित्ग्रहो लोभ्यं द्रव्यमिव कृष्ण एव यन्मनो गृहीतवानित्याह—कृष्णेति । अत एव जगत् ईदृशं व्यवहारमयं न वेद किन्तु कृष्णमयमेवेत्यर्थः ॥ ३७ ॥

एतानि आसनवर्त्मभक्ष्यशयनीयपेयवक्तव्यानि नानुसन्धत्ते न जानाति. कुतः ? गोविंदेन परिरम्भितः अतिवत्सलेन पित्रा मात्रा वा एकाब्दिको बालो यथा प्रतिक्षणमेव परिरभ्य क्रोडस्थीक्रियते तथैव प्रह्लादो भोजनशयनादिसमयेऽपि भगवता आलिङ्ग्यते इति प्रह्लाद एव पश्यति नान्य इति भावः ॥ ३८ ॥

ततश्च क्वचिदिति स्वबालकं स्वक्रोडस्थलाद्भूमौ निधाय गृहकृत्यार्थमन्यत्र गतायां मातरि तामनालोक्य स बालो यथा रोदिति तथैव मामधुनैव परित्यज्य मत्प्रभुः क्व गत इति तच्चिन्तया शबला व्यामिश्रा विह्वला चेतना यस्य सः रुदति रोदिति क्वचिद्धसतीति तदैव पुनः स्फूर्तिप्राप्तेन भगवता भोः प्रह्लाद वत्स ! क्षणमात्रमेव मामनालोक्य कथमेवं रोदिषीत्युक्ते सति हसति चिरात् प्राप्तामालिङ्गन्तीं मातरमवलोक्य मुग्धबाल इवेत्यर्थः । तच्चिन्तेति मत्प्रभुर्मामेवं कृपया स्वदर्शनदानेन सुखयतीति चिन्तया आह्लादो यस्य सः ॥ ३९ ॥

नदतीति स्फूर्तिप्राप्तं हरिम् अतिदूरे दृष्ट्वा उत्कण्ठः उच्चीकृतकण्ठः भोः प्रह्लाद वत्स ! त्वामनालोक्याहं नैव निर्वृणोमि यतस्त्वमेव ममातिप्रिय इत्युक्तस्सन् आनन्दातिशयेन विचित्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ।
अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ॥ ४१ ॥
स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिञ्चनसङ्गलब्धया ।
तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनःशमं व्यधात् ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एव विलज्जो नृत्यति तदैव स्फूर्तिभङ्गे सति तद्विरहखेदाधिक्येन तद्भावनातिशययुक्तः उन्मादसञ्चारिप्रावल्येन अहमेव हरिरिति तन्मयस्सन् तल्लीलां रामकृष्णाद्यवतारगतामपि अनुचकार अनुकृतवान् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्यसनेषु आपत्सु नोद्विग्नचित्तः श्रुतेषु पारलौकिकेषु दृष्टेषु ऐहिकेषु च गुणेषु विषयेषु यतोऽवस्तुदृक् अनित्यत्वदृष्टिरतो निस्पृहः दान्ताः वशगाः इन्द्रियादयो यस्य सः ॥ ३३ ॥

यथा भगवति तथा यस्मिन् ये महान्तो गुणाः ते कविभिर्विवेकिभिः स्वस्मिन् अधुनापि मुहुर्गृह्यन्ते पुनःपुनः संगृह्यन्ते ते चात्मनि न धीयन्ते अविवेकिभिरात्मनि धारयितुं न शक्यन्ते इत्यर्थः ॥ ३४ ॥

हे नृप ! साधूनां गाथायाः गुणकथायाः सदसि समाजे रिपवः सुरा अपि यं प्रह्लादं प्रतिमानमुपमानं प्रकुर्वन्ति अमुकः साधुः प्रह्लादसम इत्येवं वर्णयन्तीत्यर्थः । तर्हि भवादृशाः साधवः अन्ये रिपुभिन्नाः स्वकीयाश्च प्रतिमानं प्रकुर्वन्तीति किमुत ॥ ३५ ॥

यस्य वासुदेवे भगवति नैसर्गिकी स्वभाविकी रतिः प्रीतिः तस्य असङ्ख्येयैर्बहुभिर्गुणैः पर्याप्तमिति तस्य माहात्म्यं सूच्यते द्योत्यते गुणस्तु मुख्यो वासुदेवे रतिरेव तत्रैव सर्वे गुणाः सन्ति तदभावे सर्वे गुणा दोषा एवेति भावः । उक्तं चैतच्चतुर्थे स्कन्धे "किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञकैः" इत्यादिना ॥ ३६ ॥

तां नैसर्गिकीं वासुदेवे रतिं प्रह्लादस्य वर्णयति भगवान्नारदः न्यस्तक्रीडनक इति षड्भिः । तन्मनस्तथा वासुदेवविषयकचित्तत्वेन ॥ ३७ ॥

गोविंदेन परिरम्भितः एतानि आसनपर्यटनादीनि नानुसंधत्त न बुबुधे ॥ ३८ ॥

वैकुण्ठचिन्तया शवला विह्वला चेतना यस्य रुदति रोदिति तस्य गोविन्दस्य चिन्तया ध्यानेनाह्लादो यस्य सः ॥ ३९ ॥

क्वचिदुत्कण्ठः उच्चीकृतकण्ठस्सन् नदति ध्वनति क्वचिच्च तन्मयो गोविन्दमयः सन् अनुचकार तल्लीलां स्वयं चकार ॥ ४० ॥

भाषा टीका ।

व्यसन प्राप्त होने पर जिसका चित्त उद्विग्न नहीं होता और सदा निस्पृह रहता तथा दृष्ट श्रुत (देखे सुने हुए) विषय को कुछ वस्तु नहीं समुझता था, इन्द्रिय प्राण शरीर और बुद्धिका दमन करनेवाला सदा प्रशांत कामना वाला और आसुर भाव से रहित था ॥ ३३ ॥

हे राजन् ! जिस प्रल्हाद में बडे २ गुण थे जिन गुणों को बडे २ महात्मा लोग ग्रहण करते हैं वे गुण प्रल्हाद के अब भी तिरोहित नहीं है जैसे कि भगवान श्रीमन्नारायण में ॥ ३४ ॥

हे नृप ! साधु कथा प्रसंगवाली सभा में वैरी जो देवता लोग हैं वो भी जिस प्रल्हादको उत्तम पुरुषों का दृष्टांत बनाते हैं फिर आप सदृश विष्णुभक्तों का तो क्या ही कहना ॥ ३५ ॥

उसके असंख्येय गुणों को तो कहां तक कहें पर उसके माहात्म्यमात्र की सूचना करते हैं कि जिसकी भगवान वासुदेव के विषें स्वाभाविक प्रीति थी ॥ ३६ ॥

जो कि कृष्ण में मन लगने से जड़ के तरह वालक पने में भी खिलोनों को छोड बैठा, और कृष्णरूप ग्रह से गृहीत हुआ मन जिसका ऐसा प्रल्हाद, जगत् कैसा है यह भी नहीं जानता हुआ ॥ ३७ ॥

बैठे चलते सोते खाते पीते बोलते में भी गोविन्द में पूर्ण रीति से चित्त लगजाने से प्रल्हाद को इन सब बातों का अनुसंधान नहीं रहता था ॥ ३८ ॥

वैकुंठ भगवान की चिन्ता से क्षुभित होगई चेतना जिसकी ऐसा प्रल्हाद कभी रोने लगता कभी हंसने लगता कभी परमात्मा की चिन्ता के आल्हाद से गाने लगता ॥ ३९ ॥

किसी समय ऊंचे स्वर से नाद करने लगता कभी निर्लज्ज होकर नांचने लगता किसी समय हरिभावना युक्त होकर तन्मय होकर भगवान का अनुकरण करने लगता ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संस्पर्शस्तद्भावापत्तिस्तेन निर्वृतः अस्पन्दः स्थिरो यः प्रणयस्तेन य आनन्दस्तेन . यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य सः ॥ ४१ ॥

आत्मनः परां निर्वृतिं तन्वन्दुस्सङ्गेन दीनस्यान्यस्यापि मनः श[illegible]शान्तं व्यधात् ॥ ४२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन्महाभागवते महाभागे महात्मनि ।
हिरण्यकशिपू राजन्नकरोदघमात्मजे ॥ ४३ ॥

॥ युधिष्ठिर उवाच ॥

देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ! ।
यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥
(१) पुत्रान् विप्रतिकूलान् स्वान् पितरः पुत्रवत्सलाः ।
उपालभन्तो शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥
किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् ।
एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ! ॥
पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे प्रह्लादचरिते
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अघं द्रोहमकरोत् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति--देवर्षे इति । तव स्वत्तस्तववाक्यमिति वा साधवेऽघमदात् साधे द्रोहं कृतवानिति यदेतद्वेदितुं ज्ञातुमिच्छामः ॥ ४४ ॥

उपालभन्ते आक्षिपन्ति अघन्तु नैव कुर्वन्ति अपरः शत्रुरिव ॥ ४५ ॥

अनुवशाननुकूलान् साधूनरागरोषान् गुरुः पितैव देवता येषां तानुद्दिश्याघं न कुर्वन्तीति किमु वक्तव्यमित्यर्थः । पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतोद्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यदेतत्कौतूहलं विधमापाकुरु यद्वा यद्यस्मात्पुत्राय द्वेषः स पितुर्मरणाय प्रयोजितोऽत एतत्कौतूहलं विधमेत्यर्थ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कचिच्च संस्पर्शेनाऽविच्छिन्नानुध्यानेन निर्वृतः सुखितः अस्पन्दः स्थिरो यः प्रणयः स्नेहस्तेन य आनन्दस्तेन यत्सलिलं तेनाऽऽमीलिते ईषन्मीलिते ईक्षणे यस्य उत्पुलकः उदञ्चितरोमा तूष्णीमास्ते॥ ४१॥

स प्रह्लादः अकिञ्चनसङ्गो निरुपाधिकस्नेहस्तेन बन्धया उत्तमश्लोकस्य भगवतः पदारविन्दयोः निषेवया मुहुर्मुहुरात्मनः स्वस्य परां निर्वृतिमानन्दं तन्वन् वितन्वन्, मन इत्यार्षत्वाल्लुप्तषष्ठीकं पृथक् पदम्, यद्वा, तत एव सविशेषणस्यापि समासः विषयासङ्गेन दीनस्य मनसः शमं शान्तिं रागादिराहित्यं व्यधात्तके दुःसङ्गहीनस्येति विशेषणं लोकपरिपाटीकृतं न तु तस्य कदाचिदपि विषयासक्तमभून्मन इति भावः ॥ ४२ ॥

हे राजन् ! तस्मिन्नेवंभूते महाभागवतश्रेष्ठे महाविवेकिनि महात्मन्युक्तविधमाहात्म्ये तत्राप्यात्मजे हिरण्यकशिपुरघं द्रोहमकरोत् ॥ ४३ ॥

एवंविधस्य द्रोहानर्हत्वशङ्कया पृच्छति युधिष्ठिरः—देवर्ष इति । हे देवर्षे ! एतद्वेदितुं ज्ञातुमिच्छामः, किन्तत् ? हे सुव्रत ! शुद्धाय निरपराधाय साधवे महाभागवताय तत्राप्यात्मजाय अनेन द्रोहानर्हविषयत्वमुक्तम्. पितेत्यनेन द्रोग्धृत्वानर्हत्वम् अघं द्रोहमधात्तके इत्येतत् ॥ ४४ ॥

उक्तविशेषणलब्धार्थमेव विशदयति–पुत्रेष्विति । प्रतिकूलेषु पुत्रेषु विषयभूतेषु पुत्रवत्सलाः पितरः शिक्षार्थं केवलमुपालभन्ते आक्षिपन्ति अपरे यथा शत्रवइवाघं द्रोहं नैव कुर्वन्ति. प्रतिकूलानपि पुत्रान् केवलं शिक्षार्थमुपालभन्ते न तेभ्यो द्रुह्यन्ति, किम्पुनरनुकूलान् साधून् गुरुः पितैव दैवतं येषां तानुपालभन्ते न तु तेभ्यो द्रुह्यन्ति इति भावः ॥ ४५ ॥

अतो हे ब्रह्मन् ! अस्माकमेतत्कौतूहलम् एतत्प्रश्नकौतूहलं विधम अपनय हे प्रभो ! पुत्राय यः पितुर्द्वेषः स मरणाय पितुर्मरणाय

---

(१) पुत्रेषु म[illegible] इति पा[illegible]न्तरम्. श्री-वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रयोजितः प्रयोजकोऽभूदिति यदेतत्प्रश्नकौतूहलमित्यन्वयः पितुः पुत्रविषयकद्वेषः स्वस्यैव मरणप्रयोजकः कथमभूदित्येवं विध-प्रश्नविषयकौतूहलं विधमेत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्पर्शेषु विषयेषु स्पृहारहितः अस्पन्दप्राणः प्राणचेष्टारहितः आनन्दसलिलेन सन्तोषाश्रुजलेन निमित्तेन किञ्चिन्निमीलित-नेत्रः ॥ ४१ ॥

अकिञ्चनानां महतां सतां सेवालक्षणसङ्गेन प्राप्तया ॥ ४२ ॥

अघं मरणलक्षणं व्यसनम् ॥ ४३ ॥

"विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि" इतिस्वपृष्टं कथा-न्तरासक्त्या नारदेनापरिहृतम् जानन् राजा युधिष्ठिरः पुनरपि जानन्नकरोदघमात्मज इतिप्रसक्तं श्रुत्वा तदेव पृच्छति--देवर्षे इति । पुत्रस्य मरणकारणमासुरकर्म न तु शास्त्रीयमितिज्ञापनाय साधवे अघमिति संहिताकार्यं न कृतम् ॥ ४४ ॥

अपरे शत्रवः ॥ ४५ ॥

विधम परिहर पुत्राय प्रयोजितो विद्वेषः पितुर्मरणायाभूदिति यत्तस्मात्कौतूहलमिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संयोगे क्वचिदुत्पुलकइति । संस्पर्शः कृपामयतत्कर्तृका-लिङ्गनस्फूर्त्तिः ॥ ४१ ॥

दन्त्यपाठे स्वसमं स्वान्तःकरणतुल्यं व्यधात् ॥ ४२ ॥

महाभागवतस्वलक्षणं पूर्वमेव दर्शितम्. महान् भागो भाग्यं श्रीनारदकृपारूपं यस्य महान् पूज्य आत्मा धैर्यगाम्भीर्यादि-युक्तः स्वभावो यस्य ॥ ४३ ॥ ४४ ॥

पुत्रानिति सार्द्धकम् ॥ ४५--४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्वचिदुत्पुलक इति क्व यामि कुत्र प्रभुं प्राप्स्यामीति कदाचि-त्तद्विच्छेददुःखेन मुद्रितनेत्र अकस्मात् स्वहृदय एव तमालोक्य तत्पाणिस्पर्शेन निर्वृत उत्पुलकः न विद्यते स्पन्दनो यस्य सः प्रणयेनानन्दसलिलं ययोस्तथाभूते ईषन्मुद्रिते ईक्षणे यस्य स च स च सः ॥ ४१ ॥

ननु, तस्य हिरण्यकशिपुप्रभृतिदुःसङ्गत्वे कथं स्थिरा भक्ति-स्तत्र प्रह्लादस्य तस्य सङ्गेनान्येपि दुःसङ्गिनस्तत्सहचरबालाः कृतार्था बभूवुः कथं तस्यैव दुःसङ्गाशङ्केत्याह--सइति । दुस्सङ्गदी-नस्यान्यस्यापि मनः शमं "शमो मन्निष्ठता बुद्धेः" इति भगवद्व-चनात् भगवन्निष्ठमकरोत् ॥ ४२ ॥

अघं द्रोहम् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्षे इति । तव त्वत्तः अघं दुःखम् ॥ ४४ ॥

नैव अघं प्रापयन्ति अपरः अनुवशान् अनुकूलान् ॥४५॥

कुतूहले भवं कौतूहलं सन्देहं विधम अपाकुरु सन्देहः कः पुत्राय पुत्रं हन्तुं पितुर्द्वेषः यत् यो द्वेषः मरणाय स्वस्य मरणार्थ-मेव प्रकर्षेण योजितः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमेतु चतुर्थोयं सङ्गतः सङ्गतस्सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्पुलको जातरोमाञ्चः संस्पर्शेन ध्यानदृष्टभगवच्चरणसंस्पर्शेन निर्वृतः सुखितस्तूष्णीमास्ते अस्पन्दप्रणयेन अचलप्रेम्णा य आन-न्दस्तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्मुद्रिते ईक्षणे यस्य सः ॥ ४१ ॥

अकिञ्चनानां भगवदनन्यशरणानां सङ्गमेन लब्धया उत्तम-श्लोकस्य पुण्यकीर्तेर्हरेः पदारविन्दयोर्निषेवया आत्मनः परां निर्वृतिं परं सुखं तन्वन् दुःसङ्गेन दीनस्येतरस्यापि मनः शमं भगव-न्निष्ठं व्यधादकरोत् ॥ ४२ ॥

अघं पापं द्रोहमित्यर्थः ॥ ४३ ॥

यत् शुद्धाय अघमदात् शुद्धे द्रोहं कृतवानित्यर्थः । एतत् तव त्वत्तः वेदितुमिच्छामः ॥ ४४ ॥

पुत्रवत्सलाः पितरो विप्रतिकूलानपि शिक्षार्थमेवोपालभन्ते आ-क्षिपन्ति अपरः शत्रुर्यथा तथा अघं नैव कुर्वीत किमुत वाच्य-मनुवशत्वादिगुणयुक्तान्प्रति अघं न कुर्वन्तीति ॥ ४५ ॥

पुत्राय पुत्रं हन्तुं यो द्वेषः स पितुर्मरणाय प्रयोजितः, पित्रेति शेषः । इत्येतत्कौतूहलं विधम अपाकुरु ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषा टीका।

किसी समय स्फूर्ति प्राप्त भगवत्स्पर्शानुभवसे आनंदित होकर रोमांचित होजाता और निश्चल होकर प्रेम से हुआ जो आनंदवाष्प तिससे किञ्चित् निमीलित है नेत्र जिसका ऐसा होकर तूष्णीं भाव को प्राप्त होजाता ॥ ४१ ॥

अकिंचनों के संग से प्राप्त हुई जो गोविन्द चरणार-विन्द की सेवा उससे अपने आनंद की परा काष्ठा का विस्तार करता हुआ, बारंवार दुःसंग से दीनजनों के मन की भी शांति करता हुआ ॥ ४२ ॥

हे राजन् ! उस बडभागी महात्मा महा भागवत अपने पुत्र प्रल्हाद में हिरण्यकशिपुने ऐसा पाप क्यों किया ॥ ४३ ॥

युधिष्ठिरउवाच।

युधिष्ठिरजी बोले, कि—हे देवर्षे ! हे सूत ! मै आप से इतने जानने की इच्छा करता हूं कि परमसुशील अपने पुत्रको पिताने कैसे द्रोह किया ॥ ४४ ॥

पिता लोग पुत्रों के विषय में ऐसे वत्सल होते हैं कि अत्यंत प्रतिकूल भी अपने पुत्रों को शिक्षा ही लिये कुछ आक्षेप करते हैं, शत्रुके तरह दुष्ट अभिप्राय वाले नही होते हैं ॥ ४५ ॥

फिर गुरु लोगों को देवता के सदृश मानने वाले अपने वशंवद सुशील प्रल्हाद सदृशों पर क्या ही कहना, हे ब्रह्मन् यही मुझे बड़ा कौतूहल है कि पिताने पुत्र के लिये मरणार्थ द्वेष किया इस कौतूहल को आप दूर करो ॥ ४६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध
चतुर्थोध्याय की भाषा टीका समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्थोध्यायः ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ पञ्चमोऽध्यायः ॥

नारद उवाच ।

पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः ।
शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥
तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ।
पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥
यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च ।
न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥ ३ ॥
एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव ! ।
पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥

प्रह्लादउवाच ।

तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।
हित्वात्मपातं गृहमन्धकूपं वनं गतोयद्धरिमाश्रयेत ॥ ५ ॥

नारदउवाच ।

श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ।
जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६ ॥
सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ।
विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ ॥
गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः ।
प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतम् ।
घातयन्द्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥ १ ॥

भगवद्भक्तिरेव विद्वेषे कारणमिति वक्तुमाह--पौरोहित्यायेत्यादिना । काव्यः शुक्रः अतस्तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामितिशेषः ॥ १ ॥

पाठ्यान्दण्डनीत्यादीन् पाठ्यानसुरबालकानितिवान्वयः ॥ २ ॥

अनु श्रवणानन्तरं तथैव पपाठ च किन्तु तत्साधु न मेने तत्र हेतुः स्वः परः इत्यसद्ग्रहो मिथ्याभिनिवेशएवाश्रयो यस्य तत् ॥ ३ ॥ ४ ॥

हे असुरवर्य ! असद्ग्रहादहं ममेति मिथ्याऽभिनिवेशाद्धेतोः सम्यगुद्विग्ना विषण्णा धीर्येषां ते वनं गतः सन्हरिमाश्रयेतेति यत्तदेवाहं साधु मन्ये कथम्भूतं गृहम् आत्मपातमात्मनोऽधःपातनिमित्तम् कुतः अन्धकूपवन्मोहावहम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

परपक्षे विष्णौ समाहिताः परिनिष्ठिताः हासे हेतुः बुद्धिरिति ॥ ६ ॥

विष्णुपक्षैर्भागवतैर्हेतुभूतैः ननु, त्वद्गृहे कुतस्तेषां प्रवेशः सत्यम् तथाऽपि प्रतिच्छन्नैर्वेषान्तरेण छन्नः ॥ ७ ॥

दैत्यैर्गृहमानीतम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमापृष्टद्वेषनिमित्तस्तद्वृत्तान्तावदुपोद्घातमाह भगवान्नारदः—पौरोहित्यायेत्यादिना । भगवान् काव्यः शुक्रः पौरोहित्याय पुरोहितकर्मकर्तुमसुरैर्वृतः, किलेति प्रसिद्धिं द्योतयति तस्य काव्यस्य सुतौ शण्डामर्कांख्यौ दैत्यराजस्य हिरण्यकशिपोः गृहसमीपे आस्तामितिशेषः ॥ १ ॥

तौ च शण्डामर्कौ दैत्यराजेन प्रापितं नीतिशास्त्रपठनार्थं प्रापितं प्रह्लादमन्यांश्चासुरबालकांश्च पाठ्यान् दण्डनीत्यादीन् पाठयामासतुः पठनं कारितवन्तौ अत्र नयकोविदमिति क्रियाविशेषणं यथा नयकोविदाः नीतिशास्त्रनिपुणाभवन्ति तथा पाठयामासतुरिति ॥ २ ॥

तत्र एवं स्थिते प्रह्लादो यद्गुरुणा प्रोक्तं तच्छुश्रुवे श्रुतवान् अनुपठितवांश्च परन्तु तत्प्रोक्तं मनसा साधुयथातथा न मेने तत्र हेतुं वदन् प्रोक्तं विशिनष्टि—स्वपरासद्ग्रहाश्रयम् अयं स्वः स्वकीयो मित्रम् अयन्तु परः शत्रुरित्येवंरूपो योऽसद्ग्रहो वृथाग्रहरूपोऽभिमानस्तस्याश्रयं हेतुभूतम् ॥ ३ ॥

एवं स्थिते हे पाण्डव ! कदाचिदसुरराट् पुत्रं प्रह्लादमङ्कमारोप्योत्सङ्गे निधाय हे वत्स पुत्र, भवानाचार्यप्रोक्तेषु मध्ये यत्साधु मन्यते तत्कथ्यताम्, इत्येवं पप्रच्छ ॥ ४ ॥

एवं दैत्येन पृष्टः प्रह्लादस्तमाह—तदित्येकेन । हे असुरवर्य दैत्यराज ! असद्ग्रहात् देहात्माभिमानस्वतन्त्राभिमानतन्मूलशब्दादिविषयाभिनिवेशादिरूपादसद्ग्रहाद्धेतोः सदा नित्यं समुद्विग्ना नितरां भीता धीर्येषां तेषां देहिनां कुत्सितदेहधारिणामात्मपातं पतन्त्यनेनेति पातम् आत्मनः अधःपतनहेतुमन्धकूपतुल्यं गृहं त्यक्त्वा वनमरण्यं प्रविष्टो हरिम् आश्रितबन्धहरं भगवन्तमाश्रयेतेति यत्तदेव साधु मन्ये इति. हित्वेतिपदेन हेयसंक्षेपः हरिमाश्रयेतेत्येनेन उपादेयतत्त्वतदनुष्ठानसंक्षेपः वनं गतइति विविक्तदेशोपलक्षणम् ॥ ५ ॥

एवमुक्तो दैत्यराजः किमाहेत्याह देवर्षिः—श्रुत्वेति । परपक्षसमाहिताः परपक्षे विष्णौ समाहिताः परिनिष्ठिताः पुत्रस्य प्रह्लादस्य गिरः श्रुत्वा दैत्यो जहास हासपूर्वकमुवाचेत्यर्थः । तदेवाह—बालानां बुद्धिः परबुद्धिभिः परस्मिन् शत्रौ विष्णौ बुद्धिर्येषां तैर्भिद्यते अन्यथाक्रियते विपरीताक्रियते इत्यर्थः ॥ ६ ॥

नूनं गुरुगेहे प्रतिच्छन्नैर्विष्णोर्भक्तैर्द्विजातिभिः ब्राह्मणैः अयं बालो भिद्यते [illegible]बुद्धिः क्रियते अतोऽस्य बालस्य बुद्धिर्यथा नभिद्येत तथा सम्यग्विधार्यतां विचार्यतामित्यर्थः ॥ ७ ॥

ततो दैत्ययाजकाः दैत्यपुरोहिताः स्वगृहम्प्रति दैत्यभटैरानीतम् प्रापितं प्रह्लादम् आहूय प्रशस्य प्रस्तुत्य सामोक्तिभिः श्लक्ष्णया मृदव्या उक्त्या च समपृच्छन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुप्रह्लादसम्वादच्छलेन भक्तिस्वरूपं हरेर्निरतिशयस्वातन्त्र्यञ्च निरूपयत्यस्मिन्नध्याये—काव्यः शुक्रः शण्डश्च मर्कश्च शण्डामर्कौ तस्य शुक्रस्य दैत्यराजगृहान्तिके न्यवसतामितिशेषः ॥ १ ॥

राज्ञा हिरण्यकशिपुना ॥ २ ॥

अपाठस्य विशेषणाभूनेन हेत्यनेन सूचितं हेतुमाह—नेति । असाधुत्वे किङ्कारणमत्राह—स्वरूपेति, "स्वातन्त्र्यात्स्वइतिप्रोक्तः" इत्यतःस्वस्य स्वतन्त्रस्य हरेरूपस्यासत्त्वं शून्यत्वं गृह्णातीति निराकारो हरिरिति यः पक्षः स आश्रयो यस्य तत्तथानिराकारपक्षविषयत्वादित्यर्थः । प्रपञ्चस्वरूपस्यासद्ग्रहः शून्यत्वप्रतिपादकः शून्यवादः सआश्रयो यस्य तत्तथा अद्वैतविषयत्वादित्यर्थइतिवा जीवपरस्वरूपयोरसत्पृथग्भावं गृह्णातीति स्वरूपासद्ग्रहः जीवपरमात्मानावभिन्नाविति यः सिद्धान्तः स आश्रयः यस्य तत्तथा अद्वैतविषयत्वादित्यर्थं इति वा, स्वरूपासद्ग्रहः औत्पत्तिकदुराग्रहोऽवैष्णवपक्षपातः स आश्रयो यस्य तत्तथा वैष्णवसिद्धान्तविरुद्धत्वादित्यर्थं इति वा विन्यासभेदएवायन्तात्पर्यन्तस्त्वेकएवेति ॥ ३ ॥ ४ ॥

हे असुरवर्य ! असद्ग्रहाद्विषयाभिनिवेशात् समुद्विग्नधियां परवशीकृतबुद्धीनां देहिनां तत्साधु संसारनिर्मूलसाधनं मन्य इत्यन्वयः । किं तदिति, तत्राह—हित्वेति. आत्मपातं स्वस्य निरयपातम् अन्धमज्ञानं यत्तस्य कूपं निधानस्थानं गृहं हित्वा वनं सज्जनसङ्गमलक्षणं गतः ॥ ५ ॥

सज्जनशिक्षार्थं प्रह्लादेन तत्त्वमुक्तं न तु तं ग्राहयितुं तस्यासुरावेशेन दुराग्रहगृहीतत्वात्तत्फलमाह—श्रुत्वेति । परिहासः फलं परबुद्धिभिः प्रतिपक्षबुद्धिभिःपरपक्षसमाहिताः पूर्वपक्षविषयत्वेन प्रवृत्ताः ॥ ६ ॥

पुत्रस्नेहेनाभिमतोऽयं न हासः किं त्वनभिमत एवेत्यभिप्रेत्याह—सम्यगिति । विधार्यतामवधार्यतां विष्णुपक्षः प्रतिच्छन्नो येषां ते तथा तैर्विष्णुसिद्धान्तमभिगृह्यस्थितैरित्यर्थः ॥ ७ ॥

अवशवशीकरणाय चत्वार उपाया विहितास्तत्र द्विजातीनां सामोपाय एव श्रेयानिति दर्शयितुं परकृतबुद्धिभेदञ्च ज्ञातुं तत्रापि योग्यानां भगवत्तत्त्वविषयज्ञाननिश्चयाय च दैत्यभयाच्च दैत्ययाजकाः प्रह्लादमपृच्छन्नित्याह । गृहमिति—सामभिर्वचनैः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १——१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गुरुणाऽध्यापितः पित्रा पृष्टः कृष्णं स्तुवन् सुतः ।
पञ्चमे दिग्गजाद्यैस्स हतोऽपि स्वस्थ्यराजत ॥ ० ॥

प्रह्लादस्य भक्तिरेव विद्वेषकारणमिति वक्तुमाह-पौरोहित्यायेत्या दिना। काव्यः शुक्रः अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः॥ १ ॥ २ ॥

यत् दण्डनीत्यादिकं तत् साधु न मेने कुतः ? स्वः पर इत्यसदूग्रहं दुरभिनिवेशमेव आ सम्यक्प्रकारेण श्रयते इति तत् ॥ ३॥

कठिनपदार्थानां प्रश्ने बालस्यास्य स्तोभो भविष्यतीति मत्वा प्राह-यद्भवान् साधु मन्यते पठितानां वस्तूनां मध्ये साधु अङ्गस्तीकृतं यत् त्वं जानासि मदग्रे वक्तुञ्च शक्नोषि तदेव वदेति हिरण्यकशिपोरभिप्रायः ॥ ४ ॥

प्रल्हादस्तु तदभिप्रायं ज्ञात्वापि जगत्यस्मिन् जिज्ञासूनां मध्ये भवान् किं वस्तु साधु मन्यते इति बुद्ध्या विचार्य्य स्वसम्मतीकरोतीति मां पृच्छति चेदस्य समुचितमुत्तरं श्रृणिवत्याह-तदिति । हे असुरवर्य्य ! असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशात् उद्विग्नधियां जनानां तदेव साधुमन्ये. किं तत् ? आत्मपातहेतुं गृहं त्यक्त्वा वनं गतस्सन् यद्धरिमाश्रयेतेति, अत्र यत् हरिमाश्रयेत तदेव हरिचरणाश्रयणं साधु मन्ये गृहस्थितोऽपि स एव गृहमन्धकूपं हित्वा वनं गतः अन्यथा वनं गतोऽपि गृहमन्धकूपमेव श्रित इति च व्याचक्षते ॥ ५ ॥

परपक्षे शत्रुपक्षे विष्णौ समाहिताः परिनिष्ठिताः जहासेति बालोऽयं यो यद्धारयति तदेव वक्ति अस्य को दोषस्तदद्यारभ्य नारदाद्या वैष्णवा नात्र प्रवेशनीया इत्यादिदेशेति भावः ॥ ६ ॥

तदपि गुरुगेह एव ते नैवं वक्तव्या इत्याह-विष्णुपक्षैरिति ॥७॥

प्रश्रस्य श्लक्ष्णयेत्यन्यथा बालोऽयं भयेन स्वोपदेशकं वैष्णवं न वक्ष्यतीति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनतः प्रह्लादः पित्रा गजादिभिर्घातितोऽपि भगवदनुग्रहान्न मृत इति पञ्चमे वर्णयति. भगवद्भजनरतं पुत्रं दृष्ट्वा हिरण्यकशिपुस्तं प्रति विद्वेषं कृतवानिति वक्तुमाह-पौरोहित्यायेत्यादि । काव्यः शुक्रः तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामिति शेषः ॥ १ ॥

तौ प्रह्लादमन्यांश्चासुराणां बालकान् पाठ्यान् पाठयामासतुः ॥ २ ॥

दण्डनीत्यादिकं गुरुणा प्रोक्तं तत् शुश्रुवे श्रुतवान् अनुश्रवणानन्तरं पपाठ च पठितवांश्च मनसा तु साधु न मेने यतः स्वपररूपो योऽसद्ग्रहो ग्रहोऽभिनिवेशस्तदाश्रयम् ॥ ३ ॥ ४ ॥

असद्ग्रहात् नित्यस्वरूपो जीवः तद्विपरीतोऽनित्यो देहोऽस्वचस्मिन् यो ग्रहोऽहमित्यभिनिवेशस्तस्मादनात्मन्यात्मभ्रमात् सदा समुद्विग्नधियाम् आत्मनः पातो यस्मिन् तमन्धकूपं गृहं हित्वा वनं गतस्सन् यद्धरिमाश्रयेत तत्साधु मन्ये ॥ ५ ॥

परपक्षे विष्णौ समाहिताः सम्यगाहिताः संयोजिताः पुत्रगिरः श्रुत्वा बालानां बुद्धिः परेषां बुद्धिभिर्भिद्यते इति मत्वा जहास ॥ ६ ॥

गुरुगेहे बालः सम्यग्विधार्यताम् अस्मद्भयात्प्रतिच्छन्नैर्गुप्तलक्षणैर्विष्णुपक्षैर्वैष्णवैर्द्विजातिभिर्यथाऽस्य धीर्न भिद्येत ॥ ७ ॥

दैत्ययाजकैः गृहमानीतं प्रह्लादं श्लक्ष्णया मधुरया वाचा प्रश्रस्य सामभिः प्रियवाक्यैः समपृच्छन्त ॥ ८ ॥

भाषा टीका ।

श्रीविदर्भराजतनयाकुचकाश्मीरमुद्रितोरसे नमः ॥

नारद उवाच

नारदजी बोले, कि—असुर लोगों ने भगवान् श्रीशुक्राचारीजी को पुरोहित किये थे, उनके शंडा मर्क नामक दो पुत्र दैत्यराज के महलों के समीप रहते थे ॥ १ ॥

वो दोनों राजा के भेजे हुए, नीतिनिपुण प्रल्हाद नामक बालक को पढाते थे तथा और भी पढने के योग्य छोटे २ असुरबालकों को पढाते थे ॥ २ ॥

जो कुछ वहां पांडे ने पढाया उसको सुना भी और पढा भी परंच अपना पराया झूठेआग्रहवाला वह पढना प्रल्हाद को मन से अच्छा न मालूम हुआ ॥ ३ ॥

हे पांडव ! एक दिन दैत्यराज ने अपने पुत्र को गोद में बैठाकर पूंछा कि हे वत्स ! तुम क्या अच्छा मानते हो ॥ ४ ॥

प्रल्हाद उवाच ॥

प्रल्हाद बोला, कि—हे असुरवर्य ! संसार से सदा उद्विग्नबुद्धिवाले प्राणियों को तो मैं यही अच्छा समझता हूं कि अपने पतन होने का गृह रूप अंधकूप को छोडकर वन में जाकर हरि का आश्रयण करै ॥ ५ ॥

नारदउवाच ॥

नारदजी बोले, कि—पुत्र की वाणी शत्रु के पक्ष में निष्ठावाली सुनकर दैत्य हँसा और बोला कि-बालकों की बुद्धि पराये की बुद्धि से भेद को प्राप्त होजाती है अर्थात् बिगड जाती है ॥ ६ ॥

इसी से गुरु के गृह में लेजाकर बालक को अच्छी तरह शिक्षा दो कि जिससे छिपे हुए विष्णु के पक्ष वालों से इस की बुद्धि न बिगडे ॥ ७ ॥

दैत्य पुरोहितों ने घर पर आये हुए प्रल्हाद को बुलाकर मधुरवाणी से बड़ाई देकर शांति से पूंछा ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

वत्स ! प्रह्लाद ! भद्रं ते सत्यं कथय मा मृषा ।
बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥
बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् ।
भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ! ॥ १० ॥

प्रह्लाद उवाच ।

(१) स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ।
विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥
स यदाऽनुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ।
अन्य एष तथाऽन्योऽहमिति भेदगताऽसती ॥ १२ ॥
स एष आत्मा (२) स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥ १३ ॥
यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ।
तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥

नारद उवाच ।

एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ।
तं निर्भर्त्स्याथ कुपितः स दीनो (३) राजसेवकः ॥ १५ ॥
आनीयतामरे ! वेत्रमस्माकमयशस्करः ।
कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बालान्सर्वानति अतिक्रम्य तुभ्यं तव ॥ ९ ॥ १० ॥

अहो मायामोहिताः भवन्तो मामाक्षिपन्तीत्याशयेन तावदाह-स्वःपरश्चेति । मिथ्याभिनिवेशो यदीयया मायैव कृतो न तु वास्तवः अत एव तदीयया मायया विमोहितबुद्धीनां भवतामेव दृष्टो नतु मम तस्मै अचिन्त्यमायेश्वराय नमः ॥ ११ ॥

अहो किमेतत्प्रलपसि तव बुद्धिभेदो यतोजातस्तं कथयेत्याक्षिप्तः संस्तत्प्रसादादेवेत्युत्तरमाह—स इति त्रिभिः । स भगवान्यदानुव्रतोऽनुकूलो भवति तदा पशूनामविवेकिनामिव बुद्धिर्भेदगता असती मिथ्या संसारविषया विभिद्यते अभिन्नात्मनिष्ठा भवति ॥ १२ ॥

भेदस्यासत्त्वं दर्शयन्नाह--स एष परमात्मैव स्वःपर इतिचाविवेकिभिर्निरूप्यते युक्तश्चैतत् यतो यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोऽपि मुह्यन्ति, तत्र हेतुः, दुरत्ययं दुर्घटमनुक्रमणमनुचरितमनुवर्तनं वा यस्य ॥ १३ ॥

ननु, निर्विकारस्य कथं मतिभेदकत्वं ? तत्राऽह-यथेति । यथा अयो लोहमाकर्षस्यायस्कान्तस्य समीपे स्वयमेव भ्रमति तथा मे चेतश्चक्रपाणेः सन्निधौ तव कुतो जातस्तत्सन्निधिः ? तत्राऽह—यदृच्छयेति. कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

अरे वेत्रं कशाऽऽनीयतां सामदानभेददण्डानां मध्ये चतुर्थो दमो दण्डोऽस्य दुर्बुद्धेरुदित उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्याङ्गारवन्नाशहेतोः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नमेवाह--वत्सेति द्वाभ्याम् । हे वत्स ! प्रह्लाद ! ते तव भद्रमस्तु, न त्वां ताडयाम इति भावः । सत्यं यथार्थं कथय मृषा मिथ्या मा कथय. किं कथयेयम् ? तत्राह--बालानिति । बालानति अतिक्रम्य सर्वान् बालान् विहाय तुभ्यं तवैव एष बुद्धिविपर्यासः कुतो हेतोः ? अभूदिति ॥ ९ ॥

किमयं बुद्धिविपर्यासः परैर्विष्णुपक्षपातिभिः कृतः

---

(१) परः स्वश्चेति पाठान्तरम्. वीर० विज० क्रम० वि-चक्र० सिद्धा० । (२) स्वपरेत्यबुद्धिर्दुरन्वयानुक्रमणो-इति पाठान्तरम्. वीर० । (३) राजसेवकमिति पाठा० वीर० ।

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

उताहो आहोस्वित् स्वत एव तवाभवत् हे दैत्यकुलनन्दन! त्वद्गुरूणां श्रोतुकामानामस्माकं भणयतां कथ्यतामिति ॥ १० ॥

एवमुक्त आह प्रह्लादः-पर इत्यादिना चतुर्भिः। यत्पृष्टं बुद्धिभेदः परकृतः उत स्वाभाविक इति तत्र तमिमं स्वपरविभागं देहात्माभिमानरूपाज्ञानमूलकं भगवन्मायामोहितानामिति निन्दितुं तावद्देहात्माभिमानादिरूपमोहनिमित्तविचित्रमायाशक्तियुक्तं भगवन्तं नमस्करोति-पर इति. यस्येश्वरस्य मायया हेतुना स्वः परश्चेत्यसद्ग्राहः इदं मित्रमयं शत्रुरयन्देवो मनुष्यो ब्राह्मण इत्यादिदेहात्मभ्रमः कृतः सम्पादितः विमोहितधियां भगवन्मायया विमोहिता धीर्येषां तेषां भवतामेव दृष्टो न ममेति भावः तस्मै पूर्णषाड्गुण्याय नमः विमोहितधियामित्यनेन "दैवी ह्येषा गुणमयी मममाया दुरत्यया" इति भगवदुक्तरीत्या भगवदप्रपन्नानां भवतामेवासद्ग्राहः न तु तत्प्रपन्नस्य मम इति सूचितम् ॥ ११ ॥

तदेव व्यञ्जयन्नसद्ग्राहं निन्दति—स इति। स भगवान् यदा पुंभिरनुव्रतः आश्रितः तदा पुंसां पशुबुद्धिः पशुष्विव बुद्धिः देहात्माभिमानरूपा बुद्धिर्विभिद्यते निरस्यते कासौ पशुबुद्धिः? या, अन्य एवः अन्योऽहम् इत्येवंरूपा सर्वशरीरेषु ज्ञानैकाकारतया परमात्मशरीरतया चावस्थिता नात्मनो विस्मरतां स्वः पर इत्येकरूपा भेदगता अनात्मभूतदेवासुरमनुष्यादिशरीरगता अत एवासती दुष्टा अनर्थावहा सैषा पशुबुद्धिरित्यर्थः ॥ १२ ॥

एवं स्वपरविभागहेतुभूतदेहात्मभ्रमादेर्भगवन्मायाहेतुकत्वकथनेन तद्भरणात्तन्निवृत्तिकथनेन च भगवत एवाज्ञानप्रदत्वं तन्निवर्त्तकत्वञ्चोक्तम्. अथ ज्ञानप्रदातृत्वमपि तस्यैवेत्याह—स इति। स उक्तविध एष आत्मा प्रकृतः परमात्मा स्वपरेत्यबुद्धिः स्वः परश्चेति बुद्धिरहितः सर्वान्तरात्मतया सर्वत्र समत्वादित्यर्थः। दुरन्वयं पुरुषान्तरेष्वघटमानमनुक्रमणं व्यापारो यस्य तादृशो निरूप्यते अन्यैरशक्यं सर्वं सर्वशक्तिलीलया करोतीत्यर्थः। यस्य वर्त्मनि मार्गे यत्स्वरूपविमर्शने वेदवादिनो ब्रह्मादयोऽपि मुह्यन्ति स एष एव परमात्मा मम मतिं बुद्धिं भिनत्तीत्यर्थः। स्वपरेत्यबुद्धिरित्यनेन देवासुरादिविभागमन्तरेण सर्वेषां ज्ञानप्रदत्वमुक्तम्. दुरत्ययानुक्रमण इत्यनेन सर्वशक्तित्वं वैषम्यादिराहित्यञ्चोक्तम्. यद्वर्त्मनि ब्रह्मादयोऽपि मुह्यन्तीत्यनेन तत्प्रसादादेव ब्रह्मादीनामपि ज्ञानोदयः अन्यथा केवलं तेषामपि मोह एवेत्युक्तम्. स्वपरेत्यबुद्धिभिरिति तृतीयान्तमपि पाठान्तरं तत्र स्वः पर इति न विद्यते बुद्धिर्येषां तैः स्वपरविभागात्मकाविवेकरहितैरित्यर्थः। तादृशैर्दुरन्वयानुक्रमणोऽनितरसाधारणव्यापारो निरूप्यते ज्ञायते इत्यर्थः। तत्प्रसादान्निवृत्तदेहात्माभिमानादिभिः ज्ञानाज्ञानादिप्रदत्वेन परमात्मा ज्ञायते इत्यर्थः ॥ १३ ॥

एवं ज्ञानप्रदत्वमुक्तम् अथ तस्यैव तत्प्रदानेन स्वस्य प्रवर्त्तकत्वमाह—यथेति। आकर्षसन्निधौ अयस्कान्तसन्निधाने अयोलोहं स्वयमेव यथा भ्रमति, भ्राम्यति चञ्चलं भवतीत्यर्थः। तथा मम चेतोऽपि चक्रं पाणौ यस्य तस्य हरेः सन्निधौ यदृच्छया हेत्वन्तरनिरपेक्षं भिद्यते तत्प्रसादायत्ततत्सान्निध्यादेव ममैवंविधा बुद्धिवृत्तिरभूदित्यर्थः। अनेन "बुद्धिभेदः परकृतः उताहो ते स्वतोऽभवद्" इति प्रश्नस्योत्तरमुक्तं भवति ॥ १४ ॥

एवमुक्तोगुरुराहेत्याह-मुनिः—एतावदिति। ब्राह्मणान् दैत्ययाजकान् प्रत्येवम् एतावदेवोक्त्वा महामतिः स प्रह्लादो विरराम तूष्णीम्बभूव. ततो दीनः उपायान्तरेण तं स्ववशीकर्त्तुमशक्तो गुरुः तं निर्भर्त्स्य कुपितस्सन् राजसेवकम् उवाचेति शेषः॥१५॥

तदेवाह—आनीयतामिति द्वाभ्याम्। अरे हे राजभट! इत्यर्थः वेत्रं प्रहरणसाधनयष्टिविशेषमानीयताम् अस्माकमयशोऽपकीर्तिङ्करोतीत्ययशस्कृत्तस्य अतएव कुलस्य दैत्यकुलस्याङ्गारवन्नाशकः तस्य दुर्बुद्धेरितः परं दमः शिक्षणोपायः चतुर्थ एव स्यात् दण्ड एवो पायः कर्त्तव्यो, न सामादिरित्यर्थः। चतुर्थोऽस्योदितो दम इति पाठे उदितः शास्त्रेपूक्तः चतुर्थो दण्डोपाय एवास्य दमो दमनसाधनमित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तुभ्यं तव यो बुद्धिविपर्यय एव बालान् वयस्यान् अतिक्रम्य कुतोऽभूदिति शेषः बालानां बुद्धिमतिक्रम्यैष बुद्धिभेदः कुतः तस्मात्तुभ्यं रोचित इति वा ॥ ९ ॥

एतदेव विवृण्वन्ति–बुद्धिभेद इति। अस्माकं तत्त्वमेव वक्तव्यं त्वयेत्यतो गुरूणामिति ॥ १० ॥

उत्तरं वक्ति—पर इति। पुंसां योऽयं परस्वश्चेत्यसद्ग्राहः "एकमेवाद्वितीयम्" इतिश्रुतेः परमार्थवस्तुन एकत्वे प्रामाणिके सिद्धे तत्र श्रीनारायणमन्तरेण परविषयकर्तृत्वं स्वविषयकर्तृत्वमिति भेदः स्वातन्त्र्यकल्पनालक्षणमन्यथाज्ञानम् एष यस्येश्वरस्येच्छया कृतः कल्पितः सर्वकर्तृत्वात्तस्य तस्मै भगवते महामहिम्ने नम इत्यन्वयः। तत्प्रत्यक्षमित्याह-विमोहितधियामिति. दृष्टः प्रत्यक्षस्तस्मात्तादृशी बुद्धिर्भवादृशैर्न कार्येति शेषः। विमोहितेत्यनेनापीश्वरकर्तृत्वं ज्ञायते ॥ ११ ॥

यन्माययेत्युक्तं स्पष्टं दर्शयति–स यदेति। स भगवान् यदा पुंसां स्वात्मपरबुद्धिजनकत्वेनानुगतोऽनुकूलो भवति तदा पशुबुद्धिरज्ञबुद्धिर्विभिद्यते तत्कथमित्यत उक्तम्, अन्य इति. एष देवदत्तोऽन्यः स्वतन्त्रोऽहमन्यः स्वतन्त्र इति किमस्याधिकरणमिति तत्राह–देहगतेति. अत एवासती वृत्तिज्ञानत्वेन मोक्षानुपयोगित्वात् "अन्यो सावन्यो ऽहमस्मीति न स वेद यथा पशुः" इति श्रुतिप्रतीकेनानेन श्लोकेन जीवपरयोर्भेदं निषिध्य चिदैक्यं विधीयत इतीममर्थं विधायाऽर्थान्तरकल्पनायां किं प्रमाणमितीयमाशङ्क्य स्वातन्त्र्येणान्यसद्भावनिषेधाय श्रुतिरित्त्वयम् "अन्योसावन्योऽहमिति पश्यन्नज्ञ इति दम ह"—

"आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः।
आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु ॥
स्वरूपसत्ताकर्तृत्वं भोगो मोक्षस्तथैव च।
मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदा" ॥

इत्यनेन परिहृतेति ज्ञातव्यम् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यदि जीवपरौ मिथो भिन्नौ तर्हि किमिति घटपटभेदज्ञानवत्तद्विषयज्ञानं नोत्पद्यत इत्याशङ्क्य प्रतियोगिज्ञानस्य दुःसाध्यत्वादित्यभिप्रेत्याह—स एष इति । यः स्वस्वकर्मानुसारेण स्वस्वयोग्यज्ञानमुत्पादयति स एष आत्मा परमात्मा स्वपरत्वबुद्धिभिः यथार्थज्ञानविरोधिज्ञानवद्भिः पुरुषैर्दुरन्वयानुक्रमणः दुरन्वयं दुर्ज्ञानमनुक्रमणं तत्तद्योग्यतानुसारेण प्रवर्तनं यस्य स तथा दुर्ज्ञेयचेष्ट इत्यर्थः।निरूप्यते निश्चीयते ननु"वेदाहमेतंपुरुषंमहान्तम् आदित्यवर्णम्" इति श्रुतेः ब्रह्मादेस्तद्विषयज्ञानश्रवणात्कथं प्रतियोगिज्ञानस्य दुःसाध्यत्वमित्यत आह—मुह्यन्तीति । ब्रह्मादीनां भगवद्विषयज्ञानं दुःसाध्यं किं न्वितरेषामित्यतो वाह–मुह्यन्तीति । हिशब्दोऽप्यर्थे हेतौ वा वेदवादे कोविदाः ब्रह्मादयोऽपि यद्वर्त्मनि यत्र स्वरूपविषये मुह्यन्ति यस्मात्तस्मात्स एष दुरन्वयानुक्रमण इति निरूप्यते अतनहरेरनुग्रहमन्तरेण तद्विषयज्ञानं नोत्पद्यते तस्मिन् सति नतस्यात् "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः अन्वयव्यतिरेकौ दर्शिताविन्युक्तं भवति. ननु, त्वदुक्त्यैव त्वद्बुद्धिभेदजनकःकश्चित्स्यात्स क इति विचार्यत इति तत्राह–एष इति. मुह्यन्तीत्येतदत्राप्यनुकूल्यते यद्वर्त्मनि मुह्यन्त्येव हरिर्मम मतिं भिनत्ति विषयीकरोति सर्वस्य स्ववशत्वं स्वस्यानन्याधीनत्वं स्वप्रसादान्मोक्षादिसकलपुरुषार्थप्राप्तिरित्यादिबुद्धिं जनयतीति भावः तदुक्तम्"आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु"इत्यादि॥१३॥

एतदर्थं सदृष्टान्तमाह–यथेति । यथाकर्षस्यायस्कान्तस्य संनिधौ सत्ययः स्वयं भ्राम्यति स्वात्मानमुद्दिश्य गमनशक्तिं करोति तदिति शेषः तथा मे चेतो यदृच्छया तदिच्छया चक्रपाणौ भिद्यते तद्विषयीकरणाशक्तीक्रियते अयोगमनशक्तिवच्चेतनस्यापि नैसर्गिकीति भावः।एतेन सर्वं हर्यधीनमित्युक्तं भवति."एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योन्या नद्यः स्यन्दन्ते य आत्मानमन्तर्यमयेत्" इतिभेदस्वरूप माहेत्यादि श्रुतिस्मृतिभ्याम् । विशेषेणचराचरस्य सर्वस्य श्रीहर्यधीनप्रवृत्त्यवगमात्(१)पद्यन्नद्गत्यनेन पशुबुद्धिरबुद्धिभिरित्येतत्पदद्वयाभिप्रायो दर्शितः ॥ १४ ॥

सुदीनः वाचा शिक्षायां क्षीणोऽशक्त इत्यर्थः । राजसेवक इत्यनेन भेदज्ञानासामर्थ्यञ्च सूचितम् उभयोरपि वित्तसाध्यत्वात् ॥१५॥

अयशस्कृतो दुष्कीर्तिकरस्यास्य चतुर्थो दमो दण्डसंज्ञ इति उदित इत्यर्थः ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पर इति पुंसां "भयं द्वितीयाभिनिवेशतः स्यात्" इत्यादिरीत्यानादित एव भगवद्विमुखानां जीवानाम् अत एव न्यूनं सेर्ष्यं च यस्य भगवतो मायया मोहितधियां स्वरूपविस्मरणपूर्वकदेहात्मबुद्ध्या विशेषेण मोहितबुद्धीनामसतां यन्माययैव परः परकीयोऽयं स्वीयोऽयमित्यसदाग्रहः कृतस्तस्मै भगवते नमः, तेषां तदाग्रहशान्तये तमेव नमस्कारोमीत्यर्थः । स्वशब्दोऽयमात्मवाचक-

(१) तात्पर्योक्तप्रतीक मिदम् ।

तायां नपुंसकमेव स्यात् "स्वो ज्ञातावात्मनिस्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरः। तस्मादेवं व्याख्यातम् ॥ ११ ॥

ततश्च स यदेति कथञ्चिन्महतः प्रसङ्गेन तत्साम्मुख्ये सति यदा स भगवाननुकूलः स्यात्तदा पूर्वोक्ता पशुबुद्धिर्विभिद्यते नश्यतीत्यर्थः । ततस्तामेव विवृत्य दर्शयति—अन्य इति. अर्थकामशास्त्रानुसारिणां भक्ताननुगतानां नश्वरे सङ्घात एवात्मता मननादिति भावः ॥ १२ ॥

स प्रसिद्धः परमात्मा तु एष मद्दृष्टिगोचरतामिव गतः पूर्वोक्तैः स्वपरेत्यबुद्धिभिस्तु दुरत्ययानुक्रमणो निरूप्यते दुर्बोधरीतितया निश्चीयते ॥ अहो आसतां ते यतस्तद्वर्त्मनि वेदवादिनोऽपि मुह्यन्ति तेप्यासतां ब्रह्मादयोऽपि मुह्यन्तीति स एष एव च मन्मतिं भिनत्ति । भवन्मतात् पृथक्करोति ॥ १३ ॥

ननु, तेनैव त्वन्मतिर्भिद्यते न त्वस्माभिः तथा तवैव मतिस्तेन भिद्यते न त्वस्माकमिति कथं ? तत्राह—यथेति । यदृच्छया स्वैरितया कारणान्तरनिरपेक्षतयेत्यर्थः ।। "यदृच्छास्वैरिता" इत्यमरः । आकर्षायसोर्यथासौ स्वभावस्तथावयोरपीति युक्तमेव तत्तदित्यर्थः॥ १४ ॥

एतावदित्यर्द्धकम् । तामित्यर्द्धकम् ॥ १५ ॥

आनीयतामित्यस्याद्ये चरणे युष्माभिरिति द्वितीये यस्मादयमिति परार्द्धे यतो यस्येत्यध्याहार्यम्'आनयध्वमरे वेत्रम्'इत्यादिकतया तु यन्नोक्तं तत् खलु तस्य कोमलतां दृष्ट्वा नातिस्पष्टं कर्तुंशक्यत्वादितिगम्यते ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भद्रं ते इति त्वदिष्टं मोदकादिकं दास्याम इति भावः । वाचात् अतिक्रम्य तुभ्यं तव ॥ ९ ॥

भयतामिति यद्ययं वैष्णवस्य कस्यचिन्नाम गृह्णाति तदा तं वैष्णवं ज्ञात्वा राज्ञः सभां नीत्वा घातयाम इति भावः ॥ १० ॥

अहो मूढा इमे संसारे पापच्यमानाः मां मुग्धबालकं जानन्तीति मनसि विभाव्याह—परः परपक्षः स्वः स्वपक्ष इति असदाग्रहः असदाग्रहः श्लेषेण पुंसां संसारसिन्धुपतितानां ग्राहो हिंस्रजलजन्तुविशेषः कृतः मायया सृष्टः दृष्टः पूर्वमनुमित एवासीत् संप्रति तु प्रत्यक्षीकृत इत्यर्थः । अतो यूयं तेन प्रतिक्षणं चर्व्यध्वे एवेति भावः ॥ ११ ॥

बुद्धिभेदोऽयं तव कुत इत्यस्य प्रश्नस्योत्तरमाह—स इति । अनुव्रतो ऽनुकूलः विशेषेण भिद्यते. विदीर्यते पशुबुद्धिरेव का ? तत्राह—अन्य एषोऽस्मद्विपक्षस्तथाऽन्योऽहमेतस्य घातयितेति भेदं गता असती असाधुः "न हि गोप्यं हि साधूनाममत्रमित्रोदस्तविद्विषाम्"इति भगवदुक्तेर्वस्तुतस्त्वात्मदृष्ट्या सर्वजीवानामैकरूप्यात् देहदृष्ट्यापि सर्वदेहानां पञ्चभूतात्मकत्वाद्भेदो नास्त्येवेति भावः ॥ १२ ॥

उक्तलक्षणपशुबुद्धिमतां सुदुर्ज्ञेय इत्याह–स इति । एष परमात्मा स्वः स्वपक्षः परो विपक्षः इति कुत्सिता बुद्धिर्येषां तैर्दुरन्वयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

दुर्गमम् अनुक्रमणं अनुसरणं यस्य सः न च सुबुद्धिभिः शास्त्रज्ञैः सुगममेव तदनुसरणमिति वाच्यमित्याह—यद्वर्त्मनि यत्प्राप्तिमार्गेऽनुसरणरूपे भक्तियोगे वेदवादिनो वेदार्थतात्पर्यविवेचका अपि मुह्यन्ति यूयन्तु ज्ञानलवदुर्विदग्धाः किमुतेति भावः । एष भगवान् मे मतिं भिनत्ति युष्मन्मतिभ्यस्सकाशाद्भिन्नाङ्करोति ॥ १३ ॥

स एव मतेर्भेदः किमाकार इति चेत्तत्राह—यथा अयो लोहं आकर्षस्यायस्कान्तस्य सन्निधौ स्वयं भ्राम्यति तथैव मे चेतः चक्रपाणेः सन्निधौ स्वयमेव भ्राम्यति भिद्यते युष्मच्चेतोभ्यः सकाशाद्भिन्नं भवति यदृच्छयेति नात्र सत्कर्मनपोदानादेर्हेतुत्वं सम्भवतीत्यर्थः । अयमर्थः अयस्कान्तेन स्वसत्त्वैव लोहमाकृष्य स्वसंयुक्तीक्रियते तत्र किमपि कारणं प्रयोजनञ्च नास्तीत्ययस्कान्तस्य सस्वभाव एव यथा तथैव चक्रपाणेरपि स्वभाव एवायं यत्कृपापरवशतया स्वभक्तस्य चेतसः स्वस्मिन्नाकर्षणमिति तत्र मम किं स्वातन्त्र्यमस्तीतिभावः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

वेत्रं प्रहरणदण्डविशेषः यदयमयशस्करस्ततोऽस्य दुर्बुद्धेरुपायानां मध्ये चतुर्थो दमो दण्डः उदितः उक्तः शास्त्रेषु ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बालान्प्रति उल्लङ्घ्य तुभ्यं तव बुद्धिविपर्ययः कुतो जातः ॥ ९ ॥

ते बुद्धिभेदः प्रवृत्तिमार्गमस्मदाद्यनुष्ठितं त्यक्त्वा वासुदेवे बुद्धिप्रवेशः परेण केनापि कृतः उताहो स्वतोऽभवदिति भण्यताम् ॥ १० ॥

परः स्वश्चेति असद्ग्राहः दुष्टाग्रहः यस्य मायया प्रकृत्या कृतः तथैव मोहितधियां भवतां दृष्टो, न तु मम. तस्मै भगवते नमः सर्वस्य वासुदेवात्मकत्वात् यदनुग्रहतो वासुदेवबुद्धिप्रवेशस्तस्य श्रीमद्गुरोर्विशेषतः परत्वासम्भवात् हरिगुरुप्रसादं विना स्वतश्च वासुदेवे बुद्धिप्रवेशासम्भवात् बुद्धिभेदः परकृतः उताहो ते स्वतोऽभवदिति वाक्यं सर्वथाऽनुपपन्नमिति भावः ॥ ११ ॥

तव बुद्धिभेदः कुत इत्यत्राह—सएषइति । स भगवान् यदा अनुवृत्तः अन्तर्यामिरूपेण गुरुरूपेण च अनुकूलो भवति तदा एषोऽन्योऽहमन्यः इति भेदगता इत्येवं वासुदेवात्मकभ्रान्तिविलसितं भेदं प्राप्ता अत एवासती संसारआपिका अत एव पशूनामिव विवेकहीना बुद्धिर्विभिद्यते प्रवृत्तिमार्गाद्विभिन्ना भवति वासुदेवे प्रविशतीत्यर्थः ॥ १२ ॥

नन्वस्माकमनुव्रतः स कुतो नेत्यत्राह—स इति । स एष आत्मा परमात्मा दुरत्ययं दुरधिगममनुक्रमणम् अतत्वज्ञैर्वर्णनं यस्य अत एव स्वस्य परः शत्रुरिति अबुद्धिभिः परमात्मा भजनीय इति नास्ति बुद्धिर्येषां तैर्निरूप्यते न तु भवादृशास्तत्प्रपन्ना भवन्तीति भावः । "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः" इति श्रीमुखोक्तेः ॥ भवतामसुरपक्षीयाणान्तु का वार्ता वेदवादिनो वेदत्रयीप्रोक्तकर्मनिष्ठास्तेभ्योऽपि श्रेष्ठाः ब्रह्मादयः यद्वर्त्मनि यत्प्राप्तिमार्गे मुह्यन्ति स्वपरेति सन्धिरार्षः ॥ १३ ॥

तत्कृपया तु मम बालस्यापि चेतस्तद्वर्त्मनि प्रविशतीत्याह—यथेति । यथा आकर्षसन्निधौ अयस्कान्तसमीपे अयो लोहः स्वयं भ्राम्यति तथा मे चेतो यदृच्छया चक्रपाणेः सन्निधौ भवतां प्रकृतिमार्गाद्भिन्नं भवति, तद्वर्त्मनि प्रविशतीत्यर्थः ॥ १४ ॥

तं प्रह्लादम् स ब्राह्मणो निर्भर्त्स्याहेति शेषः ॥ १५ ॥

अरे वेत्रमानीयताम् यतोऽयमस्माकमयशस्करः अतोऽस्य कुलाङ्गारस्य दैत्यकुलनाशहेतोः दमः दमनहेतुः उपायानां चतुर्थो दण्ड उदितः शास्त्रे उक्तः ॥ १६ ॥

भाषाटीका ।

हे वत्स प्रल्हाद ! तुमारा भला हो तुम सच कहो झूठ मत बोलो कि इन बालकों को भी अतिक्रमण करके यह तुमारी विपरीति बुद्धि कैसे हुई ॥ ९ ॥

यह तुमारी बुद्धि का भेद किसी दूसरे के सिखाने से है अथवा आपही से है, हे कुलनन्दन ! हम तुमारे गुरु लोक सच्ची सुनने की इच्छा करते हैं तुम कहो ॥ १० ॥

प्रल्हादउवाच ॥

प्रल्हाद बोले, कि यह अपना यह पराया ऐसा असत् ग्रहण जिसकी माया से मोहित बुद्धि वाले असत्पुरुषों को होरहा है उस भगवान को नमस्कार है ॥ ११ ॥

वही भगवान् जब पुरुषों पर अनुकूल होता है तब यह अन्य है मैं अन्य हूं इस प्रकार पशुओं के तरह भेद को प्राप्त जो दुष्ट बुद्धि सो मेरीतरह भेद को प्राप्त हो जाती है ॥ १२ ॥

जिसके चरित का अनुवर्णन दुर्घट है और अबुद्धि लोग जिस को स्व पर ऐसा करके वर्णन करते हैं और जिसके मार्ग में वेद वादि बड़े २ ब्रह्मादिक मोहित होते हैं वही परमात्मा हमारी मति का भेद करते है ॥ १३ ॥

हे ब्रह्मन् ! जैसे चुंवक के समीप में लोह आपही खिच जाता है इसी प्रकार मेरा भी चित्त उन चक्रपाणि की इच्छा से भिन्न होरहा है ॥ १४ ॥

नारद उवाच ॥

नारदजी बोले, कि—महामति प्रल्हाद ब्राह्मण से इतना कह कर चुप होगए ॥ वह विचारा दीन ब्राह्मण राज सेवक प्रल्हाद को भय दिखाकर कुपित होकर बोला ॥ १५ ॥

अरे ! हमारा वेत्र तौ लाओ यह हमारी आकीर्ति कराने वाला है इस कुलांगार दुर्बुद्धि को चतुर्थ उपाय दंड ही उचित है ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः ।
यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥
इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ।
प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥
तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ।
दैत्येन्द्रं दर्शयामास मातृमृष्टमलङ्कृतम् ॥ १९ ॥
पादयोः पतितं बालं प्रतिनन्द्याऽऽशिषाऽसुरः ।
परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥
आरोप्याङ्कमवघ्राय मूर्द्धन्यश्रुकलाऽम्बुभिः ।
आसिञ्चन्विकसद्वक्त्रमिदमाह युधिष्ठिर ! ॥ २१ ॥
हिरण्यकशिपुरुवाच ।
प्रह्लादानूच्यतां तात ! स्वधीतं किञ्चिदुत्तमम् ।
कालेनैतावताऽऽयुष्मन् ! यदशिक्षद्गुरोर्भवान् ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्कुतः ? तत्राह—दैतेया एव चन्दनद्रुमास्तेषां वनेऽयंकण्टकद्रुमतुल्यो जातः, तदेवाऽऽह, यस्य दैतेयचन्दनवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितो नालमिवाचरत् यथा परशोश्छेदकत्वे वब्बूलादिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासम्भवात्तथाऽयं विष्णोर्दैत्यमूलोच्छेदे हेतुर्जात इत्यर्थः ॥ १७ ॥

इति तं प्रह्लादं भीषयन्धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास ॥ १८ ॥

ज्ञातं ज्ञेयमुपायानां चतुष्टयं सामदानादि येन तं दैत्येन्द्रं प्रति मात्रा मृष्टमुद्वर्त्य स्नापितम् अलङ्कृतं भूषणतिलकादिभिः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुलनाशकत्वं व्यनक्ति—दैतेया एव चन्दनद्रुमाः तेषां वनेऽयं कण्टकद्रुमतुल्यो जातस्तन्मूलेऽपि तेषां दैतेयचन्दनवनानां यानिमूलानि तेषामुन्मूलने छेदने परशोः परशुस्थानीयस्य विष्णोरयमर्भको नालायितः नालवदाचरितवान् यथा परशोश्छेदकत्वे कर्बुरादिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासंभवात् तथा अयं विष्णोः दैत्यमूलस्य छेत्तुः सहकारी जात इत्यर्थः ॥ १७ ॥

इतीत्थं वदन् तर्जनादिभिर्नानोपायैर्भीषयन् प्रह्लादं तं त्रिवर्गस्योपपादनं धर्मार्थकामप्रतिपादकं शास्त्रं ग्राहयामास ॥ १८ ॥

ततो गुरुरेनं प्रह्लादं ज्ञातं ज्ञेयानामुपायानां सामादीनां चतुष्टयं यस्य तादृशं ज्ञात्वा आलक्ष्य मात्रा मृष्टं उद्वर्त्य स्नापितम् अलङ्कृतञ्च प्रह्लादं दैत्येन्द्रंप्रति दर्शयामास, पितृसन्निधौ प्रापयामासेत्यर्थः ॥ १९ ॥

ततः पादयोः प्रणमन्तं नमस्कुर्वन्तं बालम् आशिषा आशीःपूर्वकं प्रतिनन्द्य असुरो हिरण्यकशिपुः दोर्भ्यां भुजाभ्यां (पुत्रस्य शिरः) परिष्वज्य परमां निर्वृतिमानन्दं प्राप्तवान् ॥ २० ॥

तत उत्सङ्गे निधाय मूर्द्धन्युपाघ्राय च अश्रुकलाम्बुभिर्हर्षाश्रुजलबिन्दुभिरासिञ्चन् विकसद्वदनं यस्य तादृशो दैत्यः सुतं प्रतीत्थं वक्ष्यमाणमाह—युधिष्ठिरेति पाठे सम्बोधनम् ॥ २१ ॥

तदेवाह—प्रह्लादेति । हे आयुष्मन् तात ! पुत्र प्रह्लाद ! भवानेतावता कालेन गुरोः सकाशाद्यदुपशिक्षदधीतवांस्तन्मध्ये किंचिदुत्तमं स्वधीतं सम्यगावृत्त्या गृहीतं तत् हे तात ! प्रह्लाद, अनूच्यतां सम्यगनुक्रमेण पठ्यताम् ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उन्मूलयतीत्युन्मूलः स चासौ परशुश्च उन्मूलपरशुस्तत्स्वदैतेयचन्दनवनस्य मूलं तन्मूलपरशुस्तस्य नालायितः मण्डपवत्तन्वानः ॥ १७ ॥

त्रिवर्गस्योपपादनं शास्त्रम् ॥ १८ ॥

ज्ञातं ज्ञेयानां धर्मादिपुरुषार्थानां चतुष्टयं येन स तथा तं ज्ञातज्ञेयसाधनचतुष्टयं वा मातृमृष्टं शरीरमलत्यागेन स्नानं कारितम् १९ ॥ २० ॥ २१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रह्लाद उवाच ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥
इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नव लक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुष्ठु अधीतं पठितम् ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनश्च स एव तादृशपरमशुद्धरूपस्य विष्णोर्नालायितः इत्यसामञ्जस्यमतीवेति भावः ॥ १७—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोर्नालायितो-दण्डस्थानीयः लोके हि परशोर्दण्डो वर्बुर एव सिद्धः स च कण्टकिद्रुमः ॥ १७ ॥

ग्राहयामास ग्राहयितुं यतते स्मेत्यर्थः ॥ १८ ॥

ज्ञातं ज्ञेयं ज्ञातुमर्हं चतुष्टयं सामदानभेददण्डात्मकमुपायचतुष्कं येन तद् ॥ १९—२१ ॥

सुष्ठु अधीतं संशयादिरहितं अनुकूलं गुरोर्हिरण्यकशिपुमते शुक्राचार्यात्मजात् प्रह्लादमते गुरोः श्रीनारदात् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च दैतेयचन्दनवने अयं कण्टकद्रुमः यत् यस्य दैतेयचन्दनवनस्य यन्मूलं हिरण्यकशिपुप्रभृतिदैत्ययूथपसमूहभूतत्तदुन्मूलयतीति तथा तस्य परशोः परशुस्थानीयस्य विष्णोर्नालयितो नालमिवाचरदयमर्भकः ॥ १७ ॥

त्रिवर्गस्य धर्मार्थकामसमूहस्योपपादनं प्रतिपादकं प्रवृत्तिशास्त्रं ग्राहयामास ॥ १८ ॥

ततस्तदनन्तरं गुरुः पाठकः एनं प्रह्लादं ज्ञातं ज्ञेयचतुष्टयं ज्ञातव्यभूतानां सामदानभेददण्डानां चतुष्टयं येन तं तथाभूतं ज्ञात्वा मात्रा मृष्टमुद्वर्त्यस्नापितमलंकृतञ्च दैत्येन्द्रंप्रति दर्शयामास ॥ १९ ॥

चिरञ्जीवेत्याद्याशिषा प्रतिनन्द्य ॥ २० ॥

अश्रुकलाम्बुभिः आनन्दाश्रुबिन्दुजलैः ॥ २१ ॥

आयुष्मन् हे तात ! प्रह्लाद ! एतावता कालेन गुरोस्सकाशात् भवान् यत्किञ्चित् अशिक्षत् तत्र उत्तमं सारभूतं सुष्ठु अधीतम् अनूच्यताम् अनुक्रमेण भण्यताम् ॥ २२ ॥

भाषा टीका ।

यह दैत्य रूप चंदन वन में कंटकद्रुम उत्पन्न हुआ है जिस दैत्य रूप चंदन वन की मूलका उन्मूलन करने वाला जो विष्णुरूप परशु (कुल्हाडी) उसका नाल (बेंटा) रूप सहकारी यह बालक है ॥ १७ ॥

इस तरह तर्जन आदि नाना उपायों से प्रल्हाद को भय देते हुए, अर्थ धर्म और काम इस त्रिवर्ग के प्रतिपादक शास्त्र को पढाने लगे ॥ १८ ॥

तदनंतर गुरुने जाना कि यह सामदानादि चारों उपायों को जानचुका तब माता से उबटन स्नान आदि पूर्वक अलंकृत कराकर, दैत्येन्द्र के समीप ले गये ॥ १९ ॥

असुरराज भी चरणों में पड़े हुए बालक को अशीस द्वारा अभिनंदन कर बाहुओं से आलिंगन कर बड़े हर्ष को प्राप्त हुआ ॥ २० ॥

और गोद में बैठा कर मस्तक आघ्राणकर उसके प्रसन्न मुख को प्रेमाश्रुओं से सींचता हुआ, हे युधिष्ठिर ! यह वक्ष्य माण वाक्य बोला ॥ २१ ॥

हिरण्यकशिपुरुवाच ॥

हिरण्यकशिपु बोला, कि—तात प्रह्लाद ! तुमारी दीर्घ आयु हो इतने काल तक जो तुमने कुछ गुरुजी से सीखा और जो अच्छा पढा उसे कहो ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पादसेवनं परिचर्या, अर्चनं पूजा, दास्यं कर्मार्पणम्, सख्यं तद्विश्वासादि, आत्मनिवेदनं स्वशरीरसमर्पणम्, यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिन्तावर्जनमित्यर्थः ॥ २३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा ।
गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥
ब्रह्मबन्धो ! किमेतत्ते विपक्षं श्रयताऽसता ।
असारं ग्राहितो बालो मामनादृत्य दुर्मते ! ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति नव लक्षणानि यस्याः सा अधीते न चेद्भगवति विष्णौ भक्तिः क्रियते साचार्पितैव सती यदि क्रियेत न तु कृता सती पश्चादर्प्येत तदुत्तममधीतं मन्ये न त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किञ्चिदस्तीति भावः ॥ २४ ॥ २५ ॥

न विद्यते सारं यत्र तदसारम् न विद्यते सारं यस्मादिति वास्तवोऽर्थः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तमुत्तममधीतमध्ये किञ्चिदनूच्यतामिति तत्राह-श्रवणमिति । यदुक्तं पूर्वं "वनं गतो यद्धरिमाश्रयेत" इति तदेवाश्रयणं विवृणोति, श्रवणमिति द्वाभ्याम्. पुंसां श्रवणादीनि नव लक्षणानि यस्याः सा भक्तिश्चेन्नव लक्षणा भक्तिप्रतिपादकशास्त्रमधीतं चेत्तदेव स्वधीतमुत्तमं मन्ये न त्वधुना गुरोः सकाशादधीतं तत्तु गुरुभिर्नाध्यापितमिति भावः । स्वधीतप्रश्नोत्तरनिगमनमुत्तममधीतमिति. श्रवणमित्यादि तु पूर्वोक्ताश्रयणविवरणपरं भगवत्यद्धा क्रियते चेदधीतविद्याप्रतिपाद्या नव लक्षणाभक्तिर्निष्कपटभावेन भगवति क्रियते इति यत्कृतापि सा भक्तिर्विष्णावर्पितेति यच्च तदेतदुत्तमं मन्ये न केवलं नवलक्षणा भक्तिप्रतिपादकशास्त्राध्ययनमात्रमेवोत्तमम् अपि तु तदर्थानुष्ठानमनुष्ठितस्येश्वरे समर्पणं चेत्यत्युत्तमं मन्ये केवलाध्ययनमात्रस्य व्यर्थत्वादिति भावः अर्पिता विष्णाविस्यनेन भक्तेरनन्यप्रयोजनत्वेन कर्त्तव्यतोक्ता. तत्र विष्णोः श्रवणं तत्स्वरूपरूपगुणविभूतिश्रवणम्. कीर्त्तनं नामोच्चारणाद्यात्मकम्, स्मरणं स्वरूपादिविषयकमेव पादसेवनार्चनवन्दनदास्यसख्यानि तु तदीयपर्यन्तानि वन्दनं नमस्कारः पादसेवनं पादयोः सम्वाहनं तच्चार्चाविग्रहतदीयपादयोश्चेति वेदितव्यं परव्यूहविभवादेरतीन्द्रियत्वेन तत्पादसेवनासम्भवात् यद्वा भगवद्विषये मानसिकं तदीयविषये तु कायिकं विवक्षितम् आत्मनिवेदनम् "ओमित्यात्मानं युञ्जीत" इति श्रुत्युक्तरीत्या तच्छेषत्वानुसन्धानं यद्यपि भक्तिर्नाम ध्यानोपासनादिशब्दवाच्याऽहरहरभ्यासाधेयातिशया आप्रयाणादनुवर्त्तमाना विवेकादिसाधनसप्तकानुगृहीता तैलधारावदविच्छिन्नस्मृतिसन्तानात्मिका प्रीत्यात्मिका प्रत्यक्षतापन्ना ध्रुवानुस्मृतिः । ननु श्रवणादिरूपेण नवलक्षणा, तथाप्युक्तविधाया भक्तेरेव कर्मज्ञानयोगादिवच्छमदमादिवच्च श्रवणादीन्यप्यविलम्बेन निवर्त्तकान्युच्यन्ते. यद्वा, नवलक्षणा लक्ष्यते एभिरिति लक्षणानि चिह्नानि ज्ञापकानि भक्तियोगपरिपाकावस्थाज्ञापकानीति यावत्. उक्तविधभक्तियोगनिष्ठेन रागत एव श्रवणादीनि क्रियन्ते. लोकेऽपि हि यद्वस्तुविषया प्रीतिस्तद्विषयकश्रवणादीनि स्वत एव प्राप्तानीति न तत्र यत्नेन भवितव्यम्. अतः श्रवणादीनि प्रीत्यात्मकभक्तियोगकारितावस्थाविशेषरूपाणि तन्निष्पत्तिसूचकानीति तात्पर्यम्. एवं प्रीतिकारितश्रवणादिपर्यन्तभक्तियोगानुष्ठानमेव "वनङ्गतो यद्धरिमाश्रयेत" इत्युक्तमाश्रयणमित्युक्तं भवति ॥ २३ ॥ २४ ॥

एतदेवंविधं सुतस्य वचो निशम्याकर्ण्य तदा हिरण्यकशिपुः रुषा प्रस्फुरितः कम्पमानः अधरोष्ठो यस्य तादृश इदं वक्ष्यमाणं गुरुपुत्रं प्रत्युवाच ॥ २५ ॥

तदेवाह—हे ब्रह्मबन्धो ब्राह्मणाभास ! किमेतत्ते त्वया कृतमिति शेषः, अतीवानुचितमेतत्कृतमित्यर्थः । किंतत् ? यन्मामनादृत्य विपक्षं शत्रुपक्षमाश्रयता अत एव असतां मह्यमहितकारिणा त्वया हे दुर्मते ! असारं ग्राहितो बाल इति एतत् ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नियन्तृत्वेनात्मनि मयि स्थितो भगवानिति नितरां वेदनमात्मनिवेदनम्—

"मुक्तस्यापि ममान्तःस्थो नियन्तैव हरिः सदा ।
इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनम्" ॥

इत्येतदात्म समर्पणं नार्थः किंतूक्त एवार्थः इत्युक्तकारेण श्रवणादिभिर्लक्ष्यते असंभवव्यभिचारपरिहारेण ज्ञायत इति ॥ २३ ॥

नवलक्षणा विष्णौ भक्ति येस्मिन् शास्त्रेर्पिता प्रतिपादिता पुंसा सा भगवत्युत्तमश्लोके अद्धा निर्व्याजेन क्रियते चेद्यति तर्हि तदधीतं शास्त्रमुत्तमं मन्ये नान्यदित्यन्वयः । नव श्रवणादीनि लक्षणानि चिह्नानि यस्यां सा तथा ॥ २४—२५ ॥

ते त्वया ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रवणमिति युग्मकं । तत्र श्रवणन्नाम, रूपगुणपरिकरलीलामयशब्दानां श्रोत्रस्पर्शः एवं कीर्त्तनस्मरणयोरपि क्रमो ज्ञेयः स्मरणं यत्किञ्चिन्मनसानुसन्धानम्. पादसेवनं कालदेशाद्युचितपरिचर्या. अर्चनं विष्णुपूजा. वन्दनं नमस्कारः. दास्यं तद्दासोस्मीत्यभिमानः, सख्यं बन्धुभावेन तदीयहिताशंसनम्.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मनिवेदनं देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्नेवार्पणम् इति नवलक्षणानि यस्याः सा भगवति तद्विषयिका श्रद्धा साक्षाद्रूपा न तु कर्माद्यर्पणरूपपरम्परा भक्तिरियं तत्रापि श्री विष्णुरेवार्पिता तदर्थमेवेदमिति भाविता न तु धर्मार्थादिष्वर्पिता एवमेवम्भूता चेत् क्रियेत, तदा तेन कर्त्रा यदधीतं तदुत्तमं मन्ये इत्यर्थः । तथाच श्रीगोपालतापनी श्रुतिः "भक्तिरस्य भजनं तदिहामुत्रोपाधि नैराश्येनामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यम्" इति. अत्र नवलक्षणसमुच्चयो नावश्यकः एकेनैवाङ्गेन साध्याव्यभिचारश्रवणात् क्वचिदन्याङ्गमिश्रणन्तु तथापि भिन्नश्रद्धारुचित्वात्. ततो नवलक्षणशब्देन सामान्योक्त्या तन्मात्रानुष्ठानं विधीयत इति ज्ञेयं नवलक्षणत्वञ्चास्याः अन्येषामप्यङ्गानां तदन्तर्भावाद्युक्तम्. किञ्चिच्चात्र विशिष्यलिख्यते—तदेवं नामादिश्रवणभक्त्यङ्गक्रमः, तत्र यद्यप्येकतरेणापि व्युत्क्रमेणापि सिद्धिर्भवत्येव तथापि प्रथमं नाम्नः श्रवणमन्तःकरणशुद्ध्यर्थमपेक्ष्यम्. शुद्धेचान्तः करणे रूपश्रवणेन तदुदययोग्यता भवति. सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पद्यते. सम्पन्ने च गुणानां स्फुरणेन परिकरविशिष्टत्वे तद्वैशिष्ट्यं सम्पद्यते ततस्तेषु नामरूपगुणपरिकरेषु सम्यक् स्फुरतेषु लीलानां स्फुरणं सुष्ठु भवतीत्यभिप्रेत्य साधनक्रमो लिखितः । एवं कीर्त्तनस्मरणयोश्च ज्ञेयम् इदञ्च श्रवणं श्रीमहन्मुखरितं तन्माहात्म्यं जातरुचीनां परमसुखदम्. तच्च द्विविधम्, महदाविर्भावितं महत्कीर्त्यमानञ्चेति. तत्रापि श्रवणे श्रीभागवतश्रवणन्तु परमश्रेष्ठं तस्य तादृशप्रभावमयशब्दात्मकत्वात् परमरसमयत्वाच्च. अत्र सूत्याभिमतयान इतिवन्निजाभीष्टनामादिश्रवणन्तु मुहुरावर्त्तयितव्यम् तत्रापि सवासनमहानुभवमुखात् सर्वस्व श्रीकृष्णनामादिश्रवणन्तु परमभाग्यादेवसम्पद्यते, तस्य पूर्णभगत्वात् इति. एवं सङ्कीर्त्तनादिष्वप्यनुसन्धेयम्. तत्र यत् स्वयं सम्प्रति कीर्त्यते तदपि श्रीशुकदेवादिमहत्कीर्त्तितचरत्वेनानुसन्धाय कीर्त्तनीयमिति तत्रैवं श्रवणं दर्शितम्. अस्य कीर्त्तनादितः पूर्वत्वं तद्विना तत्तदज्ञानात् । विशेषतश्च यदि साक्षादेव महत्कृतस्य कीर्त्तनस्य श्रवणभाग्यं सम्पद्यते तदैव स्वयं पृथक्कीर्त्तनीयमिति तत्प्राधान्यात्. एवमेवोक्तं तद्वाग्विसर्गइत्यादौ टीकाकृद्भिः यत् यानि नामानि वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति अन्यदातु स्वयमेव गायन्तीति. अथातः कीर्त्तनम्, तत्र पूर्ववत् नामादिक्रमोज्ञेयः नामकीर्त्तनञ्चेदमुच्चैरेव प्रशस्तं "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादौ. अथ तथोपदिष्टं कलियुगपावनावतारेण श्रीभगवता "तृणादपि सुनीचेन तरोरपि तितिक्षुणा । अमानिना मानदेन कीर्त्तनीयः सदा हरिः" ॥ इति. इयञ्च कीर्त्तनाख्या भक्तिर्भगवतो द्रव्यजातिगुणक्रियादीन् जनैकविषयापारकरुणामयीतिश्रुतिपुराणादिविश्रुतिः कलौ तदीनत्वम्. यथा ब्रह्मवैवर्त्ते "अतः कलौ तपोयोगविद्यायज्ञादिकाः क्रियाः । सङ्गाभवन्ति न कृता कुशलैर्वापि देहिभिः" ॥ इति. अत एव कलौ स्वभावत एवातिदीनेषु लोकेष्वाविर्भूय तानानायासेनैव तत्तद्युगगतमहासाधनानां सर्वमेव फलं ददाना सा कृतार्थयति. यत एव कलौ भगवतो विशेषतश्च सन्तोषो भवति. अत्र कलिप्रसङ्गेन कीर्त्तनस्य गुणोत्कर्ष इति वक्तव्यं भक्तिमात्रे कालदेशादिनियमस्य निषिद्धत्वात्. तस्मात् सर्वत्रैव युगे श्रीमत्कीर्त्तनस्य समानमेव सामर्थ्यम् कलौ श्रीभगवता कृपया तद्ग्राह्यम् इत्यपेक्षयैव तत्तत्प्रशंसेति स्थितम् अत एव यद्यन्या भक्तिः कलौ कर्त्तव्या तदा तत्संयोगेनैवेत्युक्तं "यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्तिहि सुमेधसः" इति । तत्र च स्वतन्त्रमेव नामकीर्त्तनमत्यन्तप्रशस्तं "हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" इत्यादौ. अत्र पाद्मोक्ताः दशापराधाः त्याज्याः यथा सनत्कुमारवाक्ये "सर्वापराधकृदपि मुच्यते हरिसंश्रयः । हरेरप्यपराधान् यः कुर्याद्द्विपदपांसनः ॥ नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः । नाम्नोपि सर्वसुहृदो ह्यपराधात् पतत्यधः" ॥ अपराधाश्च संक्षिप्य लिख्यन्ते, यथा सतां निन्दा (१) श्रीविष्णोस्सकाशाच्छिवनामादेः स्वतन्त्र्यामननम् (२) गुर्ववज्ञा (३) श्रुतितदनुगतशास्त्र निन्दनम् (४) । हरिणाममहिम्नि अर्थवादमात्रमितिमननम् (५) तत्र प्रकारान्तरेणार्थकल्पनम् (६) । नामबलेन पापे प्रवृत्तिः (७) । अन्यशुभक्रियाभिर्नामसाम्यमननम् (८) । अश्रद्दधाने विमुखेप्यशृण्वन्ति नामोपदेशः (९) । नाममाहात्म्ये श्रुतेप्यप्रीतिरिति (१०) । एतेषामपराधानामनन्यप्रायश्चित्तञ्चोक्तम्. तत्रैव "नामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च" इति । सत्स्वप्यपराधेतु तत्सन्तोषणार्थमेव सन्ततनामकीर्त्तनादिकं समुचितम् अम्बरीषचरितादौ तदेकाक्ष्यत्वे नामापराधानां दर्शनात् उक्तञ्च नामकौमुद्याम् महदपराधस्य भोगएव निवर्त्तकस्तदनुग्रहो वेति. अत एवोक्तं श्रीशिवंप्रति दक्षेण–"योऽसौ मया विदिततत्त्वदृशा सभायाम्" इत्यादि. अस्मिन्कीर्त्तने निजदैन्यनिजाभिष्टविज्ञप्तिस्तवपाठादयप्यन्तर्भावौ तथात्र श्रीभागवतस्थितनामादिकीर्त्तनन्तु पूर्ववदन्यदीयनामादिकीर्त्तनादधिकं ज्ञेयम्. अथ कीर्त्तनादिभिः शुद्धान्तःकरणश्चेत् "एतन्निर्विद्यमानानाम्" इत्याद्युक्तत्वान्नामकीर्त्तनापरित्यागेन स्मरणं कुर्यात् यद्येव नामादिसम्बन्धित्वेन बहुविधं भवति तच्च पञ्चविधं यत्किञ्चिदनुसन्धानं स्मरणं सर्वतश्चित्तमाकृष्य सामान्याकारे मनोधारणं धारणा. विशेषतो रूपादिचिन्तनं ध्यानं अमृतधारावदनवच्छिन्नं तद्ध्रुवानुस्मृतिः ध्येयमात्रस्फुरणं समाधिरिति क्वचिल्लीलादियुक्ते च तस्मिन् अन्यास्फुर्त्तिः समाधिस्स्यात् एतद्रूपो दासादिभक्तानां पूर्वस्तु प्रायः शान्तभक्तानाम् अथ रुचिः शक्तिश्च चेतदपरित्यागेन पादसेवाच कर्त्तव्या सेवा स्मरणसिद्ध्यर्थं सा कैश्चित्क्रियते पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः ततः सेवायाः सादरत्वं विधीयते अस्य श्रीमूर्त्तिदर्शनस्पर्शनपरिक्रमानुव्रजनभगवन्मन्दिरगङ्गापुरुषोत्तमद्वारकामथुरादितदीयतीर्थस्थान--गमनादयोऽप्यन्तर्भाव्याः तत्परिकरप्रायत्वात् गङ्गादीनां परमभागवतत्वपक्षे तु तत्सेवादिकं महत्सेवादावेव पर्यवस्यति तुलसीसेवा च तस्याश्चैवान्तर्भाव्या ततो महतामिव गङ्गादीनां भक्तिनिदानत्वम्. अथार्चनम्. तन्मार्गे श्रद्धाचेदाश्रितमन्त्रगुरुस्तं विशेषतः पृच्छेत् यद्यपि श्रीभागवतमते पञ्चरात्रादिवदर्चनमार्गस्यावश्यकत्वं नास्ति तद्विनापि श्रवणादीनामेकतरेणापि पुरुषार्थसिद्धेरभिहितत्वात्. तथोक्तं प्राचीनैरपि ।—

[२५]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"श्रीविष्णोः श्रवणे परीक्षिदभवत् वैयासिकिः कीर्त्तने-
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः-
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम्" ॥ इति.

तथापि श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह सम्बन्धविशेषं दीक्षाविधानेन श्रीगुरुचरणसम्पादितं चिकीर्षद्भिः कृतायां दीक्षायामर्चनमवश्यं क्रियेतैव येतु सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्चनमार्ग एव मुख्यः तदकृत्वापि निष्किञ्चनवत्केवलस्मरणादिनिष्ठत्वे वित्तशाठ्यप्रतिपत्तिः स्यात्. परद्वारा सम्पादनं व्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकं ततो श्रद्धामयत्वाद्धीनमेव तत्. किञ्च, गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतया तदर्चनमार्गाद्विशेषेण प्राप्तेऽप्यर्चनमार्गस्य प्राधान्यम् अत्यन्तविधिसापेक्षत्वात्तेषां तथा गार्हस्थ्यधर्मस्य देवता यागरूपस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्चनमित्यपि तदकरणे महान् दोषः । दीक्षितानाञ्च सर्वेषां तदकरणे नरकपातः श्रूयते । अशक्तमयोग्यंप्रति चाग्नेये ।"पूजितं पूज्यमानं वा यः पश्येद्भक्तितो हरिम् । श्रद्धया मोदयेद्यस्तु सोपि योगफलं लभेत्" ॥ इति. योगोऽत्र पाञ्चरात्राद्युक्तः क्रियायोगः किञ्चास्मिन्नर्चनमार्गे अवश्यं विधिरत्तणीयः तत्र वैष्णवसम्प्रदाय एव प्रमाणम् । ननु, भगवन्नामात्मका एव मन्त्राः तत्र विशेषेण नमः शब्दाद्यलङ्कृताः । श्रीभगवना श्रीमहर्षिभिश्चाहितशक्तिविशेषाः श्रीभगवता सममात्मसम्बन्धविशेषप्रतिपादकाश्च. तत्र केवलानि भगन्नामान्यपि निरपेक्षाण्येव परमपुरुषार्थफलपर्यन्तदानसमर्थानि. ततो मन्त्रेषु नामतोऽधिकसामर्थ्ये लब्धे कथं दीक्षाद्यपेक्षा ? उच्यते यद्यपि स्वरूपतो नास्ति तथापि प्रायः स्वभावतो देहादिसम्बन्धेन कदर्यशीलानां विक्षिप्तचित्तानां जनानां तत्सङ्कोचीकरणाय श्रीमहर्षिप्रभृतिभिरत्राचंनमार्गे क्वचित् काचिन्मर्यादा स्थापितास्ति. ततस्तदुलंघने शास्त्रं प्रायश्चित्तत्वमुद्भावयति तत उभयमपि समञ्जसमिति. तदेतदर्चनं द्विविधम् । केवलं कर्ममिश्रञ्च, तयोः पूर्वनिरपेक्षाणां श्रद्धावताम् उत्तरं व्यवहारचेष्टातिशयवता याहच्छिकभक्त्यनुष्ठानवत्तादिलक्षणलाक्षितश्रद्धानां । तथा तद्वैपरीत्यलक्षितश्रद्धानामपि प्रतिष्ठितानां भक्तिवार्तानभिज्ञबुद्धिषु साधारणवैदिककर्मानुष्ठानलोपोपि माभूदिति लोकसंग्रहपराणां गृहस्थानां दर्शितम् । अस्याङ्गानि चागमादौ ज्ञेयानि तथा श्रीकृष्णजन्माष्टमीकार्तिकादिव्रतैकादशीव्रतादिकम् अत्रैवान्तर्भाव्यम् अथास्मिन् पादसेवनार्चनमार्गे अपराधास्त्याज्या अत्रागमोक्तानुसारेण लिख्यन्ते—

"यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे वाप्यशौचे वा भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्यङ्कबन्धनम् ।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः ।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ।
अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम् ॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम् ।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ॥
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके ।
पृष्ठीकृत्यासनञ्चैव परेषामभिवादनम् ॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ।
अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्तिताः" ॥

वाराहेच येऽन्येपराधास्ते संक्षिप्य लिख्यन्ते । राजान्नभक्षणम् ध्वान्तागारे हरेः स्पर्शः विधिं विना हर्य्युपसर्पणं वाद्यं विना तद्द्वारोद्घाटनं कुक्कुरदृष्टे भक्ष्यसंग्रहः अर्चने मौनभङ्गः पूजाकाले विड्उत्सर्गायगमनं । गन्धमाल्यादिकमदत्वा धूपनम् अनर्हपुष्पेण पूजनं तथा—

"अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा ।
स्पृष्ट्वारजस्वलां दीपं तथा मृतकमेव च ॥
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटम् ।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतम् ॥
क्रोधंकृत्वा श्मशानञ्च गत्वा भुक्त्वाप्यजीर्णभुक् ।
भुक्त्वा कुसुम्भं पिण्याकं तैलाभ्यङ्गं विधाय च ॥
हरेः स्पर्शो हरेः कर्मकरणं पातकावहम्" ॥

तथा तत्रैवान्यत्र । भगवच्छास्त्रानादरेण तत्प्रतिपत्तिः अन्यशास्त्रप्रवर्त्तनं तदग्रतस्ताम्बूलचर्वणं एरण्डपत्रस्थपुष्पैरर्चनं आसुरकाले पूजा पीठे भूमौ चोपविश्य पूजनं स्नपनकाले वामहस्तेन तत्स्पर्शः पर्युषितैर्याचितैर्वापुष्पैरर्चनं पूजायां ष्ठीवनं तस्यां स्वगर्वप्रतिपादनं तिर्यक्पुण्ड्रधृतिः अधौतपदत्वेपि तन्मन्दिरप्रवेशः अवैष्णवपक्वनिवेदनं अवैष्णवदृष्टौ पूजनं विघ्नेशमपूजयित्वा कपालिनं दृष्ट्वा वा पूजनं न खाम्भसा स्नपनं घर्माम्बुलिप्तत्वेपि पूजनम् इत्यादयः अन्यत्र निर्माल्यलंघनं भगवच्छपथादयोन्ये च बहवः अथ तथापि प्रामादिके भगवदपराधे पुनर्भगवत्प्रसादनानि कर्त्तव्यानि. यथा स्कान्धे अवन्तीखण्डे श्रीव्यासवाक्यम्. "अहन्यहनि यो मर्त्यो गीताध्यायं पठेत्तु वै । द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः" इति तत्रैव द्वारकामाहात्म्ये"सहस्रनाममाहात्म्यं यः पठेत् शृणुयादपि । अपराधसहस्रेण न स लिप्येत् कदाचन" इति तत्रैव रेवाखण्डे—

द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवम् ।
द्वात्रिंशदपराधान् हि क्षमते तस्य केशवः ॥ इति.
तत्रैवान्यत्र । तुलस्यारोपणं कार्यं श्रवणेन विशेषतः ।
अपराधसहस्राणि क्षमते पुरुषोत्तमः" ॥ इति.
अत्रैवान्यत्रकार्तिकमाहात्म्ये—
तुलस्या कुरुते यस्तु शालग्रामशिलार्चनम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः " ॥ इति.

ब्रह्मपुराणे—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः" ॥ इति.

आदिवाराहे—

"सम्वत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरेकं यः सेवेत् सुकृती नरः ॥
सहस्रजन्मजनि कृतानपराधान् जहाति सः" ॥ इति.

सौकरवे सूकरक्षेत्राख्ये अथार्चनमार्गे क्वचिन्मानसपूजाविहितास्ति यथा पाद्मे उत्तरखण्डे "साधारणं हि सर्वेषां मानसेज्या नृणां प्रिया" इति. गौतमीये—संन्यासिनां मुमुक्षूणां मानसोपहृतिः परा" इति. तन्महिमा यथा श्रीनारदपञ्चरात्रे श्रीनारायणवाक्ये "अयं यो मानसो योगो जराव्याधिभयापहः" इत्यादौ—

"यश्चैतत्परया भक्त्या सकृत् कुर्यान्महामते ।
क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने !" ॥ इति.

एषा क्वचित् स्वतन्त्रापि भवति-मनोमय्या मूर्तेरष्टमतया स्वातन्त्र्येण विधानात् "अर्चादौ हृदये वापि यथा लब्धोपचारकैः" इत्याविर्होत्रवचने वाशब्दात् । अत्र ; ब्रह्मवैवर्ते कथाच. यथा, प्रतिष्ठानपुरे कश्चिद्विप्र आसीत् सच दरिद्रोऽपि कर्माधीनमात्मानं मन्यमानः शान्त एवासीत् स तु सरलबुद्धिः कदाचिद्विप्रेन्द्राणां सदसि वैष्णवान् धर्मान् शुश्राव ते च धर्मा मनसापि सिद्ध्यन्तीति श्रुत्वा दरिद्रः स्वयं तथैवाचरितुमारब्धवान् ततश्च गोदावरीस्नानपूर्वकं नित्यं कर्म समाप्य शान्तमतिर्भूत्वा विविक्तासनप्राणायामादिपूर्वकं स्थिरीभूयमनसैवाभिमतां हरिमूर्तिं स्थापयित्वा स्वयं दुकूलादिकं परिधाय दृढं परिकरं बद्ध्वा तत्सदनं सम्माज्र्य तां प्रणम्य च राजतसौवर्णघटैः सर्वेषां गङ्गादितीर्थानां जलमाहृत्य तथा नानापरिचर्याद्रव्याण्युपनीय तद्वीजनस्नपनादिकं आरात्रिकान्तं महाराजोपचारं समाप्य दिनन्दिनं सुखातिशयमाप्नुवन्नासीत् तदेवं बहुषु कालेषु गतेषु कदाचिन्मनसैव घृतसहितं परमान्नं निर्माय सौवर्णपात्रेण तद्भोजनार्थमुत्थाप्य स्थितः तस्तया स्फुरिते तस्मिन् प्रविष्टमङ्गुष्ठयुगलं दग्धं प्रतियन् हन्त तदिदं दुष्टं जातमिति दुःखेन समाधिभङ्गेऽपि जाते दग्धाङ्गुष्ठतया बहिरपि पीडितो बभूव तदवधाय वैकुण्ठे समुपविष्टेन श्रीवैकुण्ठनाथेन हसता श्रीप्रभृतिभिस्तत्कारणं पृष्टेन च सता स्वान्तिकं विमानेनानयामासे तथाविधतया दर्शयामासे स्वान्तिकटयोग्यतया स्थापयामासे च । अथ वन्दनम्. तच्च यद्यप्यर्चाङ्गत्वेनापि वर्त्तते तथापि कीर्त्तनस्मरणवत् स्वातन्त्र्येणापीत्यभिप्रेत्य पृथग्विधीयते एवमन्यत्रापि वन्दनस्य पृथग्विभानं चानन्तगुणैश्वर्यश्रवणात् तद्गुणानुसन्धानपादसेवादौ विधृतदैन्यानां नमस्कारमात्रे कृताध्यवसायानामर्थे स एष नमस्कारस्तस्यार्चनत्वेनाप्यति दिष्टः नमस्कारेऽपराधाश्चैते परिहर्त्तव्याः

विष्णुस्मृत्यादिदृष्ट्या ये खलु एकहस्तकृतत्ववस्त्रावृतदेहत्वभगवत्तदग्रपृष्ठवामभागांशतन्निकटगर्भमन्दिरगतत्वादिमयाः । अथ दास्यम् "जन्मान्तरसहस्रेषु यस्य स्यान्मतिरीदृशी । दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत्" ॥ इतीतिहाससमुच्चयोक्तलक्षणम् । अस्तु तावत्तद्भजनप्रयासः केवलतादृशत्वाभिमानेनापि सिद्धिर्भवतीत्यभिप्रेत्यैवोत्तरत्र निर्देशश्च तस्य एतस्य कार्यभूतं परिचर्यादिकं केवलपरिचर्यादिकं केवलपरिचर्यारूपत्वे भेदो न स्यात्. अथ सख्यम् । यथा अगस्त्यसंहितायाम्—

परिचर्यापराः केचित् प्रासादेषु च शेरते ।
मनुष्यमिव तं द्रष्टुं व्यवहर्तुञ्च बन्धुवत्" ॥ इति.

अत एव "यन्मित्रं परमानन्दमित्यत्र मित्रपदविन्यासः कृतः । अस्य चोत्तरपाठः प्रेमविस्रम्भभावनामयत्वेन दास्यादप्युत्तमत्वापेक्षया. किञ्च परमेऽश्वरेपि यत् सख्यं विधीयते तत्राश्चर्यं "नादेवोदेवमर्चयेत्" इति तद्भावस्यापि विधानश्रवणात् किन्तु तद्भावकृत्सेवा विरुद्ध इति भक्तैरपेक्षते सख्यन्तु परमसेवानुकूलमित्युपादीयते इति । तदेतत् साक्षाद्भजनात्मकं दास्यं सख्यञ्च टीकायामपि दर्शितमस्ति तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि स्यादिति श्रीदामविप्रवाक्ये । यथा श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा भक्तिं प्रार्थयते तस्येति सौहृदं प्रेम च सख्यं हिताशंसनञ्च मैत्री उपकारकत्वं दास्यं सेवकत्वञ्च. तत्समाहार एकवचनं तस्य तत् सम्बन्धि मे मम स्यात् ननु विभूतिरित्येतत् अत्र दास्यसख्याभ्यां कर्मार्पणविश्वासौ न स्यातां साक्षात् भक्तित्वाभावात् कर्मार्पणस्य फलं भक्तिविश्वासश्च भक्त्यभिनिवेशहेतुः श्रवणकीर्तनमित्यादौ विष्णोः श्रवणं विष्णोः कीर्त्तनमिति अथात्मनिवेदनं तत् कार्यञ्चात्मार्थचेष्टाशून्यत्वं तन्न्यस्तात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वञ्च इदं ह्यात्मार्पणं गोविक्रयवत् विक्रितस्य गोवर्त्तनार्थं विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवतोऽपीति अत्र केचिद्देहार्पणमेवार्पणमिति मन्यन्ते यथा भक्तिविवेके "चिन्तां कुर्यान्न रक्षार्थे विक्रीतस्य यथा पशोः । तथार्पयन् हरौ देहं विरमेदस्य रक्षणात्" ॥ इति केचिच्छुद्धक्षेत्रज्ञार्पणमेव. यथा श्रीमदालवन्दारस्तोत्रे "वपुरादिषु योपि कोपिवा गुणतो सानि यथा तथा विधः । तदहं तव पादपद्मयोरहमद्यैव मया समर्पितः" । इति अत्र योपि कोपि वेति वादिभेदात् स्वरूपतः अथवा गुणतो यथा तथाविधा देवमनुष्यादिरूपः असानि भवानि कामचारे लोट् तदयमिति सचासावयञ्चेति विग्रहात् सोऽयमित्यर्थः । तत्र केवलमात्मनिवेदं दानसमये बलिराजे दृश्यते भावेषु मिश्रेषु दास्येनात्मनिवेदनं श्रीमदम्बरीषे प्रेयसी भावेन श्रीरुक्मिणी देव्याम् एवं सख्यादिनापि ज्ञेयम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ।
तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥

गुरुपुत्र उवाच ।

न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ! ।
नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कदद़ाः स्म मा नः ॥ २८ ॥

नारदउवाच ।

गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ।
न चेद्गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः ॥ २९ ॥

प्रह्लाद उवाच ।

मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानाम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विप्राधमयोरनयोर्गुरुत्वं नास्तीति गुरोः श्रीनारदात् सकाशात् केवलां भक्तिमेवाहमशिक्षमतस्तामेव ब्रवीमि इति मनसि कृत्वाह-श्रवणमिति । पादसेवनं परिचर्य्या अर्चनं पूजा दास्यं स्वस्य दासत्वभावना सख्यं स्वस्य तन्मित्रत्वभावना दृढविश्वासश्च आत्मनिवेदनम् आत्मसमर्पणञ्च तच्च भावविशेषेण सहितं रहितञ्च यथा रुक्मिण्यादीनां वैरोचन्यादीनां पुंसा पुम्मात्रेणेति नात्र वर्णाश्रमादिनियम इति भावः, पुंशब्दस्य जीवमात्रकत्वात् स्त्रियापि नवलक्षणानि यस्या इत्येषां मध्ये किमपिकृतञ्चेत्तदा भक्तिरित्यर्थः । अद्धा सद्य एव नतु ज्ञानकर्मादिव्यवधानेनेत्यर्थः । साच अर्पितैवसतीयदिक्रियेत नतु कृता पश्चादर्प्यतेति श्रीस्वामिचरणाः । यद्वा सा यदि विष्णौ अर्पिता क्रियेत विष्णुसुखोद्देशेनैव नतु तत्फलस्य स्वस्मिन् विनियोगेनेत्यन्याभिलाषशून्यत्वं द्योतितं तदा उत्तमम् अधीतं मन्ये इति उत्तमा भक्तिरिति भावः ॥ २३ ॥ २४ ॥ २५ ॥

ते त्वया वस्तुतस्तु न विद्यते सारो यतस्तत् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिभजनोपदेष्टा गुरुर्भवत्यतः उत्तमं स्वयञ्चित हरिभजनवतश्च श्रीनारदाद्धरिभजनं स्वधीतमाह—श्रवणमिति । पादसेवनं परिचर्या अर्चनं पूजा दास्यं दासत्वभावना सख्यं मित्रत्वभावना आत्मनिवेदनं सपरिकरात्मसमर्पणम् ॥ २३ ॥

इति नवलक्षणानि यस्याः सा भक्तिः अद्धा साक्षात् विष्णौ अर्पिता तत्प्रीणनैकप्रयोजनकता सङ्कल्पिता सती पुंसा क्रियतेचेत् तदधीतमुत्तमं मन्ये ॥ २४—२५ ॥

हे ब्रह्मबन्धो ब्राह्मणाधम ! मामनादृत्य असता त्वया बालोऽसारं ग्राहितः ॥ २६ ॥

भाषा टीका ।

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—विष्णुका श्रवण कीर्त्तन स्मरण पाद सेवन अर्चन वंदन दास्य सख्य और आत्मनिवेदन ॥ पुरुष यदि साक्षात् विष्णु भगवान में इस नवधा भक्ति को समर्पण करै तौ मैं उसी को उत्तम पढना मानता हूं ॥२३-२४॥

हिरण्यकशिपु भी पुत्र के इस प्रकार के वचन सुन कर मारे रोष के होट फरकने लगे और क्रोध करके गुरुपु से इस प्रकार बोला ॥ २५ ॥

हे ब्राह्मणाधाम हे दुर्मते ! विपक्षका आश्रय लेने वाले असत तुझने मेरा निरादर कर इस बालक को क्या असा पढादिया ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मित्रत्वेन प्रवर्त्तमानस्यापि तव विरोधाचरणं नासम्भावि मित्याह—सन्तिहीति । दुष्टं मैत्रं मित्रत्वं येषां ते दुर्मै रोगइति "ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः । स्व हारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इत्यादिस्मृत्युक्तपा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ।
अन्धा यथाऽन्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किनां काले नरकभोगानन्तरं रोगो यथोदेति तथा तेषां दुर्जनानां सुजनत्वेन वर्तमानानामप्यघं विद्वेषादिकमुदेतीत्यर्थः ॥ २७ ॥

मत्प्रणीतं मया पाठितं नोऽस्मभ्यं कत् कुत्सितं दोषं मास्म अदाः अडागम आर्षः, मयि दोषारोपं मा कृथा इत्यर्थः । इन्द्रशत्रो ! इति न हि ब्राह्मणेषु तव कोप उचित इति भावः ॥ २८ ॥

गुरुमुखी गुरुवाक्यजनिता हे अभद्र ! ॥ २९ ॥

आस्तामियं वार्ता भवादृशानां विषयासक्तानामज्ञानाधिकारादित्याशयेनाऽऽह—मतिरिति । परतो गुरोः स्वतो वा मिथोवाऽन्यतो नाभिपद्येत न सम्पद्येत केषां गृहव्रतानां गृह एव व्रतं सङ्कल्प इतिकृत्यचिन्ता येषाम् अत एवादान्तैरनुपरतैर्गोभिरिन्द्रियैर्हेतुभूतैस्तमिस्रं संसारं विशतां तत्र चर्वितस्यैव चर्वणं येषाम् ॥ ३० ॥

ननु, श्रीकृष्णस्य परमानन्दस्वरूपत्वात्तेऽपि तन्निष्ठा एव किन्न स्युः ? इति चेत्तदज्ञानादित्याह—नेति । ये दुराशयाः विषयवासितान्तःकरणास्ते हि विष्णुं न विदुः, तत्र हेतुः, स्वस्मिन्नेवार्थः पुरुषार्थो येषां गतिं गम्यताम् । ननु, तेऽपि गुरूपदेशाद्विष्णुं ज्ञास्यन्ति. तत्राऽऽह, बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मन्तुं शीलं येषां ते अतोऽन्धैरुपनीयमाना अन्धाः यथा पन्थानं न विदुः किन्तु गर्ते पतन्ति तथा तेऽपीशस्य तन्त्यां दीर्घरज्ज्वां वेदलक्षणायामुरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवन्तीत्यर्थः । तदुक्तम्—

"विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः ।
वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्" ॥

इति ॥ ३१ ॥

ननु च "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न विदुः ? कुतो वा तेषां तमिस्रप्रवेशः ? तत्राऽऽह—नैषामिति । निष्किञ्चनानां निरस्तविषयाभिमानानां महत्तमानां पादरजसोऽभिषेकं यावन्न वृणीत तावच्छ्रुतिवाक्यतो जाताप्येषां मतिरुरुक्रमस्याङ्घ्रिं न स्पृशति न प्राप्नोति, असम्भावनादिभिर्विहन्यत इत्यर्थः । अनर्थस्य संसारस्यापगमो यदर्थो यस्याङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं महदनुग्रहाभावान्न तत्त्वनिश्चयो नापि मोक्षस्तेषामित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मित्रत्वेन वर्त्तमानस्यापि तव विरोधाचरणं नासम्भावितमित्याह—सन्तीति । दुष्टं मैत्रं मित्रत्वं येषां ते अत एव प्रसाधवच्छन्नवेषिणः कपटवेषधारिणो भवादृशा अपि हि लोके सन्ति तेषामघं द्रोहः काले उचितकाले प्रकटो भवति रोगः पातकिनामिव यथा "ब्रह्महा क्षयरोगी स्यात्सुरापी श्यावदन्तकः स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इति स्मृत्युक्तः पातकिनां रोगः उचितकाले उदेति तथा तेषामघं द्रोहादिकमुचितकाले उदेतीत्यर्थः ॥ २७ ॥

एवमुपालब्ध आह गुरुपुत्रः—नेति । न मया पाठितं नापि परेण, किन्तु केवलमेष तव पुत्र एव वदत्येवं, हे इन्द्रशत्रो ! तव ब्राह्मणेष्वनुग्रह उचितो विषयत्वादिति भावः । न स्वपरप्रणीतं चेत्कुतोऽस्याभूदियं मतिः? तत्राह—नैसर्गिकीति. हे राजन् ! अस्य त्वत्पुत्रस्येयं मतिर्नैसर्गिकी स्वाभाविकी न तु परैरुत्पादिता. अतो मन्युं क्रोधं नियच्छ उपसंहर नोऽस्मभ्यं कत् कुत्सितं दुःखमित्यर्थः । मास्मदाः न देहीत्यर्थः । माङ्योगेऽप्यडापः । कदनात्मनां न इति पाठान्तरम् । तत्र कदनात्मनां दीनात्मनां न मन्युं मद्विषयं क्रोधं नियच्छेत्यर्थः ॥ २८ ॥

इत्थं गुरुणा प्रत्युक्तो दैत्यः सुतमाहेत्याह देवर्षिः—गुरुणेति । तदेवाह—न चेदिति. हे अभद्र ! इयं बुद्धिर्गुरुमुखी गुरूपदेशजाता न चेत्तव कुतो हेतोस्तवासती दुष्टा मतिरभूत् ॥ २९ ॥

एवमुक्त आह प्रह्लादः—मतिरिति । यत्पृष्टं कुतस्तवेयं मतिरिति तत्र महतामनुग्रह एवेदृशीमतिहेतुरिति वक्तुं तावन्महद्भिरननुगृहीतानां भवादृशानामीदृशी मतिर्दुर्लभेत्याह—मतिरिति । गार्हस्थ्यरतानां स्वतः परतो वा मिथोऽन्योन्यस्माद्वा कृष्णे मतिर्भक्त्यात्मिका नाभिपद्येत तत्र हेतुं वदन् गृहव्रतान्विशिनष्टि—अदान्तगोभिरिति. अदान्तैरजितैर्गोभिरिन्द्रियैर्हेतुभिस्तमिस्रं निरयरूपं संसारं पुनःपुनर्विशतां चर्वितमनुभुक्तं तस्यैव पुनश्चर्वणमुपभोगो येषां पूर्वपूर्वैर्भुक्तमेव विषयं भुञ्जानानां पूर्वैर्भुक्तानेव वनितादीन् विषयान् पुनरपरेषु भुञ्जानानामिति वा एवं विषयासक्तचित्तानां त्वादृशां कृष्णे मतिर्दुर्लभा इत्युक्तम्. यद्वा चर्वितचर्वणाः पशवस्तत्तुल्यानामिति ॥ ३० ॥

मास्तु कृष्णे मतिः स्वश्रेयोऽपि न स्वयं जानन्तीत्याह—नेति । स्वार्थश्च गतिश्च स्वार्थगतिस्तं स्वस्य पुरुषार्थभूतं तदुपायभूतञ्च विष्णुं गृहव्रता न विदुः, तत्र हेतुं वदंस्तान्विशिनष्टि, बहिरर्थमानिनः बहिः शब्दादिविषयेषु अर्थमानिनः पुरुषार्थाभिमानिनः अतस्ते अन्धैरुपनीयमाना अन्धा यथा पन्थानं न विदुः किन्तु श्वभ्रे पतन्ति तथा तेऽपि ईशस्य तन्त्यां वेदलक्षणायां स्थूलरज्ज्वामुरुदाम्नि वर्णाश्रमधर्मादिरूपनानाविधकण्ठसूत्रे बद्धा भवन्ति वेदोक्तकेवलकाम्यकर्मण्यासक्तैः प्रलोभितास्तत्रैवासक्ताः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

पुनःपुनः संसरन्तो दुःखमेव प्राप्नुवन्ति न तु निरतिशयानन्द-रूपपुरुषार्थलक्षणं भगवन्तं प्राप्नुवन्तीत्यर्थः ॥ ३१ ॥

तदेव व्यनक्ति–नेति । एषामुक्तविधानां विषयासक्तचित्तानां मतिर्बुद्धिः उरुक्रमस्य निरतिशयमहिमशालिनो भगवतो निरतिशयपुरुषार्थरूपमङ्घ्रिं न स्पृशति न विषयीकरोति तदङ्घ्रिस्पर्शनं विशिनष्टि; यदर्थं यस्योरुक्रमस्याङ्घ्रिस्पर्शस्य अर्थः प्रयोजनं फलमनर्थापगमः दुःखनिरासरूपः कियत्पर्यन्तं न स्पृशति तत्राह—यावन्निष्किञ्चनानामनन्यप्रयोजनानां महीयसां महाभागवतानां पादरजस्सेवां न वृणीत न वृणुयात् महत्सेवां न कुर्यात्तावन्न स्पृशतीत्यर्थः । मम मातृगर्भावस्थानदशायामेव महीयसःश्रीनारदस्यानुग्रहादियं बुद्धिरुरुक्रमस्याङ्घ्रिविषयाऽभूदिति गूढोऽभिप्रायः ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साधुत्वेन वृतस्य गुरोर्दुर्मते इति सम्बोध्य निन्दनं कथं घटते ? इति तत्राह–सन्तीति ।—

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् " ॥

इति वाक्यं हिशब्देन स्मारयति पारत्रिकं पापफलत्वेन रोग उदेति यथा, तथा तेषामघमपराधलक्षणं व्यसनं प्रकाशत इत्यन्वयः ॥ २७ ॥

लोके सन्त्यसाधवः नाहं तादृशः यतस्त्वत्पुत्रो न मया रचितं नापि परेण पठ्यत इत्याह—नमदिति । तर्हि कस्मादियं मतिरभूदिति तत्राह–नैसर्गिकीति । तदा तस्मिन्पक्षे ममात्मनः स्वरूपाभिमानो मया ग्राहितेयं मतिरिति कस्तस्मात् कोपं संहरेति ॥ २८ ॥

पुत्राय क्रुध्यन्नाह–गुरुणेति । गुरुमुखी गुरुमुखादुत्पन्नेयं मतिः ॥ २९ ॥

सत्येव सन्मतिः त्वन्मतिरेवासतीति पितरं कटाक्षीकृत्य परिहरति–मतिरिति । परतो गुर्वादिबोधनप्रयत्नेन स्वतः स्वप्रयत्नेन तत्र निमित्तमाह—गृहेति । वनादिनिवासमन्तरेण गृह एवावस्थानलक्षणं व्रतं येषां ते तथा तेषाम्, ननु " कुटुम्बी शुचौ देशे स्वाध्यायमधीयानः " इतिश्रुतेर्गृहस्थानामपि श्रेयःप्राप्त्युपपत्तेरिति तत्राह—अदान्तेति । अदान्तानामिन्द्रियनिग्रहरहितानां पुरुषाणां गोभिर्वागिभस्तमिस्रं नरकसुखकल्पं विषयसुखं विशतां भुञ्जानानां तत्रापि नूतनापूर्वभोगो नास्तीत्यभिप्रेत्याह—पुनरिति । पुनःपुनर्भुक्तविषयानेव भुञ्जानानामित्यर्थः । अदान्तगोभिरशिक्षिताभिर्वाग्भिर्वेदगताभिस्तमिस्रमतत्त्वार्थविषयमज्ञानम् अन्यथाज्ञानञ्च विशतां गाहमानानां न तत्रापि यत्नो स्तीत्याह—पुनरिति वा ॥ ३० ॥

एतदेव स्पष्टमाह–न त इति । दुष्टेषु प्रतीतिसुन्दरेषु परिणामविपर्येष्वाशयो येषां ते तथा तत्र हेतुमाह–वहिरिति । वहिरर्थेषु मुखतः प्रतीयमानार्थेष्वेव भावस्तात्पर्यार्थनिश्चयो येषां ते तथा श्रुतितात्पर्यार्थानभिज्ञा इत्यर्थः । एते स्वार्थगतिं पुरुषार्थस्वरूपं स्वभक्तप्रयोजनसाधकं वा कृष्णं न विदुरित्यन्वयः । अत्र कारणमाह–वाचीति । ईशतन्त्यामीशस्य वेदवाग्लक्षणतन्त्यां ब्राह्मणादिबहुनामाख्यलक्षणानामदाम्नि बद्धाः अत्रोदाहरणमाह—अन्धा इति । अन्धैरज्ञैरुपनीयमाना उपदिश्यमानकर्ममार्गाः अन्धा अज्ञा उपदिष्टान्यमार्गं यथा न विदुस्तथेति अनेन "अन्धेनैव नीयमाना यथान्धाः" इति स्मृतिं स्मारयन्ति ॥ ३१ ॥

नन्वेवं तर्हि गृहव्रतानां मुक्त्युपायः कः ? इत्याह—नैषामिति यावदेषां गृहव्रतानां मतिर्महीयसां निष्किञ्चनानां संन्यसिनां पादरजोऽभिषेकं न वृणीत तावन्तं कालमुरुक्रमस्याङ्घ्रिं न स्पृशति न विषयीकरोति उरुक्रमस्याङ्घ्रिस्पर्शस्य किं फलम् ? अत्राह–अनर्थेति । यस्य हरेरङ्घ्रिस्पर्शोत्थफलमनर्थापगमः संसारनिवृत्तिः अथवाऽनर्थापगमो यस्मात् पादरजोभिषेकादुत्थितः प्रकाशितो भवति तम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुरुरेव मुखं द्वारं यस्याः सा गुरुमुखी ॥ २९ ॥ ३० ॥

स्वादिमन् श्रीविष्णोरेवार्थः प्रेमरूपः पुरुषार्थो येषां तेषाम् ॥३१॥
अनर्थस्य तत्स्पर्शविघ्नस्यापगमः ॥ ३२—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्वैरिपक्षवर्ती त्वमेतावद्दिनान्ते मद्रेणैव व्यक्तोऽभूस्तदद्यैव ते समुचितां दक्षिणां दास्यामीत्यर्थान्तरस्य न्यासेनाह—सन्तीति दुष्टं मैत्र्यं मित्रत्वं येषान्ते अघं द्वेषादिकं उदेति दैवात् प्रकटीभवति रोग इति—

"ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः ।
स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥

इत्यादिस्मृत्युक्तः ॥ २७ ॥

हे इन्द्रशत्रो ! इति मयि दीने ब्राह्मणे कोपस्ते नोचित इति भावः । नोऽस्मभ्यं कत् कुत्सितं दोषं मास्म अदाः अडागम आर्षः मयि दोषारोपणं माकृथा इत्यर्थः ॥ २८ ॥

हे अभद्र ! असती वस्तुतस्तु भद्रा सती सर्वोत्तमा ॥ २९ ॥

सत्यमियं कृष्णविषया मतिर्भवन्मते असत्येव किन्त्वेषा मतिर्भवादृशानां साधूनां कुतोऽपि कदाचिदपि नोत्पद्यत इति वक्रोक्त्या उपहसन्नाह–मतिरिति । परत ईदृशाद्गुरोरन्यतो वा स्वतो वा मिथोऽन्योन्यतो वा नाभिपद्येत न संपद्येत किन्तूत्तरग्रन्थदृष्ट्या महच्चरणरजोभिषेकलिप्सारहितानामिति तदीयस्वगतोक्तिरत्र श्लोकेऽपि ज्ञेया केषां गृहव्रतानां गृहासक्तानां गृहव्रतत्वमेवाह, अदान्तैरवशीकृतैर्गोभिरिन्द्रियैस्तमिस्रं नरकम् ननु, गृहव्रताः कदाचित्स्वर्गिणोऽपि भवन्ति तत्राह—स्वपराभ्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चर्वितस्यैव पुनःपुनश्चर्वणं येषां तेषां वेश्यालयः स्वर्गो वा तुल्य एवेति भावः ॥ ३० ॥

ननु, रे मूढ मामिन्द्रादिवन्द्यपादपीठं पितरमपि वक्रोक्तिविषयीकुरुषे शृणु रे कुमते शृणु शुक्राचार्यस्य शिष्या महाविद्वांसस्त्वद्गुरुवः किं सर्वशास्त्रतात्पर्य्यं न जानन्ति? यतस्तेभ्योऽधीतमर्थं न त्वं साधु मन्यसे, इत्यत आह—नेति । ते स्वस्य अर्थरूपां गतिं विष्णुं न विदुः किं त्वनर्थरूपाङ्गतिं स्वर्गादिमेव जानन्तीति भावः । यतो दुराशयाः दुष्टान्तःकरणाः बहिर्विषयसुखमनर्थमेव अर्थं मन्तुं शीलं येषां ते अतस्त एव यदि विष्णुं न विदुः तदाकथं तच्छिष्या ज्ञास्यन्तीति सदृष्टान्तमाह अन्धैरुपनीयमानाः उपदिष्टमार्गाः सन्तोऽन्धा यथा गर्त्ते पतन्ति तथैव वाचि वेदलक्षणायां तन्त्यां दीर्घरज्ज्वां उरूणि दामानि ब्राह्मणादिनामानि यस्य तस्यां कर्मभिर्बद्धा एव भवन्तीत्यर्थः ॥३१॥

ननु च यदि विष्णुरेव स्वार्थरूपा गतिः शास्त्रैरुच्यते तदा त्वद्गुरूणां सर्वशास्त्रज्ञानामपि मतिः विष्णुनिष्ठैवोत्पद्येते त्यतस्तेषां विष्णुनिष्ठमतित्वाभावादेव विष्णुभक्तिरशास्त्रीयेत्यनुमीयत इत्यत आह–नैषामिति । निष्किञ्चनानां "मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः" इति भगवद्वाक्यविश्वासात् त्यक्तव्यावहारिकवित्तपुत्रकलत्राभिलाषकर्मज्ञानादीनां भक्तिमात्रैकवासनत्वेन महीयसां पादरजसा स्वस्य वैष्णवत्वेनाभिषेकं यावन्न वृणीत तावन्मतिरुरुक्रमांघ्रिं नस्पृशयति—

"यथा देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्मै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति ॥

"यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुतेतनुं स्वाम्" इत्यादि श्रुतिभ्यः अनर्थस्य संसारस्य अपगमोऽयम् स्वार्थः यथा अङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनमानुषङ्गिकमेव फलं मुख्यं फलन्तूरुक्रमांघ्रिस्पर्शः स एव ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असाधवः दुराचाराः छद्मवेषिणः मित्रत्वेन वर्त्तमानाः शत्रवः अत एव दुष्टं मैत्रं मित्रत्वं येषां ते तेषामघं दुर्मित्रत्वं पातकिनां रोगो यथा तद्वत्काले उदेति प्रकटं भवति ॥ २७ ॥

हे इन्द्रशत्रो ! एष तव सुतो यद्वदति तन्मत्प्रणीतं न परप्रणीतं मत्पितृपितामहादिप्रणीतं वा न भवति किन्त्वस्यैवं नैसर्गिकी मतिः मत्तोमन्युं नियच्छ उपसंहर नोऽस्मभ्यं कद कष्टं मास्म अदाः अदागम आर्षः ॥ २८ ॥

गुरुमुखी गुरूपदिष्टा न चेत्तर्हि कुतोऽभूद ॥ २९ ॥

कृष्णमतेरात्मनः कृतार्थतां द्योतयितुमकृष्णमतीनामकृतार्थतामाह—मतिरिति द्वाभ्याम् । गृहव्रतानां प्रवृत्तिमार्गनिष्ठानां पुनः पुनश्चर्वितचर्वणानां भुक्तविषयभोगरतानाम् अदान्तैर्गोभिरिन्द्रियैस्तमिस्रं जन्ममरणप्रवाहलक्षणं संसारं विशताम् मतिः परतः स्वतो मिथोऽन्योन्यतो वा नाभिपद्येत ते शोच्या इति भावः ॥ ३० ॥

ये दुराशयाः दुष्टे विषयसुखे आशयोऽन्तःकरणं येषां तथाभूताः अत एव बहिरर्थेषु ध्यानानन्दाशकैर्दूरतस्त्यक्तेषु मानिनः पुरुषार्थाभिमानिनः वागीशस्य वेदस्वामिनो हरेः तन्त्यां वेदलक्षणायां दीर्घरज्जुस्थानीयायामुरूणि दामानि ब्राह्मणादीनि नामानि तथद्बन्धनस्थानानि यस्यां बद्धाः स्वार्थमर्तिं अध्यते इत्यर्थः । प्राप्योऽर्थः स्वस्यार्थः स्वार्थंगम्यते अनयेति गतिः प्राप्यमार्गः स चासौ स च उपायोपेयरूपः तं न विदुः ते संसारे एव पतन्ति अन्धा यथान्धैर्नीयमानाः गम्यं देशं तन्मार्गञ्च न विदुःप्रत्युत गर्ते पतन्ति तद्वत तेषामुपदेष्टारोऽपि स्वार्थगतिं विष्णुं न जानन्ति संसारे एव निमज्जन्तीति दृष्टान्ताभिप्रायः ॥ ३१ ॥

अज्ञानहेतुमाह—नैषामिति । एषां मतिः यावदकिञ्चनानां भगवच्चरणैकशरणानां पादरजोऽभिषेकं न वृणीत तावत् उरुक्रमाङ्घ्रिं न स्पृशति न विषयीकरोति यस्याम् उरुक्रमाङ्घ्रिस्पर्शिन्यामतेरर्थः प्रयोजनं अनर्थस्य अर्थो मोक्षस्तद्विपरीतस्य बन्धस्यापगमः ॥ ३२ ॥

भाषा टीका ।

लोक में कपटरूपी दुष्ट मैत्री वाला बहुत से असाधु (दुष्ट) हैं, कि जिनका पाप समय पाकर पातकियों के रोग की तरह प्रकट होता है ॥ २७ ॥

गुरुपुत्रउवाच ॥

गुरुपुत्र बोला, कि— हे इन्द्रशत्रो ! तुमारा पुत्र न हमारा बनाया हुआ न दूसरे का बनाया हुआ भी कहता है, इसकी मति ऐसी स्वाभाविक है राजन् ! आप क्रोध को रोकिये हम लोगों पर मिथ्या दोषारोपण न कीजिये ॥ २८ ॥

नारद उवाच ॥

नारदजी बोले, कि--जब गुरु ने लोट कर फिर ऐसा कथन किया तब असुर फिर पुत्र से बोला कि—यदि तेरी यहमति गुरुमुखी नहीं तो फिर यह खोटी मति कहां से हुई ॥ २९ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—गृहकी चिंता वाले और अवशीकृत इन्द्रियों से बार २ चर्वित विषयों का चर्वण करने वाले अत एव बारंबार संसार में प्रविष्ट होने वाले ऐसे लोगो की मति कृष्ण में आप से वा गुरू के उपदेश से वा अन्य किसी से नहीं लगती ॥ ३० ॥

बहिर्विषय में अर्थ दृष्टि वाले जो दुराशय लोग हैं वे परम पुरुषार्थ के प्रापक श्री विष्णु को नहीं जान सके हैं, अंधों के हाथ पकड के चलने वाले अन्धे जैसे मार्ग न जान सका किन्तु खड्डे में पडते हैं इसी प्रकार ये लोग भी ईश्वर की वाणी रूप तंती में बंधे हुए संसार ही में पडते हैं ॥ ३१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपूरुषा ।
अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ॥ ३३ ॥
आहामर्षरुषाविष्टः कषायीभूतलोचनः ।
वध्यतामाश्वयं वध्यो निस्सारयत नैर्ऋताः ॥ ३४ ॥
अयं मे भ्रातृहा सोऽयं हित्वा स्वान्सुहृदोऽधमः ।
पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥
विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ।
सौहृदं दुस्त्यजं पित्रोरहाद्यः पञ्चहायनः ॥ ३६ ॥
परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत्सुतोऽहितः ।
छिन्द्यात्तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३७ ॥
सर्वैरुपायैर्हन्तव्यः सम्भोजशयनासनैः ।
सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥ ३८ ॥
नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ।
तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥
नदन्तो भैरवान्नादांश्छिन्धि भिन्धीति वादिनः ।
आसीनं चाहनञ्छूलैः प्रह्लादं सर्वमर्मसु ॥ ४० ॥

भाषा टीका ।

इनकी मति जब तक निष्किञ्चन महज्जनों के चरणरज के अभिषेक को नहीं स्वीकार करता है तब तक इसकी मति भगवच्चरणारविंद का स्पर्श नहीं करती है जिस स्पर्श से संसार रूप अनर्थ दूर होता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरस्यत चिक्षेप ॥ ३३ ॥

अमर्षोऽसहनं तेन सहितया रुषाऽऽविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य हे नैर्ऋता राक्षसाः ! ॥ ३४ ॥

वध्यत्वे हेतुः यतोऽयं मे भ्रातृहा कृतः यो विष्णोः पादौ दासवदर्चति, तत्पक्षपातीत्यर्थः। अतः स एवायमित्यन्वयः ॥ ३५ ॥

अहो विष्णुरप्यविश्वसनीयं किमितिस्वीकृतवानित्याह—विष्णो-र्वेति अहाज्जहौ ॥ ३६ ॥

ननु, तवायमपत्यं कथं वध्यस्तत्राऽऽह—परोऽप्यौषधमिव हित-कृच्चेदात्मीयमेव श्रेयः सुतः स्वदेहजोऽप्यहितश्चेदामय इव श्रेयः आस्तां ममतास्पदस्य कथा, अङ्गमपि च यत्करचरणादि तद-प्यात्मनोऽहितं चेच्छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

अतः सर्वैरुपायैर्हन्तव्यः सम्भोजो भोजनम् भोजनादिषु विषा-दिप्रयोगैरित्यर्थः। यथा दुष्टमिन्द्रियं मुनेः शत्रुः ॥ ३८ ॥

तिग्मास्तीक्ष्णा दंष्ट्रा येषाम् करालान्यास्यानि भयङ्कराणि मुखा-नि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषाम्। ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थमुक्त्वोपरतं तूष्णीमासीनं पुत्रं रुषा क्रोधेनान्धीकृत आत्मा विवेको यस्य स हिरण्यकशिपुः स्वस्योत्सङ्गात् मही-तले निरस्य तं पातयित्वा आहचेत्युत्तरेणान्वयः । निरस्यतेति पाठे न्यपातयदित्यर्थः ॥ ३३ ॥

अमर्षः असहनं तत्सहितया रुषा आविष्टो व्याप्तः अतएव कषायीभूते आताम्रे लोचने यस्य सः आह च उक्तवांश्च तदे-वाह—वध्यतामिति। हे नैर्ऋताः ! इत एनं निःसारयत वहि-र्गमयत अयं बालो वध्यो वधार्हः अतःआशु वध्यतां हन्यताम् ॥ ३४ ॥

वध्यत्वे हेतुर्यतोऽयं मे मम भ्रातुर्हन्ता कुतःयोऽयमधम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

बालः स्वान् स्वकीयान् सुहृदोऽस्मान् हित्वा पितृव्यस्य पितृभ्रातुर्हिरण्याक्षस्य हन्तुर्विष्णोः पादौ चरणौ दासवदर्चति तत्पक्षपातीत्यर्थः। अतः स एवावामित्यन्वयः, हित्वाऽसून् सुहृद इति पाठे. अयं मे भ्रातृहा कुतः यद्यस्मादधमोऽयं सुहृदः प्रियानसून् प्राणान् हित्वा विष्णवे समर्प्य दासवत्तत्पादावर्चति अतोऽयमेव प्रह्लादो मे भ्रातृहेत्यर्थः ॥ ३५ ॥

मद्दृष्टान्तेन विष्णोरप्ययमसावसमञ्जसोऽननुकूलः साधुकरिष्यति किन्तु ? न करिष्यत्येव. अव्यवस्थितचित्तत्वादिति भावः। यतोऽसौ पञ्चहायनः पञ्चवर्षवयस्क एवसन् दुस्त्यजं त्यक्तुमशक्यं पित्रोः मातापित्रोः सौहृदमद्यादत्याक्षीत् ॥ ३६ ॥

ननु,तवायं पुत्रः तत्कथं वध्यः?तत्राह-परोपीति। परोऽपि शत्रुपक्षप्रभवोपि यथा औषधं तथा हितकृत् हितकारी चेत्तर्हि सोऽपत्यं पुत्र एव देहाज्जातोऽप्यामयवद्रोगवदहितो दुःखकृच्चेत्तर्हि आमयवत्परित्याज्यः। आस्तां ममतास्पदस्य कथा हि यस्मात्यदङ्गं करचरणादिकमपि सर्पदंशव्रणादिदूषितं सदात्मनोऽहितं दुःखकृच्चेत्तर्हि तदङ्गं छिन्द्यादेव यस्य दुष्टाङ्गस्य विसर्जनात्परिहाराच्छेषमवशिष्टमङ्गं सुखं जीवति ॥ ३७ ॥

अतोऽयं सुहृल्लिङ्गधरः पुत्रवेषधारी शत्रुर्यथा दुष्टमिन्द्रियं मुनेः शत्रुः तद्वद्वत्तमानः सर्वैर्गरलादिमिश्रितसम्भोजनादिभिरुपायैर्हन्तव्यः ॥ ३८ ॥

एवं भर्त्रा दैत्येन्द्रेण समादिष्टाः ते नैर्ऋताः शूलपाणयः तिग्माः तीक्ष्णा दंष्ट्रा दन्ताः येषां करालान्यास्यानि येषां ताम्राणि श्मश्रूणि शिरोरुहाणि च येषां तादृशाः ॥ ३९ ॥

भैरवान् भयङ्करान्नादान्वदन्तः कुर्वन्तश्छिन्धिभिन्धीति वदन्त आसीनम् उपविष्टं प्रह्लादं सर्वेषु मर्मस्थानेषु शूलैरहनन् हतवन्तः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कषायीकृतलोचनः रक्तनेत्रः ॥ ३३—३४ ॥

पितृव्यस्य हिरण्याक्षस्य हन्तुः असावसमंजसः प्रह्लादः विष्णोः किं वा साधु करिष्यति ॥ ३५ ॥

कथमसमंजसो भूत्तत्राह-सौहृदमिति ॥ ३६ ॥

परः शत्रुरप्यवश्यं द्वेषेणापि हितकृच्चेत्स एव सुतः यथा औषधं तिक्तत्वेन "हरीतकी मनुष्याणां मातेव हितकारिणी" इति वचनात् स्वदेहजो ऽपि सुतो ऽपि अहितो ऽपकारीचेत्तं छिन्द्यादामयवत् किञ्चात्मनः स्वस्य यदहितमङ्गं सर्पदष्टं तच्छिन्द्यात्सदेव विशिनष्टि-यच्छिवर्जनादिति शेषमङ्गं सुखं जीवतीत्यन्वयः ॥ ३७ ॥

संभोजो भोजनम् ॥ ३८—३९ ॥

भैरवं नादमुद्दिश्य ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पञ्चहायन इति। गर्भे चिरकालस्थितत्वात् ॥ ३६—३८ ॥

नैर्ऋता इति युग्मकम्। दंष्ट्रा इति क्वचित्। किन्तु स्वाम्यसम्मतः ॥ ३९—४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अमर्षः असहनं तेन सहितया रुषा आविष्टः हे नैर्ऋताः ! राक्षसाः ॥ ३४ ॥

अयं मे भ्रातृहा, ननु, विष्णुस्ते भ्रातृहा प्रसिद्धस्तत्राह स विष्णुरयमेवेत्यर्थः। कुतः हित्वेत्यादि दासवदिति असुरमहाराजनन्दनोपि भृत्येत्यर्थः विष्णुना स्वदासेषु स्वसारूप्यार्पणात् विष्णुरेवायमिति वध्यताम् ॥ ३५ ॥

विष्णुरप्यविश्वसनीयः कथमिमं बुद्धिमान् भूत्वा कथं विश्वस्तः स्यादित्याह—विष्णोर्वेति, ॥ ३६ ॥

ननु, त्वदपत्यमयमस्माभिः कथं हन्तुमर्हस्तत्राह—परोऽप्यौषधमिव हितकृच्चेत्तर्ह्यपत्यमिव श्रेयः आस्तां ममतास्पदस्य कथा अङ्गमपि यत् करचरणादि तदप्यात्मनोऽहितं चेत् छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

भोज्यादिवस्तुषु विषाद्यर्पणैरपि हन्यतामित्याह—सर्वैरिति ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इत्येवमुक्त्वोपरतं तूष्णीं स्थितम् स्वस्योत्सङ्गात् महीतले निरस्यत् अपातयत् ॥ ३३ ॥

अमर्षेण पुत्रसिद्धान्तासहनेन युक्तया रुषाऽऽविष्टोऽभिभूतः कषायीभूतेऽतिताम्रे लोचने यस्य सः हे नैर्ऋताः अयं वध्यः आशु निस्सारयत तदनन्तरं वध्यतामित्याह ॥ ३४ ॥

वध्यत्वे हेतुमाह-अयमिति। यो मे भ्रातृहा विष्णुः सोऽयं प्रह्लादः तद्दासत्वात्तदनन्य इत्यर्थः। तदेवाह,यः स्वान्सुहृदोऽस्मदादीन् हित्वा पितृव्यहन्तुर्विष्णोः पादौ दासवदर्चति सोऽयम् अधमः वधार्ह इत्यर्थः ॥ ३५ ॥

यः पञ्चहायनः पञ्चवर्षः पित्रोः सौहार्दं दुस्त्यजम् अद्यात् अत्यजत् सोऽसावसमञ्जसः अविश्वसनीयः विष्णोर्वा किं साधु प्रियं करिष्यति ॥ ३६ ॥

राजनीतिरियं यद्बलात्पुत्रोऽप्येवंविधो वध्य इत्याह-पर इति। परःशत्रुरपि अपत्यं यदि हितकृत् यथौषधम् स्वदेहजः सुतोप्यहितश्चेत्परः शत्रुरेव आमयवत् यदङ्गमङ्गुल्यादि अहिविषादिना आत्मनोऽहितं तच्छिन्द्यादेव यद्विवर्जनात् शेषं शरीरं सुखं यथा तथा जीवति ॥ ३७ ॥

यस्मादयं मुनेर्दुष्टमिन्द्रियमिव सुहृल्लिङ्गधरः शत्रुरतः सम्भोजो भोजनं तदादिभिः विषदूषितान्नदानादिभिर्मारणोपायैर्हन्तव्यः ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ।
युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥
प्रयासेऽपहते तस्मिन्दैत्येन्द्रः परिशङ्कितः ।
चकार तद्वधोपायान्निर्बन्धेन युधिष्ठिर ! ॥ ४२ ॥
दिग्गजैर्दन्दशूकैश्च अभिचाराऽवपातनैः ।
मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥
हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ।
न शशाक यदा हन्तुमपापमसुरः सुतम् ।
चिन्तां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ ४४ ॥
एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ।
तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४५ ॥
वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयम् ।
न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भर्त्रा हिरण्यकशिपुनाऽऽदिष्टाः तिग्माः तीक्ष्णाः दंष्ट्रा येषां करालानि भयङ्कराण्यास्यानि येषान्ते च तथा ताम्राण्यरुणानि श्मश्रूणि शिरोरुहाश्च येषान्ते ॥ ३९ ॥ ४० ॥

भाषा टीका ।

इतना कहकर चुप होने पर मारे रोष के अंधा हो रहा जो हिरण्यकशिपु, उसने अपने पुत्र प्रल्हाद को गोद से उठाकर पृथ्वी पर पटक दिया ॥ ३३ ॥

क्रोध से व्याप्त होने से लाल नेत्र जिसके ऐसा हिरण्यकशिपु बोला, कि हे राक्षस हो ! यह लडका वध के योग्य है, इसको मारो और निकाल दो ॥ ३४ ॥

यह अधम हमारे भ्राता का घातक है, क्योंकि ? अपने सुहृदों को छोडकर पितृव्य के मारने वाले विष्णु के चरणों को दास के तरह पूजता है ॥ ३५ ॥

जो पांच वर्षका ही अपने मा बापों से सौहृद छोडचुका यह खोटा विष्णु का क्या भला करेगा ? ॥ ३६ ॥

जो दूसरा होकर भी औषध के तरह हितकारी है वह अपना पुत्र है और अपने देह से भी पैदा है पर रोग के तरह दुःखदायी हो तौ वह पुत्रभी वैरी है जो अपना अहित करने वाला अंग भी हो (जैसे सर्प की काटी अंगुली) तौ उसे काट डाले, कि जिस्के विना शेष में सुख पूर्वक जीवता रहै ॥ ३७ ॥

भोजनादिक में विषादि प्रदान से ऐसे सर्व उपायों से इसे मारना चाहिये क्योंकि यह सुहृद का चिन्ह धारण करने वाला शत्रु है जैसे मुनि के दुष्ट इन्द्रियें शत्रु हैं ॥ ३८ ॥

अपने भर्ता की आज्ञा पाकर तीक्ष्णडाढे और कराल मुख वाले लाल २ डाढी मूंछ और केश जिनके ऐसे वे राक्षस लोग हाथों में त्रिशूल लेने से भयंकर, बैठे हुए प्रल्हादके सर्व मर्म स्थानों में शूलों से प्रहार करने लगे ॥ ३९ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन्प्रह्लादे तेषां नैर्ऋतादीनां प्रहाराः निष्फलाः आसन् जाताः तत्र हेतवः ब्रह्मणि निर्विकारेऽनिर्देश्येऽविषये भगवति निरतिशयैश्वर्येऽखिलात्मनि शस्त्रादीनामपि नियन्तर्यैवम्भूते परे अपुण्यस्य निर्दैवस्य सत्क्रियाः महोद्यमा इव ॥ ४१ ॥ ४२ ॥

दन्दशूकैः सर्पैः अभिचाराः कृत्यादयः अवपातनानि गिरिशृङ्गादधःपातनानि तैः मायाभिः शम्बरनिर्मिताभिः अवटादिषु सन्निरोधैश्च ॥ ४३ ॥

पर्वताक्रमणैः पर्वतानां तदुपरि क्षेपैः बहुवचनैरभिचाराद्यावृत्तिं दर्शयति तद्धननं कर्तुं नाभ्यपद्यत न प्राप नाशक्नोदित्यर्थः ॥ ४४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः ।
नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥ ४७ ॥
इति तं चिन्तया किञ्चिन्म्लानश्रियमधोमुखम् ।
शण्डामर्कावौशनसौ विविक्त इति होचतुः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चिन्तामेवाऽऽह-एष इति त्रिभिः । मे मया असाधु परुषं यथा भवति तथोक्तः असद्धर्मैरपकारैरभिचारैर्वा ॥ ४५ ॥

अविदूरे समीपे वर्तमानोऽपि बालोऽप्ययमजडधीर्निर्भयचित्तो मेऽनार्यमन्यायं शत्रुत्वं वा न विस्मरति अजीगर्तस्य मध्यमपुत्रः शुनःशेफोनाम पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन्यथा तयोरपकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनः शेपः पुच्छमिवेति ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अमरोमृत्युशून्यश्च न वा भविता अन्यथा मृत्युर्नैव भविष्यतीत्यर्थः ॥ ४७ ॥

औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकान्ते ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनिर्देश्ये चेतनाचेतनसजातीयत्वेन निर्देष्टुमशक्ये अखिलात्मनि हन्तृहन्तव्याद्यन्तरात्मनि पूर्णषाड्गुण्ये परे ब्रह्मणि युक्तः नियुक्तः आत्मा मनो यस्य तस्मिन् प्रह्लादे नैर्ऋतैः कृता अपि शूलघातादयो मारणोपायाः अफलाः व्यर्थाः बभूवुः, मरणहेतवो दुःखहेतवश्च न बभूवुरित्यर्थः । यथा अपुण्यस्य पापरतस्य कृता अपि सत्क्रियाः सन्ध्योपासनादयः अफलास्तद्वदैफल्यहेतुगर्भं विशेषणम् अखिलात्मनि युक्तात्मनीति । अयं भावः, कर्मायत्तदेहसम्बन्धप्रयुक्तसुखदुःखभोक्तृत्वतदनुगुणपुण्यपापकर्तृत्वा — नुगुणं जीवपर्यन्तदेहेन्द्रियादिप्रेरणरूपमखिलात्मत्वमत्राविवक्षितम्. तत्र हन्त्रन्तरात्मतया हन्तव्यदुःखजननानुगुणव्यापारानुगुणं नियमयन्नपि पुनर्हन्तव्यस्य हन्तृव्यापारजन्यदुःखाननुभवानुगुणतया नियमयतीति. कथमेकस्यैवंविधं परस्परविरुद्धं नियमनमितिशङ्कानिराचिकीर्षयाऽनिर्देश्य इत्युक्तम् लोकविलक्षणनिखिलविचित्रशक्तेरीदृशं नियन्तृत्वमुपपन्नमित्यभिप्रायः ॥ ४१ ॥

एवं शूलघातादिरूपमरणोद्योगरूपे प्रयासे अपहते व्यर्थे सति दैत्येन्द्रो हिरण्यकशिपुः परिशङ्कितः किमहो अयं शूलघातादिभिरपि नाहन्यत किमस्मादेव मम मृत्युर्भविष्यतीत्याशङ्कितः हे युधिष्ठिर ! निर्बन्धेन तस्य प्रह्लादस्य वधोपायान् चक्रे ॥ ४२ ॥

विविधोपायानेव प्रपञ्चयंस्तैरप्यहतत्वमाह—दिग्गजैरिति । दिग्गजाक्रमणैः दन्दशूकेन्द्रैः सर्पश्रेष्ठदंशनैः अभिचारैर्मारणहोमैः अवपातनैः गिरिशृङ्गेभ्योऽधःपातनैः मायाभिरकस्मादशनिपातनादिभिः सन्निरोधैर्नवरन्ध्रापिधानैः गरदानैः विषप्रयोगैः अभोजनैरुपवासैः ॥ ४३ ॥

हिमादिषु पातनैः पर्वताक्रमणैः पर्वतानां तदुपरि निक्षेपैः एवंविधैरुपायैरसुरैः प्रयोज्यकर्तृभिः यदा निरपराधं सुतं हन्तुं न शशाक नाशक्नोत् तदा तत्कर्तुं तद्धननङ्कर्तुं नाभ्यपद्यत उपायान्तरं न लेभे इत्यर्थः । प्रत्युत दीर्घतमां चिन्तां प्राप्तः ॥ ४४ ॥

चिन्तामेव प्रपञ्चयति—एष इति । एष बालो मे मया बह्वसाधु यथा भवति तथोक्तः तथा वधोपायाश्च निर्मिताः कारिताः असद्धर्मैरभिचारादिभिस्तैस्तैः द्रोहैः शूलघातादिभिश्च मुक्तोऽविहतः स्वेनैव तेजसा माहात्म्येन उक्तोपायेभ्योऽविदूर एव वर्तमानो बालोऽप्ययमजडा निपुणा धीर्यस्य तादृशः मे मम अनार्यं द्रोहं न स्मरति शुनःशेफ इव यथा शुनश्शे—फाख्यः पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन् तयोरपकारं विस्मरन् तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनःशेफः पुच्छमिवेति प्रभुः जितेन्द्रियः ॥ ४५ ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अत एवामरो मरणरहितः एतस्य विरोधेन हेतुना नूनं ममैव मृत्युः भविता भविष्यति न वा भविता एतद्विरोधेन मम मृत्युप्रभावे हेत्वन्तरेण नैव भविष्यतीत्यर्थः ॥ ४७ ॥

इतीत्थं तच्चिन्तया पुत्रविषयकचिन्तया म्लानश्रियं निस्तेजस्कं किञ्चिदधःकृतमुखं तं हिरण्यकशिपुमौशनसौ उशनसः शुक्रस्य पुत्रौ शण्डामर्काख्यौ विविक्ते निर्जने देशे, तस्य प्रतिष्ठाभङ्गादितिभावः, इति वक्ष्यमाणप्रकारेण ऊचतुः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनिर्देश्यत्वादिगुणशालिनि हरौ युक्तात्मनि प्रयोजितमनस्के प्रह्लादे अपुण्यस्येव पापिन इव तत्क्रियाः तेषां नैर्ऋतानां ताडनादिक्रियाः ॥ ४१—४२ ॥

वधोपायमाह—दिग्गजैरित्यादिना । अवपातनं गिरिशृङ्गादधःपातनं सन्निरोधैरनिर्गमगर्तगृहे निक्षिप्य पीडनैः पर्वताक्रमणैः पर्वतारोहणैः उपरि पर्वतपातनैर्वा ॥ ४३—४४ ॥

तत्कर्तुं हननं कर्तुम् ॥ ४५ ॥

असद्धर्मैरसतां योग्यैः अविदूरे समीपे विदूरे वा वर्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मानोऽजडधीः पटुतरबुद्धिः अनार्यं मूर्खकर्म अन्वाय्यमिति पाठे ायशास्त्रविरुद्धं मह्यमपरं शतं दत्त्वाहमेनं विशासिष्यामीत्याद्य-ागर्तकृतकर्म शुनःशेपेन यथा सोढुं तथेति ॥ ४६—४७ ॥

इति वक्ष्यमाणप्रकारं हेत्युच्यमानेर्थे तात्पर्याऽतिशयं वक्ति ॥४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भगवति हरौ युक्तः संयुक्तः आत्मा देहो यस्य तस्मिन् 'गोविन्द-परिरम्भितः' इत्यादि पूर्वोक्तैः पित्रा स्वाङ्कगुप्ते पुत्रे इवेति भावः नतु, तर्हि किं भगवदङ्गोपरि शस्त्रप्रहाराः अभूवंस्तत्र न हि न ह्यसम्भवादेवेत्याह—परे इत्यादि । ब्रह्मणि व्यापके निर्विकारे अनिर्देश्ये भगवति अतर्क्यैश्वर्ये अखिलात्मनि शस्त्रादीनामपि नियन्तरि शस्त्रघाताः कथं सम्भवतीतिभावः अपुण्यस्य दुर्भाग्यस्य ॥ ४१ ॥ ४२ ॥

अभिचारैः कृत्यादिभिः अवपातनैरत्युच्चदेशादधःपातनैः गर्त्तादिसंनिरोधैः वहुवचनैरभिचाराद्यावृत्तयः सूचिताः तद्धननं कर्तुं नाऽभ्यपद्यत नाशक्नोदित्यर्थः ॥ ४३ ॥ ४४ ॥

चिन्तामाह—एष इति त्रिभिः । असतां धर्मैरभिचारैश्च ॥४५॥

अविदूरे वर्त्तमानोपि मे अनार्य्यं शत्रुं विष्णुं न विस्मरति स्वभावापरित्यागे दृष्टान्तः शुनः शेफः पुच्छमिव वस्तुतस्तु शुनश्शेफो नाम पितृभ्यां हरिश्चन्द्राय विक्रीतो मध्यमः पुत्रः स यथा तयोरपकारंमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् ॥ ४६ ॥ ४७ ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अखिलात्मनि परे अखिलविलक्षणे बृहत्स्वरूपगुणादिमति भगवति युक्त आत्मा मनो यस्य तस्मिन् प्रह्लादे प्रयासा अफला आसन् सम्यक् कृता अपि निष्फला जाता इत्यत्र दृष्टान्तमाह-अपुण्यस्य पापिनः वहुपापाचरणेन सत्कर्मनाशकस्य सत्क्रियाः नित्यनैमित्तिकानि सत्कर्माणि इव ॥ ४१ ॥

अपहते निष्फले जाते निर्बन्धेनात्याग्रहेण ॥ ४२ ॥

दिग्गजादिभिः हन्तुं यदा न शशाक तदा चिन्तां प्राप्तस्तत्कर्तुं नाभ्यपद्येतेत्यनेनान्वयः दिग्गजैस्तदाक्रमणैः दन्दशूकेन्द्रैस्तद्दंशनैः अभिचारैः कृत्यादिभिः अवपातनैः पर्वतादितः मायाभिः आसुरीविद्याभिः सन्निरोधैरवटादिषु ॥ ४३ ॥

पर्वताक्रमणैस्तदुपरिपर्वतनिक्षेपैः यदा हन्तुं न शशाक तदा दीर्घतमां दुस्तरां चिन्तां प्राप्तस्सन् तद्घातं कर्तुमुपायं नाभ्यपद्यत न प्राप्तः ॥ ४४ ॥

चिन्तामेवाह—एषेत्यादिना । मे मया असाधु परुषं यथा स्यात्तथोक्तः वधोपायाश्च वहुधा निर्मिताः तैर्द्रोहैर्वधो पायैरसतां धर्मैरसद्भिः कर्तुमुचितैः स्वेनैव तेजसा भजनबलेन मुक्तः ॥ ४५ ॥

यद्यप्ययं बालस्तथापि अविदूरे वर्त्तमानः अजडधीः पण्डितः प्रभुः समर्थश्च शुनःशेफः पुच्छमिव स्वभावापरित्यागीत्यर्थः अतो मेऽनार्य्यं न विस्मरति ॥ ४६ ॥

अतश्च नूनं निश्चितमेतद्विरोधेन मे मृत्युर्भविता भविष्यति वाऽथवा अप्रमेयानुभावोऽपि अयममरो देवरूपः ममानार्य्यं विस्मृत्य मां न घातयेदित्यर्थः ॥ ४७ ॥

औशनसौ शुक्रपुत्रौ अतः शुक्रोक्तनीतिशास्त्राभिज्ञत्वाद्विविक्ते एकान्ते इति वक्ष्यमाणमूचतुः ॥ ४८ ॥

भाषा टीका ।

परब्रह्म अनिर्देश्य (प्राकृत इंन्द्रियों का अविषय) अखिल जीवों का आत्मा षड्गुण सम्पन्न परमात्मा में चित्त लगा जिसका ऐसे प्रलहाद के उपर वे शस्त्र सव निष्फल हो गये जैसे प्रारब्धहीन पुरुष के उद्यम ॥ ४१ ॥

हे युधिष्टिर ! दैत्यों के प्रयास के नष्ट होने पर दैत्येन्द्र हिरण्यकशिपु शंकित होकर निर्वन्ध से प्रलहाद के वध का उपाय करने लगा ॥ ४२ ॥

हस्ती सर्प अभिचार अधपातन नाना प्रकार की माया और निरोध विषदान भोजन न देना ॥ हिम वायु अग्नि जल ऊपर पर्वत से पटकना इत्यादिक उपायों से निष्पाप अपने पुत्र को असुर जब न मार सका तब बडी दीर्घ शंका को प्राप्त हुआ और मारने के उपाय को न प्राप्त हुआ ॥ ४३-४४ ॥

और बोला कि—इसको मैंने बहुत परुष कहा और मारने के भी बहुत से उपाय रचे और द्रोह भी किये परंच उन २ द्रोहों से और अधर्मों से यह बालक अपने तेज से ही मुक्त होगया ॥ ४५ ॥

और मेरे समीप रहकर बालक होकर भी यह निर्भय चित्त है और यह मेरी शत्रुता को नही भूलता, और इसका स्वभाव नही त्यक्त होता, जैसे कुत्ते की पूंछ कितना ही यत्न करो पर सीधी नही होती ॥ ४६ ॥

इसके प्रभाव का प्रमाण नहीं होसक्ता और इसको कहीं से भय भी नहीं और यह अमर मालूम होता है क्या इसके विरोध से मेरी मृत्यु तो न होगी ? ॥ ४७ ॥

इस तरह की चिंता से किञ्चित् म्लान हुई शोभा जिसकी और नीचे को मुखकर बैठा हुआ ऐसे हिरण्यकशिपु से शुक्राचारी के पुत्र शंडामर्क दोने एकांत में ऐसे बोले ॥ ४८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जितं त्वयैकेन जगत्त्रयं भ्रुवो विजृम्भणात्त्रस्तसमस्तधिष्ण्यपम् ।
न तस्य चिन्त्यं तव नाथ ! (१) चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥ ४९ ॥
इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ ५० ॥
तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ।
धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनाम् ॥ ५१ ॥
धर्ममर्थं च कामं च नितरां चानुपूर्वशः ।
प्रह्लादायोचतू राजन् ! प्रश्रितावनताय च ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भ्रुवोर्विजृम्भणेनैव त्रस्ताः समस्ता धिष्ण्यपा लोकपालाः यस्मिन् तस्य तव चिन्त्यं न चक्ष्महे न पश्यामः पदमालम्बनं नैवास्ति यद्वा शिशूनां वृत्तं गुणदोषयोः पदं विषयो न भवतीत्यर्थः ॥ ४९ ॥

तथाऽपि तु बन्धनमस्योचितमित्याहतुः–इमन्त्विति । यावद्गुरुर्भार्गव आगमिष्यति तावद्बद्ध्वा निधेहि ततः किमत ऊचतुः यतः पुंसो बुद्धिश्च वयसा तथा आर्यसेवया समीचीना भवति ॥ ५० ॥

अनुज्ञाय तथेत्यङ्गीकृत्य ॥ ५१ ॥

ततश्च तौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रितश्चासाववनतश्च तस्मै ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—जितमिति । तव भ्रुवो विजृम्भणेन चलनमात्रेण त्रस्ता भीताः सर्वे धिष्ण्यपाः लोकपालाः यस्मिन् तज्जगत्त्रयं त्वयैकेनासहायेन जितम् एवंभूतस्य तव हे नाथ प्रभो ! चिन्तनीयं न चक्ष्महे न पश्यामः शिशूनां वृत्तमिति शेषः तद्गुणदोषयोः पदं विषयो नवै न भवतीत्यर्थः ॥ ४९ ॥

अत इमं बालं यावद्गुरुर्भगवान्भार्गवः शुक्र आगमिष्यति तावद्वरुणस्य पाशैः बद्धं निधेहि कुरु भीतोऽयं यथा न पलायते तथा बद्धं निधेहीत्यर्थः । ततः किं तत्राहतुः वयसा आर्याणां सेवया च पुंसो बुद्धिर्भविष्यति ॥ ५० ॥

एवं गुरुपुत्रोक्तं तथेत्यनुज्ञायाङ्गीकृत्य दैत्येन्द्र इदं वक्ष्यमाणमब्रवीत्. तदेवाह—धर्मोहीति । अस्य बालस्य धर्मा उपदेष्टव्याः, के ते ? ये राज्ञां ये च गृहस्थानां ते ॥ ५१ ॥

एवमुक्तौ गुरुपुत्रौ तथैवोपदिदिशतुरित्याह नारदः—धर्ममिति । धर्मार्थकामस्वरूपान् साधनान् नितरामत्यन्तमानुपूर्वशः हे राजन् प्रश्रयेण विनयेन अवनताय नम्राय प्रह्लादायोचतुरुपदिदिशतुः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धिष्ण्यपाश्चन्द्रादित्यादयः लोकपाला वा चक्ष्महे पश्यामः शिशूनां प्रेङ्खायां शयनशीलानां बुद्धिविकासरहितानां वा तत्कर्यां गुणदोषयोः पदमास्पदं न वै हि गुणदोषग्रहणबुद्धिविकासाभावादित्यर्थः । शिशूनां गुणदोषयोः पदं नास्तीति वा ॥४९॥

तर्हि का परबुद्धिरित्यत्रोच्यते—इममिति । तुनाऽधुनेयमेव बुद्धिरिति विशिनष्टि, कियन्तं कालमेवमिति तत्राह–यावदिति । तावदिति शेषः ततश्च किन्तत्राह, बुद्धिश्चेति. पापजननी च वयसा कालविशेषविशिष्टेनायुर्लक्षणेनार्याणां सेवया स्यादिति शेषः ॥ ५०—५१—५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शिशूनां गुणदोषयोः पदमालम्बनं नास्ति । यदालम्ब्य तौ प्रवर्त्तेत तदेव तेषां नास्ति सारासारविचाराभावात् ॥ ४९ ॥ ५० ॥

गृहमेधिनां तत्रापि राज्ञाम् ॥ ५१—५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य तव चिन्त्यं स्वाभिलषणीयवस्तुनोऽप्राप्त्या चिन्तनीयं किमपि न चक्ष्वहे न पश्याव इत्यर्थः पुत्रोऽयं मे मद्विरुद्धस्वभाव इति चेत्तत्राह—नेति । शिशूनां पदं व्यवसायं गुणदोषयोर्मध्ये न चक्ष्वहे न किमपि पश्यावः शैशवान्ते सति बुद्धेर्भद्राभद्रत्वं ज्ञास्याव इति भावः । वै इति चार्थे । चक्ष्वहे इत्युभयत्रान्वयः ॥ ४९ ॥

भवतु सम्प्रति किं करोमि तत्राहतुः—इमन्त्विति । यतः पुंमात्रस्यैव बुद्धिर्वयसा बाल्यात् परेणैव तथा आर्यस्य सेवया च, क आर्यः ? कदा वा अनेन सेव्यः ? तत्राह—यावदित्यर्थः भार्गवः शुक्राचार्य इत्यर्थः ॥ ५० ॥

अनुज्ञाय अङ्गीकृत्य ॥ ५१ ॥ ५२ ॥

(१) चक्ष्वहे इति—चक्रवर्ति० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम् ।
न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥ ५३ ॥
यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ।
वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५४ ॥
अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ।
उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥
ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ।
बाला न दूषितधियो द्वन्द्वारामेरितेहितैः ॥ ५६ ॥
पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ।
तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे प्रह्लादचरिते
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नाथ भ्रुवोर्विजृम्भणेन त्रस्ताः समस्ताः धिष्ण्यपाः यस्मिन् तज्जगत्त्रयं त्वयैकेनैव जितं तस्य तव चिन्त्यं चिन्तास्पदं न चक्ष्महे न पश्यामः शिशूनां बालानाञ्च गुणदोषयोः पदं निमित्तं न चक्ष्महे बालाः पित्रादीनामप्रियमपि कुर्वन्तीत्यर्थः ॥४९॥

तथापि देवेषु त्वद्भयान्न पलायते यथा तथेमं यावद्भार्गव-आगमिष्यति तावत्कालं वरुणस्य पाशैर्बद्ध्वा निधेहि एकत्र स्थापय भार्गवे आगते तु विचक्षणोऽयं भविष्यतीत्याशयेनाहतुः बुद्धि-श्चेति सर्वोऽपि जनः वयसा वृद्धसङ्गेन च ज्ञानवान् भवतीत्यर्थः ॥५०॥

गुरुपुत्रोक्तं तथेत्यनुज्ञाप्य स्वीकृत्येदमब्रवीत् ॥ ५१ ॥

तौ च प्रश्रितश्चासाववनतश्च तस्मै धर्मादिकमूचतुः ॥ ५२ ॥

भाषाटीका ।

हे नाथ ! तुम इकले ने ही भृकुटि के विक्षेप से तीनो जगत और समस्त लोकेशों जीत लिया अब आप के चिंता के लायक कुछ नहीं दिखाई देते फिर आप सदृशों को बालकों का चरित कुछ भी गुण दोष का विषय नहीं हैं ॥ ४९ ॥

और इस लड़के को तौ वरुण के पाशों से बांधकर रखो कि जिससे भय के मारे भाग न जाय और पुरुष की बुद्धि भी अवस्था अधिक होने तथा श्रेष्ठों के सेवा से अच्छी होजाती है और तब तक श्रीगुरूजी (शुक्राचारी) भी आप जाते हैं ॥ ५० ॥

गुरु पुत्र के वचन को अंगीकार कर हिरण्यकशिपु बोला कि अच्छा तौ अब इसको गृहस्थ राजाओं के जो धर्म हैं उनको उपदेश करो ॥ ५१ ॥

नारदजी बोले, कि-हे राजन् तदनंतर वे दोनों गुरुपुत्र प्रश्रय और नम्रता युक्त प्रह्लाद को क्रम से निरंतर धर्म अर्थ और काम का उपदेश करने लगे ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा यथावत् त्रिवर्गमुपशिक्षितमपि न साधु मेने तत्तां शिक्षां च कुतः द्वन्द्वैः रागद्वेषादिभिर्विषयैश्चारमणं येषां तैरुपवर्णितां ॥ ५३ ॥

परावृत्तोऽन्यत्र गतः स उपहूतः सन्धिः पादपूरणार्थम क्रीडार्थं कृतक्षणैः कृतोत्सवैर्लब्धावसरैरितिवा ॥ ५४ ॥

तन्निष्ठां तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ॥ ५५ ॥

द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषाम् मतो-बालाः ॥ ५६ ॥

तस्मिन्नेव न्यस्तं हृदयमीक्षणाञ्च यैः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
पञ्चमोऽध्यायः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तद्यथावद् त्रिवर्गमात्मने स्वस्मै उपशिक्षितमपि साधु न मेने नामन्यत तच्छिक्षाञ्च कुतः द्वन्द्वैः रागद्वेषादिभिः विषयेष्वारमणं येषां तैरुपवर्णिताम् ॥ ५३ ॥

किञ्च यदा आचार्यः गार्हस्थ्यधर्मेषु परावृत्तः परोक्षं प्रवृत्तः व्यासङ्गान्तरपर इत्यर्थः । तदा कृतक्षणैः लब्धावकाशैः वयस्यैः समानवयस्कैः बालैस्तत्रोपहूतः सः प्रह्लादः ॥ ५४ ॥

महान्सुधीर्विद्वान् श्लक्ष्णया मधुरया वाचा तान् बालकान्प्रत्याहूय सम्बोध्य कृपया प्रहसन्निव तन्निष्ठां विज्ञानमार्गनिष्ठाम् उवाच ॥ ५५ ॥

ते तु बालकाः सर्वे तद्गौरवात् तद्वचनगौरवात् त्यक्ताः क्रीडापरिच्छदाः क्रीडोपकरणानि यैर्द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषान्ते ॥ ५६ ॥

हे राजेन्द्र ! तस्मिन्नेव प्रह्लादे न्यस्तं हृदयं मन ईक्षणञ्च यैस्ते तं प्रह्लादमेव पर्य्युपासत शुश्रूषवः परिवेष्ट्योपविविशुरित्यर्थः । तान्पर्य्युपासीनान् कारुण्यमैत्र्ययुक्तो महाभागवतो ऽसुरः प्रह्लादः प्राह आह॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा द्वन्द्वारामोपवर्णितां रागद्वेषादिव्यापृतबुद्धिभिर्व्याख्याताम् ॥ ५३ ॥

यदाचार्योऽध्यापनात्परावृत्त उपरतः गृहमेधीयकर्मस्वग्निहोत्रादिलक्षणेषु व्यापृतो वा तत्र तदा कृतक्षणैः कृतावसरैः वयस्यैर्बालकैः स उपहूतः क्रीडार्थमितिशेषः 'सोऽचिन्तुमद्वृक्षुमता सोऽचिन्तुसर्वा' सैषदाशरथीराम इत्यादिषु दृष्टव्योऽयं प्रयोगः॥५४॥

अथागतस्सन् तस्यां क्रियायां निष्ठामिच्छां विद्वांस्तेषां वयस्यानां निष्ठां स्वस्मिन् स्नेहविशेषं वा ॥ ५५ ॥

द्वंद्वारामेरितैर्वचनैरीहितैः प्रवृत्तिभिश्च न दूषितधियः ॥५६॥

स एषोऽसुः "स एष प्राणः" इति श्रुतेः मुख्यप्राणे रमत इत्यसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदेति तत्र तदा ॥ ५४—५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथावत् त्रिवर्गमुपशिक्षितमपि साधु न मेने तां शिक्षाञ्च यतो द्वंद्वारामे सांसारिकलोकविषये एव उपवर्णितां न तु पारमार्थिके ॥ ५३ ॥

परावृत्तः अध्यापनस्थानात् परावृत्य स्वगृहं गतः कर्मसु प्रावर्त्तत तदा स प्रह्लादः कृतक्षणैः क्रीडार्थं कृतोत्सवैः यद्वा भक्तिशिक्षार्थम् अयं निभृतः समय इति कृतावसरैः ॥ ५४ ॥

तेषां बालानां स्वस्मिन् गुरुत्वनिष्ठां विद्वान् जानन् प्रहसन्निव अहो इमे अपि भगवदनुकम्पाजाले पतिताः इति स्मयमानः ॥ ५५ ॥

द्वन्द्वारामाणां द्विजानां ईरितैर्व्याख्यातैरर्थैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषान्ते ॥ ५६ ॥ ५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे पञ्चमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रह्लादस्तु गुरुभिर्यथावदात्मने उपशिक्षितं त्रिवर्गं न साधु मेने तच्छिक्षाञ्च द्वन्द्वारामाभ्यामुपवर्णितां न साधु मेने ॥ ५३ ॥

यदाऽऽचार्यो गृहमेधीयकर्मसु परावृत्तः परोक्षो भूत्वा प्रवृत्तः तत्रावसरे कृतक्षणैर्लब्धावसरैः सः प्रह्लाद उपहूतः ॥ ५४ ॥

अथ तदाह्वानानन्तरं सोऽपि महाबुधस्तान्प्रत्याहूय सम्बोध्य प्रहसन् तन्निष्ठां तस्मिन् स्वोपास्ये विष्णौ निष्ठां कृपयोवाच ॥ ५५ ॥

ते बालकास्तु द्वन्द्वारामाणामसुराणामीरितैर्वाक्यैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषां तथा भूताः ॥ ५६ ॥

पर्य्युपासत प्रह्लादस्य परित उपविविशुः, कथम्भूताः ? तस्मिन् प्रह्लादे न्यस्तानि हृदयानीक्षणानि च यैस्ते तथा ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाध्यायप्रकाशः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषा टीका ।

गुरुने प्रह्लाद को त्रिवर्ग का विषय यथावत सिखाया परन्च द्वंद्वारामो से उपवर्णित उस शिक्षा को प्रल्हाद ने अच्छा न माना ॥ ५३ ॥

जब एक समय आचार्य किसी गृह में ग्वीय कर्म के निमित्त अन्यत्र चले गये तब अवसर मिलने पर समान वयस्क बालकों ने इनको (क्रीडार्थ) बुलाया ॥ ५४ ॥

तब तो बड़े बुद्धि वाले विद्वान प्रल्हादजी कृपा करके उनको समीपु बुलाकर हंसते से उनकी निष्ठा (दशा) को कहने लगे ॥ ५५ ॥

वो बडके भी सब प्रल्हाद के गौरव से क्रीड़ा की सामग्री को छोडकर समीप आये, और हे राजन् संसारिओं के कथन और चेष्टा से नहीं दूषित हुई बुद्धि जिनकी एसे वो बालक लोग प्रल्हाद में हृदय और नेत्र लगाकर भोले २ प्रल्हाद के चारों तरफ बैठ गये । तब बडे कारुणिक मैत्र महा भागवत प्रल्हाद उनसे बोले ॥ ५६—५७ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, पञ्चमाध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ षष्ठोऽध्यायः ॥

प्रह्लाद उवाच ।

* (हन्तार्भका ! मे शृणुत वचो वः सर्वतः शिवम् ।
वयस्यान्पश्यत मृतान् क्रीडान्धा माप्रमाद्यथ ॥ ० ॥
न पुरा विवशं बाला आत्मनोऽर्थे प्रियैषिणः ।
गुरूक्तमपि न ग्राह्यं यदनर्थेऽर्थकल्पनम् ॥ ० ॥
यदुक्त्या न प्रबुध्येत सुप्तस्त्वज्ञाननिद्रया ।
न श्रद्दध्यान्मतं तस्य यथाघोह्यन्धनायकः ॥ ० ॥
कः शत्रुः क उदासीनः किं मित्रं चेह आत्मनः ।
भवत्स्वपि नयैः किंस्याद्दैवं सम्पद्विपत्पदम् ॥ ० ॥
यो न हिंस्याद्धर्मकाममात्मानं स्वजने वशः ।
पुनः श्रीलोकयोर्हेतुः समुक्तान्ध्योतिदुर्लभः ॥ ० ॥)

प्रह्लाद उवाच ।

कौमार आचरेत्प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ।
यदेष सर्वभूतानां प्रिय आत्मेश्वरस्सुहृत् ॥ २ ॥
सुखमैन्द्रियकं दैत्याः ! देहयोगेन देहिनाम् ।
सर्वत्र लभ्यते दैवाद्यथा (१) दुःखमयत्नतः ॥ ३ ॥
तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ।
न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे गुरौ गृहव्यग्रे प्रह्लादो दैत्यबालकान् ।
अनुकम्प्य परं तत्त्वं नारदोक्तमुपादिशत् ॥ १ ॥
निरर्थकक्रियाबाधैरायुर्व्ययमजानताम् ।
प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥

कौमार इत्यादिना इहैव मानुषजन्मनि धर्मानाचरेत्, यतोऽर्थदमेतत्. तत्र च कौमार एव यतस्तदप्यध्रुवम्; नचैवंभूतं जन्मान्तरम् यतो दुर्लभम् तत्र धर्मानेवाचरेन्न सुखार्थं प्रयासान्. तत्र भागवतानेव, न काम्यान् ॥ १ ॥

इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति–यथाहीति,

* इते श्लोकाः विजयध्वजरीत्याऽर्भकाःपठ्यन्ते ॥ (१) यथाऽसुखमिति वीर० पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्भिः । इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथाऽनुरूपं योग्यमित्यर्थः । यद्यस्मादेष प्रिय इत्यादि ॥ २ ॥

ननु, भोगोद्यमः कथन्त्याज्य इति चेत्तत्राऽऽह—सुखमिति । सर्वत्र पश्चादावपि दैवात्पूर्वादृष्टादेव ॥ ३ ॥

अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासात्परं केवलमायुषो व्यय एव यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्यकुमारैः पर्युपासितो महाभागवतः प्रह्लादस्तेभ्यः करुणयाऽनन्तस्थिरफलब्रह्मानन्दानुभवसाधनभागवतधर्मानुपदिदिक्षुरुपदेक्ष्यमाणधर्मप्रतिष्ठापनाय तद्धेतुवैराग्यजननाय च वैषयिकसुखानामल्पास्थिरत्वं दुःखगर्भत्वमत एव हेयत्वमयत्नलभ्यत्वञ्च विवक्षुस्तावन्मनुष्यजन्मन एव भागवतधर्माचरणार्हत्वं तत्राप्यस्थिरत्वेन बाल्यात्प्रभृत्येव तद्धर्मानुष्ठानस्य कर्तव्यत्वञ्चाह—कौमार इति । इह मनुष्यजन्मन्येव प्राज्ञः हेयोपादेयविभागाभिज्ञः पुमान् कौमारे बाल्य एव तत्प्रभृतीत्यर्थः भागवतान् भगवत्सम्बन्धिनः भगवत्प्राप्तिसाधनान् धर्मानेवाचरेत् भगवच्छब्देन तेषां निष्फलत्वशङ्काप्रयुक्ताऽननुष्ठेयत्वशङ्काप्युदस्यते. तथाहि—

"शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।
मैत्रेय ! भगवच्छब्दः सर्वकारणकारणे ॥
सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ! ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विनाहेयैर्गुणादिभिः" ॥

इत्यादिना श्रीमत्पराशरोक्तप्रत्यक्षरसमुदायनिर्वचनावगताः संभर्तृत्वभर्तृत्वनेतृत्वगमयितृत्वस्रष्टृत्वसर्वशरीरकत्वसर्वभूतान्तरात्मत्वनिरस्तनिखिलदोषत्वषाड्गुण्यपूर्णत्वादयोऽर्थाः अत्र विवक्षिताः । तत्र संभरणं नामोपकरणसंविधानं तच्च, प्रकृतिपुरुषकालानां कार्योत्पत्तियोग्यतापादनरूपम् भर्तृत्वम्. निरुपाधिकस्वामित्वं नेतृत्वम्. गमयितृरूपं स्थितिकर्तृत्वं गमयितृत्वम्. सङ्गमयितृत्वरूपं संहर्तृत्वम्. स्रष्टृत्वमुद्गमयितृत्वरूपं सृष्टिकर्तृत्वम्. यशो गुणवत्ता प्रथा. श्रीर्भोग्यसम्पत्. वैराग्यं विरक्तिः सा च परिपूर्णत्वादनादररूपा एवञ्चाऽनुष्ठितैर्धर्मैः प्राप्यस्य भगवत एवं विधत्वात्तत्प्राप्तेः निःश्रेयसरूपत्वात्तत्प्राप्तिसाधनभूता धर्माः परमपुरुषार्थार्थिभिरवश्यमनुष्ठेयास्ते च बाल्यादारभ्यैव कर्तव्या इत्यर्थः । इहैवेत्यनेन मनुष्यजन्मन एव भगवद्धर्माचरणोपयुक्तत्वमन्यस्य तु तदननुगुणत्वञ्चाभिप्रेतम्. तत्रापि पुरोवर्तिपरामर्शिनेह शब्दप्रकृतिभूतेनेदंशब्देनाधुना वर्तमानमनुष्यजन्मन्येव भगवद्धर्मकर्तव्यताऽभिप्रेता. नन्वन्यस्मिन्नपि मनुष्यजन्मनि तेषां कर्तुं शक्यत्वात्किं विशेषेणाधुनिक एव जन्मनि कर्तव्यतोच्यते इत्यत आह—दुर्लभं मानुषं जन्मेति । विविधविचित्रात्मकपुण्यपापात्मककर्मभिः देवतिर्यङ्मनुष्यस्थावरादिरूपेण संसरतो जीवस्य नियमेन प्रतिजन्म मानुषंजन्मैवेति विश्वासहेतोरभावात् दुर्लभं मानुषं जन्म सुकृतपरिपाकविशेषाल्लब्धमिति. तत्रैव भगवद्धर्मानाचरेदिति भावः । ननु, किं विशेषेण कौमार एवाचरेदित्युच्यते यथेष्टं विषयभोगानन्तरं चतुर्थे वयसि तेषां कर्तुं शक्यत्वादित्यत आह—तदप्यध्रुवमिति । चतुर्थवयःपर्यन्तजीवन हेतोर्विश्वसनीयस्याभावात्कौमारात्प्रभृत्येवाचरेदितिभावः । ननु, चिरकालसाध्या भगवद्धर्माः कथमस्थिरेण मनुष्यजन्मना निर्वर्त्यंते ! कथन्तरां निःश्रेयसप्राप्तिः ? अत आह—अर्थदमिति, यद्यप्यध्रुवं तथाप्यर्थदमित्यर्थः । अयं भावः, यद्यप्यध्रुवं तथापि चिरकालजीवननिमित्ते कर्मण्यारब्धभगवद्धर्मविरोधिकर्माभावे च सति यथावत्फलपर्यन्तभगवतद्धर्मोपसंहारद्वारा निःश्रेयसरूपनिरतिशयपुरुषार्थदं चिरजीवनहेत्वभावे वा आरब्धभगवद्धर्मविरोधिकर्मसद्भावेऽपि वा "नेहाभिक्रमनाशोऽस्ति, न हि कल्याणकृत्कश्चिद्दुर्गतिं तात ! गच्छति" इत्यादिभगवदुक्तरीत्या जन्मान्तरे यथावद्भगवद्धर्मोपसंहारद्वारा निःश्रेयसरूपार्थदं भवतीति. अत्र "सर्वं वाक्यं सावधारणम्" इति न्यायेनाब्भक्षो वायुभक्ष इत्यादिवत्कौमार एव भागवतान्धर्मानेवेहैवेत्यवधारणमभिप्रेतम् ॥ १ ॥

तत्र भागवतानेव धर्मानाचरेदित्यवधारणं तावदुपपादयति-यथार्हीति । हि तथार्हीत्यर्थः यथाशब्दो योग्यताद्योतकः इह मनुष्यजन्मनि विष्णोः परमपुरुषार्थस्वरूपस्य पादयोरुपसर्पणं भजनं यथा योग्यं तदेव युक्तमित्यर्थः ।कुतः ? यद्यस्मादेष परमपुरुषःसर्वभूतानामात्मेश्वरः अन्तःप्रविश्य प्रशासनपूर्वकं भर्ता, शरीरस्यात्माऽनुवर्तनं युक्तमिति भावः । नन्वात्मान्यपुरुषार्थरूपत्वाच्चानुवर्तनीयोऽत आह—प्रिय इति । प्रियः इष्टतमः निरतिशयानन्दरूप इत्यर्थः। आनन्द एव हीष्टः स एव हि पुरुषार्थरूपः इति भावः । नन्वेवंभूतोऽपि निष्कृपत्वादनुवर्तमानान् प्राख्यापयेत्तत्राह—सुहृदिति । "एषह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति" इति श्रुत्युक्तरीत्या स्वानुवृत्त्युपक्रममात्रेणाविर्भूतपरमकारुण्ययुक्त उत्तरोत्तरं स्वानुवृत्तिप्रवर्तनारूपहितकारीत्यर्थः ॥ २ ॥

विष्णोः पादोपसर्पणमेव युक्तमित्यनेन वैषयिकसुखसाधनयत्नो न युक्त इत्युक्तम् तदेव सहेतुकं सदृष्टान्तञ्चोपपादयन्निहैवेत्यवधारणमप्युपपादयति—सुखमिति । हे दैत्याः ! देहिनां देहयोगेन देहसम्बन्धमात्रेण इन्द्रियकं सुखं सर्वत्र पश्चादिजन्मस्वप्याधुनिकयत्नमन्तरेणापि दैवात्प्राचीनकर्मणैव लभ्यते तत्र दृष्टान्तः यथाऽसुखमिति, असुखं दुःखं यथा यत्नमन्तरेणापि दैवादेव लभ्यते. तथा वैषयिकं सुखमपीत्यर्थः । सर्वत्र लभ्यते इत्यनेन वैषयिकसुखलाभः सर्वजन्मसाधारणः भगवद्धर्मलाभस्तु मनुष्यजन्मासाधारण इत्युक्तं भवति ॥ ३ ॥

यतो वैषयिकं सुखं सर्वजन्मसाधारणं तच्च दैवादेव सुलभम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

असुखवत्तस्मात्प्रयासो वैषयिकसुखार्थप्रयासो न कर्त्तव्यः एवमविजानता कुतोपि प्रयासः केवलमायुर्व्ययकर इत्याह—यत इति । यतोवैषयिकसुखार्थात्प्रयासात्परं केवलमायुःक्षयएव. नान्यत्किञ्चिदस्ति प्रयोजनमित्यर्थः । ननु, जन्मान्तरे पुनरैन्द्रियकसुखलाभाय कर्त्तव्य एव यत्नस्तत्राह—न तथेति. यद्यपि कुतोऽपि तदर्थप्रयासो जन्मान्तरेयवैषयिकसुखसाधनस्तथापि तथा तद्वत्क्षेमं न प्राप्नोति । कथं यथा मुकुन्दचरणाम्बुजं, भजन्निति शेषः । यथा भगवच्चरणाम्बुजं भजन् पुमान् निःशेषदुःखनिवृत्तिपूर्वकं नित्यनिरुपाधिकानिरतिशयाऽपरिच्छिन्नब्रह्मानन्दानुभवरूपं क्षेमं प्राप्नोति. तथा वैषयिकसुखार्थं यतमानस्तादृशं क्षेमं न विन्दते किन्तु दुःखमिश्रानित्यसोपाधिकात्यल्पमिदानीमनुभूयमानसजातीयं प्राप्नोतीत्यर्थः ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दचरणारविन्दनिरन्तरसेवैवेहामुत्रानश्वरानन्दनिदानम्. नान्यदतः सैव मुमुक्षुभिरनुदिनं कर्तव्येति विधीयतेऽस्मिन्नध्याये. तत्र प्रह्लादो बालकान् किमाहेत्याशंक्याह--हन्तेति। बालानुकम्पायां वाक्यारम्भे वा तद्वचःश्रवणात्किं फलं स्यादिति तत्राह-वइति । वः सर्वतः सर्वस्मात् शिवं सुखं स्यादिति शेषः कीदृशं वच इत्यतोवाह, व इति । शिवं शुभं मङ्गलम्. ननु, कस्मान्मङ्गलमिति तत्राह, वयस्यानिति संसारविरक्तिजनकत्वेन पुरुषार्थहेतुत्वान्मङ्गलमित्यर्थः । अतेनाधुनाऽस्माकं वाल्यमुत्तरत्र श्रेयःसम्पादनाय प्रयतामह इत्याशा निरस्तेति ज्ञायते यतोऽस्मदायुः कृतान्तविलुलितं तस्मात् क्रीडासक्तत्वेन युष्मद्धितविमर्शप्रमादो न कार्य इत्याह—क्रीडान्धा इति ॥ ० ॥

ननु, बालानां क्रीडान्धत्वं स्वभाव इति तत्राह—नेति । इतः पुरातना बाला अन्तःकरणं क्रीडायां विवशं न कुर्वन्तीति शेषः तर्हि किङ्कारं वर्तत इति तत्राह—आत्मन इति. अर्थे जन्मप्रभृति आत्मनोर्थे आत्मनः प्रियैषिणः परमात्मनः ज्ञानेच्छवः मोक्षलक्षणाभियेच्छवो वा आत्मनः प्रियैषिणः स्वप्रयोजनमाकांक्षमाणा आबाल्यात्प्रवर्तत इति वा. नन्वस्माभिरपि क्रीडामाकांक्ष्यां गुरुभ्यामुपदिष्टत्रिवर्गविषयशास्त्रश्रवणश्रेयसि प्रवर्त्यते तत्र गुर्ववसरप्रतीक्षणायेयं क्रीडेति तत्राह--गुरूक्तमिति । कुतो-न ग्राह्यमिति तत्राह—यदनर्थं इति. संसारहेतुत्वादनर्थं त्रिवर्गलक्षणे श्रेयस्यर्थकल्पनं यत्तस्मादिति शेषः—

"त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते"
"इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः"

इत्यादेश्च ॥ ० ॥

ननु, गुरूक्तयथार्थत्वेन ज्ञानहेतुत्वोपपत्तेः कथं तदनर्थेऽर्थकल्पनमिति तत्राह—यद्युक्त्येति । अज्ञानलक्षणानिद्रया सुप्तस्त्रिवर्गविषयलक्षणमात्रग्रहलक्षणो यथार्थज्ञानविरोधित्वादज्ञानं नाम न तु ज्ञानमात्राभावः सुप्तस्यापि गुरूक्त्या प्रबोधो हि प्रयोजनं स नोत्पद्यते चेत्तदुपदेशेन किं प्रयोजनं प्रत्युत तदनुष्ठानेनानर्थ एव स्यादिति भावः । अतः फलित माह--नेति-अत्रोदाहरणमाह—यथेति. अन्धो नायको नेता यस्य स तथा हि शब्देनोभयोरप्यन्धत्वान्मार्गज्ञानं नोत्पद्यते यथा, तथात्रापीत्यस्माच्छ्रद्धा न कार्या ॥ ० ॥

ननु,

"समूलघातमघ्नन्तः पराञ्नोद्यन्ति भूभृतः ।
निर्विष्योदर्चिषं कक्षे शेरते तेभिमारुतम् ॥
आपत्सु मित्रं जानीयात्पुत्रमुत्तरजन्मनि ।
य उदास्ते स्वकार्येषु स निंद्यो यत्नतो नरः"

इत्यादि नीतिशास्त्रं शत्रुमित्रोदासलक्षणज्ञापकं हितकारित्वादित्याभ्यां नो बोध्येत तन्मतं कथं न श्रद्दध्यादित्युच्यत इति तत्राह-क इति । यः शत्रुः स आत्मनो मम पक्षे कः न कोपीत्यादि योज्यं त्वत्पक्षे शत्र्वाद्यभावेप्यस्मत्पक्षेस्युरिति तत्राह--भवत्स्विति । भवत्पक्षेपि के शत्र्वादयः स्युर्न केप्यतो नयैर्नीतिशास्त्रश्रवणार्जितैर्नीतिभिः किं फलं स्यान्न किमपीत्यर्थः । नीतिभिरापत्परिहारः सम्पत्प्राप्तिश्च स्यातामिति तत्राह, दैवमिति । सर्वोत्कृष्टत्वात् श्रीनारायण एव सम्पद्विपदाश्रयो न नीतिमांस्तस्यान्वयव्यतिरेकाभावात् अस्मत्पित्रादौ दर्शनात् आत्मनो देहस्य यः शत्र्वादिस्तस्य भवत्सु स्थितैर्नयैः किं स्यादपरिहार्यत्वान्मरणादिकं प्राप्यत एव कामादिकमज्ञानमन्तरेण न नयमार्गेण परिहियत इति शेषं पूर्ववत् ॥ ० ॥

ननु, तर्हि माभूच्छ्राव्यं नीतिशास्त्रं प्रवृत्तिलक्षणधर्मशास्त्रमभ्यसनीयं श्रेयोहेतुत्वादत्राह—य इति । य आत्मानं परमात्मानमुद्दिश्य धर्मकामं धर्मेच्छां न हिंस्यान्न हिनस्ति न त्यजति किं चानुतिष्ठति सोतिदुर्लभः प्रशान्तात्माकोटिष्वपि महात्मतः लोके अवशीकृतेन्द्रियग्रामस्य भगवद्विषयनिवृत्तलक्षणधर्मेच्छा कथं स्यादिति तत्राह—स्वजन इति. स्वेन सह जन्यत इति स्वजनः इन्द्रियग्रामस्तस्मिन्विषये वशो न भवति वशीकृतेन्द्रियग्राम इत्यर्थः यद्वा पुत्रमित्रादिलक्षणे स्वजने वशो न स्वानुष्ठानानुकूलपुत्रादिक इत्यर्थः अत एव मुक्तान्धः उज्झितान्धस्वभावः नन्वैहिकामुष्मिकफलाकांक्षायां निवृत्तिधर्ममनुतिष्ठतः कथं तत्फलावाप्तिः स्यादत्राह—पुनरिति । पुनश्चार्थे निवृत्तिधर्ममनुतिष्ठच्छ्रीलोकयोरिह लोकपरलोकयोर्हेतुश्च भवति पुनर्निवृत्तिधर्मानुष्ठानानन्तरं वा प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठानयोः पुनर्भवोस्ति पूर्नस्य ततः पातोस्ति इमं लोकं हीनतरं वा विशन्ति " क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यादेः । अन्यस्य ज्ञानसामग्रीं सम्पाद्य ततः पुनरन्ते वैकुण्ठलोकप्राप्तिश्च स्यात् " स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः" इत्यादेः "पुनरप्रथमे-भेदे " इत्यमरः । यद्वा आत्मानं धर्मयुक्तः कामो यस्य स तथा तं वा नरं नहिंस्यान्न पीडयति स्वात्मानं प्रवृत्तिधर्मकांक्ष्यया पीडितं न करोति सोतिदुर्लभः धर्मधारके हरौ कामो यस्य स तथा निवृत्तिधर्मनिरत इत्यर्थः। तं नाधःपातयतीति वा सज्जनसेवानिर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वेन तद्वशश्च श्रिय ऐहिक्याः सम्पदः स्वतः सम्पन्नाया लोकस्य ज्ञानस्यापरोक्षलक्षणस्य च पात्रं वा अत्र प्रवृत्तिनिवृत्तिलक्षणौ धर्मावनुष्ठाय तत्फलानिच्छत्वेन भवगद्भक्तिमनिशं कुर्वाणः पुरुष उत्तमइति तात्पर्यम् ॥ ० ॥

नन्वस्तु निवृत्तिधर्मानुष्ठानस्य श्रेयःसाधनत्वं तस्य नेदानीमवसरः वार्धके कर्तव्याऽविनाभूतत्वात्—

" बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम् ।
स्थाविर्ये मोक्षमातिष्ठेत्सर्वदा धर्ममाचरेत् " ॥

इतिस्मृतेरिति तत्राह—कौमार इति । सर्वदेति विशेषणाद्विद्याभ्यासकालेपि मोक्षधर्मानुष्ठानं कर्तव्यमिति न तस्य स्मृतिविरोधः नानायोनिषु का योनिः श्रेयःसाधनमिति तत्राह—दुर्लभमिति । यन्मानुषं जन्म तदपि तदेवार्थदं ज्ञानादिप्रयोजनप्रदम् अत एव वहुपुण्यसाधनत्वाद्दुर्लभं तर्हि चिरकालस्यापि किम् ? नेत्याह—अध्रुवमिति । "सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः अपि सर्वं जीवितमल्पत्वमेव" इत्यादिश्रुतेः अध्रुवमपि मानुषं यज्जन्म सुदुर्लभं तत्राप्यर्थदं दुर्लभतरं "एतद्धिदुर्लभतरं लोके जन्म यदीदृशम्" इति श्रुतेः ॥ १ ॥

ननु, कथङ्कारं पुरुषार्थप्रदं तत् अन्यथा सद्वतां सर्वेषामपि पुरुषार्थः स्यान्न चासौ सम्भवति अदर्शनादश्रवणात्वेत्याशङ्क्याचिकित्सामाह—यदाहीति । इह मानुषे यदा यदि बुभूषोः पुरुषस्य विष्णोः पादोपसर्पणं सम्भवति तह्यर्थदं "यावत्सेवापरे तत्त्वे तावत्सुखविशेषता" इति. एतद्धिशब्देन सूचयति अतो मानुषी योनिरेव निःश्रेयसः कारणं नान्या असङ्गत्वाद्वेदानर्हत्वेनान्यासाम्. अतः कौमारवय आरभ्य भगवत्सेवा कर्तव्येति भावः । ननु, श्रीहरिसेवामन्तरेणान्यसेवा अर्थदा किं न स्यादिति तत्राह, यदेष इति । सर्वभूतप्रियत्वादिगुणयुक्त एष इति यद्यस्मादेतत्सेवैव पुरुषार्थदा नान्यसेवा "तदेतत्प्रेयः" इति श्रुतेः "एष सर्वेश्वरः" इति च ॥ २ ॥

इतोपि भगवत्सेवालक्षणनिवृत्तिधर्मानुष्ठानमेव कर्तव्यं न प्रवृत्तिधर्मसेवनं विषयसुखसौलभ्याय तदनुष्ठानमिति नोच्यते तदन्तरेणापि तल्लभ्यते यथा दुःखमित्याह—सुखमिति । सर्वत्र नरकादावपि "सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्" इति स्मृतेः दैवात् प्रारब्धकर्मप्रेरकात् ॥ ३ ॥

अतश्च किंमिति तत्राह—तदिति । तस्मात्तत्प्रयासऐन्द्रियसुखप्राप्तये प्रवृत्तिधर्मकरणे बहुक्लेशो न विधेयः, कुतो न विधेयः ? इति तत्राह, आयासेति । परं केवलमायासेनायुषो व्ययः क्षय एवावशिष्यत इति शेषः । प्रवृत्तिधर्मानुष्ठानस्य दुःखासम्भिन्नप्रदेशोद्देशत्वात्तत्कथं दुःखफलत्वेन निन्द्यत इति तत्राह, न तथेति । मुकुन्दचरणाम्बुजं भजन्यथा क्षेमं विन्दते प्रवृत्तिधर्मानुष्ठायी न तथा नश्वरं सुखं लभत इत्यन्वयः "प्लवा ह्येते अदृढा यज्ञरूपाः" इति श्रुतेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भागवतान् धर्मानाचरेत् यतोऽर्थदमेतज्जन्म देवादिजन्मनि महाविषयावेशात् पश्वादिजन्मनि विवेकाभावाच्च तत्रापि न विलम्बेनेत्याह—कौमारे कौमारमारभ्येत्यर्थः । यतस्तदपि जन्म ध्रुवं पुनर्दुर्लभञ्च तथाच ब्रह्मवैवर्त्ते "प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम् । यैराश्रितो न गोविन्दस्तैरात्मा वञ्चितश्चिरम् ॥ अशीतिं चतुरश्चैव लक्षांस्तान् जीवजातिषु । भ्रमद्भिः पुरुषैः प्राप्यं मानुष्यं जन्म पर्ययात् ॥ तदप्यफलतां जातं तेषामात्माभिमानिनाम् । वराकाणामनाश्रित्य गोविन्दचरणद्वयम्" इति शास्त्रस्य प्राधान्येन मानुषमधिकृत्य प्रवर्त्तत्वात् तदनुवादेनोक्तिरियं तद्बुद्ध्यादिसामान्येन मानुषत्वमारोप्यैवेति ज्ञेयम् ॥ १ ॥

तत्र भागवतधर्माचरणस्यैव युक्तत्वं दर्शयति—यथाहीति । यत् यस्मात् एष भूतानां स्वभाव एव प्रियः प्रेमविषयः प्रेमकर्त्ता च तत्र हेतुः आत्मा परमात्मा पादोपसर्पणे हेत्वन्तरं यस्माच्चैष ईश्वरः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः सुहृत् सर्वेषां हितं चिकीर्षुश्चेति ॥ २ ॥ ३ ॥

मुकुन्दचरणाम्बुजरूपं क्षेमम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे तु ग्राहयामास प्रह्लादो भक्तिमर्भकान् ।
आसक्तिं देहगेहादौ त्याजयामास बोधयन् ॥

तानाह करुणो मैत्र इति पूर्वमुक्तं तत् किमाहेत्यत आह—कौमारे धर्मानाचरेत्. ननु, कौमारे वर्णाश्रमधर्माणामनधिकारस्तत्राह भागवतान् श्रवणकीर्त्तनादीन् इह भारतभूमौ. ननु, तान् यौवनदावपि कृत्वा कृतार्थीभवति. तत्राह, प्राज्ञ इति । यदि कौमारान्ते एव मृत्युः स्यात्तर्हि किं भवेदिति प्रकृष्टज्ञानवान्, ननु, तत्र का चिन्ता ? जन्मान्तरन्तु भावि तत्रैव भक्तिः कार्य्येति तत्राह, दुर्लभं मानुषं जन्म तदपि भाग्याल्लब्धमप्यध्रुवम् अद्य वर्त्तमानत्वेपि तस्य श्वः स्थितौ निश्चयाभावात्. ननु, तर्हि तावन्मात्रकालेन कुतो भक्तिसिद्धिस्तत्राह, अर्थदं मुहूर्त्तमात्रव्यापिभक्तिमतामपि खट्वाङ्गादीनां सिद्धिदर्शनात् ॥ १ ॥

भागवतधर्मान् केन प्रकारेणाचरेदित्यपेक्षायामाह, यथा येन प्रकारेण विष्णोः पादयोरुपसमीपे सर्पणं प्राप्तिर्भवेत्तथा आचरेदित्यर्थः तमेव प्रकारं चतुर्विधं व्यञ्जयन् विष्णुं विशिनष्टि--यद्यस्मादेष प्रियः इत्यादि तेन "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति भगवदुक्तिप्रामाण्येन कान्तभावशान्तिरतिदासभावसख्य भावानां मध्ये येन भावेन उपसर्पितुमिच्छेत्तेनैवोपसर्पयन् भागवतान् धर्मानाचरेदिति रागभक्तावपि विधिर्व्यञ्जितः । आत्मतुल्यत्वादात्मा सुत इति तन्त्रेणोक्त्या पञ्चैव भावाः प्रह्लादेनोपदिष्टा इति वा ॥ २ ॥

सुखभोगार्थमुद्यमस्तु मानुषं देहं प्राप्य न कर्त्तव्य इत्याह सुखमिति । देहयोगेनेति सुखदुःखे देहधर्मावेवेत्यर्थः । सर्वत्र पश्वादावपि ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततो यतेत कुशलः क्षेमाय भयमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥
पुंसो वर्षशतं ह्यायुस्तदर्धञ्चाजितात्मनः ।
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥ ६ ॥
मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥
दुरापूरेण कामेन मोहेन च बलीयसा ।
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथा तेन प्रकारेण क्षेमं न विन्दते क्षेममेवाह, मुकुन्देति ॥ ४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनमेव परमपुरुषार्थं इत्याहाऽसुरबालकान्प्रति श्रीप्रह्लादः—कौमार इति, षष्ठेनाध्यायेन । मानुषं जन्म दुर्लभम् बहुपुण्यलभ्यं यतोऽर्थदं पुरुषार्थदम् तत्तस्मात् पुरुषार्थसिद्ध्ये इह मानुषजन्मनि भागवतान् धर्मान् आचरेत्. ननु, धर्मान्तराचरणे को दोषः ? अत्राह–प्राज्ञ इति । भगवद्धर्माचरणेऽपुनरावृत्तिपदप्राप्तिः तदितरधर्माचरणे तु पुनरावृत्तिपदप्राप्तिरित्येवं ज्ञानवानित्यर्थः—

"देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।
आब्रह्मभुवना लोकाः पुनरावृत्तिनोऽर्जुन ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते"

इति श्रीमुखवचनमत्रानुसन्धेयम् तत्रापि कौमारे आचरेत् तत्र हेतुमाह, अध्रुवमनित्यम् अनियतकालस्यापि तारुण्यं स्थाविरम् आश्रमाद्आश्रमान्तरगमनञ्च न परीक्षेत ब्रह्मचर्यादेव सर्वं त्यक्त्वा भगवद्धर्मपरो भवेदित्यर्थः । तथा च श्रुतयः "यदहरेव विरजेत्तदहरेव परित्यजेत्" "किमर्थं वयं यजामहे येषामयमात्मालोकः किं धनेन किं प्रजया त्यागेनैकेनामृतमानशुः" इत्याद्याः । स्मृतिश्च "स्मर्त्तव्यः सततं विष्णुः विस्मर्त्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः" इति ॥ १ ॥

एतदेवोपपादयति–यथा हीति, चतुर्भिः । पुरुषस्येह जन्मनि विष्णोः पादोपसर्पणमेव यथा योग्यम् यस्मात् सर्वभूतानां चेतनाचेतनानां भोक्तृभोग्यपदार्थानाम् ईश्वरः, ईश्वरत्वे हेतुः, आत्मा आश्रयः सर्वेषां चेतनाचेतनानां तत्परापरप्रकृतिरूपत्वात्, अत एव प्रियः स्थितिप्रवृत्तिदत्वात् अत एव सुहृत् सर्वदा सर्वत्रानुकूलत्वात् ॥ २ ॥

ननु, ऐन्द्रियकसुखमपि मानुषजन्मन्येव सुकरमतस्तदर्थं यतितव्यमित्यत्राह–सुखमिति । दैवात् पूर्वकर्मवशात् यथाऽयत्नतो दुःखं लभ्यते तथा सर्वत्र सर्वयोनिषु देहयोगेन सुखमपि ॥ ३ ॥

तत्तस्माद्धेतोः यत ऐन्द्रियकसुखप्रयासात्परं केवलमायुर्व्ययः तत्प्रयासो न कर्तव्यः, ननु, ऐन्द्रियकसुखरूपस्य फलस्य सत्वात्कथं केवलमायुर्व्ययस्तेन भवतीत्यत आह, तथा तादृशेनैन्द्रियकसुखप्रयासेन क्षेमं निरतिशयसुखदं मुकुन्दचरणाम्बुजं न विन्दते न प्राप्नोति ॥ ४ ॥

———

भाषा टीका ।

प्रह्लाद उवाच ॥

प्रल्हाद बोले, कि—इस संसार में यह मनुष्य जन्म बड़े प्रयोजन (मुक्ति पर्यन्त) का देने वाला है पर बड़ा दुर्लभ है सोभी अध्रुव (अनिश्चित) है इसी से बुद्धिमान् कुमार अवस्था में ही भागवत धर्मों का आचरण करें ॥ १ ॥

इस संसार में पुरुष को श्रीविष्णुभगवान् के चरणोंकी शरणजाना यही योग्य है, क्योंकि ? यह विष्णुही सर्वप्राणियों का प्रियआत्मा ईश्वर और सुहृद है ॥ २ ॥

हे दैत्यबालकों ! जीवों को इन्द्रियों का सुख तौ देह के योग से प्रारब्ध के आधीन सर्वत्र ही मिलता है जैसे कि ये दुःख आप ही मिलता है ॥ ३ ॥

उस सुख के लिये प्रयास नहीं करना योग्य है क्योंकि इस में केवल व्यर्थ ही आयु गमाना है पुरुष जैसा गोविन्द के चरणारविन्द के शरण में सुख को प्राप्त होना है वैसा अन्यत्र नहीं होता है ॥ ४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमस्ति न विपद्येत अक्षेमं न भवेन्न नश्येदितिवा तावच्छीघ्रं क्षेमाय यतेत ॥ ५ ॥

आयुर्व्ययक्रममाह–पुंसइति त्रिभिः । यद्यस्माच्छेते ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१)(पश्यध्वं मतिवैषम्यं ज्ञातीनां नः कुटुम्बिनाम् ।
श्रेयो विघातादायासादीहतामनुसंसृतिम् ॥ ० ॥)
को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः ।
स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥
कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः ।
यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥
कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥
पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ ।
गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशतिर्वर्षाण्ययायुर्याति ॥७॥

दुरापूरेण दुःखैः समन्तादापूर्यमाणेन ॥ ८ ॥

ननु, यौवने गृहासक्तोऽपि पश्चाद्विरक्तस्सन् क्षेमं यास्यतीत्याशंक्य तदसम्भवं दर्शयन्कौमार एवाचरेदित्येतदुपपादयति-को गृहेष्विति सप्तभिः ॥ ९ ॥

यमर्थमसुभिः क्रीणाति प्राणहानिमङ्गीकृत्यापि साधयति तस्करादिः तस्मिन्नर्थे तृष्णां को नु विसृजेत् ॥ १० ॥

किञ्च कथमित्यादि प्रियायाः सङ्गादिकं स्मरन्कथं त्यजेतेति तृतीयेनान्वयः । मन्त्रान्हितशिक्षालापान् सुहृत्सु च सङ्गम् तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च सङ्गम् तेष्वनुरक्तं चित्तं यस्य ॥ ११ ॥

ताः श्वशुरगृहे स्थिताः हृदय्या हृदयङ्गमाः मनोज्ञा उरवः परिच्छदा येषु तान् गृहान् वृत्तीर्जीविकाः कुल्याः कुलपरम्परागताः ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कारणाद्बहुमनर्थावहं संसारमाश्रितः पुमान् कुशलः हेयोपादेयविभागकुशलस्सन् क्षेमायैव उक्तविधक्षेमार्थमेव यतेत कौमार एवेत्युक्तमवधारणं प्रतिपादयितुं तदवतारयति—शरीरमिति । पौरुषं पुरुषस्य जीवस्य स्वस्य सम्बन्धि शरीरं यावत् पुष्कलं पटुतरमस्ति न तु विपद्येत विपन्नं न भवति तावदेव क्षेमाय यतेतेति पूर्वेणान्वयः बाल्यादारभ्यैव यतेतेति भावः ॥ ५ ॥

एतदेव प्रतिपादयन् विषयासक्तस्य केवलं वृथायुर्व्ययमाह—पुंस इति । पुंसो मनुष्यस्य तावद्वर्षशतं ह्यायुर्जीवनयोग्यकालः शतवर्षपरिमितः तस्य शतवर्षपरिमितस्यायुषोऽर्द्धं पञ्चाशद्वर्षात्मकमजितेन्द्रियस्य निष्फलमेव यातीत्युत्तरेणान्वयः । नैष्फल्येन याने हेतुं वदन्पुमांसं विशिनष्टि, यदिति. यद्यस्मादसावजितात्मा पुमान् रात्र्याम् अन्धन्तमः निद्रात्मकं प्राप्तस्तूष्णीं शेते जितेन्द्रियः कौमार एवारब्धभक्तियोगरूपभगवद्धर्मयोगस्तु रात्र्यामपि मध्यमं यामद्वयं निद्रार्थमुपयोज्य पूर्वोत्तरयोर्यामयोरनियतं कालं भगवद्धर्ममाचरतीति भावः ॥ ६ ॥

एवं बाल्ये मुग्धस्य मूढस्य दशवर्षाणि कौमारे क्रीडतो दशवर्षाणीत्येवं विंशतिर्वर्षाणां याति, जितेन्द्रियः कुशलस्तु तस्यामपि विंशत्यां भगवद्धर्ममनुतिष्ठतीति भावः । एवमुत्तरत्राप्यूह्यम्. जरया ग्रस्तो देहो यस्य अत एवाकल्पस्यासमर्थस्य स्वानधीनदेहस्य वर्षाणां विंशतिर्याति बाल्यात्प्रभृत्यारब्धभगवद्धर्मस्तु तदभ्यासशिक्षितदेहत्वात्तस्यामपि विंशत्यां तमनुतिष्ठतीति भावः ॥ ७ ॥

एवमहर्भागात्मकायुषश्चत्वारिंशद्वर्षाणि गतानि शेषमवशिष्टं दशवर्षात्मकमायुः दुरापूरेण दुःखैः समन्तादापूर्यमाणेन कामेन तदनुबन्धिना बलीयसा मोहेन चकारात् क्रोधेन च गृहेषु गृहधर्मेषु सक्तस्यात एव प्रमत्तस्य स्वहितमजानतोऽपयाति जितेन्द्रियस्तु कुशलः कामाद्युपशमनेन तस्मिन्नपि दशवर्षात्मके वयसि भगवद्धर्ममनुतिष्ठतीति भावः ॥ ८ ॥

एवमजितेन्द्रियस्य वैषयिकसुखरतस्यायुषो नैष्फल्यमारब्धभक्तियोगस्य कुशलस्य जितेन्द्रियस्य तु निश्श्रेयससाधनभगवद्धर्मप्रसाधनोपयुक्तत्वेन साफल्यं भागवतधर्माणामेव निरतिशयश्रेयस्साधनत्वं तेषाञ्च वर्त्तमानमनुष्यजन्मनैवानुष्ठेयत्वं चोक्तम्. अथ वैराग्यमन्तरेणोपदिष्टोऽपि भागवतधर्मः प्रतिष्ठितो न भवतीति वैराग्येण तावदेषां भवितव्यं तच्च खरसंगतिमन्तरेण न सेत्स्यतीति तया भवितव्यम्. साच विषयासक्तचित्तजनसङ्गपरिहारमन्तरेण दुर्लभेत्यभिप्रेत्य तत्परिहारश्च गृहवित्तकलत्रापत्यादिष्वनुरक्तचित्तस्य यद्यप्यशक्यस्तथाप्युपा-

(१) श्लोकोऽयमधिकः पठ्यते विज० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

येन विवेकात्मना दुस्सङ्गः परिहार्य इति वक्तुं तावद्गृहादिष्वनुरागस्य दुस्त्यजत्वमनर्थावहत्वञ्चाह—को गृहेष्वित्यादिना । तावद्गृहाद्यनुरागस्य दुस्त्यजत्वमाह—क इति. गृहेष्वासक्तं ममेदं गृहमित्यभिमानयुक्तं दृढैः दुर्मोचनीयैः स्नेहा एव पाशास्तैर्बद्धमात्मानं विमोचितुमजितेन्द्रियश्च कः पुमानुत्सहेत, कोप्युत्साहं न कुर्यादित्यर्थः। जितेन्द्रियस्तूत्सहेतैवेति भावः।अनेन "हित्वात्मपातं गृहमन्धकूपम्" इतिपूर्वमुक्तगृहाभिनिवेशत्याग एव भगवदाश्रयणे प्रथमं कारणमित्युक्तम् ॥ ९ ॥

तदभिनिवेशत्यागश्च वित्तकलत्रापत्याद्यनुरागत्यागपूर्वकः सोऽप्यजितेन्द्रियस्य दुश्शक इत्याह—कोन्विति । अर्थतृष्णां वित्तस्पृहाम् अजितेन्द्रियश्चेत् कःपुमान् विसृजेत् त्यजेत् दुस्त्यजत्वे हेतुभूतां विशिनष्टि—य इति. यार्थः प्राणेभ्योऽपि गरीयसीमिति. प्राणस्पृहापेक्षया गरीयसीं दृढतरामित्यर्थः।प्राणेभ्योऽपि गरीयस्त्वमेव दृष्टान्तमुखेन दर्शयन्नर्थं विशिनष्टि—यमिति. यमर्थमसुभिः प्राणैः तस्करश्चोरः सेवकः आयुधोपजीवी वणिक् नाविकश्च क्रीणाति प्राणहानमङ्गीकृत्यापि तस्करादिर्यमर्थं साधयति तस्मिन्नर्थे तृष्णां कोनु विसृजेदित्यर्थः ॥ १० ॥

किञ्च अनुकम्पितायाः दयायुक्तायाः प्रियायाः रहसि भवं सङ्गं रुचिरान् मनोज्ञान् हितालापांश्च सुहृत्सु च सङ्गं स्मरन् कथं प्रियासङ्गादींस्त्यजेतेति तृतीयेनान्वयः । कथम्भूतः ? तत्स्नेहसितः तेषां प्रियादीनां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां शिशूनां च सङ्गमित्यनुषज्यते सङ्गं तेष्वनुरक्तं चित्तं यस्य सः ॥ ११ ॥

पुत्रान् हृद्याः हृदयङ्गमा दुहितॄः श्वशुरगृहे स्थिताः तथा भ्रातॄन् स्वसॄर्भगिनीश्च दीनौ मातापितरौ च उरवः बहवः परिच्छदाः भोगोपकरणानि येषु तान् मनोज्ञान् गृहांश्च कुल्याः कुलक्रमागताः वृत्तीर्जीविकाश्च पशून् भृत्यवर्गांश्च कथं त्यजेत कथन्तरां विरज्येत विरक्तः स्यात् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्मादिदमेव कर्तव्यमिति तत्राह—तत इति । चशब्दोऽप्यदभीष्टं तत्प्राप्तय इत्याह—इतोपि बाल्य एव मुक्तये प्रयतेतेत्याह—शरीरमिति । पौरुषं पुरुषस्य विद्यमानं पुष्कलं पुष्टमन्धपङ्गुत्वाद्यवयववैकल्यविधुरमित्यर्थः । विपद्येत मरणलक्षणविपत्तिं प्राप्नोति ततःप्रागेव यतेतेति शेषः ॥ ५ ॥

"शतायुर्वै पुरुषः" इतिवचनात् शतायुः शरीरस्थितेर्निश्चितत्वात्तदन्तरालकालेऽनेकश्रेयःसमार्जनोपपत्तेः बाल्य एव निवृत्तिलक्षणश्रेयसे यतनीयमिति नियमो नापेक्षित इत्याशङ्क्य गर्भात्समारभ्य शतायुःपर्यन्तं स्वतः परतो वा शरीरस्य नाशदर्शनाच्च तत्स्थितिनिश्चयः शाश्वतः अस्तु वा कस्यचित्तथापि न श्रेयो यत्नो दुरीहयते अन्यव्यापारायासप्रस्तत्वेन दिनमेलनलक्षितवत्सराणां क्षयाद्येवं न लक्षवर्षायुषेणापि मुकुन्दचरणारविन्दसेवालक्षणश्रेयःसम्पादनं सुशकमित्याह—पुंस इति ॥ ६ ॥ ७ ॥

दुरापूरेण न शक्यपूरणेन हिशब्दो हेतौ ॥ ८ ॥

निद्रादिकमन्तरेणावशिष्टकालान्तरालेपि श्रेयो विघ्नहेतुरस्तीत्याह—पश्यध्वमिति । कलहलक्षणां मतिवैषम्यं अनुसंसृतिमित्यनेनैकोपि क्षणोनावशिष्यत इति सूचयति ॥ ० ॥

नन्वस्माकं श्रेयइच्छा नास्ति चेदनेतेषु चेतनेषु कस्य चित्स्यादवसरमापद्येतेति तत्राह—क इति ॥ ९ ॥

ननु, प्रवृत्तिधर्मेण माभूच्छ्रेयोर्थेन तत्स्यादतो मुकुन्दपादसेवा कुतो नियुज्यत इति तत्राह—कोन्विति । योर्थस्तदर्थतृष्णां अर्थान्वेषणवैतृष्णायैवार्जितस्य व्यये लिप्सयाऽर्थेन सुकृतं साधयेति बोधिते साधयिष्यामीति कण्ठोपरि गद्गदनिगदेनैव कालो यातीति पुरुषायुषेणापि वित्तेन सुकृतार्जनं दवीय इति वित्तव्ययमन्तरेण कायक्लेशेनैव श्रीहरिचरणनिषेवणं जन्मसफलङ्करोतीति भावः तत्र दर्शनं प्रमाणयति तस्करादयो मृता अप्यर्थतृष्णां न मुञ्चन्तीत्येतदुपलक्षणं परितः प्रत्यक्षं नानाजीवानां वर्तते ॥ १० ॥

ननु, माभूदर्थाच्छ्रेयः कामादस्त्वित्याशंक्य कीदृशो सौ भगवद्भक्तिकामो विषयकामो वा न द्वितीयः अभिध्यायन्वपुरतिप्रमोदानतिदीर्घजीविते को रमेतेत्यादि शास्त्रानिन्दितत्वात् आद्यः विषयविरक्त्या तत्त्यागेन भाव्यं तस्य दुःसाधनत्वादित्याह—कथमिति. रहस्यं रहसि भवं सङ्गं मैथुनलक्षणं कथं त्यजेतेत्युत्तरेणान्वयः मन्त्रादिगृहीतानां सँल्लापानां रसेनेति शेषः ॥ ११ ॥

प्रत्ता दत्ताः हृद्याः हृदयप्रियाः रुचिरच्छदान् रुचिरपरिकरान् कुल्याः कुलपरंपरया समागताः वृत्तीर्जीवनकरीः ॥१२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरुषरूपमिति स्वामीपौरुषमिति सम्बन्धोक्तिः ॥ ५ ॥ ६ ॥

कौमार इत्यत्र कैशोर इति क्वचित् ॥ ७—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भवमाश्रित इति हरिभजनाभावे स्थानाद्भ्रष्टः पतत्यध इति भवंश्रुत्वेति वैधभक्तौ विधिरुक्तः पुष्कलं जरारोगाद्यभावात् पुष्टं यत्नसमर्थमित्यर्थः ॥ ५ ॥

आयुर्व्ययक्रममाह—पुंस इति ॥ ६ ॥

क्रीडत इति बालैर्बालाभिश्च सह ॥ ७ ॥

शेषवर्षास्विदमायुः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततस्तत्र कुत्रापि भजेदिति विवेकवत्स्वपि भजनासामर्थ्यमाह—क इति । तस्मात् कौमार एव भजने आरभ्यमाणे भजन एवासक्त्या व्युत्पद्यमानयान्यत्रानासक्त्या भजनं सिद्ध्यति नान्यथेति भावः ॥ ९ ॥

द्रव्याशक्तेः प्राबल्यं दर्शयति—कोन्विति । योऽर्थः अर्थस्य प्राणेभ्योऽपिप्रियत्वमाह, यम् अर्थं प्राणैः क्रीणाति प्राणहानिमङ्गीकृत्यैव तस्करो द्रव्यार्थं रात्रौ धनिनां गृहं प्रविशति सेवको राजकीयो युद्धाभिमुखं चलति वणिक् समुद्रादि दुर्गमार्गी ॥ १० ॥

स्त्रीपुत्राद्यासक्तेः प्राबल्यं दर्शयति—कथमिति । प्रियायाः सङ्गादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः मन्त्रान् हितशिक्षालापान् सितो बद्धः शिशूनाञ्च सङ्गं श्वशुरगृहे स्थिताः दुहितः हृदय्याः हृदयङ्गमाः वृत्तीर्जीविकाः कुल्याः कुलपरंपराप्राप्ताः ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततो हेतोः भयमाश्रितः जन्ममरणप्रवाहलक्षणं संसारं प्राप्तो बद्धजीवः कुशलो मुमुक्षुः सन् पौरुषं मानुषं शरीरं यावन्न विपद्येत यावच्च पुष्कलं तावत् क्षेमाय मुकुन्दचरणाम्बुजाय तत्प्राप्तय इत्यर्थः यतेत ॥ ५ ॥

कौमारे यो हि क्षेमाय न यतेत तस्याकुशलस्य तु मुकुन्दचरणांबुजप्राप्तिर्न घटते इत्याह—पुंसइति द्वादशभिः ॥ ६ ॥

मुग्धस्य बाल्ये बालैः क्रीडतः कौमारे विद्याग्रहणादिना च क्रीडतः विंशतिवर्षाणि आयुर्याति ॥ ७ ॥

दुरापूरेण दुःखेनापि पूरयितुमशक्येन बलीयसा सर्वजीवव्यकर्त्रा ॥ ८ ॥

गृहेष्वासक्तमात्मानं स्नेहपाशैर्बद्धं विमोचितुं क उत्सहेत न कोपीश्वरकृपाभाजनं विनेत्यर्थः ॥ ९ ॥

योऽर्थः प्राणेभ्योपीप्सितः प्रियतमः यमर्थं तस्करः परगृहप्रवेशेन राजसेवको युद्धेन वणिक् दुर्गमदेशप्रवेशेन असुभिः प्राणैः क्रीणाति तस्यार्थस्य तृष्णां कोऽनु विसृजेत् ॥ १० ॥

प्रियायाः रहस्यं गोप्यं सङ्गं रुचिरान् मनोहरान् मन्त्रान् मधुरभाषणानि शिशूनाञ्च कलभाषिणां सङ्गं सुहृत्सु सङ्गं च स्मरन् स्नेहसितः प्रियादिस्नेहबद्धः प्रियाद्यनुरक्तचितश्च कथं त्यजेतेति तृतीयेनान्वयः ॥ १३ ॥

हृद्याः हृदयङ्गमाः ताः लोके प्रसिद्धस्नेहविषयाः मनोज्ञाः उरवः परिच्छदाः ये तु तान् कुल्याः पितृपितामहाद्यागताः पशूनां भृत्यानां च वर्गान् समूहान् ॥ १२ ॥

भाषा टीका ।

तस्मात् कुशल पुरुष संसार को प्राप्त होकर अपने परमक्षेम के लिये यत्नकरे जबतक कि यह अच्छा भला मनुष्य शरीर विपत्ति को न प्राप्त हो ॥ ५ ॥

देखो पुरुष की सौ वर्षकी आयु है तिसमें भी अजितात्मा पुरुष की अर्द्ध आयु निष्फल है क्योंकि ? यह अन्धतमको प्राप्त होकर रात्रि में सोता है ॥ ६ ॥

और बीस वर्ष भोले भाले की बाल और कौमार अवस्था में खेलने में जाती हैं। और बीस वर्ष जरा अवस्था से ग्रस्तदेह वाले असमर्थ की व्यर्थ जाती हैं अर्थात् उस समय कुछ साधन नहीं बन सक्ता ॥ ७ ॥

शेष मध्य की जो आयु है वह दुष्पूर काम और बलवान् मोह से गृह में आसक्त अत एव प्रमत्त पुरुष की व्यर्थ चली जाती है ॥ ८ ॥

अजितेन्द्रिय पुरुषों में ऐसा कोन होगा जो कि, गृह में आसक्त और दृढ स्नेह पाशों से बँधे हुए इस आत्मा को छुटाने का उत्साह करेगा ॥ ९ ॥

भला प्राणों से भी जो प्रिय इस तरह के द्रव्य की तृष्णा को कोन छोड सक्ता है, जिस द्रव्य को तस्कर चाकर और वणिक् अपने प्रिय प्राणों से कीनते हैं ॥ १० ॥

अनुकम्पित अपनी प्रिया के एकान्त सङ्ग को और सुहृदलोगों के स्नेह से बँधा हुआ, छोटे २ बच्चों की मधुर वाणी से अनुरक्त चित्त, अपने हृदयंगम (बहुत ही प्रिय) लडके लडकी और भ्राता लोगों की याद कर २ तथा दीनविचारे माता पिताओं की और नाना प्रकार के मनोहर उपकरण वाले घरों की तथा अपनी कुल परंपरा और उत्तम२ पशु, और नोकर चाकरों की याद कर२ के इन सबों को कोन छोड सक्ता है ॥ ११ ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कोशस्कृत कोशस्कारी कीटः स यथा आत्मनो हितं गृहं कुर्वाणो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः तन्वधितृप्तकामोऽपि दोषदर्शनेन विरक्तः संस्त्यजेत ॥ अह—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुटुम्बपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥ १४ ॥
वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ।
प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥ १५ ॥
विद्वानपीत्थं दनुजाः ! कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥
यतो न कश्चित् क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ।
विमोचितुं* कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥ १७ ॥
ततो विदूरात्परिहृत्य दैत्याः ! दैत्येषु सङ्गं विषयात्मकेषु ।
उपेत नारायणमादिदेवं स मुक्तसङ्गैरिषितोऽपवर्गः ॥ १८ ॥

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ! ।
आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ १९ ॥
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु ।
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

औपस्थ्यं शैश्न्यं जैह्वयञ्च सुखं बहुमन्यमानस्तदेवाधिकं मन्यमानः अतो दुरन्तो मोहो यस्य स कथं विरज्येत विरक्तः स्यात् ॥ १३ ॥

दुरन्तमोहत्वं दर्शयन्नाह, कुटुम्बपोषणाय वियत्क्षीयमाणं निजमायुः पुरुषार्थञ्च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोऽपि न निर्विद्यते तत्र दुःखबुद्धिं न करोति यतः स्वकुटुम्बे रामो रतिर्यस्य ॥ १४ ॥

प्रत्युत चौर्यं करोतीत्याह–वित्तेष्विति । नित्यमभिनिविष्टं चेतो यस्य स परवित्तहर्तुः प्रेत्य नरकलक्षणमिह च दण्डादिरूपं दोषं यद्यपि विद्वान् जानन्नथाप्यशान्ताभिलाषस्तत्परवित्तं हरत्येव ॥ १५ ॥

तदेवं कः गृहेषु पुमानित्यादि सप्तभिः श्लोकैरुपपादितं गृहादिषु प्रसक्तस्य वैराग्याद्यसम्भवमुपसंहरति--विद्वानिति । स्वलोकायात्मपरायणाय न कल्पते किन्तु विमूढो यथा तथा विद्वानपि तमोऽभिनिवेशमेव प्रपद्यते. तत्र हेतुः, य इति. स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः ॥ १६ ॥

तस्मात्कौमार एव भागवतान्धर्मानाचरेदिति सहेतुकमुपसंहरति–यत इति । यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थस्ततो नारायणमुपेत शरणं यातेत्युत्तरेणान्वयः । असामर्थ्ये हेतुः अलं दीनो लम्पटः अतः कामो दृशि यासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः, विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानम् यतस्तासां क्रीडामृगः स इत्यन्वयः । किञ्च यद्यासु निगडः शृङ्खलातुल्यो विसर्गः पुत्रपौत्रादिरूपो भवति ॥ १७ ॥

विदूराद्दूरतः सङ्गं परिहृत्य यद्वा अविदूराच्छीघ्रं नारायणमुपेतेत्यन्वयः यस्मात्स एवाऽपवर्ग इषित इष्टः ॥ १८ ॥

ननु, बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राऽह–नहीति । बह्वायासोऽतिप्रयासः ॥ १९ ॥

आत्मत्वात्सर्वत्र सिद्धत्वादिति च हेतुद्वयमुपपादयति--परावरेष्विति, चतुर्भिः । ब्रह्मा अन्तो येषां स्थावर आदिर्येषां तेषु भूतेषु भौतिकेष्वजीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथम्भूतः कोशस्कृदिव कोशकारी कीट इव कर्माणीहमानो यथा कोशस्कृद्गृहं कोशात्मकं गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति । तथा स्वबन्धकानि कर्माणि कुर्वाण इत्यर्थः । अवितृप्तः कामो यस्य तादृशः औपस्थ्यं जैह्वयञ्च सुखं बह्वधिकं मन्यमानः अतो दुरन्तो मोहो यस्य ॥ १३ ॥

दुरन्तमोहं दर्शयन्विशिनष्टि—कुटुम्बपोषणाय वियत्क्षीयमाणं निजायुः परिच्छिन्नायुर्यस्य तादृशो विशेषेण हितमनुकूलमर्थं परमं पुरुषार्थं न वेद, विहतमिति पाठे, विहतमपि स्वाभिप्रेतमर्थं न वेद दृष्टान्तत्वेन नानुसन्धत्ते सर्वत्र देशे काले च तापत्रयेण दुःखित आत्मा मनो यस्य तादृशो न निर्विद्यते संसृतौ हेयत्वबुद्धिं न करोति यतःस्वकुटुम्बे रामो रतिर्यस्य ॥ १४ ॥

---

* चामदृशामिति. पाठान्तरम्, वीर०—विज० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रत्युताकार्यं करोति इत्याह—वित्तेष्विति । परद्रव्यापहारिणो यो दोषः प्रेत्य मरणानन्तरं नरकलक्षणः इह च लोके दण्डरूपश्च तं विद्वान् जानन्नपि वित्तेषु नित्यमभिनिविष्टं चेतो यस्य सोऽजितेन्द्रियोऽशान्तकामः कुटुम्बी च सन् तत्परस्य वित्तं हरति ॥ १५ ॥

एवं को गृहेष्वित्यादिभिः सप्तभिः श्लोकैर्गृहादिष्वनुरागो दुस्त्यज इत्युक्तम्,अथ तस्यानर्थावहत्वमाह-विद्वानिति। हे दनुजाः ! इत्थं विद्वानपि उक्तविधं संसारं जानन्नपि कुटुम्बं पुष्णन् बिभ्रत् यः स्वलोकाय आत्मयाथात्म्यदर्शनाय न कल्पते न समर्थो भवति प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनपरो न भवति, किन्तु इदं स्वीयमिदं परकीयमित्येवं विभिन्नो भावो यस्य, सर्वस्य परमात्मशेषतामजानन्नित्यर्थः, यथावत् विमूढः स तमो नरकमेव प्रपद्येत, यद्वा तत्त्वविदपि कुटुम्बभरणासक्तो देहात्माभिमानस्वतन्त्रात्माभिमानयुक्तो मूढवन्नरकमेव प्रपद्यते, न मुक्तिम् किं पुनः केवलमूढ इत्याह-विद्वानपीति। विद्वानपि प्रकृतिपुरुषेश्वरयाथात्म्यविदपि यःपुनः स्वीयपारक्यविभिन्नभावः इत्थं कुटुम्बं पुष्णन्भवति सः स्वलोकाय परमपदप्राप्तये न कल्पते किन्तु नितरां मूढवत्तम एव प्रपद्येत विदुष एवेयं गतिः, किं पुनरविदुष इति भावः यथा विमूढ इति दृष्टान्तवशात्किंपुनर्न्यायोऽत्रद्योत्यते ॥ १६ ॥

एवं गृहाद्यासक्तेर्दुस्त्यजत्वमनर्थावहत्वञ्चोक्तम्. अथोक्तमुपसंहरन् दुस्त्यजगृहाद्यनुरागत्यागनिमित्तमसत्सङ्गं परित्यज्य सत्सङ्गादिप्रसक्त्या भगवन्तमाश्रयेतेत्याह—यत इति। यतः कश्चिदपि पुमान् गृहाद्यभिनिविष्टश्चेदात्मानं क्वचिदपि काले कुत्रचिदपि देशे मोचितुं मोचयितुमसमर्थस्तत इत्युत्तरेणान्वयः।असामर्थ्ये हेतुरलमत्यर्थं दीनो विषयलंपटः वामा दृशो यासां तासां विहारे क्रीडामृगः क्रीडार्थसंवर्द्धितशाखामृगादितुल्यः, विहारमिति पृथक्पदपाठे विहारस्थानमात्मानमित्यन्वयः। वामदृशां विहारक्रीडामृगत्वं विशिनष्टि, यद्विति। यद्यस्माद्वामदृशां क्रीडामृगत्वाद्धेतोर्निगडरूपो विसर्गः संसारबन्धो भवति अयमिति वा छेदः यत् क्रीडामृग इत्येतदयमेव निगडरूपः संसार इत्यर्थः यद्विति छेदपक्षे यच्छब्देन वामदृशां वा परामर्शः यत् यासु निगडः शृंखलरूपो विसर्गः पुत्रादिरूपः सर्ग इत्यर्थः । अविसर्गं इति वा छेदः यद्यस्मात्क्रीडामृगत्वादविसर्गः। अविमोच्यो निगडः शृंखलतुल्यः संसारबन्धो भवतीत्यर्थः ॥ १७ ॥

तत इति। ततः यतो गृहादिष्वासक्तः आत्मानं मोचितुमसमर्थस्ततो विषयेषु शब्दादिष्वेव आत्मा मनो येषां तेष्वसत्सु दैत्येषु सङ्गं दूरात्परिहृत्य आदिदेवं जगदुदयस्थितिलयलीलं स्वतेजसा दीप्यमानं नारायणं जीवानां प्राप्यं प्रापकमाधारञ्च भगवन्तम् उपेत तत्सङ्गादिप्रणाड्याऽऽदरेण व्रजेत यद्यप्यत्र सत्सङ्गतेः कण्ठोक्तिर्नास्ति तथापि स्वस्य सत्सङ्गतेरेव हेतोर्ज्ञानोदयस्य स्वेनैव वक्ष्यमाणत्वात्स्वसङ्गस्यैव तैः सत्सङ्गतेः कृतप्रायत्वाच्च तदनुक्तावपि साभिप्रेतैव. एवं गृहाद्यासङ्गस्य दुस्त्यजत्वदोषावहत्वादिकथनेनैव तेषां वैराग्यमुदेष्यतीति वैराग्यमपि सम्पादनीयमिति शब्दतो नोक्तं स्वस्यैव ज्ञानोपदेष्टृत्वादाचार्यत्वेनावस्थितत्वाद्गुर्वभिगमनमपीहशब्दतः कर्तव्यत्वेननोक्तम्. किन्तु श्रीशप्रपदनमात्रमेव कुरुतेतिशब्देनोक्तम् धर्मान्भागवतानिति भगवच्छब्देनाभिप्रेतं निष्फलत्वशङ्काव्युदासं व्यनक्ति—स इति। स उपेयो नारायणः अपवर्गः परमपुरुषार्थलक्षणापवर्गहेतुत्वेन मुक्तः सङ्गो देहतदनुबन्धिषु यैस्तैरीप्सित इष्टः स एव मुक्तसङ्गानामिष्टोऽपवर्गः फलरूप इत्यर्थः ॥ १८ ॥

एतदेव प्रतिपादयितुं तावत्तत्समाश्रयणस्य दुःशकत्वशङ्कां निराकुर्वन्नाह—नहीति। हे असुरात्मजाः ! अच्युतं सकृदाश्रयणादेव आश्रितान्न च्यावयतीति अच्युतः तं प्रीणतः पुंसो बह्वायासो न हि विद्यते देवतान्तरप्रीत्युत्पादकसाधनाऽनुष्ठानवद्भगवत्प्रीत्युत्पादकतद्धर्मानुष्ठाने नायासो विद्यते इत्यर्थः अनायासे हेतुः आत्मत्वादिति. सर्वभूतानामात्मत्वात्सर्वतः सिद्धत्वात्सुलभत्वात्सर्वत इति "सार्वविभक्तिकस्तसिः" षष्ठ्यर्थः। इह लोके सर्वतः सर्वेषां देवासुरादिस्त्रीपुंसवर्णाश्रमादिविभागमन्तरेण सर्वेषां सिद्धत्वादित्यर्थः। अयमभिप्रायः, न हि सुलभस्य तृणलोष्ठादेरन्वेषणाय विदूरगमनादिरूपः प्रयासोऽपेक्षितः सर्वत्र सर्वेषां सुलभत्वादेवं सर्वेषामात्मत्वेन सर्वत्र सुलभस्य प्रीणनेनातीवायास इति. यद्वा, सिद्धत्वादित्यस्य स्वर्गादिवन्न साध्यः पुरुषार्थः अपितु सिद्धरूपः साध्यपुरुषार्थसाधने हि यागाद्यनुष्ठानरूपप्रयासबाहुल्यम्. सिद्धस्यतु तल्लाभोपयुक्तप्रीणनोपायलसमाश्रयणमात्रमपेक्षितमित्यर्थः यद्वा, आत्मत्वादित्यनायासे पृथग्धेतुः आत्मा हि स्वशरीरे निरतिशयप्रीतियुक्तस्तद्रक्षणशीलश्च लोके दृष्टः एवं सर्वेषां जीवानां परमात्मानं प्रतिशरीरत्वात्तद्विषयकप्रीतेस्तस्य स्वतःसिद्धाया अपि विपुलापराधैरनभिव्यक्तायास्तदभिव्यक्त्यावहं किञ्चिदानुकूल्यादिकमात्रमपेक्षितमिति भावः । सिद्धत्वादिति तत्रैवान्यो हेतुः, न हि सिद्धस्य हिरण्यनिधेस्तत्परिज्ञानमन्तरेण तल्लाभोपयुक्तोऽन्यः प्रयासोऽपेक्षितः एवं परमात्मनोऽपि निरतिशयपुरुषार्थरूपस्य हृदये सिद्धत्वात्तल्लाभोपयुक्तस्वामित्वशेषित्वादितद्याथात्म्यज्ञानपूर्वकतत्समाश्रयणमात्रेण तस्य समाश्रितविषयकप्रीतिरुदेष्यतीति नातीवायासो विद्यते इत्यर्थः ॥ १९ ॥

"आत्मत्वात्सर्वभूतानाम्" इत्येतदेव प्रपञ्चयति—परावरेष्विति चतुर्भिः। ब्रह्मा चतुर्मुखोऽन्तो येषां स्थावरा आदिर्येषां तेषु परावरेषूच्चावचेषु भूतेषु चराचरात्मकदेहभाक्षु चेतनेष्वित्यर्थः। तथा भौतिकेषु पृथिव्यादिभूतपरिणामरूपेष्वचेतनेषु घटपटादिषु महत्सु पृथिव्यादिमहाभूतेषु ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कोशस्थः कोशकारी कीटः, एतदेव स्पष्टयति—औपस्थ्यमिति ॥ १३ ॥

यद्विति क्लृप्तं निजमात्मीयमायुर्यस्य स तथा शास्त्रविहितमर्थं श्रेयोलक्षणं न बुध्यते स्वकुटुम्बे भार्यादौ रामः क्रीडा यस्य स तथा न निर्विद्यते विरक्तो न भवति ॥ १४ ॥

परवित्तहर्तुश्चोरादेरिह देहात्प्रेत्य यत्पूर्वमार्जितम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथाप्यनन्तरमपि तच्च तदेव दुष्कर्म हरते नयतीत्यन्वयः पर-लोकेपि विषयेष्वलं बुद्धिर्नास्तीति भावः ॥ १५ ॥

अनुक्तविशेषप्रदर्शनाय कथितमेवार्थं विशिनष्टि—विद्वा-निति । स्वलोकाय स्वक्लृप्तमोक्षाय स्वयोग्यज्ञानाय वा तत्र हेतु-माह—यदिति. न केवलं मोक्षाय कल्पत इति. प्रत्युतानर्थं चा-प्नोति, तम इति । विमूढो विपरीतज्ञानी यथा तमः प्रतिपद्यते तथाऽयमित्यन्वयः ॥ १६ ॥

श्रीनारायणानुग्रहमन्तरेण विद्वत्ताप्यकिञ्चित्करीत्याह—यत इति । शास्त्रगुरूपदेशेन विद्वान् संसारस्यानित्यतामिति शेषः दीनं स्वात्मानं विमोचितुमलं समर्थो नेति यतोऽत इति शेषः यदि जीव-राशौ कश्चिदस्तीत्यभिमानस्तर्हि कुत्र कस्मिन्काले न कस्मि-श्चिदित्यर्थः । कुतोत्राह—वामदृशामिति. अयं पुरुषो वामदृशां विहारार्थं निर्मितक्रीडामृगइति यत्कथमयं तथाभूदिति तत्राह—निगड इति. आसामक्षिसर्गः कटाक्षमोक्षो यस्य निगडः शृङ्खलायितः तस्मात्स इति शेषः ॥ १७ ॥

एतावन्तं दैत्यान् कटाक्षीकृत्योक्तं प्रकटयन्मथितार्थमाह तत इति । नन्वेवं तर्हि संसारमोक्षस्य दौर्घट्यमापादितमिति शंका माभूत् यदर्थितास्ति तद्धुपायं वदामीत्यतो वाह—तत-इति । यतो धर्मार्थकामैर्बुद्ध्यापेक्षाबुद्धिर्ज्ञाचिकित्सारहितैः संसार-मोक्षो न सेत्स्यति ततो दैत्येषु सङ्गं दूरात्परिहृत्य नारायणं शरणमुपेत, यातेत्यन्वयः । सोपवर्गो मुक्तसङ्गैः पुरुषैरिषितः आप्तो भवति "इषुगतौ" इतिधातोः ॥ १८ ॥

नेदं दुःसाध्यमित्याह—न हीति । सर्वभूतानामात्मत्वात्तत्प्रे-ष्ठत्वात्सर्वत्र व्याप्ततत्वेन सुलभत्वाद्वा ॥ १९ ॥

नारायणस्य सेव्यत्वे हेतुगर्भविशेषणमाह, परावरेष्विति ॥२०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कोशस्कृत् कोशकीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वार-मरक्षन् म्रियते तथैव कर्माणि ईहमानः औपस्थ्यं सुखं जैह्व्यञ्च सुखम् ॥ १३ ॥

क्षियत् क्षीयमाणं निजमायुः पुरुषार्थश्च हतं न बुध्यते वटिका-मात्रस्याप्यपचयन्तु बुध्यत एवेति भावः । तदपि तस्मान्नति-र्विद्यते ॥ १४ ॥

प्रेत्य नरकलक्षणम् इह च राजदण्डादिरूपं दोषं यद्यपि विद्वान् तदपि तानि वित्तानि हरते ॥ १५ ॥

विद्वानपि शास्त्रज्ञोऽपि स्वलोकाय कोहं किं करोमीति स्वम-वलोकयितुमित्यर्थः । यथा विमूढस्तथैव हे दनुजाः ! ॥ १६ ॥

यतः कुटुम्बवान् क्वापि देशे कुत्रचिदपि काले समर्थः शास्त्र-ज्ञानादिसामर्थ्यवानपि कश्चिदपि आत्मानं स्वीयं वा विमोचयि-तुम् क्षमं न शक्नोति. विहारमिति पाठे आत्मानमित्यस्य विशे-षणं समासपाठे कर्तृविशेषणं यः कामदृश एव निगडो यत्र तथाविधः सर्गो जन्म भवेत् अपवर्गः संसारबन्धविमोचकः ईषित इष्टः ॥ १७ ॥ १८ ॥

प्रीणयतः परिचर्य्यया प्रीणयितुं न बह्वायासः, यथा कुटुम्बं प्रीणयत इति भावः । न च तस्यान्वेषणे श्रमः आत्मत्वात् हृद्येव वर्त्तमानत्वात् न च तत्प्रीणनेऽपि श्रमः सर्वतः सर्वैरपि प्रकारै-र्मानसैरप्युपचारैस्तत्प्रीणनस्य सिद्धत्वात्तथा अच्युतं प्रीणयामीति सङ्कल्पमात्रेणापि प्रीतेः सिद्धत्वात् श्रवणकीर्त्तनाद्यन्यतमेनापि वा सिद्धत्वात् ॥ १९ ॥

नकेवलं स्वहृदय एव वर्त्तमानः परिचरणीयः अपितु सर्वत्रैव वर्त्तमानः सर्वसंमाननेनैव सन्तोषणीय इत्युपवेष्टुं तस्य सार्वत्रिकीं सार्वकालिकीञ्च सत्तामाह, द्वाभ्याम्. परावरेषु उत्कृष्टनिकृष्टेषु भूतेषु ब्रह्मा अन्तो येषां स्थावर आदि येषान्तेषु भौतिकेष्वजीवेषु घटादिषु च महत्सु भूतेष्वाकाशादिषु गुणसा-म्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ परः भूतादिभ्यः प्राकृते[illegible]ः प्रकृतेश्च सकाशादन्य एकः परं ब्रह्मेति आत्मा परमात्मेति भगवा-निति शब्दत्रयवाच्य ईश्वर ईयत इत्युत्तरेणान्वयः । कीदृशः ? अव्ययः सर्वेष्वपि कालेष्वशून्यः ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुरन्तो दुष्पारो मोहो यस्मात् एवोपस्थजैह्व्यं सुखं बहु अधिकं मन्यमानः तेष्वव्यवितृप्तकामः असमाप्तवासनः अत एव कोश-स्कृत् कीटविशेषो यथा स्वबन्धनाय कोशं करोति तद्वत्स्व-बन्धनाय कर्माणीहमानः कथं विरज्येत पुत्रादिषु विरागं कुर्यात् तान् विरागाभावात्कथं त्यजेत ॥ १३ ॥

कुटुम्बपोषाय निजायुर्वियत् क्षिपयन् प्रमत्तो विहतमर्थं न बुध्यते सर्वत्र तापत्रयेण दुःखित आत्मा यस्य स कुटुम्ब एव रामः रमणस्थानं यस्य सः न निर्विद्यते ॥ १४ ॥

परवित्तहर्तुः प्रेत्येह च दोषं विद्वान् जानन्नपि हरते परवित्तमिति शेषः । यतो वित्तेषु नित्याभिनिविष्टं चेतो यस्य सः तत्र हेतुरविजितेन्द्रिय इति तत्रापि हेतुः आशान्तकामः प्रवृद्धवासनः ॥ १५ ॥

यो विद्वान् सोपि इत्थं पूर्वोक्तविमूढवत् स्वकुटुम्बं पुष्णन् स्वीयपारक्यविभिन्नभावश्चेत् इदं स्वमिदं पारक्यमित्येवं विभिन्नो विनाशितो भावः सर्वात्मकवासुदेवभजनं येन सः स्वलोकाय विद्वत्प्राप्यलोकाय न कल्पते योग्यो न भवति किन्तु यथा विमूढस्तथा तमः संसारं प्रपद्येत प्राप्नुयादित्यर्थः ॥ १६ ॥

यतः कश्चिदपि क्वच कर्हिँश्चिदुपायेपि सति कुत्र-चित्काले आत्मानं विमोचितुं समर्थो न भवति ततो दैत्येषु सङ्गं परिहृत्य नारायणमुपेतेत्युत्तरेणान्वयः असामर्थ्ये हेतुः अलम-त्यर्थं दीनः अनादिमायावश्यः अत एव कामे रुक् यासां तासां विहारे क्रीडामृगः विनोदप्रदः यत् यासां विसर्गः पुत्रादिरूपो विविधः सर्गो निगडो बन्धनम् ॥ १७ ॥

नारायणमुपेत शरणं यात स मुक्तसङ्गैः त्यक्तसर्वसङ्गैः परमहंसैरिषितः यतोऽपवर्गः मुक्तप्राप्यः ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ।
एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥ २१ ॥
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥
केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययान्तर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥
तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥
तुष्टे च तत्र किमलभ्यमनन्त आद्ये किन्तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ।
धर्मादयः किमगुणेन च कांक्षितेन सारञ्जुषां चरणयोरुपगायतां नः ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतस्य सर्वेषां भूतानां चेतनाचेतनानामात्मत्वान्मूलत्वात् सर्वतः धारकत्वनियन्तृत्वादितः इह जगति सिद्धत्वान्निष्पन्नत्वात् हेतोः अच्युतं प्रीणयतोवहायासो नहि ॥ १९ ॥

सर्वमूलत्वं सर्वत्र सिद्धत्वञ्चाह- परावरेष्विति द्वाभ्याम् । भूतेषु चेतनाचेतनरूपेषु अस्तीति शेषः ॥ २० ॥

भाषा टीका ।

कोश कर कीडे के सदृश चेष्टा करने वाला नाना प्रकार के कर्मों को करता हुआ कामनाओं से तृप्त नहीं होकर दुरन्त मोहवाला इन्द्रियोंको वहुत मानने वाले कैसे वैराग्य को प्राप्त हो सक्ता है ॥ १३ ॥

कुटुम्ब पोषण में चीण होरहा जो आयु उसको और नष्ट हुए भये पुरुषार्थ को यह प्रमत्त नहीं जानता है सर्वत्र तापत्रय से दुःखित होकर भी उस दुःख को दुःख नही मानता है, क्योंकि ? अपने कुटुम्ब में रागवाला है ॥ १४ ॥

द्रव्य के विषैं नित्य ही प्रविष्ट चित्त वाला होकर पराये के द्रव्य हरने में पर लोक और इस लोक में जो नरक और दण्डादि दोष है उनको जानता भी है तो भी अजितेन्द्रिय अशान्त काम यह कुटुम्बी चोरी करता ही है ॥ १५ ॥

हे दनुजो ! ऐसे जानता हुआ भी कुटुम्ब पोषण करता हुआ आत्म विचार करने को समर्थ नहीं होता और अपने पराये पदार्थ में भिन्न भावना वाला होकर जैसे मूढ नरक को प्राप्त होता है तैसे ही जानता हुआ भी ॥ १६ ॥

जिसकारण कहीं भी कोई भी अपने आत्माको इस संसारसे छुडाने को समर्थ नहीं क्योंकि ? विचारा क्षीण स्त्रियोंके विहार करने का क्रीडा मृग हो रहाहै जिन स्त्रियों पुत्रपौत्रादि रूपपादका वन्धन होता है ॥ १७ ॥

हेदत्य हो ! तस्मात् विषयात्मक दैत्यों के सङ्गको दूरसे परित्याग करके आदिदेव श्रीनारायणके शरण जानों क्योंकि ? वही मुक्तसङ्ग मुनिलोगों का इष्ट है ॥ १८ ॥

हे असुरात्मजहो ! नारायणको प्रसन्न करने में वहुत परिश्रम नही है क्योंकि ? वह सर्व प्राणिओं के आत्मा है और सर्व सिद्ध है ॥ १९ ॥

परा वर स्थावरों से लेकर ब्रह्मापर्यन्त प्राणिओं में तथा पञ्चभूतों के विकार घटपटादिक और पञ्च महाभूतों में । गुणों में प्रकृति में और महत्तत्वादिकमें एकही ईश्वर अव्यय परमात्मा भगवान श्रीमन्नारायण विराजते हैं ॥ २० ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ च परो ब्रह्मस्वरूपः ॥ २१ ॥

कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः ? माययेत्याह, प्रत्यगात्म द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्युत्तरेणान्वयः वस्तुतस्तु स्वयमविकल्पितोऽनिर्देश्योऽपि सन् यद्वा अनिर्देश्योऽप्येवंनिर्देश्यः सन् विकल्पित ईयत इत्यन्वयः ॥ २२ ॥

यतः केवलोऽनुभवात्मक आनन्द एव स्वरूपं यस्य, ननु, स एवचेत्सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राऽऽह, गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया माययाऽन्तर्हितमैश्वर्यं येन सः ॥ २३ ॥

यस्मादेवं तस्मात्सर्वेषु भूतेषु यथोचितं दयां सौहृदं कुरुत यया दयया उन्मुच्य सन्त्यज्य ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता।
मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २६ ॥
ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय।
एकान्तिनां भगवतस्तदकिञ्चनानां पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ॥ २७ ॥
श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम्।
धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततः किमत आह, तुष्टे च तत्र तस्मिन्किमलभ्यम् तथाऽपि गुणपरिणामाद्दैवादेव स्वसिद्धा अयत्नतः सिद्धा धर्मादयस्तैः किम् अगुणेन च मोक्षेण काङ्क्षितेन किं तमुपगायताम्नोऽस्माकमकाङ्क्षितस्यापि तस्य सिद्धेः यद्वा माभून्मोक्षस्तस्य चरणयोः सारं जुषां सुधां सेवमानानां तेनापि किमित्यर्थः ॥ २५ ॥

ननु, च धर्मादेरपुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्यएवाभिहितस्तत्राऽऽह, धर्मोऽर्थः कामश्चेति यस्त्रिवर्गस्तदर्थं च य ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्को दण्डनीतिश्च द्विविधा च वार्ता जीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वान्तर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सर्वं सत्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः। तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति ॥ २६ ॥

तेषां पुनर्विश्वासार्थं गुरुसम्प्रदायमाह-ज्ञानमिति। यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इति माशङ्कीत्याह-भगवत एकान्तभक्तानां यत्पादरजस्तेनाऽऽप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यान्न तूत्तमानामेवेति नियमः ॥ २७ ॥

अत एव मयापि पूर्वं नारदाच्छ्रुतं विज्ञानसहितमनुभवपर्यन्तं ज्ञानं धर्मं च श्रुतम् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

गुणेषु सत्त्वादिषु गुणानां सत्त्वादीनां साम्यं यस्मिंस्तस्मिन् प्रधाने मूलप्रकृतावित्यर्थः। गुणव्यतिकरे गुणवैषम्यवति महदहङ्कारादौ चेत्यर्थः ॥ २१ ॥

प्रत्यगात्मस्वरूपेण प्रत्यगात्मा जीवः स्वं स्वासाधारणं रूपं शरीरं यस्य तेन प्रत्यगात्मशरीरकत्वेनेत्यर्थः। दृश्यमचेतनं रूपं यस्य तेन अचेतनशरीरकत्वेन चेत्यर्थः। एकः स्वसमानरहित एव पर आत्मा परमात्मा अन्तः प्रविश्य भर्त्ता अव्ययः अस्पृष्टशरीरगतविकारः निरस्तनिखिलदोषः षाड्गुण्यपरिपूर्णः ईश्वरो जीवकर्मानुगुणं नियन्ता व्याप्यव्यापकनिर्देश्यः व्याप्येषु व्यापकतया निर्देश्यः अविकल्पितः जातिगुणादिरहितः ॥ केवलोऽनुभवः दुःखप्रतिभटं ज्ञानम् आनन्दरूपं तदेव स्वरूपं यस्य सः परमेश्वरः स्वव्यतिरिक्तेश्वरान्तररहितः गुणसर्गया संसारिणां मोहादिगुणान् सृजतीति तया मायया अन्तर्हितैश्वर्यः संसारिणामप्रकाशमानमहिमा ईयते गम्यते सदाचार्योपदेशेन ज्ञायत इत्यर्थः। उक्तविधतद्याथात्म्यज्ञानपूर्वकं तत्समाश्रयणमात्रमेव तत्प्राप्तिनिमित्ततत्प्रीतिहेतुरुपाय इति भावः। अत्र अविकल्पितः' 'केवलानुभवानन्दस्वरूपः' इति पदद्वयेन "अस्थूलमनण्वह्रस्वम्" 'सत्यं ज्ञानमनन्तम्' 'विज्ञानमानन्दम्" इति श्रुत्यर्थप्रत्यभिज्ञापनेन प्राप्यं ब्रह्मस्वरूपमुक्तम् अवशिष्टैरेक एवेत्यादिभिः प्रथमान्तपदैः 'प्रत्यगात्मस्वरूपेण' दृश्यरूपेण चेति पदद्वयेन च प्राप्यस्य गुणा उक्ताः, "परावरेषु भूतेषु प्रत्यगात्मस्वरूपेण चेत्यनेन जीवस्य तच्छेषत्वापरपर्यायतच्छरीरत्वकथनेन प्राप्तृस्वरूपमुक्तम् "गुणसर्गया माययाऽन्तर्हितैश्वर्यः" इत्यनेनाऽब्रह्मात्मकत्वस्वतन्त्रात्मत्वादिरूपमोहादिप्राकृतगुणगण एव प्राप्तिविरोधीति कथनेन विरोधिस्वरूपमप्युक्तम्. तत्प्राप्तिफलन्तु तच्चरणकैङ्कर्यादिरूपं "सारं जुषां चरणयोः" इति वक्ष्यति. एवमर्थपञ्चकमुपदिष्टं भवति पूर्वम् "उपेतनारायणम्" इति तत्समाश्रयणं कर्तव्यत्वेन विहितं तस्य दुष्करत्वशङ्कापरिहारप्रसङ्गात्समाश्रयणोपयुक्तार्थपञ्चकज्ञानं सदाचार्योपदेशात्सम्पाद्यमित्युक्तम्. एवमर्थपञ्चकज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्रसादजननद्वारा तत्प्राप्तिहेतुरित्यभिप्रेतम्,तत्समाश्रयणञ्च तद्भक्तिप्रपत्त्यन्यतरात्मकमधिकारभेदेन व्यवस्थितमिति तात्पर्यम्॥२२॥२३॥

यदुक्तं "न ह्यच्युतं प्रीणयतो बह्वायासः" इति तदुपसंहरन् तत्प्रीतिनिमित्ततत्सन्तोषजनकं हेत्वन्तरमाह--तस्मादिति। यस्मात् सर्वान्तरात्मत्वादिप्राप्यब्रह्मस्वरूपादिज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्राप्त्यावहतत्प्रीतिहेतुस्तस्माद्यूयं सर्वे आसुरं भावं भूतद्रोहशीलत्वादिरूपम् उन्मुच्य समूलं त्यक्त्वा परमात्मशरीरेषु सर्वेषु भूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु यथोचितं दयां सौहृदञ्च कुरुत ययादयया अधोक्षजो भगवांस्तुष्यति तादृशीं भूतेषु दयां कुरुतेत्यर्थः ॥ २४ ॥

तुष्यत्यधोक्षजः ततः किमत आह—तुष्ट इति। तस्मिन्नाद्ये जगत्कारणभूते अनन्ते भगवति तुष्टे सति अलभ्यं किम्.?न किमपि सर्वं तस्मिन् तुष्टेसति अभिलषितं सुलभमेवेत्यर्थः। यद्यपि सुलभं तथापि त्रिरतिशयपुरुषार्थं रूपतच्चरणारविन्दानुभवरूपममृतमनुभवद्भिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

माहशैर्धर्मैश्वर्यकामकैवल्यादिकममृतं पिबद्भिरूषरोदकमिव नेष्यते इत्यभिप्रयन्नाह-किमिति । नोऽस्माकं गुणव्यतिकरात् कर्मानुगुणसत्त्वादिगुणपरिणामादेव स्वासिद्धा अयत्नतस्सिद्धाः ये धर्मादयः धर्मार्थकामाः तैर्धर्मार्थकामैः किं, न किमपि प्रयोजनमित्यर्थः । कांक्षिते नाभिलषितेन अगुणेन गुणत्रयरहितेन कैवल्येन मोक्षेण वा किं सोऽपि न पुरुषार्थ इत्यर्थः । न कथम्भूतानां भगवच्चरणयोः सारमनुभवात्मकममृतसारं जुषतां सेवमानानाम् उपगायतां तद्गुणान् स्तुवतां मनसा तच्चरणारविन्दाऽनुभवामृतम् अनुभवतां वाक्छ्रवणाभ्यां तद्गुणानुभवामृतञ्चानुभवतामस्माकं धर्मादय ऊषरोदकप्राया इत्यर्थः ॥ २५ ॥

ननु, त्वदुक्तमेतत्सर्वं जानन्तोऽप्यस्मद्गुरवस्त्रिवर्गमेव पुरुषार्थत्वेनोपदिदिशुः त्वन्तु त्रिवर्गमनादृत्य भगवच्चरणारविन्दाश्रयणमेव सारतमं मन्यसे किञ्च गुरुभिरनुशिक्षितान्वीक्षिक्यादिविद्यास्वेषु न त्वदुक्तधर्मः कर्तव्यत्वेनोपलक्ष्यते अतः किं तद्धर्मप्रमापकं तत्राह—धर्मेति धर्मादीनां समाहारद्वन्द्वः पुंस्त्वमार्षम् धर्मार्थः कामश्चेति यस्त्रिवर्गोऽभिहितः अस्मदाचार्यैर्भार्गवादिभिरिति शेषः । यस्त्रिवर्गः पुरुषार्थत्वेनाचार्यैरुक्त इत्यर्थः । यच्च तत्प्रतिपादिकेक्षादिरूपा विद्या च तदेतत्सर्वमहं मन्ये तत्रेक्षा आन्वीक्षिकी संज्ञा तर्कविद्या, त्रयी वेदपूर्वभागः नयदमौ दण्डनीतिप्रतिपादके शास्त्रे, विविधा वार्ता कृष्याद्याजीविकाज्ञानजनकं शास्त्रम्, एतत्सर्वमहं मन्ये जानाम्येव, किन्तु यत्स्वसुहृदः परमस्य पुंसो निरुपाधिकसुहृदे, परमपुरुषायेत्यर्थः । सम्प्रदानस्यैव शेषत्वविवक्षया षष्ठी. स्वात्मार्पणं भगवति स्वात्मसमर्पणं तदेतन्निगमस्य वेदोत्तरभागस्य, प्रमेयमिति शेषः । उपनिषद्भागस्य प्रतिपाद्यं सत्यं नित्यम् अक्षयपुरुषार्थसाधनं, मन्य इत्यर्थः । अस्मद्गुरुभिः ज्ञातमप्यहं जानामि नित्यनिरतिशयपुरुषार्थसाधनं भगवत्यात्मसमर्पणं वेदान्तप्रतिपाद्यं स्वधिकारं जानामीत्यर्थः । गुरवस्तु नैतज्जानन्तीत्यभिप्रायः आपाततो जानन्तो वा महदनुग्रहाभावान्नानुष्ठानोपयोगितया निस्संशयं जानन्तीति तात्पर्यं निगमस्त्वित्यनेनाऽस्मदुक्तार्थे वेदान्तभागः प्रमाणमित्युक्तम् । स च "ओमित्यात्मानं युञ्जीत मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादिरूपः स्वात्मार्पणमित्यनेन चोपेनारायणं हरिमाश्रयेतेत्याद्युक्तमाश्रयणमात्मसमर्पणरूपमिति विवृतम्. भगवति स्वात्मसमर्पणं नाम स्वात्मनो भगवच्छेषैकस्वभावत्वानुसन्धानपूर्वकं भगवति स्वात्मरक्षाभरसमर्पणरूपम् एवं नारायणोपायनं नाम तच्छरणागतिरित्युक्तम्भवति. समनन्तराध्याये तदुपायनस्य तद्भक्त्यात्मकत्वं वक्ष्यति एवञ्च यथाधिकारं भक्तिप्रपत्त्यन्यतरात्मकं भगवत्समाश्रयणं कर्तव्यमिति तात्पर्यम् ॥ २६ ॥

ननु, गुरुभिरज्ञानमिदमन्तरेणापि सदुपदेशेन कथं त्वं ज्ञातवानित्याशङ्कायां भगवतो नारदस्यानुग्रहादेवेति वक्तुं तस्य साम्प्रदायिकत्वमाह—ज्ञानमिति । तदेतद्दुरवापं दुर्लभं ज्ञानं नरस्य सखा भगवान्नारायणो बदरिकाश्रमवासी नारदायाह उपदिष्टवान्. ननु, यत्र नारदः श्रोता नारायणो वक्ता तस्मिन्मादृशानां कथमधिकार इति शङ्कां निराह, एकान्तिनामिति एकान्तिनामकिञ्चनानामनन्यप्रयोजनानां भगवतः पादारविन्दरजसा आप्लुतानां स्नातानां देहिनां भगवत्सेवासक्तानां सर्वेषामपि तज्ज्ञानं स्यादेव नतूत्तमानामेवेति नियमः ॥ २७ ॥

अत एव मयापि नारदाच्छ्रुतमित्याह—श्रुतमिति. विज्ञानेन विवेकादिजन्येन संयुतं ज्ञानं शास्त्रोत्थं विशुद्धं भागवतधर्मरूपं भगवद्याथात्म्यवेदिनो नारदाच्छ्रुतं श्रवणेन ज्ञातं भगवतो नारदस्य वचसां श्रवणान्मम ज्ञानविज्ञानसम्पत्तिरभूदित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणसाम्ये प्रलये गुणव्यतिकरे सृष्टौ ॥ २१ ॥

व्याप्तिप्रकारमाह—प्रत्यगात्मेति । सर्वपदार्थानामन्तः प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण बहिः कालरूपेण व्याप्तेन प्रज्ञापरपर्यायेण एवमेक एव व्याप्यव्यापकनिर्देश्यो विकल्पितो द्विविधः क्लृप्तः "अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृतः" इति वाक्यसिद्धोऽयमर्थः घट इव निर्देश्यो नेत्यनिर्देश्यरूपः ॥ २२ ॥

"अचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारम्" इति श्रुतिनिरूपित इत्याह—केवलेति । सर्वत्र सिद्धश्चेत्किमिति न दृश्यत इति तत्राह—माययेति. मायया प्रकृत्या "तमसा गूढमग्रे" इति श्रुतेः । सत्त्वादिगुणैः सर्गसृष्टिर्यस्याः सा तथा तया ॥ २३ ॥

यतः सर्वभूतानि भगवन्निवासस्थानानि तस्मात्तथाभूतदयया आसुरं भावं द्वेषं "विष्णोर्गृहत्वाद्भूतेषु दया कार्या विजानता" इति स्मृतेः प्रक्षिपन्तोऽनसूयका इति ॥ २४ ॥

भगवत्तुष्ट्या किं प्रयोजनमिति तत्राह—तुष्ट इति । ये अनुसिद्धाः जन्मप्रभृतिप्राप्तैस्तैर्गुणव्यतिकरैर्विषयसुखैर्हरेश्चरणयोः सारं जुषां गुणलक्षणमकरन्दं सेवमानानां तद्गुणांश्चोपगायतां गायमानानां नोऽस्माकं कांक्षितेनागुणेनाप्यवाञ्छितेन मोक्षेण किं अपरक्तभक्तिलक्ष्यमुक्तेर्भक्तेः परमानन्दस्वरूपत्वात्तत्रापि सुखाधिक्यहेतुत्वात्सुतरां धर्मादिभिः सुतमां गुणव्यतिकरैः फलं नास्तीति किमु वक्तव्यम्. मोक्षे सुखमनाकाङ्क्षमाणस्य यथा सुखाधिक्यं भवति यथा मोक्षगतं सुखं काङ्क्षमाणस्य सुखं पूर्णं न लभ्यत इत्यभिप्रायेण कांक्षितेनेति विशेषणम् "काङ्क्षतो मोक्षगमपि सुखमाकाङ्क्षतो यथा" इति वचनात् ॥ २५ ॥

ननु, शास्त्रविहितानां धर्मादीनां कथङ्कारं साफल्यं भवतीत्याशङ्का परिहरन्नाह—धर्मेति । धर्मार्थकाम इति नामभिन्नो यस्त्रिवर्गः शास्त्रे विहितस्तदपेक्षा ज्ञानमनुष्ठानं च या त्रयी त्रयो वेदास्तेषां शब्दतोऽर्थतश्च ज्ञानं यौ नयदमौ नीतिदण्डशास्त्रे तयोरीक्षा तात्पर्यज्ञानं या च विविधा वार्ता कृषिवाणिज्यादिलक्षणा तदीक्षा प्रयोगज्ञानं वा "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणश्चतुर्थः" इत्यारभ्य "सर्वदेवयजनं विद्या" इत्यनेन यदुक्तं तस्य सर्वस्यानुकर्षणार्थश्चकारः यदेतदुक्तं तदेतदखिलं परमपुरुषस्य स्वात्मपूर्वकसमर्पणमर्पितुमुद्दिष्टं भवति. तर्हि निगमस्य ऋग्वेदादिसकलशास्त्रपठितस्य सत्यं यथार्थफलमिति मन्ये इत्यन्वयः ॥ २६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नेदं स्वमनीषोत्थं किन्तु सम्प्रदायतः प्राप्तत्वाच्छ्रद्धेयमित्याह, ज्ञानमिति । नरसखोऽनन्तसखः अनेन विशेषणेन सनकादिभ्य उपदिष्टमिदमिति ज्ञापितम्. किल शब्देन पुरातनत्वेन ग्राह्यत्वं दर्शयति ज्ञानाधिकारिणं आह, एकान्तिनामिति ॥ २७ ॥

तव कुतः प्राप्तमेतदत्राह, श्रुतमिति ॥ २८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वोक्तं तत्तद्रूपत्वमेवोपपादयति—परावरेष्विति, चतुष्केण । तेषु तेष्विव एव पर आत्मा सर्वेषां मूलस्वरूपो भगवान् स्वरूपभूताऽचिन्त्यतत्तच्छक्तिः । अत एवेश्वरो दुर्घटघटनासमर्थः अत एवाऽव्ययः । स्वेनैव तत्तद्भावेऽप्यधिकारी सन् स्वयमेव प्रत्यगात्मस्वरूपेण जीवरूपेण केषाञ्चित् तन्मात्रज्ञानानामीयते केषाञ्चित्तु ततोऽप्यधमज्ञानानां दृश्यरूपेण प्रधानरूपेण चेयते । तत्र जीवरूपेण व्यापकत्वेन निर्देश्यो भवति । प्रधानादिरूपेण तु व्याप्यरूपतयेत्यनेनेत्यर्थः । केषाञ्चित्तु अद्वैत ज्ञानिनां स एव परमेश्वरः अनिर्देश्यः सन्नविकल्पितो भेदमात्रशून्यश्च सन् केवलानुभवानन्दस्वरूप एवेयते नतु स्वरूपशक्तिमयैश्वर्ययुक्तः । कथं ? तत्राह, माययेति । तत् कृपया मायान्तर्द्धाने सम्यक् सत्यैवेयते । न तत् प्रकाशत इति भावः तस्यास्तच्छादकधर्मत्वमेव दर्शयति—गुणसर्गयेति । सत्वादि गुणविक्षेपिकयेत्यर्थः । ब्रह्मज्ञानिनामप्यस्ति सत्त्वगुण एवावरक इति भावः ॥ २१—२३ ॥

तस्मात् सर्वेष्वेव भूतेषु नत्वात्ममात्रसम्बन्धिषु दयां कुरुत. भगवत एवाधिष्ठानत्वात् । सौहृदमात्मीयबुद्धिं कुरुत ॥ २४ ॥

पूर्वानुसारेणैव भगवत्तोषस्य ब्रह्मसिद्धितोऽप्युत्कृष्टं फलमाह–तुष्टे चेति । अहो नश्वराणि फलानि तत्साधनान्यपि यत् सम्बन्धेनानश्वरत्वफलाय फलन्त इत्याह—धर्मार्थेति ॥ २५—२६ ॥

एतादृश ज्ञानस्य विरलत्वं तद्भक्तकृपैकलभ्यत्वञ्चाह—ज्ञानमिति । नरसख इति तत्र श्रीमन्नरस्य तद्भक्तवरस्य कृपागाहास्यं दर्शितं यत एवैकान्तिनामिति । साक्षात्तदुपदेशोऽपि तद्भक्तकृपापेक्षते, किमुतान्यदेवेति भावः ॥ २७ ॥

तत्रैव स्वस्य दर्शयति श्रुतमिति । ज्ञानं तत्प्रतिपादकं वाक्यं यदेव स्वल्पनुभवपर्य्यन्तं फलं तत्सहायत्वेन भागवतं धर्मञ्च श्रुतम्, तच्चशुद्धमेव नतु ज्ञानकर्मादिमिश्रम् ॥ २८—३० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नतु, स ज्ञायते चेदिदमित्थंकारेण निर्दिश्यतामित्यत आह–प्रत्यगात्मेति । प्रतीचां सर्वजीवानामात्मा परमात्मा तत्स्वरूपेण व्यापकः दृश्यञ्जगत् तद्रूपेण व्याप्य इत्येवं व्याप्यव्यापकनिर्देश्यः वस्तुतः स्वयं ह्यनिर्देश्यः अनिर्देश्योऽपि विकल्पितः उपासकभेदैर्ब्रह्म परमात्माभगवानित्येवं विकल्पविषयीकृतोऽपि केवल एकोऽनुभवात्मक आनन्द एव स्वरूपं यस्य सः एवं सर्वत्र स्वस्वरूपभूतैश्वर्येण प्रकटतेव विराजमानोऽपि मायया स्वाविद्यया हेतुना जीवैर्द्रष्टुमशक्यत्वादन्तर्हितैश्वर्य्य ईयते. कीदृश्या ? गुणानाम् इन्द्रियैरनुभूयमानानां शब्दादीनां सर्गः सृष्टिर्यतस्तयेति शब्दादय एवानुभाव्यन्ते न तु तत्रैव प्रति तया स्ववृत्या सन्नपीश्वरः ईश्वरं प्रतितया स्ववृत्या अविद्यया जीवदृष्टेरावरणात्तेन—

"दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते" ॥

इति भगवदुक्तेस्तद्भक्त्यैव मायातरणे सति स यथायोगं भक्तितारतम्येन निर्देश्योपि भवतीति भावः ॥ २२ ॥ २३ ॥

यतो भक्तिगम्य एव भगवान् साचभक्तिः सर्वभूतेषुदयासौहृदाभ्यां सुस्थिरानिर्विघ्ना भवत्यतस्ते एव विधत्ते तस्मादिति सौहृदं स्नेहश्च सर्वाण्यीमानि भूतानि भगवद्धक्तिमयत्वाद्भगवद्रूपाण्येव स्वरूपेणापि सर्वत्रैवैतेषु स मत्प्रभुर्विराजत एव श्रीमद्गुरुवैष्णवकृपया यदि मां भक्तिदेवी स्वीकरिष्यति तदा सोऽपि साक्षात् द्रष्टव्य इति बुद्ध्येति भावः यया दयया सौहृदेन च ॥ २४ ॥

ततश्च तस्मिंस्तुष्टे त्वयि धर्मादिभिः काङ्क्षितैः किम् ? न किमपि फलमित्यर्थः । ये गुणानां व्यतिकरात् परिणामात् इह जगति स्वत एव सिद्धाः अगुणेन मोक्षेण च किं यतः चरणयोः सारञ्जुषां सेवमानानाम् उपभोक्तादप्याधिक्येन गायतामिति चरणयोः कमलत्वं सारस्यसौरभ्यमाधुर्य्यादित्वं तत्सेविनां भ्रमरत्वमारोपितं भ्रमरत्वेन स्वाभाविकं कांक्षितान्तरशून्यत्वं व्यञ्जितम् ॥ २५ ॥

ननु, च धर्मादेरपुरुषार्थत्वे कथं त एव गुरुपुत्राभ्यां वेदोक्तत्वेनोक्तास्तत्राह—धर्मार्थ इति । ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्को दण्डनीतिश्च विविधा च वार्त्ता जीविका तदेतदखिलं निगमस्यैव सम्बन्धि वेदोक्तमेव मन्ये एव ननु, दूषयामि तादृशाधिकारिसम्मतत्वादिति भावः । सत्यं सद्भ्योहितं तु परमस्य पुंसः परमे पुंसि स्वात्मार्पणं स्वस्यात्मनस्तदीयत्वेनार्पणं श्रीस्वामिचरणास्तु तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति व्याचक्षते स्म ॥ २६ ॥

तेषां विश्वासार्थं गुरुसम्प्रदायमाह—ज्ञानमिति । यत्र नारदः श्रोता तत्र मादृशानां निकृष्टानां कुतोऽधिकार इति नाशङ्कनीयमित्याह, भगवता एकान्तभक्तानां यत्पादरजस्तेनाप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् न तूत्तमानामेवेति नियमः ॥ २७ ॥ २८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गुणसाम्ये प्रधाने च गुणव्यतिकरे महदादौ परः सर्वचेतनाचेतनविलक्षणस्वरूप ईयते भास्करत्वनियन्तृत्वादिना निश्चीयते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मा सर्वेषामात्मा मूलभूतः एको निरस्तसमानातिशयो भगवानेव. ननु, सर्वभूतत्वे सति तस्य विकारित्वं स्यान्नेत्याह, अव्ययः निर्विकारस्वरूपः विश्वं सृजतीति भावः ॥ २१ ॥

स्वरूपेण निर्विकारत्वं सर्वमूलत्वञ्चोपपादयति, प्रत्यगात्मस्वरूपेण "अणुर्ह्येष आत्मा चेतसा वेतसा वेदितव्य एषपरस्यांशः" इत्यादिश्रुतिप्रसिद्धजीवस्वरूपेण स्वांशेन अदृश्येन दृश्यरूपेण "देवात्मशक्तिं स्वगुणैर्निगूढाम्"इत्यादिश्रुतिप्रसिद्धशक्तिविकारेण च व्याप्यव्यापकानिर्देश्यः व्यष्टिसमष्टिकार्य रूपतया निर्देश्यः स्वयं तु अविकल्पितः स्वरूपतो व्यष्टिसमष्टिकार्यभावेन नैव निरूपितो ऽतोनिर्देश्यः परिणामित्वस्थूलत्वकृशत्वादि निर्देशानर्ह इत्यर्थः। यतःप्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया अनिर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्य इत्यादि व्याख्यातं तदयुक्तम् प्रत्यगात्माणुत्वप्रतिपादकश्रुतिविरोधात् प्रत्यगात्मनो भोक्तुर्व्यापकत्वे सति उत्क्रान्त्याद्यसंभवप्रसङ्गात् स्वर्गनरकगतसर्वशरीरविषयकसुखदुःखाद्यनुभवप्रसङ्गाच्च ॥ २२ ॥

सर्वेषु जीवेषु स एवोक्तलक्षणः परमेश्वरो वर्त्तते इत्याह—केवलानुभवानन्दस्वरूप इति । केवलो निरस्तसमानातिशयः अनुभवो ज्ञानं स चावासावानन्दश्च स्वरूपं यस्य सः गुणः गुणात्मकः संसारः सृज्यते इति सर्गः कार्यं यस्याः तया अन्तर्हितमावृतमैश्वर्यं ज्ञानं यस्य तस्मिन् जीवे जातावेकवचनं सर्वेषु जीवेषु ईयते "अन्तःप्रविष्टः शास्ता जनानाम्" इति श्रुतेर्ज्ञायते ॥ २३ ॥

यस्मादेवं तस्मादासुरं भावमुन्मुच्य सर्वेषु भूतेषु दयां सौहृदञ्च कुरुतएतदेव तद्भजनं भवतामनुरूपमिति भावः । ययैव अधोक्षजस्तुष्यति ॥ २४ ॥

तस्मिंस्तुष्टे सर्वं यद्यदिष्टं तदयाचितमेव लब्धं भविष्यति धर्मादिकस्यायत्नलभ्यस्य का कथाऽतिदुर्लभोमोक्षोपि न कामितव्यो निष्कामतया तद्ध्यानमेव कर्तव्यमित्युपदिशति, तुष्टे—चेति । तस्मिन् तुष्टे सति किमलभ्यं न किमपीत्यर्थः । एवं सति उपगायतां तद्गुणादिकीर्तननिष्ठानां चरणयोः सारं सौन्दर्यं जुषतां सेवमानानां तच्चरणध्यातॄणां नोऽस्माकं यदा अगुणेन प्राकृतगुणसम्बन्धरहितेन मोक्षेणाप्याकाङ्क्षितेन किं, न किमपि तदा गुणव्यतिकरात् प्रकृतिगुणपरिणामात् स्वसिद्धाः अयत्नलभ्याः अर्थात्संसारे भ्रमता जीवेन यत्र क्वचन लभ्याः एव ये धर्मादयः धर्मार्थकामाः तैराकांक्षितैः किं, न किमपीत्यर्थः हरिदासेन यदि भजनफलभूते मोक्षेपि आकाङ्क्षा न कार्या तर्हि धर्मादिषु कुत इति फलितोऽर्थः ॥ २५ ॥

ननु,वेदोक्तानि कर्मज्ञानाद्यात्मकानिबहूनि श्रेयस्साधनान्यनादृत्य चरणयोःसारं जुषामिति परमपुरुषचरणध्यानमेव कुतोमुख्यं श्रेयस्साधनं मन्यसे इत्यत्र सर्वस्य वेदोक्तसाधनजातस्य परमपुरुषचरध्यानाङ्गत्वान्न कस्याप्यनादर इत्याह, धर्मार्थेति । परमस्येति अधिकरणस्य शेषत्वविवक्षया षष्ठी परमे पुंसि अंशिनि आत्मनोऽशभूतस्य।ऐक्य परमपुरुषस्वरूपगुणचिन्तया नियोजनंप्रति निगमस्यार्थभूतं यदेतदखिलं धर्मादिकं श्रेयःसाधनं सत्यं मन्ये इत्यन्वयः। धर्मादीनां समाहारद्वंद्वे पुंस्त्वमार्षम्। धर्मादिरूपस्त्रिवर्गो योऽभिहितो वर्णितः ईक्षा आत्मानात्मपरमात्मस्वरूपगुणादिज्ञानम् त्रयी कर्मविद्या नयद्वमौ तर्को दण्डनीतिश्च विविधा वार्त्ता जीविकाः तत्र धर्मस्य हृदयशुद्धिद्वारा ज्ञानसाधनत्वं ज्ञानस्य ध्रुवास्मृतिपरभक्तियोगादिपदवाच्यपरध्यानसाधनत्वम्,अन्यस्य सर्वस्य जीवनद्वाराधर्मसाधनत्वमितिदिक् "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इतिसूत्रमत्रानुसन्धेयम् ॥ २६ ॥

यदन्यैर्दुरवापं तदेतज्ज्ञानम् नारदाय अस्मद्गुरवे नरसखो-नारायण आह उक्तवान् तदधुना एकान्तिनां मुमुक्षूणां भगवतः पादारविन्दरजसा आप्लुतदेहिनां स्यान्नान्येषाम् ॥ २७ ॥

विज्ञानेनाऽनुभवेन संयुतम् धर्मं धर्मरूपम् भागवतं भगवत्प्राप्तिसाधनम् एतज्ज्ञानं मया नारदाच्छ्रुतम् ॥ २८ ॥

भाषाटीका ।

स्वयं अनिर्देश्य और अविकल्पित जो ईश्वर है वही चेतनाचेन शरीर वाला होने से व्याप्य और व्यापक पने से निर्देश करने के योग्य है ॥ २२ ॥

वही केवलानुभव और आनन्द स्वरूप वाला होकर भी परमेश्वर है अर्थात् ईश्वरों का भी ईश्वर निरवधिक नियंता है परंच जीवों को मोहादि गुणों की सृष्टि करने वाली माया से अंतर्हित ऐश्वर्य प्रतीत होता है ॥ २३ ॥

हे दैत्य बालकों ! तस्मात् तुम लोग आसुर भाव को छोड़ कर सर्व प्राणियों पर दया करो और सौहृद रखो जिससे हरि प्रसन्न होवे ॥ २४ ॥

सब से आदि में होने बाला और जिसका अंत नहीं ऐसा जब ईश्वर प्रसन्न होजाय तब क्या अलभ्य है तथापि जो प्रारब्ध के आधीन धर्मादिक आपही सिद्ध हैं उन सब से क्या प्रयोजन हैं और चरण रजकी सेवा करने वाले और चरणों के गुण गान करने वाले हम लोगों को मोक्ष से भी क्या प्रयोजन है ॥२५॥

धर्म अर्थ और काम यह कथितजो त्रिवर्ग तथा आत्मविद्या और कर्मविद्या तर्क दण्डनीति और दो प्रकारकी जीविका यह सम्पूर्ण निगमअर्थ, जो परम सुहृद परमात्माको जो आत्म अर्पण करदेवेतो सर्व सत्य है, नहींतो असत्यही है ॥ २६ ॥

यह निर्मल और दुर्लभज्ञान नरके सखा श्रीमन्नारायणने नारद को दियाहा सो यह ज्ञान एकांती और भगवान के चरण कमलकी रजसे स्नान करने वाले अकिञ्चनमहात्माओं को होता है ॥ २७ ॥

मैने यह ज्ञान प्रथम देव दर्शन श्रीनारदजी के मुखसे सुना है और विज्ञान सहित शुद्धभागवत धर्म भी सुना है ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दैत्यपुत्रा ऊचुः ।

प्रह्लाद ! त्वं वयं चापि नर्त्तेऽन्यं विद्महे गुरुम् ।
एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥
बालस्यान्तःपुरुस्थस्य महत्सङ्गो दुरन्वयः ।
छिन्धि नः संशयं सौम्य ! स्याच्चेद्विश्रम्भकारणम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे प्रह्लादानुचरिते
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्रातिविस्मिताः पृच्छन्ति-प्रह्लादेति । हेप्रह्लाद ! त्वं वयमेताभ्यां शण्डामर्काभ्यामृते ऽन्यं गुरुं न विद्मः एतदागमनात्पूर्वमेवाहं नारदपार्श्वं गत इति चेत्तत्राऽऽहुः, बालानामप्यतिशिशूनामस्माकमेतावीश्वरौ नियन्तारावतस्तवान्यत्र गमनं न सम्भवति ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः—बालस्येति । दुरन्वयो दुर्घटः विश्रम्भकारणं विश्वासहेतुः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र विस्मिताः पृच्छन्ति दैत्यकुमाराः—प्रह्लादेति । हे प्रह्लाद ! त्वं वयश्चाप्येताभ्यां गुरुपुत्राभ्यामृते विनाऽन्यं गुरुं न विद्महे, एतदागमनात्पूर्वमेवाहं नारदपार्श्वं गत इत्यत्राहुः, बालानामपि शिशूनामपि सतामस्माकमेतावेवेश्वरौ नियन्तारौ अतस्तवान्यत्र गमनं न सम्भवतीति नः शङ्का वर्त्तत इत्यर्थः ॥ २९ ॥

नारद एवात्रागत इति न सम्भवतीत्याहुः—बालस्येति । अन्तःपुरस्थस्य बालस्य तव महतो नारदस्य सङ्गो दुरन्वयो दुर्घटः हे सौम्य, प्रह्लाद ! नोऽस्माकं संशयं छिन्धि अपनुद विस्रम्भकारणं विश्वासहेतुः स्याच्चेत् असम्भावितत्वेनाऽस्माभिरविश्वसनीयो नारदसङ्गमः त्वदुक्तस्तत्र यद्यस्माद्विश्वासहेतुरस्ति चेत्तदुपपादनपूर्वकं तत्सङ्गतिविषयं संशयं छिन्धीत्यर्थः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतस्मिन्नवसरे दैत्यपुत्राः प्रह्लादकथितार्थशङ्कया तं पृच्छन्तीत्याह—प्रह्लादेति । एताभ्यां गुरुपुत्राभ्यां शण्डामर्काभ्यामृते नान्यं गुरुं विद्महे यस्मात् किञ्च विज्ञानञ्चेश्वरविषयं विवक्षितं तदुपाधिनापि बालानामक्षराभ्यासनिरतानामस्माकमीश्वरो न कांक्षित इति यस्मात् अन्यगुर्वभावेऽपीश्वर उपदेष्टा स्यादतो वाह, बालानामिति । बालानामीश्वरोऽस्त्यपि किं नास्तिप्रतिपत्त्यभावात् ॥ २९ ॥

कस्मिंश्चिदवसरे देशान्तरेऽन्यगुरुसङ्गतिः किं न स्यादिति तत्राह, बालस्येति । तस्मादुत्पन्नं नः संशयं जहीत्यन्वयः तत्र कृत्यमाहुरित्याह, स्यादिति ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सविस्मयं पृच्छन्ति—प्रह्लादेति । एताभ्यामृतेऽन्यं गुरुं न विद्मः बालानामीश्वराविति त्वयाऽप्येतद्धस्तात् स्वमुन्मोच्य तत्पार्श्वे गन्तुमशक्यमिति भावः ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः, बालस्येति ॥ ३० ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
षष्ठोऽध्यायः सप्तमस्य सङ्गतः सङ्गतः सताम् ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे प्रह्लाद ! एताभ्याम् अन्यं ते गुरुं, वदसीति शेषः । वयन्तु न विद्महे न विद्मः एतावेव नो बालानामीश्वरौ गुरू अनयोर्भयादन्यत्र गमनासम्भवादिति भावः ॥ २९ ॥

नारदेन सह तव समागम इह न सम्भवतीत्याहुः, अन्तःपुरवासस्य महता नारदेन सह सङ्गमो दुरन्वय इति विस्रंभस्य विश्वासस्य कारणं मूलं स्यादस्ति चेत्तर्हि तद्वर्णनेन संशयं छिन्धि ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

दैत्यपुत्रा ऊचुः ।

दैत्यपुत्र बोले, कि—हे प्रह्लाद ! तुम और हम सब भी इन दोनो गुरुपुत्रों को छोड कर तीसरे किसी गुरू को जानते ही नही, क्योंकि ? हम लोगों के छोटी अवस्था से यही लोग शिक्षक हैं ॥ २९ ॥

और भीतर रानिवास में रहने वाले तुमको तौ महत्सङ्ग बहुत ही दुर्लभ है, हे सौम्य ! जो हम लोगों पर विश्वास हो ? तौ यह हमारा संशय दूर करो ॥ ३० ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, षष्ठ अध्याय की भागवताचार्यकृत भाषा टीका

समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ सप्तमोऽध्यायः ॥

नारद उवाच ।

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ।
उवाच स्मयमानांस्तान्स्मरन्मदनुभाषितम् ॥ १ ॥

प्रह्लाद उवाच ।

पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम् ।
युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ २ ॥
पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ।
पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥
तेषामतिबलोद्योगं निशम्यासुरयूथपाः ।
वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशम् ॥ ४ ॥
कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान् ।
नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥
व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः ।
इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥
नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ।
यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥
प्राह नैनां सुरपते ! नेतुमर्हस्यनागसम् ।
मुञ्च मुञ्च महाभाग ! सतीं परपरिग्रहम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितम् ।
प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥
अश्रावि नारदादेतन्मया गर्भे इतीरितुम् ।
तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥ २ ॥ १ ॥

अस्माकं पितरि हिरण्यकशिपौ स्वकृतेनैव पापेन पापोऽसावभक्षि भक्षित इति हर्षेण वदन्तो युद्धोद्यमं चक्रुः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

राज्ञः शिबिरमावासं व्यलुम्पन् सर्वस्वापहारेण नाशितवन्तः ॥ ६ ॥ ७ ॥

अनागसं निरपराधामेनां नेतुं मार्हसीति प्राह, ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यकुमारैरेवं पृष्टः प्रह्लादस्तत्सङ्गतिहेतुमुपपादयंस्तत्त्वत्रययाथात्म्योपदेशपूर्वकं सपरिकरं भगवद्भक्तियोगमुपदिष्टवानित्याह,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

भगवान्नारदः-एवमिति । एवम् इत्थं दैत्यसुतैः पृष्टो भागवतोत्तमः प्रह्लादस्तान्दैत्यपुत्रान्प्रति स्मयमानो मया नारदेनानुभाषितं स्मरन्नुवाच ॥ १ ॥

तदेवाह—पितरीत्यादिना, नाऽधुनाप्यजहात्स्मृतिरित्यन्तेन । अस्माकम् पितरि हिरण्यकशिपौ तपसे तपः कर्तुं मन्दराचलंप्रति प्रस्थिते प्रयाते सति इन्द्रादयो विबुधा देवाः दानवान्प्रति युद्धोद्यमं चक्रुः ॥ २ ॥

कथम्भूतास्सन्तः लोकोपतापनः लोकानां दुःखकारी पापः पापात्मा स्वपापेनैव दैवात्पिपीलिकैरहिः सर्प इव अभक्षि भक्षितः इति वादिनो वदन्तः सन्तः वासव इन्द्र आदिर्येषां ते युद्धोद्यमं चक्रुरिति पूर्वेणान्वयः ॥ ३ ॥

ततः किं जातम् ? तत्राह—तेषां वासवादीनां बलोद्योगं बलप्रयुक्तयुद्धोद्योगं निशाम्य दृष्ट्वा सुरैर्वध्यमाना अत एव भीताः सन्तोऽसुरयूथपाः सर्वे त्वरिताः सर्वतो दिशं दुद्रुवुः पलायितवन्तः ॥ ४ ॥

कथम्भूताः कलत्रादीन् नावेक्षमाणास्तेषु त्यक्तस्पृहा इत्यर्थः, तत्र हेतुः, सर्वे प्राणपरीप्सवः प्राणमात्रपरित्राणेच्छवः तत्र परिच्छदा भोगोपकरणानि ॥ ५ ॥

ततो जयशालिनोऽमरा देवाः राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुम्पन् सर्वस्वापहारेण नाशितवन्तः इन्द्रस्तु राज्ञो हिरण्यकशिपोर्भार्यां मम मातरमग्रहीत् ॥ ६ ॥

तांश्चेन्द्रेण नीयमानामत एव भयोद्विग्नां कम्पितां कुररीमिव क्रन्दन्तीं रुदतीं देवर्षिर्नारदो यदृच्छयोपगतः पथि ददर्श प्राह च ॥ ७ ॥

तदेवाह—हे सुरपते! अनागसं निरपराधामेनां नेतुं त्वं नार्हसि अतो हे महाभाग ! परेणाऽन्येन हिरण्यकशिपुना परिगृहीतां परदारानित्यर्थः, मुञ्च मुञ्च ॥ ८ ॥

तवोपभोक्तुं योग्या न भवतीत्याह—परपरिग्रहमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे नारदात् प्राप यज्ज्ञानं मातृगर्भगः ।
तदेवोपादिशद् बालान् भक्तिं प्रेम च तत्फलम् ॥

॥ १—५ ॥

राज्ञो हिरण्यकशिपोः शिबिरं आवासं व्यलुंपन् सर्वस्वापहारेण नाशितवन्तः ॥ ६—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विश्वासकारणं सप्तमे वर्ण्यते एवमुक्तरीत्या ॥ १ ॥

तपसे तपःकर्तुं मन्दराचलमस्माकं पितरि हिरण्यकशिपौ प्रस्थिते सति तत्रापि पिपीलिकैर्भक्षिते सति तदा वासवादयः पिपीलिकैरहिरिव लोकोपतापनः पापः पापेन अभक्षि भक्षित इति वदन्तो दानवान् प्रति युद्धोद्यमं चक्रुरिति द्वयोरन्वयः ॥ २ ॥ ३ ॥

अतिबलेन उद्योगं यत्नम् ॥ ४ ॥

नावेक्ष्यमाणाः तत्प्रतीक्षामकुर्वाणाः ॥ ५ ॥

राजशिबिरं राजस्थानम् व्यलुम्पन् सर्वस्वापहारेण शून्यं कृतवन्तः ॥ ६ ॥

यदृच्छया भाग्यवशात् ॥ ७ ॥

परपरिग्रहं परदारान् अनागसं नास्त्यागोऽपराधो यस्यास्ताम् एनां नेतुं मार्हसीति प्राह, ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतेषु सत्सु साधनानां भक्तेरेव प्राधान्यं हरेर्मुख्यप्रसादजनकत्वाद्भक्तिरेव पुरुषेणापाद्येत्यादिकं निरूप्यतेऽस्मिन्नध्याये, भक्तिप्रतिपादनात्मकत्वादस्य शास्त्रस्य पुनः पुनस्तत्प्रतिपादनान्न पुनरुक्तिशङ्का कार्या तत्र दैत्यपुत्रैः पृष्टः प्रह्लादः किं चकारेति युधिष्ठिरशङ्कान्वितस्तां परिहरन्नारद आह—नारद इति। नारदस्य ममाऽनुशासनम् ॥ १ ॥ २ ॥

अहिः सर्पः पिपीलिकैर्यथा भक्ष्यते तथा लोकोपतापनः पापो हिरण्यकशिपुः स्वपापेनाऽभक्षि नष्टप्रायोभूत् दिष्ट्या सुखमस्तु लोकायेमिति शुचाणाः "दिष्ट्या शमुपतोषश्च" इत्यमरः ॥ ३—५ ॥

व्यलुम्पन् जयकांक्षिणो जितयुद्धाः असुरजयेन प्रकाशमानाः ॥ ६ ॥ ७ ॥

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ।

नारद उवाच ॥

नारदजी बोले, कि-इस प्रकार दैत्य पुत्रों ने महा भागवत प्रह्लाद को जब पूंछा तब प्रह्लाद विस्मय को प्राप्त होनेवाले दैत्यपुत्रों के प्रति मेरे भाषण का स्मरण करता हुआ बोला ॥ १ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोला, कि हमारे पिता जब तप के लिये मन्दराचल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्द्र उवाच ।

आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ।
आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवींगतः ॥ ६ ॥

नारद उवाच ।

अयं निष्किल्बिषः साक्षान्महाभगवतो महान् ।
त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥
इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः ।
अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥
ततो नो मातरमृषिः समानीय निजाश्रमम् ।
आश्वास्येहोष्यतां वत्से ! यावत्ते भर्तुरागमः ॥ १२ ॥
तथेत्यवात्सीद्देवर्षेरन्ति साऽप्यकुतोभया ।
यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्त्तत ॥ १३ ॥
ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ।
अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥
ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ।
धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्म्मलम् ॥ १५ ॥
तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ।
ऋषिणाऽनुगृहीतं मां नाधुनाऽप्यजहात्स्मृतिः ॥ १६ ॥

भाषा टीका ।

को गये, तब देवताओं ने दानवों के प्रति युद्ध का बडा उद्यम किया ॥ २ ॥

और देवता लोग बोले, कि-भला भया सब लोकों को दुःख देने वाले पापी को उसी के पाप से सर्प के नाईं पिपीलिकाओं ने भक्षण करलिया ॥ ३ ॥

देवताओं की सेना का उद्योग देखकर असुर यूथप लोग भी भयभीत होकर ताडित हुए २ अपने २ स्त्री पुत्र मित्र आप्त लोकों को तथा गृह पशु और उपकरणादि को न देख कर बड़ी जल्दी सब दिशाओं को प्राण लेकर भाग गये ॥४-५॥

जीत की इच्छा वाले देवता लोगों ने भी राजा के निवास स्थान का भङ्ग कर दिया, और इन्द्र ने राजमहिषी मेरी माता को ग्रहण कर लिया ॥ ६ ॥

तब भय से उद्विग्न कुररी (पक्षिणी) के तरह रोनेवाली मेरी माता को इन्द्र ले चला, इतने में अकस्मात् उस मार्ग में आप हुए नारदजी दिखाई पडे ॥ ७ ॥

और नारद जी बोले, भी कि-हे सुरपते ! हे महाभाग ! तुम इस बिचारी निरपराधिनी पराई स्त्री को लेजाने के योग्य नहीं हौ, इस बिचारी सती को छोडो २ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अविषह्यं दुःसहम् अतोऽनबा प्रसवपर्यन्तमत्रास्यताम् तत आर्येस्य पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः ॥ ६ ॥

साक्षात्स्वगुणैरेव महान्न तु पित्रादिसम्बन्धात् त्वया हेतुभूतेन संस्थां मृत्युं न वाप्स्यति तत्र हेतवो निष्किल्विष इत्यादयः ॥ १० ॥

अनन्तस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एतां प्रदक्षिणीकृत्य ॥ ११ ॥

इहोष्यतामित्याहेति शेषः ॥ १२ ॥

अन्ति समीपे ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्तर्वत्नी गर्भिणी इच्छया भर्त्तुरागमनानन्तरं प्रसूतये एवमपि स्वगर्भस्य क्षेमाय ॥ १४ ॥

तस्याः शोकशान्त्यै धर्मस्य तत्त्वं भक्तिलक्षणम् ज्ञानमात्मानात्मविवेकस्तदुभयं प्रादात् ईश्वरः समर्थः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युक्त आहेन्द्रः—आस्त इति। अस्याः जठरे कुक्षावविषह्यमस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोः वीर्यं गर्भरूपेण वर्द्धमानमास्ते तिष्ठत्यतोऽनया प्रसवपर्यन्तमास्यताम् मत्समीपे स्थीयतां ततश्चार्थस्य पदवीं मार्गं गतस्सन् मोक्ष्ये जातं पुत्रं हत्वा एतां त्यजामीत्यर्थः ॥ ९ ॥

एवमुक्तो देवर्षिराह–सोयमिति । सोयं गर्भस्थः शिशुस्त्वया हंत्रा संस्थां मरणं न प्राप्स्यते. तत्र हेतुं वदन् तमिमं विशिनष्टि, निष्किल्बिषः मरणनिमित्तप्राचीनकिल्बिषरहितः, तत्कुतः ? महाभागवतः भगवद्भक्त्यैव ध्वस्तकिल्बिष इति भावः । महागुणैः श्रेष्ठः अनन्तस्य भगवतोऽनुचरः बली महाबलसम्पन्नः यद्यपि गर्भस्थदशायां स्वानुग्रहात्पूर्वं न भागवतत्वादयो धर्मास्तथापि समनन्तरमेव स्वेनानुग्रहीष्यमाणस्य पुनर्जन्मकाले "जायमानं हि पुरुषं यं पश्येत्" इत्युक्तरीत्या भगवतेक्षिष्यमाणस्य उक्तधर्मान्वय इत्यभिप्रायेण निष्किल्बिष इत्यादीनि विशेषणान्युक्तानि । ननु, इन्द्रेण मुक्तांप्रति स्वोपदेशे सति तद्गर्भस्थस्योक्तधर्मसम्पत्तिः तस्य तद्धर्मसम्पत्तौ हि तद्धेतुकस्तत्त्याग इतीतरेतराश्रयत्वमिति कथं देवर्षिणोऽस्मुक्तमिति चेन्नैवं गर्भस्थं नितरामीश्वरकटाक्षविषयमत एव—

"ईश्वरस्य च सौहार्दं यदृच्छा सुकृतं तथा ।
विष्णोः कटाक्ष अद्वेष आनुकूल्यं च सात्विकैः ॥
संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः" ।

इत्युक्तहेतुषट्कसम्पन्नं दैवशो देवर्षिरालक्ष्य त्वयैतस्यामनुरुध्यमानायामप्यहमुक्तधर्मेषु नूनं करवाणयतोऽयं त्वया संस्थां न प्राप्स्यतीत्युक्तवानिति नेतरेतराश्रयः ॥ १० ॥

इतीत्थमुक्त इन्द्रो देवर्षेर्नारदस्य वचो मानयन् गौरवादभ्युपगच्छन् तां राजमहिषीं विहाय अनन्तस्य भगवतः प्रियो योऽहं तस्य मम भक्त्या एतां मन्मातरं परिक्रम्य प्रदक्षिणीकृत्य दिवं प्रति ययौ ॥ ११ ॥

ततः ऋषिर्नारदः मम मातरं स्वाश्रमंप्रति समानीय सम्यगाश्वासेन उन्नीय गमयित्वा आश्वास्य सांत्वयित्वा हे वत्से, बाले ! तव भर्तुर्यावदागमः तावत्पर्यन्तं त्वया इहास्मिन्मदाश्रमे उष्यतां स्थीयतामित्युवाचेति शेषः ॥ १२ ॥

ततस्तथेत्यङ्गीकृत्य सा मन्माता देवर्षेरान्तिके समीपे नास्ति कुतोऽपि भयं यस्यास्तादृशी अवात्सीदुषितवती ॥ दैत्यपतिरुग्रात्तपसो यावन्नन्यवर्तत तावत्सती मन्माता अन्तर्वत्नी गर्भिणी स्वगर्भस्य क्षेमाय स्वयाथेच्छया स्वभर्तुरागमनानन्तरं प्रसूतये च परमया भक्त्या ऋषिं नारदं पर्यचरत् शुश्रूषितवती ॥ १३ ॥ १४ ॥

ततस्तां देवर्षिरनुजग्राहेत्याह–ऋषिरिति । ईश्वरः समर्थ ऋषिः तस्याः परिचरन्त्याः मन्मातुर्मामप्युद्दिश्य निर्मलं धर्मस्य तत्त्वं ज्ञानञ्चेत्युभयं प्रादात् धर्मो भगवद्भक्तियोगलक्षणः तस्य तत्त्वं याथात्म्यं तदङ्गभूतं ज्ञानं देहविविक्तप्रत्यगात्मयाथात्म्यज्ञानं च प्रादात् उपदिष्टवान् इत्यर्थः ॥ १५ ॥

तद्दशायामुपदिष्टं तदुभयं मम मातुः स्त्रीत्वात् कालस्य दीर्घत्वाच्च तिरोदधे, विस्मृतमभूदित्यर्थः । ऋषिणा भगवता नारदेनाऽनुगृहीतं मां तु सा स्मृतिस्तदुपदेशजनितं स्मृत्यात्मकं ज्ञानमधुनापि नाजहात् न तत्याज ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुरद्विषो हिरण्यकशिपोर्वीर्यं रेतोलक्षणम् अस्या यावत्प्रसवः तावन्मम वशे आस्यतां पश्चादहं मोक्ष्ये ततःपूर्वं कस्मान्नमुञ्चसीति तत्राह, अर्थपदवीमिति ॥ ९ ॥

अनया प्रसूतः पुत्रो हन्तुं त्वया न शक्यत इत्याह, न त्वयेति । संस्थां मरणं कुतोऽत्राह, अनन्तेति ॥ १० ॥

अनन्तप्रियः श्रीनारायणो अस्य भक्त्या अनन्तस्य हरेः प्रिया बहुमानलक्षणा भक्तिरनन्तप्रिया भक्तिस्तया वा ॥ ११ ॥

तावदत्रोष्यतामित्याह—यावदिति ॥ १२ ॥

अन्त्यान्तिके ॥ १३ ॥

अन्तर्वत्नी गर्भिणी ॥ १४ ॥

गर्भक्षेममिच्छाप्रसवञ्चेत्युभयम्. ईश्वरो वरप्रदानसमर्थः नारदाच्छ्रुतमित्यनेन नारदस्य मद्गुरुत्वमभिप्रेतमेवंविधमित्याह–धर्मस्येति । धर्मस्य हरेर्भागवतसंज्ञस्य वा तत्त्वं तदुभयविधज्ञानं च यद्गर्भस्थं मामुद्दिश्य मात्रे उपदिष्टम् ॥ १५ ॥

तदुभयं तयोः कालस्यातिक्रान्तत्वात् स्त्रीत्वात् शब्दादिविषयलौल्याच्च मातुस्तिरोहितमभूदित्यन्वयः " अणुरेषधर्मः" इति श्रुतिः । धर्मो हरिस्ततस्तव किमभूदिति तत्राह, ऋषिणेति ॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनन्तानुचर इति । तस्य पूर्वत एव भक्तिसंस्कारो दर्शितः ॥ १०—१४ ॥

ऋषिरिति । शोकमात्रशान्त्यै धर्मस्य तत्त्वं साधारणस्वरूपं ज्ञानञ्चात्मविषयं प्रादात् तत्रैव मामप्युद्दिश्य निर्मलं यद्धर्मस्यैतस्य तत्त्वं भागवताख्यम् "न शोभते ज्ञानमलं निरञ्जनम्" इति न्यायेन ज्ञानञ्च यत्तदाख्यं तत् प्रादात् तत्कथने तत्तदपि प्रतिपादितवान् । किन्तु सा गृहीतुं न शशाकेति भावः ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतामपि भूयान्मे यदि श्रद्दधते वचः।
वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥
जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः।
फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्रिवेति तदपीत्यर्थः। तेनैव स्वमातरि श्रीनारदस्य सम्यगनुग्रहो नाभूदिति व्यञ्जितम् ॥ १६—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आस्यतां भर्त्कारागार एव प्रसवपर्यन्तमनया स्थीयतां अर्थपदवीं स्वार्थमार्गं गतः प्राप्तस्सन् मोक्ष्ये जातं पुत्रं हत्वा इमां मोक्ष्यामीत्यर्थः ॥ ९ ॥

त्वया हेतुभूतेन संस्थां मृत्युम् ॥ १० ॥

अनन्तप्रिये मयि या भक्तिस्तया हेतुना परिक्रम्य एतद्गर्भस्थाय हरेर्भक्ताय नम इति प्रणम्य च ॥ ११ ॥ १२ ॥

अन्ति अन्तिके ॥ १३ ॥

भर्त्तुरागमनानन्तरमेव वा इच्छयाप्रसूतिस्तस्यै ॥ १४ ॥

उभयं गर्भस्थेमं स्वेच्छाप्रसवं च निर्मलमिति विशेषणात् धर्मस्य तत्त्वं भक्तियोगं भागवतस्समतं ज्ञानञ्च मामपीत्यपिकारेण मन्मातरमपि ॥ १५ ॥

तर्हि मातुस्ते भक्तिः कथं न दृश्यत इत्यत आह—तत्त्विति। तथापि बालत्वात् कालदैर्घ्याच्च कथं न तिरोदधे तत्राह, ऋषियोति। तेन मन्मातुस्तदननुगृहीतत्वाभावात् स्त्रीत्वकालदैर्घ्ये तत्रप्राभूतामिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सुरद्विषो हिरण्यकशिपोः। अविषह्यं दुस्सहं वीर्यमस्याःजठरे आस्ते अतः अनया यावत्प्रसवमास्यतां ततश्चार्थपदवीं गतस्तमविषह्यं हत्वा एनां मोक्ष्ये ॥ ९ ॥

अतोऽयमनन्तानुचरः अतो महान्बली साक्षान्महाभागवतः अतस्त्वया संस्थां न प्राप्स्यते ॥ १० ॥

अनन्तप्रियस्य मम भक्त्या एनां परिक्रम्य तां तथाभूतां सत्कृतां विहाय ययौ ॥ ११ ॥

इहास्मिन् आश्रमे त्वयोष्यतां स्थीयताम् ॥ १२ ॥

नास्ति कुतोपि भयं यस्याः सा अन्ति निकटे ॥ १३ ॥

इच्छया स्वच्छन्देन प्रसूतये तत्रापि गर्भस्य क्षेमाय ॥ १४ ॥

धर्मस्य हरिसकेस्तत्त्वं याथात्म्यं तत्साधनं हरिज्ञानञ्चेत्युभयं मामप्युद्दिश्य तस्याः प्रादात् ॥ १५ ॥

तत्तु तदुभयं तिरोदधे सूक्ष्मतां जातम् ॥ १६ ॥

भाषा टीका।

इन्द्र उवाच ॥

इन्द्र बोला, कि—इसके जठर में सुरद्वेषी हिरण्यकशिपु का असह्य वीर्य है, इस लिये जब तक इसके संतान पैदा होगी तब तक रहने दीजिये पीछे उत्पन्न हुए पुत्र को मार कर इसे छोड़ दूंगा ॥ ९ ॥

नारद उवाच ॥

नारदजी बोले, कि—इसके गर्भ में जो बालक है वह निष्पाप है और साक्षात् महा भागवत है वह तेरे से नहीं मरेगा, क्योंकि ? वह अनंत भगवान का अनुचर है और बली है ॥ १० ॥

ऐसे जब कहा तब देवर्षि का वाक्य मान कर मेरी मा को छोड़कर मुझे अनंत प्रियजान मेरी भक्ति से माता की परिक्रमा कर स्वर्ग को चला गया ॥ ११ ॥

तत्पश्चात् ऋषि मेरी माता को अपने आश्रम में लाकर आश्वासन कर बोले, कि—हे वत्से! जबतक तुमारा पति न आवे तब तक यहां निवास करो ॥ १२ ॥

ठीकहै, ऐसा कहकर मेरी माताभी जबतक दैत्यपति घोरतप से नहीं निवृत्त हुआ तबतक ऋषिके आश्रममें निर्भय होकर रही ॥ १३ ॥

उस आश्रम में गर्भवती सती मेरी माता अपने भर्त्ता के आगमन के अनंतर प्रसव की इच्छा से ऋषि की परिचर्या करने लगी ॥ १४ ॥

परम दयालु समर्थ ऋषि श्रीनारदजी ने उसकी शोक शांति के लिये मेरे उद्देश्य करके भक्ति और ज्ञान दोनों दिये ॥ १५ ॥

बहुत कालहोने से वह स्त्री के कारण मेरी माता को भूलगया ऋषि के अनुग्रह से मुझ को अबपर्यंत भी नहीं भूला ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भूयाच्चेत् वैशारदी स्वार्थे तद्धितः बेहायहङ्कारच्छेदनिपुणेत्यर्थः ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः(१) स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ।
अहम्ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥
स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥
अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ।
विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥
देहस्तु सर्वसङ्घातो जगत्तस्थुरिति द्विधा ।
अत्रैव मृग्यः पुरुषो नेतिनेतीत्यतत्त्यजन् ॥ २३ ॥
अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना ।
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

काऽसौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह—जन्मेति दशभिः । जन्माद्या जायते अस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवम्भूता इमे षड्भावविकारा वृक्षे सत्येव यथा फलानां दृश्यन्ते तद्वदात्मनि तथैव स्थिते देहस्य द्रष्टा इत्यर्थः ईश्वरी विकारसमर्था मूर्तिर्यस्य तेन ॥ १८ ॥

तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शित इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहङ्कारादिकं त्याजयति—आत्मेति । आत्मा नित्यः "अविनाशी वारेऽयमात्मा" इति श्रुतेः, अव्ययोऽपक्षयशून्यः "ऋचो अक्षरे परमे व्योमान्" इति श्रुतेः, शुद्धः "निरवद्यं निरञ्जनम्" इतिश्रुतेः, एकः "एकमेवाद्वितीयम्" इति श्रुतेः, क्षेत्रज्ञः "विज्ञातारमरेकेन विजानीयात्" इति श्रुतेः, आश्रयः "यस्मिन्द्यौः पृथिवी चान्तरिक्षम्" इतिश्रुतेः, अविक्रियः 'निष्कलं निष्क्रियं शान्तम्' इतिश्रुतेः स्वदृक् "आत्मज्योतिः सम्राडिति होवाच" इति श्रुतेः, हेतुः "स इमाँल्लोकानसृजत्" इतिश्रुतेः "व्यापकः "सत्यं ज्ञानमनन्तम्" इतिश्रुतेः असङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः, अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

एतैर्द्वादशभिरात्मनो लक्षणैः परैः श्रेष्ठैर्विवेकसमर्थैर्देहाद्भेदं विद्वानसद्भावं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥

नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्याद्यतोऽहङ्कारादिकं त्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टान्तमाह—स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्ध्मा-द्युपायैस्तदभिज्ञ उपायाऽभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् । आत्मयोगैरात्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मताम् अध्यात्मविदात्माधिकृतकार्यकारणसंघातज्ञाता ॥ २१ ॥

अध्यात्मविवेकमात्मप्राप्त्युपायमाह—अष्टाविति त्रिभिः । मूलप्रकृतिर्महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ, त्रयः सत्त्वादयस्ते च प्रकृतिगुणा एव, न तु भिन्नाः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः । एकत्वे हेतुः, एषु साक्षित्वेनान्वयात्. तदुक्तम् "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति ॥ २२ ॥

जगज्जङ्गमम् तस्थुः स्थावरम् अत्रैव सर्वसङ्घातात्मके देह एव पुरुषो मृग्योऽन्वेष्टव्यः सुशकश्चैतदित्याह, नेतिनेतीत्यन्यापोहे क्रियमाणे स्वयमेवातत्त्यजन् अनात्मवर्गात्पृथगुपलभ्यमान इत्यर्थः ॥ २३ ॥

मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैकव्यतिरेकश्च तयोर्द्वैक्यम्, तेन यो विवेकः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थिति संहारैः "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्युक्तसर्गाद्यनुसन्धानेनेत्यर्थः । विमृशद्भिर्विचारयद्भिः असत्वरैरव्यग्रैर्मृग्य इति पूर्वेणान्वयः ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवम् "प्रह्लाद त्वम्" इत्यादिना यद्दैत्यकुमारैः पृष्टं तस्योत्तरमुक्तम्. अथैतत्सत्संप्रदायागतधर्मस्वरूपज्ञानजिघृक्षा वर्त्तते चेद्भवतां मदनुग्रहेण तदुभयं सम्पत्स्यत इत्याह—भवतामिति । यदि भवन्तो मद्वचः श्रद्दधते मदुक्तार्थग्रहणतदूढीकारविषये त्वरायुक्ताश्चेद्भवतामपि तदुभयं भूयात् श्रद्धामन्तरेणोपदिष्टमपि तत्त्वम्

(१) स्वदृग्वदयः इति विजयध्वजपाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

न प्रतिष्ठितं भवतीत्याह–वैशारदीति । वैशारदी निपुणतरा धीः तत्त्वविषया बुद्धिः स्त्रीणां बालानाञ्च श्रद्धात एव भूयान्न तु तां विनेत्यर्थः । तत्र दृष्टान्तः, मे यथेति. यथा श्रद्धावतः मम वैशारदी बुद्धिरभूच्छ्रद्धारहिताया मन्मातुर्नाभूत् एवं सर्वेषां बालानां स्त्रीणां च श्रद्धात एव ज्ञानं प्रतिष्ठितं भवत्यन्यथा मन्मातुरिवाप्रतिष्ठितमित्यर्थः ॥ १७ ॥

तदेवं तेषां श्रद्धामुत्पाद्य श्रद्धायुक्तान् शुश्रूषून्दैत्यकुमारानालक्ष्य, तेभ्यो भगवद्भक्तियोगमुपदिदिक्षुस्तावत्तदङ्गभूतप्रकृतिवियुक्तात्मयाथात्म्यज्ञानयोगमुपदिशति,जन्माद्याइत्यादिना । तावज्जीवात्मस्वरूपं देहाद्विलक्षणं विवक्षुर्देहधर्मानाह–जन्माद्या इति । ईश्वरी गुणपरिणामापादनसमर्था मूर्तिराकारो यस्य तेन कालेन निमित्तभूतेन "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति" इत्येवं रूपा इमे षड्भावविकाराः दृष्टाः प्रत्यक्षमुपलभ्यमानाः देहस्यैव धर्माः नात्मनः यथा वृक्षे सत्येव फलानां जन्मादयो दृश्यन्ते न वृक्षस्य तद्वदात्मन्येकरूपत्वेनैवावस्थितेऽस्य देहस्य द्रष्टा इत्यर्थः । आत्मव्यतिरिक्तस्य स्थिरस्यैकरूपस्य वस्तुनोऽभावात्कथंचित्प्रदर्शनार्थमस्थिरः षड्भावविकारवानपि वृक्षस्था आत्मस्थानीयत्वेन दर्शितः ॥ १८ ॥

तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शितः । अथ स्वधर्मैरेवात्मनो देहाद्भेदमाह–आत्मेति । आत्मेति विशेष्यनिर्देशः आत्मा प्रत्यगात्मा नित्यः उत्पत्तिविनाशरहितः अव्ययः अपक्षयरहितः अविक्रियः अवशिष्टभावत्रयरहितः यद्यपि'द्रष्टा देहस्य नात्मनः'इत्यनेनैव षड्भावविकारराहित्यमुक्तम्, तथापि फलानामिव वृक्षस्येति दृष्टान्तबलाद्यथा फलगतोत्पत्त्याद्यनाश्रयस्यापि वृक्षस्य स्वगतोत्पत्त्याद्याश्रयत्वम् एवं देहगतोत्पत्त्याद्याश्रयत्वाभावेऽपि स्वगतोत्पत्त्याद्यन्तराश्रयत्वं प्रसक्तं तदनेन निषिध्यते एवञ्च स्वतोऽन्यतो वा षड्भावविकाररहित इति फलितम्. शुद्धः प्राकृतरागादिगुणैरकलुषितस्वरूपः एकः ज्ञानैकाकारतया सर्वेषु देहेष्वेकरूपः 'एकोव्रीहिः' इतिवज्जात्यभिप्रायक एकत्वव्यपदेशः न तु व्यक्त्यैकत्वाभिप्रायकः आत्मव्यक्तिबहुत्वस्य बहुप्रमाणप्रतिपन्नत्वात् क्षेत्रं शरीरं जानातीति तथा ममेदं शरीरमिति जानन्नित्यर्थः अनेन ज्ञानाश्रयत्वमुक्तम् स्वदृक् स्वं पश्यतीति स्वदृक् स्वस्मै भासमानः अनेन ज्ञानस्वरूपत्वमुक्तम् आश्रयः देहेन्द्रियादीनामाधारो हेतुर्देहेन्द्रियाणां व्यापारहेतुः व्यापकः धर्मभूतज्ञानेन व्यापक-स्वरूपस्याणुत्वात् असङ्गी जीवान्तरेण सम्बन्धरहितः अनावृतः स्वरूपस्वभावतिरोधानरहितः इदं मुक्त्यवस्थं स्वाभाविकं जीवात्मस्वरूपम्, यद्वा, अनावृतः स्वरूपतिरोधानरहितः बद्धदशायामपि धर्मभूतज्ञानस्यैव कर्मणा तिरोहितत्वात् देहस्त्वनित्यः व्ययवानशुद्धः देवमनुष्यादिरूपेण नानाविधः ज्ञानाऽनाश्रयोऽन्येषां यावत्सत्तमनाश्रयः विरागहेतुर्व्याप्यः पितृपुत्रत्वादिसम्बन्धवान् संकोचभाक्चेति भावः ॥ १९ ॥

अस्त्वेवं देहात्मनः परस्परवैधर्म्यं ततः किमत आह–एतैरिति । विद्वानित्थं देहात्मनोर्याथात्म्यविदेतैरुक्तैर्द्वादशभिरात्मनो लक्षणैः परैः उत्कृष्टत्वापादकैर्देहादौ आदिशब्देन देहानुबन्धिपुत्रादिसङ्ग्रहः अहं ममेत्यसदभिमानं मोहजमज्ञानजं त्यजेत्. देहात्माभिमानादिकं त्यक्त्वोक्तलक्षणलक्षितात्मस्वरूपावलोकनपरो भवेदिति भावः॥२०॥

ततोपि किमत आह–स्वर्णमिति । यथा हेमकारस्तदभिज्ञो हेमप्रकृतीनां ग्राव्णामभिज्ञः प्रथमं क्षेत्रेषु हेमग्राव्णामुत्पत्तिभूमिषु योगैरन्वेषणादिभिरुपायैराप्नुयात्, ग्राव्ण इति शेषः । विभक्तिविपरिणामेनानुषङ्गो वा पश्चाद्दहनादिभिरुपायैः ग्रावसु हेम आप्नुयात् एवं देहरूपेषु क्षेत्रेष्वात्मयोगैर्देहविलक्षणात्मयाथात्म्यविवेचनसाधनैरुपायैरात्मवित् उक्तविधात्मयाथात्म्यदर्शी पश्चात् ब्राह्मणः स्वरूपेण गुणैश्च निरतिशयबृहतः पुरुषोत्तमस्य गतिमवगतिं तद्याथात्म्यज्ञानं लभेत प्राप्नुयात् यथावस्थिततत्साक्षात्कारं लभेतेति यावत् ॥ २१ ॥

एवं ज्ञानयोगस्य भगवत्साक्षात्कारावहभक्तियोगाङ्गत्वमुक्तम् 'एतैर्द्वादशभिः'इत्यादिनोक्तासद्भावत्यागप्रकारम्,"क्षेत्रेषु देहेषु तथात्मयोगैः"इत्युक्तमेव देहविलक्षणात्मस्वरूपविमर्शनं च सप्रकारं प्रपञ्चयति, अष्टावित्यादिभिः पञ्चभिः । तावदष्टौ प्रकृतयः–

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" ॥

इत्युक्तरीत्या उक्ता अष्टौ प्रकृतय अत्र भूम्यादिशब्दैः गन्धादितन्मात्रसहितानि पृथिव्यादीन्युच्यन्ते बुद्धिशब्देन महत्तत्त्वं त्रयः सत्त्वादयस्तद्गुणा एव प्रकृतिगुणा एव नत्वात्मनो गुणाः षोडश विकारा विकृतयः तेच कर्मज्ञानोभयेन्द्रियाणि दश पञ्चप्राणाः बुद्धिश्चित्तं वा एकं संभूय षोडश आचार्यैः गीताचार्यादिभिः प्रोक्ताः पुमानेक एकस्मिन् शरीरे एकः पुमान् जीवः प्रोक्तः कुतः ? समन्वयात्. एवमेव हि प्रतिशरीरं नियमेन सुखदुःखप्रतिसन्धानजीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वादिव्यवस्थायाः समन्वयादुपपत्तिरिति भावः । सर्वशरीरेषु जीवैकत्वे उक्तविधा व्यवस्था दुर्घटा स्यादिति भावः ॥ २२ ॥

देहस्तु सर्वसङ्घातः प्रकृतिविकृतिसर्वसङ्घातात्मकः स च जगज्जङ्गमस्तस्थु स्थावरश्चेति द्विविधः एवं वस्तुस्थितिरिति भावः । अस्त्वेवं वस्तुतस्यात्मविवेचनस्य किमायातं ? तत्राह–अत्रैवेति । अत्रैव देहएव पुरुषः प्रत्यगात्मा मृग्यः विवेचनीयः कथं किं कुर्वन्, नेतिनेतीति, इति शब्दः प्रत्यक्षदृष्टप्रकारद्योतकः इति नेति एवंविधो न भवति गन्धवान् भवति रसवान् भवति रूपवान् भवतीत्येवं प्रकारेणेत्यर्थः । अतत् आत्मव्यतिरिक्तं यद्यत्पृथिव्यादिवस्तु तत् त्यजन् तस्मिन्नात्मबुद्धिमकुर्वन् तद्विलक्षण आत्मान्वेषणीय इत्यर्थः । अनेन "अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत्" इत्युक्तं विवृतं भवति ॥ २३ ॥

"तथात्मयोगैः" इत्युक्तानात्मयोगान्विवृण्वन् तैर्मृग्यते इत्याह–अन्वयेति. अन्वयव्यतिरेकेणान्वयेन व्यतिरेकेण चाहं जानामीच्छामि द्वेष्मीत्येवं बुद्धीच्छादीनां ज्ञानरूपाणां ज्ञातर्यहमर्थे एवान्वयेन व्यतिरेकेण मम शिरः पाणिः पाद इति सर्वावयवेभ्यो व्यतिरेकप्रतीत्या चेत्येवंरूपेण विवेकेनानात्मनो विभागेन उशता निर्मूलेनात्मनाऽहं ममेति प्रतीयमानेनात्मनाऽहंप्रतीत्या चेत्यर्थः । सर्गस्थानसमाम्नायैः सर्गस्थित्यादिपरवेदान्तवाक्यार्थानुसन्धानैरेतैरुपायैर्देहादिभ्यः परमात्मानं विमृशद्भिरसत्वरैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अव्यग्रचित्तैः पुंभिरात्मा मृग्य इतिपूर्वेणान्वयः "सन्मूलाः सौम्येमाः सर्वाः प्रजाः" इत्यादि सर्गस्थानादिसमाम्नायार्थानुसन्धानैरित्युक्तेऽन्वयव्यतिरेकाभ्यामात्मविमर्शनोपायाः परमात्मशेषत्वतच्छरीरत्वादयोऽवगता भवन्तीत्यभिप्रायेण सर्गस्थानसमाम्नायैरित्युक्तम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली !

ततोऽस्माकं किं प्रयोजनमिति तत्राह—भवतामपीति । यथा मे वैशारदी धीः भगवद्विषयज्ञानमभूत्तथा तर्हि भवतामपि भूयादित्यन्वयः । न केवलं युष्माकमेव, स्त्रीणां बालानाञ्च श्रद्धादित्याह—श्रद्धात इति । यदि स्त्रीबालानां श्रद्धास्यादततस्तत्स्यादित्याह—श्रद्धात इति । यदि स्त्रीबालानां श्रद्धास्यादतस्तर्हि तेषामिति ॥ १७ ॥

प्रह्लादस्तेषां स्ववचसि श्रद्धामुत्पाद्य नारदोक्तं ज्ञानमुपदिशति–जन्माद्या इति ।" जातः कंसवधार्थाय भूभारहरणाय च" "जनितो तद्विष्णोः" इत्यादिषु हरेर्जन्मादिकं प्रतीयते तत्र जन्मादिमतो हरेरितरवद्भंगशरीरस्थस्य तच्छरीरयोग्यभोगप्राप्त्या व्याकुलचित्तस्य सर्वसमर्पणानुगुणफलदानं कथं घटत इत्यादि शङ्कां दैत्यपुत्रचित्तस्थां परिहरन्नित्यतो वाह–जन्माद्या इति । इमे षड्भावा जन्मास्तिवृद्धिपरिणामापक्षयविनाशाख्यविकारा देहस्य दृष्टाः प्रत्यक्षेण प्रमिता आत्मनः परमात्मनो न सन्तीत्यन्वयः "षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु" इत्यनेन निरस्तत्वात्. दृष्टाः इत्युक्तं स्पष्टयति, फलानामिति । वसन्ताद्यवयवविशेषेण कालेन वृक्षस्य चूतादिफलानां जन्मादिकं दृश्यते यथा वृक्षस्य कालाधीनत्वं तथा देहस्येश्वराधीनत्वमिति ज्ञापनायेश्वरमूर्तिनेत्युक्तं देवदत्तस्य सर्वमिदम्मदधीनमिति मिथ्याज्ञाननिरासायोक्तमिदं तात्पर्यमिति ज्ञातव्यं तदुक्तम् "तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेत्" इति ॥ १८ ॥

"क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः" इत्युक्तेरात्मा जीवः किं नस्यादित्यतस्तन्निवर्तकलक्षणमाह—आत्मेति । परैरव्याप्त्यादिदोषरहितैरेतैर्द्वादशभिरात्मनो हरेर्लक्षणैः स्वरूपभूतैरुपेत इति, विद्वानहं ममेत्यनन्द्वावमतत्वं मोहजमज्ञानजं देहादौ त्यजेदित्यन्वयः । नित्यः स्वरूपतो विनाशरहितः अव्ययो विद्यते नास्तीत्यन्वयः प्रकृतिनिर्मितशरीरत्वेनाविद्यारागादिदोषविधुरत्वाच्छुद्धः एको मुख्यः मुख्यत्वं हरेरेव स्वरूपज्ञानेन क्षेत्राख्यशरीरज्ञातृत्वात् स क्षेत्रज्ञः आश्रय उपजीव्यः अविक्रियः स्वतः परतो वा परिणामरहितः स्वमात्मानं स्वयमेव पश्यतीति स्वदृक् "तद्ब्रह्मवेदाहंब्रह्मास्मि" इतिश्रुतिप्रसिद्धोऽपराधीनः स्वतंत्र इति यावत् वशं यापयति सर्वमितिवा व्यापकोऽन्तर्बहिरितिशेषः " आकाशो नीलिमोदे" तिश्रुतेः भूताकाशस्य परिच्छिन्नत्वादव्याकृतस्य चित्प्रकृत्यात्मकत्वेन भगवदनुगृहीतत्वेन तस्याव्यापकत्वमुपचरितमनेनेति मन्तव्यं व्यापकः अप्राकृतत्वादसङ्गी "असङ्गोह्ययं पुरुषः" इति श्रुतेः । अनावृतो ज्ञानाद्यावरणरहितः एवंविधलक्षणोपेतस्य विष्णोः सर्वहेतुत्वाच्छरीरस्य तदधीनत्वेन तस्मिन्देहे ममतां त्यजेदित्यर्थः ॥ १९—२० ॥

हरेर्देहादिभ्यो विविक्तत्वेन ज्ञानोत्पत्तिप्रकारं वक्ति–हेमगिति । यथा हेमकारो ग्रावसु क्षेत्रेषु निकषाश्मसु स्थानेषु हेमकारः क्षेत्रेषु हेमवत्सु पाषाणेषु वा योगैर्हेमावाप्त्युपायैः कषणाध्मानादिपरीक्षालक्षणैर्हेमप्राप्नुयादित्यन्वयः न सर्वस्य सुशक्यमित्यतउक्तं तदभिज्ञ इति तथा मुमुक्षुः पुरुष आत्मयोगैरौत्पत्तिकभक्त्याद्युपायैः देहेषु क्षेत्रेषु सम्यगालोच्य विविच्य ब्रह्मगतिं लभेत देहादिभ्यो वैलक्षण्येन ब्रह्मविषयज्ञानमाप्नोतीत्यन्वयः कोसावधिकारीत्यत उक्तम् अध्यात्मविदिति. "तरति शोकमात्मवित्" इति श्रुतेः । आत्मानमधिकृत्य वर्तमानं वेदान्तशास्त्रमध्यात्मं तद्वेत्तीति तद्वाच्य सम्यग्जानातीति सात्त्विकादिस्वभावोऽध्यात्मं तद्वेत्तीति वा महाभूतादिर्वाऽध्यात्मं तद्वेत्तीति अध्यात्मवित् ॥ २१ ॥

कानि महाभूतादीनीति तत्राह--अष्टाविति । मूलप्रकृतिर्महदादयः * सप्तैवमष्टौ प्रकृतयः सत्त्वादिगुणानां प्रकृतावन्तर्भावसम्भवेनाष्टत्वं युक्तमितिभावेनाह, त्रय एवेति । तस्याः प्रकृतेर्गुणास्तद्गुणाः प्रकृतिजत्वाद्विकाराश्च तद्ग्रहणेन गृहीता इति नाष्टत्वासम्भव इत्याशयेनाह, विकारा इति । मनसा सहैकादशेन्द्रियाणि शब्दादिविषयाश्चेति विकाराः षोडशेति पूर्वाचार्यैः, संख्याता इति शेषः । शरीरेष्वनुगतत्वेन विकारसम्भवादेतैः सह किं न पठित इति तत्राह, पुमानिति । समन्वयादिति ल्यब्लोपे पञ्चमी समन्वयमनुगतं प्राप्येकः पुमाञ्जाराणा एव केवलं शुद्धइत्यतो विकारेषु न पठित इत्यर्थः । अत्रेदं तात्पर्यमवगन्तव्यम्. तथाहि, अभिमन्यमानजडापेक्षया पुमान् जीवः पञ्चविंशोभिमानचेतनविवक्षया विष्णुः षड्विंश इति सम्यगन्वयाज्जियन्तृत्वेन अनुगतिज्ञानाज्ज्ञेय इति. तदुक्तम्—

"अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः ।
जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृतः" ॥ इति

यद्वा आकाशादिपञ्चभूतानि सत्त्वादित्रयोगुणा इत्यष्टौ प्रकृतयः तत्र मूलप्रकृतिमहदहङ्काराणामाकाशादिष्वनुगतत्वेन पृथग्ग्रहणं न क्रियते गुणानां तदात्मकत्वेन गुणग्रहणेन तद्ग्रहणोपपत्तेः शेषंपूर्ववत् ॥ २२ ॥

तत्त्वसंख्याकथनेन प्रकृते किमायातमिति तत्राह—देहस्त्विति । सर्वेषां प्रकृतितत्कार्याणां सङ्घातः समूहः तन्निर्मित इत्यर्थः तत्त्वेभ्योऽथतदभिमानिभ्यो विविच्य परमात्मा ज्ञातव्य इत्याभिप्रायेण तत्त्वसंख्यानं कृतमितीममर्थं दर्शयति, तुशब्देन देहशब्देन प्रपञ्चो विवक्षित इति कृत्वा तं देहं विभजति, जगदिति । जगच्छब्दो द्विरावृत्त्या व्याख्येयः तथाहि जगत्समस्तं जगज्जङ्गमं तस्थु स्थावरमिति द्विधा विभक्तं किं चान इत्यत आह—अत्रेति । ततत्वाद्ब्रह्म तत्र भवतीत्यतत्प्रकृत्यादिषं त्यजन् हित्वा स्वतः सर्वदा भिन्न इत्यर्थः । पुरुषः पूर्णः षड्गुणोऽत्रैव देहलक्षणे प्रपञ्चे मृग्योऽन्वेषणीयो विचार्यो ज्ञातव्य इति यावत् । शतृप्रत्ययेन सदा प्रकृत्यादित्यागो न कादाचित्क इति च सूचयति, तत्र किं प्रमाणमिति तत्राह—नेति । "स एष नेतिनेतीत्यात्मा" इति श्रुतिः प्रमाणमित्यर्थः । योऽतत्त्यजंस्तद्धपुस्त्यजंस्तेनेति वा अतत्त्यजतीत्यतत्त्यक् तेनातत्त्यजेति वा पाठः ॥ २३ ॥

---

* महत्तत्त्वाहङ्कारतत्त्वपञ्चमहाभूतानि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कया युक्त्या मृग्यत इति तत्राह–अन्वयेति । अन्वययुक्तव्यतिरेकेण यत्र यत्र जगत्तत्र तत्र ब्रह्मेत्यन्वयः यत्र यत्र ब्रह्म न तत्र तत्र जगत्परिच्छिन्नत्वादिव्यतिरेकलक्षणयुक्त्याऽऽकाशवत् जगदन्तिरत्वेन यदेतदसङ्गलक्षणापृथक्त्वेन वेति युक्त्या निश्चितेन विवेकेनागतेन युक्तेनात्मना मनसा, ननु, व्याप्तिग्राहकप्रमाणाभावेनाभासत्वान्वयान्निर्णयो न स्यादिति तत्राह—सर्गेति । अत्र सर्गस्थानाभ्यां संहारादिकमुपलक्ष्यते न सहिता स्वरा येस्ते असत्वरास्तैः "सर्वेश्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रो बलं ददातीति सर्वे ऊष्माणो अग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददातीति सर्वे स्पर्शालेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीयाः" इति श्रुतेः विमृशद्भिः विचारं कुर्वद्भिः "को न आत्मा किं ब्रह्म" इत्यादि श्रुतेः सर्गस्थानादिविषयैः समाम्नायैः निर्दोषगुणोपेतैर्वेदैः "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति" इत्यादिलक्षणैः "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः". इत्यादिकैश्चाऽनुगृहीतया ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र देहाद्यध्यासपरित्यागार्थं स्वमातृप्रतिपन्नमात्मज्ञानमात्रं गापतत्र आह–जन्माद्या इत्यादिभिः ॥ १८ ॥

एको न तु देहेन्द्रियादिसंघातरूपः । क्षेत्रज्ञो ज्ञातृत्वादिधर्मकः इन्द्रियादीनामाश्रयः स्वाभाविकज्ञातृत्वादेवा विक्रियः स्वदृक् स्वस्मै स्वयं प्रकाशः हेतुः सर्गादेर्निमित्तम्. तदुक्तं श्रीसूतेन "हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः" इति. व्यापको व्याप्तशीलः असङ्गी अनावृतश्च स्वतः स्वप्रकाशरूपत्वात् ॥ १९ ॥

मोहजं त्यजेदिति । देहाद्यभिकरणकमोहजस्यैव त्यागो न तु स्वरूपभूतस्येत्यहमर्थस्य इति व्यज्यते. सर्वं जीवस्तदंशत्वात् सूक्ष्म ज्योतीरूप इत्येके । तथैव हि कौस्तुभांशत्वेन व्यञ्जितम्. तथाच स्कान्दे प्रभासखण्डे जीवनिरूपणे "नतस्य रूपं वर्णो वा प्रमाणं दृश्यते क्वचित् । न शक्यं कथितुं वापि सूक्ष्मश्चाऽनन्तविग्रहः ॥ वालाग्रशतभागस्य शतधा कल्पित तस्य च । तस्मात् सूक्ष्मतरो देवः स चानन्त्याय कल्पते ॥ आदित्यवर्णं सूक्ष्माभमरविन्दुमिव पुष्करे । नक्षत्रमिव पश्यन्ति योगिनो ज्ञानचक्षुषा" इति ॥ २० ॥

तत्पदार्थज्ञानमप्याह—स्वर्णमिति ॥ २१—२८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भूयादित्याशीर्वादेन स्वस्मिन् वर्त्तमानं श्रीनारदानुग्रहं तेष्वपि भक्तिकारणत्वेनाशास्ते. यदि अधन्तः श्रद्धत्ते तदा वैशारदी विशारदो भगवांस्तद्विषया श्रद्धात इति महदनुग्रहात् श्रद्धा श्रद्धातो भक्तिः भक्तेः प्रेमेत्यग्रिमग्रन्थादवगन्तव्यम् ॥ १७ ॥

केषांचित् मुमुक्षुभक्तानां तु ज्ञानमपेक्षितमिति तदाह–जन्माद्या, इति दशभिः । जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभावाः षड्विकाराः सदा स्थितस्य वृक्षस्य प्रतिवर्षं फलानामेव यथा न तु वृक्षस्य तथैव नित्यस्थितस्यैवाऽऽत्मनो देहस्यैव षडिमे दृष्टाः न त्वात्मनः ईश्वरस्य मूर्तिः समष्टिव्यष्ट्यात्मकं शरीरं यतो भवति तेन ॥ १८ ॥

जीवात्मनि षड्विकाराभावभावना त्वं पदार्थशुद्धिः सा च तत्पदार्थस्य परमात्मनश्चिन्तनरूपया भक्त्यैव स्यादित्यतः परमात्मस्वरूपमाह–आत्मेति द्वाभ्याम् । आत्मा परमात्मा नित्यः "अविनाशी वा अरेऽयमात्मा" इति श्रुतेः, अव्ययः अपक्षयशून्यः "ऋचोऽक्षरे परमे व्योमन्" इति श्रुतेः । शुद्धः "निरवद्यं निरञ्जनम्" इति श्रुतेः एकः "एकमेवाद्वितीयम्" इति श्रुतेः । क्षेत्रज्ञः "विज्ञातारमरेकेन जानीयात्" इति श्रुतेः । आश्रयः "यस्मिन् द्यौः पृथिवी चान्तरीक्षम्" इति श्रुतेः । अविक्रियः निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः । स्वदृक् "आत्मज्योतिः सम्राडिति हो वाच" इति श्रुतेः । हेतुः "स इमान् लोकानसृजत" इति श्रुतेः । व्यापकः "सत्यं ज्ञानमनन्तम्" इति श्रुतेः । असङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः । अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

आत्मानः परमात्मनः परैर्जीवात्मलक्षणेभ्योऽप्युत्कृष्टैः नित्यं चिन्तितैरिति शेषः देहादौ देहे दैहिकेषु च असदवास्तवस्वभावस्परमात्मचिन्तनंविना सत्यपि विवेके दिग्भ्रम इव मोहो न निवर्त्तन इति भावः ॥ २० ॥

नन्वेवंभूतः परमात्मा क वर्त्तते ? इति चेत् स्वदेहेऽपीति तदुपलब्धिप्रकारं सदृष्टान्तमाह—स्वर्णमिति । ग्रावसु स्फुरत्स्वर्णकणपाषाणेषु क्षेत्रेषु स्वर्णाकरस्थानेषु योगैर्धमनादिभिर्गुरुवक्त्रशिक्षितैरेवोपायैः तदुपायाभिज्ञो हेमकारो, यथा स्वर्णमाप्नुयात् तथैव देहरूपक्षेत्रेषु आत्मयोगैरात्मप्राप्त्युपायैश्चिन्तनाद्यैः ब्रह्मगतिं ब्रह्मणः परमात्मनो गतिमुपलब्धिम् ॥ २१ ॥

अध्यात्मविदित्युक्तमतोऽध्यात्मवस्तून्याह–अष्टाविति सार्द्धेन । मूलप्रकृतिर्महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ । त्रयः सत्त्वाद्यो विकाराः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश आचार्यैः कपिलादिभिः प्रोक्ताः पुमानात्मा एकः समन्वयात् एषु सम्यगन्वयं सम्बन्धं प्राप्य वर्त्तमानः यद्वा समन्वयं सम्बन्धं अतति सततं प्राप्नोति "अत सातत्यगमने" क्विबन्तः ॥ २२ ॥

सर्वसङ्गातः उक्तलक्षणलक्षणवस्तुसमूहरूपः जगत् जङ्गमो मनुष्यादिः तस्थुः स्थावरो वृक्षादिः अत्रैव देह एव पुरुषः परमात्मा मृग्यः । अन्वेषणप्रकारमाह—नेतिनेतीत्यतत् तद्भिन्नं वस्तु त्यजन् त्यजद्भिरित्यर्थः ॥ २३ ॥

ननु, तर्हि तत्त्व एव सततत्यागे शून्यमेवाऽवशिष्यते इत्यतआह—अन्वयेति । देहे परमात्मनोऽन्वयः परमात्मनि देहव्यतिरेको यः प्रसिद्धः तेन जडानामपि बुद्ध्यादीनां यदन्वयेनैव प्रवृत्तिः बुद्ध्यादिव्यतिरिक्तश्च यः परमात्मा देहस्थ इति यो विवेकस्तेन तथा उद्यता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः पराभृष्टैरिति शेषः "यतो वा इमानि

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भूतानि जायन्ते" इत्यादि श्रुत्युक्त सर्गाद्यनुसन्धानेनेत्यर्थः । असत्त्वैरैरव्यग्रैर्मृग्यः ॥ २४ ॥

———

श्रीमच्छुकेदवकृतसिद्धान्तप्रदीपः ।

यदि भवन्तो मद्वचः श्रद्धते तर्हि श्रद्धातो भवतां स्त्रीणां बालानाञ्चापि मे मम यथा वैशारदी विशारदो हरिस्तद्विषयकज्ञानभक्तिवती धीः भूयांद्भवेत् ॥ १७ ॥

हरिभक्तियोगं ज्ञानञ्च साङ्गं तदुग्रहणयोग्यतानिष्पादकात्मानात्मविवेकोपदेशपूर्वकं जन्माद्या इत्यारभ्य "एतावानेव लोकेस्मिन् पुंसः स्वार्थः परः स्मृतः । एकान्तभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणम्" इत्यन्तेन ग्रन्थेनोपदिशति, ईश्वरात्सर्वप्रवर्तकात् क्षणादिद्विपरार्द्धलक्षणामूर्तिरभिव्यक्तिर्यस्य तेन वृक्षस्येव अतिप्रसिद्धषड्विकाराणां तत्फलानामिव च जन्माद्याः जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीतीमे षड्भावविकाराः देहस्यैव दृष्टाः नत्वात्मनः वृक्षगतस्य देहस्य चेत्यर्थः । एवं देहस्य षड्विकारयुक्तत्वेन च देहादावहं ममेत्यसदाग्रहो न कार्यं इति भावः ॥ १८ ॥

अथ सर्वस्य चेतनाचेतनस्य भगवत्पृथक्स्थितिप्रवृत्त्याद्यभावात्तदीयत्वाच्च अहं ममेत्यसद्भावं देहादौ त्यजेदिति वक्तुं भगवतोऽपि जन्मादि षड्विकाररहित्यं तदसाधारणान् एकत्वसर्वाश्रयत्वसर्वहेतुत्वव्यापकत्वानावृतत्वादीन् गुणान् आह—आत्मेति । आत्मा "एष त आत्मान्तर्यामी, आत्मावाअरे द्रष्टव्यः" इत्यादिप्रसिद्धः परमेश्वरः नित्यः जन्ममृत्युशून्यः अव्ययोऽपक्षयशून्यः किंबहुना शुद्धः सर्वदोषरहितः एकः निरस्तसमानातिशयः क्षेत्रज्ञः समष्टिव्यष्टिरूपसर्वशरीरज्ञः आश्रयः सर्वचेतनाचेतनानां स्थित्यादिप्रदः हेतुः सर्वोपादाननिमित्तकारणभूतः तथापि अविक्रियः स्वरूपतोऽविकारी नित्यसिद्धाभिः स्वशक्तिभिः चेतनाचेतनरूपाभिः कूर्माङ्गप्रसारणाऽप्रसारणन्यायेन सृष्टिसंहारौ करोति । तथोक्तम्, भारते"प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः । एवं भूतानि भूतात्मा सृष्ट्वा संहरते पुनः" इति स्वदृक् स्वप्रकाशः व्यापकः सर्वत्र सर्वदा वर्तमानः असङ्गी सर्वचेतनाचेतनदोषास्पृष्टः अनावृतो निरावरणः । जीवपरो नायं श्लोकः "जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः" इत्यनेनैव जीवजन्माद्यभावप्रतिपादनात् एकत्वादीनां भगवद्धर्माणां जीवे सम्भवात् सति मुख्यार्थे अर्थांतरकल्पनाया अनाप्यत्वाच्च ॥ १९ ॥

आत्मनः परमेश्वरस्य परैः परमेश्वरलक्षणैः नाहं देहरूपः न चाहं स्वातंत्र्येण मदीयः न च देहादिकं मम किन्तु भगवत एव सर्वं देहदेह्यादिकमित्येवमहंममाभिमाननिराकरणहेतुभूतैः अहं ममेत्यसद्भावं देहादौ वर्त्तमानं मोहजमज्ञानकृतं त्यजेत् ॥ २० ॥

अचेतनं जडत्वज्ञेयत्वादिना तद्भिन्नं ज्ञातृत्वादिना चेतनं चेतनाचेतनभिन्नं तदुभयनियंतृत्वादिना सर्वोपास्यं सर्वात्मभूतं ब्रह्म चेति तत्त्वत्रयज्ञानप्रकारमाह, स्वर्णमिति । यथा हेमकारः तद्भिज्ञः ग्रावसु स्फुरत्स्वर्णकणेषु स्वर्णं तत्प्राप्तियोगैराप्नुयात् एवं क्षेत्रज्ञयोगैः तदभिज्ञः क्षेत्रज्ञोऽनेकदेहविज्जीवस्तत्स्वरूपगुणादिश्रवणमननादिरूपैर्योगैः ज्ञातृत्वाहमर्थत्वादियोगैश्च क्षेत्रेषु स्वपरशरीरेषु ज्ञेयत्वाचेतनत्वादिना क्षेत्रज्ञभिन्नतया निश्चितेषु आप्नुयात् क्षेत्रज्ञमिति शेषः । तथा देहेषु समष्टिव्यष्टिरूपेषु अध्यात्मवित् आत्मनि क्षेत्रज्ञे नियन्तृत्वे अधिवर्तमानमन्तरात्मानं वेत्तीति स तथा ब्रह्मवित् आत्मयोगैः आत्मा अन्तरात्मा तत्स्वरूपगुणादिश्रवणमननादिरूपैर्योगैरुपायैः सर्वनियन्तृत्वादिभिश्च ब्रह्मगतिं परमात्मतत्त्वं लभेतेत्यर्थः ॥ २१ ॥

चेतनाचेतनब्रह्मपदार्थान् दर्शयन् अचेतने चेतनस्य रतिर्बन्धहेतुः ब्रह्मणि भगवति रतिस्तु मोक्षहेतुरित्याह, अष्टौ इत्याद्यष्टाभिः प्रकृतिः महदहंकारौ पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः । तस्याः प्रकृतेस्त्रयः सत्त्वादयो गुणाः एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश विकाराः अचेतनात्मकाः आचार्यैः प्रोक्ताः । पुमानचेतनश्च प्रोक्तः जातावेकवचनम् "चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति जीवबहुत्वश्रवणात् "सर्वे वेदा यत्पदमामनन्ति"वेदैश्च सर्वैरहमेव वेद्यः "तत्तु समन्वयात्"इति श्रुतिस्मृतिसूत्रेभ्यः समन्वयात् सर्वेषु वेदेषु विषयत्वेन समन्वयात् एकः सर्ववेदार्थभूतो भगवांश्च आचार्यैरौपनिषदैः प्रोक्तः ॥ २२ ॥

तत्र भगवतो देहः सर्वसङ्घातः विराड्रूपः जीवस्य देहद्वयमाह,जगत्तस्थुरिति द्विधेति । तद्बोधप्रकारमाह–अत्रैवेति सार्द्धेन । विमृशद्भिर्विचारयद्भिः असत्त्वैरैरव्यग्रैर्मुमुक्षुभिः उशतात्मना शुद्धेन मनसा अत्रैव देहेन्द्रियमनोबुद्धिप्राणेभ्यो जीवो भिन्नः चेतनत्वादीश्वरवत् इत्यन्वयेन देहेन्द्रियमनोबुद्धिप्राणेष्वेकतमोऽपि न जीवस्तस्य चेतनत्वाभावात् पाषाणादिवदिति व्यतिरेकेण च हेतुना एवं नेतिनेतीति देहाद्यात्मत्वनिषेधन अतदनात्मभूतं देहेंद्रियादिकं त्यजन् देहो नात्मा पाञ्चभौतिकत्वात् गृहादिवत् इन्द्रियेष्वेकतमोपि नात्मा करणत्वाद्धास्यादिवत् प्राणो नात्मा वायुविशेषत्वात् व्यजनजन्यवायुवत् इत्येवमज्ञानगृहीतं तदात्मत्वं परिहरन् पुरुषो जीवः मृग्यः तन्त्रादिना पुरुषः परमेश्वरश्च सर्गस्थानसमाम्नायैः सृष्टिस्थितिप्रतिपादकैर्वेदैः "यतो वा इमानि भूतानि जायन्ते"इत्यादिभिः चेतनाचेतनरूपेभ्यः सृज्येभ्यो भूतेभ्यस्तत्स्रष्टा विलक्षण एवेति द्योतितो यो विवेकस्तेन मृग्यः इतिद्वयोरन्वयः ॥ २३—२४ ॥

———

भाषा टीका ।

जो हमारे वाक्य में श्रद्धाहो तौ तुमारी भी देंहाद्यहंकार छेदन में निपुण मतिहो, स्त्री और बालको की मति शुद्ध होती है जैसे कि मेरी ॥ १७ ॥

जन्मादिक ये छः भाव देह के हैं आत्माके नहीं सो भी ईश्वरात्मक काल कृत है जैसे वृक्षके रहते २ फूलों के ॥ १८ ॥

और आत्मा तौ नित्य अव्यय शुद्ध एक क्षेत्रज्ञ आश्रय विकार रहित स्वदृक् हेतु और प्रकृति का व्यापक होकर भी असंगी और अनावृत है ॥ १९ ॥

इन आत्मा के द्वादश लक्षणों से विद्वान् देह गेहादि के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवाऽनुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ।
स्वरूपमात्मनो बुद्ध्येद्गन्धैर्वायुमिवान्वयात् ॥ २६ ॥
एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥
* (मनोमयत्वात्सर्वार्थाः स्वप्नजागरयोः समाः ।
दृष्टानर्थानपि ध्यातुः शोकमोहभयप्रदाः ॥ ० ॥
परस्य निर्गुणस्यापि गुणसङ्गाजनिर्मृतिः ।
व्यक्तं जन्माप्ययप्रोक्तं शयानस्येव न स्वतः ।
हरिसञ्चिन्तया सर्वे प्रयान्ति परमम्पदम् ॥ ० ॥)
तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम् ।
बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥
तत्रोपायसहस्राणामयं भगवतोदितः ।
यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥ २९ ॥
गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥
श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ।
तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षाऽर्हणादिभिः ॥ ३१ ॥
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥

भाषाटीका ।

में मोह से उत्पन्न जो मैं मेरा यह असद्भाव तिसको छोड दे ॥ २० ॥

जैसे अभिज्ञ सुवर्णाकार क्षेत्र (खेत) में सुनहले पाषाण में से उपायों से स्वर्ण को प्राप्तहोता है, ऐसेही अध्यात्मवेत्ता आत्म योग से देह में ब्रह्मगति को प्राप्त होता है ॥ २१ ॥

आचार्यों ने अष्ट प्रकृति कहीं हैं और उनके गुण तीन कहे हैं तथा प्रकृति के विकार षोडश हैं और इन में साक्षित्वेन अन्वित होने वाला पुरुष एक है ॥ २२ ॥

सर्व संघात रूप देह स्थावर जंगम भेद से दो प्रकारका है इसी देह में अनात्म वस्तु के लक्षणों से भिन्न आत्मा को ढूँढना चाहिये ॥ २३ ॥

अन्वय व्यतिरेक से हुआ जो विवेक तिससे और शुद्ध मनसे तथा सृष्टि स्थिति संहार के अनुसंधान द्वारा विचार करने वाले अव्यग्रपुरुषों से ढूँढने के योग्य है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विमर्शप्रकारमाह–बुद्धेरिति द्वाभ्याम् । अध्यक्षः साक्षी ॥ २५ ॥

अत एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैरनात्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैस्त्रिगुणात्मकैः क्रियोद्भवैः

* श्लोकाविमौ विजयध्वजरीत्याऽधिकौ पठ्येते ॥

[३६]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः आत्मा तु बुद्ध्यन्वयात्तदवस्थावानिवाभाति न तत्त्वत इत्यनात्मनः स्वरूपं बुध्येज्जानीयादित्यर्थः । अत्र दृष्टान्तः कुसुमधर्मैर्गन्धैस्तदाश्रयं वायुमिव ॥ २६ ॥

ननु, तर्हि यथा कुसुमोपाधिकोपि वायोर्गन्धो विवेकज्ञानेन निवर्तते एवमात्मनः संसारो न निवर्त्तत इत्याशङ्क्याऽऽह, एतद्द्वारो बुद्धिद्वारकस्तदवस्थाद्वारको वा संसारो न स्वतः हि यस्माद् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यत इति तथा स चाज्ञानमूलोऽतोऽपार्थो मिथ्याभूतोऽपि स्वप्न इवेष्यते वायोस्तु गन्धद्रव्यसम्बन्धस्य वास्तवत्वाद्विषमो दृष्टान्तः ॥ २७ ॥

यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनम् किं तद् योगः कथम्भूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा ॥ २८ ॥

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाऽऽह–तत्रेति, पञ्चभिः । यैर्धर्मैर्यथा यथावदनुष्ठितैर्वा भगवति श्रीनारायणे रतिरिति, यदयमुपायो भगवतोक्तः । तथा च गीतासूक्तम्—

> “ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
> यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ” ॥

इति “भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः” इत्यादि च ॥ २९ ॥

तत्रैवान्तरङ्गान्धर्मानाऽऽह, गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन च ॥ ३० ॥

तस्य लिङ्गानां मूर्तीनामीक्षणमर्हणमादिर्येषां वन्दनादीनां तैश्च ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्यानपि तद्विमर्शनोपायान् वदंस्तैः प्रत्यगात्मस्वरूपं देहविलक्षणमवगच्छेदित्याह—बुद्धेरिति । जागरणं स्वप्नः सुषुप्तिरिति एतास्तिस्रो बुद्धेर्वृत्तयः व्यापारः ता वृत्तयो येनैवाऽनुभूयन्ते स एव परः देहेन्द्रियबुद्ध्यादिभ्योऽन्यः अध्यक्षो देहादीनां द्रष्टा धारको वा पुरुषः प्रत्यगात्मा जागरणं नाम बाह्येन्द्रियव्यापारानुविद्धा बुद्धिवृत्तिः स्वप्नस्तदननुविद्धा सुषुप्तिर्बुद्धिवृत्त्युपरमः तदुपरमोऽपि तत्सम्बन्ध्येवेति बुद्धेर्वृत्तय इत्युक्तम् एतद्वृत्तित्रयजाज्ञानाश्रयत्वेन यः प्रतीयते स प्रत्यगात्मेति भावः ॥ २५ ॥

एतदेव सदृष्टान्तं त्रिविधकर्मजत्वादिभिरुपायैरात्मस्वरूपं बुद्ध्येदित्याह—एभिरिति । एभिस्त्रिवर्णैस्त्रिविधैः सत्त्वादिगुणत्रयमूलकैर्वा पर्यवसिरशिवैः क्रियोद्भवैः पुण्यपापात्मककर्मनिमित्तैर्बुद्धिभेदैर्बुद्धिवृत्तिभेदैर्जागरादिभिरुपलक्षितमात्मनः स्वरूपं विद्यात् यथा गन्धैः कुसुमादिगतैरुपलक्षितं तदाश्रयं वायुं बुध्यति तद्वत्. कुतः ? अन्वयाज्जागरणाद्यवस्थात्रयेऽन्वयादनुवृत्तेः यथा पवनात्मककर्मणा तत्तत्पङ्कजादिकुसुमादिगतं गन्धमानीय तदाश्रयतया तदन्वितं प्रवहन्तं वायुं ततःपृथग्भूतमुपलक्ष्यते पार्थिवकुसुमादिगतस्य गन्धस्य न वायुराश्रयस्तदन्वयाच्च वायोः तदाश्रयत्वम्. अत एव तदन्वयापाये केवलस्पर्शगुणस्य वायोरुपलम्भः ततो गन्धात्पृथगेव वायुः स्वाभाविकस्पर्शगुण इति तं यथोपलक्षते तथा बुद्धिभेदो न स्वभावतः आत्मगताः तेषां स्वाभाविकत्वेऽन्यतमबुद्धिभेदेऽन्यतमस्योपलम्भप्रसङ्गः किन्तु कर्मायत्तबुद्धिसम्बन्धप्रयुक्ततद्वृत्त्यन्वयात्तदनुभवोपलम्भः स्वभावस्त्वात्मा तद्वृत्त्यनन्वित एव ततःपृथग्भूत इत्येवं तं बुद्ध्येदित्यर्थः ॥ २६ ॥

तदेवं देहादावसङ्गावस्थागप्रकारो देहविलक्षणत्वेनात्मविमर्शनप्रकारश्चोक्तः अथैवंभूतस्य प्रत्यगात्मनः कुतस्तद्देहादिसम्बन्धरूपः संसारो यस्मिन् न सद्भाव इत्याशङ्कायां त्रिवर्णैः क्रियोद्भवैरिति परिहारः सूचितः । तमेव विशदयितुं स्वरूपयाथात्म्यज्ञानमूलकदेहात्मभ्रमादिरूपाऽनादिमोहनिमित्तगुणकर्मसम्बन्धप्रयुक्तः संसारस्तत एवात्मनः स्वरूपप्रयुक्तत्वाभावादपुरुषार्थोऽप्यौपाधिकत्वाद्यावदुपाधिबुद्धिसंबन्धद्वाराऽनुवर्त्तते इत्याह—एतदिति । एष बुद्धिसम्बन्ध एव द्वारं यस्य स संसारः स्वप्न इवाल्पास्थिरत्वात्स्वप्नतुल्योऽत एवापार्थः अपुरुषार्थोऽपि पुंसः प्रत्यगात्मनोऽर्प्यते प्राप्यते कर्तुः पुंसः शेषत्वविवक्षया षष्ठी पुंसां संसारः प्राप्यत इत्यर्थः । बुद्धिसम्बन्धे हेतुं वदन्संसारं विशिनष्टि—अज्ञानमूल इति । अज्ञानं मूलं कारणं यस्याज्ञानमूलः स्वपरयाथात्म्याज्ञानमूलकबुद्धीन्द्रियसम्बन्धनिमित्तो देहतदनुबन्धिरूपः संसार इत्यर्थः । कथमुक्तविधस्यात्मनो ज्ञानसम्बन्ध इति शङ्कां निराकुर्वन् संसारमेव विशिनष्टि. गुणकर्मनिबन्धन इति । गुणकर्माधीनः सत्त्वादिगुणपरिणामानुगुणकर्मपरिपाकाधीन इत्यर्थः । अयं भावः । स्वभावतः सर्वे प्रत्यगात्मानः “आत्मा नित्योऽव्ययः” इत्याद्युक्तविधा अप्यनादिकर्मणा सत्त्वादिप्राकृतगुणसंसृष्टास्तत्र तत्तत्कर्मपरिपाकवशाद्गुणपरिणामस्ततः स्वपरयाथात्म्याज्ञानं ततो गुणकर्मानुरूपं परमात्मसृष्टबुद्धीन्द्रियसम्बन्धः ततो देहतदनुबन्धिसम्बन्धरूपः संसारस्ततो देहात्माभिमानस्ततः पुनः कर्म ततः पुनर्गुणपरिणामादिरित्येवं परिवृत्तिर्यावत्कर्मोपाध्यनुवर्तत इति ॥ २७ ॥

यतोऽयमुक्तविधस्याप्यात्मनो देहात्मभ्रमादिरूपाऽज्ञानमूलककर्मनिमित्तः संसारस्तस्माद्भवद्भिः कर्मनिवारणोपायोऽनुष्ठेय इत्याह, तस्मादिति । तस्मात्संसारस्याज्ञानमूलगुणकर्मायत्तत्वात् त्रिगुणात्मनां सत्त्वादिगुणत्रयपरिणामहेतूनां कर्मणां यद्बीजं मूलं देहात्मभ्रमादिरूपं तस्य निर्हरणं निर्हरणोपायात्मको यो योगो वक्ष्यमाणः स च धियः प्रवाहः शब्दादिविषयकं ज्ञानं तदुपरतिरूपो भवद्भिः कर्त्तव्यः ॥ २८ ॥

वक्ष्यमाणभगवद्भक्तियोगस्यैव बीजनिर्हरणोत्तमोपायत्वमाह, तत्रेति । तत्रावश्यं बीजनिर्हरणोपाये कर्तव्ये सति उपायसहस्राणां मध्येऽयमेवोत्तम उपायः कथितो भगवता, कोऽसौ ? यैः साधनैः भगवतीश्वरे रतिरनुरागः प्रीतिरञ्जसा सुखेन यथा स्यादित्येषः, स्वसाधनैरनुगृहीता भगवति रतिरित्येष एव उत्तम उपाय इति–

> “नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
> भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन !” ॥ इति.

“न मे भक्तः प्रणश्यति” इत्यादिना तत्र तत्र भगवता प्रोक्त इत्यर्थः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रतिरित्यनेन निरतिशयप्रीतिरूपापन्नाभक्तिरुच्यते तस्या एवसाक्षाद्भगवत्प्राप्तिहेतुत्वं संसारनिवर्त्तकत्वञ्च सूच्यते ॥ २९ ॥

सा च कैः साधनैर्निष्पद्यते इत्यपेक्षायां साधनानि वदंस्तैरुपकृतेन ध्यानयोगेन निष्पद्यते इत्याह—गुरुशुश्रूषयेत्यादिभिश्चतुर्भिः । गुरुशुश्रूषया गुरूणां परिचर्यया गुरुभ्यस्तत्त्वश्रवणेच्छया वा भक्त्या गुरूणां भक्त्या उपासनेन सर्वेषां गुर्वपेक्षितानां मध्ये लाभः लभ्यते इति लाभः स्वस्य सुलभं यत्तस्य समर्पणेन, यथाशक्ति तदपेक्षितसमर्पणेनेत्यर्थः । साधु यथा भवति तथा भगवद्भक्तानां सङ्गेन साधवः क्रोधमात्सर्यलोभाशुभमतिराहित्यरूपसाधुलक्षणलक्षिता भक्तास्तेषां सङ्गेन वा ईश्वराराधनेनार्चाविग्रहाराधनेन हृदयकमलस्थस्य मानसोपचारैराराधनेन वा. अर्हणादिभिरित्यर्चाराधनस्य वक्ष्यमाणत्वात् ॥ ३० ॥

तत्कथायामीश्वरकथायां श्रद्धया श्रवणासक्त्या ईश्वरस्य गुणानां कर्मणां कीर्तनैस्तस्येश्वरस्य पादाम्बुजयोर्ध्यानात्तल्लिङ्गस्यार्चाविग्रहस्येक्षणार्हणादिभिर्दर्शनपूजादिभिः आदिशब्देन प्रणामपरिक्रमादिसंग्रहः ॥ ३१ ॥

किञ्च भगवानीश्वरः सर्वभूतेष्वन्तरात्मतया वर्त्ततेऽतः सर्वाणि भूतानि भगवदात्मकानीति बुद्ध्या यथाशक्ति यथायोग्यं तद्भूतान्यपेक्षितैः कामैः साधु मानयेत्सम्मानयेदित्यनेन च ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विमृश्य निर्णयप्रकारं दर्शयति, बुद्धेरिति । सत्त्वबुद्ध्यादिशब्दैस्तु जीवोपि कथिदीर्यते इति वचनाद्बुद्धेर्जीवस्य जागरणाद्यावृत्तयोऽवस्थास्ता येन परमात्मना प्रेरितेन जीवेनानुभूयन्ते "जाग्रदाद्याः कर्म चैव सुखदुःखे च तस्य हि" इति वचनात् । स परः पुरुषोऽध्यक्षः "जाग्रदादेः परो द्रष्टा सुखनित्यो हरिः स्मृतः" इति वचनात् । सोऽध्यक्षो जाग्रदादिनाधिगतेन्द्रियसुखदुःखपरो जीवः परो विश्वादिविग्रहाद्धरेरन्य इत्युक्तरार्द्धस्यार्थभेदो ज्ञातव्यः एव शब्देन कालादिकं व्यावर्तयति ॥ २५ ॥

"कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु" इति वचनाद्विश्वादिविग्रहाणारायणादन्यत्वं जीवस्य कथं जीवधर्माक्रान्तत्वात्तस्येति तत्राह,एभिरिति । बुद्धीनां जीवानां भेदस्तारतम्यलक्षणो येर्ज्ञाप्यते तैर्जीवतारतम्यज्ञापकैरत एव पर्यस्तैरेकत्र समस्तैरेभिस्त्रिवर्णैस्त्रिभावर्णैर्वर्णनं येषां ते तथा तैर्जाग्रदादिभिस्त्रयो वर्णाः शुक्लकृष्णपीतलक्षणा येषां ते तैः सत्त्वादिगुणैर्वा स परमात्माऽज्ञजनदृष्ट्यात्मनो जीवस्य सरूपं रूपेणासमानरूपं कार्याविबद्धं धत्त इति दृश्यते न तु प्राज्ञजनदृष्ट्या तद्दृष्ट्या ज्ञानानन्दादिसमानं रूपं धृत्वा तत्स्वरूपं धत्त इति "स जीवेन सहस्थानात्तत्स्वरूपः प्रदृश्यते" इति स्मृतेः । अन्यथाद्विविगाक्ष्यादिष्वनुगतत्वात्कीदृशैः क्रियोद्भवैः क्रियया उद्भवो येषां ते तथा तैः कर्मजनितैः यद्वा क्रियाया उद्भवो येभ्यो गुणेभ्यस्ते तथा तैः शुक्लसत्त्वजन्यं जागरणं पीतरजोजन्यं स्वप्नं कृष्णतमोजन्या सुप्तिः कर्माण्येवंविधानि "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतेः । कुत्रायं व्यवहारो दृष्ट इति तत्राह, गन्धैरिति । यथा गन्धैरन्वयात् सौरभ्यादिगन्धसम्पर्कात् सुगन्धो दुर्गन्धो मिश्रगन्धो वायुरिति व्यवह्रियते न तावता तादात्म्यं वायोस्तथात्वे सर्वदा तथा स्यात् न चैवं तस्माद्भिन्न एव वायुस्तथाहरिरपि "यथागन्धयुतोनिलः"इति च "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्"इति श्रुतेः । देहाख्यप्रपञ्चसम्पर्कोऽस्त्येव हरेरिति भावः ॥ २६ ॥

अभेददर्शने बाधकमाह, एतद्द्वार इति । इदमभेददर्शनं द्वारं यस्य संसारस्य स तथा पुंसः संसारः प्राप्यते हि यस्मात् "अदृष्टेर्जीवपरयोर्भेदस्याप्नोति संसृतिम्"इति वचनात् । अभेददर्शने कारणमाह, गुणेति । अभेददर्शनजनकत्वेन गुणकर्मणोः संसारनिमित्तत्वमाह, तस्येति । विशेषकर्मणः कारणमज्ञानं तद्द्वारा संसारइत्याशयेनाह, अज्ञानेति । अज्ञाननिमित्तकर्मपरम्परया मुग्धमनसः पुंसोऽभेदनिश्चयादन्ततस्तमएव शरणमित्याशयेनाह, अपार्थ इति । अपगतानिवृत्तिस्तमस इति शेषः

"अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने ।
व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु " ।

इत्यभिधानात्. मशकार्थं धूम इति प्रयोगाच्च "अभेदनिश्चयाद्याति तमो नास्त्यत्र संशयः" इति स्मृतेः । अपिशब्देन नित्यदुःखभूयिष्ठतमःप्राप्तिं सूचयति, "दुःखरूपोपि संसारो बुद्धिपूर्वमवाप्यते" इति संसारस्तमः इन्द्रियार्थसन्निकर्षादर्थोपलब्धिर्जाग्रत् जाग्रदनुभवसंस्कारोपस्थापितविषयाभासोपलब्धिः स्वप्नः उपरतस्वस्ववृत्तीन्द्रियविषयज्ञानं सुप्तिः अत्र जाग्रद्दृष्टश्रुतपदार्थसंस्कारकृतः स्वप्नः स्वशिरश्छेदनादिलक्षणो दुःखादिहेतुर्यथा, तथा जाग्रदपि राजाऽहं वदतोऽनर्थपरम्परा दृष्टिवज्जीवपरयोरभेदं जानतः पुंस इहामुत्र दुःखबाहुल्यहेतुरित्यर्थः । "यथास्वप्ने शिरश्छेदं स्वयं कृत्वात्मनोवशः । ततोदुःखमवाप्येत तथा जागरितेऽपितु ॥ जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तते" इति स्मृतौ दर्शनात् ॥ २७ ॥

अर्थक्रियाकारित्वात् न स्वप्नादेर्मिथ्यात्वमित्याह—मनोमयत्वादिति । मनसा निर्मितकर्मनिमित्तत्वादनित्यत्वाभिप्रायेण स्वप्नजाग्रत्साम्यम् अन्यथा शोकमोहभयप्रदा इत्येतदसम्बद्धम् स्यात् न च शुक्तिरजतादिकं वलयकरणादियोग्यम् ॥ ० ॥ ० ॥

विपक्षे बाधकमुक्त्वा विपर्यये पर्यवसानफलेन संसारबीजनिर्हरणोपायमाह — तस्मादिति । यस्मात्पुंसो गुणकर्मनिर्मिताभेददर्शनद्वारः संसारस्तस्मादभेदनिमित्तत्रिगुणमयकर्मबीजभर्जनोपायो भवद्भिः कर्तव्यः नन्वग्निष्टोमादिकमन्तरेण कर्मणां बीजभूतस्य लिङ्गशरीरस्य हननोपायः । कोऽसौ ? यमनियमादिलक्षणश्चेत्तस्योभयत्र साधारणत्वेनानन्तरङ्गत्वात् अत आपाकनिक्षिप्तामघटदहनयोग इवात्रस्य तत्साधनं वक्तव्यमिति तत्राह, प्रवाह इति । धियः प्रवाहस्य सजातीयप्रत्ययानन्तरिततया विषयीकरणनिपुणोपासनालक्षणस्य उं रुद्रं पाति रक्षतीत्युपः "उपोधिके" इति सूत्रादुपः सर्वाधिको वा परमेश्वरस्तस्मिन् रमणं निरन्तरश्रीनारायणचरणसरसिजसाक्षात्कारलक्षणोपासनात् स एवेत्यभिप्रायः ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धियः प्रवाहस्यान्तरङ्गसाधनमाह, तत्रेति । भगवतेत्यनेन प्राप्तत्वे आप्तमूलत्वं दर्शयति–अन्यथा बाधकमाह–नेति ॥ २९ ॥

भक्त्या गुरुशुश्रूषया "यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ" इति श्रुतेः सर्वलाभार्पणेन हराविति शेषः "ब्रह्मार्पणं ब्रह्म हविः" इत्यादेः साधु भक्तानाम् "नाऽवैष्णवाय दातव्यं नोदबिन्दुं न तण्डुलम्" इत्यादेर्नियतभगवद्भक्तानां सेवालक्षणप्रसंगेन "महत्सेवां द्वारमाहुर्विमुक्तेः" इत्यादेः ईश्वराराधनेन पञ्चरात्रोक्तेन पञ्चकालीनभगवत्पूजया पञ्चकालपरायणं पञ्चकालैकमनसामित्यादेः ॥ ३० ॥

तत्कथायां श्रद्धया "पानेन ते देवकथासुधायाः" इत्यादेः गुणकर्मणां सङ्कीर्तनैः "कलौ सङ्कीर्त्य केशवम्" इत्यादेः विभयच्छिखण्डध्यानविधानार्थं तत्पदाम्बुरुहध्यानादिति "सञ्चिन्तयेद्भगवतश्चरणारविन्दम्" इत्यादेः तस्य हरेर्लिङ्गं प्रतिमा तस्येक्षा दर्शनं अर्हणं पूजनम् आदिशब्देन प्रदक्षिणादि गृह्यते "बर्हायिते ते नयने नराणाम्" इत्यादेः ॥ ३१ ॥

"हरिः सर्वेषु भूतेषु" इत्यादिना हरिरेवपूज्यो न तु भूतानि योग्यतातिरेकेणेतीदमेव कथ्यते "ईश्वरो जीवकलया प्रविष्ट" इत्यादेर्वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ स्वप्रतिपत्तिं प्रतिपादयति—तत्रोपायेत्यादिभिः । तत्र पूर्वोक्ते त्रिगुणात्मककर्मणां बीजनिर्हरणेऽपि उपायसहस्रैः सिद्धानां मध्ये अयमेव उपायो भगवता श्रीनारदेन मां प्रत्युपदिष्टः यैरुपायसहस्रैः सिद्धात् यद्यस्मादुपायात् यथा यथावत् ईश्वरे भगवति अञ्जसा व्यवधानान्तरं विनैव रतिः प्रीतिर्भवति । अतः कर्मबीजनिर्हरणमपि तस्यानुषङ्गिकमेव फलमिति भावः । यद्वा तत्र बीजनिर्हरणे निमित्ते यान्युपायसहस्राणि तेषामप्ययमेवोपायो भगवता श्रीनारदेनोदितः । अनेनैवोपायेन कृतकृत्यानि भवन्तीत्यर्थः । कोऽसौ ? तत्राह—यैरुपायैः सिद्धात् यद्यस्मादुपायादीश्वरे भगवति यथा यथावदञ्जसा उपायान्तर व्यवधानं विना रतिर्भवतीति ॥ २९ ॥

गुरुशुश्रुषयेति त्रिकम् ॥ ३०–३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विमर्शप्रकारमाह, बुद्धेरिति द्वाभ्याम् । यदन्विताया एवंबुद्धेस्तिस्रोऽवस्था उद्भवन्ति सः परः पुरुषः परमात्मा ॥ २५ ॥

यस्त्वेतद्बुद्ध्यवस्थात्रयवानाभाति स जीवात्मेत्याह—एभिः बुद्धेर्भेदैः परिणामैः जागरादिभिः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः पर्यस्तैः अनात्मधर्मत्वेन निरस्तैरपि एभिरेव आत्मनोऽणुस्वजीवस्य स्वरूपं बुध्येत जानीयात् यथा अन्वयात् सम्बन्धमात्रादेव गन्धैः पुष्पादिगन्धैर्वायुं गन्धवन्तं जानीयात् यदन्विता बुद्धिः प्रवर्त्तते स परमात्मा यो बुद्ध्यान्वितः स जीवात्मेति भेदः ॥ २६ ॥

एषा बुद्धिरेव द्वारं यस्य सः अत एव गुणकर्मभ्यां तदीयाभ्यां नितरां बन्धनं यत्र सः किञ्चन ज्ञानं यस्य तथाभूतं मूलं यस्य सः, यस्य मूलं न ज्ञायत इत्यर्थः । अपार्थः अवस्तुभूतोऽपि जीवस्य संसारो देहाध्यासरूपः स्वप्न इव अर्प्यते इति तस्मिन् पुंसि परमेश्वरशक्त्यैवेत्यर्थः ॥ २७ ॥

तस्मात्तन्निवृत्तये यतितव्यमित्याह, तस्मादिति । बीजं प्राकृती बुद्धिः तस्य निर्हरणं दहनं दहनमेव किं तदाह, धियो बुद्धेः प्रवाहाणां जागराद्यवस्थानां उपरमः स एव योगः फलम् "योगोऽपूर्वार्थसंप्राप्तौ सङ्गतिध्यानयुक्तिषु" इति मेदनी ॥ २८ ॥

तत्र बीजनिर्हरणे विषये उपायसहस्राणां मध्ये अयमुपायो भगवता उदितः अन्ये त्वन्यैर्मुनिभिरुदितत्वादस्माच्चे निकृष्टा एवेति भावः । अयमेव कस्तत्राह, यदिति । यैर्गुरुशुश्रूषणाद्यैरङ्गैरुत्पन्नात् यत् यस्माद्भक्तियोगाद्रतिर्भवति अयं भक्तियोग एवोपाय इत्यन्वयः । अत्र पञ्चम्यन्तयत्पदात् अञ्जसा शब्दाच्च रतिरेव भक्तियोगस्य मुख्यं फलं बीजनिर्हरणं त्वानुषङ्गिकमयत्नतएव शुद्धभक्तानां भवेत् । यदुक्तम्, "जरयत्याशु या कोषं निगीर्णमनलो यथा" इति ॥ २९ ॥

धर्मस्य तत्त्वं ज्ञानञ्चेति द्वयमुपदेष्टव्यत्वेन यत् प्रक्रान्तं तत्र ज्ञानमुक्त्वा धर्मं तत्त्वं भक्तियोग एवेति द्योतयन् पूर्वोक्तयत्पदवाच्यानि तदङ्गान्याह–गुर्वितित्रिभिः । गुरोः शुश्रूषया स्नपनसम्वाहनादिकया तथा सर्वेषां लब्धानां वस्तूनां तदर्पणेन च तच्चार्पणं भक्त्यैव न तु प्रतिष्ठादिना हेतुना साधवः सदाचारा ये भक्तास्तेषां सङ्गेनेति दुराचारा भक्ताः सेव्या वन्द्या दर्शनीयाश्च न तु सङ्गार्थमुपादेया इति भावः ॥ ३० ॥

एव मेतत्प्रकारकया भक्त्यैव निर्जितः षण्णां कामादीनामिन्द्रियाणां वा वर्गो यैस्तैर्गुरुशुश्रूषणाद्यैरङ्गैर्भक्तिरिति पूर्वोक्तं बुद्धिप्रवाहोपरमरूपमानुषंगिकं फलमुक्तं भक्तेर्मुख्यं फलमाह, ययेति । रतिं प्रेमाणाम् ॥ ३१—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जागरणाद्यवस्थानुवृत्तेश्च जीवात्मानं बुद्ध्येदित्याह, बुद्धेरिति द्वाभ्याम्, बुद्धेर्जागरणाद्याः वृत्तयो येन ज्ञानस्वरूपेणानुभूयन्ते सोऽध्यक्षः बुद्ध्यादिस्वामी परो बुद्ध्याद्यचेतनवर्गविलक्षणः ॥२५॥

एभिस्त्रिवर्णैः सत्त्वादिगुणत्रयमयैः पर्यस्तैरनित्यैः अनित्यत्वे हेतुं दर्शयितुं विशेषणं क्रियोद्भवैरिति क्रिया जीवकर्म तदनुसारेण जातैः यस्य जीवस्य शुभं कर्म तेन जीवेन स्वकर्मजन्या बुद्धिवृत्तयः सुखप्रदा अनुभूयन्ते अशुभकारिणो दुःखप्रदा अनुभूयन्ते यन्मते तु बुद्धेरेवकर्मत्वं तन्मतमुपेक्षणीयं सद्भिः "विज्ञानं यज्ञं तनुते, "कर्त्ता शास्त्रार्थवत्त्वात्" इत्यादिश्रुतिसूत्रविरोधात् करणभूतायाः अचेतनायाः कर्तृत्वसम्भवाच्च तद्वत्प्रकृतेरपि जगत्कर्तृत्वप्रसङ्गाच्च एवंभूतैर्बुद्धिभेदैः बुद्धिवृत्तिभिः गन्धैस्तद्वारकं वायुमिव आत्मनः स्वरूपं बुध्येत अन्वयानुकावस्थासु तद्वृत्तिसाक्षिणो जीवस्यैवानुवृत्तेः ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।
वासुदेवे भगवति यया संलभते रतिम् ॥ ३३ ॥
निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि ।
यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३४ ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते ! नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥
तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताऽऽशयाकृतिः ।
निर्दग्धबीजाऽनुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एषा बुद्धिरेव द्वारं यस्य यतो बुद्धिगुणनिमित्तानि यानि जीवकर्तृकानि कर्माणि तैर्नितरां बन्धनं यस्मिन् अज्ञानं तत्वबोधाभावो मूलं यस्य अपगतोऽर्थः आत्मा परमात्मबोधरूपः पुरुषार्थो यस्मात् एवम्भूतः संसारः जन्ममरणप्रवाहलक्षणः पुंसः पुंसि अर्पिताः, कर्मफलदेनेति शेषः। एवम्भूतसंसारश्रवणेनातिभीतान् प्रत्याह, स्वप्न इवेति। स्वप्नो यथा तात्कालिककर्मफलदेन पुंस्यर्पितस्तेनैव निराक्रियते तद्वत्स्वाराधितेन भगवतैव संसारो निवार्यत इत्यर्थः ॥ २७ ॥

तन्निवृत्युपायः कर्त्तव्य इत्याह–तस्मादिति। यस्मादेवं तस्माद्भवद्भिः बीजनिर्हरणं पूर्वोक्तस्य संसारमूलस्याज्ञानस्य निर्हरणं दहनं तद्दहनार्थं तत्त्वज्ञानसंपादनं कर्त्तव्यं धियो बुद्धेः कारणभूतायाः यानि कर्माणि तेषां फलभूतस्य प्रवाहस्य जन्ममरणप्रवाहभूतस्य संसारस्योपरमो यस्मात् स योगः संसारतरणोपायश्च कर्त्तव्य इत्यन्वयः ॥ २८ ॥

तत्र तत्त्वज्ञानसंपादने संसारतरणे यैर्धर्मैः यथा यथावत् अञ्जसा भगवति रतिरिति यत् अयमेवोपायसहस्राणां मध्ये मुख्य उपायः भगवतोदितः"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति "मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते" ॥ इति ॥ २९ ॥

तस्याः परभक्तिरूपाया रतेः साधनरूपान् धर्मानाह—गुरुशुश्रूषयेति चतुर्भिः । गुरुशुश्रूषारूपया भक्त्या सर्वेषां लब्धानां प्रियपदार्थानां भगवति अर्पणेन च ॥ ३० ॥

तस्य भगवतः कथायां श्रद्धया गुणानां सर्वज्ञत्वादीनां कर्मणां विश्वसर्जनादीनां कीर्त्तनैः तल्लिङ्गानां तस्य मूर्त्तीनाम् ईक्षणमर्हणश्चादिर्येषां वन्दनप्रणामादीनां तैश्च ॥ ३१ ॥

सर्वेषु भूतेषु हरिः आस्ते इति हेतोस्तैस्तद्धितैः कामैर्भूतानि साधु यथा भवति तथा मानयेत् ॥ ३२ ॥

भाषा टीका ।

जागरण स्वप्न सुषुप्ति, बुद्धि की इन तीनों दशाओं को जो अनुभव करता है और बुद्धि से पर है वही अध्यक्ष पुरुष है ॥ २५ ॥

क्रिया से उत्पन्न होने वाले त्रिगुणात्मक विस्तृत बुद्धि के परिणामों से आत्मा के स्वरूप को जाने, जैसे पुष्प के गंध से उसके आश्रय वायु को जानता है ॥ २६ ॥

गुण कर्म निबंधन यह संसार बुद्धि की दशा द्वारक ही है और अज्ञान मूलक और अपार्थ भी है, और पुरुष को स्वप्न के तरह अनित्य है ॥ २७ ॥

तस्मात् तुम लोग त्रिगुणात्मक कर्मों के बीज की हानि के लिये, बुद्धि के प्रवाह के उपराम करने वाले योग का साधन करो ॥ २८ ॥

तहां पर हजारों उपायों के मध्य में यह उपाय भगवान ने कहा है, कि जैसे जिन धर्मों से साक्षात् भगवान् में रति होवै ॥ २९ ॥

वही भगवान् में रति जिन अन्तरंग धर्मों से होती है उनको कहते हैं कि गुरु की शुश्रूषा, भक्ति, जो प्राप्त हो तिस सर्वका अर्पण, साधु और भक्तों का संग, ईश्वर का आराधन, ॥ हरिकथा में श्रद्धा, हरि के गुण कर्मों का कीर्त्तन उनके चरणकमल का ध्यान और भगवत्प्रतिमाओं [मूर्तियों] का दर्शन पूजनादि, इन सबों से ॥ ३० ॥ ३१ ॥

और सर्व भूत प्राणियों में हमारे ईश्वर भगवान् विराजमान हैं इस प्रकार के मनसे प्राणियों को सम्यक् प्रकार से तत्तत् कामों से मानें ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणामिन्द्रियाणां वा वर्गो यैः ॥ ३३॥

भगवद्भक्तेर्लिंगान्याह, निशम्येति त्रिभिः। गुणान्भक्तवात्सल्यादीन् अतिहर्षेणोद्गताः पुलका अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठो मुक्तकण्ठ उद्गायति ॥ ३४ ॥ ३५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य भावश्चेष्टादिस्तस्य भावो भावना तेनानुकृते आशयाकृती मनश्शरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः सम्यगेति प्राप्नोति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्येतैः साधनैर्जितैः षण्णां कामक्रोधलोभमोहमदमात्सर्याणां वर्गैर्भगवतीश्वरे भक्तिः क्रियते कर्त्तव्येत्यर्थः भक्तिरहरहर्ध्यानम् एवमहरहः क्रियमाणया(१)ध्यानात्मिकयोत्तरोत्तरसाक्षात्कारेच्छात्मिकया भक्तिपरंपरया यया वासुदेवे ध्यानात्मिकाया भक्तेः प्रीत्यात्मिकां भक्तिं लभते इत्याह—वासुदेवे इति । ययाऽहरहः क्रियमाणया गुरुशुश्रूषादिसाधनानुगृहीतया अनुध्यानात्मिकया उत्तरोत्तरसाक्षात्कारेच्छात्मकपरभक्त्यपरपर्यायया वासुदेवे भगवति रतिं परमभक्त्यपरपर्यायभूतां निरन्तरानुबुभूषात्मिकां तत्प्रीतिरूपां लभत इत्यर्थः ॥ ३३ ॥

एवं विधभक्तियोगनिष्पत्तिलिङ्गानि वदंस्तेन परिनिष्पन्नेन भगवद्भक्तियोगेन परमात्मानं प्राप्नोतीत्याह—निशम्येति त्रिभिः । यदा भगवतो गुणानतुल्याननितरसाधारणान् । तथा लीलातनुभिः स्वेच्छोपात्ताप्राकृतदिव्यावतारविग्रहैः रामकृष्णादिभिः कृतानि कर्माणि चेष्टितानि निशम्य श्रुत्वा अतिहर्षेणोद्गता उदञ्चिताः पुलकाः रोमाणि अश्रूणि आनन्दबाष्पबिन्दवश्च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः मुक्तकण्ठः उद्गायति अत्युच्चैर्गायति रौति ध्वनति नृत्यति च ॥ ३४ ॥

सर्वदाच ग्रहग्रस्त इव हसति क्वचिदाक्रन्दते रोदिति क्वचिच्च ध्यायति क्वचिच्च जनं भगवदात्मकं वन्दते नमस्करोति क्वचिच्च पुनः पुनः श्वसन् श्वासं मुञ्चन् गतत्रपो निर्लज्जः हे नारायण ! जगत्पते ! हरे ! इतीत्थं वक्ति वदति तदेत्युत्तरेणान्वयः इयमेव भक्तियोगस्य निष्पत्त्यवस्थेति भावः ॥ ३५ ॥

तदा एवं परिनिष्पन्नभक्तियोगावस्थायां पुमानुक्तविधभक्तियोगनिष्ठः महीयसा सर्वोत्तमेन भक्तियोगरूपेणोपायेन प्रारब्धावसाने मुक्तं समस्तबन्धनं भगवत्प्राप्तिविरोधिपूर्वोत्तरपुण्यपापात्मकाघरूपं यस्मात्तादृशो निर्दग्धो नितरां दग्धो बीजाऽनुशयः संसृतिमूलभूतकर्मवासनात्मको यस्य तस्य भगवतो भावः प्रकारः आकृतिरित्यर्थः । तस्य भावो भावनानुऽध्यानं तेनाऽनुकृतः आशयोन्तःकरणम् आकृतिर्विग्रहश्च यस्य भगवता समानरूप इत्यर्थः । अधोक्षजं भगवन्तमुपैति प्राप्नोति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यया भक्त्या हरौ रतिमुपासनां लभते तया स्वरूपानन्दाऽनुभवलक्षणां रतिं लभत इति परम्परया योज्यम् ॥ ३३ ॥

(१) ध्यानात्मिकया भक्त्या प्रीत्यात्मकां प्रकृष्टां भावनां लभते इत्यान्ध्राक्षरमुद्रित पुस्तके ।

सृष्ट्यादीनि कर्माणि कंसवधादीनि वीर्याणि उद्गानादिकं न सर्वभक्तसाधारणं तदुक्तम्—

"केचिद्भक्ताः प्रनृत्यन्ति गायन्ति च यथेप्सितम् ।
केचित्तूष्णीं भजन्त्येव केचिच्चोभयकारिणः" ॥

इति ॥ ३४ ॥ ३५ ॥

एतदेवाह— तद्भावेति । तस्य भावे यथा स्वरूपे भावोक्तिस्तस्यानुकृतेऽनुकूलत्वेन प्रकटित आशयाकृती अन्तकरणाकारौ यस्य स तथा कश्चिदुद्गानेनान्तरा भक्तिं प्रकटयति, कश्चिद्रोदनाश्रुपातकरणेन कश्चिन्नर्तनेन कश्चित्तूष्णीं भजनेनेति तस्य ब्रह्मणो भावो लीला तत्र यो भावो भक्तिस्तया रन्धिताभिप्रायाकार इति वा स्थानाभिप्राय आशय इति वा निर्दग्धं कर्मबीजं यस्य स तथा स चानुशयोन्तःकरणं यस्य स तथा अनुशयः संसारो वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तस्यैवोपायस्यैवाङ्गान्युक्त्वाऽऽह—एवमिति । एवं पूर्वोक्तगुरुशुश्रूषादिप्रकारेणैव न तु तदर्थंपृथक्प्रयत्नेन निर्जितकर्मबीजलक्षणकामादिभिर्जनैः पुनरपि भक्तिः क्रियत एव ॥ ३३ ॥

निशम्येति त्रिकम् ॥ ३४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रतेश्चिह्नान्याह, निशम्येति । कर्माणि दधिपयश्चौर्यादीनि गुणान् भक्तवात्सल्यादीन् वीर्याणि गोवर्द्धनोद्धरणकंसवधादीनि ॥ ३४ ॥

हरे ! जगत्पते ! नारायणेति वाचा वक्ति आत्मना मनसा च मतिर्मननं यस्य सः तस्मिन् भावा दास्यसख्यादयस्तेषां भावना दासोऽहं सखाहमित्याद्यात्मनो मननं तेन अनुकृते अनुरूपीकृते आशयाऽऽकृती मनः शरीरे येन सः न च शरीरसद्भाव एव संसार आशंक्य इत्याह, निर्दग्धं पूर्वमेवाविनष्टं वीजं प्राकृती बुद्धिः अनुशयो विषयवासना च यस्य सः महीयसा अनुरागमार्गवता सामतिः अधोक्षजसंयोगं प्राप्नोति ॥ ३५—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं यया गुरुशुश्रूषणादिवहुङ्गया वासुदेवे रतिं परां भक्तिं लभते मुमुक्षुः सापि निर्जितः षण्णामिन्द्रियाणां वर्गो यैस्तैरेव क्रियते न त्वजितेन्द्रियैरित्यन्वयः ॥ ३३ ॥

रतिशब्दोक्ताया परभक्तेर्लिङ्गानि वदन् तया सर्वबन्धाविनिर्मुक्तो भवतीत्याह—निशम्येति त्रिभिः । वासुदेवस्य अतुल्यान् सर्वेश्वरत्वसर्ववेदैकवेद्यत्वसर्वशक्तित्वसर्वात्मत्वादीन् अनुपमान् गुणान् लीलातनुभिः स्वेच्छोपात्ताप्राकृतविग्रहावतारैः कृतानि कर्माणि वीर्याणि प्रभावांश्च निशम्य श्रुत्वा अतिहर्षेणोद्गताः पुलका अश्रूणि वा तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः प्रकृष्टा उत्कण्ठा यस्य सः तथाभूतः यदा उद्गायति उच्चैर्गायति रौति जयकृष्णेत्यादीन् पुण्यान् शब्दान् करोति नृत्यति च ॥ ३४ ॥

आत्मनि परमात्मनि मतिर्यस्य यदा च ग्रहग्रस्त इव कचित्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ।
तद्ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥
कोऽतिप्रयासोऽसुरबालकाः ! हरेरुपासने स्वे हृदि छिद्रवत्सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः साऽतिशया न निर्मलाः ।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मानं भगवद्दासत्वेन कृतार्थं मत्वा हसति कचिच्च भगवन्तं दुर्दर्शं मत्वा स्वकृतसाधनानां तत्कृपां विनाऽकिञ्चित्करत्वं च मत्वा आक्रन्दते रोदिति कचिच्च भक्तवत्सलत्वदीनबन्धुत्वसर्वशरण्यत्व पतितपावनत्वादीन् भगवद्गुणान् स्मृत्वा तमेव भजनं दृढनिश्वासेन ध्यायति कचिच्च गता भगवन्नामोच्चारणादिसङ्कोचकरी अमङ्गला त्रपा लज्जा यस्य सः हे हरे ! इत्यादि वक्ति ॥ ३५ ॥

तदा प्रारब्धक्षये मुक्तानि समस्तानि बन्धनानि यस्य सः निर्दग्धबीजरूपः संसृतिहेतुः अनुशयः संसारिकवासनाग्रंथिर्यस्य सः तस्य भगवतो भावः कार्यकारणत्रिगुणप्रकृतिविलक्षणस्व-रूपगुणविग्रहवत्वं तस्य भावो ध्यानं तेन अनुकृतोऽनुयोजितः आशयोऽन्तःकरणं ततुपलक्षिताप्राकृतसकलकरणकलापः भक्तिरप्राकृतविग्रहश्च यस्य सः भक्तिप्रयोगेण भक्तिरूपेण प्रकृष्टयोगेन अधोक्षजं भगवन्तं प्राप्नोति "निरञ्जनः परमं साम्यमुपैति "इदं ज्ञानमुपाश्रित्य मनसाधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥ इति श्रुतिस्मृतिप्रसिद्धं भगवत्साधर्म्यलक्षणं मोक्षं प्राप्नोतीत्यर्थः ॥ ३६ ॥

———

भाषा टीका ।

इस प्रकार जितेन्द्रिय होकर जगन्नियंता भगवान वासुदेव के विषय भक्ति करे, कि जिससे रति को प्राप्त हो ॥ ३३ ॥

भगवान में रति प्राप्त होने पर, भगवान ने लीला-शरीर को धारण कर जो कर्म किये, उन कर्म वीर्य और गुणों को सुनकर जब अति हर्ष से पुलकित गात्र और अश्रुओं से गद्गद कण्ठ होजाता है तब मुक्त कंठ होकर उंचेस्वर से गान करता है रोता है, और नांचता है ॥ ३४ ॥

जब ग्रहग्रस्त सरी का हो जाता है तब कभी हँसता है कभी आक्रोश करता है, किसी समय ध्यान करता है, किसी समय मनुष्यों दण्डवत करता है, कभी बडी श्वास लेता हुआ परमात्मा में मन लगा कर, हे हरे ! हे जगत्पते ! हे नारायण ! इस प्रकार गिलिज्जहोकर नाम सङ्कीर्तन करता है ॥ ३५ ॥

पुरुष जब ऐसा हो जाता है तब समस्त बन्धनों से छूटकर भगवान की चेष्टाकी भावनासे भावित हुआ अन्तःकरण और शरीर जिसका ऐसा, और महान् भक्ति के प्रयोगसे निर्दग्ध हो गया वासना रूप संसार का बीज जिसका ऐसा हो कर अधोक्षज श्रीहरिको प्राप्त होजाता है ॥ ३६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः किमत आह—अधोक्षजस्यालम्भं मनसा स्पर्शम् पाठान्तरे तस्याऽऽश्रयणम् अशुभात्मनः अशुभो रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्तकं बुधा विदुस्तदेव ब्रह्मणि निर्वाणं लयो मोक्षस्तदात्मकं सुखं विदुः हृदीश्वरमन्तर्यामिणम् ॥ ३७ ॥

भक्तिरशक्येति च न मन्तव्यमित्याह—क इति। छिद्रवदाकाशवद्धृदि तिष्ठतः विषयाणामुपपादनैरर्जनैः किम् । तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे सूकरादिसाधारण्यापत्तेरित्यर्थः न चैवमादौ पौनरुक्त्यदोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ ३८ ॥

अनर्थकं विषयार्जनमित्याह—राय ऽर्थोः क्षणभङ्गुरमायुर्यस्य तस्यैते कियत्प्रियं कुर्वन्ति तदुक्तमितिहासेषु "धनं हि पुरुषो लोके पुरुषं धनमेव वा । अवश्यमेकं त्यजति तस्मात्किं धनतृष्णया" इति ॥ ३९ ॥

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपपन्नं च सुखं स्वर्गपदास्पदम्" इत्यत्रं श्रुताः स्वर्गादिभोगा अपि न सेव्या इत्याह, एवं हीति। क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इति "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः। अत एव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्धादिमत्त्वात् न विद्यते दृष्टं श्रुतञ्च दूषणं यस्मिन् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपैतु ततः किमत आह—अधोक्षजेति । इह लोकेऽशुभाशमनस्तापत्रयदुःखितमनसः शरीरिणः संसृतिचक्रं चक्रवत्परिवर्त्तमानानिष्टरूपा संसृतिस्तस्याः शातनं निवर्त्तकमधोक्षजस्यालम्भः स्पर्शः प्राप्तिरितियावत् एवं भगवत्प्राप्तेरनिष्टनिवर्तकत्वमुक्तम्. अथेष्टप्रापकत्वमाह—तदधोक्षजालम्भनमेव ब्रह्मनिर्वाणसुखं ब्रह्मसम्बन्धि यन्निर्वाणं निर्वाणं मोक्षस्तद्दशायामनुभूयमानमित्यर्थः । तत्सुखं यस्मिंस्तादृशं, यद्वा, निर्वाणं निरतिशयानन्दो ब्रह्मरूपं यन्निर्वाणं तस्य सुखमनुभवरूपं यस्मिंस्तादृशं बुधाः ब्रह्मविदो विदुः यतोऽनिष्टनिवर्तनेष्टप्रापणञ्च भगवत्प्राप्तिसाधनभूतस्तद्भक्तियोगस्ततो यूयं हृदये हृद्गते "अय गतौ"हृदयस्थानगतं जीवे इत्यर्थः।"हृदिह्ययमात्मा प्रतिष्ठतः" इति श्रुतेः। तस्मिन्नीश्वरं नियन्तृतयावस्थितं हृदयपुण्डरीके भगवन्तं भजध्वम् अनेन "तमात्मस्थं येऽनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" इति श्रुत्यर्थः. प्रत्यभिज्ञायते ॥ ३७ ॥

तदेवं निरतिशयानन्तस्थिरफलभगवत्प्राप्तिसाधनधर्मानुष्ठानस्य दुःशकत्वशङ्का निरासं "न ह्यच्युतं प्रीणयतो बह्वायासः" इत्युपक्रम्य तद्धर्मतदनुष्ठानप्रकारकथनेन तदाशङ्कां निरस्याथैवमस्मिन् सुकरे भगवद्धर्मानुष्ठाने न कोऽपि प्रयास इत्युपसंहरन् वैराग्यजननाय स्वर्गस्वाराज्याद्यर्वाचीनपुरुषार्थस्य साऽतिशयाल्पास्थिरत्वं वक्तुं तावद्दृष्टान्ततया वैषयिकस्यैहलौकिकसुखस्य तुच्छत्वमाह—क इति द्वाभ्याम् । हे असुरबालकाः ! खे स्वकीये हृत्पद्मे छिद्रवदाकाशवत् सतो वर्त्तमानस्य सख्युः सत्यकामत्वादिनित्याविर्भूतगुणाष्टकाश्रयस्य आत्मनः परमात्मनः अशेषदेहिनां सामान्यतः साधारणतया सख्युः "द्वासुपर्णा" इत्यादि श्रुत्युक्त सख्ययुक्तस्य हरेरुपासनेन कोवाऽतीव प्रयासः न कोऽपीत्यर्थः । विषयाणां शब्दादीनामुपपादनैरर्जनैः किम् ? न किमपि तेऽतितुच्छा इति भावः । छिद्रवत्सत इत्यनेन"यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः"इति दहरविद्योदितभूताकाशदृष्टान्तोऽभिमतः तत्र हि भूताकाशस्येवाग्निवायुसूर्याचन्द्रमोविद्युन्नक्षत्रादिकृत्स्नजगदाधारत्वं हृत्पुण्डरीकस्थस्य दहराकाशस्य प्रतिपादितम्"उभावग्निश्चवायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चाऽस्येहाऽस्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्" इति. एवं हृत्पुण्डरीके दहराकाशरूपेण वर्त्तमानस्याऽपहतपाप्मत्वादिगुणाष्टकयुक्तस्य हरेरुपासनं सुशकमित्यभिप्रायः ॥ ३८ ॥

"किं विषयोपपादनैः"इत्यनेन सूचितं विषयाणामल्पास्थिरत्वसातिशयत्वरूपं तुच्छत्वमुपपादयति—रायइति । रायो धनानि सुतादय इत्यादिशब्दनान्ये पित्रादयो देहानुबन्धिनो विवक्षिताः मही क्षेत्रम् आजीविकारूपं विषयो वा कुञ्जरा गजास्तेषां कोशः आज्ञा धनकोशस्य राय इत्यनेनोक्तत्वात् भूतयः भोग्यभोगोपकरणादिसमृद्धयः सर्वे च एते अर्थकामाः काम्यमाना अर्थाः चयेनाल्पकालेन क्षणभङ्गुरमायुरवस्थानं येषां ते अत एव चञ्चला अस्थिराः मर्त्यस्य मरणशीलस्य पुंसः कियत्प्रियं सुखं कुर्वन्ति जनयन्ति न कियदपि, साऽतिशयमस्थिरमल्पमेव सुखं जनयन्ति न तु निरतिशयमनन्तं स्थिरञ्चेत्यर्थः ॥ ३९ ॥

अथैतद्दृष्टान्तेन स्वर्गादेरपि साऽतिशयाल्पास्थिरत्वान्याह—एवं हीति । यथा रैप्रभूतिजन्यानि सुखानि तुच्छानि एवं क्रतुभिर्यागादिकर्मभिः कृताः सञ्चिता अमी स्वर्गादयो लोका अपि क्षयिष्णवो नश्वराः साऽतिशयाः न निर्मला अनिर्मला दुःखमिश्राश्चेत्यर्थः । अत्र "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते, प्लवाह्येते अदृढा यज्ञरूपाः, परीक्ष्य लोकान् कर्मचितान्" इत्यादि श्रुत्यर्थोऽभिप्रेतः । यत एवं तस्माद्दृष्टश्रुतदूषणं न विद्यते दृष्टं श्रुतं वा दूषणं यस्य श्रुतिस्मृतिभ्यामदूषितम्, किन्तु प्रशस्तमित्यर्थः । तं भक्त्यैवोपायेन लभ्यं परं परमपुरुषमात्मलब्धये भजत आत्मलाभाय आत्मलब्धये आत्मनः स्वस्मै भजत । अन्यथा संसरत आत्मनोऽन्ततः स्थावरत्वादिप्राप्त्या असत्प्रायतैव स्यात् इति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्यनन्तरं भगवत्कथा निर्वाणसुखजननीत्याह, अधोक्षजेति । अधोक्षजालापं संसृतिचक्रशातनं नाशनं तद्धरिविषयकथाकथनं ब्रह्मनिर्वाणसुखं ब्रह्मणोऽनुग्रहात्प्राप्य मुक्तिसुखं विदुरिति यस्मात् देहहृदयस्थितं जीववत् हृदि स्थितमीश्वरं भजध्वमित्यन्वयः "योऽयं बहिर्धा पुरुषादाकाशो योवै थं वोवसयो यमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशो यं वा वसयो यमन्तर्हृदय आकशः" इति श्रुतेः । हृदीश्वरं मनः प्रेरकत्वेन तत्स्वामिनं"स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः"इति वाक्याच्च ॥ ३७ ॥

भगवदुपासनं दवीयस्त्वेन बहुपाथेयसाध्यत्वेन भागीरथीयात्रावत् दुःसाधनं । किं नेत्याह, कोऽतिप्रयास इति । अस्यात्मनो जीवस्य स्वे स्वाधीने हार्द छिद्रवदाकाशवत्सतः स्थितस्य हरेरुपासने कोऽतिप्रयासः न कोऽपि सर्वगतत्वेन समीपस्थत्वात् "तद्दूरेतदन्तिके" इति श्रुतेः । अशेषदेहिनां सामान्यतः साधारणत्वेन हृदिस्थितत्वेन सख्युः तस्माद्विषयोपपादनैः किम् ? खाखैरिति शेषः ॥ ३८ ॥

भक्तेरन्तरङ्गसाधनं वैराग्यमेवेत्याशयेनाह, राय इति ॥ ३९ ॥

विहितयज्ञसाध्यत्वेन स्वर्गादेर्नित्यत्वं सम्भाव्यमिति, नेत्याह, एवमिति । एवं मर्त्यलोकवदनिर्मलाः प्राकृतत्वात् न दृष्टं श्रुतं दूषणं यस्य स तथा तं सहचरीभूतवैराग्येणैकया मुख्यया आत्मलब्धये स्वरूपानन्दानुभवलक्षणमुक्तिप्राप्त्यर्थमात्मनो देहादेर्विविच्य स्वरूपज्ञानलक्षणलाभाय वा ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्वधोक्षजालम्भे सति संसारो विद्यते न वा तत्राह—अधोक्षजेति । शातनमिति शीलार्थे ल्युट् । तत्स्वभावतः स्वत एव सोऽपि यातीति भावः ॥ ३७ ॥

सामान्यतः सख्युः "सयुजौ सखायौ" इत्युक्तेः ॥ ३८—३९ ॥

आत्मलब्धये आत्मनः स्वस्यैवेशस्य लब्धये । यद्वा आत्मनो लब्धये भजत । अन्यथात्मानं नाशयिष्यथ इति भावः ॥ ४०—४७॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, ब्रह्मनिर्वाणसुखमेव पुरुषार्थसार इति प्रसिद्धिः । सत्यं तदपि अधोक्षजसंयोगसुख एवान्तर्भवतीत्याह, अधोक्षजस्यालम्भं मनसा ईषत् स्पर्शं साक्षात् प्राप्तिं वा संसृतिचक्रस्य शातनं निवर्त्तकं विदुर्जानन्ति. तदेव ब्रह्मनिर्वाणसुखं च अधोक्षजस्यैव ब्रह्मत्वात् तच्चरणमाधुर्य्यानुभवस्यैव परमानन्दरूपत्वेन निर्वाणसुखरूपत्वात् तत्र दास्यादिभावत्वेन ममताविशेषोत्थं तु सुखमधिकमपारमेव यथा सर्वजनसुभगे परमाह्लादके चन्द्रे दृष्टे यःस्वाभाविक आनन्दस्तस्मात् कोटिगुणित आनन्दःस्वपुत्रे षोडशे धवधिरेपि सर्वजनदुर्भगेपि ममतोत्थः स्यादित्यतो भगवति दास्यादिभाववत्वे परब्रह्मणिस्वरूपोत्थ एव परमानन्दाब्धिस्तत्रैव यदि ममतोत्थोपि स्यात्तदा किं वक्तव्यमानन्दपारावारपरस्सहस्रसम्मर्दमध्यपातित्वसौभगोत्कर्षमहामहत्त्वम् अतएवोक्तम् "यानिर्वृत्तिस्तनुभृताम्" इत्याद्यन्यत्र च "ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः । नैति भक्तिसुखांभोधेः परमाणु तुलामपि" इति अधोक्षजालम्बमिति पाठे अधोक्षज आलम्बो विषयालम्बनो यत्र तम् अर्थाद्दास्यसख्यादिरसं हृदीश्वरं हृदयनाथमिति दास्यादिभावविशिष्टा भक्तिर्व्यञ्जिता ॥ ३७ ॥

सर्वश्रेष्ठाया अपि भक्तेः सुखसाध्यत्वमाह, कोतीति । छिद्रवत् आकाशवत् आत्मनो जीवस्य सख्युः "सयुजौ सखायौ" इतिश्रुतेः न हि सख्युरुपासने किञ्चित् कष्टमिति भावः । उपास्यस्य स्वतो विद्यमानत्वात् प्रियत्वाच्च उपासनस्य च श्रवणादिरूपत्वात् तत्साधनानां श्रवणादीनाञ्च स्वत एव विद्यमानत्वात् नहि कुतश्चन काचन तत्सामग्री आनेतव्येति भावः । वरं नरकसाधनेऽपि श्रमोस्तीति व्यञ्जयन् वैषयिकसुखप्रवृत्तिं निन्दति, विषयाणां स्रक्चन्दनवनितादीनाम् उपपादनैर्द्रव्यादिनोपार्जनैः किम् ? तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे सूकरादिसाधारण्यापत्तेरिति भावः ॥ ३८ ॥

न च कामिनां वैषयिकं सुखमपि वस्तुतोऽस्तीत्याह, रायो धनानि अर्थाश्च कामाश्च ॥ ३९ ॥

स्वर्गादिभोगा अपि न सेवार्हा इत्याह, एवं हीति । क्षयिष्णवः "सयथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः पुण्यतारतम्येन सातिशयाः स्पर्द्धादिमयत्वाच्च न निर्मलाः आत्मलब्धये आत्मकर्तृकहरिप्राप्तये परमात्मप्राप्तये वा यद्वा आत्मरूपरत्नस्य प्राप्त्यै अन्यथा तत्स्वर्गनरकादि कर्दमे क्षिप्तं नष्टमेव जानीतेति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यतः अधोक्षजस्य आलम्भमभजनीयतया ग्रहणं अशुभे संसारे आत्मा यस्य तस्य बद्धजीवस्य संसृतिचक्रशातनं जन्ममरणप्रवाहनिवर्तकम् । तत्तस्मादधोक्षजालम्भात् शरीरिणां ब्रह्मणाऽधोक्षजेन सह निर्वाणं निर्गता वाणाः उपद्रवा यस्मात्तथाविधं सुखं मुक्त्यानन्दं बुधा विदुः अतः हृदये हृदीश्वरमधोक्षजं भजध्वम् ॥ ३७ ॥

अधोक्षजस्य सुकरत्वमाह, हे असुरबालकाः ! अशेषदेहिनां हृदि सामान्यतः सतो विद्यमानस्यापि स्वे हृदि तु स्वकीये भक्तहृत्सरोजे तु छिद्रवत् छिद्रे इव स्वतः चोरो यथा महता यत्नेन छिद्रे धनलोभेन धनिकगृहछिद्रे प्रविष्टो भवति तद्वद्भक्तिरसलोभेन स्वभक्तहृदि प्रविष्टस्य हरेः आत्मात्मीयभरन्यासवेलायां सर्वस्वहारिणः स्वस्य भक्तजनस्य आत्मनः अन्तर्यामिणः सर्वकृत्यनिर्वाहकतया सख्युश्च उपासने को ऽतिप्रयासः विषयोपपादनैर्विषयाणामर्जनैस्तदुपासनविरोधिभिः किं प्रयोजनम् ? न किमपीत्यर्थः ॥ ३८ ॥

विषयोपपादनस्य निष्प्रयोजनत्वं दर्शयति—राय इति । क्षणभङ्गुरमायुर्यस्य तस्य रायो धनानि कलत्रादयः सर्वे अर्थाश्च कामाश्च चलाः क्षणभंगुराः कियत्प्रियं कुर्वन्ति ? न किमपीत्यर्थः । तथोक्तमितिहाससमुच्चये "सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ताः मरणान्तं हि जीवितम्" इति भगवताप्युक्तं "ये हि संस्पर्शजाभोगाः दुःख योनय एव ते । आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुधः" इति ॥ ३९ ॥

यथा ऐहिकाः धनादिपदार्थाः चलाः एवं अमी स्वर्गादयः क्रतुभिः कृता निर्मिताः क्षयिष्णवः चला एव सातिशयाः क्रतुतारतम्यतोऽतिशयेन युक्ताः हर्षशोकप्रदा इत्यर्थः । न निर्मलाः मलिनाश्च यस्मादेवं तस्मात् परं निरतिशयानन्दनिधिं न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन्तम् ईशं सर्वनियन्तारम् आत्मलब्धये तत्प्राप्त्यर्थम् एकया सर्वेभ्यः साधनेभ्यः श्रेष्ठया भक्त्या भजत ॥ ४० ॥

भाषा टीका ।

रागादियुक्त मनवालों के संसार चक्र का नाश करने वाला केवल भगवानही का ध्यान है । उसी को बुध लोग निर्वाण ब्रह्म सुख जानते हैं, तिसी कारणसे अपने हृदयमें हृदीश्वर (अन्तर्यामी) श्रीहरि को भजो ॥ ३७ ॥

हे असुर बालको ! आकाशवत् हृदयमें रहने वाले हरिके उपासनमें कौनसा प्रयासहै । क्योंकि वह सामान्यसे समस्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदध्यर्थेह कर्माणि विद्वन्मान्यसकृन्नरः ।
करोत्यतो विपर्यासममोघं विन्दते फलम् ॥ ४१ ॥
सुखाय दुःखमोक्षाय सङ्कल्प इह कर्मिणः ।
सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥ ४२ ॥
कामान्कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥ ४३ ॥
किमु व्यवहितापत्यदारागारधनादयः ।
राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥
किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ।
अनर्थैरर्थसङ्काशैर्नित्यानन्दमहोदधेः ॥ ४५ ॥
निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः ! ।
निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४६ ॥
कर्माण्यारभते देही देहेनात्मानुवर्तिना ।
कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥
तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥

भाषा टीका ।

देहियों का सखा और आत्मा है, उसीका उपासन करो, और विषयों के उपपादनसे क्या प्रयोजन है ॥ ३८ ॥

द्रव्य स्त्री पशु पुत्रादि गृह पृथ्वी हाथी खजाना संपदायें, और सब चीजें, तथा भंगुर आयुवाले इस प्राणी का कितना प्रिय करते हैं ? क्योंकि आप भी चल हैं ॥ ३९ ॥

जैसे इस लोक के पदार्थ नाशमान है ऐसे ही परलोक में यज्ञ यागादि से संपादित जो लोक हैं वे भी सब नाशमान और सातिशय हैं (अर्थात् ऐसे तरतम भाव वाले हैं कि जिसमें एक दूसरे के वैभव को देख कर जला करें) तस्मात् जिसका दोष कभीं देखने सुनने में नहीं आया अपने आत्म लाभ के लिये उसी परमात्मा को भक्ति से भजो ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च यदध्यर्थं यत्सङ्कल्प्य यतः सङ्कल्पिताद्विपर्यासम् विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

तदेव दर्शयति, सुखायेति । ईहया इच्छया क्रियया वा यः पूर्वमनीहाया हेतोः सुखेनावृतो व्याप्त आसीत्स ईहया दुःखमाप्नोत्येव ॥ ४२ ॥

किञ्च कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यो न त्वात्मीयो भंगुरश्च ॥ ४३ ॥

किमु देहाद्व्यवहिता अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यम् ॥ ४४ ॥

किञ्च स्वयं पुरुषार्थरूपस्य किमेतैरतितुच्छैरित्याह, किमेतैरिति ॥ ४५ ॥

भोगावसराभावाच्चैतैः क उपयोग इत्याह, निरूप्यतामिति । प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियान्स्वार्थ इति वाऽन्वयः ॥ ४६ ॥

ननु, कर्मसु समाप्तेषु भोगावसरः स्यात्तत्राऽऽह—कर्माणीति । न चेदं कर्म तस्य फलं देहादिकञ्च परमार्थ इत्याह, उभयं कर्म च देहं च अविवेकतोऽज्ञानेनैव तनुते ॥ ४७ ॥

अर्थादयो यदपाश्रया यदधीनाः ॥ ४८ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च वैषयिकसुखलिप्सया कुर्वन्नपि न तत्प्राप्नोति किन्तु तद्विपरीतं दुःखमेवातस्तत्परित्यज्य भगवन्तमेव भजतेत्याह—यदर्थ इति. विद्वन्मानी नरः विद्वांसमात्मानं मन्यते इति विद्वन्मानी केवलकर्ममीमांसोपचितबुद्धिरित्यर्थः । नरो यदर्थं यद्वैषयिकसुखार्थमिह लोके असकृद्वारंवारं कर्माणि यागादीनि करोति स ततोऽभिलाषितसुखाद्विपरीतं फलं दुःखात्मकमेवामोघमवश्यं विन्दते प्राप्नोति ॥ ४१ ॥

तदेव दर्शयति—स चेति । यः पुमाननीहायां निमित्तभूतायां वैषयिकसुखार्थव्यापारारम्भात्प्राङ्निर्व्यापाराद्धेतोः सुखावृतः सुखेन व्याप्त आसीत् स एवेहया आरब्धेन व्यापारेण हेतुना दुःखमेवाप्नोति स्वर्गादिसुखार्थयागादिव्यापारेण दुःखमेवाप्नोतीत्यर्थः। भगवत्प्राप्त्यर्थभक्तियोगानुष्ठानेन दशायामपि निरतिशयानन्दभगवदनुभवरूपं सुखमेव प्राप्नोति अन्ततस्तु नित्यनिरतिशयब्रह्मानन्दमग्नो भवति स्वर्गाद्यर्थं यागादिकं कुर्वाणस्तु जीवद्दशायां वित्ताद्यार्जनेन तदनुष्ठानप्रयासरूपं दुःखमन्ततस्तु सातिशयाल्पास्थिरफलरूपं स्वर्गादिकं तन्निमित्तपुण्यचये तु नरकमिति वैषम्यमभिप्रेतम् ॥ ४२ ॥

किञ्चेह लोके पुरुषो यदर्थं यस्य देहस्य प्रयोजनाय काम्यन्त इति कामाः 'कर्मणि घञ्' तान् शब्दादीन् कामैः 'करणे घञ्' कामोत्पत्तिसाधनैः कामयते इच्छति स एव तु देहः पारक्यः श्वसृगालादिभक्ष्यः भङ्गुरो नश्वरः उपैति कदाचिद्देहिनमालिङ्गति कदाचिच्चापैति जहातीत्यर्थः ॥ ४३ ॥

देहस्यैवेयमवस्था किंपुनर्देहानुबन्धिनां दाराद्दीनामित्याह, किमिति । देहेनैव साक्षादात्मनः सम्बन्धो दारादिभिस्तु देहद्वारेति व्यवहितेत्युक्तम् व्यवहिता ये दारादयः अगारं मन्दिरम् आदिशब्देन पशुपुत्रादयः कोशो वस्त्रादिपेटिका बलं चतुरङ्गयुक्तम् भृत्याः परिचारकाः एते सर्वे ममतास्पदाः ममेमे इत्यभिमानविषयाः उपयन्त्यपयन्तिचेति किमुवक्तव्यमित्यर्थः॥ ४४ ॥

ननु, न देहार्थो विषयार्थो व्यापारः किन्तु आत्मार्थ इति चेत्तर्हि नित्यानन्दसुखरूपस्यात्मनः समुद्रस्य विप्रुडिव किमेत द्वैषयिकं सुखमित्याह—किमेतैरिति । नित्यानन्दः स एव रसः स एवोदकं तस्याश्रयस्यात्मनः एतैर्देहेन साकं नश्वरैरत एव तुच्छैरल्पैर्वस्तुतोऽनर्थैः पुरुषार्थत्वशून्यैरर्थसङ्काशैः पुरुषार्थाभासैः कामैः किं प्रयोजनं तदनुभवजनितं सुखमतितुच्छमित्यर्थः ॥ ४५ ॥

किञ्चाऽत्यायासेनार्जितमपि वैषयिकसुखमनुभूयमानदुःखापेक्षयाल्पमेव तदनुभवावसराभावादित्याह—निरूप्यतामिति । हे असुराः ! इह संसारे कर्मभिः प्राचीनैः क्लिश्यमानस्य दुःख्यतः देहभृतो निषेकादिष्ववस्थासु स्त्रीसम्भोगाद्यवस्थासु स्वार्थं उत्पन्न आनन्दः कियान् तन्निरूप्यतां दुःखापेक्षया सुखमल्पमिति भावः । यद्वा निषेकादिष्ववस्थासु पितृरेतोद्वारा मातृयोनिप्रवेशप्रभृतिषु श्मशानान्ताः तासु अवस्थासु प्राचीनैः कर्मभिः क्लिश्यमानस्य अनेन दुःखप्राचुर्यमुक्तम् ॥ ४६ ॥

ननु, निषेकाद्यवस्थायाः कर्मनिमित्तत्वान्निःशेषकर्मक्षये प्रभूतं सुखं स्यादित्याशङ्कां निराकर्तुमन्तरेण परमात्मोपासनं न कदाचिदपि कर्म निवर्तते इत्याह—कर्माणीति । देहात्मानुवर्तिना देहेन तावत्कर्माणि देहान्तरारम्भकाणि पुण्यपापात्मकानि कर्माणि कुरुते तैश्चारब्धैः कर्मभिर्निमित्तभूतैर्देहं तनुते बिभर्ति, तेन पुनः कर्माणि तैश्च पुनर्देहमित्येवं बीजाङ्कुरतुल्या परिवृत्तिर्न निवर्तत इति न कदाचिदपि निःशेषकर्मक्षय इति भावः । कुतस्त्वियं परिवृत्तिस्तत्राह—उभयं तु देहेन कर्माणि कर्मभिर्देहः इत्येतदुभयम् अविवेकतः स्वात्मपरमात्मयाथात्म्याज्ञानादेव हेतोर्भवतीत्यर्थः ॥ ४७ ॥

एवं वैराग्योदयायैहिकामुष्मिकसुखस्याल्पाऽस्थिरत्वादिदुःखमिश्रत्वानर्थावहत्वादिकमभिधायाऽथेश्वरं भजतां यद्यपि सर्वे पुरुषार्थाः सुलभास्तथाप्यनन्यप्रयोजनत्वेनैव तद्भजनं श्रेय इत्याह—तस्मादिति। तस्माद्देहकर्मणोः परिवृत्तिरूपसंसारस्य कदाप्यनिर्मोक्षाद्वैषयिकसुखस्याल्पत्वादस्थिरत्वाद् दुःखमिश्रत्वादनर्थावहत्वाच्च तन्निवृत्तये निश्शङ्कं सदा हरिमाश्रितानां संसृतेर्बन्धहर ईश्वरः अनीहया निष्कामेन भजत, हरिं विशिनष्टि, धर्मश्चार्थश्च कामश्च यदपाश्रया यस्त्रिवर्गस्यापि दाता तमित्यर्थः । तथा च श्रुतिः "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति. "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति "य आत्मदा बलदा य एको बहूनां विदधाति कामान्" इति च. अर्थाद्यो यदपाश्रयास्तं हरिमनीहया भजतेत्यनेन समस्तपुरुषार्थदोऽप्यनीहया भजतामनर्थहेतुं संसृतिबन्धं हरति, ईहया भजतां त्वहितमात्रमेव ददातीति सूचितम् भवति ॥ ४८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवदनर्पणबुद्ध्यानुष्ठितयज्ञादिकर्माऽनर्थहेतुरित्याशयेनाह—यदर्थमिति। यजेतेत्यादि विध्यङ्गानि विपर्यासं दुःखम् अमोघं सदातनत्वेनावध्यम् ॥ ४१ ॥

एतदेव विवृणोति—सुखायेति । ब्रह्मार्पणलक्षणेन करणमनीहा। तदुक्तम् *"अप्रयत्नेन करणमनीहा प्रोच्यते बुधैः"इति ॥४२॥

शाश्वतसुखानुभवकामं विहाय शरीरे सुखकामं प्रयतमानो विमूढत्वेनातिहास्यो बुधैरित्याशयेनाह—कामानिति । काम्यान् कामान् विषयान् यदर्थं यस्य शरीरस्यार्थे पारक्यस्तु श्वसृगालादेर्विद्यमानो न स्वकीयः । व्यवहिताः शरीरमपेक्ष्य दूरस्थाः ॥ ४३—४४ ॥

ननु, विषयभोगार्थं श्रीनारायणोऽपि विग्रहं गृह्णातीति केचित्तत्राह, किमेतैरिति । आत्मनो हरेः तस्मात्स्वतश्चिदानन्दस्वरूपस्य जीवात्मनो मौलिकादिना किं न किमपि कृत्यमित्यतो वाह, किमेतैरिति ॥ ४५ ॥

विचारासहत्वाद्देहादिना प्रयोजनमित्याह, निरूप्यतामिति । निषेकादिषु गर्भाधानादिष्ववस्थासु कर्मभिः क्लिश्यमानस्य देहभृतः कियान्स्वार्थः इति निरूप्यतामित्यन्वयः ॥ ४६ ॥

---

* अकारवाच्यभगवदुद्देशेन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

संसारस्य प्रवाहरूपेण नित्यत्वाज्जहरेर्ज्ञानमन्तरेण निवृत्तिः स्यादित्याशयेनाह, कर्माणीति। आत्मानुवर्तिना परमात्माधीनेन कर्मदेहश्चेत्युभयमविवेकतोऽज्ञानात् ॥ ४७ ॥

नन्वीश्वरसेवायां भक्तिरेव प्रयोजिका चेष्टार्थादिना प्रयोजनमित्याशङ्कां परिहरन्नुपसंहरति, तस्मादिति। अर्थादेहेरिविषयत्वं साफल्यं भवनीत्यर्थः। ननु, प्रतीतं चेष्टाराहित्यमनीहशब्दार्थं परित्यज्यान्यार्थकल्पने किं प्रमाणम् उक्तं हि प्रमाणमिति चेन्न, तस्य बह्वर्थवाचित्वेन स्वाभिप्रेतार्थसन्देहात् "करणं कारणे कार्ये साधनेऽनुवनादिषु" इत्युक्तेरिति तत्राह, अनीहमिति. श्रमसाध्यक्रियाराहित्यादनीहमित्यभ्योक्तपदार्थः (१) अप्रयत्नेनेति विशेषणाच्च श्रमसाध्यक्रियाराहित्यमेवोच्यते--

"स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिषु।
व्रतबन्धे नाट्यभेदे गीतके कर्मणीन्द्रिये" ॥

इत्युत्तरवाक्ये कर्मण्यपि प्रयोगाच्च ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अनीहया निरुपाधिकया अनीहं तथैव निरुपाधिकृपाकम्। "महत्त्वकामस्त्वगृहकृत्स्वच्छ स्वाम्यतपाश्रयः" इति वक्ष्यमाणात् ॥ ४८--५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यदर्थं यत्सङ्कल्प्य अतः सङ्कल्पितात् विपर्यासं विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

अनीहाया हेतोः सुखात्मनः सुखपरिपूर्णः स्यात् ॥ ४२ ॥

काम्यैः कर्मभिः अपैति नश्यति उपैति पुनरपि दुःखदानार्थम् उत्पद्यायाति ॥ ४३--४४ ॥

आत्मनः स्वस्य नित्यो भजनरूप आनन्दरसोदधिर्यस्य तस्य भक्तजनस्य ॥ ४५ ॥

क्लिश्यमानस्येति भोगेऽवसर एव नास्तीति भावः ॥ ४६ ॥

देहेन मानुषशरीरेण कर्मसाधकेन देहं स्वर्गिशरीरम् उभयं तद्देहद्वयं अविवेकतः तदुभयस्य अहं कर्म कुर्वे इति. अहं कर्मफलं स्वर्गसुखमभुञ्जे, इत्यभिमानमूलत्वात् तदभिमानस्याऽविवेकमूलत्वात् आत्मनश्च देहद्वयातिरिक्तत्वात् ॥ ४७ ॥

तर्हि विवेक एव कर्तव्यस्तत्राह, तस्मादिति। यदपाश्रया यदधीनाः अनडुहां रूपाणां कर्तृत्वभोक्तृत्वादयः स्वाम्यधीना इत्यर्थः। अनीहया कामनाराहित्येन अनीहं निरपेक्षम् ॥ ४८ ॥

(१) तात्पर्योक्तमिदम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्भजनातिरिक्तकर्मगतिमाह, यदर्थं इति। ययोः सुखदुःखमोक्षयोरर्थे कर्माणि असकृत्करोति अतः विपर्यासं विपरीतं फलममोघं विन्दते ॥ ४१ ॥

एतदेव प्रपञ्चयन् कर्मफलेहा दुःखदा कर्मफलानीह सुखदेत्याह--सुखायेति। ईहया कर्मफलेच्छया दुःखमाप्नोति, न सुखम्, अतोऽनीहायाः कर्मफलानीहातः सुखावृतः सुखव्याप्तो भवति॥४२॥

पुरुषो यदर्थं कामान् भोगान् काम्यैः कर्मभिः कामयते स देहस्तु पारक्यः परेषां पितृवृत्तिप्रदादिममताविषयः भङ्गुरोऽनित्यश्च यतो याति जायते उपैति नाशं प्राप्नोति च ॥ ४३ ॥

यद्यव्यवहितोऽहन्तास्पदो देहः पारक्यादि दोषवान् तदा व्यवहिताः ममतास्पदा अपत्यादयः पारक्यादिदोषवन्त इति किन्तु वक्तव्यम् ॥ ४४ ॥

किञ्च अनर्थैरपुरुषार्थरूपैः अर्थसंकाशैः पुरुषार्थवदाभासमानैः एतैरपत्यदारादिभिः देहेन सह नश्वरैरनित्यैः नित्यानन्दमहोदधेः अपरिच्छिन्नपरमानन्दनिधेः श्रीभगवतः सम्बन्धिनः अंशभूतस्य आत्मनः प्रत्यगात्मनः किम्? न किमपि प्रयोजनमित्यर्थः ॥ ४५ ॥

प्राचीनैः कर्मभिर्निषेकादिष्ववस्थासु क्लिश्यमानस्य देहभृतो जीवस्य इह संसारे कियान् स्वार्थः तन्निरूप्यताम् ॥ ४६ ॥

देहेन कर्माणि आरभते देहं तु कर्मभिरारभते एवमुभयं कर्मदेहयुगलमविवेकतो हेयोपादेयबोधाभावतस्तनुते न तु भगवद्भक्त्या मुक्तो भवतीति भावः ॥ ४७ ॥

अर्थाद्यो यदपाश्रया यदधीनाः अनीहया देहिकामुष्मिकपदार्थवासनात्यागेन आत्मानमन्तर्यामिणम् "एषते आत्मान्तर्यामी" इति वेदप्रसिद्धम् अनीहं स्वतोऽवाप्तसमस्तकामत्वात् भोगेच्छारहितं भजत ॥ ४८ ॥

भाषा टीका।

पंडित मानी मनुष्य जिस संकल्प से बारं बार कर्म करता है उस संकल्पित पदार्थ को न प्राप्त होकर विपरीत फल को ही अवश्य प्राप्त होता है ॥ ४१ ॥

इस संसार में कर्म करने वाले पुरुष को सुख की प्राप्ति और दुःख छूटने का ही संकल्प रहता है परंच जब तक चेष्टा नहीं करता तब तक सुख में रहता है, और सुख के लिये चेष्टा करने से सदा दुःख ही को प्राप्त होता है ॥ ४२ ॥

पुरुष जिस देह के पोषण के लिये विषयों के द्वारा नाना प्रकार के भोगों की इच्छा करता है, वह देह तो पराया है अर्थात् श्वशृगालादिकों का भोग्य है, क्षण भंगुर है और आगमापायी है ॥ ४३ ॥

जब साक्षात् शरीर की यह दशा है फिर जो शरीर के संबंधि ममतास्पद हैं जैसे कि पुत्र स्त्री गृह धन राज्य कोश (खजाना) हस्ती अमात्य नौकर चाकर इत्यादि इन तुच्छों से आत्मा का क्या प्रयोजन होने वाला है, क्योंकि ? आत्मा तो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ।
भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च ।
भजन्मुकुन्दचरणं स्वस्तिमान्स्याद्यथा वयम् ॥ ५० ॥
नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ! ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥
न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥ ५२ ॥
ततो हरौ भगवति भक्तिं कुरुत दानवाः ! ।
आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥
दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५४ ॥
एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे दैत्यपुत्रानुशासनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा टीका ।

नित्याऽऽनन्द का महासागर है, और ये सब अर्थ सदृश जान पड़ते हैं, और हैं अनर्थ तथा देह के साथ नष्ट होने वाले है, ॥ ४४—४५ ॥

प्रह्लाद कहते हैं कि–हे असुर पुत्रहो ! तुमही बतलाओ कि इस संसार में निषेक आदि संपूर्ण अवस्थाओं में कर्मों से क्लेशित इस देहधारी का कितना स्वार्थ है ॥ ४६ ॥

देही (जीव) स्वाधीन देह से कर्म करता है, तथा कर्मों से देह को प्राप्त होता है तथा देह और कर्म दोनों अविवेक से अर्थात् हेयोपादेय के अज्ञान से होते हैं ॥ ४७ ॥

तस्मात् अर्थ काम और धर्म ये सब जिसके अधीन हैं कर्मों की चेष्टा न कर के अपने आत्मा उस हरि ईश्वर को भजो ॥४८॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतानां प्राणिनाम् जीवसंज्ञितोऽन्तर्यामी ॥ ४९ ॥

असुराणामस्माकमत्राऽनधिकार इत्यपि न वाच्यमित्याह, देव इति पञ्चभिः ॥ ५० ॥ ५१ ॥

अमलया निष्कामया अन्यद्विडम्बनं नटनमात्रम् ॥ ५२ ॥ ५३ ॥

अच्युततामसृतत्वम् ॥ ५४ ॥

अध्यायद्वयोक्तमुपसंहरति, एतावानिति । तदीक्षणं गोविददृष्ट्या सम्माननम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दैत्यकुमाराणां सर्वेषामात्मनां भगवद्भजनेऽनधिकार-शङ्कां निराकुर्वन्ननीहया भजतामेवानिष्टनिवृत्तिरिष्टप्राप्तिश्चेति स्वदृष्टान्तेनाह—सर्वेषामपीति द्वाभ्याम् । स्वकृतैः स्वसृष्टैर्महद्भिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतैः पृथिव्यादिभिः कृतानां सृष्टानां भूतानां देवादीनां सर्वेषां भगवान् बीजसंज्ञितः आदिकारणभूतः आत्मा अत एव निरतिशयप्रिय ईश्वरोऽन्तःप्रविश्य नियन्ता तावद्भगवान् सर्वेषां साधारण इति भावः ॥ ४९ ॥

अतो देवादिजातिविभागमन्तरेण यः कश्चिन्मुकुन्दचरणं भजन् स्वस्तिमान्निवृत्ताऽनिष्टः प्राप्तेष्टश्च स्यादेव यथा वयमिति वयमसुरा अपि भगवन्तं भजन्तः स्वस्तिमन्तोऽभूम, तथेतरेऽपीत्यर्थः । यथा वयमिति दृष्टान्तस्वारस्याद्भगवतः सर्वभूतसाधारण्यप्रतिपादनस्वारस्याच्च निरुपाधिकोक्तविधात्मत्वादिसम्बन्धज्ञानपूर्वकमनन्यप्रयोजनेन भजन्तः स्वस्तिमन्तो भवेयुरन्यथा तु समीहितमाप्नुवन्त इति सूचितम्. तथा च श्रुतिः "नान्यः पन्था अयनाय विद्यते" इत्यादिका ॥ ५० ॥

तदेतदुपपादयति–नालमिति द्वाभ्याम् । हे असुरात्मजाः ! द्विजत्वादयो मुकुन्दस्य प्रीणनाय प्रीतिजननाय नालं न प्रभवः किं त्वमलया अनन्यप्रयोजनया भक्त्यैव हरिः प्रीयते अन्यदुपायान्तरन्तु विडम्बनं नटनमात्रम्. द्विजत्वमिति वर्णाधिक्योपलक्षकम् देवत्वमिति जात्याधिक्यस्य ऋषित्वमित्यतीन्द्रियद्रष्टृत्वादिरूपज्ञानाधिक्योपलक्षणम् बहुश्रुतेति तु शास्त्रजन्यज्ञानाधिक्यस्य वृत्तं पित्रादि परंपरागता सद्वृत्तिः ॥ ५१ ॥

दानं पात्रे वित्तत्यागः तपः कृच्छ्रादि इज्या यागः शौचं स्नानादिकृतं शुचित्वं व्रतानि प्राजापत्यादीनि ॥ ५२ ॥

यतो भक्त्यैव भगवान्प्रीयते नोपायान्तरेणाऽतो हे दानवाः ! यूयमाश्रितसंसारबन्धहारिणि सर्वभूतानामन्तरात्मनि भगवति ईश्वरे भक्तिमनन्यप्रयोजनां कुरुत कथम्भूताः सर्वत्रात्मौपम्येन स्वात्मतुल्यत्वदृष्ट्या स्वस्मिन्निवेश्वरशरीरभूतेषु सर्वेषु दययोपलक्षिताः भगवद्भक्तिं कुरुतेत्यर्थः ॥ ५३ ॥

किमेवं भजन्तः केऽपि मुक्ता बभूवुरित्यपेक्षायां पापजातयोऽपि केनचिद्भगवत्सम्बन्धविशेषेण मुक्ताः किं पुनरेवं भजन्तो मुच्यन्त इति वक्तव्यमित्याशयेनाह—दैतेया इति । रक्षांसि बककेश्यादयः स्त्रियः पूतनादयो व्रजौकसो नन्दादयः शूद्राश्चाणूरादयः खगाः जटायुप्रभृतयः मृगाः मायामृगादयः एवंविधाः पापजीवा अच्युततां भगवत्साधर्म्यङ्गताः प्राप्तास्सन्ति हीति प्रसिद्धौ. त्रिकालज्ञत्वाद्भगवता प्रह्लादेनैवमुक्तम् ॥ ५४ ॥

अध्यायद्वयोक्तार्थं निष्कृष्योपसंहरति–एतावानिति । अस्मिँल्लोके पुंसां परः उत्कृष्टः स्वार्थः पुरुषार्थः एतावानेव कियान् यत् गोविन्दे भगवत्येकान्तभक्तिरनन्यप्रयोजना भक्तिर्यच्च सर्वेषु भूतेषु तदीक्षणं गोविन्देक्षणं भगवदात्मत्वदर्शनमित्येतावानेव निरतिशयपुरुषार्थसाधनभूत इत्यर्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरेव भजने कारणमाह, सर्वेषामिति । व्यंजकत्वाद्बीजङ्गत इति शेषः "व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामतः" इति वचनाच्च बीजशब्दस्य विकारोऽर्थः अप्रयत्नेनेति "अविक्रियः स्वदृग्वश्यः" इति श्लोकेः ॥ ४६—५० ॥

भूतानामुत्पत्त्यादिना भक्त्यभावे जातिविशेषो वृत्तादिविशेषोऽप्यकिञ्चित्कर इत्याह, नालमिति । वृत्तमाचारः "वृत्तं स्वरूपे चरिते" इति यादवः ॥ ५१—५२ ॥

आत्मौपम्येनात्मस्नेहवत्स्नेहेन ॥ ५३ ॥

वेदान्तादिशास्त्रानधिकारित्वेन पापजीवत्वं नतु पापकरणात् अच्युततां च्युतिवर्जनं मोक्षं गताः सन्ति हि यस्मात्तस्मात् मुकुन्दभक्तिरेव सम्पाद्या ॥ ५४ ॥

तात्पर्यात्पुनरेतदेव हि करणं श्रेय इत्याह, एतावानिति । तस्य हरेः सर्वसत्ताप्रदत्वेनावस्थितेरीक्षणं दर्शनं ज्ञानमिति यदीयं भक्तिरिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नालमिति युग्मकम् ॥ ५१—५२ ॥

तत् इति सर्वत्र सर्वस्मिन् देशे कालेच आत्मौपम्येन आत्मनि यथा आनुकूल्येन कायमनोवचनप्रवृत्तिरूपं भजनं कुरुत तद्वदपि कुरुतेति ॥ ५३ ॥

व्रजौकसोऽत्र नीचसहपाठात् "किरातहूणान्ध्रपुलिन्द पुल्कसा आभीरकङ्का यवनाः खसादयः" इत्यादाविव गवोपजीवना नीचजातिविशेषा एव आभीरा ज्ञेयाः । ननु "कृषिवाणिज्यगोरक्षाः कुसीदं तुर्य्यमुच्यते । वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्" इतिवद्वैश्यभेदा इति विशेषः प्रतिपत्तव्यः ॥ ५४ ॥

तस्य भागवत एव ईक्षणं स्फूर्तिः "सर्वभूतेषु यः पश्येत्" इत्यादेः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यतः सर्वेषां देहश्च जीवश्च परमात्मा च प्रियश्च वस्तुतो हरिरेव तस्मात्तं भजतेत्याह, सर्वेषां देवतिर्य्यगादीनामपि आत्मा परमात्मा स एवेश्वरः स्वेनैव कृतैः कृतानामिति देहोपि तत्कारणकत्वात् स एव जीवसंज्ञा सञ्जाता यस्य सः जीवस्य तदीयतटस्थशक्तिरूपत्वात् । यद्वा सर्वेषां प्रियत्वादपि तमेव भजतेत्याह, सर्वेषां भूतानां यो जीवसंज्ञः जीवनामा ततोपि प्रियः ॥ ४९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यस्मादेवं तस्मात्सर्वे एव भक्तिं कुर्य्युरित्याह, देव इति ॥५०॥

प्रीणनाय न अलं न समर्थमित्यर्थः। विडम्बनं पुंसः प्रत्युत तिरस्कारकारणमित्यर्थः ॥ ५१ ॥ ५२ ॥

आत्मौपम्येनेत्यत्र सुखदुःखादिदृष्ट्येति शेषः ॥ ५३ ॥

न च भक्तिः सज्जात्यादिकमपेक्षत इत्याह, दैतेया इति। अच्युततां चिन्मयशरीरत्वेन अच्युततुल्यत्वम् अच्युतता अच्युतिं गता कर्मिण इव न च्युता भवन्तीत्यर्थः। यदुक्तं काशीखण्डे—

नच्यवन्ते च यद्भक्ता महत्यां प्रलयापदि।
अतोऽच्युतोऽखिले लोके विद्वद्भिः परिगीयते ॥

इति ॥ ५४ ॥

एकान्तभक्तिरनन्यभक्तिः यत्र यस्यां भक्तौ सत्यां सर्वत्रैव स्थावरजङ्गमवस्तुषु तदीक्षणं भगवतो भावना परिपाकेन भगवदीक्षणं यदुक्तम्—

"नारायणमयं धीराः पश्यन्ति परमार्थिनः।
जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्"॥ इति.

यथायं प्रह्लादश्च स्तम्भेपि भगवन्तमपश्यत् ॥ ५५ ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम्।
सप्तमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्वकृतैः स्वसृष्टैः महद्भिर्भूतैः पृथिव्यादिभिः कृतानां सर्वेषां सुरादीनाम् आत्मा अन्तर्यामी प्रियो हितकृच्चासौ ईश्वरो नियन्ता हरिरेव अतो जीवसंज्ञितः यः कश्चिदपि जीवपदार्थः देवादिनामको मुकुन्दचरणं भजन् स्वस्तिमान् स्यादित्युत्तरेणान्वयः ॥ ४९ ॥ ५० ॥

वृत्तं वर्णाश्रमक्रियात्मकम् ॥ ५१ ॥

व्रतानि नानातिथ्युपवासतीर्थवासादीनि ॥ ५२ ॥

यथा मयि स्वांशभूते दासे भगवानन्तर्यामिरूपेण वर्त्तते तथा सर्वेषु भूतेष्वपि एवमात्मौपम्येन सर्वत्र वर्त्तमाने सर्वभूतानामात्मनि अन्तर्यामिणि भगवति भक्तिं कुरुत भूतद्रोहो नकार्यः किन्तु सर्वत्र हरिदृष्ट्या यथाशक्ति यथायोग्यमानुकूल्यं कुरुतेत्यर्थः ॥ ५३ ॥

यतो भक्त्यैव दैतेयादयः अच्युततां भगवद्भावापत्तिलक्षणां मोक्षं गताः सन्ति ॥ ५४ ॥

अध्यायद्वयोक्तार्थमुपसंहरति, एतावानिति। गोविन्दे भक्तिः सर्वत्र तदीक्षणं तदात्मकत्वदर्शनमित्येतावानेव स्वार्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका।

अपने रचे हुए महाभूतों से निर्मित सर्व भूतों का आत्मा और प्रिय नियन्ता श्रीहरि हैं और अंतर्यामी भी वोही है ॥ ४९ ॥

देव हो असुर हो वा मनुष्य हो यक्ष हो अथवा गन्धर्व हो वा कोई भी हो, श्रीमुकुन्द के चरणारविन्द के भजन से स्वस्तिमान् होता है जैसे कि ? हम ॥ ५० ॥

हे असुरात्मजहो ! श्रीमुकुन्द की प्रसन्नता के लिये ब्राह्मणपना देवतापना अथवा ऋषिपना नहीं चाहिये तथा न वृत्त न बहुज्ञता न दान न तप न इज्या न शौच न बहुत से व्रत ये कुछ भी न चाहियें, क्योंकि ? हरि तौ केवल निर्मल भक्ति मात्र से प्रसन्न होते हैं, और तौ सब विडंबन ही है ॥ ५१-५२॥

हे दानव हो ! आत्मा की उपमा से सर्वत्र सर्व भूतात्मक ईश्वरही है, तिसी हेतु से भगवान श्रीहरि में भक्ति करो ॥ ५३ ॥

दैत्य यक्ष राक्षस स्त्री शूद्र व्रजवासी खग मृग और बहुत से पापी जीव भी हरि भक्त होकर अमृतत्व को प्राप्तहो गये ॥ ५४ ॥

इस लोक में इतना ही पुरुषों का परम स्वार्थ है कि गोविंद में एकांत भक्ति वाला होकर सर्व जगत को गोविन्द दृष्टि से देखे ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, सप्तम अध्याय
की भागवताचार्यकृत भाषा टीका
समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain,,Digitizagtion by eGangotri

॥ अष्टमोऽध्यायः ॥

नारद उवाच ।

अथदैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ।
जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥
अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम् ।
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥
श्रुत्वा तदप्रियं दैत्यो दुस्सहं तनयाऽनयम् ।
कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥
क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥
प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम् ।
सर्पः पदाऽऽहत इव श्वसन् प्रकृतिदारुणः ॥ ५ ॥

हिरण्यकशिपुरुवाच ।

हे दुर्विनीत ! मन्दात्मन् ! (१) कुलभेदकराधम ! ।
स्तब्धं मच्छासनोद्भूतं नेष्ये त्वाऽद्य यमक्षयम् ॥ ६ ॥
क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ।
तस्य मेऽभीतवन्मूढ ! शासनं किम्बलोऽत्यगाः ॥ ७ ॥

प्रह्लाद उवाच ।

न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषाम् ।
परेऽवरेऽमी स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमेऽतिरुषा सूनुं निघ्नन् दैत्यो हतः स्वयम् ।
आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ १ ॥
अन्तः कृपासुधापूर्णो बहिःक्षोभो नृकेसरी ।
दैत्येन्द्रमरिभावेन भजन्तं समभावयत् ॥ २ ॥

एकान्तसंस्थितां प्रत्यङ्‌निष्ठाम् यथा यथावत् ॥ १ ॥ २ ॥

स च पुत्रं हन्तुं मनो दधे कथम्भूतः कोपस्यावेशेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः ॥ ३ ॥

क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥ ५ ॥

हे मन्दात्मन्नल्पबुद्धे ! मदाज्ञाऽतिलङ्घिनं त्वामद्य यमालयं नेष्यामि ॥ ६ ॥

अभीतवत् किं बलं यस्य सः किम्बलः ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवता प्रह्लादेनोपदिष्टतत्वत्रययाथात्म्यहेयोपादेयभगवद्धर्मतदनुष्ठानोद्योगान् दैत्यकुमारानालक्ष्याचार्यसुतो दैत्येन्द्राय

(१) कुलच्छेद इतिपाठः—वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

न्यवेदयदित्याह देवर्षिः—अथेति । भगवद्धर्मोपदेशानन्तरं तेन प्रह्लादेनानुवर्णितमाकर्ण्य निर्दुष्टत्वात्प्रह्लादोक्तमेव जगृहुर्दैत्यकुमाराः नतु गुर्वनुचिन्तितमसुरोपाध्यायानुशिक्षितम् जगृहुः ॥ १ ॥

अथ तेषां दैत्यपुत्राणामेकान्तसंस्थितामव्यभिचारेण भगवद्धर्मविषयां बुद्धिमालक्ष्य विज्ञाय भीतस्त्वरितः सञ्जातत्वरः यथावद्राज्ञे हिरण्यकशिपवे भावेदयद्विज्ञापितवान् ॥ २ ॥

ततो दैत्यो हिरण्यकशिपुर्गुरुणोक्तं सुतस्यानयमनीतिं स्वमार्गा ऽननुवर्तनम् अत एवा ऽप्रियं तच्छ्रुत्वा कोपावेशेन क्रोधव्याप्त्या चलत्कम्पमानं गात्रं शरीरं यस्य तादृशः पुत्रं प्रह्लादं हन्तुं मनोदधे मनोरथं कृतवान् ॥ ३ ॥

कठोरया गिरा अतदर्हणं तिरस्कारानर्हं प्रह्लादं क्षिप्त्वा तिरस्कृत्य क्रोधेन तिरश्चीनेन वक्रेण चक्षुषेक्षमाणः आह उवाच ॥ ४ ॥

कथम्भूतं विनयेन नितरां नम्रं दान्तं तिरस्कारादिभिरसञ्जातक्रोधं बद्धो अञ्जलिर्येन तं सम्यगुपसमीपे स्थितं कथम्भूतः पादेनाहतस्ताडितः सर्प इव श्वसन् श्वासं मुञ्चन् स्वभावेनैव क्रूरः ॥ ५ ॥

उक्तिमेवाह—हे दुर्विनीत इति द्वाभ्याम् । हे दुर्विनीत ! मन्दात्मन्नल्पबुद्धे ! मदाज्ञातिलङ्घिनं त्वामधुना यमालयं नेष्यामि ॥ ६ ॥

यस्य मे क्रुद्धस्य सतः सपालास्त्रयोलोकाः परितः कम्पन्ते तस्य मे मम शासनमभीतवद्भयरहितवन्मत्तो भयरहितः कोऽपि नास्तीत्यभिप्रायेण वतिः प्रयुक्तः अलग्नः अतिवर्त्तसे एवमति वर्तेने भवान् किंबलः को बलं यस्य तादृशः ॥ ७ ॥

एवमुक्त आह भगवान्प्रह्लादः—न केवलमिति चतुर्भिः । तावदयुक्तं किंबल इति तत्रोत्तरमाह, द्वाभ्याम् । हे राजन्! स न केवलं ममैव बलं किन्तु भवतो ऽन्येषाञ्च बलिनां बलम्, कोऽसौ? येन ब्रह्मादयः चतुर्मुखप्रभृतयः उच्चावचाश्चराचरात्मकाः सर्वे लोकाः वशं स्ववशं प्रणीताः प्रापिताः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वैराग्याद्यङ्गोपाङ्गरुचिरभक्तिसुन्दरीसुन्दरावयवसन्निवेशलक्षणापरमपुरुषार्थकरणं यदुत्तरचरितमित्येतन्निदर्शयितुं नरसिंहावतारो निरूप्यतेऽस्मिन्नध्याये, तत्र दैत्यसुतैः प्रह्लादवर्णितं श्रुत्वा किं कृतमिति युधिष्ठिरस्य मानसीं शङ्कां परिहरति, अथेति। निरवद्यत्वान्निर्दोषत्वात् ॥ १ ॥

एकान्ते हरौ सम्यक् स्थितामैक्यस्थितामभिन्नविषयामिति वा यथा यथावत्साकल्येन यथा तैस्तेनोक्तं गृहीतं तथेति वा ॥ २ ॥

तनयस्यानयं स्वसिद्धान्तविरुद्धसिद्धान्तम् ॥ ३ ॥

पापेन पापसाधनेन ॥ ४—५ ॥

यमक्षयं यमगृहम् ॥ ६ ॥

कस्य बलं यस्य स किम्बलः मद्बलमनादृत्य तव बलभूतः क इत्यर्थः ॥ ७ ॥

किम्बलमित्यस्योत्तरमाह, न केवलमिति । बेत्यनेन "बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्" इति श्रुतिं सूचयति, पराश्चावराश्च परावरे एतदेव विवृणोति, स्थिरजङ्गमा इत्यादिना ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

टीका पद्ये अरिभावेन भजन्तमिति तदाज्ञाकृतत्वाद्बहिरङ्गेनैव तेन भजन्तं स्वं प्रति अभावयत् प्रापयत्. श्रुत्वेति पद्यार्द्धे गौडमिथिलयोर्नास्ति स्वाम्यसम्मतश्च । सचेलश्याहारस्य वैयर्थ्यात् ॥ १—१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अष्टमे स्वसुतं हन्तुमर्हस्तम्भं रुषाऽसुरः।
स्तम्भोत्थस्तमहन् साक्षान्नृसिंहो दैवतैस्तुतः॥

एको मुख्यश्चासावन्तः सर्वेषां चेत्येकान्तो विष्णुर्भक्तियोगो वा तत्र संस्थिताम् ॥ २ ॥ ३ ॥ ४ ॥

दुर्विनीतेति वस्त्वर्थश्चायं दुष्टेष्वपि विशिष्टं नीतं कृपालचर्या यस्य परदुःखासहिष्णुत्वात् मन्दानामप्यात्मा मनो यत्र सर्वचित्ताकर्षकत्वात् कुलभेदकराः कुलविशेषस्रष्टारः प्रजापतयोऽप्यधमा यस्मात् महाविभूतिमत्वात् स्तब्धम् असुरेषु पूज्यबुद्धित्वाभावात् मच्छासनोद्धृतं मदाज्ञालंघिनं यमक्षयं यमालयं पक्षे यमानामष्टांगयोगानां क्षयं निवासभूतं त्वां नेष्ये स्वत्रायकत्वेनांगीकरिष्यामीत्यर्थः ॥ ५ ॥ ६ ॥

अभीतवत् किं बलं यस्य सः ॥ ७—८ ॥

श्रीमच्छुकेदवकृतसिद्धान्तप्रदीपः।

अष्टमे प्रह्लादं हन्तुं प्रवृत्तो हिरण्यकशिपुर्नृहरिणा हतः स च ब्रह्मादिभिस्तुत इति वर्ण्यते—अथेति । निरवद्यत्वान्निर्दोषत्वात्तेन प्रह्लादेन वर्णितं जगृहुः ॥ १ ॥

एकस्मिन्भगवति अन्तःसमावेशो यस्य तेन प्रह्लादवाक्येन संस्थितां बुद्धिमालक्ष्य ज्ञात्वा ॥ २ ॥

तनयस्याऽनयं पश्चाश्रयणं तत्तादृशमप्रियं श्रुत्वा कोपस्यावेशेनोद्रेकेण चलत्कम्पनं गात्रं यस्य सः ॥ ३ ॥

क्षिप्त्वा भर्त्सयित्वा पापेन दुष्टेन तिरश्चीनेन वक्रेण ॥ ४—५ ॥

मच्छासनान्मदादेशादुद्धृतं बहिर्भूतम् त्वा त्वाम् ॥ ६ ॥

किं किञ्चिन्मात्रं विष्णवाख्यं बलं यस्य सः किंबलः अभीतवत् प्रशासनम् अलग्नः अतिक्रान्तवानसि ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा ।
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥
जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनन्तस्य महत्समर्हणम् ॥ १० ॥
दस्यून् पुरा षण्ण विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥ ११ ॥

हिरण्यकशिपुरुवाच ।

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमूर्षूणां हि मन्दात्मन्ननु स्युर्विप्लवा गिरः ॥ १२ ॥
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ॥ १३ ॥
सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥ १४ ॥
एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुक्तं किंबलइति तत्र बलमाह, हेराजन् मे ममैव स बलं नास्ति किन्तु मवदादीनां सर्वेषां बलम् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि-तदनन्तर सब दैत्यपुत्रों ने प्रह्लाद का कथन सुनकर, शुद्ध होनेके कारण उसीको ग्रहण किया और गुरु का सिखाया हुआ नहीं ग्रहण किया ॥ १ ॥

अनंतर आचार्य पुत्र ने उन सबों की बुद्धि परमात्मनिष्ठ देख कर, भय भीत होकर उसी समय राजा से सब समाचार निवेदन किया ॥ २ ॥

दैत्य (हिरण्यकशिपु) ने भी उस दुःसह अप्रिय पुत्र की अनीति को सुनकर, कोप के आवेश से चलायमान गात्रवाला होकर पुत्र के मारने का मन किया ॥ ३ ॥

नम्रता से अवनत दान्त और हाथ जोड योग्य प्रह्लादको कोप के आवेश से चलायमान गात्र जिसका प्रकृति से दारुण, पादताडित सर्प के नाईं श्वास लेता हुआ और रोषयुक्त तिरछी दृष्टि से देखता हुआ हिरण्यकशिपु यों बोला ॥ ४—५ ॥

हिरण्यकशिपु बोला, कि—हे दुर्विनीत ! हे मन्दबुद्धे ! अरे कुल भेदक ! अरे अधम ! मेरी आज्ञा को उल्लंघन करने वाले स्तब्ध तुझ को अवही यमराज के घर पहुंचाता हूं ॥ ६ ॥

जब मैं कुपित होताहूं तब लोकपालों सहित तीनो लोक कांपने लगते हैं, हे मूढ ! तिस मेरी आज्ञा को निडर के नाईं किस के बल से तूंने उल्लंघन किया ॥ ७ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोले, कि—हे राजन् ! न केवल हमारा किंतु तुमारा और संसार में अन्य जितने बली लोग हैं उन सबों का वह परमात्माही बल है, कि जिसने पर अवर (बडे छोटे) स्थावर जंगम जो ब्रह्मादिक जीव हैं सब को वश में कर के रखे हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलं प्रपञ्चितम् इत्यत्र हेतुः—स ईश्वर इति । उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा ओज आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा ॥ ९ ॥

ननु, मच्छत्रुरसौ कथं ममापि सएव बलं स्यादत आह, जहीति । आत्मनः स्वस्य भावं स्वभावं त्यज यतोऽजितादात्मनो मनस ऋते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् ।
यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामाप्ययमङ्ग ! मेनिरे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

विनाऽन्ये विद्विषो न सन्ति किञ्च तद्धि तदेव हि साम्येन मनसो-धारणमेव समर्हणमाराधनम् ॥ १० ॥

ननु, मया दिग्विजये सर्वे रिपवो जिता अतः साम्प्रतं विद्विषो न सन्तीतिचेत्सत्यं तत्राऽऽह–दस्यूनिति । एके भवादृशा मन्दाः पुरा आदौ लुम्पतः सर्वस्वंहरतः षडिन्द्रियलक्षणान् शत्रून् विजित्याऽजित्वा दश दिशः स्वयंजिता मन्यन्ते साधोस्तु जित-चित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥ ११ ॥

व्यक्तं निश्चितम् विप्लवा अनन्विता इत्यर्थः ॥ १२ ॥

हे मन्दभाग्य ! मदन्यो जगदीश्वरो यद्यस्ति,तर्ह्यसौ क्वास्ति?प्रह्लाद आह, स सर्वत्रास्ति, हिरण्यकशिपुराह,तर्हि कस्मात्स्तम्भे नास्ति प्रह्लादस्तु तं स्तम्भं निरीक्षमाणो नमस्कुर्वन्नाह, दृश्यति इति ॥१३ ॥

हिरण्यकशिपुस्तु तत्र तमपश्यन्नाह, सोऽहमिति । विकत्थ-मानस्य विपरीतं ब्रुवाणस्य ते शिरः कायाद्धरामि पृथक्-करोमि ॥ १४ ॥

प्रह्लादेन मूर्ध्नि बद्धाञ्जलिना निरीक्ष्यमाणं स्तम्भं मुष्टिना ताडि-तवान् ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ तस्य नाम कथयेत्यत्राह—स इति । स सर्वेषां बला-धायकः ईश्वरः, कोऽसावीश्वरः ? उरुक्रमः उरवः लोकत्रयसंग्राहकाः क्रमाः पादविक्षेपा यस्य सः त्रिविक्रम इत्यर्थः । "सर्वे पदं हस्ति पदे निमग्नम्" इति न्यायेन पादत्रयेणैव लोकत्रयाक्रमणरूपमहा महिमशालिनस्तस्य सन्निधौ त्वदूबलं कियदेतदित्यभिप्रायः न केवलमुरुक्रमः सर्वेषाञ्च बलाधायक एव, किन्त्वसावोज आ-दीनामात्मा आश्रयो धारक इति यावत् । ओज इन्द्रियशक्तिः सहः मनोबलं सत्त्वं धैर्यं बलं देहबलम् इन्द्रियाणि च तेषाम-प्याश्रय इत्यर्थः । किञ्च स एवोरुक्रमः परमः निरस्तसाम्याधिकः स्वशक्तिभिः स्वांशभूताभिः प्रकृतिपुरुषकालात्मिकाभिः शक्तिभिः कृत्स्नं विश्वं सृजति अवति रक्षति अत्ति संहरति च स्वयं गुणत्रयेशः सत्त्वादीनां त्रयाणां गुणानामीशो नियन्ताऽगुण-वश्यो न कर्मवश्यश्चेति भावः ॥ ९ ॥

ननु, शत्रुरसौ कथं ममापि बलं स्यादत आह—जहीति । त्वमिममात्मनः स्वस्याऽऽसुरं भावं जहि त्यज समं मित्रामित्रानु-सन्धानरहितं यथा भवति तथा मनो धत्स्व धारय, तथा मनः शिक्षयेत्यर्थः । एवं चेत्केऽपि विद्विषो न सन्ति, किञ्च "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" इत्युक्तरीत्या आत्मैव रिपुर्न-तदन्यः कोपि रिपुरस्तीत्याह—ऋते इति । अजितादवशीकृतादत एव उत्पथे दुर्विषये स्थिताद्वर्त्तमानादात्मनोऽन्तःकरणादृते न सन्ति विद्विष इति पूर्वेणान्वयः तद्धि मनसः साम्यमेव ह्यन-न्तस्य त्रिविधपरिच्छेदरहितस्य परमात्मनः समर्हणं सम्यगारा-धनम् ॥ १० ॥

किञ्च सर्वदिशां जयिनोऽप्यजितेन्द्रियस्य भवादृशस्य केवलं जयशालित्वाभिमानमात्रमेव न वस्तुतो जयित्वमस्तीत्याह–दस्यू-निति । पुरा तावल्लुम्पत आत्मनोऽपहतपाप्मत्वादिगुणाऽष्टक-रूपमैश्वर्यमपहरतः षडिन्द्रियरूपान् दस्यून् दुष्टजन्तुतुल्यान् श-त्रून् न विजित्याऽजित्वा एके त्वादृशाः दश दिशः स्वजिताः स्वेनैव जिता इति मन्यन्ते अभिमानमात्रमेतदित्यर्थः । जितात्मनो जितेन्द्रियस्य तु ज्ञस्य स्वात्मपरमात्मयाथात्म्यवेदिनो देहिनां समस्य सर्वाणि भूतानि परमात्मशरीरत्वेन समं पश्यतः साधोः महाभागवतस्य स्वमोहप्रभवाः देहात्मभ्रमस्वतन्त्रात्मभ्रमनिमित्ताः परे शत्रवः कुतो भवन्ति न सन्त्येवेति भावः ॥ ११ ॥

एवमुक्तवन्तमाह हिरण्यकशिपुः—व्यक्तमिति । हे अल्प-बुद्धे ! त्वं व्यक्तं नूनं मर्तुकामोऽसि मर्तुमिच्छसि यस्त्वम् अत्यन्तं विकत्थसे अधैवं विकत्थनं तव न स्यादिति भावः । हि तथाहि मुमूर्षतां मर्तुमिच्छतां विप्लवा अनन्विता वाचो न नस्युर्भवे-युरेव ॥ १२ ॥

हे मन्दभाग्य ! यस्त्वया मत्तोऽन्यो जगत ईश्वरः उक्तः असौ क्वास्ते ? यदि स भवदभिमतो जगदीश्वरः सर्वत्रान्तरात्मतया व-र्त्तते तर्हि कस्माद्धेतोः स्तम्भे पुरोवर्त्तिनि न दृश्यते मदन्यो जगदीश्वरः क्वोसावस्तीति दैत्यः प्राह ईशः सर्वत्रास्तीति प्र-ह्लादः ईशो यदि सर्वत्रास्ते तर्हि स्तम्भे नास्तीति हिरण्यकशिपुः प्रह्लादः स्तम्भे पश्यन्नाह, न दृश्यतेऽपितु दृश्यते एवेति व्या-ख्यान्तरम् ॥ १३ ॥

सोहं सर्वेषामीश्वरोहमेवं विकत्थमानस्य ते तव देहा-च्छिरो हरामि छिनद्मि यो हरिस्तव शरणम् रक्षकः ईप्सितः सोऽधुना त्वां गोपायेत स रक्षिता चेदधुना त्वां रक्षिष्यतीति अन्यथा तु तदेव मिथ्येति भावः ॥ १४ ॥

एवमित्थं रुषा क्रोधेन दुरुक्तैः मुहुर्मुहुर्महाभागवतं सुतं प्रह्लाद-मर्दयन् महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य वरासनात्सिंहासना-दुत्पतित उत्थितोऽत्यन्तं बलं यस्य तेन स्वमुष्टिना स्तम्भं तताड ताडितवान् बभञ्ज ॥ १५ ॥

तदैव ताडनान्तरमेव तस्मिन्स्तम्भेऽतिभीषणो निनदो ध्वनि-र्बभूव, निनदं विशिनष्टि, येन निनदेनाण्डकटाहं ब्रह्माण्डकटाह-मस्फुटद्भिन्नमभूत् अङ्ग हे युधिष्ठिर ! यञ्च निनदं श्रुत्वा स्वस्थानगता अजादयो ब्रह्मादयः स्वधिष्ण्यानां ध्वंसं नाशं मे-निरे प्रलयकालमागतमित्यर्थः ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु " स्थाणुमन्ये प्रपद्यन्ते शरीरत्वाय देहिनाम्" इति श्रुतेः शिवं बलं वदन्ति केचित् "कालाद्भवन्ति भूतानि मन्यन्ते कालचिन्तकाः" इत्यतः कालमथ कथमयं निर्णयः परमात्मबलमिति तत्राह, स इति ॥ ९ ॥

कुतो न सन्ति विद्विष इति तत्राह, ऋते इति। उत्पथस्थितात्स्वमार्गविरुद्धमार्गनिरतादजितात् अवशीकृतादात्मनो मनआदीन्द्रियग्रामादृते शुद्धमनआदिना विचार्यमाणे शत्रवो न सन्तीत्यर्थः ननु, तर्हीदं "युद्धोद्यमं परं चक्रुर्विबुधादानवान्प्रति" इत्यादि कथं सङ्गच्छत इत्याशङ्क्य यथायोग्यतादर्शनलक्षणं समत्वं कर्त्तव्यम् अन्यथा शास्त्रविरोध इति भावेनोक्तसमत्वफलमाह, तद्धीति। तत्तद्योग्यतानुसारेण तन्मनोधारणं हरेः समर्हणं विद्धीत्यन्वयः नैतदल्पं किन्तु महदित्याह, महादिति ॥ १० ॥

एतदेव विशदयति—दस्यूनिति । एके भवादृशाः पुरं शरीरं लुम्पतः षड्दस्यून् षडिन्द्रियाख्यचोरानविजित्य दश दिशः स्वेन जिता इति मन्यन्त इत्यन्वयः आन्तरशत्रुजयं विना कुतो बाह्यशत्रुजय इति भावेनाह, जितेति । परे बाह्यशत्रवः यद्वा एके मादृशाः षडिन्द्रियजयो नास्तिचेत् बाह्यशत्रुविषयादशदिशः सुष्ठाजिता इति मन्यन्ते शेषं पूर्ववत् ॥ ११ ॥

असुरावेशोदधिमग्नत्वात्पुत्रोक्तं तत्त्वं न तस्य श्रोत्रविवरगतमभूत्प्रत्युतार्चिष्मत्याज्यहोमवदभूदिति भावेनोत्तरमवतारयति, व्यक्तमिति । अतिमात्रं वक्तव्यांशादधिकं विकत्थसेऽवद्धं भाषसे विप्लवामण्डूकप्लुतिवदसङ्गताः ॥ १२ ॥

यदि त्वदुक्तं युक्तं स्यात्तर्हि तथा प्रतीयेत तस्मादसम्बद्धमिति भावेनाह, यस्त्वयेति ॥ १३ ॥

अस्येदम्फलितमित्याह, सोहमिति । गोपायेत रक्षेत ॥ १४ ॥

यदिन्द्रियं जयस्वेति वचः न हार्दमसम्भावितत्वात्तत्राह, एवमिति ॥ १५ ॥

स्तंभभङ्गेनाध्येयपातेन सभ्यानां शरीरचूर्णनादिव्यथा सम्भावितेत्याशङ्क्य भगवत्सन्निधानबलाद्धूनिष्ठुरस्तंभोत्थनिर्ह्रादोभूदित्याह, तदैवेति । अस्फुटत् अभिनत् स्वधिष्ण्योपगतं स्वकीयत्वेनाभिमतं सत्यलोकं प्राप्तं स्वधामाप्ययं स्वलोकनाशम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विकत्थमानस्येति—तत्तु केरात्मश्लाघायामेव पर्य्यवसानात् ॥ १४—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जहि त्यज आत्मनः स्वस्य मनः समं स्वस्मिन्निव सर्वत्र तुल्यं कुरु, ननु, शत्रुषु स्वसमं मनः कथं करोमि तत्राह, विद्विषः शत्रवो नैव सन्ति अजितादवशीकृतादात्मनो मनसः ऋते मनसः सर्वत्र स्वतुल्यदर्शनलक्षणं साम्यमेव वशीभावस्तस्मिन् सति शात्रवादर्शनान्न कोपि शत्रव इति भावः । साम्यमेव समर्हणमाराधनम् ॥ १० ॥

एके युष्मादृशाः मन्दा दस्यून् कामादीन् लुम्पतः सर्वस्वं हरतः स्वसङ्गस्थितानपि अविजित्य अजित्वा दश दिशः स्वजिताः स्वेन जिता मन्यन्ते जितचित्तस्य चित्तजयेनैव विजितषट्सपत्नस्य ज्ञस्य विदुषः परे शत्रवः कुतो हेतोरपि तु नैव इत्यर्थः । यतःस्वमोहप्रभवाः ॥ ११ ॥

विकत्थसे हरिभक्तत्वादहमेव विजितषडमित्रो न तु ममायं जनक इत्यात्मश्लाघां करोषीत्यर्थः विप्लवा अनन्विताः ॥ १२ ॥

हे मन्दभागेति यथा जगदैश्वर्यं मम तथैव मत्पुत्रत्वात्तवापि तच्छ्यायप्राप्तमिति तत्त्वया त्यज्यत इति भावः । यद्यसावस्ति तर्हि क्वास्ति प्रह्लाद आह, सर्वत्रास्ति हिरण्यकशिपुराह, कस्मात् स्तंभे नास्ति प्रह्लादस्तु सप्रणामं पश्यन्नाह, दृश्यत इति ॥ १३ ॥

हिरण्यकशिपुस्तत्र तमपश्यन्नाह सोहमिति ॥ १४—१५

अस्फुटदिवेत्यर्थः यं निनदं अण्ययं नाशम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरः सर्वनियन्ता कालः "ज्ञः कालकालः" इति श्रुतेः । उरवः क्रमाः पादविक्षेपा यस्य सः सएव ओजः इन्द्रियशक्तिः सहोमनश्शक्तिः सत्त्वं धैर्यं बलं देहशक्तिः इन्द्रियाणि च तेषामात्माश्रयः ॥ ९ ॥

त्वमिममात्मनः स्वस्य आसुरं भावं जहि त्यज अजितादात्मनो मनसः ऋते अन्ये विद्विषः शत्रवो न सन्ति अतो मनः समं यथा भवति तथा धत्स्व धारय तद्धि साम्येन मनसो धारणं हि अनन्तस्य महत्समर्हणं श्रेष्ठं पूजनम् ॥ १० ॥

एके भवादृशाः पुरा आदौ भजनार्हमायुर्धनं लुम्पतः षडिन्द्रियनामकान् दस्यूनविजित्य दशापि दिशः स्वाजिता मन्यन्ते जित आत्मा मनोयेन तस्य मनोपलक्षितसकलेन्द्रियजयशीलस्य ज्ञस्य सर्वं भगवदात्मकमित्येवं ज्ञानवतः अतएव सर्वदेहिनां समस्य साधोः मोहप्रभवाः परे शत्रवः कुतो न कुतोपि ॥ ११ ॥

अतिमात्रमतिमर्य्यादम् विकत्थसे अतोव्यक्तं निश्चितं मर्तुकामोसि तत्र लिङ्गमाह ननु नूनं मुमूर्षूणां गिरो विप्लवाः असम्बद्धाः स्युः ॥ १२ ॥

हे मन्दभाग्य ! प्रथमतस्त्वीश्वरो हमेव यदि मदन्यः मत्तः अन्योपि यईश्वरस्त्वयोक्तोसौ क्वास्ति ? प्रह्लाद आह सर्वत्र, हिरण्यकशिपुराह कस्मात्स्तम्भे नास्ति प्रह्लाद आह दृश्यते ॥ १३ ॥

हिरण्यकशिपुस्तमपश्यन्नाह—सोहमिति ॥ १४ ॥ १५ ॥

यं निनदम् अण्ययं नाशम् ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ।
अन्तःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥
सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ १८ ॥
स सत्त्वमेनं परितोपि पश्यन् स्तम्भस्य मध्यादनुनिर्जिहानम् ।
नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ॥ १९ ॥
मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ॥ २० ॥
करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ २१ ॥
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् ।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २२ ॥
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ २३ ॥

भाषा टीका ।

क्योंकि ? बडे पराक्रम वाला वही ईश्वर काल ओज सह सत्त्व बल इन्द्रिय और मनोरूप है, और वही परमेश्वर गुणत्रय का ईश इस विश्व की सृष्टि स्थिति और संहार करता है ॥ ९ ॥

आप भी इस अपने आसुर भाव को छोड दीजिये और मन को शांत कीजिये, उत्पथ में स्थित और अनिर्जित [नही जीताहुआ] अपने मन के सिवाय संसार में कोई भी वैरी नहीं है, और मन को समता में लाना यही एक परमात्मा का भी बडा आराधन है ॥ १० ॥

कितने एक प्रथम अपने देह मे स्थिति षडिन्द्रिय रूप वैरियों न जीत् कर हमने दश दिशाओ को जीत लिया, ऐसा मानते हैं, ॥ जितेन्द्रिय और सर्व प्राणिमों को साधु विद्वान को स्वाज्ञान से बने हुए शत्रु ही कहाँ ॥ ११ ॥

हिरण्यकशिपुरुवाच ।

हिरण्य कशिपु बोला, कि-अब निश्चित ही तूं मरने की इच्छा करता है क्यों कि ? अब तू बहुत विकत्थन [बकवाद] करता है । हे मन्दात्मन् ! मरने वालों की ऐसी ही विपरीत वाणी होती है ॥ १२ ॥

और हे मन्द भाग्य ! जो तूने मेरे से दूसरा जगदीश्वर बताया, तो फिर वह कहां पर है, यदि वह सर्वत्र है तो इसमें क्यों नही देख पडता है ॥ १३ ॥

सो मैं अब तेरे बकवाद करने वाले के शरीर से शिर को हरलेता हूं, जिसको तू ने रक्षक समुझा है वह हरि अब तेरी रक्षा करै ॥ १४ ॥

वह महा असुर ऐसी दुरुक्तियों से कोप के मारे महाभागवत पुत्र को पीडा करता हुआ खड्ग को हाथ में लेकर सिंहासन से उत्तर कर बडे जोर से अपनी मुष्टि से स्तम्भ को ताडन करता हुआ ॥ १५ ॥

बस उसी समय उस स्तम्भ मे से अति भयङ्कर बडा नाद हुआ, कि जिसके मारे ब्रह्माण्ड फूटने लगा और वह शब्द इतनी दूरतक पहुंचा कि जिसको सुनकर ब्रह्मादि कभी अपने २ धाम का अप्यय (नाश) मानने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पदं तस्य ध्वनेराश्रयम् येन नादेन ॥ १७ ॥

भगवांस्तदा स्तम्भं विदार्याऽदृश्यत दृश्यो बभूव किमर्थम् निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुम् तथाऽखिलेषु भूतेष्वात्मनोव्याप्तिश्च सत्यां कर्तुं स्तम्भेऽदृश्यत तत्किमर्थम् "भौतिकेषु च भावेषु भूतेष्वथ महत्सु च" भगवानास्ते इति तेनैव भृत्येन यद्भाषितं तत्सत्यं कर्तुम् तथाऽत्यद्भुतं दैत्यघातकमतिघोरं रूपमुद्वहन् दधत्, तत्किमर्थम् ? निजभृत्यैः सनकादिभिः शापानन्तरमनुतप्तैर्भाषितं यत् त्रिभिर्जन्माभिः शापमोक्षो भवत्विति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहंप्रति दैत्यकुञ्जरः ।
अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्सत्यं कर्तुम् तथाऽत्यद्भुतं रूपं ब्रह्मसृष्टावदृष्टमश्रुतञ्च रूपमुद्वहन् तच्च न मृगाकारं न मनुष्याकारमुद्वहन् सभायां मध्येऽदृश्यत. तत्किमर्थम् ? निजभृत्येन हिरण्यकशिपुना ब्रह्माणम्प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथा नान्तर्न बहिरिति न नरैर्न मृगैरपीति च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितम् तदुभयोर्वाक्यं सत्यं कर्तुम् नहि तद्ब्रह्मसृष्टं भूतं नच नरोवा मृगोवा नच सभागृहस्यान्तः नच प्राङ्गणवद्बहिः एवं ताभ्यां यद्भाषितम् तत्सत्यं कुर्तम् यच्च हिरण्यकशिपुना भाषितम्, "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति अकुतश्चिद्भयोऽमर इतिच, यच्चनारदेन निजभृत्येन भाषितमिन्द्रंप्रति "अयं महांस्त्वया संस्थां न प्राप्स्यति अनन्तानुचरः" इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं तथा अदृश्यत चकारान्निजभाषितञ्च. किं?तत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" इति. तथा "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इत्यादि तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यम् अलमतिविस्तरेण ॥ १८ ॥

स दैत्य एवमद्भुतं ध्वनिं श्रुत्वा तदाश्रयं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन्स्तम्भमध्यान्निर्गच्छत् नृमृगेन्द्रयोर्मिश्रं रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैवमलं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः, भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति, प्रतप्तेत्यादिना,विद्रावितदैत्यदानवमित्यन्तेन ।प्रतप्तं चामीकरं सुवर्णं तद्वत्पिङ्गानि चण्डानि लोचनानि यस्मिन् सटा जटाः केसराः कण्ठरोमाणि स्फुरद्भिः सटाकेसरैर्जृम्भितं साटोपमाननं यस्मिन् ॥ २० ॥

करालास्तुङ्गा दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वच्चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणम् स्तब्धावुन्नतौ शङ्कुवदूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् कर्णान्तमुखविस्तारमित्यर्थः ॥ २१ ॥

दिविस्पृशत् कायो यस्मिन् अलुक्समासः अदीर्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिंस्तच्च तच्च अल्पं मध्यमुदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तम् विष्वञ्चः सर्वतः प्रसृता भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यम् सर्वाणि च निजानि चक्रादीनीतराणि वज्रादीनि त एवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणान्वयः, तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह—सप्तभिः । प्रायेण महामायिना हरिणाऽयमेवंभूतो वधो मृत्युहेतुः स्मृतश्चिन्तितस्तथाऽप्यनेनं समुद्यतेन किं न किञ्चित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः ॥ २३ ॥

तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितोऽदृष्टोऽभूत ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किं जातं तदाह, स विक्रमन्निति । ओजसा बलेन पुत्रवधेप्सुः पुत्रवधं कर्तुमिच्छुस्तदर्थं विक्रमन् पराक्रमं कुर्वन् स दैत्येन्द्रो यं निर्ह्रादं ध्वनिम् अपूर्वं कदाचिदपि न श्रुतम् अत एवाद्भुतमाश्चर्यजनकं निशम्य श्रुत्वा तस्य निनादस्य पदमाश्रयमन्तःसभायां सभामध्ये न ददर्श येन निनादेन सुरारियूथपाः दानवश्रेष्ठाः वितत्रसुर्विशेषेण तत्रसुः त्रासं प्रापुरित्यर्थः ॥ १७ ॥

तदा भगवान्निजभृत्यस्य प्रह्लादादेर्भाषितं कृत्स्नजगदन्तरात्मत्वादिभाषणं सर्वेषु चराचरात्मकेषु भूतेषु आत्मनः स्वस्य व्याप्तिञ्च सत्यं यथा भवति तथा कर्तुमत्यद्भुतरूपमुद्वहन् बिभ्रत् सभायां यस्तम्भस्तस्मिन्नदृश्यत तद्दृष्टो बभूव कथम्भूतं रूपं न मृगं नापि मानुषं रूपमपितूभयमिश्रमित्यर्थः निजभृत्यभाषितमित्यत्र बहुवचनान्तेन निजभृत्यशब्देन समासस्तदयमर्थः, यत्तावत्प्रह्लादस्य निजभृत्यस्य भाषितम् "भौतिकेष्वथ भावेषु भूतेषु च महत्सु च । भगवानास्ते" इति तत्सत्यं कर्तुं, तथाऽत्यद्भुतदैत्यघातकमतिघोरं रूपमुद्वहन्निति तथा निजभृत्यैः सनकादिभिर्यद्भाषितं त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुम्, तथा ब्रह्मसृष्टावदृष्टमश्रुतञ्चात्यद्भुतं रूपमुद्वहन् सभायां मध्येऽदृश्यत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथा नान्तर्बहिरिति न नरैरिति न मृगैरिति च ब्रह्मणा निजभृत्येन यद्भाषितं तथास्त्विति तत्सर्वं सत्यं कर्तुं न च तद्ब्रह्मसृष्टं रूपं न च नरो न मृगो वा न च सभागृहस्यान्तः न च प्राङ्गणवद्बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति तथा "अकुतश्चिद्भयोऽमरः" इति यच्च नारदेन स्वभृत्येनेन्द्रंप्रति भाषितम् "अयं महान् संस्थां न प्राप्स्यते" इति अनन्तानुचर इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुमदृश्यत चकारान्निजभाषितं च यत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । तेषामहं समुद्धर्ता" इति तच्च सत्यं कर्तुमदृश्यतेति ॥ १८ ॥

स दैत्येन्द्र एवं ध्वनिं श्रुत्वा तदा सत्त्वं प्राणिवि... सर्वतो विलोकयन् स्तम्भस्य मध्यान्निर्गच्छन्तं नावं मृगं ...

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नरः किन्तु नृमृगेन्द्रयोरुभयोरपि रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैव मलंमयानकं तन्नृसिंहरूपं मीमांसमानस्य दैत्येन्द्रस्याऽग्रतः स नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति, त्रिभिः। प्रतप्तेति। प्रतप्तं चामीकरं स्वर्णं तद्वत्पिशङ्गे चण्डे उग्रे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः स्कन्धरोमाणि च तैर्जृम्भितं साटोपमाननं मुखं यस्मिन् ॥ २० ॥

कराला उग्रा दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वत् चञ्चला क्षुरांतवत्तीक्ष्णा च जिह्वा यस्मिन् भृकुटी युक्तेन मुखेनोल्बणां स्तब्धावुदञ्चितावूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् ॥ २१ ॥

दिवि स्पृशन् कायो यस्मिन् अलुक्समासः अदीर्घा नृस्वा पीवरा स्थूला च ग्रीवा उरु विशालं वक्षःस्थलं च यस्मिन् अल्पं मध्यमं उदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तं विष्वञ्चः सर्वतः प्रसृताः भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् भुजा एवानीकं सेना तच्छन्नं यस्मिन्निति वा स्वेनानीकेन मर्दितमिति प्रयोगात् नखा एवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यं सर्वाणि निजानि चक्रादीनीतराणि च वज्रादीनि त एवायुधप्रवेकाः शस्त्रस्तोमास्तैर्विद्राविता दैत्या दानवाश्च येन तद्रूपं मीमांसमानस्याऽग्रतः समुत्थितमिति पूर्वेणान्वयः ॥ २३ ॥

तथा आविर्भावे प्रयोजनविमर्शनपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः—प्रायेणेति। प्रायेण महामायाविना हरिणा मे मम अयमेवंभूतो वधः वधोपायः स्मृतश्चिन्तितस्ततयाप्यनेन समुद्यमेन किं न किञ्चित्स्यादित्येवं ब्रुवन् गदैव आयुधं यस्य स दैत्य एव कुञ्जरो गजो नदन् जगत् नृसिंहं प्रत्यभ्यपतत् अभिमुखमागतवान् तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितो ऽदृष्टो ऽभूद्यथा पतितः पतङ्गमः शलभस्तद्वत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदा हिरण्यकशिपुः किंकृतवानिति तदवस्थामाह, अभिक्रमन्निति। पुत्रमभिक्रमन् पादविक्षेपं कुर्वन् तस्य निर्ह्लादस्य पदं विषयं कर्तुं भूतं न ददर्शेत्यन्वयः येन नादेन अनेन हिरण्यकशिपोर्हृदयदारातिशयो दर्शित इति ज्ञायते ॥ १७ ॥

आकाशविशेषगुणस्य शब्दस्य चेतनाश्रयत्वेन दर्शनात् किंमिदमिति मीमांसमानेषु सत्सु तदाश्रयोऽप्यदर्शि इत्याह, सत्यं विधातुमिति। रूपं विशिनष्टि, न मृगमिति नामावान्यविरोधे'चेविति वचनात् न मृगं केवलं मृगस्य विद्यमानं न भवति न मानुषं मानुषस्य विद्यमानं न किन्तु तयोः समाहाररूपम् ॥ १८ ॥

एवमिधं सत्वं प्राणविशिष्टं रूपमुद्वहंस्तस्याग्रतोऽग्रे समुत्थितोऽदृश्यतेत्यन्वयः। किंविशिष्टस्य स्तम्भस्य मध्यान्निर्जिहानमुत्तिष्ठमानमेतन्नृमृगेन्द्ररूपं किमितिमीमांसमानस्य विचारं कुर्वतो हिरण्यकशिपोः तद्रूपं विशिनष्टि, तदद्भुतमित्यादिना। चामीकरं सुवर्णं सटाकेसरैः कर्णागतरोमविशेषलक्षणान्तर्दंष्ट्रैर्जृम्भितं विकसितमाननं यस्य स तथा ॥ १९—२० ॥

करालाः क्रूरदंष्ट्रा यस्य स तथा करवालवत् चन्द्रहासवच्चञ्चलं क्षुरान्तः क्षुरधारा तद्वत्स्थिता जिह्वा यस्य तत्तथा भृकुटचा मुखेन पूर्वभागेनोल्बणं क्रूरं स्तब्धौ दृढौ ऊर्ध्वीकृतौ च कर्णौ यस्य तत्तथा तद्गिरिकन्दरवद् अद्भुतं व्यात्तश्चास्यं नासापुटं च यस्य तत्तथा तत् हनुभेदेन विदीर्णकपोलेन भीषणं भयजनकम् ॥ २१ ॥

ग्रीवा चोरू च वक्षःस्थलं च तानि तथा अदीर्घाणि पीवराणि ग्रीवोरुवक्षःस्थलानि यस्य तत्तथा तत् "चन्द्रो हेम्नि हिमांशौ ना चन्द्रकं रोचिषेपिच"इत्यभिधानात् चन्द्रांशुवर्णवद्गौरैरुणैस्तनूरुहैः छुरितं व्याप्तम् "पीतेऽरुणे सिते गौरे"इत्यभिधानं विष्वक् व्याप्तैर्भुजानीकशतैर्युक्तं बहुत्वापेक्षयानीकेत्युक्तम् ॥ २२ ॥

"निजमात्मीयनित्ययोः" इत्यमरः निजान्यात्मीयानि नखापेक्षयेतराणि चक्रादीनि यानि तैरायुधप्रवेकैरायुधमुख्यैर्विद्राविता दैत्यदानवा येन तत्तथोक्तं तत् यद्वा निजं सहजं नखलक्षणमायुधम् इतराणि पृथक्स्थितानि चक्रादीनीति मे श्रीरसाणिणा निसर्गेणाशुणा हरिणा अनेन रूपेण प्रायेण ममायं वधः स्मृतो निरूपितः किं स्मृतो वधोयं किमितिवा कीदृशस्य मे पुत्रवधे समुद्यतस्य पुत्रहन्तुर्योवधः शास्त्रेषु स्मृतो विहितिः सोयमद्य प्राप्तः किस्त्रेति ॥ २३ ॥

एवं विमृश्य वधाभिवृत्तः किमकरोत्याह, एवमिति। क्रमश्यपतदित्यत उक्तं नृसिंहप्रतीति। दैत्यकुञ्जरो दैत्येन्द्रः निदर्शनमाह, अलक्षितः इति। साहसिकः पतङ्गमः शलभः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मीमांसेति सार्द्धत्रिकं तत्र मीमांसेत्यर्द्धकम् ॥ २०—२१ ॥

चन्द्रेति। भुजा एवानीकानि सेनाः ॥ २२—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तस्य ध्वनेः पदमाश्रयम् ॥ १७ ॥

निजभृत्यस्य प्रह्लादस्य भाषितं दृश्यत इति वचनं सत्यं विधातुं सत्यमेव तद्धोकेपि सत्यत्वेन प्रकटीकर्तुमित्यर्थः। तथैवाखिलेषु भूतेषु आत्मनो नृसिंहाद्याकारस्य व्याप्तिं च सत्यां कर्तुं स्तंभे अदृश्यत दृष्टो बभूव, कीदृशः? न मृगं न मृगसम्बन्धि नापि मानुषं रूपं सभायामुद्वहन् अत्रापिहेतुः, सत्यमिति. निजभृत्यस्य हिरण्यकशिपोर्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथान्ततर्न बहिरिति न नरैर्न मृगैरिति प्रार्थितं सत्यं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्तुं यतो न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा नच सभागृहस्यान्तः नापि प्रांगणवद्बहिरिति एवञ्चकोचित् निजस्य भृत्यानां नारदादीनामपि भाषितं सत्यं विधातुमिति व्याचक्षते तथाहि "कौंतेय प्रतिजानीहि न मे भक्त प्रणश्यति" इतिनिजोक्तम् "अयंमहान् संस्थां न प्राप्स्यतीतीन्द्रं प्रति नारदोक्तं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति हिरण्यकशिपुना नीयमाने वरे तथास्त्विति ब्रह्मोक्तं च ॥ १८ ॥

स दैत्यः एवंभूतं प्राणिविशेषं स्तम्भमध्यान्निर्गच्छन्तं परितः स्तंभस्य चतुर्दिक्षु विपश्यन् किमेतदिति मिमांसितवानितिशेषः ॥ १९ ॥

तदलमतिशयेन भयानकं नृमृगेंद्ररूपं मीमाम्समानस्य तस्याग्रत एव नृसिंरूपः समुत्थित इत्यन्वयः भयानकत्वं विवृण्वन् रूपं विशिनष्टि त्रिभिः, प्रतप्तेति । चामीकरं सुवर्णं सटाः जटाकेसराः कण्ठरोमाणि ॥ २० ॥

करवालः खड्गः । भ्रुकुटीयुक्तेन मुखेन उल्बणं हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् ॥ २१ ॥

अदीर्घा पीवराच ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिन् तत् अल्पमध्यं क्षीणमध्यदेशं चन्द्रांशुवद्गौरैः श्वेतैः विष्वक् सर्वदिक्षु स्थितानां भुजानीकानां शतानि यस्मिंस्तत् । नखान्यायुधतुल्यानि यस्मिन् तत् ॥ २२ ॥

सर्वाणि निजानि चक्रादीनि इतराणि वज्रादीनि । तान्येवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदनवा यत्र तत् तदद्भुतं दृष्ट्वा तस्य मानसं वाचिकञ्च व्यवहारमाह—प्रायेणेति । वधः स्मृत इति प्राक् चिकीर्षित एवासीत् । सम्प्रति संस्मृतिविपर्यीकृत इत्यर्थः । तदप्यन्येन हरिणा समुद्यतेन तदर्थं कृतोद्यमेनापि किं न किञ्चदपीत्यर्थः । मद्बलस्यानेन दुष्पारत्वादिति भावः ॥ २३ ॥

स नृसिंहस्यौजसि दीप्तौ पतितस्सन्नलक्षितोऽदृष्टोऽभूत् । सत्वधामनि शुद्धसत्त्वप्रकाशे हरौ तत् तस्य तमोमयस्यादर्शनं न विचित्रम् । यतः पुरा सृष्ट्यादौ प्रलयकालीनं तमोऽपिबत् महत्तत्वमधिष्ठायैव नाशयामास । सम्प्रति साक्षात् स्वरूपभूतत्वेन किमुतेति भावः ततस्तस्मात् पृथग्भूय अभिपद्य अभिमुखमागत्य ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य निह्रादस्य पदमुद्भवस्थानम् ॥ १७ ॥

निजभृत्यभाषितम् निजभृत्यान्प्रति श्रीमुखेन भाषितं "न मे भक्तः प्रणश्यति" इति मन्दादिना यच्च भृत्येन प्रह्लादेन भाषितं दृश्यते इति तथात्मनोऽव्याप्तिं प्रति निजभृत्येन प्रह्लादेन भाषितं सत्सर्वत्रेति तथा निजभृत्येन हिरण्यकशिपुना भाषितमकुतश्चिद्भयोऽमरः एतद्विरोधेन मे मृत्युर्भवितेति तथा हिरण्यकशिपुना "यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम । भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्मम प्रभो" इत्यादिवरे प्रार्थिते सति यद्ब्रह्मणा निजभृत्येन भाषितं "तातेमे दुर्लभाः पुंसोयान् वृणीषे वरान्मम तथापि वितराम्यङ्ग" इति तथा निजभृत्यैः सनकादिभिः शापानन्तरमनुतप्तैः त्रिभिर्जन्मभिः शापमोक्षोभवत्विति भाषितं तत्सर्वं सत्यं विधातुं कर्तुम् अद्भुतं रूपमुद्वहन् दधत् स्तम्भे अदृश्यत दृश्योबभूव, भगवानिति शेषः ॥ १८ ॥

हिरण्यकशिपुः एवं ध्वनिरूपं कार्यं यथा ज्ञातवान्तद्वत् तत्कर्तृ सत्त्वं प्राणिविशेषमपि ज्ञातुं परितः विपश्यन् विलोकयन् अनु अनन्तरं स्तम्भस्य मध्यान्निर्जिहानं निर्गच्छन्तं नृमृगेन्द्ररूपम् विपश्यन् अहो अयं न मृगः नापि नरः एतद्विचित्रं किमिति मीमांसितवानिति शेषः ॥ १९ ॥

एवमलं भयानकं न मृगेन्द्ररूपं मीमांसमानस्य अग्रत नृसिंहरूपोभगवान् समुत्थितोऽभूत्. तदेवरूपमनुवर्णयति प्रतप्तेत्यादि त्रिभिः । प्रतप्तं यच्चामीकरं स्वर्णं तद्वत्पिशङ्गे चण्डे ऽरुणे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः कण्ठरोमाणि च यस्मिन् तत् स्फुरत्सटाकेसरं जृम्भितमाननं यस्मिन्तज्जृम्भिताननं तच्च तच्च तत् ॥ २० ॥

कराला उग्रा दंष्ट्रा यस्मिन् करवालः खड्गः भ्रमत्करवालवत् चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्वणं स्तब्धौ ऊर्द्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवत् अद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हन्वोः कपोलप्रान्तयो र्भेदेन प्रसारणेन भीषणम् ॥ २१ ॥

दिविस्पृशदत्युच्चः कायोयस्मिन् अलुक्समासः अदीर्घा पीवरा पुष्टा च ग्रीवा यस्मिन् उरु विशालं वहु विस्तीर्णं वक्षःस्थलं यस्मिन् तच्च तच्च तत् अल्पं मध्यमुदरं यस्मिन् चन्द्रांशुवद्गौरैः तनूरुहैः विष्वक् परितः छुरितं व्याप्तम् भुजा एवोभयतोनीकशतं यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं आसादितुमशक्यम् सर्वाणि च निजानि सुदर्शनादीनि इतराणि वज्रादीनि एवायुधप्रवेकाः शस्त्रश्रेष्ठास्तैः विद्राविताः दैत्या दानवाश्च येन एवंभूतं रूपं मीमांसत समुत्थितइति पूर्वेणान्वयः प्रायः उरुमायिना अत्यद्भुतशक्तिमता हरिणा विष्णुना मे ममायं सङ्ग्रामे श्लाघ्यत्वेन प्रसिद्धोवधः स्मृतश्चिन्तितस्तथाप्यनेन समुद्यतेन किं स्यात् ॥ २३ ॥

सदैत्यकुञ्जरएवं ब्रुवन् गदायुधः नदन् नृसिंहं प्रत्यभ्यपतदपि तु पुनर्नृसिंहौजसि पतितः सन् अग्नौ पतङ्गमो यथा तद्वदलक्षितोऽभवत् ॥ २४ ॥

भाषा टीका ।

वह पुत्र वध की इच्छा करने वाला बडे शरीर के बल से पराक्रम करता हुआ अद्भुत और अपूर्व शब्द को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न तद्विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुराऽपिबत्तमः।
ततोऽभिपद्याभ्यहनन्महाऽसुरो रुषा नृसिंहं गदयोरुवेगया ॥ २५ ॥
तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत्।
स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ॥ २६ ॥
असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत ! सर्वधिष्ण्यपाः।
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २७ ॥
तं श्येनवेगं(१) शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः।
कृत्वाऽट्टहासं(२) खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥ २८ ॥
विष्वक्स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम्।
द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९ ॥
संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया।
असृग्लवाक्तारुणकेसराननो यथाऽन्त्रमाली द्विपहत्यया हरिः ॥ ३० ॥

भाषा टीका।

सुनकर, उस सभा के भीतर उस शब्द के आश्रय को न देखता भया कि जिस शब्द से दैत्य यूथप लोग त्रास को प्राप्त हुए ॥ १७ ॥

प्रभु ने भी अपने निजदास के भाषण को सत्य करने के लिये और प्रह्लादोक्त निखिल भूतों में अपनीव्याप्ति को सत्य करने के लिये ऐसा अति अद्भुत रूप धारण करके दर्शन दिया कि उस सभा मे उसस्तम्भ के मध्य में आप का रूप न सिंह का मालूम पडता और न मनुष्यका ॥१८॥

हिरण्यकशिपु भी उस शब्द के कारण को चारो तरफ देखता हुआ. उस स्तम्भ के मध्य से निकलते हुए श्रीनृसिंह देवरूप एक अपूर्व प्राणि विशेष को देखता हुआ, और देखकर बोला, कि यह न मृग है न नर है अहो अति आश्चर्य है यह मिलकर नरसिंह रूप क्या है ॥ १९ ॥

हिरण्यकशिपु ऐसा विचार करता रहा इतने में अग्रभाग में बडे भयानक नृसिंह रूपसे भगवान उठ खडे हुए वह नृसिंहरूप कैसा है कि प्रतप्त सुवर्ण के सदृश पीले लोचन हैं जिसमें और स्फुरायमाण होरहे जटा और कंठ रोम जिसमें॥ २०॥

बडी ऊंची २ डाढे जिसमें खड्ग छुरीकी चंचल और छुरा सरीकी तीक्ष्ण जिह्वा, शंकु सदृश ऊंचे खडे हुए कर्ण गिरि गुहा के सदृश अद्भुत पसरा हुआ है मुख और नासिका जिसमें, और हनु (ठोडी) के विदारण करने से बडा भयानक ॥ २१ ॥

शरीर आकाश. में स्पर्श कररहा जिसमें, बडी पुष्ट ग्रीवा वाला भारी वक्षःस्थल वाला अल्प मध्य भाग वाला और चन्द्रकिरण वत् गौर लोम समूह से व्याप्त चारों तरफ फैली हुई सैकडों भुजायें जिसमें और नख ही आयुध जिसमें ॥ २२ ॥

और बडा दुरासद, कि जिसको देखकर समीप न जासके और निज तथा इतर जो चक्र वज्रादि आयुध तिनों से विद्रावित किये हैं दैत्यदानव जिसने ऐसे रूपको हिरण्यकशिपु देखकर विचारने लगा, कि प्राय करके बडा मायावी इस हरि ने मेरे वधका विचार किया है तौ भी इसके उद्योग से क्या होना है ॥ २३ ॥

उस समय वह दैत्यकुंजर हिरण्यकशिपु ऐसे कहता हुआ हाथ में गदा लेकर श्रीनृसिंह देव के ऊपर चला जैसे अग्नि पतंग गिरने से अलक्षित होजाता है ऐसे ही वह असुर भी नरहरि के तेज में अलक्षित होगया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सत्त्वधामनि सत्त्वप्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपिबत्पिबत् ॥ २५ ॥

विक्रमन्तं ततस्ततः प्रहरन्तम् हस्तादुत्कलितो निस्सृतः ॥२६॥

तदा अमरा देवाः सर्वे धिष्ण्यपा असाध्वमन्यन्त हृतान्योकांसि स्थानानि येषां ते तद्भिया घनच्छदा मेघान्तरिताः सन्तः यस्य हस्तात्स्वयं मुक्तस्तं नृहरिं स्ववीर्याच्छङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तमासज्जताऽभ्यपद्यतेत्यन्वयः ॥ २७ ॥

श्येनस्येव वेगो यस्य तम् शतचन्द्रवर्मभिः खड्गचर्ममार्गैः

(१) शतचन्द्रवर्मभिरिति-विज० ॥ (२) खरनिस्वनोल्बणः इति. श्री-वीर०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ।
अहन्समन्तान्नखशस्त्र * पार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान्सहस्रशः ॥ ३१ ॥

सटाऽवधूताजलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ।
अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अच्छिद्रं यथा भवत्येवमुपर्यधश्चरन्तम् अट्टहासमेवाऽऽह, खरं तीव्रम् उत्स्वनेन महाशब्देनोल्वणं भयङ्करम् तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य ॥ २८ ॥

अहखो दृष्टान्तः व्यालो यथा आखुं मूषकम् विदारणे दृष्टान्तः अहिं गरुड इवेति विष्वक् सर्वतः स्फुरन्तं निःसरन्तम् अहखेनातुरं विवशम् इन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन न क्षता त्वगपि यस्य द्वारि सभायां नान्तर्नबहिः ऊरे ऊरौ निपात्य न भूमौ न चाम्बरे नखैः व्यसुभिरसुमद्भिर्वा एवं दिवानक्तपरिहाराय सन्ध्यायामिति द्रष्टव्यम् ॥ २९ ॥

दैत्यवधमुक्त्वा तद्भृत्यवधमाह, द्वाभ्याम् । संरंभेण दुष्प्रेक्षणाणि करालानि लोचनानि यस्य असृजो रक्तस्य लवैर्विन्दुभीरक्ताः सिक्ता अत एवारुणाः केसरा आननं च यस्य सः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतस्तस्यानुचरानहन्नित्युत्तरेणान्वयः आन्त्राणां माला कण्ठे विद्यते यस्य ॥ ३० ॥

नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तम् दोर्दण्डानां यूथानि समूहा यस्य सः तं दैत्येन्द्रमनुपन्था येषां तान् अन्यानपि तत्पक्षपातिन इत्यर्थः ॥ ३१ ॥

दैत्यवधव्यग्रस्य नृहरेराटोपमाह द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिता जलदा मेघाः परापतन् व्यशीर्यन्त अनेन ये मेघान्तरिताः देवास्ते स्पष्टं पश्यन्तित्यायाक्षां दृष्टवानित्यर्थः । तस्य दृष्ट्या विमुष्टं रोचिर्येषां ग्रहाणां ते तिरस्कृतप्रभा अभवन्निति शेषः । दिगिभा दिग्गजाः ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्त्वधामनि शुद्धसत्त्वाश्रये हरौ पतिततमोमयस्य दैत्यस्याऽदर्शनं यत्किञ्चिच्चित्रं न भवति तत्र हेतुर्यो हरिः पुरा सृष्ट्यादौ प्रलयकालिकं तमः स्वतेजसा अपिबत् ततो महासुरोऽभिपत्याभिमुखमागत्य रुषा क्रोधेन उरुवेगया भ्राम्यमाणया गदया नृसिंहमभ्यहनत्ताडितुमुद्युक्त इत्यर्थः । सगदमग्रहीदित्युत्तरस्यान्वयादिति भावः ॥ २५ ॥

विक्रमन्तं कथञ्चिदग्रहत्तुमुद्यतवन्तं तं दैत्येन्द्रं गदाधरो नृसिंहः सगदमग्रहीत् यथा तार्क्ष्यसुतो गरुत्मान् महासर्पं तद्वदित्यर्थः । स गृहीतोऽसुरस्तदा विक्रीडतस्तस्य नृसिंहस्य हस्तादुत्कलितो विसृष्टो यद्वद्यथा विक्रीडतो गरुत्मतोऽहिर्गलितो भवति तद्वत् भगवतस्तत्क्रीडनं तद्विसर्जनरूपमजानन्तो लोकपालाः सर्वे इन्द्रादयः सुराः हृतं दैत्येन्द्रेणापहृतम् ओकः स्थानं येषां ते अतएव तद्भयेन घनच्छदा मेघेषु छन्नाः सन्तः असाध्वमन्यन्त अहो भगवतोऽप्ययं बलीयाननेनैव तस्य किं स्यादित्येवममन्यन्तेत्यर्थः यस्य हस्तात्स्वयं मुक्तस्सन् नृहरिं स्ववीर्याच्छङ्कितं मन्यमानो ऽत एव महामना अहमेव बलीयानित्याभिमानयुक्तो ऽसुरो मृधे युद्धे जितश्रमः श्रमरहितः खड्गचर्मणी खड्गखेटे प्रगृह्य पुनस्तं नृसिंहं पुरा असज्जत अभ्यपतत् ॥ २६ ॥ २७ ॥

श्येनस्येव वेगो यस्य शतचन्द्रवर्त्मभिः शतचन्द्रश्चर्म तस्य वर्त्मभिः खड्गचर्ममार्गैरच्छिद्रं यथा भवति एवमुपर्यधश्च चरन्तं दैत्यं हरिरट्टहासं कृत्वा खरेण कठिनेन निस्वनेन ध्वनिना उल्बणो भीषणो महावेगो निमीलिते ऽट्टहासखरनिस्वनाभ्यानिमीलिते ऽक्षिणी यस्य तं जग्राह, खरनिस्वनोल्बणामिति द्वितीयान्तपाठे तु खरेण निस्वनेन महाशब्देनोल्वणं भयंकरमट्टहासं कृत्वा तद्भयेन हरेस्तेजसा च निमीलिताक्षमग्रहीत् इत्यर्थः ॥ २८ ॥

ततः विष्वक् सर्वतः स्फुरन्तं सर्वावयवान् प्रचालयन्तमित्यर्थः । अहखेन हेतुना आतुरं विवशमिन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन अक्षता त्वगपि यस्य तं दैत्यं द्वारि सभायाः नान्तर्बहिः ऊरावङ्के निपात्य न भूमौ न चाम्बरे नखैर्न तु व्यसुभिरसुमद्भिर्वा एवं दिवानक्तं विहाय संध्यायामिति द्रष्टव्यं लीलया क्रीडया ददार विदारितवान्, तत्र अहखे दृष्टान्तः यथा व्यालः सर्पः आखुं मूषकमिति विदारणे दृष्टान्तः महाविषमहिं सर्पं गरुड इवेति ॥ २९ ॥

एवं दैत्येन्द्रवधमुक्त्वा तद्दशावस्थितं नृसिंहमनुवर्णयन् दैत्येन्द्रभृत्यवधमाह संरम्भेणेति द्वाभ्याम् । अहिते संरम्भेण क्रोधेन दुष्प्रेक्ष्ये दुर्निरीक्ष्ये कराले लोचने यस्य व्यात्तं विकासितं यदाननं मुखं तत्पर्यन्तं स्वजिह्वया लिलिहन्सन् असृजो रक्तस्य लवैः बिन्दुभिः अक्तासिक्ता अतएवारुणाः केसरा आननञ्च यस्य आन्त्रमालाधरः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा तद्वत् ॥ ३० ॥

एवंभूतो नखांकुरैः उत्पाटितं हृदयसरोजं यस्य तद्दैत्यशरीरं विसृज्य तस्य दैत्येन्द्रस्यानुचरान् कथम्भूतान् वरायुधानि येषां तमनुपन्थाः अनुवृत्तिर्येषां तान् दोर्दण्डानां यूथानि यस्य सः नखा एव शस्त्रप्रायस्तैः समन्तात्सहस्रशो व्यहनत् हतवान् ॥ ३१ ॥

* पाणिभिरिति पाठः श्रीवीर० विज० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यवधव्यग्रस्य नृहरेराटोपमाह—सटेति द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिताः जलदाः मेघाः परापतन् व्यशीर्यन्त तस्य नृहरेर्दृष्ट्या विमुष्टमपहृतं शोचिः येषां तादृशाः ग्रहाः सूर्यादयोऽभूवन् श्वासेन हताः पीडिता अम्भोधयः समुद्राः चुक्षुभुः संचेलुः निर्ह्रादेन भीताः दिगिभा दिग्गजाः मुदं हर्षं जहुः तत्यजुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विसप्तलोकैकारेः केवलं तुच्छीकरणं भगवद्भक्तिवैशद्याय तत्त्वत इति नेत्याह—नतदिति । सत्त्वधामनि बलज्ञानसमाहारमूर्तौ पराक्रममूर्तौ वा जगदादौ तमः पानं पुरुषरूपेण अनेन जगदावरकं तमःपानरतो हरेरसुरभक्ष्मी करणं किमिति दर्शितम्, अथो लोकं विडम्बयतो हरेरसुरेण सह समरप्रकारं वर्णयति, ततइति ॥ २५ ॥

तस्य गदाशिक्षालाघवं वक्ति, स तस्येति । हस्तोत्कलितः हस्ताद्गलित उत्प्लुतो वा ॥ २६ ॥

तस्य हरेर्विडम्बनम् अजानताममराणां निरूपणप्रकारं वक्ति, असाध्विति । हतौजसः भ्रष्टावष्टंभा इव घनेन च्छदा च्छादनं येषां ते तथा मेघच्छायायां विलीना इव लुप्तोपमेयं स्वर्गधिष्ण्यपाः सर्वनक्षत्रपतयः चन्द्रादयोऽमराः तदसाध्वमन्यन्तेत्यन्वयः । तत्र हेतुः तं मन्यमान इति, नृहरेर्हस्तमुक्तोऽसुरः तं नृहरिं निजवीर्यं आत्मपराक्रमे शङ्कितं मन्यमानोऽभूदिति यत्तदिति हरेर्हस्तमुक्तोऽसुरः पराद्रवत् उताभ्यपतत् ? इति संशयो माभूदित्याह, पुनस्तमिति । आसज्जत सक्तोऽभूद्युद्धाय सन्नद्धोऽभूदित्यर्थः । शतचन्द्रवर्गभिः शतचन्द्रवर्मण्यां खड्गचर्मणीति प्रकृतत्वात् "भद्रं कर्णेभिः शृणुयाम देवाः"इत्यादिश्रुतेः छान्दसाभिप्रायेणायं प्रयोगः । सम्भाव्यते च परिभ्रमणे शिक्षाप्रकर्षद्भूयणां द्वे एव बहूनीव दृश्यन्त इत्यतो वा बहुवचनं युज्यते अच्छिद्रं निरवकाशमसिति क्रियाविशेषणेनैतदेव सूचयति, असुरवीर्यमाशङ्कमानो हरिः किमिकरोदिति तत्राह, हरिरिति ॥ २७–२८ ॥

विष्वक् परितः स्फुरन्तं अयन्तमित्यनेनापि शिक्षोत्कर्षं ध्वनयति, हरिः पुनर्ग्रहणेनातुरमकरोदिति शेषः । अनेनातुरत्वं लक्षयति, तत्र दृष्टान्तमाह, व्याल इति । व्यालः सर्पः खननशीलत्वादाखुः ग्रहणमरस्मरणार्थमाह, द्वारीति । द्वार्यधरितरश्रीनदारणा स्थिरस्था उरावङ्के उत्तानतयाऽऽपात्य अत्रापि हूस्वत्वं छान्दसं संरम्भेण क्षेपाद्दास्यन्तिककोपेन दुष्प्रेक्ष्ये कराले लोचने यस्य व्यात्ताननान्तं विवृतवदनस्याभरोष्ठम् असृक्लवया रुधिरबिन्दुनाक्तेऽकषिते अत एवारुणकेसरानने यस्य स तथोक्तः स हरिः सिंहः ॥ २९—३० ॥

न केवलमेनमेव हतवान् किन्तु तदनुचरानासुरानित्याह, नखां कुरोति । अहन् हतवान् नखाग्रपाणिभिर्नखैः शस्त्रैः पाणिभिश्च हरेर्दण्डानां यूथानुपथान् निकराकृष्टान् ॥ ३१ ॥

तदवसरविक्रमं वक्ति, सटाविधूता इति । दिगिभा दिग्गजा मदं जहुस्त्यक्तवन्तः प्रोत्सर्पत प्रोदसर्पत उद्गतेत्यर्थः ॥ ३२—३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हस्तादुत्कलितः निःसृतः । घनच्छदा मद्धमसंते विहक्षन्त इति दैत्यकोपभयान्मेघान्तरिताः हृतौकसोऽसाध्वमन्यन्तेति ओकांस्यपहृतवानेव सम्प्रति यद्ययं जीविष्यति तदस्माकमवशिष्टान् प्राणानपि हरिष्यतीति भावः । निलवीर्याच्छङ्कितं मन्यमानः यद्यस्मात् हस्तान्मुक्तः ॥ २६—२७ ॥

शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः अट्टहासशब्दोत्थभयेन निमीलिते अक्षिणी येन तम् ॥ २८ ॥

व्यालो यथा मूषिकमिति ग्रहणे दृष्टान्तः गरुडो यथाहिमिति, विदारणे कुलिशेनाक्षता त्वगपि यस्य तम् लीलयाऽवहेलयैव ददार द्वारि सभायां नान्तर्न बहिः ऊरे ऊरौ निपात्य न भूमौ नाम्बरे नखैर्न व्यसुभिरसुमद्भिर्वा एवं दिवानक्तं परिहाय सन्ध्यायामिति ज्ञेयम् ॥ २९ ॥

असृजो रक्तस्य लवैर्बिन्दुभिराक्ताः सिक्ताः अत एवारुणाः केसरा आननञ्च यस्य आन्त्रमाली मालारूपेणान्त्रं दधान इत्यर्थः । द्विपहत्यया हस्तिवधेनान्वितो हरिः सिंह इव नखाङ्कुरैरुत्पाटितं हृत्सरोरुहं यस्येति यत्राहमेव प्रतिक्षणं सुखमवसं तत्र सम्प्रत्ययं मन्दभाग्यः क्रोधमत्सरादिकं तामसं कथं वासयति स्मेति द्रष्टुमिवेत्युत्प्रेक्षा सरोरुहरूपकेण व्यज्यते । अत एवाङ्कुररूपकं सरोरुहभङ्गाभावायैव बुद्ध्यते दोर्दण्डानां यूथानि यस्य सः अनुपथान् अनुवर्तिनः ॥३०–३१ ॥

तत् प्रतापमाह, सटेत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्त्वस्याप्राकृतस्य तेजसो धामनि आश्रये भगवति पतितस्य तमोमयस्य दैत्यस्य यददर्शनं तद्विचित्रं न भवति यः पुरा सृष्ट्यादौ प्रलयकालीनं तमः तु सहोऽपिबत् संक्षेपेणोक्तं पतनादर्शनप्रकारं विस्तरेण वर्णयति ततइत्यादिना ॥ २५ ॥

विक्रमन्तं ततस्ततः प्रह्वरन्तं तार्क्ष्यसुतो गरुडो महोरगं यथाऽग्रहीत् तथा विक्रीडतोऽर्हिर्यद्वत्कलितो भवेत् तद्वत् सोऽसुरः तस्य हस्तादुत्कलितो मुक्तः ॥ २६ ॥

तेन हृतौकसोऽमराः देवाः सर्वे धिष्ण्यपाः दिक्पालाः घनच्छदाः मेघान्तरिताः तदुत्कलनमसाध्वमन्यन्त महासुरः यस्य हस्तान्मुक्तस्तं नृहरिं निजवीर्यशङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य मृधे जितश्रमः अमशून्यः वेगेन पुनस्तमासजत् ॥ २७ ॥

तं खरं खलं हिरण्यकशिपुं श्येनस्येव वेगो यस्य स तथा तम्, शतचन्द्रवर्त्मभिः खड्गचर्मभ्रामणमार्गैः अच्छिद्रं यथा स्यात्तथोपर्यधश्चरन्तं महाजवो हरिः उरस्वनेनाट्टहासेन भयङ्करं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ।
शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खङ्ककुभो न रेजिरे ॥ ३३ ॥
ततः सभायामुपविष्टमुत्तमे नृपासने संहततेजसं विभुम् ।
अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ॥ ३४ ॥
निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ।
प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अट्टहासमुच्चैर्हासं कृत्वा जगृहे कथंभूतमट्टहासेन निमीलिते अक्षिणी यस्य तम् ॥ २८ ॥

विष्वक् सर्वतः स्फुरन्तं निस्सरन्तं ग्रहणेनातुरम् इन्द्रेण सह युद्धे कुलिशेनापि न क्षता त्वक् यस्य तम् यथा आखुं मूषकं व्यालः सर्पोविदारयेद्दन्तैरिति शेषः "व्यालोदुष्टगजे सर्पे" इति कोशात् यथा गरुडो महाविषमहिं नखैर्विदारयेत् तथा द्वारि नांतर्न बहिः ऊरू ऊरौ निपात्य न भूमौ न व्योम्नि नखैरेव नतु व्यसुभिरसुमाङ्घ्रिर्वा लीलया ददार दिवानक्ताभावाय संध्यायामिति शेषम् ॥ २९ ॥

हिरण्यकशिपुवधमुक्त्वा तदनुचरवधमाह-संरम्भेति द्वाभ्याम् । संरम्भेण कोपेन दुष्प्रेक्ष्ये द्रष्टुमशक्ये कराले लोचने यस्य स्वजिह्वया व्यात्ताननान्तं विलिहन् द्विपस्य हत्यया वधेन हरिः सिंहइव असृक्लवैरक्तबिन्दुभिः आक्ता अतएव अरुणाः केसराः आननं च यस्य आन्त्राणां माला यस्य स हरिः ॥३०॥

नखांकुरैरुत्पाटितहृत्सरोरुहं तं विसृज्य तस्य सहस्रशः अनुचरान् भृत्यान् अनुपथान् तमनुपन्था जीवनमार्गो येषान्तान् दोर्दण्डायूथानि यस्य स नखादिभिः अहन् हतवान् ॥ ३१ ॥

तस्य निरतिशयं प्रतापमाह, सटेति द्वाभ्याम्। सटाभिरवधूताः अपनीताः परापतन् दूरमगमन् ॥ ३२ ॥

भाषा टीका।

जिस हरि ने सृष्टि काल में प्रलयकाल के तम को पान किया उस हरि में दैत्य का अलक्षित होना कुछ विचित्र नहीं ॥ तदनन्तर महाअसुर ने समीप में जाकर रोष से नर हरि के ऊपर बडे वेग वाली गदा चलाई ॥ २५ ॥

जहां तहां प्रहार करने वाले गदा सहित उस असुर को पकडा जैसे भारी सर्प को गरुड का बालक पकडे इतने ही में वह असुर भगवान के हस्त से सटकगया जैसे कि गरुड के खेलने में हस्त हे सर्प निकलजावे ॥ २६ ॥

हे भरत ! उस समय जिनों के घर द्वार छुडाये गये वो सब लोकपाल मेघों में छिपे हुए अच्छा नहीं मानते हुए हिरण्यकशिपु भी जिनके हाथ से छूटा है उन श्री नर हरि को अपने वीर्य से शंकित मानकर, श्रम को न मानकर फिर भी खड्ग चर्म (तरवार ढाल) को लेकर संग्राम के निमित्त वेग से प्रभु के समीप पहुंचा ॥ २७ ॥

श्येन सरीके वेग वाले और नीचे ऊपर खड्ग के चालों से निश्छिद्र विचरते हुए और उच्च स्वर से भयंकर तीक्ष्ण किया जो अट्टहास तिससे निमीलित (बंद) हुए नेत्र जिसके एसे उस दैत्य को भगवान ने पकड लिया ॥ २८ ॥

इन्द्र के वज्र से जिसके त्वचा में खरोंट भी नहीं आई सर्प के ग्रहण करने से मूषक जैसे ऐसे ग्रहण करने से आतुर चारों तरफ छटपटाते हुए उस दैत्य को द्वार में अपने जघन पर पटक कर, महा विष हरे सर्प को गरुड जैसे ऐसे लीलाई से नखों से विदारण करडाला ॥ २९ ॥

संरम्भ से दुर्निरीक्ष्य (देखे न जासकें) और कराल भयानक नेत्र जिनके, फाडे हुए मुख की दोनों बगलों को जिह्वासे चाटते हुए रुधिर करणों से सिचा हुआ है मुख और केसर (बाल) जिनके हिरण्यकशिपु की आंतों की माला पहिने हुए ऐसे नर हरि हाथी की हिंसा से सिंह जैसे, ऐसे शोभित हुए ॥३०॥

नखों से फाडडाला हृदय कमल जिसका एसे हिरण्यकशिपु को फेंककर चारों तरफ शस्त्रों लिये खडे हुए जो हजारों दैत्यानुचरों को भुजा रूप दंडों का समूह विद्यमान जिनके एसे नर हरि नख रूप शस्त्रों से मारते हुए ॥ ३१ ॥

उस समय आपका रूप कैसा है कि जिनके शिरके बालों टक्कर के से मेघ तितर बितर होगये और जिनकी दृष्टि से ग्रह और नक्षत्रों की कांति फीकी पडगई, और जिनकी श्वास से ताडित हुए २ समुद्र क्षुभित होगये, और जिनके शब्द से त्रस्त होकर दिग्गज भी चिल्लाने लगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्तासती प्रोत्सर्पत स्वस्थानात्प्रकर्षेणोदसर्पच्चलिता ॥ ३३ ॥

श्वभृत्यैश्वर्यमिव मत्वा कौतूहलेन तस्याऽऽसने उपविष्टं भयात्कोऽपि न बभाज नासेवत न लक्षितोद्वैरथः प्रतियोद्धा येन ॥ ३४ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

तदा विमानावलिभिर्नभस्तलं दिदृक्षतां सङ्कुलमास नाकिनाम् ।
सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ ३६ ॥

तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः ।
ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ ३७ ॥

(१)मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः ।
यक्षाः किम्पुरुषास्तात ! वेतालाः सिद्धकिन्नराः ॥ ३८ ॥

ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः ।
मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम् ।
ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ३९ ॥

ब्रह्मोवाच ।

नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ।
विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया सन्दधते ऽव्ययात्मने ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लोकत्रयस्य मस्तकज्वरं शिरोव्यथेव दुःसहम् प्रहर्षस्य वेगेनोत्कलितानि विकसितान्याननानि यासां ताः सुरस्त्रियः पुष्पवर्षैः नृहरिं ववृषुः ॥ ३५ ॥

नाकिनां देवानां विमानावलिभिर्नभस्तलं सङ्कीर्णमास सुराणामानकाः पटहास्तैर्जघ्निरे वादिताः स्त्रियो अप्सरसो ननृतुर्गन्धर्वाः जगुः ॥ ३६ ॥ ३७ ॥

गन्धर्वाप्सरसश्चारणाश्चेत्यर्थः ॥ ३८ ॥

नरशार्दूलं पुरुषोत्तमम् ॥ ३९ ॥

ब्रह्मादयोनृसिंहस्य शङ्कयाकुलचेतसः ।
आरादेवास्तुवन् सप्तदशश्लोकैः पृथक् पृथक् ॥—

अनन्तायानन्तं त्वां प्रसादयितुं नतोऽस्मि अनन्तत्वे हेतुः दुरन्ताः अनन्ताः शक्तयो यस्य, तत्कुतः ? विचित्राणि वीर्याणि प्रभावा यस्य, तत्किमर्थम् ? पवित्राणि श्रवणमात्रेण शोधकानि कर्माणि यस्य, वीर्यत्वमेवाह, विश्वस्येति।सन्दधते सम्यक्कुर्वते एवमप्यव्ययात्मने अप्रच्युतस्वरूपाय ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य नृहरेः सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्ता द्यौः प्रोत्सर्पेतेतस्ततश्चालितेवाभूत्. नृहरेः पद्भ्यामतीव पीडिता क्ष्मा भूमिरभूत् अत एव तस्यासह्येन रंहसा वेगेन बलेन वा शैलाः समुत्पेतुः उत्पलुत्य पतितवन्तः तस्य नृहरेः तेजसा खमाकाशं ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततोऽहमेव सर्वेश्वर इति लोकस्य प्रदर्शयितुं सभायामुत्तमे नृपासने उपविष्टं संभृतं संपूर्णं तेजो यस्य अलक्षितः न लक्षितो द्वैरथः प्रतियोद्धा येन प्रचण्डमुग्रं वक्त्रं यस्य तं विभुं नृसिंहं कश्चन कोऽपि न बभाज नासेवत कोऽपि समीपं गन्तुं नाशक्नोदित्यर्थः ॥ ३४ ॥

लोकत्रयस्य मस्तकज्वरं शिरोव्यथावद्दुस्सहं तमादिदैत्यं हिरण्यकशिपुं हरिणा नृसिंहेन युद्धे हतं निशाम्य दृष्ट्वा प्रहर्षवेगेन उत्कलितानि विकसितान्याननानि यासां ताः सुराणां स्त्रियः पुष्पवर्षैः पुनःपुनर्नृहरिं ववृषुः ॥ ३५ ॥

तदा दिदृक्षतां द्रष्टुमिच्छतां दर्शनार्थमागतानामित्यर्थः । नाकिनां देवानां विमानपंक्तिभिर्नभस्तलं सङ्कुलं संमर्दं बभूव सुराणामानकाः पटहास्तैर्दुन्दुभयो जघ्निरे ताडिताः गन्धर्वश्रेष्ठाः ननृतुः स्त्रियः अप्सरसो जगुः ॥ ३६ ॥

तत्रोपव्रज्य किंचित्समीपमागत्य ब्रह्मरुद्रप्रभृतयो देवादयः हे तात! मूर्ध्नि बद्धान्यञ्जलिपुटानि यैस्ते आसीनमुपविष्टं तीव्रं दुस्सहं तेजो यस्य तं श्रीनृसिंहं नातिदूरवर्तिनः पृथगेकैकश ईडिरे तुष्टुवुः ॥ ३७-३८—३९ ॥

तावदपारभिविधविचित्रशक्तिवीर्यमकर्मायत्तजगद्व्यापारं जगत्कारणं स्तुवन्नमस्करोति ब्रह्मा--नतोस्म्यहमिति। अनन्ताय स्वरूपतस्त्रिविधपरिच्छेदरहिताय दुरन्तशक्तये अपारशक्तये अचिन्त्यशक्तये वा शक्तिः स्वेतरसर्वसामर्थ्यनिर्वाहिका. "जगत् प्रकृतिभावो मे यः सा शक्तिरुदीरिता" इत्यादिपूक्ता. यद्वा यदन्यैरशक्यत्वादघटितमिव विभाति तद्घटनसामर्थ्यरूपा. यतस्त्वमुक्तविधदुरन्तशक्तिरनन्तशक्तिरत एव मद्वरेण सर्वतोऽघटितमरणं दैत्यं हतवानसीति भावः। यतस्त्वमनन्तोऽत एवाऽचेतने स्तम्भेऽप्याविर्भूतोऽसीत्याभिप्रायः

(१) मनुः प्रजानामिति. वीरा० पाठः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनन्तपदेन हि सर्वव्यापित्वाद्देशपरिच्छेदराहित्यम्, सर्वकालवर्तित्वात्कालपरिच्छेदराहित्यम्. साक्षात्परम्परया सर्वप्रकारत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वाद्वस्तुपरिच्छेदराहित्यम् विवक्षितम्, येन केनापि प्राशस्त्येन स्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिरधरीकृतत्वाभावरूपं वा वस्तुपरिच्छेदराहित्यम्. इति त्रिविधपरिच्छेदराहित्यं विवक्षितम् । नन्वस्त्वेवं स्वरूपं कृत्स्नजगदुदयविभवलयलीलस्य कियदेतदित्यहमनर्हामित्यभिप्रयन्, तावज्जगत्कारणत्वप्रयुक्तं विकारं निराह, विचित्रवीर्यायेति । वीर्यं नाम सर्वोपादानत्वे सर्वसाधारणो सर्वनियमने विकाररहितत्वम्. यथोक्तम्. "विकारविरहो वीर्यं प्रकृतित्वेऽपि मे सदा" इत्यादि. विचित्रशब्देनैवंविधस्य वीर्यस्यानितरसाधारण्यमुच्यते. पवित्रकर्मणो अकर्मायत्तजगद्व्यापाराय त्वद्व्यापारं शृण्वतां दुरितनिवर्तनक्षमव्यापारायेतिवा.गुणैः सर्वज्ञत्वसर्वशक्तित्वादिभिर्जगन्निमित्ततदुपादानत्वोपयुक्तैः स्वनियाम्यसत्त्वादिप्राकृतगुणैर्वा कृत्स्नस्य विश्वस्य सर्गादीन् स्वलीलयैव न तु कर्मणा सन्दधतं विदधते अव्ययात्मने एवमप्यव्ययः विकाररहितः आत्मा स्वभावो यस्य. स्वभावतोऽपि विकाररहितायेत्यर्थः स्वरूपतोऽपि विकारराहित्यस्योक्तत्वात् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सभावस्थानं तस्य वक्ति,तत इति । सम्भृततेजसं राशीकृततेजसं मलक्षितं न केनापि दृष्टम् ॥ ३४ ॥

नन्वयं जयः केनापि न लक्षितः तदङ्कुरव्यक्त्यदर्शनादित्याशङ्क्य, पुरुषकोपोपशमनं स्त्रीणामिव सुशकमिति भावेन सुरस्त्रीपुष्पवर्षप्रकारमाह, निशम्येति । लोकत्रयस्य मस्तकज्वरं शिरोरोगायमाणं प्रहर्षातिरेकेणोत्कलितं विकसितमाननं यासां तास्तथा ताः ॥ ३५ ॥

सुरस्त्रीवृष्टपुष्पसौरभ्याघ्राणेन किञ्चिच्छान्तकोपत्वादस्माकमप्ययमवसर इति मत्वा नानादेवानां नभसि विमानावलिसाङ्कुल्यप्रकारं वक्ति, तदेति । सुराणामानका दुन्दुभयः ॥ ३६ ॥

चण्डक्षुब्धानामपि चित्ताह्लादकरी स्तुतिरेवेति भावेन ब्रह्मादीनामुपक्रममाह, तमुपव्रज्येति । ये पूर्वमुपगन्तुं त्रसाः स ते ब्रह्मादयस्तं पृथगीडिर इत्यन्वयः ॥ ३७ ॥

नातिदूरचराः किञ्चित्समीपवर्तिनः ॥ ३८-३९ ॥

तत्र पृथक्पृथक् मतिलक्षणं स्तुतिप्रकारं ब्रूते, नतोऽस्मीति । गुणैः सत्त्वादिभिः स्वलीलया स्वरूपभूतलीलया अव्ययात्मने नित्यदेहाय ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सटाभिरूर्द्ध्वं क्षिप्तैश्चालितैर्विमानैः सङ्कुला व्याप्ता क्ष्मा च प्रोत्सर्पत महागमांभावतश्चाचार्यां । तिर्यगूर्द्ध्वाधो भावेनातिष्ठत् ॥ ३३ ॥

नृपासने ऽप्यधिष्ठमिति येन यः पराभूयते तेन तदधिकारः स्वीक्रियते इति राजनीतिं प्रदर्शयन्तमिव । यद्वा । शापग्रस्तेऽपि स्वभृत्ये स्वाभिमानत्यागाभावो व्यञ्जितः । यः किल ऋषिभिरपि समर्पितानन्यानुपहतान्मन्त्रपूतानप्यासनाद्युपहारान् स्वाच्छन्द्याङ्गीकरोति स एव भगवान् स्वभक्तेवासुरभावग्रस्तेन शापग्रस्तेनाप्यदत्तमपि तदुपभुक्तमपि सिंहासनं यत् स्वयमेवास्य तद्भक्तसौभाग्यमेव सर्वान् दर्शयामासेति तत्त्वं । सम्भृततेजसं सम्पूर्णप्रकाशं न लक्षितो द्वैरथः प्रतियोद्धा येन तं न वभाज भयाद्राजनादिना भक्तोऽपि कोऽपि नासेवेत ॥ ३४ ॥

निशाम्य दृष्ट्वा मस्तकस्य ज्वरमिव दुःसहम् ॥ ३५ ॥

नाकिनां स्वर्गिणां आस बभूव ॥ ३६—३७ ॥

अप्सरचारणा इत्यार्षम् ॥ ३८ ॥

सनकादीन् कोपयसि स्वभक्तौ भ्रंशयसि मया वरान् दापयसि दैत्यगृहे भक्तराजमाविर्भावयसि । दैत्यं प्रेर्य भक्तं निधां सयसि भक्तरक्षार्थं स्वयमेवमाविर्भवसीति तव विधित्सितं न कोऽपि वेत्तीत्याह—नतोस्मीति । अनन्ताय नज्ञातुं शक्योऽन्तो यस्य तस्मै अनन्तं त्वां प्रसादयितुं दुरन्तशक्तये दुर्ज्ञेयोऽन्तो यासां तथाभूताः शक्तयो यस्य तस्मै विचित्रवीर्याय क्षणमात्रेण सर्वाजेयदैत्यनिहन्त्रे क्रोधश्वेष्टितत्वेऽपि शुद्ध सत्त्वमयत्वात् पवित्रं कर्म यस्य तस्मै सन्दधते कुर्वते ॥ ३९—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्यौस्तस्य सटाभिः क्षिप्तैराकृष्टैर्विमानैः सङ्कुला व्याप्ता जाता यदा मतिपीडिता क्ष्मा प्रोत्सर्पत चानुव्यचलत् अमुष्य रंहसा वेगेन तस्य तेजसा खं नभः ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततस्तदनन्तरं सभायामुत्तमे नृपासने प्रह्लादार्थं तत्प्रसादीकर्तुमुपविष्टं सम्भृतं सम्यक् स्वभावत एव भृतं पूर्णं तेजो यस्य तं न लक्षितो द्वैरथः प्रतियोद्धा येन तत् अत्यमर्षणं प्रचण्डवक्त्र भीत्या कश्चन कोपि न बभाज नासेवत ॥ ३४ ॥

सुराणां स्त्रियः लोकत्रयस्य मस्तकज्वरं दुःसहशिरःपीडामिव तमादिदैत्यं हरिणा दुःखनाशकेन मृधे हतं निशम्य प्रहर्षवेगेनोत्कलितान्याननानि यासां ताः प्रसूनवर्षैर्ववृषुः ॥ ३५ ॥

तदा तस्मिन्नवसरे दिदृक्षतां द्रष्टुमिच्छतां नाकिनां दिवौकसां विमानावलिभिर्नभस्तलं सङ्कुलमास बभूव सुराणामानकाः दुन्दुभयश्च जघ्निरे तैर्वादिताः गन्धर्वमुख्याः जगुः स्त्रियश्च ननृतुः ॥ ३६-३७ ॥

गन्धर्वांश्च अप्सरसश्च चारणाश्चेति द्वन्द्वे अप्सर इत्यत्र सकाराभावः आर्षत्वात् ॥ ३८—३९ ॥

दुरन्तशक्तये नित्यशक्तये स्वलीलया स्वाधीनविहारेण हेतुना गुणैः स्वशक्तिगुणैः रजआदिभिः विश्वस्य सर्गादीन् विदधते अतएवाऽव्ययात्मने निर्विकारस्वरूपाय नतोऽस्मि ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रुद्र उवाच ।

कोपकालो युगान्तस्ते हतो ऽयमसुरो ऽल्पकः ।
तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ! ॥ ४१ ॥

इन्द्र उवाच ।

प्रत्यानीताः परम ! भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ ! शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहाऽपरैः किम् ॥ ४२ ॥

ऋषय ऊचुः ।

त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषाऽऽत्मगतं ससर्ज ।
तद्विप्रलुप्तममुना ऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥

पितर ऊचुः ।

श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।
तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥

भाषा टीका ।

खडे हुए जिनके शिरके केशों से उत्क्षिप्त (चालित) जो विमान तिनसे व्याप्त भया स्वर्ग लोक भी चलायमान होगया तथा चरणों से पीडित पृथिवी भी प्रचालित होगई, और वेगसे पर्वत उखड गये तेज से आकाश और दिशा शोभित न होने लगी ॥ ३३ ॥

तदनन्तर सभा में उत्तम नृपासन के ऊपर बैठे हुए प्रशन्त तेज वाले और नही देखा गया शत्रु जिन का ऐसे प्रचण्ड वदन वाले असह्य रूप विभु श्रीनरहरि के समीप कोईभी न जा सका ॥ ३४ ॥

तीन लोकों के मस्तक का ज्वर रूप उस आदि दैत्यको प्रभुके हाथ से मरा हुआ देखकर, हर्षके वेग से प्रसन्न मुख वाली देवाङ्गनां पुष्पों की वर्षा करने लगी ॥ ३५ ॥

उस समय देखने वाले देवताओं के विमानों की पंक्तियों से आकाश व्याप्त होगया, और देवताओं के आनक-दुन्दभि बाजे बाजने लगे, और गन्धर्व प्रभृति गाने लगे और अप्सरायें नाचने लगीं ॥ ३६ ॥

उस समय वहां पर ब्रह्मा महादेव प्रभृति देवता, ऋषि पितर सिद्ध विद्याधर महोरग मनु प्रजापति गन्धर्व अप्सरा चारण यक्ष किंपुरुष वेताल सिद्धेश किन्नर और सुनन्द कुमुदादिक सब विष्णु पार्षद मस्तकपर अञ्जलि बांधकर समीप जाकर अति दूरस्थित न होकर तीव्र तेज वाले श्री नरहरिको पृथक २ स्तुति करने लगे ॥ ३७—३९ ॥

ब्रह्मो वाच ।

ब्रह्माजी बोले, कि-अन्त शून्य दुरन्त शक्तिवाले विचित्र वीर्यवाले और पवित्र कर्म जो आप हैं तिनको नमस्कार हो, और अपने गुण और लीलासे अव्ययात्मा को नमस्कार हो ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रुद्रस्तु तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते, कोपेति । सहस्रयुगान्तस्तव कोपस्य कालः कोपायोग्यश्चायमित्याह, अल्पकोऽल्परूपः अतः कोपानिवृत्त्या प्रह्लादं मा हिंसीरित्याह, तत्सुतमिति । यद्वा अकालेऽप्ययं कोपोऽस्यं भक्तस्य रक्षार्थमितिचेत्सर्हीदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ॥ ४१ ॥

इन्द्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः, किन्तु त्वत्परिचर्यैव भवता पुनरनेन संरम्भेण स्वकार्यमेव साधितं तस्य च सिद्धत्वादुपसंहरैनं क्रोधमित्याशयेनाऽऽह,हे परम! नो अस्मांस्त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः अन्तर्यामित्वात्तवैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं त्वद्गृहमेवैतावत्पर्यन्तं भयहेतुत्वेनास्मत्स्मृतिपथे नित्यं स्थितेन दैत्येनाक्रान्तं व्याप्तं सत्प्रत्यबोधि भयापाकरणेन विकासं नीतम् । ननु, तव त्रैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत्तत्राऽऽह—कालग्रस्तमिति । ते त्वाम् हे नारसिंह नरस्य सिंहस्य चाकाराभ्यामाविर्भूत ! अपरैः स्वर्गादिभिः किम् ॥ ४२ ॥

ऋषयस्तु तपःप्रवर्तनेनास्माकं महाननुग्रहः कृत इत्याहुः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धा ऊचुः ।

यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ।
नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ! ॥ ४५ ॥

विद्याधरा ऊचुः ।

विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ।
स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ४६ ॥

नागा ऊचुः ।

येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ।
तद्वक्षःपाटनेनासां दत्तानन्द ! नमोस्तु ते ॥ ४७ ॥

मनवऊचुः ।

मनवो वयं तव निदेशकारिणो दितिजेन देव ! परिभूतसेतवः ।
भवता खलः स उपसंहृतः प्रभो ! करवाम ते किमनुशाधि किङ्करान् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वं नो यदास्थ परमं ध्यानलक्षणं तपः परमत्वे हेतुः आत्मनस्तव तेजः प्रभावरूपं तदेवाङ्कुः येन तपसाऽऽत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तदमुना दैत्येन विप्रलुप्तं कुण्ठितं सत् हे शरण्यपाल ! अद्य रक्षाऽर्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषङ्गः॥ ४३ ॥

पितरस्तु श्राद्धोद्धरणेन परमोपकारिणं श्रीनृसिंहं प्रणमन्ति—श्राद्धानि श्रद्धायुक्तानि पिण्डादीनि नोऽस्मभ्यं पुत्रैः दत्तानि प्रसभं बलाद्यः स्वयमधिकृत्य बुभुजे किञ्च तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् तानि च तस्योदराद्य आच्छेदाहृतवान् कथंभूतात् नखैर्विदीर्णा वपा यस्य तस्मात् वपाविदारणस्य तद्गतपिण्डोद्धरणमेव फलमिति भावः ॥ ४४ ॥

योगसिद्धां गतिमणिमादिसिद्धिम् नाना अनेके दर्पा यस्य तम्, तस्मै तुभ्यं तं त्वामुद्दिश्य ॥ ४५ ॥

विद्यामन्तर्धानादिलक्षणाम् अनुराद्धां संप्राप्तां संख्ये युद्धे॥४६॥

रत्नानि फणास्थु स्थितानि तथा स्त्रीरत्नानि चोत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनन्दो येन तत्सम्बोधनं पाठान्तरेऽस्माकं दत्त आनन्दो येनेति ॥ ४७ ॥

नृसिंहनावलोकिताः सन्तो मूर्ध्नि बद्धाञ्जलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादाः येषां ते मनुशाध्यनुशिक्षय ॥ ४८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्ब्रह्मणोऽभिप्रेतं कृत्स्नजगत्सर्गादिकर्तुस्तव कियदेतदिति तदेव विशदयन्वात्सल्ययुक्तं स्तौति, रुद्रः—कोपकालइति. तव कोपकालो युगान्तः द्विपरार्द्धावसानं कोपकाल इत्यनेन मदन्तर्यामितया मन्मुखेन संहर्त्ता त्वमेवेत्युक्तं भवति. अयन्तु कोपाविषय इत्याह, अयमल्पकोऽल्पबलो हतोऽतः कोपनिवृत्त्या हे भक्तवत्सल ! तत भक्तं तत्सुतं तस्य दैत्येन्द्रस्य सुतं उपस्थितं तव समीपमागमिष्यन्तं पाहि संरक्ष ॥ ४१ ॥

इन्द्रस्तु स्वदुःखमावेदयन्सर्वरक्षकं सर्वान्तरात्मानं समस्तपुरुषार्थदं स्तौति–प्रत्यानीता इति । हे परम सर्वोत्कृष्ट ! नोऽस्मान् त्रायता त्रात्रा भवता दैत्येनाक्रान्ताः प्रसह्य गृहीताः स्वभागाः स्वकीया यज्ञीयभागा अस्मदादिमुखेन त्वमेवयज्ञभोक्तेत्यभिप्रायेण स्वशब्दः प्रयुक्तः प्रत्याहृताः दैत्याक्रान्तमिति द्वितीयान्तपाठे तु दैत्यभयाकुलमिति हृदयविशेषणम्. एवं दैत्यवधेन स्वभागप्रत्यानयनेन च त्वद्गृहं त्वदावासभूतम् अत एवाऽमलमस्माकं हृदयं प्रत्यबोधि भयेन पूर्वं मुकुलितमिदानीं तदपाकरणेन विकासितं भवतीत्यनुषङ्गः । त्वां सेवतामस्माकं त्वत्तो लौकिकपुरुषार्थप्राप्तिरित्येतत्कियदित्याह. हे नाथ स्वामिन् ! ते शुश्रूषतां परिचर्यापराणामिदं लौकिकं पुरुषार्थजातं कालेन नंक्ष्यमाणं कियत यत्किञ्चिदेतदित्यर्थः । तदेवाह, तेषां त्वां परिचरतां मुक्तिरपि न बहुमता त्वत्सेवासुखासक्तानां मुक्तिरपि न परमं प्रयोजनम्. अतः हे नारसिंह ! अपरैरर्वाचीनैः पुरुषार्थैः किम् ? न किमपि तेषामतितुच्छमर्वाचीनपुरुषार्थजातमिति भावः ॥ ४२ ॥

ऋषयस्तु सर्वगुरुं साधुपरित्रातारं दुष्कृद्विनाशकञ्च तुष्टुवुः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वमिति । परममुत्कृष्टं तपस्त्वद्ध्यानरूपं नोऽस्माकं त्वमात्थ उपदिष्टवानसि. तपो विशिंषन्ति, यत्तप आत्मनस्तव तेजः प्रकाशकम् अस्माकं त्वत्स्वरूपावेदकमित्यर्थः । येन च तपसा आदिपुरुषश्चतुर्मुखः इदं जगदात्मगतं परमात्मना त्वया गतमन्तरात्मतया व्याप्तं ससर्ज. आदिपुरुषात्मगतमित्यत्र "गूढोत्मा न प्रकाशते" इतिवत्सन्धिरार्षः आदिपुरुषात्मेति पाठे आदिपुरुषेति लुप्तप्रथमान्तं पृथक्पदम्. यद्वा हे आदिपुरुष ! इति सम्बोधनं ससर्ज ब्रह्मेति शेषः । तत् तपोऽमुना दैत्येन्द्रेण विप्रलुप्तं निशेषेण प्रकोपितमासीत् तदेवाधुना हे शरण्य ! शरणमर्हतीति शरण्यः तथाभूत ! हे पालक ! रक्षागृहीतवपुषा साधुपरित्राणार्थं गृहीतेन नरसिंहशरीरेण पुनरन्वमंस्थाः अनुज्ञापितवान्. वः शत्रुर्मया विनाशितोऽतः पुनर्निर्भयं तपः कुरुतेति नोऽनुज्ञापितवानसीत्यर्थः ॥ ४३ ॥

पितरस्तु स्वदुःखमावेदयन्तोऽखिलधर्मगोप्तारं हितकारिणं स्तुवन्तो नमस्कुर्वन्ति—श्राद्धानीति । अस्माकं तनूजैः पुत्रादिभिरस्मदुद्देशेन दत्तानि श्राद्धानि श्राद्धलक्षणानि पिण्डानि यो दैत्यः प्रसभं बलात्स्वयमभिबुभुजेऽनुभूतवान् । तथा तीर्थसमये पुण्यतीर्थस्नानसमये अस्मत्तनूजैः यद्दत्तं तिलोदकं तदप्यपिबत् तस्य दैत्यस्य उदराच्छ्राद्धानि तिलाम्बु च यः पुनराच्छेदाहृत्यास्माकं दत्तवान् कथंभूतादुदरात् नखैर्विदारिता वपा यस्य तस्य तस्मात्. वपाविदारणस्यं तद्गतपिण्डोद्धरणमेव फलमिति भावः । तस्मै समस्तधर्माणां गोप्त्रे रक्षित्रे नृहरये ते नमः तिलाम्भसभ्या इत्यपि पाठः । तदाऽसभ्य इति दैत्येन्द्रविशेषणम्. तिलाम्बु तिलोदकमसभ्यः सभाऽनर्हो यो दैत्येन्द्रोऽभिबुभुजे पीतवानित्यर्थः ॥ ४४ ॥

सिद्धा अपि स्वयोगगत्यपहारकदैत्येन्द्रवधद्वारा स्वयोगगत्याधायकं परमसुहृदं वर्णयन्तो नेमुः–य इति । योऽसाधुर्दुरात्मा दैत्यो नोऽस्माकं योगसिद्धां गतिं भक्तियोगप्राप्तां गतिम् अणिमादिरूपां स्वयोगेन तपोबलेन अहार्षीदपहृतवान्. तम् नानादर्पं नानाऽनेकाः दर्पा यस्य तं नखैर्यो विददार विदारितवान्. तस्मै तुभ्यं हे नृसिंह ! वयं प्रपन्नाः स्मो नमस्कुर्मः ॥ ४५ ॥

विद्याधरा अपि तेनापहृतविद्याप्रत्यादानेन हितकारिणं स्तुवन्तो नमन्ति—विद्यामिति । धारणया मनोधारणयाऽनुरुद्धां संसिद्धां विद्यामस्मत्सम्बन्धिनीमन्तर्द्धानादिलक्षणां योऽज्ञो मूर्खो बलवीर्याभ्यां गर्वितो दैत्येन्द्रो न्यषेधन्निषेधितवान् बलं देहबलं वीर्यं पराभिभवसामर्थ्यम्. स दैत्यो येन संख्ये युद्धे पशुवद्धतस्तं त्वां मायानृसिंहमात्मीयसङ्कल्पोपात्तनृसिंहतनुं नित्यं प्रपन्नाः स्मः कर्मकरिकः नमस्कृतवन्तः स्मेत्यर्थः ॥ ४६ ॥

नागास्त्वेवं तदपहृतरत्नप्रदानेनानन्दकरं स्तुवन्तो नेमुः–येनेति । येन पापात्मना नोऽस्माकं रत्नानि स्त्रीरत्नानि नागकन्यारूपाणि रत्नानि चापहृतानि तस्य वक्षोविदारणेनासां स्त्रीणां दत्त आनन्दो येन तस्य सम्बोधनं ते तुभ्यं नमोऽस्तु ॥ ४७ ॥

तदाज्ञापरिपालनरूपकैङ्कर्यविरोधिनिरसनेन कैङ्कर्याभापन्नरूपहितकारिणं स्तुवन्तस्तदेव प्रार्थयन्ते मनवः—मनव इति । त्रयं तव निदेशकारिणः कैङ्कर्यकारिणो मनव इति प्रसिद्धाः ते वयमेतावन्तं कालं येन दितिजेन दैत्येन परिभूताः परिहापिताः सेतवः त्वत्कृताः वर्णाश्रममर्यादा येषां तादृशा बभूविम अधुना स खलो दितिजस्त्वया उपसंहृतो हतः हे प्रभो ! निवृत्तकैंकर्यविरोधिनो वयं किं कैंकर्यं ते तुभ्यं करवाम तथा किंकराणोऽस्मान् अनुशाधि विविच्याऽऽज्ञापयेत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येनायमसुरो हतः स कोपकालो युगान्तो युगावसानोचितो नेदानीमत्यल्पासुरहनने तस्मात्कोपं संहृत्याऽनुसृतं शरणं प्राप्तं तस्य सुतं प्रह्लादं रक्षेत्यन्वयः ॥ ४१ ॥

हे परम ! नस्त्रायता रक्षता भवता दैत्यहृता यज्ञेषु स्वभागा अस्मद्योग्यहविर्भागाः प्रत्यानीता इत्यन्वयः । तपोबलेन दैत्येनाक्रान्तं निमीलितं च तव गृहं तव वासयोग्यं हृदयकमलं प्रत्यबोधि विकसितमस्माकं भवतेति शेषः । विरक्तिभक्तिभ्यामेव वशीकर्तुं योग्यो नान्येनेत्याशयेनाह, कालेति । नाथ ! यदिदं स्वर्गादिस्थानं कालग्रस्तं कियत्सुखजनकम् ? नकिमपीति मत्वा भजति. ते शुश्रूषतां त्वां सेवमानानां तेषां करगता मुक्तिरपि बहुमता न हि यस्मात्तस्मात् हे नारसिंह ! तेषां भक्तानां अपरैर्धर्मादिभिः प्राप्तैः किम् ? इत्यन्वयः ॥ ४२ ॥

हे आदिपुरुष ! त्वं यदात्मतेज आत्मनो हरेर्ज्ञानलक्षणं तेजस्तपोनोऽस्माकं परमश्रेयसे आत्थ येन तपसा आलोचनरूपेण महिम्नेदं समस्तमात्मगतं व्याप्तं हे शरण्यपाल ! अमुना दैत्येन विप्रलुप्तं नष्टं तत्तपो जगद्रक्षार्थं गृहीतवपुषा नरसिंहात्मना पुनरप्यस्मान्प्रति कटाक्षमन्वमंस्थाः उद्धरिष्यामीति शेषः ।"तप आलोचने" इति धातोः "यस्य ज्ञानमयं तपः" इति श्रुतेश्च. भगवज्ज्ञानसादृश्यादस्यात्मतेज इत्यभेदवचनं युज्यते विप्रलोपस्तिरोधानं न स्वरूपनाशः ॥ ४३ ॥

यो भवान्नखविदीर्णवपान्नखविदारितान्त्रात् तस्य दैत्यस्योदरादाच्छेत् "ऋच्छगतौ" इति धातोः श्राद्धान्यस्माकमगमयदित्यन्वयः ॥ ४४ ॥

योगसिद्धामणिमाद्यष्टैश्वर्यलक्षणां गतिं योगः पवनविजयः तपः कायक्लेशलक्षणं तयोर्बलेन नानाविधो दर्पो यस्य स तथा॥४५॥

पृथक् जगद्विलक्षणस्य हरेर्धारणयाऽखण्डोपासनयानुरुद्धां लब्धां विद्यामन्तर्धानलक्षणाम् ॥ ४६ ॥

आसां स्त्रीणामर्थे दत्तानन्द ! ॥ ४७ ॥

निदेशकारिणः आज्ञाकारिणः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ ४१ ॥

इन्द्रस्तु स्वोपकारविशेषानुमोदनेन तं प्रसादयति—प्रत्येति । स्वभागा अस्मदुपसेवकवर्गाः प्रत्यानीताः पुनर्निकट एव प्रापिताः तथा दैत्याक्रान्तमिति तावेतावेव परमोपकारौ त्रैलोक्यराज्यदानन्तु यत्किञ्चिदेवेत्याह—कालेति ॥ ४२—४३ ॥

समयेष्वपिबत्तिलाम्बु इति पाठः स्वामिसम्मतः । मायानृसिंहमिति कृपाप्रधानं नृसिंहमित्यर्थः ॥ ४४—४७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मनवोऽत्र वर्तमानमनुसहितास्तपःस्थिताः अतीता इत्यर्थः ते च भाविनोऽप्यात्मानमेनं मत्वा निवेदयन्ति स्मेति मनव ऊचुरित्युक्तम् ॥ ४८—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तव घोरस्वरूपमालक्ष्य प्रलयशङ्कया सर्वे बिभ्यति नत्वहमित्याह—कोपेति । युगान्तः प्रलयः तव कोपस्य कालः प्रलयस्तत्र संहारे कर्मणि अहमेव त्वदंशोवर्त्तएवेति भावः भक्तवात्सल्यार्थमयं कोप इति चेत् अल्पकः त्वदपेक्षया अत्यल्पोऽयमसुरो हत एव । अतस्तत्सुतं प्रह्लादम् उपसृतमनुगतम् ॥ ४१ ॥

एतावद्दिनपर्य्यन्तं त्वच्चरणस्मरणविमुख एवाहं वर्त्ते इत्याह-हे परम ! नोऽस्मांस्त्रायता रक्षता भवता स्वीया एव भागाः दैत्यात् प्रत्यानीताः प्रत्याहृताः इन्द्रादीनां त्वद्दासानामस्माकं वस्तुषु वस्तुतः प्रभोस्तवैव स्वत्वौचित्यात् किञ्चास्माकं हृदयं खलु कमलं तत्र शश्वत्तवैव ध्यातत्वात्त्वद्गृहं । तच्च कमलं यथा निःश्रीकं रात्रौ तमसाक्रान्तं मलिनं निद्रितं भवेत् तथैव दैत्यजन्मारभ्य एतावद्दिनपर्य्यन्तं भयाद्दैत्यस्यैव ध्यातत्वाद्दैत्याक्रान्तं सम्प्रति तव नृसिंहसूर्य्यस्योदये मतिः प्रत्यबोधि त्वच्चरणाक्रान्तं सङ्कुचत्तदित्यर्थः । यद्वा, त्वद्गृहं वैकुण्ठं प्रति अबोधि त्वच्चरणसेवार्थं बुद्धिं प्रापेत्यर्थः । ननु, भक्ताभिमानिन्निन्द्रपदं गृहाणेति तत्र सत्यमहं सकामो भक्तिशून्यो गृहीष्यामीत्याह, त्वन्निष्कामभक्तानान्तु कालग्रस्तमिति इममिन्द्रपदं अपरैः योगैश्वर्य्यादिभिः ॥ ४२ ॥

एतावद्दिनपर्य्यन्तमस्माभिर्न तपस्तप्तमित्याहुः । त्वं नोऽस्माकं परमं गुह्यज्ञानमयं यत्तपस्तत् आत्मनः स्वस्य तेजः आत्थ अस्मासु तपःप्रवर्त्तनार्थमिति भावः । येन तेजसा तपो रूपेण आत्मनि लीनमिदं विश्वं ससर्ज असृजः । ससर्ज्जेत्यपि पाठः "सृजामि तपसैवेदम्" इति त्वदुक्तेः । तत्तपः अमुना दैत्येन घोरं तेजो राहुणेव विप्रलुप्तं । तत् सम्प्रति रक्षार्थं गृहीतेनानेन वपुषा नृसिंहाकारेण अन्वमंस्थाः पुनरप्यस्मत्कर्त्तव्यत्वेन अनुमतं सम्मतमकरोः ॥ ४३ ॥

वयमेतावद्दिनपर्य्यन्तमुपवासपरा एवाभूमेत्याहुः । श्राद्धानि श्राद्धपिण्डादीनि तीर्थस्नानसमये तिलाम्बु तिलतर्पणोदकं तानि तच्च । तस्य उदराद् आच्छैत् आहृतवान् । कथम्भूतात् नखैर्विदीर्णा वपा मेदो यस्य तस्मात् "वपा विवरमेदसोः" इति मेदिनी । वपाः विदार्य्य पिण्डतिलोदकादीन्येवास्मान् दर्शयामासेत्यर्थः ॥ ४४ ॥

योगैश्वर्य्यसम्पत्तिहीना रङ्का एव वयमेतं कालं प्रतीक्षामहे इत्याहुः, यो नो गतिमणिमादिसिद्धिं नानादर्पमनेकदर्पवन्तं तमसुरम् ॥ ४५ ॥

वयमप्येतावद्दिनपर्य्यन्तं विद्या रहिता एवास्मेत्याहुः । विद्यामन्तर्द्धानादिलक्षणां राद्धां सिद्धां संख्ये युद्धे । मायानृसिंहं कृपाप्रधानं नृसिंहम् ॥ ४६ ॥

हृतधना हृतस्त्रीका एव वयमेतावद्दिनपर्य्यन्तं सन्तप्ता एवेत्याहुः-येनेति । तद्वक्षसः पाटनेन विदारणेन आसां स्त्रीणां हे दत्तानन्द ॥ ! ४७ ॥

नृसिंहेनाकस्मादवलोक्यमाना मनवो मूर्ध्नि बद्धाञ्जलयो वयं त्वदाज्ञाकारिणो मनवो भवामेत्याहुः-एवमग्रेऽप्यवतारिका ज्ञेया मनव इति । सेतवो वर्णाश्रमधर्ममर्य्यादाः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रुद्रोऽपि भगवन्तं प्रणम्याहेति योज्यम् एवमग्रेऽपि यत्र नतिर्नास्ति तत्र योज्यम् ते तव कोपस्य कालः युगान्तः प्रलयः इदानीमपि सत्यसङ्कल्पस्य तव यस्मात् कोपः स तु अत्यल्पोऽसुरो हतः अतः कोपं त्यक्त्वा तत्सुतं ते भक्तमुपसृतं त्वां शरणं गतं पाहि ॥ ४१ ॥

हे परम ! नोऽस्मान् त्रायता रक्षता स्वभागाः "अहं हि सर्वयज्ञानां भोक्ता च" इति स्मृतेः स्वीया एव भागाः दैत्यात्प्रत्याहृताः "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति अस्मदादिहृदयकमलं त्वद्गृहमेव तच्चैतावत्पर्यन्तं दैत्याक्रान्तम्. तद्ध्यानात्त्वद्विस्मृतेस्तत्स्मृतेश्च तेन रुद्धम् इदानीं प्रत्यबोधि त्वत्स्वरूपगुणग्राहकं कृतम् स्वर्गादिसुखं दुःखोदर्कं ज्ञात्वा हरिभक्तानां सुखं निरुपाधिकं कामयमान आह, हे नाथ ! हे पाल्य ! हे भक्तिरसप्रद ! हे नारसिंह ! कालेग्रस्तमिदं देवैश्वर्यं कियत् ते त्वां शुश्रूषतां मुक्तिरपि न बहुमता अपरैः पुरुषार्थैः किम् ? त्वद्भजनसुखं तावदनुपमं त्वद्धामापत्तिलक्षणस्य त्वद्भजनफलस्य मोक्षस्य निरतिशयत्वं को वर्णयेदिति भावः ॥ ४२ ॥

हे आदिपुरुष विश्वहेतो ! येनेदं विश्वं आत्मगतं सूक्ष्मरूपेण त्वमपि वसन्तं ससर्ज स्थूलतया प्रकटितवान् नोऽस्मभ्यं यदात्थ उपदिष्टवानसि कथम्भूतं परमं सर्वैश्वर्यप्रदम् आत्मनो विभूतिरूपम् "तपो ब्रह्म" इति श्रुतेः तदमुना दैत्येन विप्रलुप्तं पुनस्त्वं रक्षार्थं गृहीतेन वपुषा नरहरिरूपेणान्वमंस्थाः तपःकुरुतेत्यभ्यनुज्ञातवानसि ॥ ४३ ॥

सोऽस्मभ्यो विद्वत्सभानर्हः श्राद्धानि श्राद्धनिमित्तानि पिण्डादीनि तिलाम्बु च तनूजैर्नोऽस्मभ्यं तीर्थसमये तिथिपात्रादियोगकाले दत्तानि प्रसभं बलात् स्वयमधिबुभुजे तस्योदरान्नखैर्विदीर्णा वपा यस्य तस्मात् य आच्छैत् आहृतवान् तस्मै नमः ॥ ४४ ॥

सोऽसाधुः नोऽस्माकं योगसिद्धां तपश्चित्तैकाग्र्यरूपयोगसाधिनां गतिमणिमादिसिद्धिमहार्षीत् अपहृतवान् तं नानादर्पमनेकाभिमानवन्तं यो नखैर्विददार विदारितवान् तस्मै तुभ्यं प्रणताः स्मः ॥ ४५ ॥

योऽसुरः विद्यां अन्तर्द्धानादिलक्षणां पृथग्धारणया तत्तद्विद्यार्थमनोधारणयाऽनुरुद्धां सम्पादितां न्यषेधत् स येन संख्ये संग्रामे पशुवद्धतः तं मायया वयुनेन सङ्कल्पेन नृसिंहरूपेणाविर्भूतं नित्यं प्रणताः स्मः ॥ ४६ ॥

रत्नानि मण्यादीनि स्त्रीरत्नानि च आसां भवत्प्रजानां नस्तद्वक्षःपाटनेन दत्त आनन्दो येन तत्सम्बुद्धौ हे दत्तानन्द ! ते तुभ्यं नमः ॥ ४७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रजापतय ऊचुः।

प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः।
स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्वमूर्त्तेऽवतारः॥ ४९॥

गन्धर्वा ऊचुः।

वयं विभो! ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते॥ ५०॥

चारणा ऊचुः।

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः।
यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः॥ ५१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

निदेशकारिणः आज्ञाकारिणः येन परिभूताः निराकृताः सेतवो वर्णाश्रममर्यादा येषां ते स उपसंहृतो हतः अतः अनुशाधि अनुशिक्षय॥ ४८॥

भाषा टीका।

रुद्र उवाच।

श्रीमहादेवजी बोले, कि आपके कोपका समय तो युगान्त अर्थात् प्रलय है यह तो आपने अभी छोटे से असुर को मारा है॥ तस्मात् हे भक्तवत्सल! शरणागत आपके भक्त, उस के पुत्र प्रह्लाद की रक्षा करो॥ ४१॥

इन्द्र उवाच।

इन्द्र बोले, कि-हे नाथ! हे परमेश्वर! हे नरहरे! आपने बडे प्रचण्ड दैत्य का वधकर के हमारे भाग हम को दिवायें, और आपका निवास्थान जो हमारा हृदय कमल उसको आपने निर्भय करके प्रफुल्लित किया, और काल ग्रस्त यह ऐश्वर्य तो क्या है, पर आप के चरण की शुश्रूषा करने वाले तो मुक्ति का भी बहुमान नहीं करते फिर औरो से क्या है॥ ४२॥

ऋषय ऊचुः।

ऋषिलोग बोले, कि हे परमेश्वर! हे शरण्यपाल! जिस तपों बल से अपने में लीन इस जगत् को रचा और जो आत्मा का तेज रूप है उसी तप की हम लोगों आज्ञा आपने दी है, आज हमारे उस तप का इस दैत्यने लोप कर दिया, फिर जिन आपने रक्षार्थ वपु को धारण कर उसी तप की अनुमति दी तिन आप को नमस्कार हो॥ ४३॥

पितर ऊचुः।

पितृलोग बोले, कि—हमारे पुत्रों ने श्राद्ध में जो हम को पिण्ड समर्पण किये इसने उनको बलात्कार से भोगा, और स्नान काल में जो तिलांजलि हम को पुत्रों ने दी उसको भी यही पी गया, जिन आपने उस के उदर से अपने नखों से वपा को विदीर्ण कर खाये हुए सबरे पिण्ड निकाल दिये, अखिल धर्म की रक्षा करने वाले नृसिंह देव आकोप नमस्कार हो॥ ४४॥

सिद्धा ऊचुः।

सिद्धलोग बोले, कि जिस दुष्टने अपने योग और तपोबल से हमारी योग सिद्ध गति को चुराली उस नानादर्प वाले दैत्य को आप ने नखों से विदारण किया। हे नृसिंह! ऐसे आपको हम लोग प्रणत हैं॥ ४५॥

विद्याधरा ऊचुः।

विद्याधरलोग बोले, कि बल और वीर्य के दर्पसे जिस अज्ञ ने हमारी पृथक धारणा से सिद्ध करी हुई विद्या का निषेध किया उसको जिन आपने संग्राम में पशु के तरह मार दिया ऐसे मायानृसिंह रूप आप को हम नित्य प्रणाम करते हैं॥ ४६॥

नागा ऊचुः॥

नाग लोग बोले, कि जिस पापी ने हमारे रत्न और स्त्रीरत्न दोनो छुडा लिये, उस के वक्षस्थल के फाडने से दिया है आनन्द जिन ने ऐसे आप को नमस्कार हो॥ ४७॥

मनव ऊचुः॥

मनु लोग बोले, कि हम आपके आज्ञाकारी मनु लोग हैं। हे देव! इस दैत्य ने हमारे मर्यादा सेतु तोडदिये परन्तु आपने उसी खल का उप संहार किया। प्रभो! हम आपके किंकर क्या करें, आप हमको आज्ञा दीजिये॥ ४८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्रजापतयोऽपि तदवलोकिता प्रोचुः, हे परेश! ते त्वया अभिसृष्टाः वयं प्रजेशा येन निषिद्धाः सन्तः प्रजा न सृजामः स एषः भिन्नं वक्षो यस्य सः नु निश्चितं मृतः शेते अतःपरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यक्षा ऊचुः ।

वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ।
स तु जनपरितापं तत्कृतं जानता ते नरहर ! उपनीतः पञ्चतां पञ्चविंश ! ॥ ५२ ॥

किम्पुरुषाः ऊचुः ।

वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५३ ॥

वैतालिका ऊचुः ।

सभासु सत्रेषु तवाऽमलं यशो गीत्वा सपर्यां महतीं लभामहे ।
यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः ॥ ५४ ॥

किन्नरा ऊचुः ।

वयमीश ! किंन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ।
भवता हरे ! स वृजिनोऽवसादितो नरसिंह ! नाथ ! विभवाय नो भव ॥ ५५ ॥

विष्णुपार्षदा ऊचुः ।

अद्यैतद्धरिनर रूपमद्भुतं ते दृष्टं नः शरणद ! सर्वलोकशर्म ।
सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नाम
अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजाः सृजाम इति हृष्यन्तः प्राहुः, हे सत्त्वमूर्त्ते ! तवायमवतारो जगतो मङ्गलम् ॥ ४९ ॥

गन्धर्वा अपि तदवलोकिताः प्रोचुः, हे प्रभो ! वयं ते त्वदीया नटा नर्त्तका नाट्ये नृत्ये गायकाश्च येन स्वाधीनाः कृताः कथम्भूतेन वीर्य्यं शौर्य्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तेन स एष भवता इमां दशां सुतिम् नीतः उचितश्चैतदित्याहुः किमिति ॥ ५० ॥

भवापवर्गै संसारनिवर्त्तकम् । आश्रयणे हेतुः यद्यस्मात् साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरः त्वया समापितः अन्तं नीतः ॥ ५१ ॥

मनोज्ञैः कर्मभिः तवानुचरेषु मुख्यास्ते वयं दितिसुतेन शिविकावाहकत्वं प्रापिताः पञ्चतां मृत्युं हे पञ्चविंश ! चतुर्विंशति-तत्त्वनियामक ॥ ५२ ॥

किम्पुरुषास्तु त्वां स्तोतुं के वयं वराका इत्याहुः,—वयमिति । वयं किम्पुरुषास्तुच्छप्राणिनः त्वन्तु महान् अद्भुतप्रभावः पुरुषः नन्वयं महान् दैत्यो हत इति किं न वर्ण्यते इत्याशङ्क्य कियदेतदित्याहुः अयमिति यदा साधुभिर्भगवद्भक्तैस्तिरस्कृतस्तदैव नष्टः ॥ ५३ ॥

सत्रेषु यज्ञेषु ते त्वया हतः एतद्दिष्ट्या भद्रं कृतम् ॥ ५४ ॥

अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनु निरन्तरं कारिताः अतःपरं नो विभवाय समृद्धये भव ॥ ५५ ॥

नोऽस्माकं भक्तानां शरणद ! आश्रय प्रद ! सर्वेषां लोकानां शर्म मङ्गलमेतदद्भुतम् । रूपमद्यैव दृष्टं ननु पूर्वं विधिकरः किङ्करः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सद्वारकतद्व्यापाररूपजगत्सर्गात्मकास्मद्व्यापारविरोधिनिरसनेन तदधिकाराधायकां सर्वेषां शुभाधायकमूर्त्तिं तुष्टुवुः प्रजापतयः-प्रजेशाइति । हे परेश ! परेषां ब्रह्मादीनामपीश ते त्वया अभिसृष्टा व्यष्टिसर्गार्थं त्वया सृष्टाः प्रजेशाः प्रजापतय इति प्रसिद्धाः ते वयमेतत्पर्यन्तं येन दैत्येन्द्रेण निषिद्धास्सन्तः प्रजाः न वै सृजामः न सृष्टवन्तः स एव दैत्यस्त्वया भिन्नं विदीर्णं वक्षो यस्य तादृशोऽनु शेते अतःपरं प्रजाः सृक्ष्यामः इति हृष्यन्त आहुः हे सत्त्वमूर्त्ते अप्राकृतशुद्धसत्त्वविग्रह ! ते तवावतारो जगन्मङ्गलं जगतो मङ्गलावहः ॥ ४९ ॥

तन्मुखोल्लासार्थं नाट्यादिकैङ्कर्यविरोधिनिरसनेन तदाधायकं सुहृदं तुष्टुवुर्गन्धर्वाः—वयमिति । हे विभो ! ते तव नटनाट्यगायका नटाः नर्त्तकाः नाट्ये कर्मणि गायकाश्च वयं येनैतावत्पर्यन्तमात्मसात्कृताः स्वाधीनाः कृताः कथम्भूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तादृशेन स एष दैत्यो भवता निरतिशयकृपायुक्तेन इमां दशां मरणमित्यर्थः नीतः प्रापितः तथाहि उत्पथस्थः उत्पथे कुमार्गे पापकर्मणि तिष्ठतीति तथा कुशलाय क्षेमाय कल्पते किम् ? क्षेमयुक्तो भवति किम् ? न कल्पत एवेत्यर्थः ॥ ५० ॥

तत्पादपङ्कजपरिचर्याविरोधिनिरसनेन पुनस्तदाधायकं हितकरन्तुष्टुवुश्चारणाः,हरे इति । हे हरे-आश्रितार्तिहर ! भवापवर्गमैहिकामुष्मिकसुखहेतुं तवाङ्घ्रिपङ्कजमाश्रिताः परिचरन्तो वयमनेन निषिद्धा इति शेषः स एषोऽसुरः साधूनां प्रपन्नानां हृच्छयः हृदयरोगरूपस्त्वया समापितः उपसंहृतो हत इत्यर्थः ॥ ५१ ॥

स्वदुःखमावेदयन्तस्तन्निवर्त्तकं सुखाधायकं वर्णयन्ति यक्षाः, वयमिति । मनोज्ञैः कर्मभिर्वयं तवानुचरश्रेष्ठाः ते वयमिह तावद्दितिजेन वाहकत्वं यानादिवाहकत्वं भारवाह—कत्वं वा प्रापिताः हे नरहरे ! तेन दितिजेन कृतं तव नतजनानां भक्तजनानां परितापं जानता ते त्वया पञ्चविंशो दैत्येन्द्राख्यो जीवः पञ्चतां मृत्युम् उपनीतः प्रापितः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति" इति वत्पञ्चविंशस्य शरीरद्वारका पञ्चताप्राप्तिरत्र विवक्षिता पञ्चविंशेति पाठे, हे जीवशरीरकेति सम्बोधनम्, स तु जनपरितापमिति पाठे । येन दितिसुतेन वाहकत्वं नीताः स तु पञ्चविंश इत्यन्वयः ॥ ५२ ॥

स्वनैच्यानुसन्धानपूर्वकमनितरसाधारणप्रभावं तुष्टुवुः किंपुरुषाः-वयमिति । वयं किंपुरुषाः कुत्सिताः पुरुषास्त्वं तु महापुरुषः अनितरसाधारणगुणपूर्णः ईश्वरः सर्वान्तरात्मा च अयं महान् दैत्यो हतस्त्वयेति किं न वर्ण्यते इत्याशङ्क्य कियदेतदित्याहुः, "अयमिति. कापुरुषः ईषत्पुरुषः अस्मदपेक्षया बलीयांस्त्वत्तोऽधम इति भावः । ईषदर्थे विभाषा पुरुषे" इति सूत्रेण कुशब्दस्य कादेशः यदा साधुभिर्धिक्कृतस्तिरस्कृतस्तदैव नष्टो नष्टप्रायः अतः कियदेतत्तवेति भावः ॥ ५३ ॥

अस्मत्सम्मानावहत्वद्गुणगानविरोधिनिरसनेन त्वयैव वयं बहुमता इत्याहुर्वैतालिकाः—सभास्विति । तवामलं यशः सभासु सत्रेषु च गीत्वा वयं महतीं सपर्यां पूजां पूर्वं लभामहे तानस्मान्यो दुर्जनो दैत्यः स्ववशं यथा भवति तथाऽनैषीत् स एष दुर्जनः, हे भगवन् ते त्वया हतः एतद्दिष्ट्या भद्रं जातं दिष्ट्या दैवेन त्वयेति वान्वयः । यथा आमयः यथा शिरोव्यथारूपो रोगः पीडकारकः तद्वदयमासीत्किलेति शेषः ॥ ५४ ॥

स्वदुःखमावेदयन्तः सर्वसुखाधायकं लोकार्तिहरं तुष्टुवुः किन्नराः—वयमिति । हे ईश ! वयं किन्नरगणा इति प्रसिद्धास्तवानुगाः अनुचरास्ते वयमेतावदमुना दितिजेन विष्टिमनुकारिताः मूल्यरहितं कर्म विष्टिस्तामनुनिरन्तरं कारिताः, हे हरे अनुचरार्तिहर ! स वृजिनः पापात्मा दैत्यो भवता उपसादित उपसंहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकं विभवाय सुखसमृद्धये त्वं भव ॥ ५५ ॥

स्वामिन्नदृष्टपूर्वं रूपं द्विषतामप्यनुग्राहकं धृतवानसीत्याहुः विष्णुपार्षदाः—अद्येति । नोऽस्माकं भक्तानां हे शरणद आश्रयप्रद ! निरतिशयपुरुषार्थसाधनभूतोपायप्रद!इति वा, सर्वेषां लोकानां शर्म सुखावहमेतदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं हे ईश ! स्वामिन् ! सोऽयं दैत्यस्तव विधिकरः निदेशकारी किङ्करः स च विप्रैः सनकादिभिः शप्तः मध्ये कैङ्कर्यविरोधो जात इति भावः । तस्य दैत्यस्येदं निधनं त्वत्कृतमनुग्रहाय पुनः कैङ्कर्यलाभरूपतदनुग्रहार्थमेवेति वयं जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायम्

अष्टमोऽध्यायः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे परेश ! त्वयाभिसृष्टा येन दैत्येन निषिद्धावयं प्रजाः न सृजामो वै सदैत्यस्त्वयैव तु इदानीं भिन्नवक्षाः शेते तथाऽयमवतारो जगन्मङ्गलं जगति शुभसारभूतः जगतो मङ्गलमुद्दिश्य गृहीतो-वा ॥ ४९ ॥

नटो नटनं कथाबन्धवचनं नाट्यं शृङ्गारादिभावदर्शनम् एतयोर्गायकाः । एतदुक्तम् "नटनं तु कथाबन्धं नाट्यकं भावदर्शनम्" इति वीर्यबलौजसा येनात्मसात् आत्माधीनाः कृताः कल्पते समर्थो भवति ॥ ५० ॥

साधून् हरन्तीति साधुहृतः सज्जनारयस्तेषां श्रय आश्रयः साधूनां हृदयं श्रयति तापदत्वेनेति वा समापितो विनाशं गमितः भवस्यापवर्गस्य त्यागो यस्मात्तत्तथा तद्भवात्संसारान्मोक्षो यस्मात्तथेति वा ॥ ५१ ॥

पञ्चतां विनाशं हे पञ्चविंश ! चतुर्विंशानां मध्य इति शेषः ॥ ५२ ॥

किंपुरुषाः पुरुषाभासाः ॥ ५३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्रेषु सभासु सत्रकारिणः दिष्ट्या सुखं कर्तुम् ॥ ५४ ॥

वेतनहीनतया क्रियमाणं कर्म विष्टि वृजिनं दुःखं करोतीति वृजिनः कर्मार्थः प्रत्ययः सः अपसादितोऽपहृत्य नाशितः विभवाय संसारान्मुक्तये ॥ ५५ ॥

हरिनरयोः सिंहनरयोरूपं विधिकरो भृत्यः किं विप्रशापात् * असुरयोनिमाप्तस्य ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे श्रीमद्विजयध्वज-

तीर्थकृत पदरत्नावल्याम्

अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हरे इति पूर्वमनाश्रयणे हेतुः साधुहृच्छय इति । सम्प्रत्याश्रयणे हेतुः समापित इति ॥ ५१ ॥

हे नरहरे ! ते तव मनोज्ञैः कर्मभिरनुचरा ये शिवकुबेरादयः ते मुख्याः स्वामिनो येषां ते वयम् ॥ ५२—५५ ॥

एते विष्णुपार्षदाः श्रीविकुण्ठानन्दनसम्बन्धिनो ज्ञेयाः श्रीनृसिंहदेवेनैकीभूय तस्यावतरणात् ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीजीवगोस्वामिकृतक्रमसन्दर्भे

अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

हे परेश परमेश्वर ! निषिद्धाः अरे मा प्रजाः सृजतेत्याज्ञप्ताः । हे सत्त्वमूर्त्ते तवावतारो जगन्मङ्गलम् ॥ ४९ ॥

येन दैत्येनात्मसात्कृतास्सन्तः स्तस्यैव नटा नाट्ये गायकाश्चाभूमेत्यर्थः ॥ ५० ॥

साधूनां हृदि तच्छय्यायामपि शेते इति सः । अत एव तदसहिष्णुनेव त्वया समापितः अन्तं नीतः । अत एवाद्यारभ्य तेषां हृदि त्वमेव शेष्वेति भावः ॥ ५१ ॥

ते तव मनोज्ञैः कर्मभिरनुचरेषु मुख्याः । यद्वा । अनुचरा स्त्वद्भक्ता एव मुख्या येषां ते वयमपि शिविकावाहकत्वं प्रापिताः । तेन दितिसुतेन कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युं हे पञ्चविंश चतुर्विंशतितत्त्वनियामक ॥ ५२—५३ ॥

ताम् अस्मत्संप्रदानकसपर्यां वयं स्वाधीनतां विशेषेण अनैषीत् नीतवान् ॥ ५४ ॥

विष्टिं निर्मूल्यं कर्म अनु निरन्तरं कारिताः । वृजिनो दुःखदः ॥ ५५ ॥

सोऽयं हिरण्यकशिपुस्ते विधिकरो दासएव विप्रैः सनकादिभिः शप्तः ॥ ५६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमस्याष्टमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे परेश "सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णेन चापरे" इति वचनात्सत्त्वेन स्वातन्त्र्येण मूर्तिर्यस्य तत्सम्बुद्धौ हे सत्त्वमूर्त्ते ! ते त्वया अभिसृष्टाः प्रजेशा वयं येन निषिद्धाः प्रजाः न सृजामः स एष त्वया भिन्नवक्षाः भिन्नं विदारितं वक्षो यस्य स तथा शेते तस्मात्स्वमङ्गलस्यैकस्य का कथा ते तवावतारो नु निश्चितं जगन्मङ्गलम् ॥ ४९ ॥

हे विभो ! ते त्वदीयाः नटाश्च नाट्यगायकाः नाट्येषु तत्तदनुरूपगानकर्त्तारश्च वयं वीर्यबलौजसा वीर्यबलाभ्यां शूरत्वसामर्थ्याभ्यामोजः प्रभावो यस्य स तथा एवंभूतेन येन आत्मसात्कृताः स्ववशगाः कृताः स एष भवता इमां दशां नीतः उत्पथस्थः किं कुशलाय कल्पते नैव कुशलयोग्यो भवतीत्यर्थः ॥५०॥

हे हरे क्लेशहर ! यस्मादेष साधूनां हृदि अपदत्वेन शेते तिष्ठतीति तथाभूतः त्वया समापितो हतः अतो निर्भया वयं भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तत्त्वदङ्घ्रिपङ्कजमाश्रिताः ॥ ५१ ॥

हे पञ्चविंश ! प्रकृतिर्महत्तत्त्वमहंकारश्चेति त्रिकम् पञ्च तन्मात्राणि पञ्च महाभूतानि एकादशेन्द्रियाणि चेति चतुर्विंशतिप्राकृतपदार्थनियन्तः हे नरहरे ! ते त्वदीयाः मनोज्ञैः कर्मभिरनुचरेषु मुख्याः वयं येन दितिसुतेन वाहकत्वं प्रापिताः स नु तत्कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युमुपनीतः अथ निर्भयाः मनोज्ञैः कर्मभिस्त्वां भजाम इति भावः ॥ ५२ ॥

वयं किंपुरुषाः दीनाः त्वं महापुरुषो दीनबन्धुः अयं कुपुरुषः न दीनो न दीनबन्धुः अतः साधुभिर्धिक्कृतः अतो नष्टः ॥ ५३ ॥

सपर्यां पूजां पुरा लभामहे यस्तां व्यनैषीत् स एष त्वया यथाऽऽमयो रोगस्तद्वद्धतः एतद्दिष्ट्या भद्रं जातम् ॥ ५४ ॥

हे ईश ! दितिजेनामुना विष्टिं निर्मूल्यसेवाम् अनु निरन्तरं कारिताः स वृजिनो दुःखदः हे हरे ! भवता अवसादितः उपसंहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकमभवाय मोक्षाय भव ॥ ५५ ॥

हे शरणद ! सर्वेषां लोकानां शर्म मङ्गलं तेऽद्भुतमेतद्धरिनररूपमद्य नोऽस्माभिर्दृष्टम् हे ईश ! सोयं विप्रशप्तस्ते विधिकरः किंकरोऽत एव तस्येदं निधनम् अनुग्रहाय विद्मो जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

---

* अध्याहृतं पदम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषाटीका ।

प्रजापतय ऊचुः ।

प्रजापति लोग बोले, कि—हेपरेश ! हम आप के रचे हुए प्रजेश हैं जिसके निषेध के मारे हम प्रजा को सजते रहे, सो आपकी कृपा से विदीर्ण वक्षःस्थल वाला सोरहा है हे सत्वमूर्त्ते ! जगत के मङ्गल के लिये आप का अवतार है ॥ ४९ ॥

गंधर्वा ऊचुः ।

गंधर्व लोग बोले, कि—हे विभो ! हमतौ आप के नाचने गानेवाले हैं इसने बलसे जबरजस्ती हम लोगों को अपने वश में कर लिये, तिस्को अपने इस दशाको प्राप्त किया, मलों कुमार्गगामी का कब भला हो सक्ता है ॥ ५० ॥

चारणा ऊचुः ।

चारण लोग बोले कि । हेहरे ! संसार से पार लगाने वाले आपके चरणकमल का हमलोगो ने आश्रय लिया है, क्योंकि ? यह साधुओं के हृदय में खटकने वाला असुर आपने समाप्त कर डाला ॥ ५१ ॥

यक्षा ऊचुः ।

यक्ष लोग बोले, कि-हम लोग आपके मनोज्ञ कर्मों से अनुचरों में मुख्य है तिन हम को इस दैत्य पुत्र हिरण्य कशिपुने पालकी उठाने वाले और बोझा उठाने वाले बना लिये हे नर हरे ! तब अपने जनों के दुःख जानने वाले आपने उसको पञ्चता को प्राप्त किया आप कैसे हो कि पचीसवां तत्व रूप है ॥ ५२ ॥

किंपुरुषा ऊचुः ।

किंपुरुष लोग बोले, कि—प्रभो हम लोग तौ किं पुरुष (खोटे पुरुष) हैं और आप महा पुरुष ईश्वर हो, और जब साधु जनों ने धिक्कार कर दिया तब वह कुपुरुष नष्ट होगया ॥ ५३ ॥

वैतालिका ऊचुः ।

वैतालिक लोग बोले, कि—हे भगवन् ! सभा और यज्ञ यागादिकों में हम लोग आप के निर्मल यश का गान करके बडी पूजा को प्राप्त होते हैं, जिस दुर्जनने हमारी उस पूजा को उडाली इस दुर्जन को रोगके नाई आपने ठंडा किया हे भगवन् ! यह बडा मङ्गल भया ॥ ५४ ॥

किन्नरा ऊचुः ।

किन्नर लोग बोले कि हे ईश ! हम लोग आपके अनुग किन्नर गण हैं इस दैत्य ने हम लोगोंको सदा के वेगारी बना लिये हैं हे हरे ! हे नरसिंह ! आपने इस पाप का नाश किया हे नाथ आप हमारी के अर्थ होवे ॥ ५५ ॥

विष्णुपार्षदा ऊचुः ।

विष्णुपार्षद लोग बोले, कि—इस समय यह अद्भुत नरहरि रूप आप का देखा हे आश्चर्य प्रद ! कैसा आपका यह रूप है कि सर्व लोक के सुख देने वाला है हे ईश सो यह विप्र आप को प्राप्त हुआ आप का किंकर है इसका यह निधन (मरण) इसी के अनुग्रह के लिये हैं ॥५६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, अष्टम अध्याय की भागवताचार्यकृत भाषा टीका

समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ नवमोऽध्यायः ॥

नारद उवाच ।

एवं सुरादयः सर्वे ब्रह्मरुद्रपुरस्सराः ।
नोपैतुमशकन्मन्युसंरम्भं सुदुरासदम् ॥ १ ॥
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ।
अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शङ्किता ॥ २ ॥
प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके ।
तात ! प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥
तथेति शनकैराजन्महाभागवतोऽर्भकः ।
उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ ४ ॥
स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ।
उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥ ५ ॥
स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥
अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ।
प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥

प्रह्लाद उवाच ।

ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः ।
कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥
"उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ।
केसरीव स्वपोतानामन्येषामुग्रविग्रहः"—
इत्याद्यागमोक्तां भक्तानुकम्पितामाह—एवमिति सप्तभिः । एवं दूरत एव स्थित्वा स्तुवन्तः मन्युना संरंभ आवेशो यस्य तं उप समीपे मन्तुं नाशक्नुवन् ॥ १ ॥

श्रीर्लक्ष्मीर्देवैः प्रेषिताऽपि महदद्भुतं तद्रूपं दृष्ट्वा शंकिता सती तं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति ॥ २ ॥

उपेह्युपगच्छ ॥ ३ ॥ ४ ॥

कालएवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजम् ॥ ५ ॥

तस्य श्रीनृसिंहस्य करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य सपदि तत्क्षणमेवाभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य निर्वृतस्सन् हृदि दधौ हृष्यन्तीरोमाञ्चिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य परमपुरुषार्थतया दधौ न साधनत्वेनेत्यर्थः ॥ ६ ॥

सुसमाधिमेवाऽऽह—तस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च येनेति ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वस्मिन्निव समस्तेषु तत्कृपाऽमृतदृष्टये।
प्रह्लादस्तौति सत्पद्यैर्द्विचत्वारिंशता हरिम् ॥

तत्र तावदात्मनो भगवत्स्तुतावनधिकारमिवाशङ्क्याधिकारं सम्भावयन्नाह—ब्रह्मादय इति पञ्चभिः। मुनयो मननशीलाः सिद्धाः ज्ञानिनोऽपि कथम्भूताः सत्त्व एवैकस्मिस्तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वक्ष्यमाणैर्गुणैरपि यमाराधयितुं न पिप्रुर्न पूर्णा न शक्ता इत्यर्थः स हरिर्मे मम कथं तोषं प्राप्तुमर्हति तत्र हेतुः उग्रजातेः उग्रा घोरा आसुरी जातिर्यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं प्रत्येकं ब्रह्मादिभिः संस्तुतमप्यशान्तसंरम्भम् इतरैर्दुरासदं श्रीनृसिंहं चतुर्मुखप्रेषितः प्रह्लादः प्रसादयामासेत्याह देवर्षिः—एवं प्रत्येकम् इत्थं स्तुवन्तोऽपि ब्रह्मादयः सर्वे देवाः मन्युना संरम्भ आवेशो यस्यात एव दुरासदं दुष्प्रापं भगवन्तमुपैतुं समीपं गन्तुं नाशक्नुवन् समर्था न बभूवुः ॥ १ ॥

किं पुनर्निरतिशयप्रिया साक्षात्प्रसिद्धा श्रीर्लक्ष्मीरपि देवैर्ब्रह्मादिभिः प्रेषिता पतिसमीपमेहीति प्रार्थिताऽप्यद्भुतं महानृसिंहरूपं दृष्ट्वा पूर्वमदृष्टमश्रुतञ्च यत्तदृष्टाश्रुतपूर्वं तस्य भावस्तत्त्वं तस्माद्धेतोः शंकिता सती नोपेयाय न समीपमगात् ॥ २ ॥

एवं स्थिते ब्रह्मा चतुर्मुखोऽन्तिके समीपेऽवस्थितं प्रह्लादं प्रेषयामास, प्रेषणप्रकारमेवाह—तातेत्यर्द्धेन। तात हे वत्स! स्वपित्रे कुपितं क्रुद्धं प्रभुं श्रीभगवन्तं प्रशमय प्रसन्नं कुरु उपेहि समीपं गच्छेति ॥ ३ ॥

हे राजन् युधिष्ठिर! तथेत्यभ्युपगम्य भागवतश्रेष्ठोऽर्भकः प्रह्लादः शनकैः समीपमेत्य प्राप्य विधृतो बद्धोऽञ्जलिर्येन तादृशो भुवि देहेन दण्डवन्ननाम नमस्कृतवान् ॥ ४ ॥

ततः स्वस्य पादयोः मूले पतितं तमर्भकं प्रह्लादं विलोक्य देवः श्रीनृसिंहः कृपया परिप्लुतः परितः प्लुतो व्याप्तः तमुत्थाप्य तस्य प्रह्लादस्य शिरसि स्वकराम्बुजमदधात् निहितवान् कथंभूतं काल एवाहिः सर्पस्तस्माद्वित्रस्ता भीता धीर्येषां तेषां कृतमभयमभयप्रदानं येन तादृशं संसृतिभीरूणां कृताभयप्रदानमित्यर्थः ॥ ५ ॥

स प्रह्लादस्तस्य भगवतः करस्य स्पर्शेन धुतं निरस्तमखिलमशुभं यस्य तादृशः सद्य एवाभिव्यक्तौ प्रत्यक्चितौ परात्मानौ स्वात्मपरमात्मानौ तयोर्दर्शनं याथात्म्यसाक्षात्कारात्मकं यस्य पूर्वं प्रत्यक्षतापन्नरूपभगवद्विषयज्ञानयुक्तः तत्करस्पर्शेन तु "ज्ञातुं द्रष्टुं च तत्त्वेन" इत्युक्तविधपरमात्मदर्शनयुक्त इत्यर्थः। अत एव निर्वृतः सुखितोऽतएव हृष्यत्तनुरुदाश्रितरामेयुक्ततनुः क्लिन्नं प्रेमार्द्रं हृत हृदयं यस्य अश्रूण्यानन्दजानि लोचनयोर्यस्य तादृशस्तस्य भगवतः पादाब्जं हृदि दधौ धृतवान्निरतिशयपुरुषार्थत्वेनानुसंहितवानित्यर्थः ॥ ६ ॥

ततः प्रेमगद्गदया वाचा एकाग्रमनसा श्रीभगवदेकविषयेण मनसा हरिमस्तौषीच्च कथम्भूतः सुसमाहितः सुसमाधिमेवाह, तस्मिन्नेव न्यस्तं हृदयम् ईक्षणञ्च येनेति "हृदा मनीषा मनसाभिक्लृप्तः" इति वचित्तबुद्धिवृत्तीनाम् एकविषयत्वाभिप्रायेणैकाग्रमनसा तन्न्यस्तहृदयेक्षणा इति चोक्तम् ॥ ७ ॥

स्तुतिमेवाह-ब्रह्मादय इत्यादिद्विचत्वारिंशच्छ्लोकैः। तावद्भगवत्स्तुतावात्मनोऽनधिकारमाशङ्कते-ब्रह्मादय इति। चतुर्मुखप्रभृतयो देवगणाः सत्त्वैकतानमतयः सत्त्वस्यैकताना मुख्या अवभूता मतिर्येषां ते केवलसत्त्वप्रधानमतय इत्यर्थः। अनेनात्र "तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्" इत्युक्तरीत्याऽतीन्द्रियार्थदर्शनयोग्यत्वं सूचितम् एवंविधा अपि मुनयः सिद्धाश्च स्ववचसां प्रवाहैः स्तोमैः तथा वक्ष्यमाणैर्बहुभिर्गुणैरपि यमाराधितुं स्तुत्यादिरूपाराधनद्वारा यस्य तोषमुत्पादयितुमधुनापि न पिप्रुः आराधयितुं न पर्याप्ता न समर्था इत्यर्थः। स हरिः उग्रा आसुरी जातिर्यस्य-तस्य मे अनेन च वक्ष्यमाणगुणराहित्यमुक्तम्। ईदृशस्य मे मम किं कथं तोष्टुं तोषं प्राप्तुमर्हति, वाङ्मनसाऽपरिच्छेद्यस्वरूपरूपगुणस्वभावविभूत्यादिको भगवान् विपुलबुद्धिभिर्ब्रह्मादिभिरपि स्तोतुमशक्यः कथमल्पबुद्धेरासुरस्वभावस्य मम स्तुत्या-कथं तुष्यादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अत्रापि भक्तमाहात्म्यमेव प्रकटयति, ब्रह्मादिदेवतास्तुत्यनन्तरं कथं कथाप्रसङ्ग इति श्रोतुरान्तरीं शङ्कां परिहर्तुमाह-एवमिति। एवं स्तुवन्तोऽपि उपेतुं समीपं गन्तुं मन्युसंग्रहं कोपसारभूतं "मन-अवबोधने" इति धातुः "ज्ञानसारं प्रत्ययसारम्" इति श्रुतेः। ज्ञानिविवक्षयैतत्। ननु, तर्हि कथं समीपं गन्तुं नाशक्नुवन्नित्युच्यते? इति चेदज्ञेयत्वज्ञापनायेति तात्पर्यम्। "न तत्र चक्षुर्गच्छति न वाग्गच्छति, तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत" इत्यादिश्रुतेरेतदेव दर्शयति, सुदुरासदमिति। सुखेन विषयीकर्तुमशक्यम् ॥ १ ॥

एतदेव विवृणोति, साक्षादिति। सरस्वत्यादिव्यावृत्त्यर्थं साक्षादिति अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैरिति शेषः। श्रावेतौ नित्यमुक्तावित्यादेः। तर्हि नोपेयाय शङ्कितेत्येतत्कथं घटतीति चेत् ममापीश्वरः परिच्छेद्यो न भवति किमन्यैरिति ज्ञापनायासुरजनमोहनायेति वा "अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः ॥ नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नाययौ" इति वाक्यसिद्धम् ॥२॥

ममेदानीं प्रह्लादे वात्सल्यातिशयोऽस्ति भक्तानां मत्सेवातिशयफलाधिकार्थमिति भगवन्मनोज्ञापनाय ब्रह्मणा प्रह्लादः प्रेषित इत्याशयेनाह, प्रह्लादमिति। अयमपि लक्ष्मीकान्तसमीपागमनहेतुरन्यथा प्रह्लादे वात्सल्यातिशयो न प्रकटितः स्यात्तदुक्तम् "प्रह्लादे चैव वात्सल्यं दर्शनाय हरेरपि ॥ ज्ञात्वा मनस्तदा ब्रह्मा प्रह्लादं प्रेषयत्तदा" इति प्रकृष्टो ह्लादो निर्वृतिर्यस्य स तथा इत्यनेन प्रह्लाद शब्दनिरुक्तिः सूचिता लक्ष्म्यादिवत्सलतां हित्वा प्रह्लादे तत्करणाद्धरेर्वैषम्यबुद्धिर्नाशङ्कनीया असुरजनमोहनार्थोपपत्तेरुक्तंच "एकत्रैकस्य वात्सल्यं विशेषाद्दर्शयेद्धरिः ॥ अवरस्यापि मोहाय'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इति भक्त्यादिदानं नैव करोति किन्तु वात्सल्यानुसारेणेत्यभिप्रायेण दर्शितं क्रमेणैवापि वत्सल इत्युक्तं उपेहि उपेत्य ॥ ३-४॥

नृहरेः प्रह्लादे वात्सल्यातिशयं दर्शयति—स्वपादमूले इति। ब्रह्मादिकराम्बुजेभ्योहरेः कराम्बुजं विशिनष्टि, कालाहीति। कालाख्याहिना निर्दिष्टा ग्रस्ता धीर्येषां ते तथा तेषाम् ॥ ५॥

इतरकरस्पर्शवैशिष्ट्यदर्शनार्थंशकरस्पर्शफलाभिव्यक्तिं वक्ति। सतत्कर इति। सभगवत्करस्पर्शविधूतसमस्तपापत्वात्तत्क्षण एव सम्यगंकुरितपरमात्मज्ञानः अभिव्यक्तं परस्य हरेरात्मनः संसारिणश्च दर्शनं स्वरूपविषयज्ञानं यस्य स तथेति वा क्लिन्नहृद्भक्तिलक्षणामृतजलेनार्द्रीकृतान्तःकरणोऽश्रुणा युक्ते लोचने यस्य स तथा ॥ ६ ॥

तत्त्वज्ञानमस्योत्पन्नमित्यस्य किञ्चिह्नमित्यतस्तत्स्तुत्या व्यज्यत इति भावेन दर्शयति, अस्तौषीदिति ॥ ७ ॥

सत्त्वे नित्याविर्भूतबलज्ञानसमाहार एक एव नान्य इति विस्तानमतिर्विस्तृतबुद्धिर्येषां ते सत्त्वैकतानमतयः यद्वा सत्त्वे हराविव नियतबुद्धयः अधुना परतः परस्य यस्यान्तं नापि नैव यान्ति स हरिरुग्रजातेरसुरजातेर्मे तोष्टुं स्तोतुमर्हति किमित्यन्वयः "न ते विष्णो"इति श्रुतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १ ॥

साक्षात् श्रीरिति साऽपि तस्यैव प्रेयसी अदृष्टाश्रुतपूर्वत्वात्त्वादिति। अत्रादृष्टाश्रुतपूर्वत्वं संभ्रमादेव जातमित्यूह्यम् ॥ २--५॥

अथ प्रह्लादस्य श्रीभगवत्साक्षात्कारकृतसर्वाघधूननपूर्वकं ब्रह्मसाक्षात्कारानन्तरं भगवत्साक्षात्कारविशेषात्मकनिर्वृतिं परमाभीष्टत्वेनाह, स तद्वेति ॥ ६—७ ॥

तत्र तावज्जिज्ञासायोग्यतायां कैमुत्यं व्यञ्जयति—ब्रह्मादय इति। वचसां कर्मयोगज्ञानप्रधानानां शब्दानां प्रवाहैर्निरन्तराभ्यासैः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सर्वविद्यस्तदागन्तुमन्तिकं नवमे हरेः।
प्रह्लादो ब्रह्मणाऽऽदिष्टस्तुष्टुवे सन्निधिं गतः ॥
रमापि यत्र न प्राभूदन्येषां तत्र का कथा।
वात्सल्यं मूर्तिमत् किन्तु प्राहरोऽनुबभूव तम् । ०।

ननु, स्वस्वदुःखमावेदयन्तो दूरत एव स्तुवाना देवादयः किमिति समीपमेत्य नोपासते स्म तत्राह—एवमिति। मन्युना संरम्भ आवेशो यस्य तम् ॥ १ ॥

अदृष्टाश्रुतपूर्वत्वादिति नृसिंहरूपस्य पूर्वकल्पदृष्टत्वेऽपि नृसिंहस्य वैकुण्ठे सदैव दृष्टत्वेऽपि तदानीमदृष्टाश्रुतत्वप्रतीतिर्लीलाशक्त्यैव कारिता। अद्भुतरसास्वादप्रापणार्थमित्याहुः ॥ २—४ ॥

कृतमभयं येन तत् ॥ ५ ॥

असुरजातित्वात्तदीयस्पर्शादिप्राप्त्यसंभावनालक्षणमशुभं यत् पूर्वमासीत् तत् धुतं निरस्तं यस्य सः। तत्करस्पर्शप्रभावात् अभिव्यक्तं पूर्वसिद्धमेव तदानीं सर्वतोभावेन व्यक्तीभूतं परात्मदर्शनं परमात्मानुभवो यस्य सः ॥ ६ ॥

सुसमाधिमाह——अस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च येन सः ॥ ७ ॥

भो दुरवगमाश्चर्य प्रभो! मयि कं गुणमालक्ष्य कृपयसीत्याह, ब्रह्मादय इति। सात्त्विकत्वमपि न ते कृपायाः कारणं किं पुनस्तामसत्वमित्याह, सत्त्वेषु धर्मज्ञानतपःस्वेव एकताना अनन्यवर्त्तिनी मतिर्येषां ते। किं पुनरधर्माज्ञानविषयभोगैकतानमतयो वयमिति भावः।"एकतानोऽनन्यवृत्तिः"इत्यमरः। न च केवलं स्तुतिवादानामेव त्वत्प्रसादकत्वमित्याह, वचसां प्रवाहैः पुरुगुणैर्ध्वनिगुणालंकारयुक्तैः प्रवाहपक्षे स्वच्छत्वशैत्यमाधुर्यपावित्र्याद्यैः। आराद्धुं केवलं सन्तोषयितुमित्यर्थः। न पिप्रुः नाशक्नुवन्नित्यर्थः। मे मयीत्यर्थः। उग्रजातेर्महातामसजातेः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नवमे प्रह्लादस्तोत्रेण विगतकोपोऽभूद्धरिरिति वर्ण्यते—मन्युना संरम्भः आवेशो यस्य तमुपेतुमासादितुं नाशकन् ॥ १ ॥

देवैः तद्रूपस्य अदृष्टाश्रुतपूर्वत्वाद्धेतोः साक्षादनेकावतारचरितज्ञा श्रीः प्रेषितापि तन्नृहरिरूपं महदद्भुतं दृष्ट्वा शङ्किता इदानीं समीपगमने आनुकूल्यं प्रातिकूल्यं वा स्यादित्येवं जातशङ्का सा नोपेयाय समीपं नैवाऽगात् ॥ २ ॥

हे तात वत्स! स्वपित्रे कुपितं हरिं प्रशमय तदर्थमुपेहि शरणं ब्रजेत्युक्त्वा प्रह्लादं प्रेषयामास ॥ ३ ॥

उपेत्य समीपं भक्त्या शिरसि विधृताञ्जलिः कायेन भुवि ननाम ॥ ४ ॥

स्वपादमूले स्वचरणसमीपे कृपया परिप्लुतो व्याप्तः उत्थाप्य काल एवाऽहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजं शीर्ष्ण्यदधात् ॥ ५ ॥

स प्रह्लादः तस्य भगवतः करस्पर्शेन धुतानि निरस्तान्यखिलान्यशुभानि यस्य सपदि त्वरितमेवाभिव्यक्तं प्रोद्भूतं परस्योपास्यस्य व्यापकस्वरूपस्य आत्मन उपासकस्याणुस्वरूपस्य स च दर्शनं यस्य विग्रहदर्शनानन्तरं स्वरूपानुभवोजात इत्यर्थः। हृष्यन्ती आनंदिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य सः निर्वृतः सुखितः तत्पादपद्मं कार्यकारणप्रकृतिसम्बन्धनिवृत्तिपूर्वकतत्साधर्म्यप्राप्तिलक्षणमोक्षार्थं हृदि दधौ ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥
विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थप्राणः पुनाति स कुलं न तु भूरिमानः ॥ १० ॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ।
यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ११ ॥
तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ।
नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ १२ ॥
सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश ![(१)] न चोद्विजन्तः ।
क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥ १३ ॥
तद्यच्छ मन्युमसुरश्च हतस्त्वयाऽद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ।
लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह ! विभयाय जनाः स्मरन्ति ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं कृतध्यानः सपद्येव तस्मिन् भगवति न्यस्तं समर्पितं हृदयं मन ईक्षणञ्च येन सः एकाग्रेण हरिमस्तौषीत् ॥ ७ ॥

"सत्त्वं स्वातंत्र्यमुद्दिष्टं तच्च कृष्णे न चापरे" इत्येवंभूते भगवत्स्वातंत्र्ये एकस्मिन् तानो विस्तारो यस्याः सा मतिर्येषां ते भगवदुत्कर्षाभिज्ञा इत्यर्थः । ब्रह्मादयः प्रजास्रष्टारो राजसाः सुरगणाः प्रजापलकाः सात्त्विकाः " यत्सत्त्वतः सुर गुणा रजसः प्रजेशाः" इति वक्ष्यमाणात् किं बहुना मुनयो मननशीलाः पराशराद्यः सिद्धाः कपिलादयः गुणातीताश्च वचसां प्रवाहैर्यैरैः पुरुगुणैः सृष्टिपालनमननध्यानैः यमाराधयितुं न विभुर्न पूर्णाः स हरिः उग्रजातेः उग्रा दैत्यत्वात्तामसी जातिर्यस्य तस्य मे किं कथं तोष्टमर्हति ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजीबोले, कि—इस प्रकार ब्रह्मा महादेव प्रभृति सम्पूर्ण देवता लोग कोपावेश युक्त, और अत्यन्त दुरासद, श्री नृसिंह देवके समीप जाने को समर्थ न हुए ॥ १ ॥

तव देवताओं ने साक्षात् श्री लक्ष्मीजी को भेजा, लक्ष्मी जी ने भी आप का ऐसा स्वरूप कभी न देखा सुना अत एव वो भी शंकित होकर समीप में नहीं गई ॥ २ ॥

तब समीप मे स्थित प्रह्लाद को ब्रह्मा जी ने ऐसे कहकर भेजा, कि-हे तात ! अपने पिता पर कुपित प्रभु को समीप जाकर शान्त करो ॥ ३ ॥

तब तो हे राजन् महा भागवत अर्भक [छोटासा लडका] प्रह्लाद 'जो आज्ञा' ऐसा धीरे से कह कर प्रभु के समीप में-जाकर हाथ जोडकर शरीर से पृथिवीमें दण्डवत करता हुआ ॥ ४ ॥

तब प्रभु भी अपने चरणों में पडे हुए उस अर्भक [लडके] को देखकर कृपा में डूबगये, और उसको उठाकर काल रूप सर्प से त्रस्त बुद्धि वालों को अभय देने वाले अपने कर-कमल को, प्रह्लाद के मस्तक पर धारण करते हुए ॥ ५ ॥

प्रह्लाद का भी नरहरि के कर स्पर्श से सम्पूर्ण अशुभ नष्ट हुआ, और तत्काल में पर ब्रह्म के स्वरूप रूप गुण विभूति क-ज्ञान वाला होकर 'पुलकितांग आर्द्र हृदय अश्रु लोचन और आ-नन्दित होकर हरि के चरणों को हृदय मे धारण करता हुआ ॥ ६ ॥

और एकाग्र मन से समाहित होकर प्रभु में हृदय और दृष्टि को लगाकर प्रेमपूर्वक गद्गद वाणी से स्तुति करने लगा ॥ ७ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोले, कि— सत्त्व गुण के एक विस्तार वालीबुद्धि-वाले ब्रह्मादिक देवता और मुनि सिद्ध लोग बहु गुणयुक्त वा-णीके प्रवाहों से जिस हरि के आराधन करने को अबतक भीन समर्थ हुए वो हरि क्या मेरे सदृश उग्रजाति के स्तुति करनेके योग्य हैं ? ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं हरितोषणे स्वस्यायोग्यतामाशक्य योग्यतां सम्भावयति, मन्य इति द्वाभ्याम् । अभिजनः सत्कुले जन्म रूपं सौन्दर्यं श्रुतं पाण्डित्यं ओज इन्द्रियनैपुणम् तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगोऽष्टाङ्गः एते धनादयो द्वादशाऽपि गुणाः परस्य पुंस आराधनाय न भवन्ति हि यतः केवलया भक्त्यैव गजेन्द्राय तुष्टोऽभवत् ॥ ९ ॥

(१) तथोद्विजन्त इति वीर० ।

CC0. In Public Domain, Digitization by eGangotri

नाहं बिभेम्यजित ! तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ।
आंत्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥
त्रस्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्रसंसारचक्रकदनाग्रसतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं भक्त्यैव केवलया हरेस्तोषः सम्भवतीत्युक्तमिदानीं भक्तिंविना नान्यत्किञ्चित्तोषहेतुरित्याह—विप्रादिति । पूर्वोक्ता धनादयो द्विषट् द्वादशगुणास्तैर्युक्ताद्विप्रादपि श्वपचं वरिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादशधर्मादयो गुणा द्रष्टव्याः। तदुक्तम्

"धर्मश्च सत्यञ्च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य" ॥

इति यद्वा—

"शमोदमस्तपः शौचं क्षान्त्यार्जवविरक्तताः ।
ज्ञानविज्ञानसन्तोषाः सत्यास्तिक्ये द्विषड्गुणाः" ॥——

इति कथम्भूताद्विप्रात् अरविन्दनाभस्य पादारविन्दाद्विमुखात् कथम्भूतं श्वपचं तस्मिन्नरविन्दनाभेऽर्पिता मनआदयो येन तं ईहितं कर्म वरिष्ठत्वे हेतुः । स एवंभूतः श्वपचः सर्वं कुलं पुनाति भूरिमानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति कुतः कुलम्, यतो भक्तिहीनस्यैते गुणा गर्वायैव भवन्ति न तु शुद्धयेऽतो हीन इति भावः ॥ १० ॥

तर्हि किं धनाद्यर्पणेन संमानं प्राकृत इव भगवानपेक्षते ? नेत्याह—नैवेति । अयं प्रभुरीश्वरोऽविदुषोऽल्पकाज्जनान्मानं पूजामात्मनोऽर्थं न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि पूजां नेच्छत्येव तत्राह, करुणः कृपालुरतो वृणीते च तत्र हेतुः यद्यदिति । यं यं मानं यद्वा यद्यस्माद्यद्येन धनादिना भगवते मानं विदधीत तद्वेवाऽऽत्मने भवति नान्यत् यथा मुखे कृतैव तिलकादिश्रीः शोभा प्रतिबिम्बस्य भवति नतु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ॥ ११ ॥

यस्मादेवं भगवान्भक्त्यैव तुष्यति तस्मादहं नीचोपि विगतविक्लवोगतशंकः सन्नीश्वरस्य महि महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणाऽनुवर्णयामि अजानतोऽपि स्तुतिकरणे हेतुमाह—येनैव महिम्नाऽनुवर्णितेनाऽविद्यया संसारमनुप्रविष्टः पुमान्पूयेत शुध्येत तन्महि अन्यस्य तथा शोधकत्वाभावादित्यर्थः ॥ १२ ॥

तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तं स्तुवन् कोपोपसंहारं प्रार्थयते-सर्वेहीति द्वाभ्याम् । भो ईश ! अमी उद्विजन्तोबिभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव विधिकरास्त्वदियोगकर्तारो भक्ता एव नान्ये नच वयमसुरा इव वैरभावेनैते भक्ताः किन्तु श्रद्धयैव तव रुचिरैरवतारैर्विविधं क्रीडनमस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय ॥ १३ ॥

तत्तस्मादेषां भयपरिहाराय मन्युं यच्छोपसंहर यदर्थमयं मन्युः स चासुरः साधूनां सन्तोषार्थमद्य हतः । अतःपरं क्रोधेन कार्याभावात्तं नियच्छ. नन्वन्येषां वधेन साधुः किं मोदेत ? तत्राह—वृश्चिकादेः परोपद्रवकारिणोऽन्यतो जातया हत्या वधेन तस्यैव तद्भद्रं जातमिति साधुरपि मोदेतैव तर्हि बहूनां सुखावहत्वादमुं क्रोधं न त्यजामीति चेत्तत्राह—लोकाश्च निर्वृतिमिताः प्राप्ताः सन्तः प्रतियन्ति क्रोधोपसंहारं प्रतीक्षन्ते तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत्तत्राह—रूपमिति । विभयाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः ॥ १४ ॥

त्वं चेद्बिभेषि तर्हि त्यजामीति चेत्तत्राह—नाहमिति । भो अजित ! तेऽस्माद्रूपादहं न बिभेमि कथंभूतात् आस्यं च जिह्वा चार्कसदृशनेत्राणि च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्च एतान्यतिभयानकानि यस्मिंस्तस्मात् अन्त्रमय्यः स्रजो यस्मिंस्तदांत्रस्रक् तस्मात् क्षतजाक्ताः केसरा यस्मिन् शंकुवच्छ्रती स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात्. निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्मिन् एवंभूतादपि ते रूपादहं न बिभेमि ॥ १५ ॥

तद्भयं त्वन्यदस्तीत्याह—त्रस्तोऽस्मीति । दुःसहं यदुग्रं संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन्प्रणीतो निक्षिप्तोऽस्मि हे कृपणवत्सल ! हे उशत्तम ! कदा नु त्वं प्रीतः सन्नपवर्गभूतं शरणं तवांघ्रिकमलंप्रति ह्वयसे मामाह्वयसि ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनधिकारमात्मन आशङ्क्य. पुनरधिकारंसम्भावयितुं तावद्भगवतो जातिगुणवृत्त्यादितारतम्यानादरेण भक्त्यैकतोष्यत्वमाह-मन्य इति द्वाभ्याम् । धनादयः परमपुरुषस्याराधनाय सन्तोषनिमित्ताराधनाय न भवन्ति इति मन्ये किन्तु भक्तिरेव परमपुरुषसन्तोषाराधनाय भवतीति मन्य इत्यर्थः । कुतः हि यस्माद्भगवान् गजयूथपाय धनादिविरहिताय गजेन्द्राय भक्त्यैव तुतोष. तत्र धनं वित्तम्, अभिजनः सत्कुले जन्म, रूपं सौन्दर्यं तपः स्वधर्मः कृच्छ्रादिरूपं वाऽनशनरूपं वा श्रुतं पाण्डित्यम् ओज इन्द्रियबलं तेजः कायकान्तिः प्रभावः प्रतापः बलं शारीरं पौरुषमुद्यमः बुद्धिः प्रज्ञा योगः प्राणजयः ॥ ९ ॥

एवं धनाद्यभावेपि केवलभक्तेरेव श्रीभगवत्तोषहेतुत्वं निदर्शितम्. यतो भक्तेरेव श्रीभगवत्तोषहेतुत्वमतएवेतरगुणसंपत्त्यपेक्षया श्रीभगवद्भक्तिसम्पत्तिरेव श्रेयसीत्याह—विप्रादिति. द्विषड्गुणाः द्वादश गुणास्ते च—

"धर्मश्च सत्यं च दमः श्रुतञ्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
दानं च यज्ञश्च धृतिः शमश्च व्रतानि वै द्वादश ब्राह्मणस्य ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इतिसनत्सुजातोक्ताः श्रीमहाभारते । एतैर्युक्तादरविन्दनाभस्य पादारविन्दविमुखद्ब्राह्मणाच्छ्वपचं श्वपाकं वरिष्ठं श्रेष्ठं मन्येश्वपचं विशिनष्टि. तदर्पितेति तस्मिन्नरविन्दनाभे अर्पितास्समर्पिता मन आदयो येन तं तत्रेहितं कर्म तस्य श्रेष्ठत्वे ततो विप्रस्याऽवमत्वे च हेतू आह, स एवंभूतः श्वपचः कुलं स्वकुलमपि पुनाति भूरिमानो गर्वो द्विषड्गुणप्रयुक्तो यस्य स तु विप्रः नत्वात्मानमपि पुनातीत्यर्थः । यद्यप्युक्ता एव गुणाः भगवद्भक्त्यनुग्राहका भक्तिश्च वेदान्तविहितब्रह्मोपासनात्मिका तत्र चाधिकारस्त्रैवर्णिकस्यैव. ननु शूद्रस्य एतच्च शारीरकाऽपशूद्राधिकरणन्यायसिद्धम्. एवं च तत्र सुतरां श्वपाकस्याधिकारो न सम्भवतीति उक्तगुणयुक्तात् द्विजाद्भक्तियुक्तस्य श्वपाकस्य परत्ववर्णनमनुचितम् तथाप्यत्र प्रकरणे भक्तिशब्देन भक्तिः प्रपत्तिश्चोच्यते प्रपत्तौ च सर्वेषामधिकारो बहुप्रमाणप्रतिपन्नः अतएव हि—

"दैतेया यक्षरक्षांसि स्त्रियः शूद्राव्रजौकसः ।
खगामृगाः पापजीवा सन्ति ह्यच्युततांगताः" ॥ इति

स्त्रीशूद्रादीनामपि भगवति भक्त्या तत्साधर्म्यापत्तिरुक्तोपपन्ना भवति "वनङ्गतो यद्धरिमाश्रयेत, उपेत नारायणमादिदेवम्, ॥ मन्येतदेतदाखिलं परमस्य पुंसः, स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः, इति प्रपत्तिरपि कर्त्तव्यत्वेन पूर्वमुक्ताचेत्यतो नविरोधः । उपपादितश्चैतत्पुरस्तान्मन आदीनां भगवति समर्पणं नाम तच्छेषत्वेन तदायत्तसत्त्वादिमत्त्वेन चानुसन्धानरूपाध्यवसायात्मकज्ञानं प्राणशब्दः प्राणाश्रयप्रत्यगात्मस्वरूपस्याप्युपलक्षक एवञ्चात्मत्मीयादिसमर्पणेन भगवति न्यस्तरक्षाभरः श्वपाकोऽपि श्रीभगवत्तोषकत्वादुक्तविधाद्विप्राच्छ्रेयानिति भावः । तदुक्तम् श्रीभगवता—

"अपिचेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
प्रियो हि ज्ञानिनोत्यर्थमहं च मम प्रियः" ।

इत्यादि—

अपिपापेष्वभिरता मद्भक्ताः पाण्डुनन्दन ! ।
मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवाम्भसा ॥ इति ॥१०॥

ननु, परिपूर्णस्य भगवतो जातिगुणविद्याविनिहीनश्वपाकसमर्पितमनआदिभिः किं प्रयोजनम् ? कथं वा ततस्तस्य तोषः ? कथंचैतदेवंविधोपि मामनन्यभावेन भजन्नितरां मत्प्रिय इति श्रीभगवतोक्तम्?इत्यत्राह-नैवेति । प्रभुरीश्वरो निजलाभपूर्णः निजेन स्वाभाविकेन लाभेन स्वमस्तकामावाप्त्या पूर्णः अत एव मानं स्वाराधनरूपं कर्म नैव जगाद आत्मने इत्यपकृष्यते आत्मने आत्मार्थं स्वप्रयोजनाय न जगादेत्यर्थः । किन्तु करुणो वृणीते करुणः करुणावान् "गुणवचनेभ्यो मतुपो लुग्वक्तव्यः" इति लुप्तमतुवन्तं पदं लुप्तलुगिति टापो लुक् हेतुगर्भमिदं दयालुत्वाद्विदुषो वृणीते प्रबुद्धजनान्स्वाराधनविधानेनांगीकरोतीत्यर्थः । करुणयाऽऽराधकोज्जीवनार्थमेवाराधनं स्वीकारोतीति भावः । तदेव विशदयति, यद्यदाराधनं भगवते जनो विदधीत करोति तच्चात्मने स्वार्थमेव भवति "यंस्तुवन्स्तव्यतामेति वंन्द्यमानश्च वन्द्यताम्" इति न्यायाद्भगवत्पूजनेन स्वयमपि पूज्या भवन्तीत्यर्थः । कथमन्यस्य पूजनेन अन्यस्य पूज्यतेत्यपेक्षायां, तदधीनसत्तादिमतो वस्तुनस्तत्सत्कारेण तत्साम्यावाप्तौ दृष्टान्तमाह, यथा मुखश्रीः प्रतिमुखस्येति । यथा साक्षादलङ्कारादिजन्या मुखस्य शोभा तदधीनच्छायामुखस्य भवत्येवं भगवतः पूज्यता तदाराधकानां तथैव भवतीत्यर्थः । "तद्यथामातातरुणवत्सं वत्सो वा मातरम्, छाया सत्त्वमनुगच्छेत् तथाप्रकारः" इति श्रुतिर्हिजीवस्यच्छायावदीश्वरपारतन्त्र्यमवगमयति जनादविदुष इतिपाठे । अविदुषः किञ्चिज्ज्ञादपि जनान्मानमात्मार्थेन वृणीत इत्यर्थः ॥ ११ ॥

एवं भगवतो भक्त्यैकतोष्यत्वं तत्तोषस्य च भक्तोज्जीवनार्थत्वं चोक्तं तदेवं स्वस्योग्रजातेरपि तद्भक्तस्य तत्तोषकस्तुतावनधिकारः सम्भावितः यत एवंभूतो अहमतो यथामति स्तोष्यामीत्याह-तस्मादिति । यस्माद्भगवान्भक्त्यैकस्तोष्यस्तस्मान्नीचोप्यहं तद्भक्तियुक्तोहमतएव विगतविक्लवः गतशङ्कस्सन् सर्वात्मना करणत्रयैक्येनेश्वरस्य भगवतो महि महिमानं यथामति स्तौमि गृणामि किमीश्वरस्य स्तुत्या प्रयोजनमिति शङ्कां निराकुर्वंस्तन्महिमानुवर्णनं विशिनष्टि, येनेश्वरगुणानुवर्णनेन अनुवर्णितेनेति भावेक्तः अजया प्रकृत्या गुणविसर्गे गुणकार्ये शरीरमनुप्रविष्टः पुमान्पूयेत शुद्ध्येत् स्तुत्या न. तस्य कोप्यतिशयः किन्तु स्तुवतएवात्मविशुद्धिरूपोतिशयइतिभावः ॥ १२ ॥

एवमात्मनः स्तुतावनधिकारं परिहृत्य तत् स्तुतिं प्रतिज्ञाय तं तुष्टूषुस्तावत्कोपोपशमं प्रार्थयते—सर्वे हीति द्वाभ्याम् । हे ईश वयमिव यथा वयं तव किंकरास्तथा अमी सर्वे ब्रह्मादयोपि सत्त्वधाम्नस्तव विधिकराः किंकराएव अस्त्वेवं ततः किमत आह उद्विजन्तः त्वत्कोपाद्बिभ्यतो वर्त्तन्ते ततो मन्युं यच्छेत्युत्तरेणान्वयः सत्त्वधाम्न इत्यनेन शुद्धसत्त्वैकतानस्य तव कोपः स्वाभाविको न भवति किन्तु लोकरक्षणेधिकृतस्य तव तद्रक्षणरूपक्रीडार्थमाहित इत्यभिप्रेतं तदेव व्यनक्ति क्षेमायेति अस्य जगतः क्षेमाय लब्धपरिरक्षणाय भूतयेयोगायालब्धलाभायात्मसुखाय ब्रह्मात्मकस्वात्मानंदानुभवजसुखाय च भगवतस्तव रुचिरैः सुन्दरैरवतारैर्नृसिंहादिभिर्विक्रीडितं भावेक्तः विविधाक्रीडा इत्यर्थः इयं दुष्कृद्विषयक्रोधादिरूपा तव क्रीडा लोकक्षेमाद्यर्थमिति भावः । एवंविधक्रीडया हि दुष्कृद्विनाशद्वाराश्रितपरिपालनमपूर्वश्रेयःप्राप्तिःश्रवणादिना क्रीडामनुभवतो लोकस्य निःशेषबन्धककर्मक्षयरूपमोक्षद्वारात्मसुखानुभूतिश्च भवेदित्येतदर्थं तव विक्रीडितमितिभावः ॥ १३ ॥

यतस्तव त्रिक्रीडितं लोकस्य क्षेमाद्यर्थं तत्तस्माद्धेतोः हे नृसिंह मन्युं यच्छ उपसंहर इतःपरं न मन्युना प्रयोजनमस्तीत्याह—अधुनाऽसुरो मत्पिता त्वया हतः लोकाः निर्वृतिं सुखमिताः प्राप्ताश्च ननु लोका निर्वृतिं यान्तुनाम लोकान्तर्गतःसाधुजनस्तु मत्कृतामिमां भूतहिंसां नानुमोदेत अत आह साधुरपि लोकोपद्रवकारिवृश्चिकसर्पादिहत्या मोदेत वृश्चिकसर्पादितुल्यस्य मत्पितुर्हत्या साधुजनोपि मोदेतैवेत्यर्थः इति शब्दः किंतंतः सर्वे ब्रह्मादयो निर्भयाः प्रतियान्तु स्वस्थानानि प्रतिगच्छन्तु इतःपरमिदं त्वद्रूपमभयाय जनाः स्मरन्ति ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, ब्रह्मादय उद्विजन्त इति विशेषेण ब्रह्मादीनामेव क्रोधयुक्तान्मदुग्ररूपाद्भयं ब्रूषे त्वन्तु न बिभेषि किमतआह–नेति । हेऽजित ! तवास्माद्रूपादिति विशेष्याध्याहारः अहं न बिभेमि कथंभूतादास्यं च जिह्वा चार्कसदृशे नेत्रे च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्चैतान्यतिभयानकानि यस्मिन् अन्त्रमय्यः स्रजो यस्मिन् क्षतजाः रुधिराक्ताः केसरा यस्मिन् तत् क्षतजकेसरं शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तच्छंकुकर्णं द्वयोर्बहुव्रीह्योः कर्मधारयक्षतजकेसरशंकुकर्णनिर्ह्रादेन भीता दिगिभा दिग्गजा यस्मात् तत्पूर्वेण पुनः कर्मधारयः क्षतजकेसरशंकुकर्णानिर्ह्रादभीतदिगिभं तस्माद्दरीन् भिन्दन्तीत्यारिभिन्दि तानि नखाग्राणि यस्मिन्नेवंभूताद्रूपादहं न बिभेमीत्यर्थः ॥ १५ ॥

तर्हि कुतो बिभेषि इत्यपेक्षायां तद्भीति इतो बिभेमीत्याह–त्रस्तोस्मीति । हे कृपणवत्सल ! दुस्सहं अत्युग्रं संसारचक्रं कदनं तस्मादहं त्रस्तः भीतोस्मि कथंभूतोहं ग्रसतांप्रणीतः ग्रसतामिति कर्त्तरिषष्ठी ग्रसद्भिः त्वच्छेषभूतं मत्स्वरूपं तिरोधापयद्भिर्देहात्माभिमानस्वतन्त्रात्माभिमानममकारादिभिः तत्र संसारे प्रणीतः प्रापितस्तन्मूलभूतैः कर्मभिश्च बद्धः निगलितः हे उरुक्रम कमनीयतम ! उक्तविधं मां प्रीतः मद्विषयकनिरतिशयप्रीतियुक्तस्त्वं ते तवाङ्घ्रिमूलंप्रति कथंभूतमंघ्रिमूलमपवर्गशरणमपवर्गोपायभूतं कदानु ह्वयसे आह्वयसे कदा मां त्वदंघ्रिमूलं प्रापयिष्यसि तावन्मामनुवर्त्तते भयमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या ननु भक्त्यैव यूथपाय गजेन्द्राय "सेनानेतरि नागेन्द्रे यूथनाथः प्रकीर्तितः" इत्यभिधानम् अनेन धनादिकमपि भक्त्युपबृंहितं सफलमित्युक्तं भवति ॥ ९ ॥

इतोपि भक्तिरेव हरेः प्रसादे प्रधानसाधनमित्याह, विप्रादिति । द्विषड्गुणा द्वादशगुणा एतैर्युक्तात् "ज्ञानं च सत्यं च दमः शमश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रतं द्वादश ब्राह्मणस्य ॥" एतेभ्यः प्रवरो द्वादशेभ्यः सर्वामपीमां पृथिवीं प्रशिष्यात् त्रिभिर्द्वाभ्यामेकतोवा विशिष्टो नास्य समोऽस्तीतिवेदितव्य इत्येते भक्तिमत एव सम्भवन्ति नान्यस्य कचिन्सम्भवेयुस्ततो न तेभ्योऽर्थः स्यात् " अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयतएव" इति श्रुतेः । तस्माद्भक्तिरेव प्रयोजिकेति तात्पर्यम्. सकलं मनआदिकं पुनाति विपर्यापरक्तं मलं निरस्य दर्पणवत्स्वच्छं करोति जगत्पुनातीति वा "यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इति श्रुतेः । अन्यत्र बाधकमाह–नरित्रिति । भूरिमानोऽहङ्कृत्येत्यभिमन्ता नैव पुनातीत्यन्वयः "समर्थं मन्यसे यच्च कुन्तीपुत्रं वृकोदरं । तन्मिथ्या हि न मे कृत्स्नं प्रभावं वेत्थ भारत ॥ मत्समो हि गदायुद्धे पृथिव्यां नास्ति भारत । नासीत्कचिदतिक्रान्तो भविता वा न कश्चन" इत्यादि भारते दुर्योधनोक्ताहङ्कारप्रतीतेरेवंविधो भूरिमान इत्यर्थः । "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैवमाप्नुयात्" इति श्रुतेः "शमोदमस्तपः शौचं क्षान्त्यार्जवविरक्तता । ज्ञानविज्ञानसन्तोषाः सत्याज्येऽपि द्विषड्गुणाः" इति केचित्. "सत्यं दमस्तपः शौचं सन्तोषो ह्रीः क्षमार्जवम् ॥ ज्ञानं शमो दया ध्यानं विप्रस्यैते द्विषड्गुणाः" इति केचित् असम्प्रदायज्ञैरुक्तत्वादत्र न ग्राह्यमेतन्मतद्वयमिति ॥ १० ॥

ननु, श्वपचं वरिष्ठमितीदमसम्भावितं वर्णहीनत्वेन तत्कृतसपर्यास्वीकारानुपपत्तेः " नाहं तथाद्मि यजमानहविर्विताने: " इत्यादावन्यथाकथनाच्चेति तत्राह, नैवेति । अयं प्रभुरविदुषो ज्ञानोपदेशानधिकारिणः पूर्वचीर्णपुण्यनिचयास्तज्ज्ञानेन यथार्थतत्त्वज्ञानिनो वर्णहीनाज्जनान्मानं पूजां वृणीते स्वीकरोति इति यत्तदात्मनोऽर्थे अप्राप्तप्राप्तये नैवेत्यन्वयः । कुत इत्यत उक्तं निजेति निजलाभेन नित्यानन्देन पूर्ण इति हेतुगर्भविशेषणम् " को ह्येवान्यात् " " योवैभूमा तत्सुखम् " इत्यादि श्रुतेः । ननु, स्वार्थाभावे सपर्यास्वीकारे किङ्कारणमिति तत्राह—करुणइति । करुणयतीति करुणः " देवस्यैष स्वभावो यम् यमेवैष वृणुते " इत्यादि श्रुतेः कर्मणः क्षणभङ्गुरत्वात् कृपया तत्फलप्रदानाय तत्स्वीकारोपचार इति तात्पर्यं विद्वद्भिः क्रियमाणं मानं स्वार्थमपि किन स्यादित्याशङ्क्य विशेषमाह, यद्यदिति । विद्वदविद्वद्भेदमन्तरेण समानो जनः भगवते यद्यन्मानं विदधीत तत्तदात्मने च स्वप्रयोजनायैवेत्युपगन्तव्यम् अत्रदृष्टान्तमाह–प्रतिमुखस्येति । तथालङ्कृतमुखश्रीर्दर्पणादौ प्रतिफलितस्य प्रतिबिम्बलक्षणमुखस्य स्वालंकारमन्तरेण श्रीर्लभ्यते तथा स्वबिम्बभूतपरमात्मनो निर्दोषगुणराशिध्यानलक्षणमानेन तत्प्रतिबिम्बत्वात्स्वस्यापि निर्दोषसुखलक्षणश्रीर्लभ्यतइत्यर्थः अनेन ब्रह्मादिजीवराशिरत्यंततुच्छीभूतइति सूचितं "श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः" इत्यादेः अयं तु नरसिंह आत्मनएव न प्रभुः किन्तु सर्वस्याप्यतोखण्डैश्वर्यत्वात् चक्रवर्तीकरमिवाविदुषोजनान्मानं वृणीते अनेन विद्वज्जनमानाङ्गीकारो व्याख्यातः स्वतः सिद्धत्वात्. ननु, जनपदादर्थादानादिना राज्ञः स्वप्रयोजनोपलब्धिवदीश्वरस्यापि तथा स्यात्किन्नेत्याह, निजेति. ननून्मत्तः किमीश्वरइति तत्राह, करुणइति. कस्यार्थे मानकरणमिति तत्राह, यद्यदिति. कथमिव यथा मुखस्य मुख्यस्य स्वामिनोराज्ञो मानलक्षणा श्रीः प्रतिमुखस्य राजमुखमनुवर्तमानस्य जनपदस्य परोपद्रवराहित्येन धनधान्यादिसमृद्धिलक्षणा श्रीर्भवति तथा हरिविषया क्रियमाणा मानश्रीरनुरक्तजनस्य संसारशृङ्खलान्मोचलक्षणा श्रीर्भवतीत्यर्थः ॥ बलमानन्दश्रोजश्चेत्यादेः ननु, हरेर्जन्मादिमत्त्वेन विशेषमाहात्म्यायोगात् देवदत्तवदतोयुक्तं विप्रादीतरजनपरिगृहीतत्वमिति तत्राह–नैवेति. अयं नृसिंहआत्मनोदेहात्प्रभुः प्रभूतउत्पन्नोनैव किन्तु स्तम्भात् दृष्टत्वादिति शेषः अदेहस्य जननायोगात् जननवतएव विषयसुखानुभवोपपत्तेरतः कथं हरेर्विषयानुभूतिरिति तत्राह निजेति सत्यं परतश्चेत्प्राभिर्नायं तथा निजो लाभो यस्य स तथा स्वतःसिद्धानुभवश्च पूर्णोव्याप्तश्च नहि व्याप्तस्य परिच्छिन्नगर्भवासादिकं युज्यते "प्रादेशमात्रं पुरुषम्" इत्यादौ परिच्छेदप्रतीतेरितिचेत् "तस्यान्ते सुषिरं सूक्ष्मम्"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय—ग्रन्थालय, परतमिति, वाराणसी-६

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इति श्रुतेराकाशवदुपपत्तेरुपाधिकल्पनायामनवस्थादिदोषापत्तेरतः स्वभृत्यभाषितं सत्यं कर्तुं स्वस्य सर्वत्र व्याप्तिं दर्शयितुमितरत्र जातवद्दर्शनमसुरजनमोहार्थमित्यादि ज्ञातव्यं स्वभृत्यभाषितस्य सत्यकरणायेत्येतत्कथमवगतमिति तत्राह—मानमिति. अविदुषः स्वरूपाज्ञानिनोऽस्माज्जनान्मानं वृणीते न केवलमस्माज्जनात्किन्तु सर्वस्मादपि योग्यादित्याशयेनाह—यद्यदिति। शेषं पूर्ववत्. श्वपचोपि भक्तएव वरीयान्नाभक्तस्तस्य द्विषित्वेन दम्भार्थत्वेन विहितपूजाया अस्वीकारादित्यतोवाह, नेति. अयं हरिरविदुषोनित्याज्ञानिनोऽसुरजनादात्मनः स्वस्य मानं लोके दम्भाभिप्रायेण कृतपूजां नैव वृणीते प्रत्युतानर्थं च करोतीत्याह करुण इति "कृ विक्षेपे" इति धातोः असुरजननिरसनशीलत्वादन्धं तमएव प्रापयतीत्यर्थः "परा पूर्वेषाम्" इति श्रुतेः तस्मादसुरजनकृतसपर्यानर्थजननीत्याशयेनाह यद्यदिति आत्मने अनर्थायेति शेषः यथा मुखश्रीः प्रधानभटयोग्यश्रीः प्रतिमुखस्याल्पस्य प्रतिभटस्यानर्थाय मरणलक्षणाय स्यादिति शेषः ॥ ११ ॥

तस्माद्भक्तिरेव प्रयोजिकेत्याह—तस्मादिति। यस्मादचिन्त्यमहिमत्वात्सर्वात्मनेश्वरस्य स्वरूपं स्तोतुं न शक्नोमि तस्माद्विगतविक्लवोनिर्धूतचापल्योहं यथामनीषं भक्त्या गृणामीत्यन्वयः स्तुतेः फलमाह, नीचइति अजया प्रकृत्या नीचगुणविसर्गं संसारमनुप्रविष्टं पुमान्येनानुवर्णितेन गुणसङ्कीर्तनेन पूयेत शुद्धोभवति हि यस्मात्तेन संसारमोक्षोभवतीत्यर्थः ॥ १२ ॥

यथामनीषं गृणामीत्युक्तं विवृणोति—सर्वइति। अमी वयं ब्रह्मादयश्च सर्वे सत्त्वधाम्नस्तव विधिकराहि "विष्णोस्तिष्ठन्ति प्रदिशो विधर्मणि" इति श्रुतेः तत्र विशेषोस्ति यथा वयं उद्विजन्तस्तथा ब्रह्मादयोनैवोद्विजन्तः प्रधानभक्तत्वात्कुतएतद्भयं विज्ञापयतइति तत्राह क्षेमायेति अस्य हरेरुचिरावतारैः विक्रीडितम् अस्य जगतः क्षेमाद्यनेकप्रयोजनाय स्यादिति यदनेनास्मन्निधनेनास्माकमुद्वेगो ब्रह्मादिरक्षणेन तेषामनुद्वेगश्च ज्ञायतइत्यर्थः ॥ १३ ॥

अथैवंकर्तव्यमित्याह—तद्यच्छेति। अद्य त्वया असुरो हतश्च यस्मात्तस्मान्मथ्नाति कलुषीकरोति ज्ञानमिति मन्युः कोपः इतरेषामेवमिवधोहरेस्तु खेदाधरस्फुरणादिविडम्बनलक्षणादिस्तं यच्छ संहर, प्रसन्नभावं दर्शयेत्यर्थः। मन्युश्च त्वद्विषयं ज्ञानं च यच्छानुगृहाणेत्यर्थः "मन अवबोधने" इति धातोरिति वा त्वद्विषयं पूजालक्षणं यज्ञमिति वा "मन्युः कोपे क्रतौ युद्धे" इत्यभिधानम्. सज्जनानन्दाकांक्षापि भगवत्प्रसादकरीत्याशयेनाह मोदेतेति वृश्चिकसर्पलक्षणासुरहननेन साधुः सज्जनोपि मोदेत साधुरपि मोदेतेति वा योगविभागः, वृश्चिकसर्पलक्षणासुरहत्या निर्वृतिमानन्दमिताः प्राप्ताः सर्वे लोकाः प्रतियान्तु स्वगृहमिति शेषः गत्वा किङ्कुर्वन्तीति तत्राह रूपमिति। हे नृसिंह! जनाः तव नृसिंहाकारं रूपं दुरितनिवृत्तिलक्षणाय शिवाय स्मरन्तीत्यन्वयः साधुरहिंसापरोपि वृश्चिकादिहत्या मोदेत किम्पुनः सर्वलोकोपद्रवकृत् असुरहत्यातोवाह मोदेतेति हत्यामिति पाठे साधुः शास्त्रतत्त्वज्ञोदुष्टवृश्चिकादिहत्यां यथा मोदेत तथाहमपि भगवद्द्वेषित्वेन दुष्टत्वात्पितृहत्यां मोदइत्यभिप्रेत्यातोवाह मोदेतेति. नृसिंहेति सम्बोधनं नामकरणाभिप्रायेणेति ज्ञातव्यम् ॥ १४ ॥

पूर्वमज्ञातनामत्वादिति तव कोपाकुलरूपदर्शनाद्भीत्या लोकस्य स्मरणं न सम्भाव्यतइति चेत्तच्छमनं कर्तव्यमित्युक्तं तन्मम ज्ञाततत्त्वस्य विषयो न भवति मम भयं संसारचक्रादित्याह, नाहमिति. भयानकस्य ते तव रूपान्नविभेमीत्यन्वयः कीदृशात् जिह्वे वक्रे अग्नियुक्ते नेत्रे यस्य तत्तथा जिह्वया भ्रुकुट्या रभसौ यस्य तत्तथा उग्रे दंष्ट्रे यस्य तत्तथा जिह्वाग्निनेत्रं च जिह्वा भ्रुकुटी रभसं च उग्रदंष्ट्रं च तत्तथा तस्मादान्त्रमेव स्रक् माला यस्य तत्तथा तस्मात्क्षतजेन रुधिरेण सिक्ताः केसराः यस्य तत्तथा शङ्कुवत्स्थूणवत्स्तब्धौ कर्णौ यस्य तत्तथा क्षतजकेसरं च शङ्कुकर्णं च तत्तथा तस्मात् निर्ह्रादेन भीता दिगिभा दिग्गजा यस्य तत्तथा तस्मात् अरिभिन्दि नखाग्राणि यस्य तत्तथा तस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि नखानामग्राणि दुःसहं चोग्रं च संसारचक्रं च यत्तेन सह कदनात् हिंसालक्षणाद्युद्धादुरुत्तम सत्यकाम, भीतानां अपवर्गं भीतिजनकसंसारनाशनमरणं शरणं समियां यामि ॥ १५—१६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्मादेवं दृष्टत्वादेवं निर्णय इत्याह—मन्य इति। चरणत्रयेण धनादयस्तत्तच्छास्त्राभ्यासफलरूपास्तेपि नाराधनाय न परितोषाय। तर्हि केन तोषः स्यादित्यपेक्षायां दृष्टान्तद्वारैव तद्दर्शयति, भक्त्येति। ब्रह्मादिषु ब्रह्मादिकतिपयानां भक्तत्वेपि तेन तेन तु तेषामपि स परितुष्टो न भवतीति विवक्षयोक्तम् ॥ ९ ॥

ननु, भक्तिव्यतिरिक्ता अपि केचित्ते वरिष्ठतयोद्घुष्यन्ते तत्रासहमान आह, विप्रादिति ॥ १० ॥

भक्तास्तु श्रीभगवतोपि स्वत एव परमाभीष्टरूपाः भक्तिरेवच भक्तानां सुखरूपेति भक्त्या सुतोषत्येवोत्कर्षयन् स्वकर्तव्यत्वेन तामेव निगमयितुमाह—नैवात्मन इति। अयं प्रभुरात्मनो मानं पूजां जनात् निजभक्तात् न वृणीते नेच्छति। तत्र हेतुः। निजस्य भक्तस्य लाभेनैव पूर्णः परमसन्तुष्टः। हेत्वन्तरं करुणः पूजार्थतत्प्रयासादावसहिष्णुः कथंभूतात् जनात् अविदुषः। पितुरग्रे बालकवत्तस्याग्रे न किञ्चिदपि जानतः एषा स्वस्य जनैकवर्गत्वेन दैन्योक्तिः। यद्वा तदावेशेनान्यत् किञ्चिदपि न जानत इत्यर्थः। उभयत्र पक्षेऽपि तस्य तस्य कारुण्यं हेतुरिति भावः। तर्हि किं जनस्तस्य मानं न कुरुत एवेत्याशङ्क्याह—यदिति। सच जनोयत् यं यं मानं भगवते विदधीत सम्पादयति स सर्वोऽप्यात्मार्थमेव तत्सम्मानमात्रेणैव स्वसम्मानाभिमननात् सुखं मन्यमानस्तन्मानं करोत्येवेत्यर्थः तत्सम्मानमात्रेण स्वसम्मानश्च तदेकजीवनस्य जनस्य युक्त एवेति दृष्टान्तमाह—यथा मुखे या शोभा क्रियते तन्मात्रमेव प्रतिमुखस्य शोभैव भवति नान्यदिति ॥ ११ ॥

निगमयति तस्मादिति ॥ १२ ॥

नन्वेवं ब्रह्माद्याः भक्ता न भवन्ति भवानेव तु भक्त इत्याशङ्क्यासुरकुलजन्मत्वात् दैन्येनात्मानमपि तत्स्वभावत्वेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निर्दिशन् ब्रह्मादीन् प्रसादविषयीकारयितुं व्यतिरेकदृष्टान्तेन तेषां भक्तत्वमेव दृढयति—सर्वे इति । नच नतु वयमिवासुराइवोद्विजन्तः त्वदसमोर्द्ध्ववैभवदर्शनेनोद्वेगमीर्ष्यादिभावं प्राप्नुवन्तो भवन्ति । भवांस्तु सर्वमङ्गलचरित एवेत्याह, क्षेमायेति ॥ १३ ॥

ननु, परमसाधोस्तव हिंसकोयमिति महाप्राणिनोऽप्यस्य मया हननं साधवोऽप्येतत्तत्त्वानभिज्ञा एते ब्रह्ममरीच्यादयो न सहेरन् । अत एवैतेष्वपि प्रसादो न युक्त इत्याशङ्क्याह—मोदेतेति । अहं को वराकः किन्तु वृश्चिकादेरिव सर्वहिंसकस्यास्य हननं साधुजनोऽप्यनुमोदेत किमुतैत इत्यर्थः । किं वक्तव्यं त एव मोदं लब्ध्वा इति । यतो लोकाश्चेति अतो विश्वसुखदत्वात् साध्वेवानुष्ठितमिति । प्रसादस्यावसरोयं नतु मन्योरिति भावः । किञ्च । रूपमिति ॥ १४—१५ ॥

दुस्सहेति तद्बहिर्मुखतामयत्वादिति भावः । तत्रापि त्रस्तां त्वद्भक्तेः सर्वङ्गिलानामसुराणां मध्ये ततो हे उरुक्रम ! ते तवांघ्रिमूलं चरणारविन्दयोः नित्याधिष्ठानं श्रीवैकुण्ठंप्रति कदानुह्वयसे ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नच बहुधन प्रदानादिभिस्त्वं तुष्यसीत्याह–मन्य इति । अभिजनं सत्कुले जन्म ओज इन्द्रियनैपुण्यं तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः योगोऽष्टाङ्गः कर्मयोगो ज्ञानयोगश्च नाराधनाय न सन्तोषणाय तर्हि केनाहं सन्तुष्यामीत्यत आह भक्त्येति तुतोषेति भूतनिर्देशेन नात्र काप्यन्या युक्तिरन्वेष्टव्या किन्तु भवतस्स्वभाव एवायं भक्तेर्वा काप्यद्भुता शक्तिरिति द्योतते । तेन च त्वत्सन्तोषान्यथानुपपत्त्या मय्यपि श्रीनारदकृपाद्भूतो भक्तिगन्धो वर्त्तत इति व्यञ्जितम् ॥ ९ ॥

किमन्यद्वक्तव्यं भक्त्यभावसद्भावाभ्यामेवं विविच्यत इत्याह, भक्तिहीनात् विप्रादपि श्वपचं वरिष्ठं मन्ये किमुत क्षत्रियादिभ्यः तत्रापि द्विषट् पूर्वोक्ताधनादयो द्वादशगुणास्तैर्युक्तात् किमुत सप्ताष्टत्रिचतुरादि गुणयुक्तात् किमुततरां तत्तद्गुणहीनात् तत्रापि वरिष्ठमतिशयेनाधिकमेव सनत्सुजातोक्ता द्वादश वा गुणा द्रष्टव्याः तदुक्तं "ज्ञानञ्च सत्यञ्च दमः श्रुतञ्च ह्यमात्सर्यं ह्रीस्तितिक्षानसूया । यज्ञश्च दानञ्च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य" इति अरविन्देति तेन ज्ञानयोगादि सत्त्वे विप्रो भगवद्बहिर्मुखोनोच्यते इति मतं परास्तं श्वपचं कीदृशं तस्मिन्नरविन्दनाभे अर्पिता मन आदयो येन तम् ईहितं कर्म अर्थोधनं विप्राद्वरिष्ठत्वे हेतुः स श्वपचः कुलं स्वीयं सर्वमेव पुनाति भूरिमानो लोकेप्यादरो यस्य तथाभूतोपि सतु विप्रः आत्मानमपि न पुनाति कुतः कुलमिति भावः । भक्तिहीनस्यैते गुणाः गर्वायैव भवन्ति नतु शुद्धये इति श्रीस्वामिचरणाः ॥ १० ॥

ननु, तर्हि श्रवणकीर्त्तनार्हणादिभिर्मत्सम्माननं हि भक्तिस्तयैव तुष्यामि नतु तपःश्रुतादिभिः पुंनिष्ठैर्गुणैरिति चेन्मम स्वार्थपरत्वं प्रसक्तं तत्र नहि नहीत्याह—नैवेति । अयं प्रभुरीश्वरो भवान् आत्मनः स्वस्य मानं संमाननं जनात् जनमात्रात् न वृणीते कीदृशात् अविदुषः तदपेक्षया ब्रह्मादिस्तंबपर्य्यन्तः सर्व एव जनो ह्यविद्वानेवेत्यर्थः । नहि शास्त्रादिविद्याज्ञानशून्यजनकृतं सम्माननं भव्यः कश्चिद्वृणातीति मानाग्रहणे जननिष्ठोऽज्ञानलक्षणो धर्मोहेतुरुक्तः तत्र त्वन्निष्ठो धर्मोऽपि हेतुरस्तीत्याह निजलाभेन पूर्णः किन्तु करुणः कृपालुः सन् वृणीते च यत् कुतश्चिद्वृणीते इति दृश्यते तत्तमनुग्रहीतुमेवेति मानग्रहणेपि करुणात्वलक्षणस्त्वन्निष्ठो धर्म एवहेतुरस्तीति भावः । न च प्राकृतजनदत्तेन मानेन तव कश्चिदुत्कर्षोभवेदपितु मानप्रदातुरेवेत्याह यद्यत् यं यं मानं पूजां भगवते विदधीत कुर्यात् तत्संमानः आत्मने स्वस्मै स्वोत्कर्षायैव भवेत् यथा मुखश्रीः मुखेकृता तिलकादिशोभा प्रतिमुखस्य प्रतिबिम्बस्य भवेत् नतु प्रतिबिम्बे कृता प्रतिबिम्बस्येत्यर्थः ॥११॥

यस्मादेवं भवान् भक्त्यैव तुष्यति नतु सज्जात्यादिभिः यस्माच्च त्वत्संमाननं खल्वात्मने एव फलति तस्मादहं नीचोपि महि महिमानं गृणामि स्तौमि येन त्वन्महिम्ना अनुवर्णितेन गुणविसर्गं संसारव्याधिमनुप्रविष्टो जनः पूयेत तस्मान्मुच्यते इत्यर्थः ॥ १२ ॥

वयमसुरा एवास्मिन् जगत्यभक्ता मन्दभाग्याः अन्येतु सर्वे तव भक्ता भूरिभागा एवेत्याह सर्वेविधिकरास्त्वन्नियोगकर्तारो दासा एव नच वयमसुरा इव वैरभाववत्त्वादुद्विजन्तः स्वतो भीता अतोऽस्य स्वभक्तरूपस्य विश्वस्य क्षेमाय भूतये संपत्त्यै च उत आत्मनः स्वस्यच सुखार्थं तवेदमसुरवधादिविक्रीडितं भवेत् ॥ १३ ॥

यस्माद्विश्वस्य क्षेमाद्यभूत् तस्मान्मन्युं यच्छ दूरीकुरु ननु परदुःखेन सुखित्वात् कथमस्य विश्वस्य साधुत्वं तत्राह साधुरपि परोद्वेजकवृश्चिकसर्पादीनां हत्या हिंसयाऽन्यकृतया मोदेतेति विधेर्नासाधुत्वमित्यर्थः । प्रतियन्ति तव दुष्टनिग्रहशिष्टपालन कर्तृत्वे प्रतीतिं प्राप्नुवन्ति न चातःपरं तवैतादृशावतारापेक्षापीत्याह हे नृसिंह ! तव रूपमेवेदं विभयाय भयाभावाय स्मरन्ति तवै तद्रूपस्मरणेनैवातःपरं भीतिः असुरा नंक्ष्यन्तीतिभावः ॥ १४ ॥

असुरजातित्वेप्यन्येषामसुराणामिव त्वत्तो न मे भयमित्याह नाहमिति । ते अस्माद्रूपादहं न बिभेमि कीदृशात् अतिभयानकं आस्यं जिह्वा अर्कतुल्यनेत्राणि भ्रुकुट्यारम्भस आटोपः उग्रा दंष्ट्रा च यत्र तस्मात् अन्त्रमय्यः स्रजो यत्र तदान्त्रस्रक् तस्मात् क्षतजाक्ता केसरा यस्मिन् शुंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात् निर्ह्रादेन भीता दिग्गिभा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्मिन् तस्मात् ॥१५॥

किन्तु त्वद्वैमुख्यप्रदाद्दुःसङ्गादिभ्य एव भीतोस्मीत्याह त्रस्तोस्मीति । दुस्सहं यत्त्वन्निन्दा द्वेषादिमयत्वादुग्रं संसारचक्रकदनं तस्मादेव त्रस्तोस्मि नतु साधारणसंसारादिति प्रह्लादः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भिप्रायो व्याख्येयः "नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः" इत्यग्रिमतदुक्तेः यतः ग्रसतां त्वद्भक्तं मां भक्षितुमिवेच्छतामसुराणां मध्ये प्रणीतो निक्षिप्तः ननु त्वं किं मया निक्षिप्तस्तत्र नहि नहीत्याह बद्धः सन् स्वकर्मभिरेव तस्मात् कदानु प्रीतस्सन् अपवर्गभूतं शरणं तवाङ्घ्रिकमलं प्रति ह्वयसे पादसम्वाहनार्थं मामाह्वास्यसि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च धनादिभिरपि भगवान्न तुष्यति किन्तु भक्त्या तुष्यतीत्याह, मन्ये इति । धनादयः परस्याराधनाय न भवन्ति यतस्तद्गहिताय गजयूथपाय भगवान् भक्त्यैव तुतोष अभिजनः सत्कुले उद्भवः रूपं सौन्दर्यम् तपः कृच्छ्रादि श्रुतं शास्त्रश्रवणम् ओजः इन्द्रियापाटवम् तेजः प्रकाशः प्रभावः प्रभुत्वम् बलं देवान्तरोपासनादिजम् पौरुषं कार्यक्षमत्वम् बुद्धिरर्थधारणाशक्तिः किंबहुना भक्तिविरुद्धाः युज्यन्ते इति योगाः सर्वे उपाया इत्यर्थः ॥ ९ ॥

अथ हरिभक्तप्रशंसार्थं तद्बहिर्मुखनिन्दार्थञ्च सर्वेभ्योऽधमस्यापि श्वपचस्य हरिभक्तत्वे सति सर्वश्रेष्ठत्वं सर्वेभ्यः श्रेष्ठस्यापि विप्रस्य हरिविमुखत्वे सति सर्वेभ्योऽधमत्वञ्चाह, विप्रादिति । अरविन्दनाभपादारविन्दविमुखात्तु पूर्वोक्तधनादिद्विषड्गुणयुतात् यद्वा "धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षा ऽनसूया । यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य ॥" इत्युद्योगपर्वणि धृतराष्ट्रं प्रति सनत्सुजातोक्तैर्द्वादशगुणैर्युक्ताद्विप्रादपि तदर्पितमनोवचनेहितार्थं तस्मिन्नरविन्दनाभे अर्पिताः मनआदयो येन तं श्वपचमपि वरिष्ठं मन्ये यतः स उक्तलक्षणः श्वपचः प्राणं प्राणोपलक्षितमात्मानं स्वकुलं पुनाति. न तु भूरिमानः उक्तद्विषड्गुणाभिमानी हरिपादारविन्दविमुखो विप्रः कुलमात्मानं च पुनाति ॥ १० ॥

मनोवचनाद्यर्पणादिना पूजां स्वानन्यभक्तहितायैव भगवान् स्वीकरोति नत्वन्यथेत्याह, निजलाभपूर्णः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति स्वाभाविकेन निजानन्दलाभेनैव पूर्णः अविदुषः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्रुतिप्रोक्तस्वाभिन्नाज्जीवात् स्वानन्योपासकादित्यर्थः । मानं पूजां करुणः कृपालुः आत्मनः सुखार्थं न वृणीते नेच्छति किन्तु यद्यन्मानं पूजां जन उपासको भगवते विदधीत कुर्यात्तत्तत् आत्मने स्वस्यैव स्यात् यथा मुखश्रीः मुखो मुख्यः राजादिः तदर्पिता प्रतिमुखेनाऽऽमात्यादिना श्रीः धनविद्याविनयादिरूपा लक्ष्मीः प्रतिमुखस्यामात्यादेरेव सुखदा भवति तद्वदित्यर्थः । यद्वा आश्रयगतं वस्तु आश्रितेपि गच्छतीति दृष्टान्तेनाह मुखे स्थिता श्रीः प्रतिमुखस्य दर्पणादिस्थस्यापि भवतीत्यर्थः । अनेन दृष्टान्तेन जीवो भगवदंशभूतः स्वरूपतोऽपि स्वायत्तस्थितिप्रवृत्तिमांश्च भवति यदा तदा केन पदार्थेन भगवत उपकारं कुर्यादिति द्योतितम् अनेन दृष्टांतेन ब्रह्मप्रतिबिम्बो जीव इति शङ्का न कार्या व्यापकस्य प्रतिबिंबासम्भवात् न चाकाशस्य जले प्रतिबिंबो दृश्यते इति वाच्यम् आकाशगतस्य परिच्छिन्नस्य मेघादिद्रव्यस्य तथा द्रव्यमानत्वात् विस्तरस्तु अध्यासगिरिवज्रादौ द्रष्टव्यः ॥ ११ ॥

यस्माद्भगवान् भक्त्यैव तुष्यति तस्मात् अहं नीचोऽसुरजोऽपि विगतविक्लवो निःशङ्क ईश्वरस्य महि महिमानं यथामनीषं यथामति सर्वात्मना सम्पूर्णेन मनसा गृणामि वर्णयामि येन महिम्नाऽनुवर्णितेन अजया प्रकृत्या गुणविसर्गं संसारमनुप्रविष्टः पुमान् पूयेत शुद्ध्येत ॥ १२ ॥

ब्रह्मादिषु कृपावलोकनं कुरु मन्युं चोपसंहरेति प्रार्थयते, सर्वे इति द्वाभ्याम् । हे ईश ! सत्त्वधाम्नः प्रकृतिसम्बन्धवर्जितं स्वाभाविकं यत्सत्त्वं गुणविशेषस्तदाश्रयस्येत्यर्थः । अमी ब्रह्मादयः उद्विजन्तः बिभ्यतः, भवदीयगौरवयन्त्रिता इत्यर्थः । न च वयमिवाधुनैव त्वां शरणं गताः किन्तु प्रांचः कृपावलोकार्हा इति फलितोऽर्थः किंच तव रुचिरैरवतारैः विविधं क्रीडितं अस्याधिकारिजनस्य क्षेमाय रक्षणाय भूतये ऐश्वर्याय आत्मसुखाय मोक्षाय च न तु भयोत्पादनाय ॥ १३ ॥

तत्तस्मात् हे नृसिंह ! मन्युं नियच्छोपसंहर यदर्थोऽयं मन्युः सोऽसुरस्त्वया अद्य हतः यथा वृश्चिकसर्पहत्या परोद्वेजकस्य वृश्चिकस्य सर्पस्य च वधेन साधुरहिंसकोऽपि जनो मोदेत एकवधेन बहूनां भयनिवृत्तेः तथा असुरवधेन लोका निर्वृतिं सुखमिताः प्राप्ताः सन्तः प्रतियन्ति भवत्प्रसादं प्रतीक्षन्ते जना मुमुक्षवः तवैतद्रूपं अभवाय मोक्षाय स्मरन्ति ॥ १४ ॥

किंत्वमस्मद्रूपाद्बिभेषि ? नेत्याह—नाहमिति । हे अजित ! अतिभयानकमास्यं च जिह्वा च अर्कवन्नेत्रे च भ्रुकुटीरभसश्च उग्रा दंष्ट्राश्च यस्मिन् तस्मात् आंत्रमय्यः स्रजो यस्मिन् क्षतजा रुधिराक्ताः केसराः शङ्कुवदुन्नतौ कर्णौ च यस्मिन्निर्हादेन भीता दिगिभा यस्मात् अरीन् भिदन्तीति अरिभिदीनि नखाग्राणि यस्मिन् तस्मात्ते रूपादहं न बिभेमि रूपादित्यध्याहारः ॥ १५ ॥

तर्हिकुतस्तवभयमित्यत्राह, हे कृपणवत्सल ! दुःसहमुग्रं यत्संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोस्मि ग्रसतां आत्मपरमात्मस्मृतिघ्नानामिन्द्रियाणां अन्योन्यघातिनां बद्धजीवानां वा मध्ये स्वकर्मभिर्बद्धः "बन्धको भवपाशेन भवपाशाच्च मोचकः" इति स्मृतेर्भवतैव प्रणीतो निक्षिप्तो ऽस्मि हे उत्तम ! अपवर्गशरणं मोक्षाश्रयं ते ऽङ्घ्रिमूलंप्रति प्रीतः सन्मां कदा ह्वयसे आह्वास्यसि ॥ १६ ॥

भाषा टीका ।

परञ्च मैं जानताहूं कि-धन अच्छे कुलमें जन्म रूप तप पाण्डित्य और तेज प्रभाव बल पौरुष बुद्धि इत्यादि सब भी परम पुरुष श्रीगोविन्द की प्रसन्नता के हेतु नहीं हो सके हैं क्योंकि गजेन्द्र के ऊपर भगवान् केवल भक्ति मात्र से प्रसन्न हुए ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्मात्प्रियाप्रियवियोगसयोगजन्मशोकाऽग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाऽहं भूमन् ! भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥
सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह ! विरिञ्चिगीताः ।
अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः ॥ १८ ॥
बालस्य नेह शरणं पितरौ नृसिंह ! नार्तस्य चागदमुदन्वति मज्जतो नौः ।
तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद्विभो ! तनुभृतां त्वदुपेक्षितानाम् ॥ १९ ॥
यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ।
भावः करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ॥ २० ॥

भाषा टीका ।

पद्मनाभ श्रीहरि के पादारविन्द से विमुख द्वादश गुण विशिष्ट ब्राह्मण से मैं श्वपच (चांडाल) को श्रेष्ठ मानता हूं वह चांडाल कैसा हो कि श्रीहरि में अर्पण किया है मन वाणी चेष्टा अर्थ (द्रव्यादि) प्राण पर्यन्त जिसने, वह चांडाल कुल को पवित्र करता है, और अभक्त, गर्व वाला ब्राह्मण अपने आत्मा को भी पवित्र नहीं कर सक्ता है ॥ १० ॥

और हमारे प्रभु श्रीहरि तौ निज लाभसो पूर्ण हैं दयालु हैं अत एव अज्ञजन से मान की इच्छा नहीं करते परंच यह जन जो कुछ श्रीहरिके अर्थ मान (पूजोपहारादि) करता है वह अपने ही लिये होता है जैसे साक्षात् मुख का अलंकार प्रतिबिंब में होता है ॥ ११ ॥

तस्मात् सर्व प्रकार से विगत शंका वाला मैं भी यथा मति ईश्वर के महिमा को वर्णन करता हूं यद्यपि मैं माया के गुणों से रचित संसार में प्रविष्ट और नीच असुर जाति हूं तौभी गुण वर्णन से पवित्र हो जाऊंगा क्योंकि ? जिसके गुण वर्णन करने से पुरुष पवित्र होजाता है ॥ १२ ॥

हे ईश ! ये सब ब्रह्मादिक सत्त्व धाम आप के किङ्कर हैं. और सब आप से डरते हैं, और हमारे असुर लोगों के सदृश वैर भाव से भक्त नहीं किंतु श्रद्धापूर्वक हैं, और आपके रुचिरावतार धारण करके जो विक्रीडित है वह इस जगत के क्षेम और वृद्धि के अर्थ हैं तथा आत्म सुख के लिये भी हैं ॥ १३ ॥

तस्मात् कोप को शांत कीजियें और इस असुर को आपने अच्छा मारा क्योंकि साधु जन भी वृश्चिक (बिच्छु) सर्प की हिंसा से सुख ही पाते हैं और संपूर्ण लोक भी सुखित होकर आप के क्रोध शांति की प्रतीक्षा कर रहे हैं हे नृसिंह ! और आप के इस रूप को मनुष्य भय निवृत्ति के लिये स्मरण करते हैं ॥ १४ ॥

हे अजित ! अत्यंत भयानक मुख, जिह्वा, और सूर्य सदृश नेत्र, और भृकुटियों का आटोप और उग्रडाढे जिसमें, और आंतों की माला, रुधिर की केसर, शंकु सदृश खड़ कर्ण जिसमें, शब्द से डरे है दिग्गज जिसके, वैरी को भेदन करने वाले नखाग्र हैं जिसमें ऐसे आप के इस रूप से मैं नही डरता हूं ॥ १५ ॥

किन्तु हे कृपावत्सल ! इस संसार के दुसह दुःख से मैं बडा दुःखी हूं क्योंकि ? अपने कर्मों के बंधन में बँधा हुआ मैं इन हिंसक जीवो में पडा हूं अत एव संसार के दुःखों से डरता हूं हे अति कमनीय ! मेरे ऊपर प्रसन्न हो मोक्ष के गृह रूप आप के चरणारविन्दों में कब बुलाओ गे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दास्ये सति मत्प्रीतिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्त्वमेव तदुपदिशेति प्रार्थयते, यस्मात्प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्यइति चेत्तत्राऽऽह दुःखस्यौषधं प्रतीकारस्तदपि दुःखमेव एवमप्यतद्धिया देहाद्यभिमानेन मुह्यामि अतो हे भूमन्विभो ! मे तव दास्यरूपं योगं निस्तारोपायं वद ॥ १७ ॥

ननु, दास्ययोगेन प्रवृत्तस्यापि तदन्तरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारस्तत्राह—सोऽहं त्वद्दासः सन् भो नृसिंह ! तव लीलाकथा अनुगृणन्दुर्गाणि महादुःखान्यञ्जसा तितर्मि तरामि नगणयिष्यामीत्यर्थः । तत्र हेतुः गुणै रागादिभिर्विशेषेण प्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां तएव हंसाः ज्ञानिनस्तैः सङ्गो यस्य मम सोऽहम् कथंभूतस्य कथास्तत्राऽऽह प्रियस्येत्यादि कुतो ज्ञाताः विरिञ्चेन गीतास्तत्सम्प्रदायप्रवृत्ताः तथाचाथर्वणी श्रुतिः“देवाह वै प्रजापतिमब्रुवन्” इत्यादि दास्ये प्रवृत्तस्य भवदनुग्रहेण सत्सङ्गस्ततोवीतरागतया भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु,दुःखैस्तप्तस्यैतत्प्रतीकारो लोके प्रसिद्ध एव किं मद्दास्यादिना, तत्राऽऽह–बालस्येति । भो नृसिंह ! तप्तस्य तत्प्रतिविधिर्दुःखप्रतीकार इह लोके योऽञ्जसेष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव नत्वात्यान्तिकः तदेवाऽऽह बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् कचिदन्धीगर्तादिषु ताभ्यामेव तद्वधदर्शनाच्च, न चार्तस्य रोगिणोऽगदमौषधं शरणम् कृतेप्यौषधे मृत्युदर्शनात् न चोदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात् अतस्त्वमेव शरणमित्यर्थः । अथवैवं काक्वा व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षितानां किमञ्जसेष्टोऽपितु नेष्टएव यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमञ्जसा नैवाञ्जसेत्यादि योज्यम् बालस्येत्यादि पूर्ववदेव ॥ १९ ॥

ननु, कचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपि दृश्यतएवेत्याशङ्क्य तत्रापि तत्तद्रूपेण त्वमेव रक्षक इत्युररीकृत्य तस्यैव सर्वात्मतामाह–यस्मिन्निति । अपरोऽर्वाचीनः पित्रादिः परो ब्रह्मादिर्वा भावः कर्ता तत्तत्कारकैर्यद्यत्करोति तत्सर्वं भवतएव स्वरूपं नतु पृथक् यस्मिन्नधिकरणे यतोनिमित्तात् यर्हि यस्मिन्काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादपादानाद्यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्तेत्येवं सप्तविभक्त्यर्थाः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थः पृथक्स्वभावः सत्त्वादिप्रकृतिः करोत्युत्पादयति विकरोति रूपान्तरं नयतीति ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, भयंचेत्तद्दुःखदर्शनजं किन्तत्संसारचक्रे दुःखमित्यपेक्षायां तद्दर्शयन्नात्मानं विशिनष्टि—तस्मादित्यर्द्धेन । येन कर्मणाऽहं बद्धः तस्मात्कर्मणो निमित्तात्प्रियैरप्रियैश्चाविषयैर्यथासंख्यं वियोगसंयोगौ ताभ्यां जन्म उत्पत्तिर्यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोतीव दुःखितोऽहमित्यर्थः भ्रमामीत्यन्वयः तर्हि दुःखनिमित्तकर्मनिवृत्त्युपायमनुतिष्ठेत्यपेक्षायामन्तरेण भवद्दास्यमन्यन्निःशेषदुःखनिवृत्त्युपायभूतं नास्त्यैव कथंचित्सदपि दुःखात्मकमेवेत्याह दुःखौषधमिति यद्दुःखस्यौषधं प्रतीकारात्मकं तदपि दुःखं दुःखात्मकमित्यर्थः दुःखस्य प्रतीकारो हि दुःखनिमित्तदुरितनिरसनेन भवति निःशेषदुरितनिवर्त्तकंच न किञ्चिदन्यदस्ति प्रतिपदोक्तप्रायश्चित्तादिकं न विशेषदुरितनिवर्त्तकं प्रत्युत दुःखात्मकं चेत्यर्थः अतो हे भूमन् अतद्धिताय तज्जनाहिताय न भवति अतद्धियाहमिति पाठे अहं देहात्माभिमानेन भ्रमामि अतस्तव दास्ययोगं दिश तव नित्यदास्यसम्बन्धं देहि वदेति पाठे उपदिश नित्यप्रवुद्धत्वद्दास्यसम्बन्धवान्यथा भवेयं तथा मामनुगृहाणेत्यर्थः ॥ १७ ॥

एवं कोपोपशमः प्रार्थितः भगवद्दास्यमेव दुःखौषधमिति चोक्तम् "पूयेत येन हि पुमाननुवर्णितेन" इति भगवद्वर्णनामात्मविशुद्धिफलकमित्युक्तम् अथ त्वदनुग्रहेण प्रवुद्धनित्यभवद्दास्यसम्बन्धोऽहं यथामति त्वां स्तुवन् दुःखनिमित्तकर्मभिर्विमुक्तः सर्वाणि दुःखानि यथा तरेयं तथा अनुगृहाणेत्याह—सोहमिति । सोहं त्वदनुग्रहेण प्रवुद्धनित्यभवद्दास्यसंवन्धोहं सुहृदो हितैषिणः प्रियस्य मम निरतिशयप्रीतिविषयस्य परदेवतायास्तव ब्रह्मादिभिर्गीताः लीलारूपव्यापारविषयाः कथाः अनुगृणन् गुणविप्रयुक्तः सत्त्वादिगुणमूलककर्मबन्धैः रागादिभिर्वा विमुक्तः ते तव पदयुगलमेवालयमाश्रयो येषां ते भक्तास्तएव हंसाः परिशुद्धा जनास्तैः सङ्गो यस्य तादृशः अञ्जस्तितर्मि सुखेन तितर्मि अतितरामि तथानुगृहाणेत्यभिप्रायः अत्रायं क्रमः तावत्त्वदनुग्रहेण सत्सङ्गस्ततोभगवद्गुणवर्णनं ततोविरागः तस्त्वद्भक्त्या दुःखनिमित्तकर्मक्षयद्वारा संसृतेस्तरणमिति ॥ १८ ॥

एतत्सर्वं त्वदनुग्रहेणैव भाव्यम् नतूपायांतरेणेति कैमुत्यन्यायेन वक्तुं तावत्त्वदुपेक्षितानां न दुःखप्रतिक्रियास्तीत्याह–बालस्येति ! हे नृसिंह ! इह लोके बालस्य त्वदुपेक्षितस्य पितरौ मातापितरौ न शरणं न रक्षकौ एवमार्त्तस्य रोगपीडितस्य त्वदुपेक्षितस्यागदमौषधं न शरणं तथोदन्वति समुद्रे मज्जनस्त्वदुपेक्षितस्य नौर्न शरणं पित्रादिषु सत्स्वपि बालादीनां विनाशदर्शनादिति भावः । अतो हे विभो नृसिंह ! इह लोके तप्तस्य दुःखितस्य तत्प्रतिविधिस्तापप्रतीकारोपायः तावत्प्रसिद्धः स त्वदुपेक्षितानां त्वामनाश्रितानां तनुभृतां शरीरमेव पोषणपराणां किमञ्जसेष्टः अपितु नेष्ट एव बालादिदुःखोपशमने एव पित्रादयो न प्रभवः किंपुनर्निःशेषदुःखोपशमने न प्रभवइत्यतस्त्वदनुग्रहेणैव निःशेषं दुःखात्मकसंसृतिनिवृत्तिरिति संसृतिचक्रादुत्तारकस्त्वमेवेति भावः ॥ १९ ॥

यतस्त्वमेवंभूतोऽतः संसृतिचक्रपतितं त्वत्प्रपन्नं मामुत्तारयेति विज्ञापयिष्यन् त्वत्प्रपत्तिमन्तरेण न कोप्यात्मानं तारयितुं प्रभुरिति वक्तुंतावदाचार्यादिमुखेन कारितमपि त्वच्छरणवरणं त्वत्कारितमेव यतस्तत्तत्क्रियाश्रयकर्त्रादिकारकषट्कसम्बन्धिशरीरकत्वेन च कालशरीकत्वेन च त्वमेवावस्थित इत्याह—यस्मिन्निति । यस्मिन्नित्यधिकरणकारकनिर्देशः यत इति हेतुत्वशक्त्याश्रयं निर्दिश्यते यर्हीत्यनेन कालः येनेति करणत्वशक्त्याश्रयं यस्येति सम्बन्धी यस्मादित्यपादानत्वशक्त्याश्रयं यस्मै इति संप्रदानत्वशक्त्याश्रयं यथेत्यनेनोक्ताधिकरणादितः प्रकारः यदिति कर्मत्वशक्त्याश्रयं उतापिच य इत्यनेन प्रयोजककर्त्ता सञ्चोदिति इत्यनेन प्रयोज्यकर्त्ता तावेवापरः परश्च यद्वा पर उत्कृष्टः अपरोऽधमः भावः पदार्थः सप्रकारकारकषट्करूपः सम्बन्धिरूपः कालरूपश्च यो यः पदार्थः पृथक्स्वभावप्रविभक्तः स्वभावो यस्य सः पृथक्स्वभावः कर्तृकर्मद्वारा तन्निष्ठक्रियाश्रयत्वमधिकरणत्वद्रव्यगुणक्रियान्वितमनिरूपितत्वैतत्कारणत्वे च सति सव्यापारनिर्व्यारनिष्ठत्वं हेतुत्वं धातूपात्तव्यापारजन्यफलाव्यवहितपूर्वव्यापाराश्रयत्वं करणत्वं सम्बन्धसामान्याश्रयत्वं सम्बन्धित्वम् प्रकृतधातूपात्तव्यापारानाविष्टत्वे सति तज्जन्यविभागाश्रयत्वमपादानत्वं दानस्य कर्मणा क्रियया वा सम्बध्यमानत्वं सम्प्रदानत्वं धातूपात्तव्यापारव्यधिकरणतज्जन्यफलाश्रयत्वं कर्तृत्वं प्रकृतधातूपात्तव्यापारानुकूलव्यापाराश्रयत्वं प्रयोजककर्त्वं धातूपात्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यापाराश्रयत्वं कर्तृत्वमित्येवं सप्तविभक्त्यर्थानां प्रविक्तस्वभावः कालस्यत्वात्मव्यतिरिक्तपरिच्छेदकत्वं स्वभावः एवं पृथक्स्वभावः उच्चावचं रूपः करोति उत्पादयति विकरोति विनाशयति उत्पादनाश्रयो विनाशनाश्रयोवा भवति तदखिलं कारकषट्कादिरूपं वस्तु भवतः स्वाभाविकं रूपं शरीरमित्यर्थः एवञ्च सर्वभावान्तरात्मतया तच्छरीरकतयावस्थितस्य तवैव सर्वे निग्रहानुग्रहादयः सद्वारकव्यापारा इतिभावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादियोनौ सुखसम्भवात्तस्मात्संसारचक्रात्कथं बिभेषीति तत्राह—यस्मादिति । देवादिसकलयोनिषु प्रियस्य वियोगोऽप्रियस्य संयोगः तयोर्जन्म यस्य स तथा स च शोकाग्निस्तेन प्रियादिवियोगादिना जन्मना च यः शोकाग्निस्तेन वा दह्यमानोहं यत् दुःखपरिहारलक्षणं कर्म तदपि दुःखरूपमिति मत्वा अतद्धिया नतद्धीरतद्धीस्तया दुःखपरिहारौषधाज्ञानेन भ्रमामि कुत्रगतेन केनौषधेन वा मे सुखं स्यादित्यनवस्थितिं प्राप्तोस्मीति यस्मात्तस्मादिदमेव संसारनाशनमिति मत्वा भवन्तं प्रार्थये किं तदाह वदेति तव दास्यलक्षणं योगमौषधं वदानुगृहाणेत्यन्वयः ॥ १७ ॥

मदुपासनाद्युपायमन्तरेण दास्यमात्रेण तव किं स्यादित्याशङ्क्य बहुप्रयत्नसाध्यामुपासनामन्तरेणोपायोक्तीत्याह । सोहमिति । गुणमयसंसाराद्विप्रमुक्तः पादयुगलमेवालयमाश्रयोयेषां ते तथा ते च हंसाः निस्सङ्गाः परमहंसास्तेषां सङ्गः सेवालक्षणो यस्य स तथा दुर्गाणि कलत्रादीनि नरकाणि वा ॥ १८ ॥

नृसिंह आर्तस्येत्यनेन सन्ध्यकरणेन दृष्टान्तदार्ष्टान्तिकयोर्महद्वैलक्षण्यमस्तीति ज्ञापनायाज्ञानजनदुःखवताराय चेति ज्ञातव्यं निदाघतप्तस्य जलादिना तर्पणानिधिराप्यायनलक्षणपरिहारः ज्वराद्यभिभूतस्य ज्वरादिपरिहारप्रकारोयत् इष्टः इष्टसाधनञ्च ॥ १९ ॥

ब्रह्माद्यन्यतमइष्टः किं न स्यादित्याशङ्क्य कर्तृत्वाद्यभिमतस्य ब्रह्मादेः सत्तायामपि यदा यदधीनत्वं प्रमाणिकं तदा सर्वस्माद्धरेरिष्टत्वं किं वक्तव्यमितिभावेनाह—यस्मिन्निति । अपरः कालादिर्यः परो ब्रह्मादिर्वा यस्मिन्नधिष्ठाने स्थित्वा यतोमृदादेर्यर्हि यस्मिन्काले येन चक्रसलिलादिना यस्यादृष्टादेः सहायेन यस्मै जलाहरणाद्यर्थं यथाविधिना । यं भावं घटादिपदार्थं करोति विकरोति सामान्यतोविशेषतोवा कीदृशः पृथक् स्वभावः कार्याद्भिन्नस्वरूपः स्वश्चोदितस्त्वादृशेन पुरुषेण प्रेरितः तदखिलं कार्यकारणलक्षणं सर्वं भवतः स्वरूपञ्च त्वदधीनसत्तात्मकमित्यन्वयः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैवच । विष्ण्वधीनं यतः सर्वं सर्वरूपस्ततुच्यते" इति वचनात्भेदोनेति बोद्धव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, यावदाह्वयामि तावत पैतृकं राज्यसुखमनुभवेति चेदुःखमेव तत् तावच्च प्रार्थनीयस्त्वेष एवेत्याह—यस्मादिति दास्यं दासस्य कर्म तच्च श्रीभगवत्प्रतिमापरिचर्या तदेव योगस्त्वत्संयोगरूपस्त्वम् ॥ १७ ॥

तत्तदुपद्रवहानिस्तु तत्र स्वतस्सिद्धप्रकारान्तरेण भवत् स्फूर्तिविशेषादेव स्यादित्याह—सोहमिति ॥ १८ ॥

नान्यत इत्याह—बालस्येति । तर्हि कथं शास्त्रान्तरे तत्तत् प्रतीकार इष्यते तत्राह—तप्तस्येति च त्वदनुपेक्षितानां सञ्जातत्वद्विषयोपेक्षाणां त्वद्बहिर्मुखानामित्यर्थः । तेषामर्थे साक्षादुपदेशेन यः प्रतिविधिः तत्रतत्रेष्टः स तावदेव आपातधैर्यार्थमेवेत्यर्थः । तेषामतस्तत्रापि सर्वभक्ताश्रयपरमशक्तिना तवैव रक्षणमितिभावः ॥ १९ ॥

तस्य तादृशत्वमेव दर्शयति—यस्मिन्निति । टीकायां योऽपरोऽर्वाचीन इति यद्यत् कारकैरिति च पाठोऽवगन्तव्यः । स्वरूपमिति स्वोपादान कार्यभूतमित्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, मद्भक्तिलेशया किं करिष्यसि पैतृकं त्रिजगदैश्वर्यसुखं तावद्भुंक्ष्वेत्यत आह । यस्मात् प्रियैरप्रियैश्च यथा संख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिष्विति राजदेहेपि तादृशशोकाग्निदाहस्य नासद्भाव इतिभावः ननु शोकाग्नेः प्रतीकारा अपि बहवो वर्तन्त इत्यत आह दुःखस्यौषधं प्रतीकारास्तदपि दुःखमेव तदपि अतद्धिया अदुःखबुद्ध्यैव सूकरादियोनावप्यहं सुखीति बुद्ध्यैव भ्रमामि अतस्तव दास्यस्य योगमुपायं वद केनोपायेन तव दास्यं प्राप्नुयाम् तत्त्वमेवोपदिश त्वद्दास्यवत्त्वे सति नानायोनिगतस्यापि न मे किमपि दुःखमिति भावः ॥ १७ ॥

ननु मद्दास्ये वर्तमानेपि त्वया प्रस्तुत संसारिकदुःखस्यौषधमन्यदप्यन्वेष्टव्यमेवेति तत्र साटोपं स प्रगल्भास्फोटश्चाह सोहं त्वदनन्यभक्तः श्रीनारदभृत्यत्वेन प्रसिद्धः प्रह्लादोहम् अन्य इव न ज्ञानकर्मादिकं स्वप्नेप्यङ्गीकरोतीति भावः । तव लीलाकथागृणन् कीर्तयन्नेव गुणान् कीर्तयन्नेव गुणविप्रमुक्तो गुणातीत इति यद्यहं गुणातीतोऽभवं तदा मे कुतः प्रस्तुतदुःखं दुःखौषधं चेति भावः । ननु गुणातीतस्य भक्तस्यापि दुःखानि दृश्यन्ते तत्राह दुर्गाणि त्वद्विरहसन्तापान् अञ्जः शीघ्रं तितर्मि अतिशयेन तरामीति त्वत्साक्षात्सेवाप्राप्तावपि त्वत्कीर्तनप्रसादान्मे नाति विलम्बो भावीति भावः त्वत्पदयुगस्य कमलत्वात् तदालयैर्हंसैस्त्वत्पार्षदैर्मां नेतुमागच्छद्भिः सहसंगो यस्य सः विरञ्चगीतादिति कथानां प्रामाण्यं नच त्वत्कथाकीर्तने केषामपि श्रम इत्याह सुहृदः सखा भक्तानां सख्युः परदेवतायाः दास्यभक्तानां मद्विधानां प्रभो ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणाऽनुमतेन पुंसः।
छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज ! कोऽतितरेत्त्वदन्यः॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

नच दुःखस्य प्रतीकारा अपि त्वां विनाफलन्तीत्याह—बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिदजीगर्तादिषु तद्वधदर्शनाश्च नचार्त्तस्य रोगिणः अगममौषधं शरणं कृतेप्यौषधे मृत्युदर्शनात् न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तयासहैव मज्जनदर्शनात् अतस्तप्तस्य दुःखिनस्तत्प्रतिविधिर्दुःखप्रतीकारो य इह दृष्टः स त्वदुपेक्षितानां त्वदिच्छाया अविषयीभूतानां जनानां नेति पूर्वेणान्वयः तावदिति वाक्यालङ्कारे॥ १९॥

केषाञ्चित् यः पित्रादिको रक्षको दृश्यते सोऽपि त्वद्रूप एवेत्याह-यस्मिन्निति। अपरोऽर्वाचीनजनः परः प्राचीनो ब्रह्मादिर्वाभावः कर्त्ता कारकैर्यत् यत् करोति तत् सर्वं भवतो मायाशक्तियुक्तस्य स्वरूपं स्वीयं रूपमित्यर्थः। यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यः कर्त्तेत्येवं सप्तविभक्त्यर्थः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थः त्वत्तो निर्गुणात् पृथक्स्वभावः सत्वादि प्रकृतिः करोति उत्पादयति विकरोति रूपान्तरं नयति॥ २०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चरणप्राप्त्युपायः भगवत्प्रसाद एवेति प्रीत इत्यनेनोक्तमथ त्वत्प्रसादकारणं त्वद्दास्यमेव तत्त्वमेवोपदिशेति प्रार्थयते—यस्मादिति। यस्मात् तद्ब्रह्म न तदतत्संसारस्तद्धिया संसाराभिनिवेशेन प्रियाप्रियाभ्यां वियोगसंयोगौ वियोसंयोगौ च जन्म च तैर्यः शोकाग्निस्तेन सकलयोनिषु दह्यमानः तातप्यमानो भ्रमाम अस्य दुःखस्य त्वद्दास्यव्यतिरिक्तं यदौषधं तदपि दुःखमेव अतो हे भूमन् तव दास्ययोगं सर्वदुःखघ्नं मे मह्यं वद॥ १७॥

हे नृसिंह ! सोहं भवद्दासस्सन् ते पादपद्मयुगे आलयो निष्ठा येषां परमहंसानां सारग्राहिणां भागवतानां संगो यस्य सः अत एव गुणैः रागादिभिः विशेषेण प्रमुक्तः तव लीलाकथाः अनुगृणन् दुर्गाणि अङ्गः अनायासेन तितर्मि तरामि॥ १८॥

हे नृसिंह ! हे विभो ! तावत्त्वदुपेक्षितानां त्वत्तोऽप्राप्तत्वद्दयानां मध्ये इह संसारे बालस्य शरणं दुःखहरं पितरौ न आर्त्तस्य रोगार्दितस्यागदमौषधं शरणं न उदन्वति समुद्रे मज्जतो नौः न तप्तस्य च यस्तत्प्रतिविधिरिहाङ्गसेष्टस्तच्छरणं न किन्तु त्वमेव सर्वेषां शरणमिति भावः॥ १९॥

"सर्वं खल्विदं ब्रह्म, तत्त्वमसि" "क्षेत्रज्ञं चापि मां विद्धि" "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति श्रुतिस्मृतिसूत्रसाधितं स्वात्मनः त्वदात्मकत्वानुसन्धानं विना संसारचक्रं कोऽतितरेदित्याह—यस्मिन्निति द्वाभ्याम्। यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यश्च स्वयंकर्त्ता यथा येन प्रकारेण पृथक् स्वभावः करोति उत्पादयति विकरोति रूपान्तरं नयति भावः अन्योप्यनुक्तः पदार्थः अपरः प्राकृतः परोऽप्राकृतः तदखिलं भवतः स्वरूपं भवदात्मकमित्यर्थः "एतदात्म्यमिदं सर्वम्" इति श्रुतेः॥ २०॥

भाषा टीका।

हेभूमन् ! इसप्रिय अप्रिय पदार्थों के संयोग वियोग से उत्पन्न हुआ जो अग्नि तिस्से सर्व योनियों में जलता हुआ दुःख की शान्ती के लिये जो औषध करताहूं वहभी दुःख रूपही है परञ्च उससमय मेरी उसमे दुःख की बुद्धि नहीं रहती है इस तरह से इस संसार में भटक रहाहूं इसलिये अब आप अपना दास्य कैंकर्य रूप सिद्ध महौषधि बताइये कि जिस्से फिर न भटकूं॥ १७॥

हे नृसिंह देव ! अब मैं परमप्रिय और सुहृद तथा परात्पर देव जो आप तिनकी ब्रह्मादिकों की गाई हुई जो आपकी कथा ये तिनको गाताहुआ विन प्रयास गुणों से छूटकर दुःखों को तर जाऊंगा केवल इतना अपेक्षित है कि आपके चरण कमल घर हैं जिनके एसे हंसो का सङ्ग मुझे हो॥ १८॥

हे विभो ! हे नृसिंह ! आपने जिनोंकी उपेक्षा की है उन पुरुषों का कोई रक्षक नहीं, जैसे कि, इस संसारमें आपकी उपेक्षा होने से बालक के माता पिता रक्षक नहीं हो सक्ते रोगी की औषध अच्छानहीं करसक्ती, समुद्रमें डूबते हुओ को नौका नहीं बचासक्ती इसी प्रकारी तप्तकी शान्तिके लिये जो कुछ कहा उससे उस्की शान्ति नहीं हो सक्ती जबतक आपकी कृपा नहीं॥ १९॥

ब्रह्मा से लेकर अपने पिता पितामह प्रभृति जो हुए हैं करते हैं विकार को प्राप्त होते हैं जिस अधिकरण में जिसकाल में जिस कारण से जिसके लिये जिस हेतु से जैसे जो कुछ कार्य जाता है वह सब आपकाही स्वरूप है॥२०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अतोऽन्यस्य रक्षकस्याभावादसंसारित्वाच्च नित्यमुक्तस्त्वमेव मां शरणागतं रक्षेति प्रार्थयते—मायेति द्वाभ्यां। त्वदंशस्य पुंसोऽनुमतेनेक्षणरूपेणानुग्रहेण मनो मनः प्रधानं लिङ्गं माया सृजति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स त्वं निहत्य विजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्य विसर्गशक्तिः।
चक्रे विसृष्टमजयेश्वर ! षोडशारे निष्पीड्यमानमुपकर्ष विभो ! प्रपन्नम् ॥ २२ ॥

दृष्टा मया दिवि विभो ऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयम्।
येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३ ॥

तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्चात्।
नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोऽपनय मां निजभृत्यपार्श्वम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कथंभूता कालेन चोदिताः क्षोभिता गुणा यस्याः कथम्भूतं मनः कर्ममयं कुर्वद्रूपम् बलीयो दुर्जयम् छंदोमयं वेदोक्तकर्मप्रधानञ्च अजया जीवस्याविद्यया तद्भोगार्थमर्पिताः षोडश अरा विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनस्तत् कोऽतितरेत्,भो अज ! त्वदन्यः त्वत्तः पृथक् स्थितः त्वामभजन्नित्यर्थः ॥ २१ ॥

ननु,ममापि मायासम्बन्धात्कर्तृत्वाद्यविशेषाच्च त्वत्तः कोविशेष इत्याह–स इति। स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनोबुद्धेर्गुणा येन स हि त्वम् यतः कालो मायाप्रेरकः अतएव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साधनानाञ्च शक्तयो येन अत इक्षुदण्डवन्निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय ॥ २२ ॥

ननु, लोकपालानां भोगान्भुंक्ष्व पित्र्यं वा राज्यमिदं दास्यामि किमिति संसारादुद्विजसे तत्राह–दृष्टा इति त्रिभिः। श्रियः सम्पदः विभव उद्भवः आयुरादयो दृष्टाइति काका तुच्छत्वमुक्तम्. तदेवाऽऽह येऽस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेण विध्वस्ताः सच त्वया निरस्तः ॥ २३ ॥

यस्मादेवं तस्मादाशिषो भोगान् अस्तत्परिपाकं विद्वानहमैन्द्रियमिन्द्रियैर्भोग्यं ब्रह्मणोभोगमभिव्याप्य किमपि नेच्छामि ते कालात्मन उरुविक्रमेण विलुलितान्विध्वस्तानणिमादीनपि ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ त्वत्प्रपदनमन्तरेण कः पुमानतितरेत्संसारचक्रमित्याह—मायामनइति। त्वदन्यः त्वत्समाश्रयणाविमुखः कः पुमान्संसारचक्रमतितरेत्,न कोपीत्यर्थः। संसारचक्रं चक्रवत्परिवर्त्तमानं संसारं चक्रशब्देन तत्र पतितस्य दृढतरावलम्बनमन्तरेण न यथा ततो निष्क्रमणं सम्भवति तथा संसारे पतितस्यालम्बनभूतं श्रीभगवन्तं भवन्तमन्तरेण न तस्मादतितरणं सम्भवतीत्यभिप्रेतम्. संसारं चक्रत्वेन रूपयन् तं विशिनष्टि, यद्यस्मिन्मनसि नाभिरूपे पुंसः परमपुरुषस्य अजया भगवन्मायया हेतुभूतया अर्पिताः षोडश ज्ञानकर्मोभयेन्द्रियव्यापाराः दश प्राणापानादिरूपाः पञ्च प्राणवृत्तयः मनोवृत्तिश्चेति षोडश एत एव अराणि यस्य तत्र तत्तज्ज्ञानकर्मोभयेन्द्रियव्यापाराणां मनोव्यापारानुविद्धत्वस्वाभाव्यात् तद्व्यापारपूर्वकत्वाच्च तदायत्तत्वेन तदर्पितत्वं मनोवृत्तेस्तु साक्षान्मनस एवाश्रयत्वात्तदर्पितत्वं यद्यपि मनःपर्यन्तानामिन्द्रियाणां प्राणायत्तस्थितित्वेन प्राणव्यापारपूर्वकत्वेन च प्राणवृत्तीनां साक्षात्परंपरया वा न मन आश्रयः तथापि मनोव्यापाराभावदशायां विद्यमानापि प्राणवृत्तिरज्ञाता अतएवासत्प्रायेति, तद्वृत्तिसत्ताज्ञानस्य मनोव्यापारपूर्वकत्वात्तस्यास्तदर्पितत्वमवगन्तव्यम्. यद्वा अजया हेतुभूतयार्पिताः षोडशैकादशेन्द्रियाणि पञ्च भूतानीति षोडश विकारा एवाराणि यस्य यदेतत्संसृतिचक्रमित्यन्वयः। संसारस्य सर्वेन्द्रियव्यापारपूर्वकत्वात्तद्वृत्तमवगन्तव्यम्. अस्मिन् पक्षे नाभित्वेन न किञ्चिदपि रूपितं यद्वा अजया नाभिरूपया हेतुभूतया चार्पिताः षोडशैकादशेन्द्रियपञ्चभूतात्मकानि अराणि यस्येत्यर्थः संसारचक्रस्यार्पितषोडशारत्वेऽजाया हेतुत्वमुक्तम्. सा किं साक्षादेव हेतुः ? नेत्याह, मायेति । मनस्सृष्टिद्वाराहेतुरिति भावः । किं तर्हि तस्याः सहकारिकारणमतआह, कालेनेति । कालेन सह माया मनस्सृजति कालसहकृता प्रकृतिर्मनः सृजतीत्यर्थः । कालोपि न स्वरूपेण प्रकृतेर्मनः सर्गे सहकार्यपितु गुणक्षोभद्वारेति वदन् कालं विशिनष्टि, चोदितगुणानुमतेनेति चोदिताः कालेन क्षुभिताः सत्त्वादयः गुणास्तैरनुमतेन सह कृतेन स्वचोदितगुणत्रयसम्बन्धेन कालेन सहकृता भगवतो माया मनःसृजति संसारचक्रस्य दुस्तरत्वं भगवदभिमुख्येतु सुतरत्वञ्चाविष्कर्तुं मनो विशिनष्टि, कर्ममयमिति। त्रिगुणात्मकप्रकृतिपरिणामरूपत्वेन स्वयमपि त्रिगुणात्मकत्वाद्रजोमयतया पुण्यपापरूपकर्मविषयप्रवृत्तिप्रचुरं बलीयः अनतिवर्त्यदोषं छन्दोमयं सत्त्वानुयानाच्छास्त्रावगतिसाधनप्रचुरम् इच्छामयमित्यर्थस्त्वनुपपन्नः छन्दशब्दः इच्छावाची न तु छन्दश्शब्दः अनेन सत्त्वप्राचुर्ये सति श्रीभगवदाभिमुख्येन संसृतिचक्रं सुतार्यमित्यभिप्रेतम्. एवंभूतं मनः सृजतीत्यन्वयः। तदेवं मनोदोषात्संसारानतिवृत्तिस्त्वत्समाश्रयणाविमुखस्येत्युक्तं भवति त्वदन्यः कः संसारचक्रमतितरेत् इत्यनेन त्वदनन्यस्त्वतितरेदेवेति सूचितम् ॥ २१ ॥

तदेवाविष्कुर्वन् त्वदनन्यं मां संसारचक्रान्निर्गमयेति प्रार्थयते—स त्वं हीति । यः स्वमाया मनःसर्गद्वारा संसृतिचक्रे जीवलोकं पातयति स त्वमजया स्वकीयया मायया षोडशारे चक्रे संसारात्मके विसृष्टमत एव नितरां पीडयमानमधुना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वां प्रपन्नं मां हे विभो ! अपकर्ष संसृतिचक्राद्बहिर्निर्गमय "य एव बन्धकः स एव मोचकः" इति न्यायेन त्वमेव ततो निर्गमयितुं समर्थइति भावः । सामर्थ्यमेव दर्शयंस्तं विशिनष्टि, नित्येत्यादिना । आत्मगुणाः स्वशरीरभूतप्रकृतिगुणा नित्यं विजिता आत्मगुणा येन नित्यास्पृष्टदेहधर्मेण स्वधाम्ना स्वस्वरूपेणैव यद्वा विजितात्मगुणो यः स्व आत्मा, तस्य धाम्ना प्रकाशेनैव वशीकृतविसृज्यविसर्गशक्तिः विविधं सृज्या विसृज्याः जीवास्तेषां विसर्गं कार्यतयस्याः सा प्रकृतिः शक्तिर्वशीकृता येन स तथोक्तः कालशरीरकश्च वशीकृतसंसृतिनिमित्तप्रकृतित्वान्मोचयितुं त्वमेव प्रभुरिति भावः । नित्यविजितात्मेत्यादिना विसृज्यजीववर्गाद्ब्रह्मादिस्तम्बपर्यन्ताद्वैलक्षण्यमुक्तम् । अतः संसारिजीववर्गे न कोपि तन्मोचने दक्षः नहि स्वयं कारागृहबद्धोऽन्यं तादृशं मोचयितुं प्रभुरित्युक्तं भवति ॥ २२ ॥

ननु, त्वं बालस्सन्नेव किं संसारान्निर्विद्यसे भुंक्ष्व भोगानित्यत्राह–दृष्टा इति त्रिभिः । हे विभो ! अयं संसारिजनो यानिच्छति कामयते ते अखिलधिष्ण्यपानां इन्द्रादीनामायुरादयो मया विविच्य दृष्टाः श्रियः भोग्यभोगोपकरणादिसमृद्धयः विभवास्त्रिलोकाधिपत्यरूपमैश्वर्यम् आयुरादयो दृष्टा इति काका तुच्छत्वमुक्तं तदेवाह, यइति । येऽस्मत्पितुः कोपहासविजृम्भितभ्रूभङ्गमात्रेण विलुलिताःध्वस्ताः स तु मत्पिता त्वया हतो निरस्तः ॥ २३ ॥

यस्मादायुरादयो मत्पितृदृष्टान्तेन तुच्छत्वेन दृष्टा तस्मात्तानुभूतां देहिनाम् अमूः आयुरादिरूपाः आशिषस्तत्परिपाकं विद्वान् अहमिति च्छेदे,अहमनवद्यम् ऐन्द्रियम् इन्द्रियैरनुभाव्य मन्यवदपि सुखमाचिरिञ्चाद्ब्रह्मणोऽनुभाव्यमभिव्याप्यापि तथा कालात्मना कालरूपेण उरुविक्रमेण विपुलपराक्रमेण विपुलपादविक्षेपेण वा विलुलितान्विध्वस्तानखिलादीनपि न इच्छामि अतो निजभृत्यानां स्वपार्षदानां पार्श्वे समीपमेव मां नय ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारचक्रं भक्त्या जनितश्रीहरिप्रसादं विना दुस्तरं, प्रसादश्च निगृहीतमनसां दुःसाध्यो मनोमयत्वात्संसारचक्रस्यातः स एव सम्पाद्य इत्याशयेन संसारस्वरूपं निरूपयति—मायेति । चित्प्रकृत्याभिमतमायाप्रकृतिरुदितगुणानुमतेनोद्भूतरजआदिगुणानुसारिणा कालेन प्रेरितेनाहमेन च सहकारिणा पुंसो जीवस्य कर्ममयं नानाविकारकोशमतएव बलीयो निगृहीतुमशक्यं छन्दोमयं सङ्कल्पविकल्पलक्षणेच्छात्मकं यन्मनः सृजति हे अज ! तन्मनोमूलं संसारचक्रं त्वदन्यस्त्वदनुग्रहरहितः पुरुषः कोतितरेत्, न कोपीत्यन्वयः । केवलात्परिकरोपेतस्य बलाधिक्यं स्यादित्यभिप्रायेणाह अजयेति, अजया प्रकृत्याऽर्पिताः कल्पिता भिन्नवर्तिना मनसा सह षोडशेन्द्रियाणि पञ्च प्राणा एवारा दृढलग्नानीवा यस्य तत्तथा तत् ॥ २१ ॥

"मनएव मनुष्याणां कारणं बन्धमोक्षयोः"इति श्रुतेः सम्यङ्नियुक्तं मुक्तिनिमित्तं चत्वदनुग्रहेण स्यादित्याशयेनाह–सत्वमिति

यस्त्वं स्वधाम्ना नित्यं विजिता आत्मनो देहस्य गुणा जननादिलक्षणा धर्मा जीवस्य वा दुःखादिलक्षणा येन स तथा यश्च कलयति जानाति सर्वमिति कालो वशीकृता स्वसमवेता विसृज्यस्य सुरनरादिनानाविधस्य जगतो विसर्गशक्तिर्विविधसृष्टिर्येनस्मिन्स्स तथा हे ईश्वर ! स त्वं षोडशारे संसारचक्रे लिङ्गशरीरे वा अजया विसृष्टमुत्पन्नमतएव दुःखेन निष्पीड्यमानं तत्परिहाराय शरणं प्रपन्नं मां ततोऽपकर्ष उत्तर विभो ! समुद्धरणसमर्थ ॥२२॥

त्वया कस्मात्स्वर्गाद्यैश्वर्यं नेष्यत इत्याशंक्य तस्य नश्वरत्वादित्याशयेनाह–दृष्टाइति। अखिलानां धिष्ण्यपानामिन्द्रादीनां विभवो हिरण्यलक्षणोर्थः अस्मत्पितुर्हिरण्यकशिपोः कुपितहासो दुर्हासस्तेन विजृंभितयोः स्फुरितलक्षणयोर्भ्रुवोर्विस्फूर्जितेन विकासविशेषेण लुलिता विनाशिताः स तु हिरण्यकशिपुरपि ते त्वया ॥ २३ ॥

यस्मात्क्षणभंगुरास्तस्मात् अनित्या इति जानन्नैन्द्रियं श्रोत्रादीन्द्रियभोगयोग्यमिन्द्रियस्य विद्यमानं वा आविरिञ्चाद् विरिञ्चपर्यन्तं निजभृत्यानां मुक्तानां पार्श्वम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वस्यच तदधीनत्वं दर्शयंस्तदेकरक्ष्यत्वं स्थापयति–मायेति । मायातावत् कर्म मायादिरूपं मनःसृजति तस्मात् तस्य दुर्बलत्वात् छन्दोमयादिरूपं संसारचक्रं त्वत्कृपामप्राप्तः कोऽतितरेत कोपीत्यर्थः ॥ २१ ॥

पुनस्तदेव विशेषतो दर्शयन् स्वाभीष्टं निवेदयति——स त्वमिति ॥ २२ ॥

पुनरपि स्वदुःखदर्शनया कृपयन् स्वाभीष्टं प्रार्थयते—दृष्टा इति द्वाभ्याम् । एकैव निजपरमाभीष्टरूपा तत्सेवकचरणानुगत्या साक्षाच्चरणारविन्दप्रेमसेवादैन्यभङ्ग्याच्छाद्य बहुविधं प्रार्थ्यत इति ज्ञेयं पूर्वत्र परत्र च ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, यद्यहमेव सर्वरूपस्तर्हि संसारोप्यहमेव कुतो मद्रूपात् संसारादस्माद्विमोक्तुमिच्छसीत्यतआह द्वाभ्यां । माया त्वदीयबहिरङ्गा शक्तिर्मनोमहदाद्यात्मकं लिङ्गदेहं जीवस्योपाधिं सृजति कर्माणि लौकिकवैदिकव्यापारास्तन्मयं बलीयो दुर्जयं पुंसस्त्वदंशस्य अनुमतेन ईक्षणरूपेण चोदिताः चोभिता गुणाः यस्याः सा छन्दोमयं वासनामयं "छन्दः पद्येभिलाषेच" इत्यमरः यदेव चक्रं खलु संसारचक्रं भवेत् कीदृशम् अजया अविद्यया अर्पितं वस्तुतो निःसङ्गेभ्योऽपि जीवेभ्यो बलात् समर्पितं च षोडश अरा विकारा यस्मिंस्तच्च तत् कोऽतितरेत् त्वदन्यः त्वत्तः पृथक्भूतः त्वामभजन्नित्यर्थः । त्वदनन्यभक्तस्तु तरेदेवेत्यर्थः ॥ २१ ॥

अतो मायायास्त्वच्छक्तित्वात्तन्मयं संसारचक्रं यद्यपि त्वद्रूपं तदपि त्वं स्वरूपशक्त्या तस्मात् पृथग्भूतोऽत एवाहमपि

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्माद्विमोक्तुमिच्छामि मां स्वचरणान्तिकं नयेत्याह—स त्वमिति। यन्माया हि गुणमयं जीवोपाधिं सृजति स त्वं स्वधाम्ना स्वरूपशक्त्या विजिता आत्मगुणा बुद्धिगुणा येन सः यो गुणान् क्षोभयति स कालोऽपि त्वम् अत एव वशीकृता विसृज्या मायाकार्य्यभूता उपाधयस्तेषु विसर्गो निक्षेपः शक्तिरविद्या च येन स अत इक्षुदण्डवन्निष्पीड्यमानं प्रपन्नं जनमुपकर्षं समीपं नय ॥ २२ ॥

न च त्वां विनाऽन्यं कमप्यैश्वर्य्यवन्तं पश्यामि यमहं प्रपद्येयं यो मां संसारादुद्धरिष्यतीत्याह–दृष्टा इति । दिविस्थानामखिललोकपालानामायुरादयो दृष्टाः श्रियो धनसम्पदः विभव ऐश्वर्यं ये धिष्ण्यपाः अस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेणैव विध्वस्ताः स च त्वया निरस्तः इत्यसाधारणप्रभावादपि त्वमेव परमेश्वर इति जानामीति भावः ॥ २३ ॥

एवञ्चेत् मत्तः परमेश्वरतः किमत आह—तस्मादिति । यस्मान्मत्पिता तादृशैश्वर्य्यसम्पत्तिमानपि निरस्तस्तस्मादहं आशिषो भोगान् ज्ञस्तत्परिपाकं विद्वान् ऐन्द्रियम् इन्द्रियैर्भोग्यं आविरंच्यात् ब्रह्मणो भोग्यमप्यभिव्याप्य किमपि नेच्छामि ते कालरूपेण विलुलितान् विध्वस्तान् अणिमादीनपि निजभृत्यपार्श्वमिति तदेव सर्वोत्तमं जानामीति भावः ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंभूतस्य सर्वात्मनः पुंसः "पुरुष एवेदं सर्वम्" इत्यादिश्रुतिप्रसिद्धस्य श्रीभगवतस्तव माया प्रकृत्याख्या शक्तिः संसारचक्रं सृष्टिसंहारप्रवाहम् सृजति पुंसो भवत एवानुमतेन शक्तिभूतेन कालेन चोदिता सृष्ट्यर्थविस्ताराय संसारार्थसंकोचाय च प्रेरिताः गुणाः यस्याः सा यद्यस्मिन् अजया नित्यरूपया भवच्छक्त्या तयैव मायया अर्पिताः एकादशेन्द्रियाणि पञ्च तन्मात्राणि चेति षोडश आराः अवयवा अस्मिन् बलीयः दृढतरं जीवबन्धनं मनस्तत्प्रधानं लिङ्गशरीरं भवति कथंभूतं कर्ममयं मायामोहितजीवकर्मफलभूतम् छन्दोमयं मायामोहितजीवाभिलाषजन्यं च "छन्दः पद्येऽभिलाषे च" इति कोशात् हे अज! तत्संसारचक्रं त्वदन्यः अंशस्य स्वरूपेण भिन्नत्वेपि अंश्यभिन्नस्थितिप्रवृत्त्याद्यभावात् य आत्मानं त्वदन्तर्गतं जानाति सत्वदनन्यः यस्तु "एष परमांशः" तत्त्वमसि "ममैवांशो जीवलोके जीवभूतः सनातनः" "क्षेत्रज्ञं चापि मां विद्धि" "अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके" इति श्रुतिस्मृतिसूत्रोक्तरीत्यात्मनो भवदंशभूतस्य भवदन्यत्वं न जानाति स त्वतअन्यः जीवब्रह्मणोऽत्यन्ततो एवेति भ्रान्तिमोहितः कोऽतितरेत् न कोपीत्यर्थः त्वदनन्यस्तु तरेदेवेति भावः ॥ २१ ॥

हे ईश्वर ! सर्वात्मा सर्वशक्तिस्त्वं चक्रे संसारचक्रे तत्रापि षोडशारे लिङ्गदेहे अजया मायाख्यया भवच्छक्त्या विसृष्टं निष्पीड्यमानं च मां प्रपन्नं त्वां शरणं गतं हे विभो ! उपकर्षं संसारचक्रात् निस्सारय यतस्त्वं बहुबन्धनयोः जीवमाययोः स्वामीत्याह, वशीकृते विसृज्य त्रिसर्गशक्ती विसृज्यते देवमनुष्यादियोनिषु पात्यते माययाभिभूयते इति विसृज्यो जीवः विसर्गे देवमनुष्यादिजीवयोनिजनने शक्तिर्यस्याः सा माया एवंभूते जीवमायौ येन सः "प्रधानक्षेत्रज्ञपतिः" इति श्रुतेः कथम्भूतः कालः स्वशक्तिभूतो यः कालस्तस्यापि क्षोभको नियन्तृभूतः काल इत्यर्थः "ज्ञः कालकालः" इति श्रुतेः ननु, अन्ये अन्यान् ब्रह्मरुद्रादीनपीश्वरान्मन्यन्ते ते एव भवतापि कुतः संसारचक्रान्निर्गमनार्थं न प्रार्थ्यन्ते इत्यत्राह हि निश्चितं स्वधाम्ना स्वासाधारणेन स्वरूपेण नित्यं सर्वदा विजिताः स्ववशे कृताः आत्मानः सर्वे ब्रह्मादयो जीवाः गुणास्तत्तद्गुणाश्च येन सः एष सर्वेश्वरः "एष सर्वाधिपतिः" इति श्रुतेः ॥ २२ ॥

ननु, संसारचक्रेऽपि भोगाः सन्ति तान् भुंक्ष्व किं मोक्षेणेत्यत आह—दृष्टा इति त्रिभिः । हे विभो ! यानयं बुभुक्षुजनः इच्छति ते दिवि अखिलधिष्ण्यपानां आयुः श्रियः सम्पदः विभवः उद्भवः एते सर्वे मया दृष्टाः येऽस्मत्पितुः कुपितहासाभ्यां कोपहासाभ्यां विजृम्भितेन विकृतेन भ्रूविस्फूर्जितेन लुलिता निरस्ताः स तु ते त्वया निरस्तो हतः ॥ २३ ॥

तस्माद्धेतोः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्रुतिप्रसिद्धः अज्ञोऽल्पज्ञो जीवोऽहं भवदीयदास अभूः तनुभृतामाशिषो भोगान् आयुरादिकं ऐन्द्रियैर्भोग्यं आविरिंच्यात् किमपि नेच्छामि ते त्वया कालात्मनोरुविक्रमेण लुलितान् विध्वस्तानणिमादिपदार्थानपि नेच्छामि, अतो मां निजभृत्यानां पार्श्वमुपनय ॥ २४ ॥

———

भाषा टीका ।

पुरुष की अनुमति से काल करके क्षुभित हुए गुण जिसके ऐसी माया कर्म प्रधान दुर्जन मनको सृजती है, हे अज ! अजा (अविद्या) ने अर्पित कि वे सोलह विकार रूप आरा जिसके ऐसे संसार चक्र वाले वेद मय मनको आपको विना भजन किये कौन तरसक्ता है ॥ २१ ॥

हे ईश्वर ! सो आप मुझे आपना ज्ञान देकर इस षोडश आरे वाले चक्र में माया से पडा हुआ निष्पीड्यमान अर्थात् ऊख के तर पिर रहा जो मैं तिसको हे विभो ! हे समर्थ ! आप खैंचलो ॥ क्योंकि आपने इस माया के गुणों को अपने तेज (चैतन्यशक्तिरूप) से जीता है और आप काल रूप अर्थात् माया के प्रेरक हो और कार्य कारण शक्ति को आप ने वश में किया है ॥ २२ ॥

हे विभो ! मैंने स्वर्गसे आदि लेकर अनेक लोकपालों के आयु श्री और वैभव देख लिये, जिनके लिये यह मनुष्य सदा इच्छा करता रहता है, उनके वैभव कैसे हैं कि मेरे पिता के कोप युक्त हास से विकराल भृकुटी के भंग मात्र से नष्ट

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ।
निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः ॥ २५ ॥
क्वाहं रजःप्रभव ईश ! तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा ।
न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥ २६ ॥
नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथाऽपि ।
संसेवया सुरतरोरिव ते प्रसादः सेवाऽनुरूपमुदयो न परावरत्वम् ॥ २७ ॥
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसङ्गात् ।
कृत्वाऽऽत्मसात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २८ ॥

भाषाटीका ।

होगये उस मेरे पिता को तौ आपने सहज ही निरस्त कर-दिया ॥ २३ ॥

इसी कारण से मैं आप का अज्ञ दास ब्रह्मादिक पर्यन्त के वैभव आयु लक्ष्मी इन्द्रिय सुख इत्यादिकों की इच्छा नहीं करता हूं, क्योंकि ? ये सब तौ काल स्वरूप आपके महान् पराक्रम से नष्ट प्राय हैं तस्मात् आप केवल मुझको अपने दासों के समीप में पहुचा दीजिये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च वर्तमानकालेऽपिन भोगार्हा इत्याह--कुत्रेति। श्रुतिः श्रवणं तदेव सुखं यासु ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः क्व अशेषाणां रुजां रोगाणां विरोह उद्भवस्थानं क्वेदं कलेवरम्. एवं चेत्सर्वोऽपि जनः किं न विरज्यते ? तत्राऽऽह—यदपि यद्यपि इति एवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति कुतः काम एवानलस्तं मधुतुल्यैः सुखलवैर्दुःसाध्यैरपि शमयन्, कामाग्निशमनव्यग्रस्य निर्वेदावकाशो नास्तीत्यर्थः । यद्वा, अचिन्त्यमिदं त्वन्मायाचेष्टितमिति भावः ॥ २५ ॥

तर्हि त्वं कथं निर्विषण्णोऽसि अनर्हेऽपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह--क्वेति । रजसैव प्रभवो जन्म यस्य सः सप्तम्यन्तं वा कुलविशेषणं तमोऽधिकं यस्मिंस्तस्मिन्नसुराणां कुले जातोऽहं क, क्व च तवानुकम्पा, तामेवाह ब्रह्मादीनां शिरसि यो नैवार्पितः स पद्मवत्सकलसन्तापहरः करः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् यया याऽनुकम्पयेति वा ॥ २६ ॥

न च त्वयीदमतिचित्रमित्याह--नैषेति। एते ब्रह्मादय उत्तमाः अयमसुरो नीच इत्येषा परावरमतिर्जन्तोः प्राकृतस्य यथा, तथा भवतो नैव स्यात् अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्र मत्प्रसाद एवंरूपश्च किं न स्यात्तत्राह संसेवया तव प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टान्तः सुरतरुर्यथा सेवकस्यैव सङ्कल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न परावरत्वमत्र कारणमिति शेषः ॥ २७ ॥

एतच्च त्वद्भृत्यकृपया मया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेत्याशयेनाह--एवमिति। यथा त्वया अनुकम्पितोऽस्म्येवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः सोऽहं कथन्नु त्वद्भृत्यसेवां विसृजामि कथम्भूतोऽनुगृहीतोऽस्मि प्रभव एवाहियुक्तः कूपस्तस्मिन्कामानभितः कामयमानं जनं निपतितमनुतत्प्रसङ्गात्प्रपतन्योहम् तदेवं त्वद्भृत्यस्य नारदस्यानुग्रहेण त्वयात्यन्तमनुकम्पितोऽस्म्ययमेव च मम परमोऽनुग्रहो न पुनरिदमतितुच्छं मत्प्राणरक्षणादि ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च श्रुतिः श्रवणं तदेव सुखं यासु ताः अत एव मृगतृष्णिरूपाः मरीचिकावदवस्थिताः आशिषः कुत्र पुरुषार्थाभासा आशिषः क्वेत्यर्थः । अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्वेदं कलेवरं दुर्घटमेतदिति भावः । एवं चेत्सर्वोऽपि जनः किमिति संसारान्न निर्विद्यते तत्राह–निर्विद्यत इति। यद्वैषयिकं सुखम् इतीत्थं मृगतृष्णिकातुल्यं विद्वान् जानन्नपि न निर्विद्यते विद्वानपीत्यपिशब्देनाविदुषो नितरां निर्वेदाभावः सूचितः विदुषोऽप्यनिर्वेदे हेतुं वदन् विद्वांसं विशिनष्टि—दुरापैर्दुःखेनापि लब्धुमशक्यैर्मधुलवैर्वैषयिकसुखलेशैः काम एवानलस्तमुपशमयन्विषयासक्तस्सन् विद्वानपि न निर्विद्यत इत्यर्थः । विषयासक्तस्य निर्वेदस्यावकाशोनास्ति इति भावः ॥ २५ ॥

एवं तत्प्राप्तये तदनुग्रहं संप्रार्थ्य स्वशिरसि दुर्लभेन तत्करपल्लवनिधानेनात्मनः कृतार्थतामाविष्करोति—क्वेति । हे ईश ! तमोधिके तमःप्रचुरे रजःप्रभवे रजस उत्पत्तिस्थाने रजस्तमःकार्यकामक्रोधलोभादिमोहाप्रचुरे सुरेतरकुले, असुरकुले जातोऽहं क्व क्वच तवानुकंपा दुर्घटमेतदित्यर्थः । किं तदित्यत्राह ब्रह्मादीनां शिरःसु यो नैवार्पितस्तेषामपि दुर्लभ इति भावः। सः प्रसादः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रसादसूचकः पद्ममिव तापहरः करः मम शिरस्यर्पित इति यदेतत् दुर्घटमिति भावः । अतोहमलभ्यलाभेन कृतार्थोऽस्मीति तात्पर्य्यम् ॥ २६ ॥

नैतावता तव वैषम्यादि दोषप्रसङ्ग इत्याह—नैषेति । यथा या जन्तोः प्राकृतस्य परावरमतिरुत्कृष्टापकृष्टबुद्धिर्विषमाबुद्धिरिति यावत् सैषा बुद्धिर्भवतो नैव स्यात् ननु तदभावे हेतुं वदंस्तं विशिनष्टि, जगत आत्मसुहृदः आत्मनोऽन्तरात्मनः सुहृदो हितैषिणश्च आत्मन इत्यनेन जगतः शरीरत्वमवगम्यते नहि कस्मिंश्चिच्छरीरे आत्मनः प्रीतिरन्यस्मिन्नप्रीतिरिति भावः । सर्वस्यापि जगतः स्वाभाविकसुहृद इति वार्थः । तर्हि सर्वेष्वेकरूपो मत्प्रसादः किन्नस्यात्तत्राह—यद्यप्येवंभूतस्त्वं तथापि वैषम्यरहितस्यापि तव संसेवया प्रसादो भवति तत्र सेवानुरूपं तत्तदपेक्षानुसारेण धर्मादिपुरुषार्थानामुदयो भवत्यपेक्षानुरूपफलदत्वे दृष्टान्तः सुरतरोरिवेति. यथा सुरतरोः कल्पद्रुमस्य तत्तत्सेवकापेक्षानुसारेण फलप्रदत्वं न च तावता तस्य वैषम्यं तद्वन्न परावरत्वं सर्वेष्वेकरूपप्रसादाभावे परावरत्वं वैषम्यं न कारणमित्यर्थः ॥ २७ ॥

एवमात्मनस्तत्प्रसादेन कृतार्थतामाविष्कृत्याथ न केवलमधुनैव त्वत्प्रसादविषयोऽहं जातः किन्तु यदा मातृगर्भस्थं मामनुजिघृक्षता त्वया सञ्चोदितेन सुरर्षिणानुगृहीतस्तदैव त्वदनुग्रहविषयोऽभवम् अतो जन्मन आरभ्य त्वयानुगृहीतोऽहं त्वद्भृत्यपार्श्वं न विसृज इत्याह—एवमिति । हे भगवन् ! यः सुरर्षिणा नारदेनात्मसात्कृत्वा आत्माधीनंकृत्वा "तदधीनवचने च" इति सातिप्रत्ययः पूर्वं विषयपरवशत्वेन तदधीनं मां स्वाधीनं कृत्वेत्यर्थः । यद्वा, "अभिविधौ सम्पदा च" इति सातिः अभिविधिश्च किञ्चिदन्यथात्वं पूर्वं भगवत्प्रातिकूल्येन स्थितं मां किञ्चिन्त्वदनुकूलं कृत्वेत्यर्थः । गृहीतस्तत्त्वत्रयोपदेशेनानुगृहीतः सोऽहं इदानीं तव भृत्यसेवां दासानुदास्यं कथं नु विसृजे न कथं चिदपित्यक्ष्यामीत्यर्थः कथम्भूतोऽनुगृहीतोऽस्मि प्रभवः संसार एवाहिकूपः सर्पजुष्ट कूपस्तस्मिन्कामाभिकामं काम्यन्त इति कामाः विषयाः शब्दादयस्तान् कामयमानं जनं निपतितमन्वनुसृत्य तत्प्रसङ्गात्तस्य तत्र निपतितजनस्य यः प्रकृष्टः सङ्गस्तस्माद्धेतोः प्रपतन्नहं विषयासक्तचित्तजनसङ्गात्प्रभवाहिकूपे पतन्नहमित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोपि संसारसुखं हेयमित्याह—कुत्रेति । श्रुतिं कर्णौ सुखयन्तीति श्रुतिसुखा मृगतृष्णारूपा ऊष्मोदकसदृशाः अशेषाणां रुजां रोगाणां विशेषेण रोहो यस्मात्तथा क्षुरापैर्मधुलवैरुदबिन्दुकल्पैः सुखलेशैः कामाग्निं शमयन् शान्तिं कर्तुमिच्छन् यदपि पर्यायेण कलेवरं विषयसुखं चेत्युभयं नश्वरं विद्वानयं जनः इहोभयस्मिन्नपि ननु निर्विद्यते निर्वेदं नैव प्राप्नोतीत्यन्वयः ॥ २५ ॥

हरेर्भक्तवात्सल्यं प्रकटयन् प्रह्लादस्तत्त्वज्ञानविधुर इवायोग्यजनमोहायाह—क्वाहमिति । हे ईश्वर ! तमोगुणप्रचुरे रजोगुणोत्पत्तिहेतौ अस्मिन् सुरेतरकुले असुरकुले जातोऽहं क्व भक्तानुग्रहलक्षणा तवानुकम्पा क्व मिथो विरुद्धस्वभावत्वात् किञ्चायमत्रेति तत्राह न ब्रह्मण इति निरन्तरसेवा मे दूरत्वेनेतरस्मादधिकोदयोऽपीदानीं रमादीनां शिरसि नार्पितो मम शिरसि तव पद्मकरः पद्मोदरप्रभावत्पाणिनिधानलक्षणः प्रसादोऽर्पित इति यत्तस्माच्चित्रं तव चरितमित्यर्थः । "श्रीर्ब्रह्म ब्राह्मीर्वीन्द्राहित्रिकं तत्स्त्रीपुरुष्टुताः तदन्ये च क्रमात्सर्वे सदा मुक्तौ सृतावपि । हरिभक्तौ च तज्ज्ञाने सुखेन नियमेन तु । परतः स्वतः कर्मतो वा न ;कथंचित्तदन्यथा" इति वचनादुक्त एवार्थ इति ॥ २६ ॥

सेवाधिक्यमेव फलाधिक्ये कारणं न त्वाभिजात्यादिकमित्यभिप्रेत्याह—नैषेति । यथा जन्तोर्या परावरमतिस्तथैषा भवतो न स्यान्न तु कुत आत्मसुहृदः "तदेतत्प्रेयः" इति श्रुतेः लोके यद्यप्याभिजात्यादिकं परावरत्वे निमित्तं तथापि लोकविलक्षणमहिमत्वात् भवतः प्रसादः जगतः संसेवया सेवानुगुणः फलाधिक्योदयः स्यात् "यावत्सेवा परे तत्त्वे तावत्सुखविशेषता" इतिस्मृतेः परावरत्वं च सेवानिमित्तं "शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते" इतिवचनात् ॥ २७ ॥

नन्वेवं सेवानुरूपफलोदये शास्त्रीये सिद्धे त्वं किङ्करोषीति तत्राह—एवमिति । फलोदयस्य सेवानुविधायित्वात् सोऽहं तव भृत्यसेवां कथं नु विसृजे मम हितरूपत्वादित्यतस्त्वदत्यागे कारणमाह । जनमिति । प्रभवाहिकूपे जन्माख्यसर्पविषकलिलसंसारगर्ते पतितं कामाः विषयास्तानभिकामयत इति कामाभिकामस्तं जनमनु तस्य जनस्य प्रकर्षेण सङ्गः जन्मलक्षणस्तस्मात्प्रपतन् आत्मसात्कृत्वात्मीयेष्वेक इति बुद्धिं कृत्वा सुरर्षिणा गृहीतोनुगृहीतोऽयः सोहमिति यस्मात्तस्मादिति शेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनः स्वस्यातिदैन्यं दर्शयितुं सामान्यतो जीवानां दैन्यं दर्शयति—कुत्रेति । मधुरूपकं तेनाग्नेः प्रत्युत वृद्धेः ॥ २५ ॥

अथ स्वस्यापि दैन्यं दर्शयन् तत्कृपया निरुपाधित्वं प्राबल्यञ्च दर्शयति—क्वाहमिति । नच ब्रह्मण इति तदानींतन वृत्तान्तापेक्षया ॥ २६ ॥

यत्तु भवान् भक्ताननुगृह्णाति तच्च यद्यपि चित्रं तथापि दृष्टान्तसद्भावात् नातिचित्रं मय्यनुग्रहस्तु तदभावादतीव चित्रमिव पूर्वार्थमेवोत्कर्षयितुमाह—नैषेति ॥ २७ ॥

अथैतादृश्याः कृपायाः कारणं स्मरन्नपि तदेवाभीष्टं प्रार्थयते एवमिति । एवं त्वत्कृपायोग्यं यथास्यात्तथा अनुगृहीतो यः सोऽहं दृष्टभगवद्भृत्यकृपातिशयत्वात् कथं विसृजे त्यक्तुं शक्नोमि नैवेत्यर्थः ॥ २८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तर्हि किमिति भोगैश्वर्य्यं सर्व एव लोको वांछतीति चेत्सर्वोऽप्यनभिज्ञ एवेत्याह—कुत्रेति । मृगतृष्णिरूपाः मृगतृष्णा यथा दृष्टिसुखरूपास्तथैवाशिषो राज्याद्या अपि श्रुतिसुखमात्रः स्पर्द्धाऽसूया रागद्वेषापायचिन्तादिभिर्वस्तुतः सुखलेशस्याप्यभावात् अस्तु वा सुखं तस्य भोगाऽसामर्थ्यात् महदेव दुःखमित्याह क्वेदमिति. यद्यतो विद्वानपि जन इति विचार्य्यापि न निर्विद्यते ततो मूर्खः किमुतेति भावः कीदृशः कामरूपमनलं मधुलवैः सुखलेशैः शमयन्निति नहि मधुलवैरनलः शाम्यति प्रत्युत दीप्यते एव दुरापैरिति ते च सुखलेशा दुःखैरेवोपार्ज्यन्ते ॥ २५ ॥

किञ्च यद्यपि मादृशो नास्तिकोऽप्यधमस्तदपि त्वं मां सर्वोत्तममकरोस्तत्ते कृपामाहात्म्यं किं वर्णयामीत्याह—काहमिति । यत् यः पद्मकरः मम शिरस्यर्पितः सन् ब्रह्मणा इत्यादि ॥ २६ ॥

न च त्वं स्वकृपया उत्तमाधमौ गणयसीत्याह—नैषेति । एते ब्रह्मादय उत्तमाः अयमसुरो नीच इत्येषपरावरमतिर्जतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् तत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्रैव सम एव मत्प्रसादोऽस्तु तत्राह संसेवया यथा सुरतरुराश्रितस्यैव सङ्कल्पानुसारेण फलं ददपि न विषमस्तथैव त्वमपि तत्रापि सेवानुरूपम् उदयः सेवातारतम्येनैव कृपाया उदयतारतम्यं नतु परावरत्वं उत्कृष्टनिकृष्टत्वमेव कृपोदयतारतम्यस्य कारणमित्यर्थः ॥ २७ ॥

ननु, मत्संसेवया त्वयि मम सम्यक् प्रसाद इत्यत्र सुरतरुदृष्टांतेन मद्वैषम्यं पर्य्यहार्षीः किंतु संसेवया किं कारणं तद्ब्रूहीति तत्राह एवम् उत्कृष्टनिकृष्टाभावेन जनं सर्वमेव कामानभिकाममभानं अभव एवाहियुक्तः कूपस्तत्र निपतितम् अनु तत् प्रसङ्गात् प्रयतन्नेवाहं सुरर्षिणा श्रीनारदेन आत्मसात्कृत्वा अयं जीवो मदीयो भवत्विति मयि स्वस्वत्वमारोप्य गृहीतः बलात् स्वपाणिनैव गृहीत्वा ततः सकाशात् स्वांतिकं नीत्वा तन्मंत्रराजमुपदिश्य स्वसेवकीकृत इति भावः सोऽहं संसारकूपपतित एव संप्रत्यहं प्रह्लादस्त्वद्भक्तो यत्प्रसादादभवं तस्य तव भृत्यस्य श्रीमद्गुरोःसेवां कथं विसृजामि त्यजामि यथा कर्मज्ञानियोगिनः फलप्राप्तौ साधनं त्यजन्ति, तथेत्यर्थः । भक्तिमार्गे हि साधनस्यापि फलीभावात् भगवन्तं प्राप्तानामपि ध्रुवादीनां साधुसङ्गादिसाधनस्पृहा यथा भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनंतमहताममलाशयानामिति ध्यायंश्चराम्यानुगृहाण यथास्मृतिः स्यादिति चातएव विचार्य्यैव मया प्रार्थितं नय मां निजभृत्यपार्श्वमिति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, स्वत एव भवान् कुतो न गच्छति अत्राह—कुत्रेति मृगतृष्णिरूपाः मृगतृट् मृगतृष्णा यथा जलाभासरूपा तथा पुरुषार्थाभासाः श्रुतिः श्रवणं तदेव सुखं यासु ताः आशिषः कुत्र अशेषरुजां विरोहो जन्मस्थानमिदं सकलेवरं च क इत्येवं यद्पि जनो विद्वान् तथापि दुरापैर्दुःखलभ्यैर्मधुलवैर्विषयसुखलेशैर्दुष्पूरं कामानलं शमयन् आस्ते नतु विरज्यते त्वद्भृत्यपार्श्वं न गच्छतीति भावः ॥ २५ ॥

आत्मनो लब्धभगवत्प्रसादत्वमाह—का हमिति । रजसः प्रभवो यस्मिन् तस्मिन् तमोधिकं यत्र तस्मिन् सुरेतरकुले जातोऽहं क क च तवानुकम्पा यत् यया प्रसादः प्रसादद्योतकः पद्मकरः पद्मवत् सुखदः करः मे शिरसि अर्पितः नतु ब्रह्मणो न भवस्य नतु रमायाः शिरसि अर्पितः यद्वा एवंविधः पद्मकरो ब्रह्मणो न भवस्य रमाया अपि नेति योज्यम् ॥ २६ ॥

ननु, अहो अयं परः उत्तमः अयमपरो ऽधमः एषा मतिर्जतोः प्राकृतस्य जीवस्य यथा भवति तथा जगतः आत्मनः परमसत्वरूपस्य सुखदः हितकारिणो भवतो नैव स्यात् तथापि सुरतरोः कल्पद्रुमात् सेवानुरूपमुदयो वांछितार्थलाभः इव संसेवया ते प्रसादो भवति एवमयं पर उत्कृष्टः मम प्रसादार्हः न त्ववर इति तव प्रसादे परावरत्वं कारणं न भवति ॥ २७ ॥

प्रकर्षेण भवन्तीति प्रभवाः कामक्रोधलोभादयस्त एवाहयस्तद्युक्ते कूपे कूपवद्दुस्तरे संसारे नितरां पतितं कामान् विषयानभिकामयतीति कामाभिकामस्तं जनं कलत्रापत्यादिरूपमनुअनुसृत्य प्रसङ्गात् तस्मिन् जने प्रकृष्टो यः सङ्गस्तस्मात्प्रपतन् योऽहं देवर्षिणाऽऽत्मसात्कृत्वा गृहीतो अनुकम्पितः सोऽहं तव भृत्यसेवां कथं विसृजे अतस्तव भृत्यपार्श्वं मां नयेति भावः ॥ २८ ॥

भाषा टीका ।

अवण रमणीय और मृग तृष्णा रूप आशिष (ऐहिक पारक्य सुख सामग्रीं) तौ कहां, और अनंत रोगों के जमने की भूमि यह कलेवर कहां । ऐसा यह पुरुष जागता है तौ भी वैराग्य को नहीं प्राप्त होता, क्योंकि ? बडे दुष्प्राप्य काम सुख के विंदुओं से काम रूप अग्नि के शमन करने में व्यग्र होरहा है ॥ २५ ॥

हे ईश ! कहां रजोगुण से उत्पन्न होने वाले तमोगुण प्रधान इस असुर कुल में, मैं उत्पन्न हुआ, और आपकी निर्हेतुक कृपा कहां, क्योंकि यह प्रसाद तौ ब्रह्मा को भी नही मिला शिवको भी नही प्राप्त हुआ, और निश्चय करके रमा (श्रीलक्ष्मीजी) को भी नहीं मिला जोकि ? मेरे असुर बालक के मस्तक पर आपने अपना करकमल अर्पित किया ॥ २६ ॥

ये ब्रह्मादिक उत्कृष्ट हैं और यह असुर नीच है इस प्रकार की पर अवर मति जगत के आत्मा और सुहृद ऐसे आप की कभी नहीं होती, तथापि कल्प वृक्ष के तरह आपकी प्रसन्नता है, जैसे कल्प वृक्ष समीप जाने से और इच्छा करने से फल देता है, ऐसे ही आप भी शरण आने से इच्छा के अनुकूल फल देते हैं ॥ २७ ॥

Dr. Urmila Sharma Collection, Varanasi

मत्प्राणरक्षणमनन्त ! पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥
एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोःपृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ ३० ॥
त्वं वा इदं सदसदीश ! भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ।
यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः ॥ ३१ ॥
न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेऽऽत्मना निजसुखानुभवो निरीहः ।
योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे ॥ ३२ ॥

भाषा टीका ।

संसार रूप सर्प विशिष्ट कूप में पडे हुए जनों के प्रसङ्ग से मैं भी उसी कूप में गिरता हुआ वर्त्तमान था, श्रीनारदजी ने अपना करके मुझे ग्रहण किया हे भगवान् ! सो मैं आप के दासों की सेवा को कैसा भूल सकता हूं ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न चेदं त्वया मदनुग्रहार्थं कृतं किन्त्वन्यार्थमित्याह—भो अनन्त ! यदेतन्मत्प्राणरक्षणं मां हन्तुमुद्यतस्य मत्पितुर्वधश्च तदुभयं स्वभृत्यऋषिवाक्यमृतं सत्यं विधातुमित्यहं मन्ये कुतः यद्यस्मादसदयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरो मद्व्यतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरोऽहं हरामीति पाठान्तरेऽप्ययमेवार्थः । यद्यदाऽवोचत्तदा मत्प्राणरक्षणमिति वाऽन्वयः एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव बहुधा व्याख्यातम् ॥ २९ ॥

न चेदं पक्षपातेन रक्षणं दैत्यहननञ्च त्वयि स्वाभाविकं किन्तु मायागुणोपाधिकं सर्वात्मके त्वयि स्वतस्तदयोगादित्याह एकइति । एतच्च जगत् त्वमेवैकः यद्यतः अमुष्यादावन्ते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारणत्वेनावधित्वेन च वर्तसइत्यर्थः । अतोमध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिरत्राह, निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वन्तैर्गुणैर्हेतुभूतैर्नानेव रक्षकइव हन्तेव चावसितः प्रतीतः तदुक्तं स्कन्धोपक्रमे "निर्गुणोऽपि ह्यजोऽव्यक्तोभगवान्प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ " इत्यादिना ॥ ३० ॥

ननु, यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यतआह । त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगत्तु त्वत्तः पृथक् भवांस्तु ततोऽन्यः आद्यन्तयोः पृथगवस्थानात् यद्यस्मादेवमतोऽयमात्मीयोऽयं परइति या बुद्धिः साऽपार्था मायैव कार्यकारणाभेदं दृष्टान्तेन साधयति—यद्यतो यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन्निधनञ्च स्थितिश्च तद्वै तदेव अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालमात्रत्वम् अयमर्थः कालशब्देन नीलत्वाद्यसाधारणगुणयोगात्पृथ्वी वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथिवीमयबीजमात्रत्वं तस्य च यथा भूतसूक्ष्ममात्रत्वमेवं सर्वमपि कार्यकारणात्मकं जगत्परमकारणात्मकमेवेति तथाच पारमर्षं सूत्रं "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति. श्रुतिश्च "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"इति ॥ ३१ ॥

तत्र तावदन्ते पृथगवस्थानं दर्शयति—न्यस्येदमिति । इदं जगदात्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निष्क्रियः सन्प्रलयोदकमध्ये शयनं करोषि, तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्राऽस्ति ? नहि नहि. योग एव तु बहिर्दृक्संभावस्वास्थ्यानिद्रोच्यत इत्याह—योगेन मीलिते दृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुर्येऽवस्थात्रयातीते स्वरूपे स्थितस्त्वं नतु सुप्तइवाऽऽत्मना तमोयुङ्क्षे योजयसि न पश्यसि न जाग्रत्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यो नारदमुखेन मयि कृतः स एव परमोऽनुग्रहः न चेदं अतितुच्छं मत्प्राणरक्षादिरूपं न चेदं त्वया मदनुग्रहार्थं कृतं किंत्वन्यार्थमित्याह—मत्प्राणरक्षणमिति । हे अनन्त ! यदेतन्मत्प्राणरक्षणं मत्पितुर्वधश्चेति तदुभयं स्वभृत्य ऋषिवाक्यम् ऋतं सत्यं यथा भवति तथा विधातुं कर्तुं कृतमित्यहं मन्ये स्वभृत्यऋषिवाक्यमित्यत्र निजभृत्यभाषितम् इत्यत्रेवार्थो द्रष्टव्यः किञ्च यदस्मत्पिता विधित्सुर्मद्वधमिति शेषः । मां जिघांसुरित्यर्थः । खड्गं प्रगृह्य मत्तोऽन्यश्चेदीश्वरस्त्वद्रक्षकोऽस्ति तर्हि स त्वामिदानीं अवतु रक्षतु तव कं शिरो हरामीति यदवोचदुक्तवान् तदीश्वरान्तराहित्य वचः असदसत्यं च विधातुं मत्प्राणरक्षादिकं त्वया कृतमित्यहं मन्ये इत्यर्थः ॥ २९ ॥

एवं कोपोपशमनप्रार्थनानुकूलोक्तं स्वाभिप्रेतं तद्दास्ययोग

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

संप्रार्थ्यं इदानीं कृत्स्नचिदचिदात्मकजगदन्तरात्मानं तच्छरीरकं तदुत्पत्तिस्थितिलयकारणं तदनन्यं स्तौति—एक इति। एतत्परिदृश्यमानं जगच्चिदचिदात्मकं कृत्स्नं जगदेकस्त्वमेव. एतदित्यनेन विभक्तनामरूपं चिदचिदात्मकं जगन्निर्दिश्य तस्य त्वंशब्दवाच्यब्रह्मणोऽनन्यत्वं साध्यते "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र यथैक इत्यनेनाविभक्तनामरूपचिदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते यथै कमेवाद्वितीया मित्यत्रैक शब्देन तत्र हि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्व प्रति सम्बन्धैक्यं एकदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते. यथा "एकमेवाद्वितीयाम्" इत्यत्रैकशब्देन तत्रहि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्वप्रतिसम्बन्ध्यैक्यम् ह्येकशब्दार्थः। अत्राप्येतच्छब्देन प्रसिद्धपरामर्शिना यदभिप्रेतं नामरूपविभागप्रयुक्तं बहुत्वं तत्प्रतिसम्बन्ध्येकत्वं तद्विभागाभावनिबन्धनमुच्यते, तदयमर्थः। यथा कारणावस्थायां घटशरावादिनामरूपविभागरहित एकत्वेनावस्थितो मृत्पिण्डः पश्चाद्घटादिरूपेण परिणमन्नामरूपविभागविशक्तस्तेभ्योऽनन्य एव, एवं त्वमपि कारणावस्थायां नामरूपविभागानर्हचिदचिच्छरीरकतयैकत्वेनावस्थितो देवादिनामरूपविभागार्हस्थूलचिदचिच्छरीरकत्वेन परिणतस्ततोऽभिन्न इति कार्यकारणयोरनन्यद्रव्यत्वात्त्वत्कार्यभूतजगदनन्यस्त्वं कार्यत्वकारणत्वयोस्सतोर्द्रव्यस्यावस्था विशेषरूपत्वेन सर्वावस्थास्वनुस्यूतं द्रव्यमेकमेवेति भावः। तदेव सहेतुकमुपपादयति, यत् यस्मात्त्वमसुष्य जगत आद्यन्तयोरवस्थयोः पृथगवस्थस्यात्मानमितिशेषः। पृथक् मध्यावस्थारहितमात्मानम् अवस्यसि पर्यवसितं करोषि जगत आदौ सृष्टेः पूर्वं तस्यान्ते प्रलये चात्मानं पर्यवशेषयसि ततो मध्यतः मध्यावस्थायाञ्च त्वमेव, तथाहि कटकमकुटादिकारणतया कटकाद्यवस्थातः पूर्वमवस्थितः स्वर्णपिण्डः कटकाद्यवस्थायाः पर्यवशेषितो मध्यतः कटकाद्यवस्थायास्तदवस्थावतो द्रव्यान्नाभिद्यते तद्वदिति भावः एवं जगतो भिन्नत्वोपपादनेन जगदुपादानत्वमुक्तम् अथ तन्निमित्तकारणत्वं तदनुपादानत्वप्रयुक्तविकारित्वादिदोषपरिहारं ———— सूचयन् कार्यावस्थायां नानात्वेनावस्थानञ्चाह सृष्ट्वेति गुणव्यतिकरं सत्त्वादिप्राकृतगुणपरिणामात्मकम् इदं जगत् निजमायया आत्मीयसङ्कल्परूपज्ञानेन सृष्ट्वा तत्सृष्टं जगदणुप्रविष्टोऽन्तरात्मतयानुप्रविष्टः "तत्सृष्ट्वा तदेवानुप्रविशत्" इति श्रुत्युक्तरीत्या तावत्स्वानुप्रवेशेनैव सृष्टं जगच्चिदचिदात्मकं पुनः संरक्षणोपयुक्तसङ्कल्परूपज्ञानद्वारान्तरात्मतयानुप्रविष्टस्तैः स्वशरीरभूतैश्चिदचिदात्मकैः देवादिकैः शरीरैर्नानेव भिन्न इवावसितः प्रतीतः अतो देवमनुष्यादिभेदभिन्नं जगत्त्वमेवेति भावः। सृष्ट्वानुप्रविष्ट इति सृष्ट्यनुप्रवेशयोरेककर्तृकत्वकथनेन जगन्निमित्तकारणत्वं तच्च निष्कृष्टविशेष्यांशभूतस्वरूपस्यैवेति च फलितं येनाकारेणानुप्रवेशस्तेनैवाकारेण स्रष्टृत्वमपि. एवञ्च विशिष्टाकारेणानुप्रवेशस्तेनैवाकारेण स्रष्टृत्वं हि क्त्वाप्रत्ययस्वारस्यादवगम्यते अनुप्रवेशश्च विशेष्याकारेणेति तेनैवाकारेण स्रष्टृत्वमपि एवं च विशिष्टाकारेणोपादानत्वं विशेष्याकारेण तु निमित्तकारणत्वमित्युक्तं भवति। अत एव वेदे सृष्ट्वेतीदं शब्दनिर्दिष्टं सृष्टिप्रति कर्मभूतं जगत् चिदचिदुभयात्मकमेव साक्षादुत्पत्त्याद्यवस्थाश्रयमित्यवगम्यते, अनुप्रविष्ट इत्यनेन तत्तदवस्थानिर्वोढृतयान्तरात्मतयानुप्रवेशकथनेन स्वविशेषणीभूतचिदचिद्द्वारा तद्गतोत्पत्त्याद्यवस्थाश्रयत्वमवगम्यते अनुप्रविष्ट इत्यनेनात्मत्वकथनेन साक्षाद्देहगतविकारास्पर्शश्चोक्तः अत एवोपादानत्वप्रयुक्तविकारित्वादिदोषश्च परिहृतः जगतः शरीरत्वकथनेन शरीरशब्दबुद्धीनामाकृत्य अधिकरणन्यायेनात्मपर्यन्तत्वलाभोऽपि तस्य जगदनन्यत्वे हेतुरित्युक्तं भवति ॥ ३० ॥

ननु, त्वत्पित्रादयश्चतुर्मुखादिकमेवेश्वरं मन्यमानाः कृत्स्नं जगत्तत्कारणकं तदनन्यमभ्यदधत त्वन्तु मदेककारणकं मदभिन्नं च जगन्मन्यसे तदेतद्विरुद्धमित्याशङ्कायां देहात्मबुद्धिवज्जीवेश्वरबुद्धेर्भ्रान्तिरूपतां वदन्नुक्तमेव कार्यकारणयोरनन्यत्वं दृष्टान्तमुखेन दर्शयति—त्वमिति। हे ईश! सदसदात्मकं चिदचिदात्मकम् इदं जगत्त्वमेव चिदचिदात्मकजगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेव, नान्य ईश्वर इत्यर्थः। ईशेति सम्बोधनस्वारस्यादिदं जगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेवेत्यर्थः। आत्मनि जीवात्मनि परबुद्धिर्या ईश्वरबुद्धिः सा अपार्था अर्थशून्या मायाऽविद्याकार्यभूता अज्ञानमूला भ्रान्तिरूपेति यावत् देहात्मवादवज्जीवेश्वरवादोऽपि भ्रममूल एवेत्यर्थः। यद्यत एवं ततस्तस्माज्जीवादन्य एव भवानीश्वरः कर्मवश्यस्य जीवस्यैवंविधजगन्निमित्तोपादानकारणत्वासंभवान्मुक्तस्य जगद्व्यापारवर्जनाच्चेति भावः। अतश्चिदचिदात्मकं जगत्त्वमेव. ननु, मत्कारणकत्वमात्रेण कथं मदनन्यं जगत्तत्राह—यदिति। जन्म उत्पत्तिर्निधनं नाशः स्थितिः पालनम् ईक्षणं प्रकाशः जन्मादिशब्दैस्तद्धेतुर्लक्ष्यते यस्योत्पत्तिस्थितिविनाशप्रकाशानां यद्धेतुभूतं तद्वैतदेव तत्कार्यं स्वोपादानकारणादव्यतिरिक्तम्, यद्वा, यद्यतः यस्य जन्मादयस्तत्तदेव तत्र दृष्टान्तद्वयमाह—वसुकालवदुष्टितर्वोरिति। वसु शब्दो वसुमतीं पृथ्वीं लक्षयति यथा भानुशब्दो भानुमन्तं लक्षयति प्रतिपादयति तद्वत् उष्टिः प्रभातकालः तरुर्वृक्षस्तयोर्जन्मादिहेतुभूतकालवद्वसुमतीवदिति व्युत्क्रमेणान्वयः। यथा प्रभातादिकालावयवाः स्वोपादानभूतमहाकालादनतिरिक्ताः यथा च वृक्षः पृथिव्या अनतिरिक्तस्तद्वदित्यर्थः। खलु कालवदुष्टितर्वोरिति पाठे, सत्येवं योजना ईश्वरो जगदुपादानं निमित्तं चातस्तद्वन्द्वे दृष्टान्तः कालः प्रभातादिकालावयवानां कालत्वमुपादानं वृक्षादीनां तु निमित्तं यथा प्रभातादिः कालाव्यतिरिक्तः यथा वृक्षश्चाभूदस्ति भविष्यतीति कालाविनाभूतः प्रतीयते तद्वन्निमित्तोपादानभूतादीश्वराज्जगदव्यतिरिक्तमित्यर्थः। अष्टितर्वोरित्यपि पाठः तत्रैवं व्याचक्षते अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालात्मकत्वम्, अयमर्थः कालशब्देन नीलत्वादि साधारणगुणयोगात् पृथ्वी लक्ष्यते वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथ्वीमयबीजपरिणामात्मकत्वेन ततो भेदः तस्य च यथाभूतसूक्ष्मात्मकत्वम् एवं सर्वस्य जगतः परमकारणभूतपरमात्मात्मकत्वमेवेति ॥ ३१ ॥

एवं जगतस्तदनन्यत्वं तदेकेश्वरत्वं तदेककारणत्वं चोक्तम् अथ चतुर्मुखस्य तत्कार्यत्वं तदाहितसृष्ट्युपयुक्त ज्ञानशक्त्यादिमत्वञ्च विवक्षुस्तावद्युक्तं विश्वस्याद्यन्तयोः पृथगवस्थानं

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तत्रान्ते पृथगवस्थितिप्रकारमाह—न्यस्येति । इदं परिदृश्यमानं चिदचिदात्मकं जगत् आत्मनि न्यस्योपसंहृत्य शेषे शयानोसि शेषात्मनेति पाठे, शेषस्य कारणात्मनावशिष्टस्य चिदचिद्द्रव्य स्यान्तरात्मना स्वरूपेणात्मनि स्वस्मिन्नेवावस्थित इत्यन्वयः। कथंभूतः स्वतो निरुपाधिकं निजसुखस्यानुभवो यस्यातएव निरीहः निष्क्रियः योगेन निजसुखानुभवरूपयोगेन मीलितदृक् निवृत्तसंकल्परूपज्ञानः मीलितदृशेति पाठे मीलितदृशा योगेन निवृत्तसङ्कल्परूपज्ञानावस्थानयोगेन विशिष्ट इति शेषः । मीलितदृगित्यनेन प्रसक्तं निद्राप्रसङ्गं निराह, वीतनिद्र इति आधारान्तरनैरपेक्ष्यमाह आत्मनि स्थितः इति कथम्भूते तुर्ये जाग्रदाद्यवस्थात्रयातीते प्रथमान्तपाठोपि दृश्यते तत्राप्युक्त एवार्थः । तमः सूक्ष्मावस्था प्रकृतिः "अक्षरं तमसि लीयते" "आसीदिदं तमोभूतम्" इति श्रौतस्मार्त्तप्रयोगात् तमस्तद्गुणान् सत्त्वादींश्च न युङ्क्षे न सम्बध्नासि प्रकृतितद्गुणास्पृष्टो भवसीत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्वभृत्यभाषितमृतं कर्तुं स्तम्भादभूदिति यत्सूचितं पूर्वत्र तदिदानीं स्पष्टमाह—मत्प्राणेति । मत्प्राणरक्षणं मम पितुर्वधं च स्वभृत्यनारदऋषिवाक्यं च असङ्घिधित्सुः खड्गं प्रगृह्य हिरण्यकशिपुर्यदि मदपर ईश्वरोऽस्ति स त्वामवतु तस्य तव कं शिरो हरामीति यदवोचत् तच्च ऋतं विधातुं अयमवतारइति मन्य इत्यन्वयः ॥ २९ ॥

भ्रूविजृंभणविभ्रंशितेन्द्राद्यैश्वर्यस्य मत्पितुर्हननमस्माकं चित्रं चेदपि न तव चित्रं तस्य जगत्येकत्वात् जगच्च त्वत्सृष्टं त्वत्प्रविष्टं त्वदधीनसत्ताकमतः स्तम्भादाविर्भावोऽपि युक्त इत्याह—एक इति । अयमर्थः एतज्जगत्त्वमेव नान्यः कुतः एकः प्रधानः प्राधान्यं च कुतोऽवगम्यत इति तत्राह—अमुष्य इति । अमुष्य जगत आद्यन्तयोरुत्पत्तेः पूर्वं विनाशादूर्ध्वं च मध्यतः स्थितिकाले च त्वमेवावस्यसि सन्निहितनियामितोऽसि शाश्वत इति यस्मात् ननु जगतस्त्वद्विकारत्वेन तद्विवर्तत्वेन वा त्वदवसानं युक्तमत्राह—पृथगिति । भिन्नत्वेनेत्यर्थः। पुनः सृष्टिकाले निजमायया स्वसामर्थ्येन स्वाधीनया चिदचित्प्रकृत्या चेदं गुणव्यतिकरं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्भिन्नैः पदार्थैर्निमित्तैः नानेव भिन्न इव ननु भिन्न इत्यवसितोऽसीति यस्मात्च । प्रतिदृशमिव नैकधार्कमेकमिति श्लोकेः "इन्द्रो मायाभिः पुरुरूप ईयत" इति श्रुतेश्च "नेह नानास्ति किञ्चन" इत्यादि श्रुत्या नानात्वस्य निषिद्धत्वात् नानेवानुविधावतीत्यादिनानर्थहेतुत्वाच्च भेददृष्टेः ॥ ३० ॥

हरेर्जगदन्यत्वस्य स्पष्टमप्रतीतेः तदर्थं पूर्वपद्योक्तं विशदयति त्वं वाइति । हे ईश ! इदं सदसच्चराचरलक्षणं जगद्यं सत्ताया अपि त्वदधीनत्वादयं व्यपदेशो न तादात्म्यात् तत्वतस्तदात्मत्वं किं न स्यादिति तत्राह—भवानिति । ततो जगतो भवानन्योऽपि स्वतोभिन्नोपीत्यर्थः मत्स्वातन्त्र्यवज्जगत्स्वातन्त्र्यमपि, किन्त्वात्मनोरुभयोर्भेदोऽपि दृढतरः स्यादिति तत्राह—मायेति । आत्मेत्युपलक्षणम् आत्मानात्मलक्षणस्य प्रपञ्चस्य परत्वबुद्धिः स्वातन्त्र्यज्ञानं यत्सेयं मायाऽविद्यमाना कुतइति तत्राह—अपार्थेति । श्रीनारायणस्य तव स्वातन्त्र्यज्ञानं यथा पुरुषार्थसाधनं तथान्यस्य स्वातन्त्र्यज्ञानमनर्थहेतुरिति उभयं हिशब्देनासिद्धमिति दर्शयति स्वतन्त्रजीवात्मकत्वात्स्वतन्त्रं जगदित्यतोवाह—मायेति आत्मनो जीवस्य परत्वबुद्धिः जीवस्य परमैक्ये परमात्मना यज्जन्मादिकं क्रियते तदनेनापि कर्त्तव्यम् । तदनुभवविरुद्धमतो यद्यदधीनं जन्मादिकं तद्वस्तु तदेवेति प्राधान्यविवक्षया अभेदव्यपदेशोपपत्तेरिति प्रकारान्तरेण तद्गतिमाह—यद्यस्येति । अयमर्थः । यस्य जगतो जन्मादिकं यद्यदधीनं तज्जगत्तदेवेत्युच्यते इति यत्तस्माज्जगत्त्वमेवेत्यर्थः । अस्मिन्नर्थे दृष्टान्तमाह—स्वलिवति । उष्टित्वौः वृक्षदाहवृक्षयोः कालवत् कालाधीनत्ववत् एतदेवाचार्यैः सम्यग्विवृतं यथा वृक्षश्च वृक्षदाहकश्च दैवकालाधीनत्वाद्दैवं कालश्चेत्युच्यते एवञ्च त्वदधीनत्वात्सर्वस्य सर्वमित्युच्यते स्वतस्तद्भिन्नोऽपीति । "उष दाहे" इति धातुः अत्र खलु शब्दः साक्षादैक्यनिषेधे वर्तते "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति सूत्रात् अलमैक्यकथानिष्टत्वमित्यर्थः । "यएष आदित्ये पुरुषो दृश्यते सोहमस्मि सएवाहमस्मि यएषचन्द्रमसि पुरुषोदृश्यते सोहस्मि" इत्यादि श्रुतौ स्वस्यान्यस्य परमात्मत्वोपदेशः प्रतीयते अतः कथं भेदः कथ्यते इत्यतोवाह—मायेति । आत्माहं च परोन्यश्च परश्च परमेश्वरएवेति याबुद्धिरियमपार्था मायाभ्रान्तिस्तस्मात्तदधीनत्वात्तदन्तर्यामित्वेन स्थितत्वाच्च सोहमस्मीत्युच्यते ननु तद्रूपत्वादेतदप्याचार्यैरुक्तम् अहं चान्यश्च परमेश्वरएवेत्यपार्थाभ्रान्तिस्तदधीनत्वात्सइत्युच्यते न स्वरूपत्वादित्यर्थः । इति ईक्षणं ज्ञानम् ॥ ३१ ॥

सत्वमाद्यन्तयोरित्यत्रांते श्रीहरिरवशिष्यते इत्युक्तं तं प्रकारं दर्शयति---न्यस्येति । विलयांबुमध्ये इदं जगदात्मनि स्वोदरे न्यस्य शेषासनोभूत्वा तुर्यस्थितोजाग्रदाद्यवस्थाप्रवृत्तिशून्यमूर्तौ स्थितस्त्वं तमः प्रकृतिं गुणान्सत्वादींश्चात्मनि युंक्षे ननु "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः क्षोभयामास" इत्यादौ प्रतीतप्रस्ताज्ञानः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मत्प्राणरक्षणादिकञ्च तथैवेत्याह—मत्प्राणेति ॥ २९ ॥

अथ रसान्तरेण तत्क्रोधशमनं तथाहि कथमयं वराकस्तव क्रोधविषयो यत एक इत्यादि तथापि पूर्वेण सङ्गतिर्दृश्यते तथाहि—तदेवं भक्तानुग्रहसम्बन्धेन साक्षादेवावतीर्यास्मद्विधरक्षणं करोषीति स्थिते यदयमन्तर्यामितया सामान्यतो विश्वरक्षणं तच्च त्वयैव क्रियमाणमपि न साक्षात् किन्त्वन्यद्वारैवेति दर्शयंस्तदनुसङ्गतः सृष्ट्यादि लीलामाह—एक इति॥ ३० ॥

तत्र तस्य वैलक्षण्यं स्थापयति त्वम्वा इति॥ ३१ ॥

प्रसङ्गेन महाभक्तविरक्त्याद्यनुग्रहतः सृष्ट्यादिमयीं साक्षाल्लीलामेव विशेषतो वर्णयति—न्यस्येदमिति सप्तभिः। आत्मनि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गर्भोदकशायिरूपे जगत् त्रैलोक्यं योगमाह तुर्ये स्वतुरीयतत्त्वे श्रीवासुदेवाख्ये स्थितः । तन्मात्रत्वेनात्मन्युररीकृत स्फूर्त्तिः इत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतस्तव भक्तवश्यत्वाद्भक्तकृपानुगामिन्येव लोकेषु तव कृपा दृष्टा ननु त्वं स्वभक्तमनाश्रितान् कांश्चिदपि कृपयसीति नते क्वापि वैषम्यं मय्यपि तत्र स्वभक्तानुरोधेनैव सर्वं एवानुग्रह इत्याह–मद्विति। स्वभृत्यः ऋषिर्योनारदस्तस्य वाक्यं सत्यं कर्त्तुमित्यहं मन्ये मन्माता मदर्थं प्रार्थितेन श्रीनारदेन त्वत्पुत्रस्य विद्वेषकनाशादिना कल्याणं भविष्यतीति वरदानात् यदुक्तम् "ऋषिं पर्य्यचरत्तत्र भक्त्या परमयासती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छा प्रसूतये ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः" इति यद्यस्माद्सत् मद्धिंसनं विधित्सुः कं शिरो हरामीति तथाहि दिग्गजादिभ्यो यथा मद्रक्षणं तथा तद्धस्तान्नसम्भवतीति तद्वधश्च त्वया कृत इति एवं भगवतः सर्वत्र साम्येपि भक्तवश्यत्वं विशिष्यत इति प्रह्लादेन ज्ञापितम् ॥ २९ ॥

एवं गुणातीतानां मादृशभक्तानां गुणातीतेन त्वया भक्तवत्सलेन पालनं गुणातीतमेव गुणमयस्य जगतस्तु सृष्टिपालनसंहारा उदासीनेनैव त्वया गुणमया एवेति वदंस्तस्य जगतस्तत्कारणकत्वात् त्वन्मयत्वमेवेत्याह–एक इति। यद्यस्मादमुष्य आदौ अन्ते मध्येच अमुष्मात् प्रथग्भूतोऽपि त्वमेव अवस्यासि अवसीयसे विवेकिभिः प्रतीयसे इत्यर्थः कुतस्तर्हि तथा न प्रतीतिस्तत्राह निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वेति निर्गुणस्य तव शक्तेः स्वरूपशक्तित्वाभावादितिभावः। तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव हंतेवपालक इव उत्पादक इव अवसितः वस्तुतस्तु तमोगुण एव हन्ता सत्त्वगुणएव पालकः रजो गुण एव स्रष्टा तेष्वौदासीन्येन त्वत्प्रवेशादेव त्वं हन्तेत्यादि व्यपदेशः ॥ ३० ॥

ननु, जगतोमायिकत्वेपि मायाया मच्छक्तित्वाज्जगतो वैषम्ये ममापिवैषम्यं किं नस्यादित्यत आह त्वं वै इदं सदसत् कार्यं कारणात्मकं जगत्प्राधानिकत्वात् सत्यमेव न तु त्वत्तः पृथक्। ततोऽस्माज्जगतस्तु भवानन्यः पृथगेव आद्यन्तयोः पृथगवस्थानात् यद्यत्तु तस्मिन्नेव जगति आत्मा अयं ममात्मीयः परः अयं ममशत्रुरिति बुद्धिः सा माया अविद्या जीवस्याविद्या कल्पितैवेत्यर्थः। अपार्था सातु मिथ्याभूतैवेत्यर्थः । कार्यस्य कारणाभेदमपि साधयन् दृष्टान्तेन परमकारणस्य भगवतो वैषम्यमपि निराकरोति यद्यतः यस्य जन्मईक्षणञ्च प्रकाशश्च यस्मिन्निधनं स्थितिश्च तद्वेतदेव अष्टि बीजं कारणं तरुः कार्यं तयोर्वस्तुकालवत् वस्तुत्वकालत्वे यथेत्यर्थः वस्तुशब्देन वस्तुमात्रं भूतसूक्ष्ममुच्यते कालशब्देन नीलत्वासाधारणगुणयोगात् पृथ्वी कालशब्दोऽत्र नीलगुणवाची ततश्चकारणकार्यात्मकयोरपि तयोर्द्वयोरेव यथा पृथिवीत्वं गन्धत्वञ्च तथैव कारणकार्य्यात्मकस्य जगतः प्रधानत्वं परमेश्वरत्वं च अयमर्थः यथा वस्तुमात्रत्वकालस्य कालमात्रमष्टेः अष्टिमात्रत्वं प्रधानस्य प्रधानमात्रत्वं महदादीनां महदादिमात्रत्वं देवतिर्य्यगादिमयं जगतः, एवं च तर्वादि सर्वकार्य्यकारणात्मकं यथा भूतसूक्ष्ममेको गन्धएव तथा देवतिर्य्यगादिसर्वकार्य्यकारणात्मक एको भवानेव तथा च पारमर्षं सूत्रं "तदनन्यत्वमारंभणशब्दादिभ्यः"इति. श्रुतिश्च"वाचारम्भणं विकारोनामधेयं मृत्येके त्येव सत्यम्" इति तेन पार्थिवपदार्थानां काष्ठपाषाणादीनां वैषम्येपि तत्परमकारणस्य गन्धस्य यथा न वैषम्यं तथैव जगतो वैषम्येपि न भगवत इति ॥ ३१ ॥

आद्यन्तमध्यावस्थानेनोक्तं जजत्कारणत्वं प्रपञ्चयति–न्यस्येति पञ्चभिः। इदं जगत् आत्मन्येव न्यस्य विलयानि विगतलयान्यनश्वराणि अंबूनि यस्य तस्य कारणार्णवस्य मध्ये शेषे स्वपिषि आत्मना आत्मस्वरूपशक्त्यैव निजसुखस्यानुभवो यस्य सः निरीहः मायिकलीलामनिच्छुः तर्हि किं जीवस्येव ममापितमोरूपा निद्रास्ति नहि नहि बहिः वृत्यभावसाम्यान्निद्रोच्यते इत्याह योगेन मीलितदृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुरीये अवस्थात्रयातिरिक्ते स्वरूपे स्थित एव नतु तमः सुषुप्तइव युंक्षे जीववत् स्वीकरोषि नापि जाग्रत् स्वप्नयोरिव गुणान् विषयान् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

श्रीनारदेनोक्तामिन्द्रं प्रति अनन्तानुचर इति तदृषिवाक्यं स्वानुचरत्वसूचकेन मद्रक्षणेन सत्यं कृतमित्याह--मदिति। यत् यदा मत्पितुः वधं विधातुं खड्गं प्रगृह्य मदपरः मद्यतिरिक्तश्चेदीश्वरो स्त्यधुना ग्रहीष्यतीति वदन्निति दयुक्तं पुत्रं वधं विधातुं खड्गं प्रगृह्य मदपरः मद्यतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरो हरामीत्यवोचत् मम पितेति शेषः तदा यत् मत्प्राणरक्षणं तदर्थं मत्पितुर्वधश्च तव हे अनन्त ! स्वभृत्यो य ऋषिस्तस्य अनन्तानुचर इति वाक्यमृतं यथा भवति तथा विधातुमिति अहं मन्ये ॥ २९ ॥

एवं सर्वत्र समेनापि भगवता स्वभक्तपक्षपातित्वेनासुरं हत्वा मद्रक्षणं कृतमित्युक्तमथैवं सर्वहेतुत्वेन सर्वात्मनापि त्वया बहूनां ब्रह्मादीनां बहून् मधुकैटभादीन् हत्वा रक्षा कृता इत्येवं भगवन्तं स्तौति। एकस्त्वमित्यादिभिर्नवभिः। एतच्चिदचिदात्मकं जगद् त्वमेव "सर्वं खल्विदं ब्रह्म" इति श्रुतेः एकः सर्वकारणभूतः "स कारणं करणाधिपाधिपः" इति श्रुतेः कुत एतदहमस्मीत्यत आह अमुष्य कार्यभूतस्य सत्त्वम् आद्यन्तयोर्मध्यतो मध्ये च औषध्यादेर्भूमिरिव त्वमसि हेतुतया वर्त्तसे इत्यर्थः ननु तर्हि संसारित्वजडत्वादयो दोषाः मयि स्युरित्यत्राह पृथक् चासि चेतनाचेतनरूपात्स्वकार्यभूताज्जगतः स्वरूपतो भिन्न एवासि चिदचिदात्मकजगद्भिन्नोसीत्यर्थः तथा ह भगवान्सूत्रकारः "उभयव्यपदेशात्त्वहिकुण्डलवत्" इति सूत्रार्थस्तु वेदान्तकौस्तुभे द्रष्टव्यः। यतः गुणव्यतिकरं स्वशक्तिगुणपरिणामरूपं स्वांशभूतजीवभोगार्थं अपरिणामस्वरूपमेवेदं जगत् मायया वयुनेन सङ्कल्पेनेत्यर्थः ततः पृथक् स्वरूप एव सृष्ट्वा तत्सृष्टं जगदनुप्रविष्टः यैर्गुणैरावृतान् जीवान् लक्ष्य निग्रहानुग्रहादिकं करोषि तैर्गुणैर्नानेव निग्रहादिकर्त्तेव

Dr. Urmila Sharma Collection, Varanasi

तस्यैव ते वपुरिदं निजकालशक्त्या सञ्चोदितप्रकृतिधर्मण आत्मगूढम् ।
अम्भस्यनन्तशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाऽब्जम् ॥ ३३ ॥
तत्सम्भवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य ।
नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजम् ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रवसितः तमोगुणावृत्तेन जीवेन पापकर्मफलदत्वेन निग्रहकर्त्ता रजोगुणावृत्तेन ऐहिकपुण्यकर्मफलदत्वेनानुग्रहकर्त्ता सत्त्वगुणावृत्तेन जीवेन पारलौकिकसुखदत्वेनानुग्रहकर्त्ता निश्चितः सन् इद-मवसि ॥ ३० ॥

इमं कार्यकारणयोर्जगद्ब्रह्मणो भेदाभेदसम्बन्धं दृष्टान्तेनोपपाद-यति, त्वमिति । यद्यतो यस्य जन्मोत्पत्तिः निधनं समाप्तिः स्थितिः पालनमीक्षणं दर्शनम् तद्भिन्नमपि तदेव तदभिन्नमेव वसुकालवत् वसुकालयोरिव वसुकालवत् एको वै शब्द इवार्थे तस्य आष्टनवौ-रिवेत्यन्वयः वसुशब्देन वसुधा गृह्यते तथा च वसुतः वसुधातः उत्पत्तिरौषध्यादेः तद्वसुधातो भिन्नमप्यभिन्नमेव कालतः समाप्ति-क्षणादेस्तच्च ततो भिन्नत्वेऽप्यभिन्नम् आष्टितोऽन्नात्पालनं शरीरस्य तच्च ततो भिन्नत्वेऽप्यभिन्नम् रुद्रतो दर्शनं हरितादेस्तच्चापि ततो भिन्नम् एवं हे ईश ! यद्यपि भवान् स्वाम्नायारणरूपेण ततो जगतो ऽन्यो पि तथापि इदं चिदचिदात्मकं सदसत्स्थूलसूक्ष्मरूपं जगत् वै निश्चितं त्वमेव त्वत्तो भिन्नमप्यभिन्नमेव तथा च श्रुतिः "सर्वं ख-ल्विदं ब्रह्म तज्जलानिति" इति यत् या आत्मनि विश्वात्मनि त्वयि पर बुद्धिः मत्तः सर्वथान्योयमिति केवलभेदबुद्धिः सा माया दम्भरूपा अपार्था च "अन्यो सावन्योऽहमस्मि न स वेद यथा पशुः" इति श्रुतेः ॥ ३१ ॥

अथ भगवतः महाप्रलयान्ते परे वैकुण्ठे शयनं तदनन्तरं ब्रह्माण्डो-त्पादनं ब्रह्मोत्पादनं तद्वनादिकं च चेष्टितं जीवाहितायैवेति वर्ण-यति—त्वय्येत्यादिना । निरीहः स्वकलोकक्रीडेच्छः अत एव निजसुख-स्याऽनुभवो यस्य सः त्मना आत्मना आत्मनि कारणरूपे कार्यरूपमिदं जगत् न्यस्य विलयानि विगतलयानि नित्यानि अप्राकृतानि अम्बूनि यस्मिन् तत्परमं धाम तन्मध्ये योगेन निजानन्दयोगेन निमीलितदृक् प्राकृतनिद्राप्रसङ्गं निवारयति आत्मनिपीतनिद्र इति आत्मना परा-नंदस्वरूपप्रकाशेन निपीता निद्रा येन सः शेषे शयनं करोषि तस्य लोकस्य प्रकृतितद्गुणवर्जितत्वमाह, तुर्ये प्रकृता ये लोकाः ऊर्ध्वाधो मध्यभेदात् त्रिविधाः तदपेक्षया चतुर्थे—

"ऊर्द्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः" ॥

इत्येवं त्रिविधजीवागम्ये इत्यर्थः । तत्र स्थितः तमः प्रकृतिं तदीयान् गुणांश्च न युंक्षे न योजयसि तत्र प्रकृतितद्गुणतत्कार्यव्यवहारं नैव प्रवर्त्तयसीत्यर्थः ॥ ३२ ॥

भाषा टीका ।

हे अनंत ! आपने मेरे प्राणों की रक्षा और पिता को वध ये दोनों जो किये सो में जानता हूं कि अपने दास और ऋषि लोगों के वाक्य सत्य करने के वास्ते किये, जो मेरा पिता हाथ में खड्ग लेकर बोला कि मेरे से दूसरा यदि ईश्वर है तब तेरी रक्षा करे मैं तेरा मस्तक हरण करता हूं ॥ इतने पर आपने रक्षा करी ॥ २९ ॥

यह संपूर्ण जगत् एक आपही का स्वरूप है इस जगत् के आदि अंत में आपही विराम करते हैं अर्थात् वर्त्तमान रहते हैं अत एव मध्य में भी आपही हैं आप अपनी निज मायासे गुणों के परिणामात्मक इस जगत् को रचकर उसमें प्रविष्ट होकर नाना सरीके मालूम पडते हो ॥ ३० ॥

हे ईश ! यह कार्य कारणात्मक जगत् आपसे पृथक् नहा है आप तो जगत से भिन्न हो क्योंकि ? आदि तथा अंत में स्थूल चेतनाचेतन युत जगत नहीं रहता और आप तो स्थित रहते हो, और यह जो बुद्धि है कि "यह मेरा और यह पराया, सो अपार्थ माया ही है जिस परमात्मा से इस जगत् का जन्म नाश स्थिति और प्रकाश है उसी स्वरूप यह है, जैसे बीज और वृक्ष कार्य कारण मात्र अवस्था से भिन्न हैं ॥ जो जिससे आरम्भ होता है वह भी तत्स्वरूप ही है जैसे मृत्तिका से हुआ घट मृत सरूपही है ॥ ३१ ॥

प्रलय काल के जल मध्य में आप अपने में इस जगत् को लीन कर, निज सुख मात्र के अनुभव वाले निश्चेष्ट होकर सोते हैं उस समय में आप योग से निमीलित दृष्टि वाले होकर आत्मा में निपीत की निद्रा जिसने एसे चतुर्थ अवस्था में स्थित होकर तम और गुणों का योग नहीं करते हैं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं कारणत्वेनाऽद्यावपि पृथगवस्थानं दर्शयन्मध्यतश्च त्वमे-वेत्येतत्प्रपञ्चयति चतुर्भिः । यस्त्वमम्भसि शेषे तस्यैव ते इदं जग-द्वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोऽपि तस्य कथम्भूतस्य निजया कालशक्त्या सञ्चोदिताः प्रकृतेर्धर्माः सत्त्वादयो येन स्वरूपत्वे हेतुः अनन्तशयनाच्छेषपर्यङ्काद्विरमत्समाधिर्यस्य तस्य तव नाभेः सकाशात् एकार्णवोदके महाब्जं लोकपद्ममभूत् कथम्भूतं आत्मनि त्वय्येव गूढं सत् स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥ ३५ ॥
एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम्।
मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चिः ॥ ३६ ॥
तस्मै भवान्हयशिर(१)स्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ।
हत्वाऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनन्ति ॥ ३७ ॥
इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान्।
धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥ ३८ ॥
नैतन्मनस्तव कथासु विकुण्ठनाथ! सम्प्रीयते दुरितदुष्टमसाधु तीव्रम्।
कामातुरं हर्षशोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥
जिह्वैकतोऽच्युत! विकर्षति मा वितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्।
घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तदेवं कारणत्वेनानुगतः सन्मध्यतश्च त्वमेव वर्तस इत्युक्तम् एतदेव शुद्धसत्त्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह—तस्मिन्नब्जे सम्भवो यस्य कविर्ब्रह्मा अतः पश्चादन्यदपश्यन् बीजमुपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं सन्तमपि नाविन्दत् युक्तं चैतत् उह अहो अङ्कुरे जाते सति बीजं तदनुगतं कारणं पृथक्कथं नाम पुमान्पश्येत् ॥ ३४ ॥

भवदुपासनया तु स्वस्मिन्नेव दृष्टवानित्याह—सत्विति। परावृत्त्याऽब्जमास्थितः सन् तीव्रेण तपसा ध्यानेन अनेन सन्मात्ररूपेणोपादानतया दर्शनमुक्तम् ॥ ३५ ॥

ईश्वरत्वेन च दृष्ट्वा कृतार्थोऽभवदित्याह—एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धम् मायामयं मायाप्रधानं सता प्रपञ्चेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ॥ ३६ ॥

तदा च भवांस्तस्यानुग्रहं कृतवानित्याह—तस्माइति। हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् तत्र हेतुः सत्त्वमिति ॥ ३७ ॥

एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधिको ननु स्वतइति तदुपसंहरति—इत्थमिति। विभावयसि पालयसि हंसि घातयसि कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः अतस्त्रिष्वपि युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३८ ॥

तदेवं भगवतस्तत्त्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते—नैतदितित्रिभिः। असाधुबहिर्मुखम् तीव्रं दुर्धरम् हर्षशोकभयैरेषणात्रयेण चार्तं दुःखितमपि त्वत्कथासु न संप्रीयते तस्मिन्नेवम्भूते मनसि सति कथं तव तत्त्वं विचारयामि ॥ ३९ ॥

किञ्च जिह्वा अवितृप्ता सती भो अच्युत! मा मां यतो मधुरादिरसस्तत आकर्षति उदरं तु क्षुधासन्तप्तं सत्तद्य एव यत्किञ्चिदाहारमात्रंप्रति चपला दृक् चक्षुः कर्मशक्तिः कर्मेन्द्रियाणि लुनन्ति त्रोटयन्ति ॥ ४० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवमुपसंहृतजगतः कारणतयावस्थिताज्जगत उत्पत्तिप्रकारं मध्यतस्तदनन्यत्वप्रदर्शनायाह—तस्यैवेति। तस्योक्तविधमवस्थितस्य तव नाभेर्वपुस्त्वच्छरीरभूतं जगदाकारं महाब्जमभूदुद्भूव कथंभूतस्य तव निजकालशक्त्या स्वांशभूतया कालाख्यया शक्त्या सञ्चोदिता क्षुभितगुणा प्रकृतिरेव धर्मः अपृथक्सिद्धविशेषणं यस्य तस्य अम्भसि अनन्तशयनादिति ल्यब्लोपे पञ्चमी शेषपर्यङ्कादुत्थाय विरमन्समाधिः जगद्व्यापारवैमुख्येनावस्थानरूपो यस्य सिसृक्षोरिति फलितोर्थः, एवंभूतस्य तव नाभेः त्वच्छरीरभूतं जगदात्मकमात्मनि त्वयि निगूढं सूक्ष्मावस्थापन्नं महाब्जं स्वकणिकात्स्वबीजाद्वटवदभूदित्यर्थः ॥ ३३ ॥

तत्संभवस्तन्महाब्जसंभवः कविर्ब्रह्मा अतः पश्चादन्यदपश्यमानः स्वात्मन्यन्तरात्मतया ततं व्याप्तं बीजं पद्मस्य कारणभूतं त्वां स्वस्माद्बहिस्तया अब्दशतं वर्षशतमप्सु निमज्जमानो विचिन्वन्नन्वेषयन्नाविन्दत नोपलब्धवान् अहो तथाहि, अङ्कुरे जाते बीजं कथमुपलभेत नोपलभेतैवेत्यर्थः। यथाऽङ्कुरे जाते सति ततः पृथक्स्थितं बीजं नोपलभते लोकस्तथा मत्कार्य-

(१) तनुतामिति पाठः वीर०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतं जगदात्मकं पद्मं मदभिन्नमिति दर्शयितुं भवान्बहुधा विचिन्वतापि ब्रह्मणा नोपलब्धइति भावः ॥ ३४ ॥

ततो भगवदुपासनया स्वस्मिन्नेव दृष्टवानित्याह—सत्विति । स तु विचिन्वन्नात्मयोनिर्ब्रह्मा अतिविस्मितः अब्दशतपर्यन्तान्वेषयोनापि अनुपलम्भप्रयुक्तविस्मययुक्तः परावृत्त्याब्जमाश्रितस्सन् तीव्रेण तपसा ध्यानेन परिशुद्धभावः परिशुद्धमनाः निरस्तत्वद्दर्शनविरोधिकर्मा हे ईश ! त्वामात्मन्येव विततं व्याप्तं ददर्श कथंभूतं भुवि गन्धमिवातिसूक्ष्मं स्वात्मनः पृथग्विभागानर्हम् अति सूक्ष्मभूतेति समस्तपाठे भुवि गन्धमिवात्मनि विततं ददर्श भुवि गन्धमिवेत्यवस्थानमात्रे दृष्टान्तः अति सूक्ष्माणि विभागानर्हाणि कारणात्मतामापन्नानि भूतान्याकाशादीनि इन्द्रियाण्याशयोन्तःकरणञ्च तन्मयं तत्प्रचुरमेवंभूतं तावद्ददर्श ॥ ३५ ॥

ततः सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धमतएव मायामयमाश्चर्यरूपं सदुपलक्षणासन्निवेशं सतासत्त्वेनानित्यत्वनोपलक्षणीयः सन्निवेशः वदनाद्यवयवसंस्थानं यस्य तं सता सूक्ष्मरूपेण सता प्रपञ्चनोपलक्षितः सन्निवेशो वदनादिविन्यासो यस्य तमितिवा एवंभूतं महापुरुषं दृष्टा विरिञ्चो ब्रह्मा मुदं हर्षमाप प्राप्तवान् ॥ ३६ ॥

तदा च तं भवाननुगृहीतवान् इत्याह—तस्मा इति । तस्मै तीव्रतपसा परिशुद्धभावयोक्तविधं त्वां दृष्टवते विरिञ्चाय भवान् हयशिरस्तनुतां हयग्रीवरूपं बिभ्रत्श्रुतिगणान्सृष्ट्युपायावेदकान् वेदगणान् आनीय समर्पितवान् किं कृत्वा आनयत् रजस्तमश्च रजस्तमोरूपौ वेदद्रुहौ वेदापहारिणावतिबलौ मधुकैटभाख्यातिबलावसुरौ हत्वा समर्पितवान् यतस्समर्पितवानत एव तव प्रियतमां तनुं हयशिरस्तनुं सत्त्वं शुद्धसत्त्वात्मिकाम् आमनन्ति धर्मस्थापनायोपात्तां तनुं शुद्धसत्त्वमयीमामनंति जानन्ति अवतारयाथात्म्यविद इति शेषः ॥ ३७ ॥

एवं जगतउत्पत्तिप्रकार उक्तः अथ रक्षाप्रकारमाह, इत्थमुचितकालेषु तैस्तैः स्वेच्छोपात्तैः शुद्धसत्त्वमयैः नृतिर्यगृषिदेवझषावतारैः रामकृष्णवराहपरशुरामोपेन्द्रमत्स्यावतारैः अवतारान्तराणामपीदमुपलक्षणं लोकान् विभावयसि पालयसि जगद्विरोधिनो रावणादीन्हंसि च हे महापुरुष ! युगानुवृत्तं कृतादियुगेष्वनुवृत्तं धर्मं वर्णाश्रममर्यादादिरूपं जगत्प्रतीपनिरसनेन पासि पालयसि यतस्त्वं कलौ युगे छन्नोऽभवः आसीः अथ ततः त्रियुगशब्दप्रवृत्तिनिमित्ताश्रयोसि कृतत्रेताद्वापरेष्वेवावतारमुखेनाविर्भावात् त्रियुग इत्यभिधीयत इत्यर्थः ॥ ३८ ॥

एवमखिलजगदुदयविभवलयैककारणं तदन्तरात्मानं तच्छरीरकं संस्तुत्य यथावत्स्वरूपरूपादिविमर्शने मन्मनो न समर्थमिति वदन् किञ्चित्प्रार्थयते नैतदिति त्रिभिः । हे विकुण्ठनाथ ! दुरितैर्दुष्टमतएवासाधुवृत्ति कामातुरं विषयप्रवणं हर्षेणाभिमतविषयलाभे हर्षेण तद्विपरीतविषयलाभे तु शोकेनेषणाया पुत्रदारधनैषणाया चार्तं मदीयं मनः तव कथास्वेव न सम्यक् प्रीयते, नासक्तं भवतीत्यर्थः । तस्मिन्मनस्येवं स्थिते सति दीनः विषयपारवश्येन दुःखितोऽहं तव गतिं याथात्म्यं कथं विमृशामि ॥ ३९ ॥

न केवलं मन एव ममैवं जातं किन्त्विन्द्रियान्तराण्यपीत्याह—जिह्वेति । हे अच्युत ! जिह्वा मा अवितृप्ता अतृप्तासती एकतो मधुरादिरसान् प्रति मां विकर्षति तथा शिश्नोप्यतृप्तः त्वगादयश्च कुतश्चिद्विकर्षन्ति तत्तद्विषयभोगाय कर्षन्ति चपलदृक् चञ्चला दृष्टिः क्वचाभिमतरूपदर्शनाय विकर्षति उदरशब्दः प्राणोपलक्षकः तथा कर्मशक्तिः क्रियाशक्तिः पाणिपादादिरपि विकर्षति क्वचिद्गेहपतिं गृहस्थं बह्वयः सपत्न्य इव देहपतिम् इन्द्रियाणि लुनन्ति विकर्षन्तीत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्टेः प्रागित्युक्तं दर्शयति—तस्येति । तस्य तुरीयस्यास्य जगत्कारणस्य च कश्चिद्विशेषोनास्तीति द्योतनायैवकारः आत्मनि देहे जठरे गूढं निलीनमिदं जगज्जगदात्मकं महाब्जं यस्य तव नाभेरभूत्तदब्जं तस्यैव ते वपुः सन्निधानविषयत्वात् प्रतिमास्थानीयम् । कीदृशं स्वरूपं भूतसृष्टिकालशक्त्या संचोदितं सृष्टये प्रेरितं कटाक्षीकृतं कीदृशस्यास्य प्रकृतिधर्मिणः प्रकृतिप्रेरकधर्मवतः प्रलयोदकेऽनंताख्यशयनादुत्थाय विरमन् समाप्तिं कुर्वन् समाधिर्योगनिद्रालक्षणो यस्य स तथा तस्य कथमिव वटवत् वटलक्षणोंकुरोयथा स्वकणिकात् उत्पत्स्यमानकणिकात् कणिकाख्यवटबीजादित्यर्थः । नन्वयंविषमोदृष्टान्तस्तथाहि, कणिकानाम । वटबीजविकारोहि वटाख्यांकुरः न चायं प्रकृते सम्भवति. "निर्विकारोक्षरः शुद्धः" इति वचनादुच्यते स्वकणिकादितिलिङ्गव्यत्ययेन कश्चिद्विशेषोविज्ञायते कोयमिति चेदुच्यते कणिकानामादृश्या देवता सर्वस्थावरबीजानामभिमानिन्यपि वटाश्वत्थबीजयोर्विशेषतः संनिहिता अतस्तत्तद्बीजेभ्यस्तदंकुरव्यंजनात्तत्प्रागपि तत्र स्थित्वा जातेत्युच्यते यथा, तथा श्रीहरेरपि प्रकृत्यादिस्वामित्वेन च तत्सान्निहितत्वेन च स्थितस्तत्कार्येष्वनुविष्टत्वेन जातइत्युच्यते "आत्मन आकाशः सम्भूतः" इत्यादौ श्रुतत्वात् तत्रापि वटबीजाद्वटांकुरस्य साक्षादुत्पत्तिर्वटवृक्षिणश्चेतनस्य चेतनाभिमानादुत्पत्तिः उभयाभिमानिन्या देवताया अभिव्यंजकत्वेनाऽभिव्यक्तिस्तथा यथायोग्यं सत्त्वतमोमिश्ररजोगुणान् जगदात्मनः पद्मस्य साक्षादुद्भवः पद्मिनो हिरण्यगर्भस्याभिमानजननं हरेः पुरुषांतरेणाविर्भावइत्यादिकमिति; "स्थावराणां तु सर्वेषां देवतायाभिमानिनी । विशेषाद्वटबीजे च अश्वत्थे च व्यवस्थिता ॥ अदृश्या कणिका नाम सा वृक्षाद्व्यंजयत्यपि । अतोबीजमिति प्रोक्ता सा जातेत्यंकुरे स्थिता ॥ एवं हरिः कारणेषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं तत्र दृश्यते" इत्यनेनोक्तविशेषोविज्ञायतइति न कापि शंका कार्येति, तस्माद्दृष्टांतदार्ष्टांतिकयोरुपपत्तिरस्तीति युक्तएव दृष्टान्तः ॥ ३३ ॥

तत्र विरिञ्चस्य लोकपद्मलक्षणदेहाभिमानोत्पत्तिपूर्वकं हरेर्वटबीजाभिमानिदेवतावददृश्यत्वं प्रकटयंस्तस्य मीमांसामाह—तत्सम्भवइति । पद्मस्य प्रकृत्यात्मकत्वेन तस्मात्पद्मात् सम्भवो जननं यस्य स तथा लोकात्मकत्वेन तस्मिन्देहस्थानीयेऽभिमानसम्भवो यस्य स तथा उभयोरप्यत्र विवक्षितत्वात् अतः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अब्जादन्यद्वस्तु न पश्यन्नप्सु निमज्जमानोनिमज्य मूलं विचिन्वन् लोके बीजादङ्कुरे जाते नष्टं बीजमिव पृथिव्यां कथमुपलभेत पुरुषइति तच्चिन्तां दर्शयन्नेवं विभुःकविर्ब्रह्माऽऽत्मनि स्वस्मिन्नेव अब्जांतस्तस्गादूबहिश्च विततं व्यञ्जकत्वादूबीजदेवतावत् बीजसंज्ञत्वान्नाविन्नोपलब्धवानित्यन्वयः ॥ ३४ ॥

आत्मा परमात्मा योनिः कारणं यस्य स तथा तुशब्देनैकस्य हरेर्बहुधाजन्मास्तीति विशेषं दर्शयति सएव ब्रह्मा अब्दशतसंज्ञितेन कालेन विचिन्त्य विविधपृथिव्याद्याधारणामनुत्पन्नत्वादस्य केनचिदाधारेण भवितव्यं लौकिके बीजनाशवत् नाशायोगात् सन्नपि न दृश्यते कुतूहलमेतादिति अतिविस्मितोऽब्जमाश्रितस्तपेतिद्व्यक्षरं श्रुतवान् तपसाहं द्रष्टुं शक्तइत्यनेनोक्तमभिजानन् तीव्रेण तपसा परिशुद्धांतःकरणोभूतेन्द्रियाशये जगति विततं त्वामात्मनि स्वस्मिन् स्थितं ददर्शेत्यन्वयः कथमिव भुवि व्याप्तमतिसूक्ष्मं गन्धाख्यदेवतास्वरूपं यथा पश्यति योगी तथेत्यर्थः गन्धाख्या देवता यद्वत्पृथिव्यां व्याप्य तिष्ठति एवं व्याप्तं जगद्विष्णुं ब्रह्मात्मस्थं ददर्श हेतिवाक्यं गन्धशब्देन देवताकथनं युक्तमिति भावः ॥ ३५ ॥

यथा सूक्ष्मरूपं दृष्ट्वा मुमुदे तथा विराड्रूपमपि तयोरीषदपि विशेषाभावादित्याह—एवमिति । अनेन ब्रह्माण्डशरीरी ब्रह्मा "पातालमेतस्य हि पादमूलम्"इत्याद्युक्तं यद्रूपमपश्यत्तदेव पद्मजोपीति ज्ञातव्यम्. आत्मयोनिरिति विशेषणान्मायामयं ज्ञानरूपम्. अनिर्वाच्याविद्यामायानामेति–किंनस्यादित्यत्राह सदिति । आनन्दादिलक्षणसमुदायरूपम्. अथ कस्मादुच्यते सदिति "सन्तो ह्यस्मिन्नानन्दओजोबलम्"इति स्पष्टश्रुतेः ।"सन्निवेशश्च यः स्तोमः समुदायोगणः स्मृतः"इत्यभिधानम् आनन्दादिलक्षणानां सन्निवेशो यस्मिन् स तथा तं गुणगुणिनोरभेदात्स्वरूपत्वं सिध्यति "विज्ञानमानन्दं ब्रह्म"इति श्रुतेः, लक्षणत्वज्ञापनायादिशब्देन ज्ञानग्रहणम् ॥ ३६ ॥

रजस्तमःस्वभावावतिबलौ वेदद्रुहौ मधुकैटभाख्यौ हत्वा श्रुतिगणाननयत् आनीयास्मै विरिञ्चायावोचादिति शेषेणान्वयः अनेनैतत्सिद्धमभूदित्याह—सत्त्वमिति ॥ ३७ ॥

चतुष्पद्धर्मं पासि यस्त्वं कलौ छन्नोऽभवद्दति यस्मात्तस्मात्स त्वं त्रियुगइति ख्यातः ॥ ३८ ॥

एवं हरेर्भक्तवात्सल्यं विज्ञाप्य स्वाशक्तिं विज्ञापयति—नैतदिति । यदेतन्मनस्तव कथासु न सम्प्रीयते तस्मिन्मनसि तव गतिं कथं विमृशामीत्यन्वयः ईषणां वित्तादीनामिति शेषः ॥ ३९ ॥

मनःसमाधानाभावादन्येन्द्रियाण्यपि सत्पुरुषार्थविरुद्धानीत्याह जिह्वेति । स्पर्द्धाभाषणशीलत्वाज्जिह्वा दुःसंगेन पुण्यश्लथनशीलत्वात् शिश्नः"त्वच संपर्के"इति धातोः दुःसंपर्कशीलत्वात्त्वक् उदरात्ककुदं नमयतीत्युदरं कर्मशक्तिरित्यनेन कर्मेन्द्रियाणि वागादीनि लक्षयति गेहपतिं देहस्वामिनं अन्यत्र गृहपतिम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जातमात्रेप्यंकुरेऽधिकरणे स्वांशेन वर्त्तमानमपि बीजं कथमुपलभते ? नैवेत्यर्थः । किन्तु तत्तल एवोपलभते तत्तु तस्यांगम्यमेवासीदिति भावः ॥ ३३ ॥ ३४ ॥

ततश्च समाधिना प्रथमं तावत् तत्रैव ब्रह्माख्य सन्मात्रत्वेन तमनुभूतवानित्याह—सत्विति ॥ ३५ ॥

ततश्च सच्चिदानन्दरूपं तस्य विग्रहमपि दृष्टवानित्याह-एवमिति । ननु, कथं तलस्थबीजस्थानीयस्य तस्य तत्रैव दर्शनं तत्राह एवं समाधौ विततत्त्वानुभवप्रकारेणैवेति तद्विग्रहस्य मध्यमपरिमाणतया दृश्यमाणत्वेपि विष्णुत्वानुभवादिति भावः मायामयं प्रचुरतच्छक्तिमिति प्रपञ्चाधिष्ठातृत्वात् ॥ ३६ ॥ ३७ ॥

तत्रतत्र साक्षादवतीर्य तत्पालनत्वेनोपसंहरति—इत्थमिति ॥ ३८ ॥

तदेवं तत्कथामनूद्य पूर्वपूर्वजन्मस्वभावमनुस्मृत्य तच्च दैन्येनास्मिन् जन्मन्यारोप्य तस्यामप्यतितृष्णया तामसेवमानमिव मत्वा स्वमनस्तिरस्करोति–नैतन्मन इति ॥ ३९ ॥

तदेव दुःखसादृश्येन जनदुःखमनुस्मृत्य कृपापरवशः स्वदुःखमप्यनादृत्य तदर्थमेव निवेदयति–जिह्वैकत इति द्वाभ्याम् ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च तस्यैव तव पुनः सृष्टयारंभे निजकालशक्त्या सञ्चोदिताः प्रकृतेर्धर्माः सत्त्वादयो येन तस्य आत्मनि स्वस्मिन् गूढमेव इदं ब्रह्माण्डरूपं वपुः प्रकृतेः सकाशात् प्रकटमभूत् ततश्च अम्भसि तदण्डगर्भोदे शयानस्य तव अनन्तशयनात् विरमन् समाधिर्यस्य तस्य नाभेः सकाशात् महाब्जम् अभूत् स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

तत्संभवः तदब्जजातः कविर्ब्रह्मा अतोऽब्जादन्यदपश्यन् तद्बीजं स्वशक्त्यैवोपादानकारणं त्वाम् आत्मनि स्वस्मिन् विततं व्याप्त्या सन्तमपि स्वबहिरेव वर्त्तमानं विचार्य्य अब्दशतं व्याप्सान्विष्यन्नपि ना धिंदत् युक्तं चैतत् उ अहो अंकुरे जाते तत्र स्वांशेन वर्त्तमानमपि बीजं तत्रांकुरेऽधिकरणे कथं उपलभेत किन्तु तत्तले एव उपलभ्येतेत्यर्थः । कमलशूरणादीनां अंकुरेषूत्पद्योत्पद्य नष्टेष्वपि बीजनाशदृष्टेः तत्तलंतु तदानीं ब्रह्मणोऽगम्यमेवासीदिति भावः ॥ ३४ ॥

आस्थित अन्वेषणान्निवृत्य अब्जमेवाश्रितस्सन् तीव्रतपसा त्वदीयध्यानेन आत्मनि स्वदेहे एव भुवि कार्य्यभूतायां स्थितं कारणं गन्धमिव त्वां ददर्श ॥ ३५ ॥

एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं महापुरुषं चिदानन्दं विग्रहयतो मायामयं स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति मनीषणः" इति श्रुतिः यद्वा मायाया जीवस्याविद्यया आमयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रोगमिव विनाशकं सन् समुचितत्वेनोत्तमः उप आधिक्येन लक्षितः सामुद्रकलक्षणाङ्कितः सन्निवेशोनयनग्रीवादिविन्यासो यस्य तं यद्वा तमेव कारणकार्ययोरैक्यात् सता प्रपञ्चेन पातालादिना उपलक्षितः संनिवेशः पादादिरचना यस्य तथाभूतं वैराजं मायामयं दृष्ट्वेति सम्बन्धः ॥ ३६ ॥

स्वभक्तं तञ्च पुनःपुनरवतीर्य्य त्वमरक्षीरित्याह—तस्माइति । हयग्रीवमूर्तिं दधत् श्रुतिगणान् अनयत् तस्मै समर्पयामास मधुकैटभाख्यौ कीदृशौ रजस्तमस्स्वभावावित्यर्थः तयोर्हननेहेतुः, सत्त्वमिति. यद्यपि गुणमात्र एवोदासीनस्य हरेः सत्त्वगुणेन प्रियः तदपि तत्स्वरूपभूते शुद्धसत्त्वे सत्त्वगुणस्य प्रातिकूल्याभावदर्शनादेव प्रियतमत्वमुत्प्रेक्षितं नतु वस्तुतःप्रियतमत्वमपि किंतु सात्त्विकलोकपक्षपातित्वमेव तव तादृशोत्प्रेक्षायां हेतुः शिष्टपालनार्थमेव तव दुष्टनिग्रहो यत्तत् खलु गुणानामेव स्वभावो न तु वस्तुतस्त्वयि वैषम्यमिति भावः ॥ ३७ ॥

यथा विरिञ्चस्य कृते हयग्रीवावतारस्तथैवान्येषामपि भक्तानां कृते अन्येप्यवतारा इत्याह—इत्थमिति । विभावयसि पालयसि हंसि घातयसि युगेयुगे अनुरूपं वृत्तं चरित्रं यस्य सः यत् यस्मात् त्वं कलौ छन्नः अन्यदीयरूपभावाभ्यां बहिराच्छन्नः अतः स एव त्वं त्रियुग इति प्रसिद्धः सत्यादियुगत्रय एव स्वस्य प्रख्यापनात् नतु कलावित्यर्थः अत एवाग्रे तत्प्रमाणवचनमप्यर्थान्तराच्छन्नतयैव वक्ष्यते"नानातंत्रविधानेन कलावपितथा शृणु । कृष्णवर्णं त्विषा कृष्णं सांगोपांगास्त्रपार्षदम् । यज्ञैस्सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः" इति ॥ ३८ ॥

तदेवं मुहुरप्यवतीर्य्य त्वं स्वीयरूपगुणलीलामृतं वर्षसि तदप्यस्माकं पापिष्ठं मनस्तत्र न प्रीणाति दुर्विषयविषगर्त एव मुहुः पतति किं कुर्म इत्याह—नैतदिति त्रिभिः । तव रूपगुणलीलादीनां कथासु नन्वतिसाध्वीष्वपि कथासु किमिति न प्रीयते तत्राह दुरितदुष्टं यथा पित्तदुष्टा रसना सितामित्यर्थः तीव्रं दुर्वारम् ईषणाधनादिवासना तस्मिन् मनसि तव गतिं तत्त्वं कथं विमृशामि यद्यपि महाभागवतस्य प्रह्लादस्य मनो न प्राकृतमेतादृशं त्वद्वीर्य्यगायनमहामृतमग्नचित्त इत्यस्यैवाग्रिमोक्तेस्तदपि प्रेम्णो विचित्रविधतरंगवत्त्वेनातिदैन्योदयादेव प्रेमिलोकस्यैव मुक्तिर्न विरुद्ध्यते ॥ ३९ ॥

मनसो दुष्टत्वेपि मत्कीर्त्तनादिना जनः कृतार्थो भवतीति चेत्तत्राह—जिह्वा वागिन्द्रियरसनेन्द्रियञ्च अवितृप्ता सती भो अच्युत मामाकर्षति ग्राम्यकटुमिथ्यादिप्रलापंप्रति मधुरादिरसंप्रतिचेति भावः । अन्यतस्ततोप्यन्यत्र कामिनीषु कर्मणि धनोपार्जनादावन्यताडनादौ वा शक्तिः सामर्थ्यं लुनन्ति त्रोटयन्त्यतस्त्वत्कीर्त्तनादाववकाशमेव न प्राप्नोमीति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनन्तरं यः परमधाममध्येशयनं करोति तस्यैव तु पुनः सृष्टिवेलायां निजकालशक्त्या सञ्चोदिताः प्रकृतेः स्वशक्तेर्धर्माः सत्त्वादयो येन तथाभूतस्य आत्मनि स्वास्मिन् गूढं सूक्ष्मरूपेण संस्थितामिदं ब्रह्मांडाख्यं वपुरभूत् स्वस्मात् स्थूलतयोत्पादितमित्यर्थः । तदनंतरं नारायणरूपेण अम्भसि ब्रह्मांडांतर्गते जले शयानस्य अनन्तशयनाद्विरमत्समाधिर्यस्य तस्य ते नाभेः सकासात् महाब्जमभूत् स्वकर्णिकातः स्वबीजाद्वट इव ॥ ३३ ॥

तस्मिन् सम्यग्भवोजन्म यस्य सः कविर्बहुज्ञोब्रह्मा अतोऽब्जादन्यदपश्यमानः त्वां बीजं स्वात्मनि स्वबहिश्च विततं वर्तमानमपि जातेऽङ्कुरे बीजं कथमुपलभेतेति विचिंत्यापि तदन्वेषणार्थमब्दशतमप्सु निमज्जमानोपि नाविन्दत् ॥ ३४ ॥

हे ईश ! आत्मा भावन् योनिः कारणं यस्य सः पराकृतश्चाब्जमास्थितस्सन् तीव्रेण तपसा ध्यानेन परिशुद्धभावः आत्मनि चेतने ततो बहिरपि भूतेन्द्रियाशयमयेऽचेतनवर्गे च भुविगन्धमिव अतिसूक्ष्मं विततं त्वां ददर्श ज्ञातवानित्यन्वयः ॥ ३५ ॥

चेतनाचेतनविलक्षणभगवत्स्वरूपज्ञानं निर्दिश्याथाप्राकृतविग्रहमपि दृष्टवानित्याह—एवमिति । यथा स्वरूपं ददर्श तथा महापुरुषं महाविग्रहयुक्तमपि दृष्ट्वा विरिञ्चयो मुदमापेत्यन्वयः । कथंभूतं सहस्राण्यपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धं मायामयं माया कृपा तत्प्रधानं कृपयाविष्कृतमित्यर्थः । सदुपलक्षितसान्निवेशम् सता वेदेन हिरण्यश्मश्रुः हिरण्यकेशः "आप्रनखात्सुवर्णः" इत्यादिनोपलक्षितसन्निवेशः अवयवविन्यासो यस्य तम् ॥ ३६ ॥

भवान् हयशिरस्तनुवं हयग्रीवमूर्त्तिं बिभ्रत् वेदद्रुहौ रजस्तमश्च रजस्तमःस्वभावौ मधुकैटभौ ब्रह्मणो वेदान् गृहीत्वा तद्वधाय प्रवृत्तौ हत्वा तस्मै श्रुतिगणान् अनयत् दत्तवान् यतः सत्त्वं सत्त्वस्वभावं जनं तव प्रियतमां तनुं वासस्थानमामनन्ति सत्त्वस्वभावजनाहितार्थमसुरवधब्रह्मरक्षणवेदानयनानि कृतवानित्यर्थः ॥ ३७ ॥

ब्रह्मणि कृतमनुग्रहमन्यत्रादिशति—इत्थमिति । यथा ब्रह्माणं पालितवान् एवं नृतिर्यगादिषु कृतैरवतारैः लोकान् धार्मिकान् जनान् विभावयासि पालयसि जगत्प्रतीपान् अधार्मिकान् हंसि घातयासि युगे अनुवृत्तं धर्मं पासि कथंभूतो यो धर्मः कलौ छन्नः कथंभूतस्त्वमभवः भवोपलक्षितसर्वविकारशून्यदेहवानित्यर्थः । यद्यतस्त्वं त्रियुगः त्रीणि युगानि युगलानि षड्भगलक्षणानि यस्य सः भगवानित्यर्थः कलौ त्वं छन्नो ऽभवः इत्यन्वये प्राय इत्यध्याहारो बोध्यस्तत्रापि बुद्धाद्यवतारप्रसिद्धेः ॥ ३८ ॥

अथ स्वदैन्यनिवेदनपूर्वकं मां पालयेति प्रार्थयते—नैतदिति त्रिभिः । हे विकुण्ठनाथ ! एतत् दुरितैर्दुष्टम् अत एव कामातुरं विषयासक्तं तीव्रं दुर्धरम् हर्षशोकभयैषणाभिरार्तं मनःतव कथासु न सम्प्रीयते अतस्तस्मिन् मनसि सति दीनोहं तव गतिं त्वत्प्राप्तिसाधनं विमृशामि ॥ ३९ ॥

किञ्च हे अच्युत ! मा मां जिह्वा रसनेन्द्रियमवितृप्ता सती एकतो रसंप्रति तथा अवितृप्तेति पदं लिङ्गव्यत्ययेन सर्वत्र योज्यम् शिश्नो अन्यतो मैथुनानन्दंप्रति त्वक् अन्यतः स्पर्शं प्रति उदरं क्षुधासन्तप्तं अन्यत आहारं प्रति श्रवणं क्वचित् शब्दं प्रति घ्राणो अन्यतः गन्धंप्रति चपला दृक् दृष्टि क्वच रूपं प्रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं स्वकर्मपतितं भववैतरण्यामन्योऽन्यजन्ममरणाशनभीतभीतम्।
पश्यन् जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर! (१)पीपृहि मूढमद्य ॥ ४१ ॥
कोन्वत्र तेऽखिलगुरो! भगवन्प्रयास उत्तारणेऽस्य भवसम्भवलोपहेतोः।
मूढेषु वै महदनुग्रह आर्तबन्धो! किं तेन ते प्रियजनाननुसेवतां नः ॥ ४२ ॥
नैवोद्विजे परदुरत्ययवैतरण्या(२)स्त्वद्वीर्यगायनमहाऽमृतमग्नचित्तः।
शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥
प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरन्ति विजने न परार्थनिष्ठाः।
नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तथा कर्मशक्तिः वाक्पाण्यादिकर्मेन्द्रियशक्तिः क्व वचनदानादिकं प्रति विकर्षति सर्वाणीन्द्रियाणि संसारप्रापकस्वस्वविषयगर्तपातनेन मां त्वद्विमुखं कुर्वन्तीत्यर्थः। बह्वयः सपत्न्यः गेहपतिं स्वस्वामिनं लुनन्तीव त्रोटयन्ति यथा स्वस्वार्थनिर्बन्धेन तदिष्टार्थात् विमुखं कुर्वन्ति यथेत्यर्थः ॥ ४० ॥

भाषा टीका

यह जगत् आपही का शरीर है, क्योंकि? जब आप की प्रलय काल के जलमें शेषजी के शयन से समाधि विराम को प्राप्त हुई तब आपने अपनी काल शक्ति से प्रकृति के धर्मों को प्रेरणा की, उस समय आपके विषे गूढ रहा जो जगत् वही, वटके बीज से जैसे महावट उत्पन्न होता है, उसी तरह आपकी नाभि से (चतुर्दशभुवनात्मक) महाकमलरूप से उत्पन्न हो गया ॥ ३३ ॥

उस नाभि कमल से उत्पन्न हुआ जो ब्रह्मा वह उस कमल के सिवाय और कुछ नहीं देखता हुआ, आत्मा के विषै व्याप्त, उस कमल के बीज रूप आपको अपने से बाहर ढूंढता हुआ, उन प्रलय के जलों में डूबता हुआ, सौवर्ष तक मूल कारण को नहीं प्राप्त हुआ, यह भी तो ठीकही है क्योंकि? जब अंकुर उत्पन्न होचुका तब अंकुर से पृथक् बीज कैसे उपलब्ध होवे ॥ ३४ ॥

फिर वही ब्रह्मा अत्यंत विस्मित होकर उसी कमल पर बैठ गया और बहुत काल में तीव्रतप करने से शुद्ध भाव वाला होकर, हे ईश! जैसे पृथिवी में गन्ध इसी प्रकार भूत इन्द्रिय अन्तःकरणमय अपने आत्मा ही में अति सूक्ष्म रूप से आप को देखता भया ॥ ३५ ॥

इसी प्रकार फिर आप को हजारों वदन चरण शिर हस्त ऊरु नासा मुख कर्ण मन और आभरणों से युक्त, माया मय, (कृपा प्रधान) और समीचीन उपलक्षित है विग्रह संनिवेश जिनका, ऐसे महापुरुषरूप को देख कर ब्रह्मा परम आनन्द को प्राप्त हुआ ॥ ३६ ॥

तिस ब्रह्मा के अर्थ आपने हयग्रीव स्वरूप को धारण कर, वेदके द्रोही अतिबलिष्ठ मधु कैटभ दैत्यों को मारकर, फिर वेद समर्पण किये, इसी से बुध लोग रज तम और सत्त्व इनको आपकी प्रिय तनु कहते हैं ॥ ३७ ॥

हे महापुरुष! इसी प्रकार आप मनुष्यों में (रामकृष्णादि) तिर्यकों में (वराहादि) ऋषियों में (कपिलादि) देवताओं में (वामनादि) अवतारों को धारण करके, लोकों को पालन करते हो, जगत् के दुःख देने वालों का नाश करते हो, और युगानुगुण धर्म को पालन करते हो, और जिस कारण कलि में आप छन्न (आवृत) होकर रहते हैं, और तीन युगों में धर्म का रक्षण करते इसी से आपका नाम त्रियुग है ॥ ३८ ॥

हे विकुण्ठ नाथ! यह मेरा मन दुरितदुःख असाधु तीव्र कामातुर हर्ष शोक भय इच्छाओं से आतुर हे विकुण्ठनाथ! यह मेरा मन पाप कर्मों से दुष्ट होरहा है, असाधु तीव्र और कामातुर, हर्ष शोक भय इच्छाओं से आर्त है इसी से आपकी कथा में प्रीत नहीं होता है, मैं अति दीन हूं इस मन में आपकी गति को कैसे विचारूँ ॥ ३९ ॥

हे अच्युत! अवितृप्त मेरी जिव्हा मुझे एक ओर खींचती है, शिश्न एक ओर, त्वचा और ओर को, उदर और श्रवण किसी ओर को, घाण और ओर को, चपल दृष्टि किसी ओर को, कर्म शक्तियें कहीं को खींचती हैं। जैसे बहुत सी पत्नी किसी के हों और वे अपने पति की खैंचातानी करती हैं वह दशा मेरी होरही है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न केवलमहमेक एवैवं कष्टां दशामापन्नः किन्तु महाजनोऽप्येवमेव क्लिश्यत्यतः सर्वं जनं पालयेति प्रार्थयते, एव-

(१) पारमति पीपृहि मूढसत्त्वम इति विजय०। पिप्रुहि इति वीर० पा०। (२) त्वत्तीर्यमिति पाठः विज०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

मिति । भवः संसार एव वैतरणी यमद्वारनदी तस्याम् अन्योऽन्यतो यानि जन्मादीनि तेभ्योऽतिभीतं स्वेषां परेषां च विग्रहेषु यथायथं वैरं मैत्रं च यस्य एवं मूढ जनं पश्यंस्त्वं हे पारचर ! तस्याः पारे स्थितनित्यमुक्त हन्तेति अहो कष्टमित्येवमनुकम्प्याद्य पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

एकेन मया कथं सर्वोजनस्तारणीय इतिचेत्तत्राऽऽह कोन्विति । को नु ते अत्र सर्वजनोत्तारणे प्रयासो न कोऽपि कुतः अस्य विश्वस्य भवसम्भवलोपानामुत्पत्तिस्थितिसंहाराणां हेतोः ततोऽपि किमेतद्दुष्करमिति भावः । उचितं चैतदित्याह, मूढेष्विति । त्वां च त्वदीयांश्च तारयिष्यामीमं दुराग्रहं मा कृथा इतिचेत्तत्राऽऽह तव ये प्रियजनाः भक्तास्ताननुसेवमानानां नोऽस्माकं तेनोत्तारणेन किम् । "कोऽति प्रयासोऽसुरबालका हरेः कोऽन्वत्र तेऽखिलगुरो भगवान् प्रयासः । प्रह्लाद इत्थमुपमत्य मिथो नराणामीशेन सख्यमकरोदपनीय मायाम्" ॥४२ ॥

वत्स प्रह्लाद ! त्वां तावत्तारयिष्यामि तावतैव कृतार्थः स्याः किमनेन निर्बन्धेनेत्यत आह–नैवेति । हे पर ! सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं भववैतरण्या नैवोद्विजे किन्तु विमूढान् शोचामि, तानेवाह. ततो महामृताद्विमुखं चेतो येषाम् प्रत्युतेन्द्रियार्थनिमित्तं यन्मायासुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण—तांस्तु तत्त्वज्ञा मुनय उपदेक्ष्यन्तीतिचेत्तत्राह, प्रायेणेति. न विमुमुक्षे विमुक्तिं नेच्छामि तर्ह्यन्यं कमपि प्रार्थय मामेव किमिति निर्बध्नासीतिचेदत आह त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमहमेवेदृशीं दशां प्राप्तः किन्तु मदीयो जनोऽप्येवमेव क्लिश्यत्यतः सर्वं मदीयं जनं संसारान्मोचयेति प्रार्थयते, एवमिति । भव एव वैतरणी दुःखप्रदा यमलोकनदी तस्यां स्वकर्मभिः पुण्यपापात्मकैः पतितमन्योन्यं यानि मरणादीनि शत्रूणां पुत्रादिजन्मना स्वस्य भयं स्वस्य पुत्रादिजन्मना परेषां शत्रुभ्यःस्वस्य भयं स्वस्माच्छत्रूणाम् एवं परैः स्वद्रव्यभक्षणेन स्वस्य भयं स्वेन परद्रव्यभक्षणे स्वस्मात्परेषामिति यथा सम्भवमूह्यम् । तेभ्यो जन्मजरामरणादिभ्यो भीतभीतं भीतादपि भीतं स्वेषां परेषां च विग्रहेषु देहेषु यथायथं वैरं मैत्रञ्च यस्य तमेवमद्यापि मूढमग्नं जनं पश्यन् त्वं हे पारचर ! भववैतरणीपारे चरतीति तथा तस्य सम्बोधनम्. अति पिपृहि "पृपालनपूरणयोः" इति धातुः अतीव पालयेत्यर्थः । यद्वा अतिपीपृहि हन्तेति अहो कष्टमित्यनुकम्प्य भववैतरण्या अतिपारय पारं नय संसारान्मोचयेत्यर्थः ॥ ४१ ॥

ननु, त्वदीयसर्वजनोद्धारणे मम महान्प्रयासो भवेदित्याह–कोन्विति । हे अखिलानां गुरो हितोपदेष्टः ! हे भगवन् ज्ञानशक्त्यादि षाड्गुण्यपूर्ण ! अस्मिन् मदीयजनस्योत्तारणे तव को नुप्रयासः ? न कोऽपीत्यर्थः । प्रयासाभावे हेतुं वदन् भगवन्तं विशिनष्टि, अस्य कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य भवसंभवलोपहेतोरुत्पत्तिस्थितिलयकारणस्य कृत्स्नजगदुदयविभवलयलीलस्य मदीयजनोत्तारणे न कोऽपि प्रयास इति भावः । युक्तं चैतत्तवेत्याह, मूढेष्वज्ञेषु विशेषेण महतामनुग्रहो भवतीति. ननु, मम सेवामन्तरेणाहं नाऽतिं पारयामि, अन्यथा सर्वमुक्तिप्रसङ्गः तत्राह, हे आर्तबन्धो ! किन्तेनार्तबन्धुस्त्वमिति यत्तेन नोऽस्माकं किं त्वत्सेवया स्यात्तन्नार्तबन्धुत्वनिर्वाहार्थं त्वत्सेवायामप्यशक्ता वयमार्त्तानुकम्प्या इति भावः । सर्वमुक्तिप्रसङ्गं निराकुर्वन्नात्मनो विशिनष्टि, ते तव ये प्रियाः भक्तजनास्ताननुसेवतां त्वद्दासानुदास्यं कुर्वतामस्माकमित्यर्थः । तावन्मात्रमपेक्ष्य मज्जनोत्तारणोपपत्तेर्न सर्वमुक्तिप्रसङ्गश्चेति भावः । मामनुगृहीतवता त्वया मदीयजनस्य भवद्दासानुदास्यमपि संपाद्यमिति तात्पर्यम् ॥ ४२ ॥

इदमेव मया प्रार्थनीयमित्यभिप्रयन्नाहं भववैतरण्या बिभेमि किन्तु तस्यां पतिष्यमाणान्मज्जनानवलोक्य दुःखयामीत्याह, नैवेति । हे परम ! दुरतिक्रमणीयो भवः संसारः स एव वैतरणी ततो नैवाहमुद्विजे बिभेमि उद्वेगाभावे हेतुं वदन्नात्मानं विशिनष्टि त्वद्वीर्येति. त्वद्वीर्यगायनं त्वद्वीर्यसूचकगुणानामगायनमेव महदमृतं तस्मिन् मग्नं चित्तं यस्य सोहमतो न मदर्थं शोचे किन्तु विशेषेण मूढान्मदीयान्प्रति शोचे तदर्थं शोचे इत्यर्थः । तत्र हेतुं वदंस्तान्विशिनष्टि, ततस्त्वद्वीर्यगायनाद्विमुखं चेतो येषाम्. इन्द्रियार्थाः शब्दादयो विषयास्तेषां मायासुखाय तदनुभवजन्यप्राकृतसुखाय तदर्थंभरं कुटुम्बादिभारम् उद्वहन्तीति तथा तान् ॥ ४३ ॥

ननु, यथा श्रीनारदानुग्रहात्त्वं मुमुक्षुस्तथा त्वदीया अपि महतामनुग्रहात् मुमुक्षवश्चेत्तान् मोक्षयिष्यास्यतस्त्वमेव मुक्तिमिच्छेत्यत्राह–प्रायेणेति । हे देव ! प्रायशो मुनय आत्मनामेव मुक्तिं कामयमाना विजने निर्जने अरण्यादिदेशे मौनं शुभाश्रयसंशीलनं कुर्वन्ति, नतु परार्थम्. अन्येषां प्रयोजने निष्ठा येषां ते भवन्ति अतस्तदनुग्रहो मदीयजनस्य दुर्लभ इति भावः । तत एतान् कृपणान्विहाय अहमेको न मुमुक्षे न संसृतिबन्धं मोक्तुमिच्छामि तर्ह्यन्यं कमपि प्रार्थय मामेव किमिति निबध्नासीति चेत् तत्राह, भ्रमतः संसृतौ भ्राम्यतोऽस्य जनस्य त्वत् त्वत्तोऽन्यं शरणं रक्षणोपायभूतञ्च नानुपश्यामि ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वैः परैश्च सह विग्रहलक्षणं वैरं विरुद्धाचरणं मैत्रं च यस्य तथा तं जनं पश्यन्नतस्तमसो भवस्य पारमतिपीपृहि अतिपारं गमय मूढसत्त्वं मूढप्राणिनमसुरजातित्वात् तिर्यग्जातित्वात्तामसमिव स्थितं गजेंद्रं पारं नीत्वा यथाऽपालयस्तथा पारं च प्रापय्य मां पालयेति वा ॥ ४१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मम संसारपारनेतृत्वं तव दुःशकं नेत्याह—क इति। हे अत्र ! अन्यपातृरहित, भगवन् ! मम संसारोत्तारणे ते तव कोनु प्रयासो न कोपि अत्र जीवराशौ वा कुतो न प्रयासइति तत्राह अस्येति। अस्य जगतो भवो जन्मसंभवः स्थापनेन संभावनं लोपः संहारोयेषां हेतोः करणस्यास्य जगत उत्तारणे तव प्रयासो नास्ति ममोत्तारणे कोन्विति वा, कुत इति तत्राह, भवेति भवस्य संसारस्य संभव उत्पत्तिस्तस्य नाशहेतोस्तव किं प्रकृतइत्याशंक्यास्मद्भारसलयमन्तरेण न किमपि प्रयोजनं तवेत्याह—मूढेष्विति। गजेंद्रकल्पार्त जनबन्धो मूढेष्वस्मासु यो महदनुग्रहस्तेन तव किं प्रयोजनम् नकिमपीत्यर्थः। ननु, प्रयोजनाभावे किमर्थं तथाकरणमित्याशंक्य स्वभाव इत्याशयेनाह–प्रियेति। प्रियजनाननुसेवमानस्त्वमिति यत् स तव स्वभाव इति शेषः ॥ ४२ ॥

संसारभीरूणां संसारवैतरण्युत्तरणोपायः क इत्याशंक्य निरन्तरवेदान्तशास्त्रश्रवणमननादियषामस्ति तेषां तद्भयं नास्ति अन्यथा न कदापि तत उत्तरणमित्याशयेनाह—नैवेति. त्वत्तीर्थं त्वद्विषयं वेदान्तशास्त्रं तस्य गायनं श्रुत्वा मत्वा व्याख्यानं व्याख्यापनं च तदेव महामृतं यत्तेन मत्तं हृष्टं विवशं वा चित्तं यस्य स तथा एवंविधोहं संसारवैतरण्या नैवोद्विजे। न बिभेमि एव शब्देन त्वत्तीर्थसेवाभावे संसारकदनादूबिभेमि तत्संभवेनेत्ययोगव्यवच्छेदः क्रियते अनेनासंगतं प्रह्लादस्तवनमित्येतदपि परिहृतं "सत्स्वन्यत्र ततोदया"इति वचनात् इदं च भक्तिलक्षणमिति प्रकट यन्नाह–शोच इति। ते त्वत्त इन्द्रियार्थेभ्यो विषयेभ्यो मायासुखं प्राकृतमस्वरूपं सुखं यत्तदर्थं भरं कुटुंबभारम् ॥ ४३ ॥

स्वेतरेषु क्रियमाणा कृपा स्वाश्रितेष्वेव कर्तव्या देवादिभिः क्रियमाणत्वादित्यभिप्रेत्याह–प्रायेणेति। देवा मुनयश्च विजनेनैकान्तस्थलेन साधनेन सहिताः काष्ठमौनादिव्रतं चरन्ति कीदृशाः स्वकीयानां जनानां विमुक्तिः स्यादिति स्वविमुक्तिकामाः स महतां स्वभावइत्याह–परेति। परप्रयोजनतात्पर्योपेता देवेषु तात्त्विकैर्विशेषतो मुनिषु कैश्चिदेवेति विशेषप्रकाशनाय प्रायेणेति तदुक्तं "आश्रितेषु कृपा कार्या विशेषात्तात्त्विकैः सुरैः ॥ मुनिभिश्च तथा कैश्चित्कैश्चित्कार्याखिलेष्वपि ॥ तथापि तात्त्विकसुराः कृपाविषयतां गताः ॥ एत एव विमुच्यन्ते तदन्ये न कथंचन"इति यतो देवादयोच्याश्रितेषु कृपां कुर्वन्ति अतोहमप्याश्रितानेतान्कृपणान् कृपाविषयान् विहाय एको न विमुमुक्षे त्वमेको मत्प्रसादेन मुक्तो भव अन्ये न्येन वर्त्मनाऽमुक्ताः संत्विति तत्राह–नान्यमिति। स्वकर्मणा नाना योनिषु भ्रमतो मामाश्रितजनस्यानुकूलं त्वदन्यं शरणं नानुपश्ये इत्यन्वयः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्र स्वस्मिन्स्तद्दतिकृपणीयत्वाभिमानेन सप्रणयोपालम्भमिवापि निवेदयति, कोन्विति ॥ ४२ ॥

ननु, मत्प्रियजनसेविनामपि भवादनुत्तीर्णानां तदुद्वेगः स्यादेवेत्याशङ्क्य नहि नहीति स्वं दृष्टान्तयति—नैवेति। त्वद्वीर्याणां ये गायकास्तत्प्रियजनाः तत्सम्बन्धि यन्महामृतं तद्गानरूपमेव तत्र मग्नं चित्तं यस्य सोऽहं नैवोद्विजे अत्र पूर्वं त्रस्तोस्म्यहमित्यादिकं यदुक्तं तत् खलु स्वस्य तद्बहिर्मुखसाङ्गारोचकत्वेन। सम्प्रति नैवोद्विज इत्यादिकं तत्कथामृतमाधुर्याविष्टत्वेन मध्ये च नैतन्मन इत्यादिकमतितृष्णयेति विवेचनीयम्। भावानां विचित्रगतित्वात् ॥ ४३ ॥

यथा श्रीभगवन्तं कोन्वत्र इत्यादिकमुवाच तथैव मुनीनपि गत्याह—प्रायेणेति ॥ ४४—४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

न केवलमहमेक एव, अपि तु सांसारिकः सर्व एव जनः क्लिश्यतीति तदुद्धारं प्रार्थयते—एवमिति। भव एववैतरणी यमद्वारनदी तस्यां स्वेषां परेषां च विग्रहे यथायथं वैरं मैत्रं च यस्य तं हे पारचर ! एवंभूतवैतरण्याः पार एव विरचित क्रीड इति हेतोर्हन्त कृपया पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

एकेन मया कथं सर्वोजनस्तारणीयः? इति चेत्तत्राह-कोन्विति अखिलगुरो ! गुरुरूपधारिणा एकेनापि त्वया परः परार्धेनापि भवितुं समर्थेन सर्व एव जनो निस्तार्यतामिति भावः। न चैतावत् सामर्थ्यं मे नास्तीति वाच्यमित्याह–अस्य विश्वस्य जन्मस्थितिसंहारकारणस्य यदि जन्मादेः कारणमभूस्तदा उद्धारस्यापि कारणं भवितुमर्हस्येवेति भावः। उचितमेवैतदित्याह–मूढेष्विति। त्वां च त्वदीयांश्चतारयिष्यामि इममतिदुराग्रहं माकृथा इति चेत् तत्राह, तव ये प्रियजना भक्तास्ताननुसेवमानानां नोऽस्माकं तेन त्वत्कर्तृकोत्तारणेन किं त्वद्भक्तसेवाप्रभावात्स्वयमेव वयं तरिष्याम इति भावः ॥ ४२ ॥

किञ्चाहं स्वार्थं तु संसारतारणं नैवार्थय इत्याह—नैवेति। हे पर सर्वश्रेष्ठ ! वैतरण्याः सकाशान्नोद्विजे तत्र हेतुः त्वद्वीर्येति किन्तु विमूढान् शोचामि इन्द्रियार्थहेतुकं यन्मायामयं सुखं तदर्थंभरं कुटुम्बभरणादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण तांस्तु तत्तज्ज्ञा मुनयो मुक्तिसाधनमुपदेक्ष्यन्तीति चेत्तत्राह—प्रायेणेति। अहं तु न तथा बुभूषामित्याह, नैतानिति। त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमन्येऽपि संसारनद्यां निमग्ना अतः सर्वोऽनस्मादादीन् पालयेति प्रार्थयते–एवमिति। एवं स्वकर्मभिः भवो जन्ममरणप्रवाहलक्षणः संसारः स एव वैतरणी नरकपरिखाभूता नदी तस्यां पतितम् अन्योन्यतो यानि जन्मादीनि तेभ्यो भीतादपि भीतवत् स्वेषां परेषां च विग्रहेषु कलहेषु देहेषु वा स्वप्रयोजनानुसारेण वैरमैत्रं च यस्य तम् मूढं स्वपुरुषार्थानभिज्ञं जनं मादृशम् त्वं पश्यन् पार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ! ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥ ४६ ॥
रूपे इमे सदसती तव वेदसृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य ।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥
त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भववैतरण्यविषये चरतीति तथा तस्य सम्बोधनं हे पारचर ! हन्त अहो कष्टमित्येवमनुकम्प्य अद्याधुना पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

दीनजनोत्तारणे विश्वसृष्ट्यादिकर्तुस्तव श्रमो नास्ति अहं तु त्वद्दासचरणसेवयैव कृतार्थ इति प्रार्थयते, कोन्वत्रेति । हे अखिल-गुरो ! अस्य विश्वस्य भवसम्भवलोपानां सृष्टिस्थितिसंहाराणां हेतोः ते तु निश्चितम् अत्र दीनस्य जनस्य तारणे कः प्रयासः? न कोपीत्यर्थः । ननु, निर्मितजनोत्तारणे सर्वमोक्षप्रसङ्गः स्यादत्राह, मूढेषु हे दीनबन्धो ! महतां त्वद्दासानां त्वद्भजनोपदेशरूपो अनुग्रहो भवत्कृपया भवतु इति शेषः । नन्वात्मतरणं कुतो न प्रार्थयसे ? अत्राह, हे भगवन् ! ते प्रियजनान् भागवतान् सेवतां नोऽस्माकं तेन भवनदीतरणेन किम् ? त्वत्प्रियजनसेवयैव कृतार्था इत्यर्थः ॥ ४२ ॥

एतदेवाह–नैवेति। हे पर पूर्ण ! त्वद्वीर्यगायनं भवत्प्रियसेवालब्धस्त्वदीयपराक्रमगानमेव महाऽमृतं तत्र मग्नं लब्धरुचि चित्तं यस्य सोऽहं दुरत्ययवैतरण्या नैवोद्विजे किन्तु ततस्त्वद्वीर्यगायन-महामृतात् महदनुग्रहाभावेन विमुखं चेतो येषां तान् इन्द्रियार्थ-मिन्द्रियनिमित्तं यन्मायासुखं प्राकृतमानन्दं तदर्थं नानादुःखदं गृहकुटुम्बादिभरमुद्वहतोऽहं शोचामि अतस्तान् भववैतरण्याः उत्तार्य पालयेति भावः ॥ ४३ ॥

त्वं मद्भजनेन मुक्तो भव एतान् मुनयस्तदर्थमुपदेक्ष्यन्तीत्यत्राह, हे देव ! यतः प्रायेण स्वमुक्तिकामा ननु परार्थनिष्ठाः मुनयो विजने मौनं स्वधर्मं चरन्ति, अतः त्यत् त्वत्तः अन्यं शरणं नानुपश्ये त्वं तान् प्रेरय इति भावः । अहं तु एतान् कृपणान् विहाय एकः न विमुमुक्षे विमुक्तिमिच्छामि ॥ ४४ ॥

भाषाटीका ।

मेरी हो यह दशा नहीं है—यह सब जने अपने कर्मों से इस भव वैतरणी में पडे हैं। परस्पर जन्म मरण अज्ञान और भय से भीत हैं अपने पराये के बैर और भिन्नता में लिप्त हैं हे पारचर ! (आप इस वैतरणी के पार पर हो) कृपाकर इन मूढों को दुखित देखकर आज इसके पार उतार कर पालन कीजिये ॥ ४१ ॥

हे भगवन् ! हे अखिल गुरो ! आप इस जगत के जन्म स्थिति प्रलय के हेतु हैं इनको संसार वैतरणी से उतारने में आपको क्या प्रयास है ? । हे आर्तबन्धो ! मूढों पर अनुग्रह करना महा पुरुषों को उचित ही है । (भगवान् यह न कहें कि तुम क्यों जगत् के निमित्त दुराग्रह करते हो तुमको और तुम्हारे सबों को उद्धार करूँगो) यह विचार कर प्रल्हाद कहने लगे प्रभो ! आपके प्रियजनों के सेवन करने वाले हमको उससे (तरनेसे) क्या है ? हमतो आपके भक्तों के अनुग्रह से ही तर जांयगे ॥ ४२ ॥

हे पर ! (सर्वोत्तम !) तुम्हारे लीला पराक्रमगान महा अमृत में मग्न मन, मैं इस दुरत्यय भव वैतरणी से उद्विग्न नहीं हूं, मैं केवल उन मूढ पुरुषों का सोच करता हूं जो आप की लीला गान से विमुखचित्त हैं । और इन्द्रियार्थ माया सुख के निमित्त भार वहन कर रहे हैं ॥ ४३ ॥

हे देव ! प्रायः बड़े २ मुनिजन अपनी विमुक्ति की कामना कर विजन वन में मौनधारण करते हैं किन्तु वे भी स्वार्थ रत हैं परार्थ निष्ठ नहीं है मैं इन कृपण जीवों को छोडकर अकेला नहीं मुक्त होना चाहता हूं क्योंकि इस भ्रमते जीव समूह का शरण तुम से अन्य मैं नहीं देखता हूं । जो आप इनका उद्धार न करेंगे तो कौन करेगा ? ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेते स्त्रीसम्भोगादिना सुखिन एव न कृपणास्तत्राह—यदिति । करयोः कण्डूयनेन सङ्घर्षणेनेव दुःखमनु दुःखं यस्मिन् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह—कृपणाः कामुका बहुदुःखभाजोऽपीह गृहमेधिसुखे न तृप्यन्त्यलमिति न मन्यन्ते कण्डूतिवत्कामस्य दुःसहत्वात्. ननु, केचित्कण्डूति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि सहन्ते कामं चेत्यत्राह—त्वत्प्रसादात्तु कश्चिद्धीर एव मनसिजं कामं विषहेत न तु सर्वे अत्रापि कण्डूतिवदिति दृष्टान्तः ॥ ४५ ॥

ननु, मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिस्तत्राह, मौनेति । हे पुरुष ! अन्तर्यामिन् ! ये मौनादयो दश आपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहो विविक्तवासः ते तु प्रायशोऽजितेन्द्रियाणामिन्द्रियभोगायार्थं विक्रीणतां वार्त्ता जीवनोपाया भवन्ति दाम्भिकानां तु वार्त्ता अपि भवन्ति वा न वा दम्भस्यानियतफलत्वात् ॥ ४६ ॥

त्वज्ज्ञानं भक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह—रूपे इति, त्रिभिः । बीजाङ्कुराविव प्रवाहापन्ने इमे सदसती कार्यकारणे एव ते रूपे उपलक्षणभूते वेदेन सृष्टे प्रकाशिते नचान्यत् स्वसमवेतं गौरत्वादिकमिव देवदत्तादेः कुतः अरूपकस्य प्राकृतरूपादिशून्यस्य अतो युक्ताः संयता एव भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्ये कारणे चानुगतं पश्यन्ति मथनेन दारुषु वह्निमिव नान्यतः स्यात्त्वज्ज्ञानमिति शेषः । यद्वा ज्ञानप्रकारमेवाह—एतदुभयमन्यतः प्रधानपरमाणुवादेर्न स्यात् "स ऐक्षत" इत्यादि श्रुतेः । अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यूत इति ॥ ४७ ॥

तदेवाऽऽह—त्वं वायुरिति । हृदयं मनः चिच्चित्तम् अनुग्रहोऽहङ्कारो देवतावर्गो वा सगुणः स्थूलः निर्गुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, त्वदीया जना न दैन्यं प्राप्ताः किन्तु विषयानुभवेन दृप्ता एवातस्तेषां दैन्यापादनेन त्वं किमितीत्थं प्रार्थयसे तत्राह—यदिति । यन्मैथुनादिकं गृहमेधिनो गृहस्थस्य सुखं तत्करयोः पाम्नादूषितयोर्हस्तयोः कण्डूयनेन संघर्षणेनेव तज्जन्यदुःखवद्दुःखदुःखमतीव दुःखात्मकं दुःखानुपरि दुःखं दुःखोदर्कमिति वार्थः । अत एव तुच्छं तर्हि तस्य दुःखत्वादेव ततो निर्विद्य मुमुक्षेयुस्तत्राह—कृपणाः कामिनः बहुदुःखभाजोऽपीह गृहमेधिसुखे न तृप्यन्त्यलमिति न मन्यते कण्डूतिवत्कामस्य दुस्सहत्वाद्धतस्ते स्वानर्थमेव न जानन्तीति भावः । ननु, केचित्कण्डूतिमपि सहन्ते कामं चेत्यत्राह—सत्यं, धीरश्चेत्त्वदनुग्रहाज्जितेन्द्रियश्चेन्मनसिजं कामं सहेत नत्वजितेन्द्रिय इति भावः ॥ ४५ ॥

तर्हि कैश्चिन्मौनादिभिरुपायैरिन्द्रियाणि जयद्भिरपवर्गः साध्यस्तत्राह—मौनेति । हे पुरुष परमपुरुष ! मौनादय आपवर्ग्याः जितेन्द्रियाणामपवर्गोपाया एवेति सत्यमेव अजितेन्द्रियाणां तु वार्त्ता जीवनोपाया भवन्ति 'अयं मौनादिसम्पन्नस्ततोऽस्मै देयम्' इति मन्यमानेभ्य परेभ्यः लब्धवित्तो भवतीति जीवनोपाया भवन्ति सतीन्द्रियजये मौनादय आपवर्ग्याः ननु तस्मिन् असति भवदनुग्रहाच्च विषयवैतृष्ण्येन भवितव्यमिति भावः । अपवर्गार्थतया अनुष्ठिता अपि मौनादयोऽजितेन्द्रियाणां वार्ता एव न त्वापवर्ग्याः किंपुनर्दम्भार्थे कृता आपवर्ग्याः न भवन्तीत्याह—उतेति दांभिकानां मौनादयो वार्त्ता अपि भवन्त्युत । न वा किंपुनरापवर्ग्या न भवन्तीति. दाम्भिकानां दाम्भिकत्वे प्रकटे सति जीवनहेतवोऽपि न भवन्तीत्युत न वा शब्दार्थः, तत्र मौनं वाङ्नियमः व्रतमनशनादिरूपं श्रुतमध्ययनं तपः कृच्छ्रादि अध्ययनमध्ययनजं पाण्डित्यं स्वधर्मः स्ववर्णाश्रमोचितो धर्मः व्याख्याऽध्यापनं रहो निर्जनदेशवसतिः जपो मन्त्रजपः समाधिर्ध्यानं मनसिजं विषहेत धीर इतीन्द्रियजयमूलकः कामजय इत्युक्तं तथाऽजितेन्द्रियाणां वार्ता भवन्तीत्यनेन जितेन्द्रियाणां त्वापवर्ग्या भवन्तीति सूचितम् ॥ ४६ ॥

तर्हीन्द्रियजयः कथं स्यादित्यपेक्षायां सर्वात्मकनिरतिशयानन्दरूपब्रह्मोपासननिष्ठस्यार्थादेवेन्द्रियजयः स्यादिति वक्तुं तावत्तदुपासनाप्रकारं विवक्षुश्चेतनाचेतनयोः परमात्मशरीरत्वमाह—रूपे इति । इमे सदसती चिदचिद्द्रव्यरूपे बीजाङ्कुराविव स्थिते अरूपकस्य कर्माधीनदेहरहितस्य तव वेददृष्टे वेदबोधिते रूपे शरीरे "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यस्याक्षरं शरीरं यस्याव्यक्तं शरीरम्" इत्यादिवेदबोधितशरीर इत्यर्थः । बीजाङ्कुरौ इत्यनेन कदाचित्कारणावस्थया कदाचित्कार्यावस्थया चोभयथावस्थिते उभे अपि चिदचिद्द्रव्ये तव शरीरभूते इत्युक्तं भवति । अरूपकस्य रूपे इत्यनेन तच्छरीरकत्वं न तव कर्माद्युपाधिप्रयुक्तमपितु निरुपाधिकमित्युक्तं यत उभयावस्थावस्थितयोश्चिदचितोस्त्वच्छरीत्वमत एव न चान्यत्. अन्यदत्वदनात्मकं किञ्चिदपि वस्तु नास्त्येवमुभयत्र त्वच्छरीरभूतयोश्चिदचितोस्त्वां योगेनोपासनात्मकेन युक्ताः सन्तो मुनयो विचक्षते पश्यन्ति । तत्र दृष्टान्तः, वह्निमिव दारुषु यथा दारुषु मथनाद्युपायेन वह्निं विचक्षते तद्वत्. अन्यतो योगादन्यत उपायान्तरान्नस्यात् साक्षात्कार इति शेषः उपायान्तरेण साक्षात्कारो न स्यादित्यर्थः ॥ ४७ ॥

न चान्यदित्यनेनान्यत् त्वदात्मकं नास्तीत्युक्तं नान्यतः स्यादित्यनेनोपायान्तरादृश्यत्वञ्च तदेतदुभयं प्रपञ्चयन् सर्वात्मकब्रह्मसाक्षात्कारादेव निःशेषमिन्द्रियजय इत्याह—त्वमिति, द्वाभ्याम् । तावत्सर्वात्मकत्वं प्रपञ्चयति, त्वमिति । त्वमेव वाय्वादिरूपेणावस्थितः तच्छरीरकत्वेनावस्थित इत्यर्थः । पूर्वं "तव रूपे" इति व्यतिरेकनिर्देशादत्राभेदनिर्देशाच्चेदं तादात्म्यं शरीरात्मभावनिबन्धनमित्यवगम्यते. तत्र मात्राः शब्दादयस्तन्मात्राः प्राणाश्चेन्द्रियाणि हृदयं मनः चिदनुग्रहं ज्ञानोत्पत्त्यनुग्राहकं हृदयविशेषणं चिदनुग्रहश्चेति पाठे ज्ञानोत्पत्त्यनुग्राहको महान् बुद्धितत्त्वात्मक उच्यते किं बहुना सगुणः सत्त्वादिगुणयुक्तः प्रकृतिपरिणामात्मकः सर्वः पदार्थः विगुणः सत्त्वादिगुणरहितस्तदपरिणामात्मको जीववर्गश्च मनश्च वचश्च तयोः समाहारो मनोवचस्तेन निरुक्तं विषयीकृतं तदेतत्सर्वं त्वमेव त्वच्छरीरभूतमेव ॥ ४८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुखानुभवार्थं हि मोक्षाकांक्षातच्छब्दादिविषयेभ्योपि स्याद‌तोऽजागलस्तनायितमोक्षसुखाय कोवा प्रेक्षावान् महाप्रयत्नं कुर्यादुन्मत्तमन्तरेणेति तत्राह—यन्मैथुनादीति । मैथुनादिगृहस्थसुखं यत् तल्लब्ध्वा देहकृपणा देहमात्रपोषणपरायणास्तृप्यन्ति नान्ये प्रेक्षावन्त इति शेषः । तदपि न सुलभमित्याह, बहुदुःखेति, तत्र बुद्धिमतैवं कार्यमित्याह–कण्डूतिवदिति । मनसिजं कामम् ॥ ४५ ॥

मुमुक्षुभिः प्रथमत इन्द्रियजय एव समर्थनीयोऽन्यथा मुक्तिसाधनानामपि मौनादीनां लोके जीवनोपायमात्रत्वं भवतीत्याह, मौनेति । आपवर्ग्या मुक्तिहेतवः प्रायः सम्यग्भक्त्यानुष्ठिता इति शेषः । हे पुरुष ! परं न चेत् त एत्राजितेन्द्रियाणां पुंसां वार्तास्तत्कालजीवनमात्रोपाया भवन्त्युत अपि संभावनामात्रं नतु मुख्यत इत्यर्थः । लोकमोहनार्थं मौनादिकमनुतिष्ठतां दांभिकानां तदपि न सेत्स्यतीत्याह, अत्र जीवलोके वा यथा अजितेन्द्रियाणां जीवनमात्रोपाया न तथा दांभिकानां भवन्तीति "वा विकल्पोपमानयोः" इत्यभिधानं नवा भवन्तीत्येकं वाक्यमिति वा ॥ ४६ ॥

मौनादीनां क्लेशसाध्यत्वेनासर्वाधिकारिकत्वात् सर्वाधिकारिकोपासनाविषयं निरूपयति, रूपे इति । इमे सदसती कार्यकारणे तव रूपे त्वद्वशत्वात्त्वत्सन्निधानयोग्ये अत्रप्रमाणमाह, वेदेति । "द्वावेव ब्रह्मणो रूपे" इत्यादौ कार्यकारणत्वं किंविकारभावेन निमित्तनैमित्तिकभावेन चेत्याशंक्य यथायोग्यमित्यूहनीयमित्यत्र दृष्टान्तमाह—बीजेति । व्याख्यातमेतत् "विज्ञानमानन्दं ब्रह्म" इतिवत् वेददृष्टे चेत् किं साक्षाद् रूपे इति ? नेत्याह—नचेति । अन्यद्विलक्षणं ज्ञानानन्दादिलक्षणं नैव कुतोऽत्राह——अरूपकस्येति । प्राकृतरूपाभावादित्यर्थः । महतां प्रत्यक्षं चात्रप्रमाणमित्याह, युक्ता इति । भक्तियोगेनोभयत्र रूपद्वये युक्ता उपासनालक्षणध्यानेनेतिशेषः । युक्ता योगिनः उभयत्र संनिहितं त्वां पश्यन्तीति वा दर्शनप्रकारमाह—वह्निमिति । योगेन मथनाद्युपायेन अन्ययोगं निवारयति—नान्यत इति । भक्तियोगादन्यतोऽन्येनेति । साक्षात्स्वरूपादन्यत् प्राकृतं रूपं नैव "अरूपमक्षरं ब्रह्म" इति श्रुतेः । अतो न साक्षाद्रूपे इति वा योजना, साक्षात्स्वरूपापेक्षया स्वरूपादन्यद्रूपं नेत्याचार्यविवरणमत्र प्रमाणम् ॥ ४७ ॥

के ते कार्यकारणे इत्यतस्तन्नामनिर्देशः तत्सत्ताप्रदत्वेन तद्वशत्वे तद्रूपत्वाभिप्राय इत्याशयेनाह–त्वमिति । चिदनुग्रहश्चेतनस्तन्मनसा वचसा निरुक्तं न त्वदन्यत् त्वां विना प्रवृत्तिमन्नास्ति सगुणः संसारी शौक्ल्यादिगुणयुक्तो वा. विगुणो मुक्त उत्पन्नानन्तरक्षणविशिष्टपदार्थो वा ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वमिति। हृदयमन्तरिन्द्रियं मनोबुद्ध्यहङ्कारचित्तात्मकं । चित् शुद्धो जीवः अनुग्रहः स्वसन्मुखीकरणशक्तिः किं बहुना सगुणो मायिकः विगुणश्चामायिकः सर्वार्थस्त्वमेवेति ॥४८॥४६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वेते स्त्रीसम्भोगादिभिः सुखिन एव न कृपणास्तत्राह–यदिति । करयोः कण्डूयनेन सङ्घर्षणेनैव दुःखमनुदुःखं यत्र तत् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह–कृपणाः कामुकाः बहुदुःखभाजोपि इह गृहमेधिसुखे दुःखरूपेऽपि न तृप्यन्ति अलमिति न मन्यन्ते कण्डूतिवत् कण्डूताविवेत्यर्थः । ननु, कश्चित् कश्चित्ततो निर्विण्णोऽपि दृश्यते सत्यं त्वत्प्रसादाद्धीर एव मनसिजं कामं दुःखस्वरूपमेव विषहते न तु सर्वे ॥ ४५ ॥

ननु, ब्राह्मणानां तावन्मौनादिभिर्मोक्षसाधनैः स्वत एव सिद्धैर्मोक्षोऽपि स्वत एव सिद्धस्तत्राह, मौनेति । हे पुरुष ! अन्तर्यामिन् ! त्वां किं विज्ञापयामीति भावः । ये मौनादयो दश आपवर्ग्या अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवासः ते तु प्रायशः अजितेन्द्रियाणां विषयभोगार्थमेव तान् विक्रीणतां वार्त्ता जीवनोपाया एव भवन्ति दांभिकानां तु वार्त्ता अपि भवन्ति न वा दम्भस्यानियतफलत्वात् ॥ ४६ ॥

त्वत्प्राप्तिस्तु भक्तियोगं विना मौनादिभिर्नैव भवतीत्याह–रूपे इति । इमे सदसती कार्य्यकारणे बीजाङ्कुराविव प्रवाहापन्ने समष्टिव्यष्टी तवैव रूपे न च अन्यत्समष्टिव्यष्ट्यात्मकं विश्वमिदं त्वत्तो भिन्नं न भवति अरूपकस्य प्राकृतरूपरहितस्य तव अतो युक्ता विवेकिनः त्वाम् उभयत्र समष्टौ व्यष्टौ च विचिन्वतं प्राप्तुमन्विष्यन्ति यतस्त्वं कारणत्वेनोभयत्र वर्त्तसे इति भावः । योगेन उपायेन भक्तियोगेनैव न चान्यतो ज्ञानादिना "भक्त्याहमेकया ग्राह्यः" इति त्वदुक्तेरिति भावः । वह्निपक्षे योगेन मन्थनेन अत एव भक्त्येत्यस्य स्पष्टशब्दस्याप्रयोगः ॥ ४७ ॥

उक्तमर्थं विवृणोति–त्वमिति । हृदयं मनः चित् चित्तं अनुग्रहोऽनुग्राहको देवतावर्गः सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तो नास्ति ॥४८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, एते कृपणाः विषयसुखात्तद्दोषदर्शनेन विरक्ताः सन्तो ब्रह्मजिज्ञासया मुक्ता भविष्यन्तीत्यत्र त्वदनुग्रहं विना दुःखोदर्कात् विषयसुखादपि जनानां विरागो न भवतीत्याशयेनाह, यदिति । यन्मैथुनादिगृहमेधिसुखं यद्यपि तुच्छं क्षणभङ्गुरादिदोषग्रस्तं कण्डूयनेन सङ्घर्षणेन दुःखं यस्मिन् तत्तथाविधं च तथापीह कृपणा बहुदुःखभाजो न तृप्यन्ति कश्चित्त्वत्कृपापात्रो धीर एवं कण्डूतिवन्मनसिजं कामं विषहेत ॥ ४५ ॥

किञ्च मौनादयः आपवर्ग्याः मुक्त्युपायाः ते तु तथा भूता अपि हे पुरुष ! अत्र लोके त्वजितेन्द्रियाणां बुभुक्षूणां परं केवलं वार्त्ता जीवनोपाया न वा भवन्ति उत अपि च दाम्भिकानान्तु वार्ता जीवनोपाया वा न भवन्ति दम्भेन तत्फलनाशात् इत्यर्थः । तत्र मौनं वृथा वचनत्यागः व्रतानि एकादश्युपवासादीनि श्रुतं शास्त्रश्रवणम् तप आलोचनं ज्ञानम् अध्ययनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः ।
आद्यन्तवन्त उरुगाय ! विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥ ४९ ॥
तत्ते ऽर्हत्तम ! (१) नमःस्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥

नारद उवाच ।

एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ।
प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ ५१ ॥

श्रीभगवानुवाच ।

प्रह्लाद ! भद्र ! भद्रं ते प्रीतो ऽहं तेऽसुरोत्तम ! ।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विधिवद्वेदाध्ययनम् स्वधर्मः वर्णाश्रमधर्मः व्याख्या अध्यापनम्-रह एकान्तवासः जपो मन्त्रजपः समाधिर्देवप्रावण्यम् एवं त्वदनुग्रहं विना भववैतरण्याः तरणं त्वत्पदप्राप्तिश्च कस्याप्यधिकारिणः केनाप्युपायेन न सम्भवतीति फलितोर्थः ॥ ४६ ॥

अथ त्वदनुग्रहलब्धया सर्वत्र त्वद्दर्शनपूर्वकया त्वद्भक्त्यैव मुक्तिर्जनस्य स्यादित्याह—रूपे इति चतुर्भिः । वेदसृष्टे वेदेन प्रकाशिते इमे सदसती स्थूलसूक्ष्मे बीजाङ्कुराविव कार्यकारणे कारणं प्रधानं कार्यं ब्रह्माण्डं चेत्यर्थः । अरूपकस्य कर्मजन्यरूपरहितस्य तवैव नान्यत् त्वदन्यत् किमपि न "पुरुष एवेदं सर्वम्" इति श्रुतेः । अत एव युक्ताः त्वदनुग्रहयुक्ता उभयत्र रूपद्वये समत्वं यथा भवति तथा दारुषु वह्निमिव योगेन त्वदनुग्रहलब्धबुद्धियोगेन त्वां विचिन्वते प्राप्तुमन्विष्यन्ति नान्यतः स्यात् एवमन्वेषणम् अन्यतः अधिकारिसामर्थ्यात् साधनसामर्थ्याच्च न स्यात् किन्तु त्वदनुग्रहत एव स्यादित्यर्थः "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति श्रीमुखवचनात् रूपे इमे इत्यनेन चराचरयोर्ग्रहणं न भवति बीजाङ्कुराविवेति निर्देशात् अत एव द्वितीये "अतः परं यदव्यक्तम्" इत्यत्र प्रधानस्यैव ग्रहणं न जीवस्य ॥ ४७ ॥

सर्वं त्वदात्मकमेवेत्याह—वायुरादिस्त्वमेव मात्राः शब्दादयः हृदयमन्तःकरणम् चिच्चेतनवर्गः अनुग्रहोऽनुग्राहको देवतावर्गः सगुणाः सर्वोपि प्राकृतपदार्थः विगुणः प्रकृतिगुणरहितः कालः अप्राकृतलोकश्च किं बहुना मनश्च वचश्च तयोः समाहारस्तेन निरुक्तं विपर्यीकृतं त्वत्तः अन्यत् नास्ति सर्वस्य त्वच्चेतनाचेतनशक्तिमयत्वात् ॥ ४८ ॥

भाषा टीका ।

यह जो सांसारिक गृह मेधीय सुख हैं अति तुच्छ है जैसा हाथों के खुजाने से फिर दुःख होता है एसाही यह भी दुःख दुःख है कृपणजन बहुत दुःख भोगने पर भी इससे तृप्त नहीं होते हैं । धीर पुरुष को उचित है कंडूति (खुजाल) के समान मनासिज (काम) को सहन करे ।। ४५ ॥

मौन, व्रत, श्रुत, तप, वेदाध्ययन, स्वधर्म, व्याख्या, एकान्त निवास, जप, समाधि, यें दशों मुक्ति के साधन हैं, किन्तु हे पुरुष ! ये ही सब अजितेन्द्रियों की वार्ता (जीविका) होजाते हैं वे इन्हीं से धन उपार्जन कर कुटुंब पालन करते हैं । और दांभिकों की तौ वार्ता भी नहीं होसकते हैं । दंभार्थ व्यर्थ परिश्रम होता है ॥ ४६ ॥

(हे भगवन्) ये स्थूल सूक्ष्म कार्य कारण दोनो आप के रूप हैं वेदने प्रकाश किये हैं, बीजांकुर के समान स्थित हैं आपसे पृथक् नही है । युक्त जन योग से इन दोनों में आप को प्रत्यक्ष ढूंढ लेते हैं । जैसे काष्ठों में अग्नि को, आपके विना इस जगत् की सृष्टि नही होसकती है ॥ ४७ ॥

हे भूमन् ! वायु अग्नि पृथिवी आकाश जल और पञ्चतन्मात्रा प्राण इन्द्रियें मन चित्त अहङ्कार सर्व आप ही हो, स्थूल सूक्ष्म जो कुछ मन और वाणी से प्रकाशित है वह आप से अलग कुछ भी नहीं है ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभक्तास्तु स्वस्मिन्ननुगतमपि त्वां न जानन्तीत्याह—नैत इति । एते गुणाद्यभिमानिनो देवा आद्यन्तवन्तो जडोपाधित्वादनाद्यन्तं निरुपाधिं त्वां न विदन्ति हि यस्मात् सुधियो विद्वांस एवं विचार्य

(१) तत्ते महत्तम ! इति वीर० पा०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

शब्दादध्ययनादिव्यापारादुपरमन्ति त्वामेव समाधिनोपासत इत्यर्थः । तथाच श्रुतिः"किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति "नानुध्यायेद्बहून् शब्दान्वाचो विग्लापनं हि तत्" इति स्मृतिश्च—

"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" ॥

इत्यादिः ॥ ४९ ॥

उपसंहरति–तदिति । हे अर्हत्तम ! नमःस्तुतिकर्मपूजाः प्रणिपातस्तुति सर्वकर्मार्पणानि कर्म च परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सम्यक्सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत? यस्मादेवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विनाऽतः प्राक् प्रार्थितं त्वद्दास्ययोगमेव देहीति प्रकरणार्थः ॥ ५० ॥

एतावन्तो वर्णिता गुणा यस्य यतमन्युरुपसंहृतकोपः ॥ ५१ ॥

कामान्पूरयतीति तथा यद्वा पुरुषार्थप्रवाहो ऽस्मीत्यर्थः ॥ ५२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैत इति, गुणाः सत्त्वादयः गुणिनः प्राकृतगुणपरिणामात्मकाः महदादयः आदिशब्देनाहङ्कारतन्मात्राकाशादिभूतानि विवक्षितानि सह देवमर्त्याः देवमर्त्यादिभिः सहिताः मनःप्रभृतयश्च करणानि करणिनश्च ये इत्यर्थः । त एते सर्वे त्वां न विदन्ति गुणाः न विदन्ति गुणिनोऽपि न विदन्तीति प्रत्येकान्वयाभिप्रायेण नञ्द्वयोपादानं सकरणाः सर्वे देवमनुष्यादयः स्वान्तरात्मतयावसन्तमपि न त्वामुपायान्तरेण विदन्तीत्यर्थः । तत्र हेतुं वदंस्तान् विशिनष्टि, आद्यन्तवन्त इति । कर्माधत्तोत्पत्तिविनाशिनः कर्मणा संकुचितज्ञानत्वान्न विन्दतीति भावः । मुनयःसर्वान्तरात्मभूतत्वत्स्वरूपमननशीलास्तु । हे उरुगाय ! त्वामेव सर्वात्मकब्रह्मानुसन्धानरूपयोगेन त्वत्साक्षात्कारविरोधिकर्मनिरसनेन विसृज्य विमर्शनपूर्वकं साक्षात्कृत्य शब्दात् शब्दादिविषयाद्विरमन्ति एवमेव हि निःशेषमिन्द्रियजय इति भावः ॥ ४९ ॥

एवमुपासनात्मकभक्त्यैकवेद्यत्वं निरतिशयानन्दरूपत्वत्स्वरूपविषयकभक्तियोगगतस्यार्थादेव शब्दादिविषयेभ्यो विरामश्चोक्तः सा च भक्तिर्वक्ष्यमाणषडङ्गसेवया विना दुर्लभेति वदन्नुपसंहरति–तदिति । हे महत्तम ! तव नमस्तुतिकर्म नमस्क्रिया नमस्कारः स्तुतिक्रिया च. पूजा अर्घ्यपाद्यादिनिवेदनात्मिका कर्म परिचर्यात्मकम्. यद्वा, प्रथमकर्मशब्देन पादसेवनादिपरिचर्यात्मकं कर्म उच्यते पूजाकर्म पूजात्मकं कर्म-चरणयोः स्मृतिः स्मरणं कथायां विषयभूतायां श्रवणं कथाविषयकश्रवणं चेतीत्थं षडङ्गया सेवया विना परमहंसानां प्राप्ये त्वयि भक्तिं जनो लभेत किम् ? नैव लभेतेत्यर्थः ॥ ५० ॥

तदेवं प्रह्लादेन संस्तुतो नृसिंहस्तमुवाचेत्याह देवर्षिः—एतावदिति । भक्तेन प्रह्लादेन भक्त्या एतावदेतावन्मात्रं वर्णिता गुणा यस्य एतावच्छब्देन गुणानामानन्त्यं सूचयति-- निर्गुणो हेयगुणरहितः श्रीनृसिंहःयतमन्युरुपसंहृतक्रोधः प्रीतःस्तुत्या हृष्टः "स महात्मा सुदुर्लभः" इत्युक्तरीत्या दुर्लभस्वभक्तलाभेन वा प्रीतः प्रणतं तं प्रह्लादमभाषतोवाच ॥ ५१ ॥

तदेवाह–प्रह्लादेति, त्रिभिः । हे प्रह्लाद वत्स ! ते भद्रमनिष्टनिवृत्तिरिष्टप्राप्तिश्च भवेत् कुतः हे असुरोत्तम ! यतो ऽहं ते त्वया प्रीतः प्रीतिं प्रापितः अत एवाभिलषितं वरं वृणीष्व वरय अहं नृणामर्थिनां कामपूरः काम्यन्त इति कामाः धर्मादयस्तान् पूरयति ददातीति तथा ऽहमस्मि ॥५२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथिव्यादिमहत्तत्वान्तं पदार्थजातं कार्यकारणात्मना द्वित्वेन क्रोडीकृतं भगवद्रूपं ततोभिन्नमित्युक्तम् इदानीं तदवस्थितपरमात्मानं तदभिमानिनो देवा अपि साकल्येन न जानन्तीत्येव. विधाऽनन्तमाहात्म्यास्बुराशिरिति निश्चित्य, तमुपासते सन्त इत्याह, नेति । गुणाः सत्त्वादिगुणाभिमानिनः गुणिनो गुणविकाराः सहदेवमर्त्या-इत्यत्र देवशब्देन पृथग्विग्रहवन्त इन्द्रादयो गृह्यन्ते सुधियो निश्चितशास्त्रार्थाः शब्दाद्वेदादिशब्दराशिप्रमाणादेते आद्यन्तवन्तस्त्वां न विदन्तीत्येवं विमृश्य विचार्योपास्य तत्प्रसादेन संहृश्य विरमन्ति संसारादिति शेषः ।"यद्वाचानभ्युदितम्"इत्यादि श्रुतेः शब्दाद्विरमंतीत्यत्र शब्दत्यागो नार्थः किंतु वेदेन निर्णीततत्त्वस्य तत्त्वे निरन्तरस्यन्दमानबुद्धिजलराशेः पुंसो हरिगुणानुस्मरणायासो नास्तीति वा ॥ ४९ ॥

श्रीनारायणप्रसाद एव पुरुषार्थसाधनमित्युक्तं तस्य भक्तिज्ञाने तयोश्च षडङ्गोपासनासाध्यं ध्यानं विना नान्यदन्यथा न स्यादित्याशयेनाह–तत्त्व इति। हिशब्देनान्यथाजीवञ्छ्व इत्याह–अपिशब्दात् पादौ तव सेवानुगमनेनियोज्याविति ग्राह्यं एवं षडङ्गया सेवया विना जनो मुमुक्षुः परमहंसानां गतावाश्रयभूते त्वयि भक्तिं ज्ञानं च लभेत किम् ? साधनान्तराभावान्नाप्नोतीत्यन्वयः । भक्तिज्ञानयोर्हेतुहेतुमद्भावादेकग्रहणेन द्वयोर्ग्रहणं युज्यत इति भावः । "परा पूर्वेषां सङ्ख्या वृणक्ति"इति श्रुतेः ॥ ५० ॥

हरेरसुरेषु प्रद्वेषाशयात्प्रह्लादस्यापि तज्जातित्वेन तत्स्तुत्या कोपोपशमः स्यात्किम् ? प्रत्युताक्षेपकत्वेनाग्नौ शुष्केन्धनप्रक्षेपणवज्ज्वलनाय स्यादिति तत्राह, एतावदिति । योग्यतानुकूल्येन भक्त्या भक्तेनेति विशेषणद्वयेन शङ्कानिरस्तेति ज्ञातव्यं जातित्वमप्रयोजकं भक्तिरेवेति सूचनेन दैवदत्तवदुन्मत्तो न भवति भगवानिति सिद्धम् ॥ ५१ ॥

मन्युशान्तेः किं गमकमिति तत्राह—प्रह्लादेति । वरदानसामर्थ्ये हेतुमाह—कामपूर इति । नृणां भक्तानामिति शेषः ॥ ५२ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कर्म पूजापरिचर्या कर्मस्मृतिर्लीलास्मरणं चरणयोरिति सर्वत्रान्वितम्, भक्तिव्यञ्जकं तस्मात् सर्वकृतार्थतामूलत्वत्-प्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेभ्योऽपि देहि. अहञ्च त्वद्भक्तकृपया साक्षादङ्घ्रिमूलप्राप्तौ त्वदसाक्षाद्दास्ययोगादौ वा कृतार्थतामापन्नोऽपि तेनैव कृतार्थतां मंस्ये इति. ब्रह्मादिषु प्रसादो यः प्रथमं प्रार्थितःतस्यापि कैमुत्येन गमितत्वात् सर्वप्रार्थना वाक्यैकवाक्यत्वे सिद्धे तदनुगतानामन्येषामपि वाक्यानां तत्त्वतःसिद्धम् ॥ ५० ॥

गुणाः कारुण्यादयः तत्तद्दानादिक्रियाशक्ति रूपाश्च ॥ ५१ ॥

तदेवं श्रीमत्प्रह्लादस्य सर्वजीवगतां कृपामनुमोदमानः तस्याश्च पूरकं य एतत् कीर्त्तयेदिति पर्यन्तमाशंसनं करिष्यन्न-भीष्टान्तरमर्थयितुमुत्साहयति—अभिमतमन्यमन्यमपि वरम् ॥५२॥५३

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्वज्ज्ञानं त्वद्भक्त्यैव भवेत् नतु शास्त्राध्ययनबुद्धिकौशलादिभि-रित्याह—नेति । यद्येते त्वां न विदन्ति तर्ह्येतैरेव मनोबुद्ध्यादिभिः शास्त्रार्थाध्ययनाध्यापनादिभिर्विचार्य्य जीवाः कथं ज्ञास्यन्ति विमृश्य,शब्दादध्ययनादिव्यापारादुपरमन्ति तथा च श्रुतिः"किमर्था वयं यक्ष्यामः" इति "नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत्"इति स्मृतिश्च "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इत्यादि ॥ ४९ ॥

स्तुतिमुपसंहरति–तदिति । यस्मादध्ययनादिभिस्त्वज्ज्ञानं भवे-त्तस्मात् त्वज्ज्ञानार्थमाग्रहं परित्यज्य सर्वपुरुषार्थसारस्य त्वत्प्रेम्णः साधनार्थमेव यतेतेत्याह, हे अर्हत्तम ! नमो नमस्कारश्च स्तुतिकर्म स्तव करणञ्च पूजा अर्चनञ्च ताः कर्मपरिचर्य्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सेवया भक्त्या विना त्वयि किं भक्तिं प्रेमाणं लभेत ? नैव लभेतेत्यर्थः। परमहंसानां ज्ञानिनां गति-र्मुक्तिर्यस्मात्तस्मिन्निति कथंचिद्भक्तिमिश्रज्ञानेन मुक्तिमेव लभेतेति भावः । तस्मात्सर्वकृतार्थता—मूलत्वत्प्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेभ्योऽपि देहि सा दुर्लभा चेत् मुक्तिमेव दत्वा संसार-दुःखात्तावत्सर्वांस्त्रायस्व अहन्तु त्वद्भक्तसेवयैव कृतार्थीकृत एव वर्त्ते इति न काचिच्चिन्तेति भावः ॥ ५० ॥

गुणाः कारुण्यादयः निर्गुणः प्राकृतगुणरहितः यतमन्युः भक्ताय प्रह्लादायापि द्रुह्यतीति यो दुर्वारो मन्युरभूत् स प्रह्ला-दस्यानन्ददर्शनादुपशान्त इत्यर्थः ॥ ५१ ॥

अभिमतं वृणीष्वेति मयिभृत्यवत्सले परमोदारचूडामणौ कः संकोच इति भावः । येषां कृते त्वं मां प्रार्थयसे तेषामपि नृणामहं कामपूरोऽस्मि पुरुषार्थप्रवाहरूप एव वर्त्ते. किं पुनरेकां मुक्तिमेव ददे इति भावः । तेन प्रह्लादबुद्धिविषयीकृतास्ता त्कालिका जीवा निस्तीर्णा एव जीवानामानन्त्याच्चदन्यैरेव जीवैः तदनन्तरं ब्रह्माण्डमपूरीति ज्ञेयम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एते गुणाः सत्त्वादयो जडत्वात् त्वां न विदन्ति गुणिनो महदादयो गुणकार्यभूता ये च मनःप्रभृतयस्ते सर्वे आद्य-न्तवन्तः जडाश्च अतो न विदन्ति । हे उरुगाय ! सह देवमर्त्याः देवैर्मर्त्यैश्च सहिताः सुधियः साधवस्तु "एवं युक्ताः समक्षमुभ-यत्र विचिन्वते त्वां योगेन वह्निमिवदारुषु" इत्युक्तप्रकारेण त्वां विमृश्य शब्दात् ज्ञानोपायबोधकात् शास्त्राद्विरमन्ति फलं प्राप्या-ध्यापनाध्ययनश्रमं विहाय त्वां ध्यायन्तीत्यर्थः ॥ ४९ ॥

हे अर्हत्तम ! यस्मात्त्वमेव सर्वात्मा तस्मात्ते सेवया साधन-रूपया भक्त्या विना परमहंसानां गतौ प्राप्ये त्वयि जनः भक्ति परां भक्तिं किं लभेत? नैव लभेतेत्यर्थः। अतः सेवां देहि, यया परा भक्तिर्यया जनस्य मुक्तिरिति फलितोऽर्थः । कथंभूतया नमो नतिश्च स्तुतिकर्म स्तुतिकरणं च पूजा ऽर्चनञ्च कर्म परिचर्या च चर-णयोः स्मृतिः कथायां श्रवणं चेति षडङ्गया ॥ ५० ॥

निर्गुणो हेयगुणरहितः भक्त्या प्रह्लादेन एतावत् एतावन्मात्रं वर्णिताः गुणाः कल्याणरूपा यस्य सः जित उपसंहृतो मन्युर्येन सः प्रह्लादमभाषत ॥ ५१ ॥

कामान् पूरयतीति कामपूरः ॥ ५२ ॥

भाषा टीका ।

न ये गुण और न गुणी जो मनः प्रभृति हैं और म-हदादिक हैं देवता और मनुष्यों सहित वे सबी आदि अन्त वाले हैं हे उरुगाय ! (वेदपुराणादिकों में आप बहुत गाये गये हो) इसी कारण से ये सब आपको नहीं जान सके हैं ऐसा विचार कर ही सुधीजन शब्द अर्थात् बहुत पठन पाठन की खट पट से विराम को प्राप्त हो जाते हैं ॥ ४९ ॥

हे अर्हत्तम ! हे पूज्यतम ! आप को न मस्कार स्तुति और सर्व कर्मार्पण परिचर्या चरणस्मृति कथाश्रवण, इन छै अङ्गो सहित आप की सेवा के विना मनुष्यक्या परमहंसों के प्राप्य आप में भक्ति को पासका है ? नहीं, किन्तु आप की सेवा ही से सिद्धा भक्ति मिलती है ॥ ५० ॥

नारद उवाच ॥

नारदजी बोले, कि—आप स्वयं निर्गुण है अर्थात् प्राकृत गुण शून्य हैं, तौ भी अपने भक्त प्रह्लाद ने भक्ति से आप के गुण वर्णन किये, तब प्रभुने कोप शान्त कर प्रसन्न हो प्रणत भक्त प्रह्लाद से भाषण किया ॥ ५१ ॥

श्रीभगवान् उवाच ।

श्री भगवान अर्थात् श्री नरसिंह देव बोले, कि—हे भद्र ! हे प्रहाद ! हे असुरोत्तम ! हम तुमारे ऊपर प्रसन्न हैं तुम अपने अभीष्ट वर मांगलो मैं मनुष्यों का कामनाओं को पूर्ण करने वाला हूं ॥ ५२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मामप्रीणत आयुष्मन् ! दर्शनं दुर्लभं हि मे ।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥ ५३ ॥
प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः ।
श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५४ ॥
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।
एकान्तित्वाद्भगवति नैच्छत्तानसुरोत्तमः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे प्रह्लादाऽनुचरिते दैत्यराजवधे नृसिंहस्तवो नाम
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अप्रीणतः अप्रीणयतः तप्तुमपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥
प्रीणन्ति तोषयन्ति ॥ ५४ ॥
एकान्तित्वान्निरुपाधिभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

हे आयुष्मन् ! मामप्रीणतः प्रीतमकुर्वतः पुंसो दुर्लभं हि मम दर्शनं मां दृष्ट्वा जन्तुर्देही पुनरात्मानं तप्तुमपूर्णकामत्वेन शोचितुं नार्हति ॥ ५३ ॥

अथातो धीरा जितेन्द्रियाः श्रेयस्कामयमाना महाभागा विवेकिनः साधवः सर्वासामाशिषां पुरुषार्थानां पतिं दातारं मां सर्वभावेन करणत्रयैक्येन प्रीणन्ति तोषयन्ति हि खलु ॥ ५४ ॥

एवं वराय चोदितोपि नैच्छदसुरोत्तम इत्याह, नारदः एवमिति । लोकानां विषयातुराणां प्रलोभनैर्विमोहकैर्वरैरेवमित्थं प्रलोभ्यमानोऽप्यसुरोत्तमः प्रह्लाद एकान्तभक्तत्वादनन्यप्रयोजनभगवद्भक्तियुक्तत्वात्तान् धर्मादीन्वरान्नैच्छन्नेयेष ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मत्प्रसाद एव दर्शने कारणमित्याह—मामिति। मामप्रीणतोऽप्रीणयतः मद्दर्शनफलं च पापदर्शनवन्नेत्याह, दृष्ट्वेति ॥ ५३ ॥

यतो न तत्प्राप्त्यैष्या तस्माद्धीरा माधवं मां प्रीणन्ति प्रीणयन्ति केन सर्वभावेन पूर्णभक्त्या माधव इत्यस्यार्थो मङ्गलदेवतापतिरित्यभिप्रायेणाह—सर्वेषामिति। सर्वेषामविशेषेण या या अभिलषिता आशिषस्तासां तासामाशिषां पतिं पातृत्वेन दातारमित्यर्थः ॥ ५४ ॥

प्रह्लादोपि सामान्यभक्तो न भवति किंतु भक्तोत्तम इति प्रकटनाय भगवता विप्रलब्धोऽपि तान्वरान्नैच्छदित्याह, एवमिति। एकान्तित्वान्नैसर्गिकभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्-
विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अथ अत एव अभिमत वरेच्छात एव ॥ ५४ ॥
एवं पूर्वोक्त प्रकारेण वरैः स्वयमेव निर्दिष्टैः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
नवमोऽध्यायः समाप्तः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अप्रीणतः अप्रीणयतः तप्तुम् अपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥
प्रीणन्ति प्रीणयति मां प्रति तुष्यन्तीति वा सर्वभावेन दास्यसख्यादिना ॥ ५४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एकान्तित्वात् "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति" इति तल्लक्षणात् ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
सप्तमेनवमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मामप्रीणतोऽप्रीणयतः जनस्य मे दर्शनं दुर्लभम् भक्त्या प्रसन्नं मां दृष्ट्वा तु आत्मानं तप्तुमपूर्णकामत्वेन सन्तापयितुं नार्हति ॥५३॥
सर्वभावेनाखण्डया भक्त्या प्रीणन्ति तोषयन्ति ॥ ५४ ॥
एकान्तित्वान्निष्कामभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाऽध्यायार्थ प्रकाशः ॥ ९ ॥

भाषा टीका।

हे आयुष्मन्! मुझे प्रसन्न न करके मेरा दर्शन दुर्लभ है वस मेरा दर्शन पाकर जन्तु सन्ताप को प्राप्त नही होसकता है ॥५३॥

साधुजन धीर पुरुष सर्व भाव से मुझे प्रसन्न करते हैं जो कि श्रेय की कामना वाले महाभाग हैं, मैं भी कैसा हूं कि सर्व संपत्ति और अभीष्ट पुरुषार्थों का देने वाला हूँ ॥ ५४ ॥

इस प्रकार बहुत लुभाने वाले वरों से प्रह्लाद को लोभ दिखाया परंतु असुरोत्तम श्रीप्रह्लाद जी ने भगवान् के एकांति भक्त होने से उनवरों की इच्छा नहीं की ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में
श्रीप्रह्लाद चरित में श्रीनरहरि स्तुति नामक
नवम अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे नवमोऽध्यायः ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ दशमोऽध्यायः ॥

नारद उवाच ।

भक्तियोगस्य तत्सर्वमन्तरायतयाऽर्भकः ।
मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥ १ ॥

प्रह्लाद उवाच ।

मा मां प्रलोभयोत्पत्त्याऽऽसक्तं कामेषु तैर्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥ २ ॥
भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ।
भवान्संसारबीजेषु हृदयग्रन्थिषु प्रभो ! ॥ ३ ॥
नान्यथा तेऽखिलगुरो ! घटेत करुणात्मनः ।
यस्त आशिष आशास्तेऽन स भृत्यः स वै वणिक् ॥ ४ ॥
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।
न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥ ५ ॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥
यदि रासीश ! मे कामान्वरांस्त्वं वरदर्षभ ! ।
कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥ ७ ॥
इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ।
ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे त्वनुग्रह्यामुं भक्तमन्तर्हिते हरौ ।
प्रसङ्गाद्धरिणा रुद्रे कृतोऽनुग्रह ईर्यते ॥ १ ॥

तत्सर्वं वरजातम् ॥ १ ॥

उत्पत्त्या स्वभावेनैवासक्तं माम् तेषां कामानां सङ्गाद्भीतः ॥२॥

ननु, किमहं भक्तं प्रलोभयामि ? नहि, किन्तु वरं वृणीष्वेति वद-तस्तवाभिप्रायोऽन्य एवेत्याह-भृत्यलक्षणेति । हृदयस्य ग्रन्थिवद्-बन्धकेषु ॥ ३ ॥

अन्यथा ऽनर्थसाधने प्रवर्त्तनं न घटेतेत्यर्थः कथमेवं भृत्यलक्ष-णज्ञानं स्यात्तत्राह-य इति । ते त्वत्तः ॥ ४ ॥

ननु, कामनयाऽपि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः सत्यम्, सोपाधिको ऽसौ नतु तात्त्विक इत्याह—स्वामिन्यात्मन आशिषो ऽपेक्षमाणो नैव भृत्यः भृत्यहेतुकमात्मनः स्वाम्यमिच्छन्यो भृत्याय ददाति स च नैव स्वामी ॥ ५ ॥

आवयोस्तु तात्त्विकोऽसावित्याह-अहं त्विति । अनपाश्रयो निर-भिसन्धिः अन्यथा कामाद्यभिसन्धिनाऽर्थः प्रयोजनं नास्ति ॥ ६ ॥

ननु, तथाऽपि परमोदारस्य मम सन्तोषार्थं किमपि वृणीष्वेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका।

चेदत आह–यदीति। कामाङ्कुराणामसंरोहमनुत्पत्तिम् भवतः सकाशात् ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह–इन्द्रियादीनि यस्य जन्मना नश्यन्ति आत्मा देहः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

वराऽनिच्छायां हेतुं वदन् तं विशिंषन्भगवन्तं प्रह्लादः प्राहेत्याह–देवर्षिः, भक्तियोगस्येति। तद्भगवता चोदितं धर्मादिवरजातं सर्वमनन्यप्रयोजनभक्तियोगस्यान्तरायतया विघ्नरूपतया मन्यमानः स्मयमानः अहो मदभिप्रायज्ञो मदन्तरात्मा सन्मामेवं प्रलोभयतीति स्मयमानो हृषीकेशं भगवन्तमुवाच ॥ १ ॥

तदेवाह—दशभिः, मेति। उत्पत्त्या स्वभावेनैव कामेषु सक्तमासक्तमिति वा छेदः उत्पत्तिप्रभृतिकामेष्वासक्तं मान्तैःकामरूपैर्वरैर्मां प्रलोभय प्रलुब्धं मा कुरु यतोऽहं तत्सङ्गेन कामासक्त्याऽनर्थावहया भीतस्तत्र कामेषु निर्विण्णः संसृतिबन्धान्मोक्तुमिच्छुस्त्वामुपाश्रितः शरणं गतः ॥ २ ॥

वरं वृणीष्वेति वराय चोदयतस्तव चोदनाद्वारा याचमानाय मह्यं न वरप्रदानेऽभिप्रायः किन्तु भृत्यस्य मम मनःपरीक्षायामित्याह—भृत्येति। कामेषु भृत्यं मां चोदयन् भवान् भृत्यस्यानन्यप्रयोजनत्वरूपं लक्षणं जिज्ञासुः सर्वज्ञोपि भवान् मन्मुखेन मन्मनः परिजिज्ञासुरेव भृत्यं मां मन्मनः परीक्षार्थमेव मां भृत्यं कामेषु भवान् चोदितवानित्यर्थः। अचोदयादिति पाठः सुगमः अन्यथा वरयाञ्चायै चोदना कारुण्यजलधेर्हितोपदेष्टुर्भक्तानुग्राहकस्यानर्थावहेषु कामेषु भृत्यं प्रति चोदना न घटत इत्याह—अन्यथैवं चोदयतस्तव भृत्यलक्षणजिज्ञासुत्वाभावे तव करुणात्मनः कारुण्यमूर्त्तेरखिललोकहितोपदेष्टुरहितरूपेषु दुःखरूपगर्भजन्ममरणादिरूपसंसारस्य बीजभूतेषु हृदयग्रन्थिवद्दुर्मोच्येषु न घटेत चोदनेति शेषः। अतो भृत्यलक्षणजिज्ञासुः सन्नेव कामेषु मामचोदयदित्यर्थः। अत्र घटेत करुणात्मन इत्यस्यानन्तरं क्वचित् "नष्टदृष्टेस्तमस्यन्धे त्वमेकः पारदर्शनः" इति पठ्यते. तत्रायमर्थः। इतोपि न कामेषु चोदना भवतो घटत इत्याह—नष्टदृष्टेरिति। अन्धेतमसि संसारात्मके नरके नष्टदृष्टेः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्यान्धतमस्तरणोपायानभिज्ञस्य वा पुंसः त्वमेवैकः पारदर्शनोऽन्धतमसः पारभूतमात्मानं दर्शयतीति तादृशः यत एवंभूतस्त्वं ततस्तव न घटत इति ॥ ३ ॥

नन्वाशिषः कामयमानोऽपि भृत्यो मम दृश्यत एवेत्यत आह—य इति। ते त्वत्तः निरतिशयपुरुषार्थस्वरूपाद्यः पुमानाशिषः कामानाशास्ते त्वत्सेवापूर्वकं प्रार्थयते. स तव न भृत्यः न भृत्यलक्षणलक्षितः किं तर्हि सतु वणिक्तुल्यः यथा वणिग्यावत्स्वप्रयोजनमन्यमनु वर्त्तते तद्वत्सोपाधिकानुवृत्तिमानित्यर्थः ॥ ४ ॥

एवं भृत्यात्किञ्चित्प्रयोजनमपेक्ष्य तस्मै कामान्ददतः स्वामित्वमपि निरुपाधिकं नास्तीत्याह–आशासान इति। आत्मनः स्वस्य स्वामिन्याशिषः कामानाशासानः कामयमानः न वै भृत्यः भृत्यो न भवति, इदं दृष्टान्तार्थम् अस्यार्थस्य पूर्वमुक्तत्वाद्यथायं भृत्यो न भवतीत्यर्थः। तथा भृत्यात्स्वाम्यं स्वामिनः प्रयोजनं स्वाम्यं तदिच्छन्कामयमानो यो भृत्यायाशिषो राति ददाति सवै न स्वामी स्वामिशब्दवाच्य एव न भवति नित्यं निरुपाधिकं स्वमस्यास्तीति स्वामीति नित्ययोगार्थमत्वर्थीयप्रत्ययान्तस्वामीशब्दवाच्य एव न भवति तस्य सोपाधिकस्वामित्वादितिभावः। अत्र "राति चाशिष" इत्यस्यानन्तरम् "स वै स्वामी स वै भृत्यो गुणलुब्धौ न कामुकौ" इति क्वचित् पठ्यते. तत्रायमर्थः कौ तर्हि स्वामिभृत्यौ इत्यत आह—सवा इति। यौ गुणलुब्धौ परस्परानुरागजनकसद्गुणमात्रमोहितौ न कामुकौ परस्परं प्रयोजनान्तरमनपेक्षमाणावनुवर्त्तेते स एव भृत्यः स एव स्वामीति ॥ ५ ॥

आवयोस्तु भृत्यस्वामिभावः स्वाभाविक इत्याह–अहमिति। अहन्तु, कीदृशो वा भवतु लोके भृत्यः अहं त्वकामोऽनन्यप्रयोजनः त्वद्भृत्य इति तु शब्दार्थः। त्वमनपाश्रयः स्वामीति त्वद्भक्तोऽहमकामोऽनन्यप्रयोजनः।

"स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम्।
नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च" ॥

इत्युक्तरीत्या प्रबुद्धनित्यनिरुपाधिकत्वद्दास्योऽहं त्वं तु निरुपाधिकस्वामीत्यध्यवसायपूर्वकं नित्यं स्वस्य स्वाम्यनुवर्त्तनं स्वस्वरूपानुबन्धीत्यध्यवसायेन परिहृतान्यप्रयोजनस्त्वद्भक्तोऽस्मीत्यर्थः। अतोऽन्यथा प्रकारान्तरेणावयोरिह स्वस्वामिभावेऽर्थः प्रयोजनं नास्ति राजसेवकयोरिवेति व्यतिरेकदृष्टान्तः यथा राजसेवकयोः प्रयोजनान्तरमूलकः स्वस्वामिभावः; तथा नावयोरिति तदेतत्सर्वज्ञस्त्वं जानास्येवेति भावः ॥ ६ ॥

अहो सर्वज्ञस्यापि किमेतद्वरयाञ्चायै चोदयतः सत्यसङ्कल्पस्य मम वचसः प्रत्याख्यानं तव शोभते इति भगवदभिप्रायमभिप्रेत्य यदि भवतो मह्यं वरप्रदानेऽभिलाषस्तर्हीदं वरयेत्याह—यदीति। हे ईश! वरदश्रेष्ठस्त्वं मे मह्यं कामानिष्टान्वरान् रासि ददासि तर्हि भवतस्त्वत्तोऽहं मद्धृदये कामानां कामाङ्कुराणामसंरोहमनुत्पत्तिरूपं वरं वृणे धर्मादिपुरुषार्थेच्छानुदयरूपं वरं याच इत्यर्थः ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह—इन्द्रियाणीति। यस्य हृदि सञ्जातकामाङ्कुरस्य कामान् कामयमानस्येन्द्रियादीनि जन्मना जन्मपरम्परया नश्यन्ति कामिनोऽन्ततः स्थावरत्वप्राप्तौ इन्द्रियमनःप्राणात्मानः प्रवासत्प्राया भवन्ति किं पुनर्धर्मादय इति भावः। नहीतोऽन्यः कश्चिदनर्थो विद्यत इति तात्पर्यम्, तत्रात्मा प्रत्यगात्मा. धर्मो वर्णाश्रमाऽनुगुणो भगवदाराधनरूपः धृतिर्धैर्यमिन्द्रियजयो द्वन्द्वसहिष्णुता वा. मतिः स्वात्मपरमात्मविषया. ह्रीरनुचितकृत्यविषया लज्जा. श्रीर्ज्ञानसम्पत्तिरैश्वर्यं वा. तेजोऽन्याऽनपेक्षता स्मृतिः हेयोपादेयाऽविस्मरणात्मिका. सत्यं भूतहितत्वं सत्यवचनं वा ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्मिन्नध्याये भक्त्यैव पुरुषार्थो न द्वेषेणेत्येतत्प्रतिपादनं पुनः पुनर्भक्तेः प्राधान्यज्ञापनायान्यदासुरमोहनायेति तात्पर्यम्, वराननिच्छन् प्रह्लादो हरिं किमत्युवाचेति हार्दं. युधिष्ठिरप्रश्नं परिहरन्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नारदस्तत्र वक्तीत्याह—नारद इति। वयसार्भको नतु ज्ञानेनेत्येतद्विशेषप्रकाशनाय हेति विशेषणं हि हेताविल्यमरः ॥ १ ॥

ज्ञातसर्वेन्द्रियवृत्तित्वाद्धृषीकेशेन त्वया मन्मनोगतं ज्ञातमिति यदतो मनःपरीक्षणार्थे एतैर्मनप्रलोभनं न कुर्विति प्रार्थयते, इत्याशयेनाह—मामेति । गुरुवचनमज्ञातेष्टबोधकत्वेन प्रमाणं स्यादिदं स्वभावत एव ज्ञातेष्टबोधकत्वाद्व्यर्थमिव प्रतिभातीत्याशयवानाह—उत्पत्त्येति । आसक्तमिति लोकवृत्तान्तप्रदर्शनपरं प्रह्लादस्यार्भकावस्थामारभ्य विष्णुधर्मैकनिष्ठत्वात् यतो विषयसङ्गिनामनर्थपरम्परा दृश्यते तत्तस्माद्विषयणः । विषयिणो विषयाऽसिद्ध्या तात्कालिकप्रसूतनिर्वेदवन्नायं निर्वेद इत्याह-मुमुक्षुरिति। अनेन प्रह्लादस्याधिकारलक्षणसामग्री विद्यत इति दर्शितम् ॥ २ ॥

नतु, भगद्वाक्यं क्वापि विप्रलम्भकं न भवति "अजस्यावक्रचेतसः"इति श्रुतेः । भवता तथैव प्रोच्यते तथाच भगवद्वाक्यस्या विश्वसनीयत्वं स्यादिति तत्राह—भृत्येति । चोदयात् चोदयति "धियो यो नः प्रचोदयाद्"इति श्रुतेः ॥ ३ ॥

वञ्चनार्थमेव तथोच्यत इति किन्नस्यादत्राह—नान्यथेति । अखिलगुरुत्वान्यथानुपपत्त्या न वञ्चनं युक्तमित्यर्थः । इतोऽपि भृत्यलक्षणजिज्ञासैव प्रयोजनं त्वद्वचनस्यान्यथा तवेष्टजनघातकत्वदोषापत्तिः स्यात् सा निर्दोषत्वेन न युक्तेत्याशयवानाह-नष्टेति । न केवलमितरगुरुवन्मार्गमात्रप्रदर्शकः किन्तु गम्यं च, अतो विप्रलोभनं न युक्तमतो वाह—नष्टेति। पारदर्शिनः पारं चान्तं द्रष्टुमिच्छतः ननु, मत्प्राप्तिकामायाशीर्दानवचनमस्तु नाम प्रलोभनं तत्कामुकस्याभीष्टदानावचनेऽनाकाङ्क्षिताभिधानं स्यादिति तत्राह, यस्त इति । ते तव सकाशात् आशिषः सम्पदः सेवायाः। तर्हि स क इति तत्राह—स इति ।"वन षण सम्भक्तौ"इति धातोः सम्भजनं विक्रयं द्रव्यं प्रसार्य दानलक्षणं तत्कर्त्तावणिग्वै । हि मयं च किञ्चित्सुकृतकरणलक्षणादानेन भवादृशाज्जनात्पुण्यलक्षणफलादानं करोतीति यस्मात्तस्माद्वणिगित्यर्थः । आशास्ते इच्छति अनेन फलदस्य स्वामित्वं च विघटितं भवतीति दर्शितम्.* तर्हि कयोः स्वामिभृत्यभाव इति तत्राह—सवा इति। "लुभ गार्ध्ये"इति धातोः भक्त्यादिगुणोद्रेकाकाङ्क्षिणौ गुणलुब्धौ मिथः फलानि न कामुकौ ॥ ४ ॥

ननूभयोः फलकामित्वे को दोष इति तत्राह—आशासान इति। स्वामिनि समवेता आशिष आत्मनः स्वस्याशासानो यः स भृत्यो न वै नैव किन्तु प्रतिभट एव वरदानादिना भृत्यात्स्वस्य स्वामित्वमिच्छन् यो भृत्यायाशिषो राति ददाति स स्वामी न च। कल्पितस्वामित्वेन तच्छब्दस्य मुख्यार्थोलाभात् ॥ ५ ॥

प्रकृते किमभूदिति तत्राह—अहन्त्विति। अनपाश्रयो भृत्यप्राप्यफलानाश्रयः स्वामी अव्याहतस्वामीत्यर्थः । एतदेव दृढयति, नान्यथेति । निष्कामत्वेन भृत्यत्वं मम अनपाश्रयत्वेन स्वामित्वम् एतस्मादन्यथा प्रकारान्तरेणावयोरर्थो नास्ति किन्तत्प्रकारान्तरं तत्राह—राजेति । इह लोके यथा राज्ञः सेवकस्य च स्वाज्ञानातिलङ्घनप्रीत्यादिलक्षणश्चेतनादिलक्षणः स्वार्थोऽस्ति तथेति ॥ ६ ॥

नतु, शास्त्रेषु प्रतिपाद्यमानसेव्यसेवकभावो ज्ञातृज्ञेयभावोदातृस्वीकर्तृभाव इत्यादि सम्बन्धिसम्बन्धलक्षणार्थसम्भवादावयोरर्थोनास्तीति निषेधःकथं क्रियते? इत्याशङ्कां परिहर्तुमाह-यदीति । "नान्यथेश्वरभाषितम"इति वचनात् भवदुक्तम अन्यथा माभूदिति भीत्या च तं वृणु इत्यतो वाह—यदीति। "रादाने" इति धातुः कारयन्ते कामाः अभिमता एव वरास्तान् कामानां विषयाणाम् असंरोहं सम्यगनुत्पादं नाम वरं वृणु इत्यन्वयः ॥ ७ ॥

केन दोषेण तेषामनुत्पादः प्रार्थ्यत इति तत्राह—इंद्रियाणीति। येषां कामानां विषयाणां जन्मना इन्द्रियादयो नश्यन्ति तेषामिति शेषः "सर्वेन्द्रियाणां जरयति तेज"इतिश्रुतेः। आत्माभक्तिः॥८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

मुमुक्षुस्तान् कामान् त्यक्तुमिच्छुः ॥ २ ॥

भृत्येति सार्द्धकम् । भृत्यस्य लक्षणम् असाधारणं धर्मं जिज्ञासुः लोकेषु ज्ञापयितुमिच्छुरित्यर्थः ॥ ३ ॥

यस्त इत्यर्द्धकम् ॥ ४ ॥ ५ ॥

व्यतिरेके दृष्टान्तः राजसेवकयोरिवेति ॥ ६—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रह्लादाय वरं दत्वा दशमेऽन्तर्हिते हरौ ।
तस्यैवानुग्रहादीशः पुरस्तिस्रो ददाह सः ॥

तत्सर्वं वरजातं स्मयमान इति मां बालकमज्ञं प्रलोभयन् प्रभुरयं मद्बुद्धिं परीक्षते इति विचारोत्थं स्मितम् ॥ १ ॥

उत्पत्त्या स्वभावेनैव वरैर्वरदानैस्तेषां कामानां सङ्गाद्भीतः अत एव मुमुक्षुस्तान् कामान् मोक्तुमिच्छुः ॥ २ ॥

ननु, किमहं भक्तं प्रलोभयामि ? न हि न हि स्वभक्तस्य सर्वोत्कृष्टां निष्ठां लोके ख्यापयामीत्याह—भृत्येति । मयादीयमानान् वरान् कथं न गृह्णासीत्युक्ते मद्भृत्य एव मद्भृत्यस्य लक्षणं कथयिष्यतीत्यभि प्रायस्तवावगम्यते इति भावः। प्रभुरिति सर्वज्ञस्य तव जिज्ञासा नोपपद्यत इत्यतः सर्वान् ज्ञापयितुमेवेति भावः । अखिलगुरोः सर्वहितोपदेष्टुस्तव ब्रह्मरुद्रादीनामिवेति भावः ॥ ३ ॥

तद्ब्रूहि भृत्यलक्षणमिति चेत्स्वामिभृत्ययोरुभयोरपि लक्षणं ब्रवीमीत्याह—य इति । ते त्वत्तः वणिगिति तुभ्यं किञ्चित् पत्रपुष्पनैवेद्यादिकं दत्वा हस्त्यश्वरथादिमतीं सम्पत्तिं ब्रह्मेन्द्रादिपदं वा जिघृक्षतीति भावः ॥ ४ ॥

उक्तमेवार्थं पुष्णाति—आशासान इति । भृत्यहेतुकमात्मनः स्वाम्यमैश्वर्यं इच्छन् यो भृत्याय ददाति स च नैव स्वामी ॥५॥

आवयोस्तु स्वामिभृत्यभावस्तात्त्विक इत्याह—अहं त्विति । अनपाश्रयः सेवकाधीनमपकृष्टमैश्वर्यं नाश्रयत इत्यर्थः। अन्यथा स्वकामिताभिसन्धिना ते नाभिसन्धिकः स्वामिभृत्यभावो लोके प्रसिद्धोऽपि सोपाधित्वाद्विगीत एवेति द्योतितम् ॥ ६ ॥

* "सवै स्वामी सवै भृत्यो गुणलुब्धौ न कामुकौ" इति विजय० पाठाऽधिकः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

विमुञ्चति यदा कामान्मानवो मनसि स्थितान्।
तर्ह्येव पुण्डरीकाक्ष! भगवत्त्वाय कल्पते ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ननु, तथापि मम परमोदारस्य सुखार्थं किमपि वृणीष्वेति चेदत्राह, असंरोहं मम हृदि कामा नोत्पद्यतामित्यर्थः ॥ ७ ॥

यस्य कामस्य इन्द्रियादीनां त्वन्माधुर्याऽग्रहणमेव कुपथगामिता सैव नाशः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ प्रह्लादं प्रत्यनुग्रहं कृत्वा ब्रह्मणा प्रत्येयंविजो वरो ऽसुरेभ्यस्त्वया न देय इत्युक्त्वा हरिरन्तर्हितोऽभूदिति अनेन भक्तवत्सलेन हरिणा रावणादिभावं गतयोः स्वपार्षदयोर्युद्धलीलया ऽनुग्रहः कृत इति शिवेऽप्यनुग्रहः कृतः इति च दशमे श्रीनारद आह—भक्तियोगस्येति। भक्तियोगस्यान्तरायतया विच्छेदकतया तत्सर्वं वरजातं मन्यमानः ॥ १ ॥

मामुत्पत्त्याऽऽस्वभावेनैवं कामेषु सक्तं तैर्वरैर्मा प्रलोभय ततस्तेषां कामानां सङ्गाद्भीतो मुमुक्षुरहं त्वामुपाश्रितोऽस्मि ॥ २ ॥

भृत्यलक्षणजिज्ञासुः जानन् अपि भृत्यलक्षणं ज्ञातुमिच्छुः लोके ख्यापयितुमित्यर्थः। हृदये ग्रन्थिर्वासनात्मकं मूलं येषां तेषु संसारबीजेषु कामेषु मामचोदयत् अन्यथा करुणात्मनः करुणाया आश्रयस्य करुणानिधेः तेषु भक्तप्रेरणा न घटेत ॥ ३ ॥

ते त्वत्तः आशिषः कामान् य आशास्ते प्रार्थयते स वणिक् न तु स भृत्यः किन्तु यः आत्मनः स्वकृते स्वामिनि आशिषः नाशाशानो वै निश्चितं स भृत्यो भवति. भृत्यतः स्वाम्यं स्वार्थं मिच्छन् यः आशिषो ददाति स स्वामी न भवति सोऽपि वणिक् ॥ ४ ॥ ५ ॥

आवयोः स्वस्वामिभावस्तु शुद्ध इत्याह-अहमिति। अहमकामो निष्कामस्त्वद्भक्तस्त्वं च अनपाश्रयः स्वानन्दपूर्णः मम स्वामी अतः आवयोरर्थः प्रयोजनम् राजसेवकयोरिव अन्यथा इतरेतरप्रयोजनमूलो न हि ॥ ६ ॥

हे ईश! यदि भक्तवात्सल्यतः मे कामान् वाञ्छितान् वरान् दास्येव तर्हि हे वरदर्षभ! कामानां विषयसङ्कल्पानाम् हृदि असंरोहमनुत्पत्तिं भवतः सकाशात् वरं वृणे ॥ ७ ॥

यस्य विषयसङ्कल्पस्य जन्मना इन्द्रियादयो नश्यन्ति तत्रेन्द्रियमनःप्राणानां नाशो ऽधर्मप्रवृत्तिरूपः आत्मनो देहस्य चिन्ताशोकादिजन्यज्वरार्त्तत्वरूपश्च आत्मनो जीवस्य वा स्वरूपविस्मरणरूपः धर्मादीनां ततो निर्गमनरूपः तथोक्तम्——

"देहीति वचनं श्रुत्वा देहस्थाः पञ्च देवताः।
तत्क्षणादेव गच्छन्ति धीश्रीह्रीधृतिकीर्त्तयः" ॥ ८ ॥

भाषा टीका।

नारद उवाच।

नारद जी बोले, कि—छोटा सा बालक प्रह्लाद, इन सब वरों को भक्ति के विघ्नकारी जानकर हसता सा हृषीकेश श्रीनरहरि से बोला, ॥ १ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—हे प्रभो! मैं तो उत्पत्ति से ही विषयों मे आसक्त हूं, मुझे वरों से मत लुभाइये, उस सङ्ग से भय भीत निर्वेद को प्राप्त हुआ मैं मुमुक्षु आपके शरण आया हूं ॥ २ ॥

हे प्रभो! आप अपने भक्त के लक्षण जानने की इच्छासे हृदय के ग्रन्थि रूप और संसार के बीज रूप कामों के लिये प्रेरणा करते हो ॥ ३ ॥

हे अखिल गुरो! अन्यथा परम दयालु आपका ऐसा कथन कैसे घटे, जो आप से कुछ चाहना करता है वह भृत्य नहीं किन्तु वणिक् है ॥ ४ ॥

स्वामी से अपने लिये कुछ चाहना जो करने वाला है, वह भृत्य नहीं है, और वह स्वामी भी नहीं है जो अपने भृत्य से स्वामीपने की इच्छा करता हुआ कुछ इच्छित प्रदान करता है ॥ ५ ॥

मैं तो आपका निष्काम भक्तहूं. और आप मेरे निरुपाधिक स्वामी हैं, यदि जो कामादि की अभिसंधि होती तो राजा और सेवक के तरह कुछ प्रयोजन ही नहीं था ॥ ६ ॥

हे वरद श्रेष्ठ! यदि आप मुझे वरही देते हैं तो आपसे मैं यही वर मागता हूं कि मेरे हृदय में किसी कामना का अंकुर नहो। कि जिस से मैं फिर भी कभी वर न मागूं ॥ ७ ॥

क्योंकि? जिस कामना के उत्पन्न होने से ही इन्द्रिय मन प्राण आत्मा धर्म धृति मति लज्जा श्री तेज स्मृति सत्य ये सब ही नष्ट होजाते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कामाभावे गुणमाह—विमुञ्चतीति। भगवत्त्वाय त्वत्समानैश्वर्याय तथाच श्रुतिः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नमो भगवते तुभ्यं पुरुषाय महात्मने ।
हरये ऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥

श्रीनृसिंह उवाच ।

नैकान्तिनो मे मयि जात्विहाशिष आशासते ऽमुत्र च ये भवद्विधाः ।
अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥ ११ ॥
कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम् ।
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥
भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।
कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबन्धः ॥ १३ ॥
य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ।
त्वां च मां च स्मरन् काले कर्मबन्धात्प्रमुच्यते ॥ १४ ॥

प्रह्लाद उवाच ।

वरं वरय एतत्ते वरदेशान्महेश्वर ! ।
यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥ १५ ॥
विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुम् ।
भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्दोषान्कामान्दातुमिच्छन्तं प्रत्याख्यास्यन्नमस्यति, नम इति ॥ १० ॥

सत्यमेकान्तभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह–नेति । मे एकान्तिनः कदाचिदपि इहामुत्र च मत्त्याशिषो न वाञ्छन्त्येव तथाप्येतन्मन्वन्तरमात्रं भोगान्भुङ्क्ष्व ॥ ११ ॥

ननु, तर्हि बन्धः स्यादित्यत आह, कथा इति द्वाभ्याम् । सर्वेषु भूतेषु सन्तमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व तर्हि तेनैवापि कर्मणा बन्धः स्यान्नेत्याह, योगेन मय्यर्पणेन कर्म हिन्वंस्त्यजन्यजस्व ॥ १२ ॥

किञ्च भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबन्धः सन् लोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि कुशलेन पुण्याचरणेन पापं हित्वेति विभीषामात्रम्, अन्यथा तस्य राज्येऽप्रवृत्तेः । ननु तस्य प्राचीनं पापमस्ति "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति न्यायात् "तत्सुकृतदुष्कृते विधुनुते" इति श्रुतेश्च । नचेदं प्रारब्धं पापाभिप्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनाऽनुपपत्तेः नचाऽसावविद्वानिति वाच्यं भगवतैव कृतार्थत्वस्यानन्तरं वक्ष्यमाणत्वात् अत एव योगेन कर्म हिन्वन्नितीदमपि लोकसङ्ग्रहार्थं कर्मणि प्रवर्तितस्यानुद्वेगमात्रायेति सर्वमनवद्यम् ॥ १३ ॥

किञ्च य इति, त्वां च मां चेदं मच्चरित्रं च स्मरन्नेतत्स्तोत्रं यः कीर्तयेत्सो ऽपि कर्मबन्धाद्विमुच्यते कुतस्तव बन्धशङ्केत्यर्थः ॥ १४ ॥

ईश्वराज्ञया प्राप्तकर्माधिकारः स्वपितुर्निष्कृतिं प्रार्थयते, त्रिभिः । वरं वरणीयमेतदपरं वृणे ते त्वत्तः ॥ १५ ॥

विद्धो ऽमर्षेण क्रोधेनाऽशयो यस्य ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निष्कामस्तु त्वां भजंस्त्वत्साधर्म्यंप्राप्नोतीत्याह—विमुञ्चतीति यदा मानवो मनुष्यःस्वहृदिस्थितान् कामान् विमुञ्चति अनन्यप्रयोजनेन त्वां भजतीति भावः । हे पुण्डरीकाक्ष ! तर्हि तदा स मानवः भगवत्त्वाय भगवतो भावः भगवत्त्वं तस्मै कल्पते अपहतपाप्मत्वादिधर्माविर्भावाय कल्पते आविर्भूतगुणाष्टकत्वेन भगवत्साधर्म्यमागतो मुक्तो भवतीति यावत् ॥ ९ ॥

मम हृदि कामानुदयरूपाद्वरादन्यं वरं सर्वथा मादा इति प्रार्थनाऽभिप्रायेण भगवन्तं नमस्करोति—ओमिति भगवते पूर्ण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

षाड्गुण्याय पुरुषाय सर्वान्तरात्मने महात्मने केवलं भक्तानुग्रहैकस्वभावाय हरये आश्रितार्तिहराय अद्भुतसिंहाय मादृशसाधुपरित्राणार्थमुपात्तनृसिंहरूपाय ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते परमात्मने लोकत्रयस्यान्तःप्रवेशेन भर्त्रे प्रणवप्रतिपाद्याय तुभ्यं नमः ॥ १० ॥

एवं प्रत्याख्यातवरयाञ्चं प्रह्लादमाह भगवाञ्छ्रीनृसिंहः—नैकान्तिन इति चतुर्भिः भवद्विधास्त्वादृशा मयि एकान्तिन एकान्तभक्ता अनन्यप्रयोजनेन भजन्तः मे मत्तः जातु कदाचिदपि इहामुत्र च लोके आशिषः कामान्नाशासते. यद्यपि न प्रार्थयन्ते तथाप्येतन्मन्वन्तरपर्यन्तमत्रैव लोके दैत्येश्वराणामधिपो भूत्वेतिशेषः । भोगान् भुङ्क्ष्व ॥ ११ ॥

तर्हि बद्धः स्यामित्यत्राह—कथेति । प्रियः मम निरतिशयप्रियः त्वं मदीयाः कथाः जुषमाणः सेवमानः प्रिया इति पाठे कथाविशेषणं मत्कथाः शृण्वंस्त्वं न बद्धः स्या इति भावः । नन्वनिच्छन्तमपि बलात्कामेषु किमर्थं योजयसीत्यत आह—आत्मनि सर्वेषु भूतेषु चान्तरात्मतया सन्तमधियज्ञं यज्ञाधिपतिमीश्वरं मां भक्तियोगेन भजस्वाराधयस्व किं कुर्वन् मत्प्राप्तिविरोधिपुण्यपापात्मकं कर्म हिन्वन्नपनुदन्मुमुक्षोरप्यभ्युपगतमत्प्राप्तिविरोधिप्रारब्धफलस्य सुखदुःखात्मकस्यावश्यमनुभाव्यत्वादनिच्छन्तमपि त्वां कामेषु योजयामीति भावः ॥ १२ ॥

एतदेव व्यनक्ति—भोगेनेति । पुण्यमभ्युपगतप्रारब्धपुण्यकर्म तत्फलभोगेन हित्वा त्यक्त्वा अपनुद्यपापमभ्युपगतप्रारब्धाख्यं पापं कर्म कुशलेन भोगेन हित्वा भोगकौशलेन हित्वेत्यर्थः । पापफलभोगस्य दुःखरूपत्वान्मनोविकारः स्यादिति यथा मनो न विक्रियते तथा भोगकौशलेनेत्यर्थः । "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । समदुःखसुखं धीरम्" इत्याद्युक्तरीत्याऽनुद्वेगसमत्वादिभोगकौशलेनेति यावत्. कुशलेन पुण्येन यज्ञादिकर्मणा पापमभ्युगतप्रारब्धमपुण्यं कर्म हित्वेति नार्थः । अनुभवैकविनाश्यस्य पुण्यकर्मणा निवृत्त्यनुपपत्तेः । न चात्र पापशब्दः सञ्चितानभ्युपगतादिपापपरः तस्य भक्तियोगेनैव निवृत्तेः न च भक्तियोगप्रतिबन्धकपापपरः परिपूर्णभक्तियोगनिष्ठत्वात्प्रह्लादस्य तन्निवृत्तेः पूर्वमेव जातत्वात्तस्माद्यथोक्त एवार्थः, कालजवेन कालवेगेन कलेवरं हित्वा कालवेगेन निमित्तेनानुभूतप्रारब्धावसाने कलेवरं हित्वेत्यर्थः । सुरलोकेपि गीयमानं स्वीयां कीर्तिं वितत्य विस्तीर्य मुक्तबन्धः मद्भक्तियोगेन विनष्टाश्लिष्टपूर्वोत्तराघरूपमत्प्राप्तिप्रतिबन्धको मामेष्यसि प्राप्स्यसीत्यर्थः ॥ १३ ॥

किञ्च यः पुमान् त्वां च मां च स्मरन्यदिदं मह्यं त्वया गीतं मत्स्तुत्यात्मकं स्तोत्रं कीर्तयेत् सोपि पुमान् काले प्रारब्धाऽनुभवावसानकाले कर्मबन्धान्मत्प्राप्तिबन्धकात्पुण्यपापात्मककर्मरूपाद्विमुच्यते त्वद्गुणकीर्तनसञ्जातमद्भक्तियोगनिरस्तमत्प्राप्तिप्रतिबन्धककर्मबन्धाद्विमुक्तो भवतीत्यर्थः ॥ १४ ॥

ईश्वराज्ञया प्राप्तदैत्याधिपत्यः स्वपितुर्निष्कृतिं प्रार्थयन्त्रिभिः प्रह्लादः वरामिति । हे महेश्वर ! वरदानां ब्रह्मादीनामपीश्वरात्ते त्वत्तोऽहमेतद्वरं वृणे, किं तत् ? यन्मे पिता ईश्वरस्य तव सम्बन्धि तेजः प्रभावमविद्वानजानन् ॥ १५ ॥

सर्वलोकहितोपदेष्टारं प्रभुं त्वामनिन्दन्निन्दितवान्, कथंभूतः, त्वं भ्रातृहेति मृषादृष्टिर्दुरभिमानयुक्तः अत एव वृद्धामर्षाशयः प्रवृद्धो योऽमर्षः क्रोधः तद्युक्त आशयोन्तःकरणं यस्य नादृशः इद्धेति पाठेऽप्ययमेवार्थः । विद्धेति पाठ विद्धो व्यथितः सचासावमर्षयुक्तान्तःकरणश्चेत्यर्थः । एवं भूतस्त्वां सर्वलोकहितोपदेष्टारं प्रभुमनिन्ददिति यत् यच्च त्वद्भक्ते मय्यघवान् द्रोहीति द्रोहं कृतवानिति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, कामासंरोहो नाम काममोक्षो विवक्षितस्तस्मात्किं फलमिति तत्राह—विमुञ्चतीति । भवाय पुनर्जननाय ॥ ९ ॥

भवन्नमनादिलक्षणा भक्तिश्च तत्फलमित्याह*नम इति । भगवत इत्यनेन किञ्चित्पूज्यमात्रवस्तुसिध्यत्यतः पुरुषायेत्यनेनापि कश्चिदेवेत्यतो महात्मन इति. कोसावित्यतो हरय इति. हरिशब्दस्यानेकार्थत्वादत्र क इत्यतोऽद्भुतेति. तिर्यक्प्राणिना त्वया किं स्यादित्यतो ब्रह्मण इति. अस्याप्यनेकार्थत्वादत्र क इत्यतः परमात्मन इति ॥ १० ॥

अहं त्वकाम इत्येकांतभक्तलक्षणं यत्त्वयोक्तं तत्सत्यं तथापि मदाज्ञाकारिणस्तव पुण्याभिवृद्धिः स्यादत एतत्कर्तव्यमित्याह, नैकान्तिन इति । किन्तदिति तत्राह, तथापीति ॥ ११ ॥

ननु, कर्दमजलस्नानाऽनिच्छया ह्येतावन्तं कालं मया कण्ठशोषणमकारि तदरण्यरोदनवद्व्यर्थमभूद्यतस्त्वं तत्रैव स्नाहीत्युपदिशस्यतस्त्वदाज्ञानुल्लङ्घ्या त्वमेव जानासीति शङ्कारोगनिर्मूलनाय सुखसाध्यमौषधं विधास्यामीत्याशयवानाह—कथा इति । बहुवचनेन सर्वावतारादिकथा उपलक्षयति, भूतेष्वित्युपलक्षणं चरुपुरोडाशादिष्वपि यज्ञमूर्तिसन्निहित इति योगेन भक्तियुक्तध्यानेन हिन्वन् नाशयन् ॥ १२ ॥

नन्वेतावता मम किं कालान्तरभाविनी त्वत्प्राप्तिः स्यादेवेत्याह—भोगेनेति । सुखावनभिमतं पुण्यं भोगेन क्षपयित्वा प्रायश्चित्तादिकुशलकर्मणा पापं निर्मूलयित्वा वितत्य विस्तृत्य ॥ १३ ॥

मया तवोक्तयोगकरणाशक्तस्यानायाससाध्यं योगमुपदिशामीत्युपसंहरति—य इति । मह्यं मामुद्दिश्य मुक्तकाले ॥ १४ ॥

अभिमतमित्युक्तत्वादिमं त्वदभिमतं वरं वृणु इत्याह—वरमिति । ते सकाशात् अनेन दातृस्वीकर्तृभावसम्बन्धोस्तीति ज्ञायते ॥ १५—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथापीति, श्रीनृसिंहवाक्यैनैतान् विहायेति तत्प्रार्थनानुसारेण सर्वलोककृतार्थीकरणमेव मुख्यं प्रयोजनम् अन्यत्तु लक्ष्यमात्रं । तथैव वक्ष्यते "कीर्तिं विशुद्धां सुरलोकगीतां वितत्य" इति । य एतदिति च ॥ ११ ॥

---

* नारदेनोपदिष्टं मे तवमन्त्रमिमं स्मरे । इत्यधिकः पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यांस्तु इहश्रुतांस्त्वमधुना स्मरसि तेषां का वार्त्तेति तच्छ्रवण-गतानामपि कीर्त्तयैवमभिप्रेतम् ॥ १२ ॥

भोगेन पुण्यं प्रारब्धं कुशलेन मद्भजनेन तत्प्रतियोगितया पापञ्च प्रारब्धमेव "श्वादोऽपि सद्यः सवनाय कल्पते" इति न्यायात् "भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात्" इति न्यायाच्च ॥ ॥ १३ ॥ १४ ॥

वरं वरय इत्यर्द्धकम् । अनेन श्रीप्रह्लादस्य ब्रह्मपित्रोर्जयविजय-त्वादि ज्ञानं नासीदिति गम्यते वांदति सार्द्धयुग्मकम् ॥ १५-१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, यदि कामं न कामयसे तर्हि वद मे तव दास्ययोग-मिति ब्रुवन् कथं महास्यं कामयसे तत्राह—विमुञ्चतीति । मनसि स्थितान् स्थायिभावतया वर्त्तमानान् कामान् अप्राकृतांस्त्वद्दा-स्यसख्यादीनपि यदा विशेषेण मुञ्चति भगवत्त्वाय सायुज्याय तच्च सायुज्यं मे नाभीष्टं किं तैर्गुणव्यतिकरादिह ये स्व-सिद्धा धर्मादयः किमगुणेन च काङ्क्षितेन "सारं जुषाम् चरणयो रुपगायताम् नः" इति मदुक्तेरेवातो भवद्दास्यरूपमप्राकृतम् काम-महं वृणे एव भगवत्त्वाय भगवत्समानैश्वर्य्यायेति श्रीस्वामि-चरणाः ॥ ६ ॥

ननु, मत्सायुज्यमात्मारामसुनिभिरप्यादरणीयं किमित्य-सुखात्मकोऽपि भूत्वा तत्र कटाक्षयसीति भगवद्वाचा पराजित-म्मन्यः प्रणमति-ओं नम इति ॥ १० ॥

न केवलं तवैवायं स्वभावः अपि तु सर्वेषामेव मद्भक्ताना-मित्याह—नेति । एतन्मन्वन्तरमात्रं नत्वधिकं ददामि मा क्रुध्येति-भावः ॥ ११ ॥

ननु, मां विषयान्धकूपे केनापराधेन चिक्षिप्सीत्यत आह—कथा इति । अधियज्ञं सर्वयज्ञाधीश्वरं मां स्वयोगेन स्वीयभक्ति-योगेनैव यज भज इतिमक्तता अपि अश्वमेधादयो यज्ञाः कृता एव भविष्यन्तीत्यधियज्ञपदेन द्योत्यते कर्म वैदिकं लौकिकं च हित्वन् त्यजन् मद्भक्त्याधिकारिणः कर्मकरणानौचित्यात् ॥ १२ ॥

भोगहेतुकात् कर्मबन्धात्तु नैव शङ्कितव्यस्तव पूर्वजन्मन्येव सर्वं कर्म नष्टमेवेत्याह—भोगेन सुखानुभवेन प्रारब्धं पुण्यं कुशलेन सुकृताचरणेन पापं कलेवरं पूर्वदेहं च हित्वा एवि मां सम्प्रति प्राप्तोऽपि अस्मि मुक्तबंधः इत्यस्मिन् जन्मनि तु मुक्तबन्धो जीवन्मुक्त एव वर्त्तसे इत्यर्थः । एवं प्रह्लादस्यास्येन साधनसिद्धत्वं नित्यसिद्धत्वं च नारदादिवत् ज्ञेयम् ॥ १३ ॥

तव कर्म बन्धाभावे कैमुत्यं श्राव्यत्याह—य इति । मद्यं मां प्रसादयितुम् ॥ १४ ॥

किञ्च पूर्वं संसारिणां नृणां मोचाय श्रीमच्चरणेषु प्रार्थितं सम्प्रति यद्यनादृशं सौभाग्यं मह्यमदास्तर्हिकस्य महापराधिनोऽपि निस्ताराय प्रार्थये इत्याह—वरमिति त्रिभिः, । वरये वृणे ॥ १५ ॥

विद्धोऽमर्षेणाऽऽशयो यस्य सः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्वाय कल्पते भगवद्भावापत्तियोग्यो भवति, भगवद्भा-वापत्तिर्नाम भगवत्साधर्म्यप्राप्तिः—

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गे पि नोपजायन्ते प्रलये न व्यथन्तिच" ॥

इति श्रीमुखवचनात् ॥ ९ ॥

अतिदुर्लभभगवद्दर्शनचरणस्पर्शवचनामृतश्रवणादि निर्वृतो नमस्करोति नम इति ॥ १० ॥

भगवानपि तत्प्रारब्धकर्मानुसारेण तद्दर्शनादिना लोकमिमं विशोधयितुं च किञ्चित्कालमत्रैव मां भजन् वासं कुरु पुनर्मा-मेष्यतीत्याह—नैकान्तिन इति त्रिभिः ॥ ११ ॥

सर्वेषु चेतनाचेतनेषु भूतेषु एकं नियन्तारं मां सन्तम् आत्मनि हृदि आवेश्य मदीयाः कथाः जुषमाणः सेवमानः योगेन मदर्पणविधियोगेन अधियज्ञं यज्ञाधिष्ठातारं मां कर्म प्रारब्धं कर्म हित्वन् क्षपयन् यजस्व ॥ १२ ॥ १३ ॥

प्रह्लादोक्तस्तवश्लोककीर्त्तनादिफलमाह—य इति ॥ १४ ॥

ते त्वत्तो वरं वरये वृणे मे पिता ऐश्वरं भवदीयं तेजः अविद्वान् त्वां वदनिंदत् तस्मात् अघात् मे पिता पूयेतेति तृतीयेनाऽन्वयः ॥ १५ ॥

विद्धो व्याप्तो ऽमर्षेण क्रोधेनाशयो यस्य सः ॥ १६ ॥

भाषा टीका ।

और पुरुष जब मन के मनोरथों को छोड देता है, हे पुण्डरीकाक्ष ! तब वह आप ही भगवद्भाव को समर्थ होता है ॥ ९ ॥

षडैश्वर्य सम्पन्न पुरुष महात्मा हरि अद्भुत सिंह ब्रह्म स्वरूप परमात्मा एसे आप को नमस्कार हो ॥ १० ॥

श्री नृसिंह उवाच ॥

श्री नृसिंहजी बोले, कि—तुमारे सदृश हमारे एकांती भक्त लोग इसलोक और परलोक के पुरुषार्थों की हम से कभी चाहना नहीं करते हैं, तौभी इस मन्वन्तर पर्यन्त यहां पर दैत्येश्वरों के भोगों को तुम भोगो ॥ ११ ॥

हमारी प्रिय कथाओं का सेवन करते हुए, सर्वभूतों में वर्त्तमान एक ईश्वर यज्ञों का अधिष्ठाता एसे मुझको अपने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
पूतस्ते ऽपाङ्गसन्दृष्टस्तदा कृपणवत्सल ! ॥ १७ ॥

श्रीभगवानुवाच ।

त्रिःसप्तभिः पिता पूतः पितृभिःसह तेऽनघ ! ।
यत्साधो ऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥
यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥ १९ ॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन ।
उच्चावचेषु दैत्येन्द्र ! मद्भावेन गतस्पृहाः ॥ २० ॥
भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ।
भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥
कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ।
मदङ्गस्पर्शनेनाङ्ग ! लोकान्यास्यति सुप्रजाः ॥ २२ ॥
पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ।
मय्यावेश्य मनस्तात ! कुरु कर्माणि मत्परः ॥ २३ ॥

नारद उवाच ।

प्रह्लादो ऽपि तथा चक्रे पितुर्यत्साम्परायिकम् ।
यथा ऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥

भाषाटीका ।

आत्मा में आविष्ट करके मेरा यजन करौ मेरे विषै कर्मों का अर्पण करते हुए त्याग करते जावो ॥ १२ ॥

सुखानुभव करके पुण्य को और कुशलाचरण से पाप को और काल के वेग से कलेवर को छोड कर तथा सुरलोक गीत विशुद्ध कीर्ति को विस्तार समस्त बन्धनों से मुक्त होकर हमको प्राप्त होगे ॥ १३ ॥

जो नर इस तुमारे गाये हुए स्तोत्र का कीर्त्तन करेगा तथा तुमारा और हमारा स्मरण करेगा वह समय पर कर्मों के बन्धों से मुक्त हो जावेगा ॥ १४ ॥

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—हे महेश्वर ! वर देने वालों के ईश्वर आप से मैं यही वर मागताहूँ कि आप के ऐश तेज को न जानने वाला और "यह मेरे भ्राता का मारने वाला है" इस प्रकार मिथ्या दृष्टि वाला और क्रोध से विद्धचित्त जिस्का, ऐसे मेरा पिताने, सर्व लोक के गुरु और प्रभु ऐसे आपकी जो निन्दा की है, और आप के भक्त ऐसे मेरे विषै अपराध किया है ॥ १५—१६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ते ऽपाङ्गेन सन्दृष्टो ऽतः पूत एव तथापि भोः कृपणवत्सल ! कार्पण्येन प्रार्थय इत्यर्थः ॥ १७ ॥

यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितुस्त्रय एव पूर्वजास्तथापि त्रिःसप्तभिः सहेति प्राक्कल्पगतपित्रभिप्रायेणोक्तं यद्वास्मात् ॥ १८ ॥

सम्यगुत्तम आचारो येषां ते कीकटा अपि देशास्तत्तुल्या वंशाश्च पूयन्ते शुद्धा भवन्ति ॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमेति न चित्रं अहं तु तादृशो न भवामि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति चेत्तत्राह—सर्वात्मनेति, द्वाभ्याम्। मद्भावेन मद्भक्त्या विगता स्पृहा येषाम् ॥ २० ॥

त्वामनुगता ये केचित्पुरुषास्ते ऽप्येवं लक्षणाः सन्तो मद्भक्ता भवन्त्यतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृगुपमानास्पदं श्रेष्ठः खल्वित्यर्थः ॥ २१ ॥

मदङ्गस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥ २२ ॥

ब्रह्मवादिभिर्वेदवादिभिः उक्तमनतिक्रम्य मत्परः सन्कर्माणि कुरु ॥ २३—२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्दुस्तरादघात् पापान्मे पिता पूयेत विशुद्ध्येत् एतद्वरं वरये इत्यन्वयः। यद्यपि ते तवापाङ्गेन सन्दृष्टो ऽतएव पूतएव मम पिता तथापि हे कृपणवत्सल ! कार्पण्येन प्रार्थये इत्यर्थः ॥ १७ ॥

एवं प्रह्लादेन प्रार्थितो भगवांस्तमाह—त्रिस्सप्तभिरिति षड्भिः। न केवलं तव पितैव पूतः अपितु हे अनघ ! त्रिःसप्तभिः पितृभिः सह तव पिता त्रिः पूत इति त्रिवारमनुगृह्णामीत्यर्थः । त्रिसप्तभिरिति पाठे, एकविंशतिपर्यन्तैः पितृभिः सह पूत इत्यर्थः । कुतः यद्यस्मात् हे साधो ! महाभागवतः कुलपावनो भवान् तस्य हिरण्यकशिपोर्गृहे जातः । यद्यपि हिरण्यकशिपोः पितरः कश्यपो मरीचिर्ब्रह्मा चेति त्रय एव ; तथापि प्राक्रूपगतपित्राद्यभिप्रायेण त्रिसप्तभिरित्युक्तं मद्भक्तस्य तव जननादेवेदं त्वत्कुलं पूतमित्यभिप्रायः ॥ १८ ॥

एतदेव स्वभक्तप्रभावप्रदर्शनमुखेनाह–यत्रेति। समदर्शिनः कृत्स्नं जगत् ब्रह्मात्मकत्वेन पश्यन्तः प्रशान्ताः जितेन्द्रियाः सम्यगुत्तमः आचारो येषां ते साधवः परोपकारशीलाः मद्भक्ताः यत्र यत्र देशे सन्ति ते कीकटा अपि कीकटकल्पाम्लेच्छदेशा अपिशब्दात्तत्प्रभवा अपि पूयन्ते शुद्धाभवन्ति ॥ १९ ॥

ननु, मद्भक्तानामयं प्रभाव इति न चित्रं नाहं तु तादृशः इति चेत् तत्राह—सर्वात्मनेति, द्वाभ्याम्। हे दैत्येन्द्र ! लोके ये मद्भक्ताः पुरुषास्ते त्वां मद्भक्तश्रेष्ठमनुव्रता अनुवर्त्तमाना भवन्ति. त्वं यथा मद्भक्तश्रेष्ठस्तथा वयमपि भगवद्भक्ता भवेम इति त्वत्पदवीमनुवर्तमाना मद्भक्ता भवन्ति. अतः सर्वेषां भक्तानां भवान् प्रतिरूपधृक् दृष्टान्तभूतः अतस्त्वं भागवतोत्तमोत्तम इति भावः। तदनुवृत्तिप्रकारमाह—उत्कृष्टेषु च भूतग्रामेषु देवमनुष्यादिभूतसङ्घेषु सर्वात्मना करणत्रयेण न किञ्चिदपि हिंसन्ति. मद्भावेन मद्भक्त्या विगता स्पृहा येषां मत्साम्यापत्तिनिस्स्पृहा इति वा तादृशाश्च भवन्ति. त्वद्दृष्टान्तेनैवात्मानं शिक्षयन्तीत्यर्थः ॥ २० ॥ २१ ॥

अतः सर्वथा पूतस्य विशुद्धस्य तव पितुः प्रेतकार्याणि दाहादिकर्माणि कुरु अङ्ग हे प्रह्लाद ! शोभना प्रजास्त्वद्रूपो यस्य सः त्वत्पिता मदङ्गस्पर्शनेन मच्छरीरसंस्पर्शनेन हेतुना लोकान्पुण्यलोकान् यास्यति प्राप्स्यति. पश्यतीति पाठे द्रक्ष्यतीत्यर्थः वर्त्तमानसामीप्ये भविष्यति लट् ॥ २२ ॥

पित्र्यं पितृसम्बन्धि पित्राधिष्ठितं महेन्द्रभवनं विहाय पित्र्यं दानवाधिपत्यस्थानमधितिष्ठेत्यर्थः । हे तात ! मयि मन आवेश्य ब्रह्मवादिभिरुक्तमनतिक्रम्य कर्माणि मदाराधनरूपाणि मत्परः अहमेव परस्तेषां कर्मणां फलं यस्य तादृशः सन् कुरु ॥ २३ ॥

एवमुक्तः प्रह्लादो यथोक्तमकरोदित्याह नारदः—प्रह्लादोपीति। हे राजन् युधिष्ठिर ! यथा भगवानाह तथैव प्रह्लादः पितुर्यत्साम्परायिकं प्रेतोद्देशेन कर्त्तव्यं तत्सर्वं चक्रे ततो द्विजोत्तमैरभिषिक्तश्च बभूव दानवादीनामाधिपत्यमकरोदित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुद्ध्यर्थं साधनान्तरानुष्ठानं नापेक्षितमित्याह–पूत इति ॥१७॥

न केवलमयमेव पिता पूतः किन्तु जन्मान्तरेपि विद्यमानाः पितरः पूताः स्युरित्याशयवानाह–त्रिःसप्तभिरिति । सा विशुद्धिर्मत्कटाक्षपात्रीभूतत्वज्जन्मनेत्याह—यत्साधोऽस्येति ॥ १८ ॥

एतन्न्यायमन्यत्रातिदिशति–यत्रेति। कीकटा इति पाठे आभीरा इत्यर्थः ॥ १९ ॥

ननु, त्वद्भक्तानामेवंविधमाहात्म्यं कस्मादित्याशङ्क्य तपोवृद्धिक्षयहेतुर्हिंसाद्यभावादित्याह—सर्वात्मनेति । सर्वात्मना यदपि किञ्चन कृकलासादिकर्मापि "तस्मात्प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्य" इति श्रुतेः। तत्र निमित्तमाह—मद्भावेनेति "ईश्वरोजीवकलया प्रविष्टः" इति वचनात् सर्वत्र मम भावः सत्तास्तीति भावो भावना निरन्तरानुस्मरणं तेन गतस्पृहाः नष्टस्पर्द्धाः हिंसायाः कारणं निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः ॥ २० ॥

इह लोके ये मद्भक्ताः पुरुषा भवन्ति विद्यन्ते ते न हिंसन्तीत्यन्वयः मद्भक्तेष्वपि तव विशेषोऽस्तीत्याह–भवानिति। प्रतिरूपधृक् दृष्टान्तस्थलभूतः खलुशब्देन काञ्चिन्निषिध्यावशिष्टानां सर्वेषामित्यर्थो गृह्यते तेन यावत्तावदित्यर्थः।"ऋते तु सात्त्विकान्देवाञ्चारदादींस्तथैव च।प्रह्लादादुत्तमः को नु विष्णुभक्तो जगत्त्रये" इति वचनात् "निषेधवाक्यालङ्कारजिज्ञासाऽनुनेय खलु" इत्यभिधानम् ॥ २१ ॥

मत्पिता भगवद्द्वेषीति मत्वा तत्प्रेतकार्याणि न करोमीति मतिर्माभूत्"श्रौतं स्मार्तं न लङ्घयेत्" इति वचनात् मदाज्ञया तान्यपि कर्तव्यानि"नावैष्णवाय दातव्यं नोदबिन्दुं न तण्डुलम्" इत्येतद्सम्बन्धिविषयत्वेन सावकाशमित्याशयेनाह मदङ्गेति सुप्रजाः सुपुत्रः ॥ २२ ॥

पितृमेधं कृत्वा विरज्य वनं न व्रज किन्तु राज्यं कुर्वित्याह–पित्र्यमिति। राज्यं कुर्वन् पितृवल्लोकोपद्रवं न कुरु किन्तु ब्रह्मवाद्युक्तधर्मेणेत्याह यथोक्तमिति न तावता पूर्यते ऽन्यत्र

Dr. Urmila Sharma Collection, Varanasi.

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आवश्यकमित्याह—मयीति । कर्माणि सामादिविषयाणि पूजादीनि वा ॥ २३ ॥

भगवदाज्ञानुल्लङ्घनेन भगवत्प्रीतिः स्यादिति कृत्वा तदाज्ञाकरणप्रकारमाह—नारद इति । साम्परायिकं पारलौकिकम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिःसप्तभिरिति । यदि सप्तत्रयमङ्ख्यास्तव पितरः सम्भवन्ति तदा तैरपि सह पूतः स्यादित्यर्थः । प्राक्कल्पगतत्वे यदिति हेतुवाक्यं न सङ्गच्छते. श्रीप्रह्लादस्यात्र जन्मना सह पूर्वपितॄणामसम्बन्धात् स्वत एव सम्बन्धाच्च हिरण्यकशिपोश्च पूर्वजन्माभावात् ॥ १८ ॥ १९ ॥

सर्वात्मनेति युग्मकम् ॥ २० ॥ २१ ॥

कुर्विति, अस्य भवता सुप्रजस्त्वं भगवत्प्रार्थनया भवदपराधक्षयडनमुत्तमलोकप्रापणञ्च करिष्यतीत्यर्थः ॥ २२—३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यद्यपि अपाङ्गेन दृष्टः पूत एव तदपि श्रीमुखात् प्रसादवाचं श्रोतुं कार्पण्यात्प्रार्थये इति भावः ॥ १७ ॥

त्रिःसप्तभिरित्यसिन् जन्मन्ययं तव पिता पूत इति किं वक्तव्यं तव त्रिसप्तजन्मसु ये त्रिसप्तसङ्ख्याः पितरोऽभूवन् तेऽपि पूता इत्यर्थः । पितॄन् पुनासीत्येतमपि कियत् यतस्त्वं कुलपावनः पितृमात्रादिकुलमपि ते पूतम् ॥ १८ ॥

मद्भक्तः स्वसङ्गिनं देशमपि पुनाति किमुत पित्रादीनित्याह—यत्रेति । पूयन्ति पूयन्ते पूता भवन्तीत्यर्थः ॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमा न चित्रम् अहं तु तादृशो न भवामीति चेत्तत्राह—सर्वेति । ये पुरुषास्त्वामनुव्रता भवन्ति तेऽपि मद्भक्ता भवन्ति कीदृशाः मम भावेन प्रेम्णैव विगतविषयस्पृहाः सर्वात्मना अहिंसकाश्च भवन्ति. अतस्तव महिमा केन निरूच्यतामिति भावः । यतो भवान् मे भक्तानां प्रतिरूपधृक् उपमानास्पदं तेषु श्रेष्ठत्वादिति भावः ॥ २० ॥ २१ ॥

मदङ्गस्पर्शनेनैव सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति तदपि प्रेतकार्याणि प्रेतस्यैव कृत्यानि कुरु, केवलं व्यवहाररक्षार्थमित्यर्थः ॥ २२ ॥

यद्यपि मद्भक्तस्य तव नास्ति कर्माधिकारस्तदपि मदाज्ञयैव व्यवहाररक्षायै कर्माणि कुरु मत्पर इति कर्मसु श्रद्धाशून्यः इत्यतः कर्मणां कारणमध्यकरण एव पर्यवस्यतीति मा शुच इति भावः ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यपि हे कृपणवत्सल ! तं अपाङ्गेन दृष्टः तस्मादघात् ते निन्दारूपात् मे पिता पूत एव तथापि पूयेत स्वपित्रादिसाहित्येनेत्यर्थः ॥ १७ ॥

त्रयो ब्रह्ममरीचिकश्यपाः अष्टादश जन्मान्तरीयाः एवं त्रिसप्तभिस्तै पितृभिः सह ते पिता पूतो ऽस्ति । हे साधो ! यस्मादस्य गृहे भवान् कुलपावनो जातः । दैत्यकुलमपि त्वज्जन्मना पूतमित्यर्थः ॥ १८ ॥

किं बहुना सम्यगुत्तमः मत्प्राचरणप्रधान आचारो येषां ते यत्र यत्र सन्ति ते कीकटा अपि देशास्तत्तुल्याश्च पूयन्ते ॥ १९ ॥

स्वभक्तस्तुतिपूर्वकं प्रह्लादमभिनन्दति—सर्वात्मनेति, द्वाभ्याम् । भूतग्रामेषु किञ्चन अपि न हिंसन्ति उच्चावचेषु कुलेषु भवन्तीत्युत्तरेण सम्बन्धः । अतो हे दैत्येन्द्र ! दैत्योऽस्मीति मा शुच इति भावः ॥ २० ॥

त्वामनुव्रताः ये दैत्यादयस्तेऽपि मद्भक्ता भविष्यन्ति भवांस्तु मे भक्तानां सर्वेषां प्रतिरूपधृक् प्रतिनिधिरूपधृक् ॥ २१ ॥

त्वज्जन्मना मदङ्गस्पर्शनेन च सर्वशः पूतस्यापि लोकसंग्रहार्थं पुत्रकृत्यानि प्रेतकार्याणि कुर्वित्यर्थः ॥ २२ ॥

वेदवादिभिर्मन्त्रादिभिर्यथोक्तं तदनुसारेण कर्माणि कुरु मत्परो मद्भजनाऽविरोधेनेत्यर्थः ॥ २३—२४ ॥

भाषाटीका ।

उस दुस्तर पापसे मेरा पिता पवित्र होजाय, हे कृपणवत्सल ! यद्यपि उसी समय आप के कृपा कटाक्ष से पवित्र हो गया है तौ भी मैं अपनी कृपणता से ऐसा वर मागता हूँ ॥ १७ ॥

श्रीभगवानुवाच ॥

श्री भगवान् बोले, कि—हे अनघ ! सप्तविंशन्ति पितरों सहित तुमारा पिता पवित्र हुआ; क्योंकि ? हे साधो ! कुल को पवित्र करने वाले तुमारे सरी के इस के घर में पुत्र हुए ॥ १८ ॥

जहाँ २ प्रशांत समदर्शी साधु उत्तमाचार वाले मेरे भक्त रहते हैं, वे कीकट (मगद) देश भी पवित्र हो जाते हैं ॥ १९ ॥

हे दैत्येन्द्र ! मेरी भक्ति से विगत स्पृहावाले लोग ऊंचे नीचे भूत प्राणों को किसी प्रकार भी किञ्चित् पीडा नहीं देते हैं ॥ २० ॥

लोक में हमारे भक्त लोग तुमारे सदृश होते हैं और तुमतौ सम्पूर्ण हमारे भक्तों में उपमा देने के योग्य हो ॥२१॥

मेरे अंगस्पर्श से सर्व प्रकार पवित्र ऐसे तुमारे पिता के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ।
स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥

ब्रह्मोवाच ।

देवदेवाऽखिलाध्यक्ष ! भूतभावन ! पूर्वज ! ।
दिष्ट्या ते निहतः पापो लोकसन्तापनो ऽसुरः ॥ २६ ॥
योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ।
तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २७ ॥
दिष्ट्या ऽस्य तनयः साधुर्महाभागवतोऽर्भकः ।
त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितो ऽधुना ॥ २८ ॥
एतद्वपुस्ते भगवन् ! ध्यायतः प्रयतात्मनः ।
सर्वतो गोप्तृ सन्त्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥

श्रीनृसिंह उवाच ।

मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव ! ।
वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३० ॥

नारद उवाच ।

इत्युक्त्वा भगवान् राजन् तत्रैवान्तर्दधे हरिः ।
अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥
ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम् ।
भवं प्रजापतीन्देवान् प्रह्लादो भगवत्कलाः ॥ ३२ ॥

भाषा टीका ।

प्रेतकार्य (मरणा नंतर के कृत्य) करौ, तुमारे सदृश सुन्दर जिसके पुत्र हैं, ऐसा तुमारा पिता उत्तम लोकों को जावेगा ॥२२॥

ब्रह्मवादि लोगों की उक्ति के अनुगुण अपने पिता की गादी पर बैठ कर मेरे विषै मन लगाकर मत्परायण होकर कर्म करौ ॥ २३ ॥

नारद उवाच

नारदजी बोले, कि—हे राजन् ! द्विजोत्तमों से अभिषिक्त होकर, प्रह्लाद ने भी भगवदाज्ञा के अनुगुण पिता का अंतिम कृत्य यथावत् किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम सृष्टिभिर्मयासृष्टैर्भूतैः समस्तान्निगमान्धर्मानित्यर्थः अहन् हतवान् स त्वया हतः एतद्दिष्ट्या भद्रम् ॥ २७ ॥

समितः सम्यक् प्राप्तः ॥ २८ ॥

सर्वतः सन्त्रासात् गोप्तृ रक्षकम् ॥ २९ ॥

एवं वरस्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषाम् अमृतं क्षीरम् ॥ ३०—३४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्रसादाभिमुखं सुन्दरं मुखं यस्य तं नरहरिं श्रीनृसिंहरूपं हरिमाश्रितार्तिहरं भगवन्तं दृष्ट्वा ब्रह्मा चतुर्मुखः देवा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

द्भिः परिवृतः पवित्राभिर्वाग्भिः स्तुत्वा वाचां भगवद्गुणविषयकत्वेन लोकपावनकरत्वात्पवित्राभिरित्युक्तं प्राहोवाच ॥२५॥

तदेवं चतुर्मुखोक्तमाह—देवेति चतुर्भिः। हे देवदेव, देवानामपि देव ! ननु, त्वम्, इन्द्रादिदेवानामपि देवो नाहं तत्राह—हेऽखिलाध्यक्ष ! ननु, सोपि त्वमेव तत्राह—हे भूतभावन ! भूतानि भावयत्युत्पादयतीति तथा ननु, सोपि त्वमेव तत्राह—हे पूर्वज ! ममापि पूर्वं कारणत्वेनावस्थित लोकानां सन्तापनकरोऽत एव पापोऽयमसुरो दिष्ट्या दैवात्ते त्वया निहतः दिष्ट्या हत इति तद्वधस्य दुष्करत्वं सूचितम् ॥ २६ ॥

तदेवाविष्कुर्वन् असुरं विशिनष्टि—योसावितिः। योसावसुरः मत्तः लब्धो वरो येन तादृशः मम सृष्टिभिर्मया सृष्टैर्भूतैर्न वध्यः हन्तुमशक्यः तपोयोग एव बलं तेनोन्नद्धः गर्वितः समस्तनिगमान् शास्त्रीयधर्मानहन् विनाशितवान् सतु त्वया विनाशितः एतद्दिष्ट्या जातमिति भावः ॥ २७ ॥

किं तदापि दिष्ट्या जातं किमस्यासुरस्य तनयो महाभागवतोऽर्भकः प्रह्लादः त्वया मृत्योः सकाशात् विमोचित इति सच त्वामतीव क्रोधाविष्टं सम्यगितः प्राप्तो ऽधुनाचेति चैतदपि दिष्ट्या जातमित्यर्थः ॥ २८ ॥

हे भगवन् ! तवैतद्वपुः नृसिंहरूपं ध्यायतः प्रयतात्मनः समाहितमनसः पुंसः सर्वतः सन्त्रासात् भयाद्गोप्तृ रक्षकं जिघांसतः हन्तुमिच्छतः मृत्योरपि सकाशाद्गोप्तृ एतच्च प्रह्लाददृष्टान्तेनास्माभिरनुमितमिति भावः ॥ २९ ॥

एवमभिहितस्तमाह श्रीभगवान्—नेति। हे पद्मसम्भव ! इतः प्रभृत्येवं विधो वरोऽसुराणां ते त्वया न प्रदेयः। क्रूरो निसर्गः स्वभावो येषां तेषाम् अहीनां सर्पाणाममृतं क्षीरं यथा क्षीरप्रदत्वेन तद्वर्द्धनं यथा लोकोपद्रवकारि तद्वदिदं तेषां वरप्रदानमित्यर्थः ॥ ३० ॥

एवं ब्रह्माणमनुज्ञाप्यान्तर्दधे हरिरित्याह—नारदः, इतीति. हे राजन् ! इति इत्थमुक्त्वा परमेष्ठिना पूजितः सर्वप्राणिनामदृश्यः हरिरित्युक्त्वान्तर्दधेऽदृश्योऽभूत् ॥ ३१ ॥

ततः प्रह्लादः परमेष्ठिनं ब्रह्माणं भवं रुद्रं प्रजापतीन् मरीच्यादीन् देवान् इन्द्रादींश्च भगवत्कलाः भगवदंशभूतान् सम्पूज्य शिरसा ववन्दे ननाम ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्रागतेषु देवेष्वेकतमेनापि संल्लापोहरेरभून वा आद्ये केन द्वितीये दैत्येभ्य एषां को विशेषः ? किञ्च सेव्यसेवकादिभावेन ब्रह्मविद्याधिकारोऽप्युत्पादितः स्यादित्याशङ्कां परिहरति—प्रश्नादेति, देवादिभिर्वृत इत्यनेन तैरपि स्वच्छन्दवचनं कृतमिति ज्ञातव्यम् ॥ २५ ॥

दिष्ट्या सुखमभूत् ॥ २६ ॥

मम सकाशात् सृष्टं सर्जनमेषामस्ति ते मम सृष्टिनस्तैर्मयासृष्टैरित्यर्थः ॥ २७ ॥

दिष्ट्या सज्जनसुखहेतुतः अधुना तस्मै दिष्ट्या सुखलक्षणो वरो दत्त इति शेषः ॥ २८ ॥

अनेन वपुषा न केवलं दैत्यहननमेव प्रयोजनं किन्त्वन्यच्चास्तीत्याह—एतदिति ॥ २९ ॥

एवं स्तुतोभगवान् कमनुग्रहमकार्षीत्तेषामिति तत्राह—श्रीभगवानिति। निसर्गतः क्रूराणाम् अमृतं पयः "देवान्ने सलिले क्षीरे त्वमृतं नाविमुक्तिमें" इति अत्र हिरण्यकशिपुमन्तरेणान्येषां न दातव्य इत्याज्ञा क्रियते नत्वस्य हि। "यथा हिरण्यकस्यादादन्तः स्थितहरीरितः" इत्यादिना स्वप्रेरितत्वावगमादिति ॥ ३० ॥

मद्भृत्यानामपि योग्यप्रत्यक्षत्वे "हरेरुपर्युपरि व्यवहारेण ध्यायन्ति देवमनुष्याः" इति श्रुतेः। देवस्वभावो यः स विहितः स्यादिति मत्वा तद्रक्षणार्थं तद्विग्रहेणादृष्टोऽभूदित्याह—नारद इति। सर्वभूतानामदृश्य इत्यनेन भक्तानुकम्पित्वं प्रदर्शितम् ॥ ३१ ॥

अनन्तरं प्रह्लादेन ब्रह्मादयो देवाः सत्कृता उतात्मनोभगवदनुग्रहपात्रत्वेनाहम्भावेन धिक्कृताः ? आद्ये वैष्णवाचारः प्रवर्तितः स्यात् द्वितीये भगवच्छिक्षणं गजस्नानवत्स्यादिति तत्राह, ततइति। भगवतः कलालेशा येषु तथा भगवतो भिन्नांशा वा ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भूतभावनाः ब्रह्ममरीच्यादयः पूर्वजाः प्रथमजाता यस्मात् ॥ २६ ॥ २७ ॥ २८ ॥

मृत्योः सकाशादपि गोप्तृ ॥ २९ ॥

एवं वरो वरः अतिवृहत्तमो वरः ॥ ३०—३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे पूर्वज, सर्वेभ्यो ऽस्मदादिभ्यः पूर्ववर्त्तिन् ! पूर्वं बहुधा कृतावतार इत्यर्थः ॥ २६ ॥

मम सृष्टिभिः निगमान् त्वदाज्ञारूपान् वेदान् अहन् उपेक्षितवान् ॥ २७ ॥

दिष्ट्या भद्रं त्वां साभिः सम्यक् प्राप्तः ॥ २८ ॥

गोप्तृ रक्षकम् ॥ २९ ॥

अहीनाममृतं यथा न देयम् तथा वरः श्रेष्ठः एवं वरो ते त्वया क्रूरनिसर्गाणां दुष्टस्वभावानामसुराणां मा प्रदेयः न देयः ॥ —३०—३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः ।
दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ॥ ३३ ॥
प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः ।
स्वधामानि ययू राजन् ! ब्रह्माद्याः प्रतिपूजिताः ॥ ३४ ॥
एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ।
हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥
पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ।
कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥
शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ।
तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥
ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३८ ॥
एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ।
जहुस्त्वन्ते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥
यथा यथा भगवतो भक्त्या परमया ऽभिदा ।
नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ॥ ४० ॥

भाषा टीका ।

अपने ऊपर प्रसन्न जानकर सुमुख श्रीनृसिंहदेव की पवित्र वाणी से स्तुतिकर, सब देवताओं के सहित ब्रह्माजी बोले ॥ २५ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि——हे देव देव ! हे अखिलाऽध्यक्ष ! हे भूतभावन ! हे पूर्वज ! लोकों को संताप देनेवाले पापी का आपने वध किया यह बडा मंगल हुआ ॥ २६ ॥

एकतो इसने मेरेसे यह वरपाया था कि "मेरीसृष्टि से न मरे और दूसरे तप योग और बलसे उन्मद्ध (मत्त) होने से इसने सब वेदों का नाश करदिया ॥ २७ ॥

यह भी वडे मंगल की वात हुई, कि इसका छोटा सा पुत्र परम भागवत साधु एसे प्रह्लादको आपने मृत्युसे छुडाया, और यह उससे भी मंगल हुआ जोकि ? यह इसी समय में आपको प्राप्त होगया ॥ २८ ॥

हे भगवन् ! जोपुरुष आपके इसदिव्य मंगल विग्रह का ध्यान करेगा वह सर्व त्रासों से और मारते हुए मृत्युके त्रास से भी छूट जावेगा ॥ २९ ॥

श्रीनृसिंह उवाच ॥

श्रीनरसिंहजी बोले, कि——हे पद्मसंभव, हे ब्रह्माजी ! इसप्रकार के क्रूरस्वभाव वाले असुरों को तुम ऐसा वर मतदियाकरो । जैसे कि सर्पों को अमृत ॥ ३० ॥

नारद उवाच ॥

नारदजी बोले, कि——हे राजन्, हे युधिष्ठिर ! श्री हरिभी ब्रह्माजी से ऐसे कहकर ब्रह्माजी से पूजित होकर सर्व प्राणियों के अदृश्य होकद अंतर्धान होगये ॥ ३१ ॥

तबप्रह्लादने ब्रह्मा शिव प्रजापति और सर्व देवों को भगवानकी कला जानकर शिर से वंदना की ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिशुपालदन्तवक्रयोर्द्विषतोः श्रीकृष्णसायुज्यं कथमिति यत्पृष्टं तदेव तयोः पूर्वजन्मकथनादिभिरुपपादितमुपसंहरति——एवमिति सप्तभिः । दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानुषङ्गः ॥ ३५ ॥ ३६ ॥

तच्चित्तौ श्रीरामे चित्तं ययोस्तौ ॥ ३७ ॥

करूषजो दन्तवक्रः हरौ सायुज्यं समीयतुः ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णनिन्दादिना पूर्वकृतं च यदेनः पापं तद्ध्यानेन तदात्मानः सन्तो जहुः । तदात्मत्वे दृष्टान्तः, कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति ॥ ३९ ॥

अभिदा भेददर्शनशून्यया हरेः सात्म्यं सारूप्यम् ॥४०॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कमलासनो ब्रह्मा काव्यादिभिर्मार्गवादिभिस्सह सहितः प्रह्लादं दैत्यानां दानवानां च पतिमकरोत् ॥ ३३ ॥

हे राजन् ! ततो ब्रह्मादयः सर्वे देवाः प्रह्लादं प्रतिनन्द्याहो स्वत्प्रभावोऽनितरसाधारण इत्यभिनन्द्य, परमाः श्रेष्ठाः आशिषः प्रयुज्य प्रह्लादेन प्रतिपूजिताः स्वधामानि स्वकीयस्थानानि ययुः ॥ ३४ ॥

तदेवं शिशुपालदन्तवक्त्रयोर्भगवन्तं द्विषतोः कथं मुक्तिरिति युधिष्ठिरप्रश्नस्य तत्पूर्वजन्मकथनादिमुखेनोक्तमुत्तरमुपसंहरति—एवमिति, सप्तभिः । विष्णोः पार्षदौ स्थितौ विप्रशापेन सनकादीनां शापेन दितेः पुत्रत्वमेवं प्रापितौ वैरभावेन हेतुना स्वहृदि स्थितेन हरिणा नृसिंहरूपं बिभ्रता हतौ ॥ ३५ ॥

पुनः कुम्भकर्णरावणाख्यौ राक्षसौ बभूवतुः तौ च दाशरथेः रामस्य विक्रमैर्हतावभिभूतावित्यर्थः ॥ ३६ ॥

तौ च रामस्य राघवस्य बाणैर्युधि निर्भिन्नं हृदयं ययोस्तौ तच्चित्तौ तस्मिन् श्रीरामे एव चित्तं ययोस्तौ यथा प्राक्तनजन्मनि तद्वद्देहं जहतुः सन्तत्यजतुः ॥ ३७ ॥

तावेवेह शिशुपालकरूषजौ, करूषजो दन्तवक्त्रः शिशुपालदन्तवक्त्ररूपेण जातौ पुनर्हरिणा हतौ वैरानुबन्धेन हेतुना ते तव पश्यतः सतः समीयतुः सायुज्यं प्रापतुः ॥ ३८ ॥

न केवलं शिशुपालकरूषजौ एव समीयतुः अपित्वन्येऽपि राजानः कृष्णवैरिणस्ते सर्वेऽपि यदेनः पापं पूर्वं कृतं तत् उज्जहुः तत्यजुः तदात्मानः कृष्णात्मानश्चाभवन्, यथा पेशस्कृतश्चिन्त्यमानाद्धेतोः कीटः तदात्मा भवति, तद्वत् तदात्मानस्तत्तुल्यस्वभावा अभवन् इत्यर्थः । आत्मशब्दः स्वभाववाची तस्यैवाऽऽत्मा स्वभावो येषां ते इत्युपमानबहुव्रीहिः अन्यथा दृष्टान्तवैघट्यात्, न हि कीटः पेशस्कृता ऐक्यं याति किन्तु तस्य समानाकारो भवत्यत एव ह्यानन्तरग्रन्थे साम्यं ययुरित्युक्तम् ॥ ३९ ॥

यथा अभिदा अनन्यया भक्त्या भगवतः साम्यं यान्ति तद्भक्तास्तथा चैद्यादयोऽपि नृपास्तस्य भगवतश्चिन्तया संरम्भपूर्वकचिन्तया हरेः साम्यं ययुः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवच्चित्तज्ञेन ब्रह्मणा वेदमन्त्रग्राहीत्याह—तत इति । अनेन भक्तेन भगवद्भक्तेषु यथायोग्यं प्रेमकर्तव्यमिति शास्त्राचारो दर्शितः ॥ ३३ ॥

प्रह्लादवरदानानन्तरं भगवता स्वाचारत्वेन यद्दर्शनमकारि तद्दस्माभिरप्यनुष्ठेयमिति कृत्वा ब्रह्माद्या अपि स्वगृहाण्ययुरित्याह, प्रतिनन्द्येति ॥ ३४—३५ ॥

इदानीं विप्रकलितोक्तमर्थं निश्चित्योपसंहरति—एवमिति । हृदि स्थितेन वैरभावेन हेतुना हरिणा हतौ ॥ ३६ ॥

प्राक्तनजन्मनि जयविजयशब्दवाच्यौ पूर्वजन्मनि यथा तच्चित्तौ तथा ऽत्रापीति शेषः । हिरण्यकशिपुर्हिरण्याक्षाख्यः पूर्वजन्मनि यथा तथेति वा ॥ ३७ ॥

वैरानुबन्धेन वैरोपसर्जनेनाऽनुबन्धेन स्नेहेन समीयतुर्हरिमिति शेषः । तत्रासुरौ तम इयतुरित्यनुसन्धेयम् सम्यग्भक्त्यैव श्रीहरिप्राप्तिः तदभावेन तम एवेति द्योतनाय समित्युपसर्गः—

"मधुकैटभौ भक्त्यभावाद्दूरौ भगवतो मृतौ ।
तम एव क्रमादासौ भक्त्या चैद्यो हरिं ययौ "

इति वचनात् ॥ ३८ ॥

अन्येषामपि सद्भावादेतदुपलक्षणार्थमुक्तमित्यभिप्रेत्याह—एन इति । अत्रापि वैरानुबन्धेनेत्यनुवर्त्तते । ये राजानः पौण्ड्रकादिशब्दवाच्यास्तेष्वसुरदेहेष्वात्मरूपविशेषो येषां ते तथा तत्रापि तस्मिन्कृष्णे आत्मा चित्तं येषां ते तथा तदनुष्ठितपुण्यफलस्वीकारार्थं तत्राविष्टास्तद्भक्ता इत्यर्थः । ते यच्चैव यत्पूर्वकृतं तत्तमस्यन्धप्राप्तमेनः पापं तज्जहुः तद्धित्वा हर्याकारप्राप्तपुण्यप्रचयेन तं हरिमीयुः त एव कृष्णवैरिणो ऽनादिकालमारभ्य भगवद्द्वेषिणः कृष्णाश्च तामसाश्च वैरिणः वैरिरूपिणो राजानो-राजसाः तमःप्रकृतयो दैत्याः तदात्मानो द्वेषरूपिणः ते जन्मप्रभृतिचीर्णं यदेनः तेन पापेन वैरानुबन्धेन निरन्तरवैरिचिन्तया पूर्वकृतं ब्रह्मणा पूर्वं क्लृप्तं तमो जहुर्जग्मुरित्यन्वयः । "ओहाङ्गतौ"इति धातुः इति 'सखे कहास्तन्यस्य समुकुलं सुरं प्रवेक्ष्ये हास्ते, इति प्रयोगश्च । अन्ते भक्त्यादिसाधनसामग्र्यनन्तरं इतरत्र द्वेषपूर्वमनन्तरमित्यत्र "तस्य तावदेव चिरम्" इति श्रुतेः "अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयते" इत्यादेश्च कीटाः पेशस्कृताचिन्तनया पेशस्कृताकारमाप्नुवन्ति ननु तदात्मत्वम् अत्र प्रमाणम् "पौण्ड्रके नरके चैव शाल्वे कंसे च रुक्मिणि । आविष्टास्ते हरेर्भक्तास्तद्भक्त्या हरिमीयिरे ॥ असुरास्तु स्वयं ते तु महातमसि पातिताः" इति वाक्यम् ॥ ३९ ॥

अत्रापि तारतम्यमस्तीत्याह,यथेति । भिदां विशेषम् "भेदो विशेष दलने"इत्यभिधानम् अभिदामसम्प्रज्ञातसमाध्यवस्थां ययुरिति वा, साम्यं निर्दोषत्वादिचतुर्भुजलक्षणम् । अन्यथा कीटाः पेशस्कृतो ध्यानेन केचन पेशस्कृतो भवन्ति ननु स एव पृथग् दृश्यमानत्वादित्ययं दृष्टान्तोऽनर्थः स्यादिति ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ।
दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥ ४१ ॥
एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ।
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेति । यथा यथा भगवतः परया भक्त्या अन्ये सारूप्यं ययुस्तथा चैद्यादयो नृपा अपि परमया तच्चिन्तया तद्ध्यानावेशेन ययुः अभिदा व्यवधानशून्यया निरन्तरयेत्यपि भक्तिचिन्तयोः विशेषणं तत्र चैद्यकारूषकयोः सारूप्याविर्भाव एव तत्प्राप्तिरिति गम्यम् ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शिशुपालदन्तवक्रयोः सायुज्यं कथमिति यत्पृष्टं तत्तयोः पूर्वजन्मकथनादिभिरुपपादितमित्युपसंहरति, एवमिति ॥ ३५ ॥

एनोऽपराधः कृष्णनिन्दादिनेत्यर्थः । पूर्वकृतं यत् पापं तदपि तद्ध्यानेन तदात्मानः सन्तो जहुः । तदात्मत्वे दृष्टान्तः कीटः पेशस्कृतः कीटविशेषस्य ध्यानेन यथा तदात्मा भवतीति ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

भक्त्या यथा यथा अभिदा अभेदेन ज्ञानिभक्ता हरेः सात्म्यं ययुः तथा चैद्यादयोपि तच्चिन्तया तद्ययुः भक्त्या कीदृश्या तदीयज्ञानवैराग्यादिभ्योऽपि परमया अग्रेऽप्येवं "निभृत मरुन्मनः" इत्यत्र "तदरयोपि ययुः स्मरणात्" इति वक्ष्यते ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्द्रोहवासनया तौ जन्मद्वयानन्तरं भगवन्तं साम्यं गतावित्याह—एवमित्यादिना । हरेः पार्षदौ तौ जयविजयौ दितेः पुत्रत्वं आपितौ विप्रशापेनेत्युत्तरस्याऽनुषङ्गः ॥ ३५—३७ ॥

तौ राक्षसौ वैरानुबन्धेन शिशुपालकरूषजौ शिशुपालदन्तवक्त्रौ पुनर्जातौ ते पश्यतः हरौ सायुज्यं च समीयतुः ॥ ३८ ॥

कृष्णवैरिणो राजानः पेशस्कृतः सारूप्यं तद्ध्यानेन कीटो यथा आप्नोति तथान्ते तदात्मानः कृष्णसाधर्म्यं गताः सन्तः यत्पूर्वं कृतमेनः पापं तत् जहुः ॥ ३९ ॥

यथा यथा स्वस्वद्रोहानुरोधेन चिंतया हरिस्मरणेन चैद्यादयो हरेः सात्म्यं स्वारूप्यं ययुर्यदा तदा नृपा अंबरीषादयः भगवतो भक्त्या तत्रापि परमया तत्रापि अभिदा "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४।१।३ इति पारमार्षसूत्रोक्ततदात्मकत्वानुसन्धानयुक्तया हरेः सात्म्यं ययुरिति किमुत वक्तव्यम् ॥ ४० ॥

भाषा टीका ।

तदनंतर ब्रह्माजी ने शुक्रादि मुनियों को साथ लेकर प्रह्लादजीको दैत्य और दानवोंका पति बनाया ॥ ३३ ॥

हे राजन् ! उस समय ब्रह्मादिक सर्व देवता लोग पूजित होकर प्रह्लादके अभिषेक का अभिनंदन कर उत्तम आशीर्वाद देकर अपने २ घर को पधारे ॥ ३४ ॥

एसे वे दोनों (जय विजय) श्रीविष्णुके पार्षद दिति के पुत्र होकर हृदयमें स्थित हरि के साथ वैरभाव से युद्धकरके हरि ही से मृत्युको प्राप्त हुए ॥ ३५ ॥

फिर वेही दोनों सनकादिकों के शाप से कुंभकर्ण और रावण नामसे राक्षस हुए, जोकि ? सर्व लोकाभिराम दूर्वादलश्याम श्रीचक्रवर्तिकुमार श्रीराघवेन्द्र के पराक्रम से मारे गये ॥ ३६ ॥

संग्राममें श्रीराम के बाणों से विदीर्ण हृदय पृथ्वीपर सोये हुए, श्रीराम में चित्त लगाकर देहको छोड़ते हुए जैसे पूर्वजन्म में (हिरण्यकशिपुके जन्ममें) छोड़ा ॥ ३७ ॥

वेही दोनों फिर यहां शिशुपाल और दन्तवक्त्रहुए श्रीहरि में वैरके संबंधसे आपही को प्राप्तहुए ॥ ३८ ॥

ऐसेही श्रीकृष्ण से वैर करने वाले और राजा लोगभी पूर्वकृत पाप को छोडतेहुए, और जैसे कीट [कीड़ा] भृङ्गी के भयसे भृङ्गीरूप होजाता है एसे ही, आपके स्वरूप को प्राप्त हुए ॥ ३९ ॥

भगवान से कुछ भेदभाव न रखकर अर्थात् कपट न रखकर परमभक्तिसे जैसे भक्तलोग आपको प्राप्त होतेहैं, ऐसेही शिशुपालादिक रिपुगणभी हरि की चिंतासे आपके सात्म्यको (समान विग्रहयोग्य) प्राप्तहुए ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादचरितार्थमुपसंहरति—एषेति, चतुर्भिः । अवतारः श्रीनृसिंहरूपस्तस्य कथा आख्यातेति शेषः ॥ ४२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रह्लादस्यानुचरितं महाभागवतस्य च ।
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥
सर्गस्थित्यप्ययेशस्य गुणकर्माऽनुवर्णनम् ।
परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४४ ॥
धर्मो भागवतानां च भगवान् येन गम्यते ।
आख्याने ऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५ ॥
य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ।
कीर्त्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ ४६ ॥
एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वा ऽनुभावमकुतोभयमेति लोकम् ॥ ४७ ॥
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वम् अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ॥ ४३ ॥

परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानात्मविवेकादि ॥ ४५ ॥

एतच्छ्रवणादिफलमाह-य इति, द्वाभ्याम् । एतच्छ्रुत्वा यः कीर्तयेत् ॥ ४६ ॥

एतदेतां मृगेन्द्रस्य लीलां, तामेवाह—दैत्येन्द्रस्य यूथपानां च वधं यः शुचिस्सन्पठत पुण्यमनुभावं प्रभावं मतिनिश्चयं वा लोकं वैकुण्ठम् ॥ ४७ ॥

अहो प्रह्लादस्य भाग्यं येन देवो दृष्टो वयं तु मन्दभाग्या इति विषीदन्तं प्रत्याह—यूयमिति, त्रिभिः । येषां युष्माकं गृहान्मुनयः अभियन्ति सर्वतः समायान्ति तत्कस्य हेतोः येषु गृहेषु नराकारं गूढं सच्चिदानन्दं कृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे नृप त्वं मां यत्पृष्टवान् किं तद्द्विषतामपि दमघोषसुतादीनां शिशुपालादीनां हरेः साम्यमित्येतत्सर्वं ते तुभ्यमाख्यातं कथितं मयाऽत शेषः ॥ ४१ ॥

तदेवं प्रश्नस्योत्तरमुपसंहृत्य तदेतदाख्यानं विशिंषन् तत्कीर्तनश्रवणादिफलमाह-एषेति, षड्भिः । ब्रह्मण्ये ब्रह्मकुले साधुब्रह्मण्यः स चासौ देवस्तस्य लोकत्रयमन्तःप्रविश्य बिभ्रतः कृष्णस्येयमवतारकथा पुण्या पुण्यावहा यत्र कथायामादिदैत्ययोर्हिरण्याक्षहिरण्यकशिप्वोर्वधः प्रतिपाद्यते ॥ ४२ ॥

तथा यत्र महाभागवतस्य प्रह्लादस्य चरित्रं भक्तिर्ज्ञानं विरक्तिश्च. भक्तिशब्देन भक्तियोगानुष्ठानप्रकारो विवक्षितः विरक्तिशब्देन तदुत्पत्तिप्रकारः ज्ञानशब्देनात्मयाथात्म्यविवेचनपूर्वकतदनुसन्धानप्रकारः । एतत्सर्वं यत्र कथायां प्रतिपाद्यत-इत्यर्थः ॥ ४३ ॥

तथा जगत्सर्गस्थितिलयकारणस्य हरेर्याथात्म्यं तत्त्ववर्णनं तस्य गुणानां कर्मणां च वर्णनम् परावरेषां देवासुरादीनां यानि स्थानानि तेषां कालेन निमित्तेन महान् व्यत्ययो विपर्यासश्च ॥ ४४ ॥

भगवान् येन गम्यते लभ्यते स भागवतानां धर्मश्च यच्चाध्यात्मिकमात्मानमधिकृत्य वर्त्तमानः वस्तु चेति तदेतत्सर्वमस्मिन्नाख्याने सम्यगाख्यातम् ॥ ४५ ॥

यः पुमानेतद्विष्णोर्वीर्येण पराक्रमादिगुणजातेनोपबृंहितां तत्प्रतिपादनेन विस्तीर्णमत एव पुण्यमाख्यानं श्रद्धया श्रुत्वा कीर्तयेत् स पुमान् कर्मपाशैः पुण्यपापात्मकैः कर्मभिरेव पाशैर्विमुच्यते ॥ ४६ ॥

किञ्च यः पुमानादिपुरुषस्य मृगेन्द्रस्य सिंहस्येव या लीला दैत्येन्द्रयूथपवधात्मिका प्रतिपाद्या यस्मिन् तदेतदाख्यानं प्रयतः समाहितचित्तः सतां प्रवरस्य दैत्यात्मजस्य प्रह्लादस्य पुण्यं प्रभावं च श्रुत्वा पठेतपठेत् सोऽकुतोभयं कुतश्चिद्भयरहितं लोकं वैकुण्ठाख्यमेति प्राप्नोति. पूर्वं कर्मपाशैर्विमुच्यत इत्युक्तमत्राकुतोभयं लोकमेतीत्युक्तं कर्मपाशविमोचनद्वाराऽकुतोभयं लोकमेतीत्यर्थः । अतोऽत्र न पौनरुक्त्यम् ॥ ४७ ॥

Dr. Urmila Sharma Collection, Varanasi

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अहो प्रह्लादस्य भाग्यं येन भगवान् दृष्टः वयं तु मन्दभाग्या इति विषीदन्तं युधिष्ठिरमाह—यूयमिति त्रिभिः । नृलोके यूयमहो बतभूरिभागाः अहो बहुभाग्यवन्तः तदेव व्यञ्जयन् तान्विशिनष्टि, येषां युष्माकं गृहान् लोकं पुनानाः मुनयोऽभियान्ति सर्वतः समायान्ति. तत्कुतः मनुष्यलिङ्गं मनुष्यस्येव लिङ्गं शरीरं यस्य तत् परं ब्रह्म श्रीकृष्णरूपं गूढं प्रच्छन्नं सर्वेषां युष्माकं गृहानावसति इति हेतोः समायान्ति ॥ ४८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्रन्थाधिकभयादुपसंहरति, आख्यातमिति । अतश्चैद्यादयो दमघोषसुतादीनामित्यादि बहुवारोक्तिर्भक्तेरनादिकालसम्बन्धित्वद्योतनार्था अन्यथा वेनादीनामित्याद्युक्तिरपि स्यात् ॥ ४१ ॥

श्रद्धाजननाय स्तौति—एषेति । ब्रह्मण्यदेवस्य रामस्य चशब्दान्नरसिंहस्य यत्र कथायाम् ॥ ४२ ॥

भक्त्यादिकमेव मुक्तिसाधनं न द्वेषादिकमित्येतदत्र प्रतिपाद्यते इत्युपसंहरति—प्रह्लादस्येति । भक्त्यादिलक्षणो धर्मश्चात्र कथित इत्यन्वयः ॥ ४३ ॥

येन भक्त्यादिलक्षणधर्मेण हरिमितरेभ्योव्यावर्त्तयाति, सर्गेति । अव्यत्ययो यथास्थितत्वम् ॥ ४४ ॥

आत्मानमधिकृत्य वर्तमानमिन्द्रियादिस्वरूपं च कथितमस्मिन्नाख्यान इत्याहुः, तदुपाख्यान इति । अत्रैव वै पार्षदौ विष्णोरित्यादृतानुकथनं च भक्त्यादिकं मुक्तिसाधनं न द्वेषादिकमिति ज्ञापनाय येन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिनेति शेषः,

"भक्तिर्ज्ञानं विरक्तिश्च नवकं श्रवणादिकम् ।
धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नव" ॥

इति वचनात् भागवतधर्मेणैव श्रीहरिर्गम्यत इति कथमुच्यते ? भक्त्यादिना विनेतीयमाशंका परिहृता भक्त्यादेर्धर्मशब्दवाच्यत्वात् श्रवणं कीर्तनं विष्णोरित्यादिश्रवणादि नवकम् ॥ ४५ ॥

अधुनाऽऽख्यानकीर्तनादिना यत्पुण्यं तदाह य इति ॥ ४६ ॥

सामान्यत उक्तं विवृणोति एतदिति ॥ ४७ ॥

ननु, प्रह्लादानुभवस्यात्युत्तमत्ववर्णनेन युधिष्ठिरादीनां ततोऽधमत्वं प्रतीयत इति मन्दाशङ्कां परिहरति—यूयमिति । मुनय एतानिति यथातीत्य वर्तयन्ति बत विस्मये "खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत:" इति ॥ ४८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रह्लादस्येति त्रिकम् । अस्य श्रीकृष्णाख्यस्य हरेर्याथात्म्यं तत्तद्यथावन्माहात्म्यं सर्वावतारित्वात्. टीकायामस्येति पाठमुत्थाप्य व्याचष्टे, अनेन प्रह्लादेनोक्तमित्यादिकं गम्यम् ॥ ४३—४७ ॥

अहो प्रह्लादस्य भाग्यम् इति सविस्मयं तं राजानं प्रत्याह—यूयमिति, त्रिभिः । मनुष्यलिङ्गमिति तदाकारे तदाविर्भावस्याऽपि न तादृशत्वमिति व्यञ्जितम् ॥ ४८ ॥ ४९ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनुचरितम् आख्यातमिति पूर्वेण समाम्नातमिति परेण वान्वयः । हरेर्याथात्म्यं हरेः स्वरूपम् अनतिक्रम्य स्वार्थे ष्यञ् सर्गेति सृष्ट्यादयोऽपि उक्ताः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विनाशः ॥ ४१–४६ ॥

एतत् एतां मृगेन्द्रस्य सिंहस्य लीलाम् "ऋद्धस्य राजमातङ्गाः" इति वत्समास आर्षः । लीलामाह–दैत्येन्द्रएव यूथपो हस्ती तस्य दैत्येन्द्राणां यूथपस्य हिरण्यकशिपोश्च वधम् ॥ ४७ ॥

अहो !! प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मन्दभाग्या इति विषीदन्तं राजानंप्रति यूयं प्रह्लादात् प्रह्लादगुरोर्मत्तोपि अन्येभ्योऽपि भक्तेभ्यो युष्मत्पूर्वजेभ्यो यदुपुरूरवःप्रभृतिभ्योपि वसिष्ठमरीचिकश्यपादिऋषिभ्योऽपि ब्रह्मरुद्राभ्यामपि भूरिसौभाग्यवन्त इत्याह, यूयं नृणां जीवानां लोकमध्ये भूरिभागाः येषां युष्माकं गृहान् लोकं स्वदर्शनदानादिना पवित्रीकुर्वन्तोपि मुनयो अभि सर्वतोभावेन स्वीकृतार्थीकरणादिना हेतुनाऽपि गच्छन्ति. यतो गूढं सर्वतोऽपि रहस्यं यन्मनुष्यलिङ्गं नराकृतिपरं ब्रह्म तत्सम्यक् प्रकारेण युष्माभिरनाहूतमप्यासक्तिपूर्वकं येषां गृहेषु साक्षाद्वसति, सदैव. न हि प्रह्लादादीनां गृहेषु नराकृतिपरं ब्रह्म साक्षाद्वसति न च तद्दर्शनेन कृतार्थीभवितुं मुनयो गच्छन्तीति भावः ॥ ४८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः :

उपसंहरति–आख्यातमित्यादिना । दमघोषसुतः शिशुपालस्तदादीनाम् ॥ ४१ ॥

कृष्णस्य अवतारः श्रीनृसिंहस्तस्य कथा आख्यातेति लिङ्गव्यत्ययतः पूर्वेणान्वयः ॥ ४२ ॥

प्रह्लादस्यानुचरितमित्यादेः अस्मिन्नाख्याने । समाम्नातमिति तृतीयेनान्वयः । अस्य हरेर्याथात्म्यं तत्त्वम् ॥ ४३ ॥

सर्गादीनामीशस्य हरेः प्रह्लादकृतं गुणकर्मानुवर्णनं च परावरेषां ब्रह्मादिमनुष्यान्तानां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानमधिकृत्य वर्त्तमानं जीवात्मानो ब्रह्मात्मकत्वं चैतत्सर्वं समाम्नातम् ॥ ४५ ॥

आख्यानकीर्त्तनादिफलमाह—य इति, द्वाभ्याम् ॥ ४६ ॥

अकुतोभयमप्राकृतं लोकम् ॥ ४७ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृदः खलु मातुलेय आत्मा ऽर्हणीयो विधिकृद्गुरुश्च ॥ ४९ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ५० ॥
स एष भगवान्राजन्! व्यतनोद्विहतं यशः ।
पुरा रुद्रस्य देवस्य मयेनाऽनन्तमायिना ॥ ५१ ॥

राजोवाच ।

कस्मिन्कर्मणि देवस्य मयोऽहन् जगदीशितुः ।
यथाचोपचिता कीर्तिः कृष्णेनाऽनेन कथ्यताम् ॥ ५२ ॥

नारद उवाच ।

निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ।
मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५३ ॥
स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ।
दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यूयमपि धन्या इति प्रसङ्गाद्राजनमभिनन्दति वताहो नृलोके यूयं भूरिभागाः येषां युष्माकं गृहान् लोकं पुनाना ये मुनयस्ते ऽभियन्ति सर्वतः समायान्ति. तेषां समागमने हेतुमाह; येषु गृहेषु गूढं अतिगोप्यं ब्रह्म श्रीकृष्णाख्यं साक्षात् वसति कथंभूतं मनुष्यलिङ्गं मनुष्यार्थं मनुष्योपलक्षितभक्तहितार्थं लिङ्गानि चक्रादीनि चिह्नानि वंशीवेत्रनियोगपाशादीनि च यस्य तत् ॥ ४८ ॥

नारद उवाच ।

राजन्! जो आपने शिशुपालादि द्वेषियों कोभी भगवत्प्राप्ति का आख्यान हमसे पूंछा सो हमने सब कहा ॥ ४१ ॥

यहसाक्षात् ब्रह्मण्यदेव महात्मा श्रीकृष्णकी नृसिंह अवतार की कथा है, कि जिसमें दोनो आदिदैत्यों का बध है ॥ ४२ ॥

और महाभागवत श्रीप्रह्लादका चरित है जिसमें भक्ति ज्ञान वैराग्य और प्रह्लाद को हरि के याथात्म्य की प्राप्ति का वर्णन है ॥ ४३ ॥

सृष्टि पालन और संहार करने वाले ईश्वर के गुणकर्मों का वर्णन है, और देवदैत्यों के स्थानों के कालकृत व्यत्यास का वर्णन है ॥ ४४ ॥

और जिनसें भगवान् प्राप्त होते हैं ऐसे भागवतों के धर्मों का वर्णन है, और इस आख्यान में संपूर्ण आध्यात्मिक शास्त्र का वर्णन है ॥ ४५ ॥

श्रीविष्णुके पराक्रमोंसे पूरित इस पुण्य आख्यान को जो श्रवणकर श्रद्धासे कीर्तन करे वह कर्मकी पाश (फाँसी) से छूटता है ॥ ४६ ॥

जो पुरुष आदिपुरुष श्रीनृसिंहदेवकी दैत्येन्द्र यूथपवधरूप मृगेन्द्रलीला को, और सत्पुरुषों में श्रेष्ठ ऐसे दैत्यात्मज श्री प्रह्लाद के प्रभाव को श्रवण कर प्रयत्न से पढते हैं वे सर्वसे निर्भय श्री वैकुंठलोक को प्राप्त होते हैं ॥ ४७ ॥

हे राजन्! युधिष्ठिर! इस मनुष्यलोक में तुम तो बडे बडभागी हो, क्योंकि? लोकों को पवित्र करने वाले मुनिजन चारों तरफ से जिन तुमारे यहां आते हैं, और उसका भी यह हेतु है, कि तुमारे यहां मनुष्य के चिन्हों से छिपा हुआ वह गुण और स्वरूपसे सबसे बडा साक्षात् परब्रह्म निवास करता है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह, सवा इति, सो ऽयं ब्रह्मैव कथम्भूतः महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दस्तदनुभूतिरूपो वो युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत् आज्ञानुवर्ती ॥ ४९ ॥

ननु, परं ब्रह्म चेत्कथं द्व्यष्टसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह-नेति । यस्य रूपं तत्त्वं भवादिभिरपि धिया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ! ।
स्मरन्तो नाशयाञ्चक्रुः पूर्ववैरमलक्षिताः ॥ ५५ ॥
ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ! ।
त्राहि नस्तावकान्देव ! विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वबुद्ध्या वस्तुतयेदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः अस्माकं तु मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह-मौनेनेति । स एष सात्वताम्पतिर्नः प्रसीदतु नहि प्रह्लादस्य गृहेषु परं ब्रह्म वसति नच तद्दर्शनाय मुनयस्तद्गृहानभियन्ति नच तस्य ब्रह्म मातुलेयादिरूपेण वर्तते नच स्वयमेव प्रसन्नमतो यूयमेव ततोऽप्यस्मत्तो ऽपि भूरिभागा इति भावः ॥ ५० ॥

नन्वन्यैर्दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् स एवम्भूतः ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्याप्येतत्साहाय्यादेवासौ प्रभावो न केवलस्येति वक्तुमाख्यानमुपक्षिपति—स एष इति ॥ ५१ ॥

राजा युधिष्ठिर उवाच ।

जगदीशितुर्देवस्य कीर्तिं कस्मिन्कर्मणि मयो हतवान् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपबृंहितैः सम्वर्द्धितैः ॥ ५३ ॥

हैमी च रौप्या चायसी चेति तिस्रः पुरो निर्माय तेभ्यो ददाविति शेषः । दुर्लक्ष्यावपायसंयोगौ गमनागमने यासां दुर्वितर्क्याः परिच्छदा यासु ॥ ५४ ॥

सेनान्यः सेनापतयः पूर्ववैरं स्मरन्तः ॥ ५५ ॥ ५६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, श्रीकृष्णोऽस्माकं मातुलेयः कथं परं ब्रह्मेत्युच्यते? तत्राह, स वा इति । सवै सोयं श्रीकृष्णो ब्रह्मैव; किंतद्ब्रह्म ? यदभिन्नः श्रीकृष्णो वो युष्माकं न केवलं मातुलेयोऽपितु प्रियः सुहृच्च आत्मा अन्तरात्मा अर्हणीयः पूज्यः विधिकृन्नियोगकारी गुरुर्हितोपदेष्टा च एवमनेकधा युष्माकं तत्सम्बन्धिनां भाग्यं कियदिति वक्तव्यमिति भावः । महद्भिर्मृग्यमित्यनेन महतामपि तत्स्वरूपं यथावद्दुरवगममित्युक्तम् प्रियः सुहृद्ध इत्यनेन तन्महद्भिर्मृग्यं ब्रह्म स्वयमेव युष्माकं प्रसन्नमिति च ॥ ४९ ॥

तन्महद्भिर्मृग्यत्वमेव प्रपञ्चयन् तत्प्रसादं प्रार्थयते—नेति । यस्य भगवतो रूपं भवपद्मजादिभिः रुद्रब्रह्मादिभिः धिया स्वमनीषया वस्तुतया याथात्म्येन नोपवर्णितम् उपवर्णितं विषयीकृतं न भवति वाङ्मनसागोचरस्वरूपस्वभावत्वात्तैरेतावदित्युपवर्णितुमशक्यमित्यर्थः । किन्तु केवलं मौनेन शुभाश्रयसंशीलनरूपेण भक्त्योपासनात्मिकया प्रीतिरूपया उपशमेनेन्द्रियजयादिना च पूजितः आराधितः स सात्वतां योगेश्वराणां पतिर्भगवान् मे मह्यं प्रसीदताम् प्रसन्नो भवतु ॥ ५० ॥

एवं संप्रार्थ्य श्रीकृष्णस्य मनुष्यलिङ्गस्य परब्रह्मत्वसूचकम् इतिहासं प्रस्तोष्यन् तत्प्रश्नावसरप्रदानाय श्रीकृष्णं विशिनष्टि—स इति । हे राजन् ! स एष भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्ययुक्तः श्रीकृष्णः पुरा अनन्तमायिना ऽनन्ताः बह्व्यो माया यस्य तेन मयेन निमित्तभूतेन रुद्रस्य देवस्य यद्विहतं यशः तद्व्यतनोत् तेनानेन रुद्रादीनामपि यश आदिगुणबृहत्वाधायकत्वकथनेन स्वयमबृहत् इतरेषां तदाधायकत्वायोगात् सामर्थ्यात्तस्यापि तल्लाभेन च परब्रह्मत्वं सूचितम् ॥ ५१ ॥

तदेवं लब्धप्रश्नावसरो युधिष्ठिरः वृहद्यश उपचयप्रकारं बुभुत्सुः पृच्छति—कस्मिन्निति । जगदीशितुः भगवदायत्तजगदीशितृत्वस्य "विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम्" इत्यादिना भगवदायत्तसामर्थ्यस्य वक्ष्यमाणत्वाद्देवस्य रुद्रस्य कीर्तिः कस्मिन् कर्मणि अयनेन श्रीकृष्णेन कर्त्रा मयेन निमित्तेनोपचिता वर्द्धिता तत् कथ्यताम् ॥ ५२ ॥

इति पृष्ट आह देवर्षिः—निर्जिता इत्यादिना । अनेन रुद्रेणोपबृंहितैराहितबलैर्देवैर्निर्जिता असुराः मायिनां परमाचार्याणामप्याचार्यं मयं शरणं जग्मुः ॥ ५३ ॥

ततः स विभुः समर्थो मयः हेम्नो विकृतिर्हैमीरूप्यस्य रजतस्य रौप्या आयसो लोहस्यायसी त्रयाणामितरेतरयोगद्वन्द्वः तास्तिस्रः पुरो निर्मायासुरेभ्यो ददाविति शेषः । पुरो विशिनष्टि, दुर्लक्ष्यः दर्शनाविषयः अपायः संयोगश्च यासां ता इमाः पुरः अत्रागताः इतो गताश्चेति जनैरलक्षिता इत्यर्थः । तथा दुर्वितर्क्याः सार्वजनीनसाधारण्येन तर्कितुमशक्याः परिच्छदा उपकरणानि यासां ताः ॥ ५४ ॥

ताभिर्विमानरूपाभिरपेक्षितदेशगमनक्षमाभिः पुरीभिरसुरसेनान्यः दैत्यसेनानायकाः हे नृप ! अलक्षिताः देवैरदृश्यमानाः पूर्ववैरं स्मरन्तः सेश्वरान् सपालान् त्रीन् लोकान् नाशयाञ्चक्रुः नाशयितुमारब्धवन्त इत्यर्थः ॥ ५५ ॥

ततस्ते सेश्वरा इन्द्रादिलोकपालैः सहिता लोका जनाः ईश्वरं रुद्रमुपासाद्य प्राप्य आनताः सन्त ऊचुः, तदेवाह—हे विभो ! त्रीणि पुराणि आलयाः स्थानानि येषां तैर्विनष्टान् तावकान् त्वदीयान् अस्मान् हे देव, रुद्र ! त्राहि पालयेति ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, परब्रह्मणि मुक्तिगा इत्यतः परब्रह्मशब्देन विष्णुत्वः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निश्चयः कथमिति ? तत्राह–स वा इति । कैवल्येनाऽनासक्त्येन यन्निर्वाणसुखमशरीरसुखम् तस्यानुभूतिरनुभवो यस्य स तथा अनन्ययोग्यस्वरूपानन्दमनुभवतीत्यर्थः । अनेन विष्णुत्वं निरणायि विधिकृदाज्ञाकारी गुरुर्हितोपदेष्टा ॥ ४९ ॥

ननु, दुर्ज्ञेयरूपत्वं हि विष्णुलिङ्गं "नहि सुज्ञेयमणुह्येष आत्मा सः" इति श्रुतेः । स्वरूपानन्दानुभवित्वं सायुज्यभाजोऽप्यस्त्यतः कथं निर्णयः ? इति तत्राह–न यस्येति॥ ५० ॥*

अस्मिन्नध्याये हरौ भक्तिविधानार्थं रुद्रमाहात्म्यकथनव्याजेन तन्माहात्म्यं प्रतिपाद्यते. अधुना "तत्रैको रुद्रो न द्वितीयो वतस्थे" इत्यादि श्रुतेः प्रतीयमानरुद्रस्याद्वितीयार्थत्वं प्रतिपाद्यमानैर्जनैर्महाद्रव्यव्ययेन पूज्यमानस्य "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्"इत्यादि मन्त्रैः स्तूयमानस्य सतः रुद्रस्यासुरावेशात्संशयो बभूव. इदं सर्वं भगवदधीनं नवेति तत्र दयालुर्भक्तवत्सलः श्रीनारायणो रुद्रस्य तं संशयमपाचक्रे कथं केनेति तत्राह–स एष इति। स भगवान्नृसिंहात्मना ब्रह्मदत्तवरेण दृप्तहिरण्यकशिपुपुरस्सरासुरजातिं निर्मूलयित्वा प्रह्लादादिभक्तसमुदायस्याऽनुग्रहीता स एष युष्मद्बन्धुभूतः श्रीकृष्णः पुरा कल्पविशेषे देवस्य हरेः स्तुतिध्यानादिकं कुर्वाणस्य रुद्रस्य रोदनाद्यवगततल्लक्षणस्यात एव तन्नाम्नः शिवस्यानन्तमायिनाऽनेकशतसहस्रमायावताऽत एवार्थादल्पेन मयेन वक्ष्यमाणप्रतीकारं कृत्वा तस्य रुद्रस्य भगवद्भक्तप्रधान इत्यादि यशो वितते त्रिपुरनाशनेन व्याप्तमकरोदात्मनोऽनिश्चयस्वामित्वेन तदनुग्राहकत्वेन च विमलमकृतेत्यन्वयः ॥ ५१ ॥

"नापृष्टः कस्यचिद्ब्रूयात्" इति वचनात्प्रसक्तं प्रमेयं विस्तृत्य श्रोतुं राजा पृच्छति–कस्मिन्कर्मणीति । कस्मिन्कर्मणि मयोविपरीतं चकार येनेशितुर्देवस्य यशोऽभूत् सा च कीर्तिः कृष्णेन यथावदुपचिता प्रचिता स कथाविशेषो मम कथनामित्यन्वयः॥ ५२॥

नारदः प्रश्नं परिहरति–निर्जिता इति । अनेन हरिणोपबृंहितैः अन्यसहायेनासुरा जिता इत्येतद्देवानां न दोषाय विष्वक्षेणस्य स्वतस्सिद्धत्वाद्देवानां सापेक्षं न तु दोषाय "ब्रह्म सिद्धमपेक्षिनम्" इति वचनात् ॥ ५३ ॥

मयेन त्रिपुरनिर्माणकर्मविपरीतं कृतमित्याह–स निर्मम इति । स निश्चः दुर्लक्ष्यो दुर्ज्ञेयोऽपायसंयोगो नाशसम्बन्धोऽतःप्रवेशसम्बन्धो वा यासां तास्तथाऽत एवाद्भुत बहुतरायुधादिपरिकराः ॥ ५४ ॥

असुरसेनान्यः असुरसेनानायकाः ॥ ५५ ॥

सेश्वराः सहरयः अत्रापि विष्णुसहितदेवानां रुद्रापेक्षितत्वं न दोषाय त्रिपुरहननं रुद्रेण कार्यमिति हरिणाक्लृप्तत्वात् इन्द्रादिभिर्वा ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, कैश्चिदस्यैतद्रूपमप्यवस्तुत्वेन मन्यते तत्राह—न यस्येति, यस्य साक्षात् प्रत्यक्षमपि रूपं परमविद्वद्भिर्भवपद्मजादिभिस्तु अवस्तुतया अपरमार्थतया नोपवर्णितं किन्तु परमार्थतया निर्णीतमित्यर्थः।"त्वं ब्रह्म परमं साक्षादिति,यन्मित्रं परमानन्दमित्यादिना, मल्लानामशनिर्नृणां नरवर इत्यादौ, विराड्विदुषां तत्त्वं परं योगिनाम् इत्यनेन च ॥ ५० ॥ ५१ ॥

अनेनेति । सर्वत्र श्रीकृष्णमेव स्वालम्बनत्वेनावतारित्वेन च दर्शयति, एवमुत्तरत्रापि ॥ ५२—७० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

न च परं ब्रह्मैव नराकृतिः कृष्णो ऽभूदिति वाच्यं किन्तु कृष्ण एव परं ब्रह्म भवतीत्याह—सोयं प्रसिद्धो नराकृतिः कृष्ण एव ब्रह्म कीदृशं महद्भिर्विमृग्यं यत् कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दः तस्यानुभूतिरनुभवरूपमित्यर्थः । कृष्णस्तु भगवान् स्वयमिति वदनुवादिविधेयभावेन व्याख्येयमत्र प्रमाणम्, "ब्रह्मणो हि प्रतिष्ठाहम्" इति गीतोपनिषदेव एतावदर्थस्य निश्चायिकेतिवै शब्दार्थः । न केवलं स युष्मद्गृहे वसति मात्रं किन्तु प्रियः स्निग्धेति युष्माकं तेनानन्दनीयत्वं सुहृदिति हिते प्रवर्तनीयत्वं मातुलेय इति सम्बन्धविशेषणानुगम्यत्वम् आत्मेति स्वीयशरीरभावेनाभिमन्तव्यत्वम् अर्हणीय इति कृपया प्रतिपाल्यत्वं विधिकृत् किङ्कर इति सारथ्यादिनोपास्यत्वं गुरुरित्यनुशासनीयत्वमिति. न च प्रह्लादादीनां गृहेषु सगुरुकिङ्करादिभावेन तिष्ठतीति भावः ॥ ४९ ॥

नन्वेवं साक्षात्परब्रह्मप्रतिष्ठाभूतस्यास्य भ्रास्यानामस्मादृशानां कैङ्कर्यादौ किङ्करणमिति चेत् सत्यम्, अस्यमैश्वर्यस्य प्रेमवश्यतायाश्च तत्त्वं विज्ञातुं कोऽहं वराको यतो ब्रह्माद्या अपि न जानन्तीत्याह—न यस्येति । रूपं तत्त्वं वस्तुतया याथात्म्येन इदमित्थमिति साक्षान्नोपवर्णितं धियेति तत्र बुद्धेः प्रवेशाभावादेवेति भावः । मौनेनेत्यस्मदादयो यत् प्रसादं मौनादिभिः साधनैः प्रार्थयते स कृष्णो युष्मत्प्रसादं कैङ्कर्यादिना प्रार्थयत इति युष्मदस्मदाद्योरेतदेवान्तरमिति भावः ॥ ५० ॥

ननु, पद्मजो न जानातु भवस्त्वीश्वर एव सत्यं तस्याप्यैश्वर्यमेतद्दत्तमेवेति वक्तुमाख्यानमारभ्यते स एष इति ॥ ५१ ॥

राजा युधिष्ठिरः अहन् कीर्तिम् ॥ ५२ ॥

अनेन कृष्णेन ॥ ५३

दुर्लक्ष्यौ अपायसंयोगौ गमनागमने यासां ताः निर्मायासुरेभ्यो ददाविति शेषः ॥ ५४—५५ ॥

ईश्वरं रुद्रम् ॥ ५६-५७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शक्रहितकारित्वं भगवतो वर्णयति–स इति। सोऽयं वो युष्माकं भक्तानां सुहृत् अनुकूलः विधिकृत् दूत्यसारथ्यादिकर्ता गुरु-

* विजयध्वजटीकायामत्रैवदशमोऽध्यायः समाप्तः । इत एकादश आरब्धः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथानुगृह्य भगवान्माभैष्टेति सुरान्विभुः ।
शरं धनुषि सन्धाय पुरेष्वस्त्रं व्यमुञ्चत ॥ ५७ ॥
ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् ।
यथामयूखसन्दोहा नाऽदृश्यन्त पुरो यतः ॥ ५८ ॥
तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ।
तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५९ ॥
सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ।
उत्तस्थुर्मेघदलना (१)वैद्युता इव वह्नयः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हितोपदेष्टा आत्मा अन्तर्यामी अर्हणीय उपास्यः सर्वथा प्रियः प्रीतिविषयः कैवल्यनिर्वाणसुखं निरतिशयनित्यानंदस्तदनुभवरूपः एवंभूतो मातुलेयः महद्भिर्मृग्यं ब्रह्मैव ॥ ४९ ॥

भगवतो गूढत्वं वर्णयन् तत्प्रसादं प्रार्थयते-नेति । यस्य रूपं साक्षाद्भवपद्मजादिभिर्धिया निपुणया बुद्ध्यवस्तुतया इदमित्थमिति भावेन नोपवर्णितम् स एषः श्रीकृष्णः सात्वतां भक्तानां पतिः पालकः मौनेन मुनिधर्मेण ब्रह्मचर्यादिरूपेण भक्त्योपशमेन पूजितोऽस्माकं प्रसीदताम् ॥ ५० ॥

भवादयोऽपि तद्रूपं साकल्येन नैव वर्णयन्तीत्युक्तं तत्र हेतुं दर्शयितुं भववृत्तान्तकथनेन तेषां भगवद्दैत्तैश्वर्यत्वं द्योतयति, स एष इत्यादिना ॥ ५१ ॥

जगदीशितुः शिवस्य कस्मिन् कर्मणि मयोऽहन् हतवान् कीर्तिमिति शेषः । यथा चानेन कृष्णेन जगदीशितुः कीर्तिरुपचिता वर्द्धिता तथा कथ्यताम् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपबृंहितैः स्वशक्त्या सम्वर्द्धितैः ॥ ५३ ॥

दुर्लक्ष्यापायसंयोगाः दुर्ज्ञेयोऽपायः तिरोभावः संयोग आविर्भावश्च यासां ता निर्माय तेभ्यो ददाविति शेषः ॥ ५४ ॥

पूर्ववैरमनुस्मरन्तस्ते असुराणां सेनान्यः सेनापतयः ताभिः पूर्भिः सेश्वरान् इन्द्रादिसहितान् नाशयाञ्चक्रुः नाशितवन्तः ॥५५॥

उपासाद्य निकटं गत्वा ॥ ५६ ॥

भाषा टीका ।

यह श्रीकृष्ण वहीपरब्रह्म हैं जोकि-महात्माजनों के ढूढने योग्य कैवल्य मोक्षसुख के अनुभवरूप, प्रिय, और सुहृद और आपके मामाके पुत्र, आत्मा पूजनीय और आज्ञा करने वाले तथा गुरुभी हैं, तस्मात् तुमारे भाग्य धन्य हैं ॥ ४९ ॥

जिनके रूपका वर्णन वास्तव रीतिसे अपनी बुद्धिसे शिव ब्रह्मादिक भी नही कर सके, किंतु मौन होकर भक्तिसे और शांतिसे पूजनमात्र किया, वो यह भक्तों का पति श्रीकृष्ण मेरे ऊपरप्रसन्न हो ॥ ५० ॥

हे राजन् यह वही भगवान् हैं कि जिनोंने, वडे मायावी मयदानव से खंडित हुए रुद्रके यशको फिर विस्तार किया ॥ ५१ ॥

राजा उवाच ॥

राजायुधिष्ठिर वोले, कि-जगदीश्वर श्रीमहादेवजी के यश को मयदानवने किसप्रकार नष्टकिया और फिर श्रीकृष्णने कैसे श्रीभोलानाथ की कीर्तिका विस्तार किया, सोआप कहिये ॥ ५२ ॥

नारद उवाच ॥

नारजी वोले, कि-इन श्रीकृष्ण की सहायसे देवताओं ने असुरोंको जव जीता तव असुर लोग मायावियोंके परम गुरु मय दैत्यके करण गये ॥ ५३ ॥

मयनेभी सोने चांदी और लोहेकी तीन पुर एसे निर्माण किये, कि-जिनकी सामग्री तर्कना करने में न आवे, और जिन के नाश का संबन्ध भी किसी को लखाई नहो ॥ ५४ ॥

हेराजन् ! उनतीन पुरोंसे वे असुरों के सेनापति लोग देवतों के पहिले वैरकी यादकर २ लोकपालों सहित तीनों लोकों को नाश करने लगे ॥ ५५ ॥

तदनन्तर अधिष्ठाताओं सहित तीनों लोक श्रीशिवजी के समीप जाकर वोले, कि—हे विभो ! तीन पुरों में रहने वाले शत्रु से नष्ट हुए ऐसे हम देव लोग आपके हैं हमारी आप रक्षा करौ ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्त्रमभिमन्त्रितं शरं पुरेषु व्यमुञ्चत ॥ ५७ ॥

ततः शरात् सूर्यमण्डलान्मयूखसन्दोहा रश्मिसमूहा इव यतो येभ्यः ॥ ५८ ॥

कूपरसे स्वयं निर्मितकूपामृते ॥ ५९ ॥

(१) मेघ दलनादिति पा० वीर०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् ।
तदाऽयं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६१ ॥
वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।
प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ६२ ॥
तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ।
तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ ६३ ॥
स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ।
देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ॥ ६४ ॥
आत्मनोऽन्यस्य वा दिष्टं दैवेनाऽपोहितुं द्वयोः ।
अथाऽसौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात् ॥ ६५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वज्रसाराः वज्रवद्दृढाङ्गाः महौजसो महाबलाः मेघदलनाः मेघभेदिनो विद्युद्रूपा वह्नय इव ॥ ६० ॥ ६१ ॥

काले मध्याह्ने ॥ ६२ ॥ ६३ ॥ ६४ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेन दिष्टमुपकल्पितम् अपोहितुं परिहर्तुमिह कश्चिदपीश्वरः समर्थो नास्ति असौ श्रीकृष्णः प्रधनं संग्रामस्तत्साधनम् ॥ ६५ ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तद्विज्ञापनानन्तरं तान् सुरान् माभैष्ट मयं आकार्ष्टं इत्यनुगृह्य भगवान् विभू रुद्रः धनुषि शरं बाणं सन्धायास्त्रं पाशुपतं तस्मिन् संयोज्येति शेषः । पुरेषु व्यमुञ्चत ॥ ५७ ॥

ततः शराद्यथा सूर्यमण्डलान्मयूखसन्दोहाः रश्मिसमूहाः तथाग्निवर्णा इषवो बाणा उत्पेतुः यतो येभ्य इषुभ्यः पुरो नादृश्यन्त जनैरिति शेषः । तावद्भिरिषुभिः प्रच्छन्ना बभूवुरित्यर्थः ॥ ५८ ॥

ततः किमत आह, तैरिषुभिः स्पृष्टास्ताडिताः त्रीणि पुराण्ययोकांसि स्थानानि येषां ते असुराः सर्वे व्यसवः विगता असवो प्राणा येषां तादृशाः सन्तो निपेतुः पतितवन्तः तान् व्यसूनसुरानानीय महायोगी मयः कूपरसे स्वयं निर्मितकूपगते रसेऽमृतसंजीवद्दत्यर्थेक्षिपदपातयत् ॥ ५९ ॥

तेच सिद्धामृतरसेन स्पृष्टा असुराः वज्रसारवत् दृढाङ्गाः महौजसः महाबलाः सन्तः मेघदलनात् मेघच्छेदाद्विद्युद्रूपा वह्नयः इवोत्तस्थुरुत्थितवन्तः ॥ ६० ॥

तथा भग्नः सङ्कल्पो यस्यात एव विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्यायं भगवान् श्रीकृष्णरूपो विष्णुस्तत्र सिद्धामृतरसविनाशे उपायमकल्पयत् ॥ ६१ ॥

तदेवाह—वत्स इति । अयं श्रीकृष्णरूपो विष्णुः स्वयं गौर्धेनुरूपा आसीत् ब्रह्मा चतुर्मुखो वत्स आसीत् ततो गोरूपोऽयं विष्णुस्सवत्सः त्रिपुरं त्रयाणां पुराणां समाहारस्तत्प्रविश्य काले मध्याह्ने रसकूपामृतं रसरूपं कूपगतममृतं पपावपिबत् ॥ ६२ ॥

तेऽसुराः पिबन्तीं गां पश्यन्तोऽपि भगवन्मायाविमोहिताः न न्यषेधन् न न्यवारयन्तः तत्पानं ज्ञात्वा महायोगी मयः रसं कूपामृतरसं पालयन्तीति तथा तानसुरान् शोकार्तान् तां दैवगतिं स्मरन् अत एव विगतशोकः स्वयं स्मयन्निदं वक्ष्यमाणं जगौ उवाच ॥ ६३ ॥

तदेवाह—देव इति । आत्मनोऽन्यस्य वा द्वयोरपि दैवेनेश्वरेण दिष्टमुपकल्पितं सुखं दुःखं वाऽपोहितुमिह लोके दैवादन्यतमो यः कश्चिद्देवादिर्नेश्वरः न प्रभुर्नसमर्थः दैवमेव सुखदुःखादहेतुरित्यर्थः । अथ निःशेषकूपामृतरसपानानन्तरम् असौ श्रीकृष्णः धर्मादिभिः स्वाभिः शक्तिभिः शम्भो रुद्रस्य प्राधनिकं प्रधनं संग्रामः तत्साधनं यत् रथसूतादिरूपं तद् व्यधात् कर्मणा धर्मादिस्वशक्तीरेव रथादिरूपेण अकरोदित्यर्थः स्वशक्त्याहितशक्तिमकरोदिति यावत् ॥ ६४ ॥ ६५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विभुः शिवः माभैष्टेत्युक्त्वा पुर्यामित्येकवचनं जातिविवक्षया ॥ ५७ ॥

ततो धनुषो मयूखसन्दोहाः रश्मिराशयः यतो यैः शरैः पुरः पुराणि ॥ ५८ ॥

स्पृष्टास्तस्ता व्यसवः गतप्राणाः इदं च मयेन कृतं विपरीतमित्याशयवानाह—तानिति ॥ ५९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सिद्धामृतरसोमृतसञ्जीवनरसः तस्मिन् स्पृष्टाः स्नाताः वद्युताः विद्युत्सम्बन्धिनः चशब्देन जलादिना यथा नाशो नास्ति तथैषामिति सूचयति ॥ ६० ॥

कथं कृष्णेनोपचिता कीर्तिरितीमं प्रश्नं परिहर्तुमाह—विलोक्येति ॥ ६१ ॥

कोसाविति तत्राह—वत्सइति । हिशब्देन विष्णुर्ब्रह्माणमपेक्षते इति न दोषायेति तत्संकल्पकारित्वेन सिद्धत्वादिति सूचयति काले माध्यन्दिने ॥ ६२ ॥

ग्रन्थान्तरसिद्धत्वाद्धिशब्देन भगवन्मायास्तन्मायातोऽपरिमितमाहात्म्यमस्तीति सूचयति, स्वकृतापराधप्रहाणाय स्वस्य भगवद्भक्तिप्रकटनाय च मयस्तद्विषयज्ञानं च ममास्तीत्यभिप्रायेणाह—तदिति । तद्दैत्यवधोपायकरणं किञ्चित्कालमसुराणां जयदायिनीमिदानीं देवानामिति दैवगतिं किं जगदिति तत्राह, देव इति । आत्मनः स्वस्य अन्यस्य देवदत्तस्य चेति द्वयोर्दैवेन विष्णुना दिष्टं क्लृप्तं व्यपोहितुम् अन्यथा कर्तुम् इह जीवराशौ देवोऽसुरोऽन्यो वा कश्चनेश्वरः समर्थो नास्तीत्यतस्तूष्णींभाव एव वरीयानित्यर्थः ॥ ६३ ॥ ६४ ॥

ननु, सिद्धरसपानं व्यर्थमिव प्रतिभाति त्रिपुराणामनाशादित्याशङ्क्य तन्नाशसाधनमाह—अथेति । अथ दैत्यजीवनसाधनरसनाशानन्तरं स्वाभिः शक्तिभिः भूम्यादिभिः शम्भोः प्राधनिकं युद्धसाधनं रथादिकं व्यधादित्यन्वयः ॥ ६५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथेति सूर्यमण्डलादित्यस्मात् पूर्वं योज्यं यतो येभ्य इषुभ्यो हेतुभ्यः ॥ ५८ ॥

कूपरसे स्वनिर्मितकूपरसामृते ॥ ५९ ॥

मेघदलना मेघभेदिनो विद्युद्रूपावह्नयः इव मेघस्याविद्युतो यथा मेघकान्तितिरस्कारिण्यस्तथैव ते वीरा अपि श्यामविमानकान्तितिरस्कारिण इत्यर्थः ॥ ६०—६१ ॥

काले मध्याह्ने ॥ ६२—६३ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेनोपकल्पितं दिष्टम् अपोहितुं दूरीकर्तुम् इह कश्चिदपीश्वरः समर्थो नास्ति ॥ ६४ ॥

असौ कृष्णःप्रधनं संग्रामस्तदर्हं रथादिकं स्वाभिः शक्तिभिः धर्मादिभिराविष्टं क्रमेण व्यधादिति स्वशक्तीनामनश्वरत्वाच्च तदाविष्टानां रथादीनामपि तादृशत्वं तत्र स्वीयधर्मस्य भक्तियोगस्यावेशो रथे भक्तियोगाश्रितानां ज्ञानादीनां रथाश्रितेषु सूतादिषु ज्ञेयः ॥ ६५ ॥ ६६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शरं शस्त्रविशेषं तदेवास्त्रम् अस्त्रेण पाशुपतेनाधिष्ठितत्वात् ।५७॥

ततः अस्त्राधिष्ठिताच्छरात् यतो येभ्यः पुरो नादृश्यन्त छन्नाः अभवन् ॥ ५८ ॥

तान् व्यसृजत् मयः कूपरसे स्वनिर्मितकूपस्थसिद्धामृतरसे ॥५९॥

वज्रस्येव सारः काठिन्यं येषाम् महौजसो महाबलाः मेघदलना घनभेदिनस्ताडिद्रूपा वह्नय इवोत्तस्थुः ॥ ६०—६१ ॥

काले सुरासुरसमृद्ध्यसमृद्धिकरे ॥ ६२—६३ ॥

आत्मनोऽन्यस्य वा द्वयोर्वा दैवेन कर्मफलदात्रा आदिष्टं प्रापितं फलमपोहितुं परिहर्त्तुं देवोऽसुरो नरो वा नेश्वरः समर्थो नास्ति असौ श्रीकृष्णः धर्मादिभिः स्वशक्तिभिः सह प्राधनिकं प्रधनं संग्रामस्तदर्हं रथादिकं व्यधात् ॥ ६४—६६ ॥

भाषा टीका ।

तब तौ भगवान् श्रीशङ्कर अनुग्रह करके देवतों से बोले, कि—तुम लोग भय मत करौ वस इतना कहकर धनुष के ऊपर बाण लगाकर श्रीभोलानाथ ने अस्त्र छोडे ॥ ५७ ॥

तब तौ अग्निके समान वर्ण वाले बाण श्रीमहादेवजी के धनुष से चलने लगे, जैसे सूर्य मण्डल से किरणों का समूह निकलें, जिन बाणों के मारे तीनों पुर अदृश्य होगये ॥ ५८ ॥

वस उन तीनों पुरो के रहने वाले जिन २ दैत्यों को बाणों का स्पर्श हुआ, वो सब विना प्राण के होकर पतन हुए, बडे योगी मय दैत्य ने भी उन सबों को लाकर कूप के अमृत रस में डाला ॥ ५९ ॥

उस कूप के सिद्ध उस अमृत रसके स्पर्श होते ही वज्र सदृश अंग वाले बडे पराक्रमी एकही वार सब उठ खडे हुए जैसे मेघों का दलन करने वाली विद्युतों की अग्नियां ॥ ६० ॥

उस समय वृषभध्वज श्रीमहादेव के संकल्प के भंग होने से उदास होने पर, इनहीं श्रीकृष्ण ने वहां उपाय रचा ॥ ६१

तब ब्रह्माजी तो वछरा वने और ये विष्णु स्वयं गौ वनें, और समय पर त्रिपुर में प्रवेश करके उस कूप के अमृतरस का पान कर गये ॥ ६२ ॥

वे असुर लोग सव देखते ही रहे पर आपकी माया से विमोहित होकर देखने पर भी निषेधन किया, एसा समाचार जान कर वडा योगी विगत शोक वाला स्वयं मय दैत्य, उस दैवी गतिका स्मरण करता हुआ शोक से व्याकुल एसे उन रस पालों से यों बोला, कि देव असुर नर अथवा और भी कोई, दैव रचित प्रारब्ध के हटाने को समर्थ नहीं। वस वहां तो यों बातें होती थीं इतने में इन श्रीकृष्णने अपनी शक्तियों से भोलानाथ श्रीशम्भुकी संग्रामकी सामग्री त्यार करदी ॥ ६३—६५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ।
रथं सूतं ध्वजं वाहान्धनुर्वर्म्मशरादि यत् ॥ ६६ ॥
सन्नद्धो रथमास्थाय शरं धनुरुपाददे ।
शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः ॥ ६७ ॥
ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप !।
दिवि दुन्दुभयो नेदुर्विमानशतसङ्कुलाः ॥ ६८ ॥
देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ।
अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥ ६९ ॥
एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ! ।
ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥
एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः ।
वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः ।
॥ ६८ ॥ ६९ ॥

आदित आरभ्य स्कन्धार्थं निगमयति, एवं विधानीति नृलोकं नराकारमात्मनो विडम्बमानस्याऽनुकुर्वतः ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र शक्तिर्नाम स्वापृथक्सिद्धविशेषणभूतकार्योपयुक्ता सा-च धर्मादिरूपेण बहुविधा तत्र धर्मशक्तिर्नाम साधुपरित्राण-सामर्थ्यात्मिका ज्ञानशक्तिरिह "यः सर्वज्ञः सर्ववित् सर्वदर्शी स्वा-धीनोऽनादिः सर्वेश्वरः सर्वहक्" इत्यादिभ्योऽवगता सर्वसाक्षात्कार-सामर्थ्यात्मिका तथा चोक्तं श्रीमन्नाथमुनिभिः "यो वेत्ति युग-पत्सर्वं प्रत्यक्षेण सदा स्वतः" इति. विरक्तिर्नाम "सर्वमिद-मभ्यात्तोऽवाक्यनादरः" इति श्रुत्यवगताऽवाप्तसमस्तकामत्वेपि तद-नादरेण ऽवस्थानसामर्थ्यात्मिका, ऋद्धिर्नामैश्वर्यम् "एष सर्वेश्वरः कृष्णः" इत्यादिप्रमाणाऽवगतं सर्वान्तरात्मत्वेन नियन्तृत्वसामर्थ्यम्. तपश्शक्तिर्नाम "स तपोऽतप्यत सतपस्तप्त्वा इदं सर्वमसृजत" इत्याद्यवगता जगद्रक्षणोपयुक्तसङ्कल्परूपज्ञानात्मिका, विद्यानाम "सत्यकामः सत्यसङ्कल्पः" इत्याद्यवगता सत्यसङ्कल्पात्मिका सत्य-संकल्पत्वं च स्वावताराद्यपूर्वभोग्यान्तरसृष्टौ जगद्व्यापारादिषु चामोघसङ्कल्पत्वम्. क्रियानामाघटितघटनात्मिका "स्वाभाविकी ज्ञान-बलक्रियाच" इत्याद्यवगता. आदिशब्देन बलवीर्यतेज आदयस्तत्र बलं श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम् "एषसेतुर्विधरणः" इत्यादिभ्योऽवगतम्. वीर्यनाम, सर्वधारणेऽपि विकाररहितत्वम् तेजः अस्वाधीनसहकार्यनपेक्षत्वम्. रथमिति वाहानाश्वान् वर्म कवच-मादिशब्देन प्रग्रहादिकं गृह्यते ॥ ६६ ॥

भगवद्धर्मशक्त्यात्मकं रथमारुह्य सन्नद्धः कवचित ईश्वरो रुद्रः शरं धनुश्चोपाददे स्वीकृतवान् ततो धनुषि शरं सन्धाया-भिजिति मुहूर्ते अभिजिन्नामके मुहूर्ते दिवसस्याष्टमे मुहूर्ते ॥ ६७ ॥

भगवतः श्रीकृष्णस्य तेजसोंऽशविशेन युक्तास्त्रिपुरं ददाह बाणप्रयुक्तद्वारेण दग्धवान् । हे नृप ! तदा दिवि दुन्दुभयो नेदुः दध्वनुः विमानशतानि सङ्कुलानि येषां ते ॥ ६७ ॥

देवर्ष्यादयः जयेति वदन्तः इति शेषः । उत्कर्षेण वर्षस्वेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वदन्तः कुसुमोत्करैः पुष्पवर्षैः शम्भुमवाकिरन् ववृषुः अप्सरसांगणाश्च जगुर्ननृतुश्च ॥ ६९ ॥

हे नृप ! एवमित्थं तिस्रः पुरः पुरीर्दग्ध्वा पुरहा भगवान् रुद्रः ब्रह्मादिभिः स्तूयमानः स्वस्थानं प्रत्यपद्यत प्राप्तवान् ॥ ७० ॥

श्रीकृष्णस्य परब्रह्माभिन्नत्वसूचकप्रभावप्रतिपादनम् उपसंहरन् प्रश्नान्तरावसरं प्रयच्छति—एवमिति । आत्मनः स्वस्य मायया सङ्कल्पेन न तु कर्मणेति भावः । नृलोकं विडम्बमानस्यानुकुर्वतः इतरसजातीयचेष्टां कुर्वत इत्यर्थः । हरेराश्रितार्त्तिहरस्य लोकस्य हितोपदेष्टुरस्य श्रीकृष्णस्य ऋषिभिरस्मदादिभिर्गीतान्येवंविधानि वीर्याणि लोकं पुनानानि बहूनि सन्तीति शेषः । साकल्येन केनापि वक्तुं न शक्यानीतिभावः । अपरमन्यत्किं वदाम अतो अन्यत्किञ्चित्त्वया प्रष्टव्यमस्तिचेत् तत्कथयामेत्यर्थः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धर्मादिबलोपेतत्वात् अमेयाभिः किं तत्साधनिकमिति तदाह—रथमिति । भगवतो हरेस्तेजसा गुप्तो रचितः ॥ ६६॥६७ ॥

यशोवितितिप्रकारमाह—दिवीति । जयेत्युक्त्वा जगुरित्यनेन यशोवितितिर्ज्ञायते ॥ ६८ ॥ ६९ ॥

ब्रह्मादिभिर्ब्रह्मोत्पन्नैः सनकादिभिः "इमा रुद्राय स्थिरधन्विने गिरः क्षिप्रेषवे" इत्यादिवेदवाक्यैर्वा शम्भोः पुरदहनमाहात्म्यं वद तत् श्रीनारायणैकनिष्ठमित्याशयेनोपसंहरति—एवंविधानीति । अपरं भगवच्चरितं तद्वदेति शेषः । अपरमन्यद्वस्त्वेवंविधमाहात्म्योपेतं किं वदामि न किमपीति वा ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । नृलोकं तच्चेष्टाम् ॥ ७१ ॥

इ त श्रीमादौ प्रह्लादचरितं त्रिपुरविजयं च दशमोऽध्यायः इत्येव पाठः

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अभिजिति मध्यान्हे ॥ ६७—७० ॥

स्वमायया विडम्बमानस्य अत एव मोहवशात् अत एव नृलोकस्तं न भजत इति भावः ॥ ७१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमे दशमोऽध्यायस्सङ्गतः सङ्गतस्सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सन्नद्धो वर्म्मितः अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः जयेति वदन्तः कुसुमोत्करैरवाकिरन् ववृषुः ॥ ६८—७० ॥

आत्मनः स्वस्य नृलोकं भक्तजनं स्वमायया विडम्बमानस्य स्वकृपया ऽनुकुर्वतः तत्तद्भक्तानुरूपं चेष्टितं कुर्वतः अस्य श्रीकृष्णस्य हरेः भक्तदुःखहारिणः लोकान् पुनानानि वीर्याणि ऋषिभिर्गीतानि एवंविधानि सन्ति. तत्र किञ्चिदुक्तमपरं किं वदामि तदुच्यतामिति शेषः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमोऽध्यायार्थ प्रकाशः ॥ १० ॥

भाषा टीका ।

अर्थात् धर्म ज्ञान विरक्ति ऋद्धि तप विद्या क्रिया इत्यादि कों से रथ सूत ध्वजा घोडे धनुष कवच बाण आदि जो चाहिये से सबही कुछ रचदिया ॥ ६६ ॥

श्री शिवजी भी कटिबद्ध होकर रथ पर बैठ धनुषबाण हाथ में लेकर मध्याह्न काल अभिजित मुहूर्त में धनुष के ऊपर बाण लगाकर ॥ ६७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषा टीका ।

हे नृप ! उस बाण से श्रीहर ने दैत्यों के तीनों पुर जलादिये, बस तब तो स्वर्ग में सैकड़ों विमानों पर बैठकर देवता लोग दुंदुंभी बजाने लगे ॥ ६६ ॥

देव ऋषि पितृ सिद्धेश जय २ शब्द करके कुसुमों की वर्षा करने लगे, और हर्ष के मारे गाने लगे अप्सरा गण नृत्य करने लगे ॥ ६९ ॥

हे नृप ! ऐसे भगवान् श्री शंकर जी तीनों पुरों को जलाकर अपने धाम को सिधारे ॥ ७० ॥

इस प्रकार मनुष्य लोक का अनुकरण करने वाले इन जगद्गुरु श्री हरिके पराक्रम हैं जिनको ऋषि लोग गान करते हैं, और जो लोकों को पवित्र करते हैं ऐसे आपके वीर्य हैं सो मैंने तुमसे कहे अब और क्या कहूं ॥ ७१ ॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में
दशम अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे दशमोऽध्यायः ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ एकादशोऽध्यायः ॥

श्रीशुक उवाच ।

श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ।
युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयम्भुवः ॥ १ ॥

युधिष्ठिर उवाच ।

भगवन् ! श्रोतुमिच्छामि नृणां धर्म्मं सनातनम् ।
वर्णाश्रमाचारयुतं यत्पुमान्विन्दते परम् ॥ २ ॥
भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः ।
सुतानां सम्मतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥
नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ।
करुणाः साधवः शान्तास्त्वद्विधा न तथा परे ॥ ४ ॥

नारद उवाच ।

नत्वा भगवते ऽजाय लोकानां धर्महेतवे ।
वक्ष्ये सनातनं धर्म्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥
यो ऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्म्मतः ।
लोकानां स्वस्तये ऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥
धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ।
* स्मृतं च तद्विदां राजन् ! येन चात्मा प्रसीदति ॥ ७ ॥
सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे नृणां धर्माः साधारण्येन वर्णिताः ।
विशेषेण च वर्णानां मुख्यामुख्याश्च योषिताम् ॥ १ ॥
"तदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ ।
अथ पञ्चभिरध्यायैः कर्मयोगो ऽनुवर्ण्यते ॥ २ ॥

दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतमीहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथम्भूतस्येहितं महत्तमानामग्रण्यो मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य ॥ १ ॥

श्रवणेच्छायां हेतुः यद्यतो धर्मादनुष्ठितात्परं ज्ञानं भक्तिं च विन्दते ॥ २ ॥ ३ ॥

ननु, स्मृतिकारैर्धर्म उक्त एव तत्राह—नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतम् ॥ ५ ॥

---

* स्मृतिरिति पाठः, वीरराघ० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

तन्मुखादात्मनः श्रवणं सम्भावयन्विशिनष्टि, य इति ॥ ६ ॥

प्रथमं तावद्धर्मे प्रमाणमाह—धर्मेति । धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः तद्विदां वेदविदां येन चाऽऽत्मा मनः प्रसीदति तुष्यति च । तथाच याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्" इति. मनुश्च "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" इति ॥ ७ ॥

तत्र तावन्नरमात्रसाधारणधर्ममाह—सत्यमिति, पञ्चभिः । तपः एकादश्युपवासादिः ईहा युक्तायुक्तविवेकः शमो मनसस्संयमः दमो बाह्येन्द्रियाणाम्. त्यागो दानं स्वाध्यायो यथोचितजपः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं श्रुतप्रह्लादचरितोऽपरं वदाम किमिति प्रश्नाय चोदितो युधिष्ठिरः वर्णाश्रमादिधर्मान् तत्रतत्र भगवद्भक्तियोगाङ्गत्वेनोक्तान् बुभुत्सुः पप्रच्छ देवर्षिमित्याह भगवान् बादरायणिः, श्रुत्वेति । उरुविक्रमे भगवत्यात्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुभिः सभाजितमनुसेवितम् आहतं वा ईहितं चरित्रं श्रुत्वा मुदा हर्षेण अन्वितो युक्तो युधिष्ठिरः पुनर्महत्तमानामग्रण्यं प्रथमतो गण्यं स्वयंभुवो ब्रह्मणः तनयं नारदं पप्रच्छ "साधु सभासभाजितं महत्तमाग्रण्यउरुक्रमात्मनः" इति पाठान्तरं तत्र महत्तमानामग्रण्यः मुख्यः उरुक्रमे भगवति आत्मा मनो यस्य दैत्यपतेः प्रह्लादस्येहितं साधूनां सभायां सभाजितं सत्कृतं श्रुत्वेत्यर्थः ॥ १ ॥

प्रश्नमेवाह—भगवन्निति, त्रिभिः । हे भगवन् ! अहं वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्याद्याश्रमनिष्ठानां चाचारैर्युतं नृणां सनातनमनादिपरंपरागतं नत्वर्वाचीनपाषण्डकल्पितं वर्णाश्रमाचारयुतं नतूत्पथप्रतिपन्नजनाचारयुतम् एवंविधाद्धर्मादेव परमात्मानं विन्दत इतिभावः—

> "वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
> विष्णुराराध्यते नान्यः पन्थास्तत्तोषकारणम्" ॥

इति स्मृतेः । धर्मं श्रोतुमिच्छामि तच्छ्रवणेच्छायां हेतुं वदन्विशिनष्टि—यद्यस्माद्धर्मात्परं परमपुरुषं विन्दते भक्तियोगनिष्पत्तिद्वारा प्राप्नोतीत्यर्थः ॥ २ ॥

नन्वेतद्धर्मविदो बहवः सन्ति अतस्तंप्रति नाहं पृष्टव्यस्तत्राह—भवानिति । त्वमिवान्ये धर्मं गुह्यं न विदुरतस्त्वमेव ब्रूहीति भावः । तदेव व्यञ्जयंस्तं विशिनष्टि, प्रजानां पत्युः परमेष्ठिनः साक्षाद्भगवानात्मजः पुत्रः सर्वोऽपि धर्मः परमेष्ठिमुखोपदिष्ट इति ततो गृहीतधर्मरहस्यस्त्वमेव तद्वक्तुं समर्थ इति भावः । ननु, परमेष्ठिनः सुता अपि बहवः सन्तीत्यत्राह—हे ब्रह्मन् ! सुतानां मध्ये भवान्परमेष्ठिनः संमतः सुतः नितरां प्रीतिविषयः सुतोऽतो धर्मरहस्यं तेन तुभ्यमुपदिष्टम् भवेदितिभावः ॥ ३ ॥

ननूपदिष्टधर्मरहस्योऽप्यहं तद्विस्मृतवानस्मीत्यत्राह—तप आदिभिरुपायैर्नारायणपराः नारायणः पर उत्कृष्ट उपास्यो येषां तादृशा विप्रा यूयं परं धर्मगुह्यं विदुः भगवद्भक्त्यङ्गत्वेन वर्णाश्रमादिधर्ममनुतिष्ठतां युष्माकं न तद्विषया विस्मृतिरितिभावः । जानन्तो वयं रहस्यत्वादेव न कथयाम इति चेत्तत्राह—करुणा इति । करुणाः करुणावन्तः करुणावतां मम धर्मरहस्याऽज्ञानप्रयुक्तदुःखस्य निराचिकीर्षा युक्तैवेति भावः । ननु, तच्छ्रवणे त्वमनधिकारीति शङ्कां निराकुर्वन्विशिनष्टि, शान्ता रागादिप्रयुक्तवैषम्यरहिताः किं तवैतद्रहस्योपदेशेन मम प्रयोजनं तत्राह. साधवः स्वार्थनिरपेक्षपरोपकारशीलाः एवंभूतास्त्वद्विधा एव न त्वपरे सन्तीत्यर्थः ॥ ४ ॥

एवमापृष्टो धर्मान् भगवान् नारदस्तान्विवक्षुः स्वस्य साक्षात्तदुपदेष्टारं श्रीमन्नारायणं नमस्कुर्वन् प्रतिज्ञाय तं विशिनष्टि—नत्वेति द्वाभ्याम् । अजाय कर्मायत्तोत्पत्तिरहिताय भगवते नारायणाय लोकानां योधर्मस्तस्य हेतवे नारायणाय प्रवर्त्तकाय नत्वा नारायणमुखाच्छ्रुतं सनातनं धर्ममहं वक्ष्ये ॥ ५ ॥

एवं प्रतिज्ञां कृत्वाऽथ तन्मुखादात्मन श्रवणं संभावयन् तं विशिनष्टि—य इति । यो भगवानात्मनोंशभूतेन नरेण सह दाक्षायण्यां दक्षदुहितरि मूर्तौ धर्मतो मूर्त्यां भर्तुर्धर्मादवतीर्य लोकानां स्वस्तये बदरिकाश्रमे ऽद्याप्यध्यास्ते ॥ ६ ॥

तावद्विवक्षिते धर्मे प्रमाणमाह—धर्ममूलमिति. धर्मस्य मूलं प्रमाणं धर्मप्रमापको भगवानेवेत्यर्थः । ननु, भगवतः प्रत्यक्षादिप्रमाणानन्तर्भूतत्वात्कथंतस्य धर्मप्रमापकत्वमितिशङ्कां निराकुर्वन् तं विशिनष्टि, सर्ववेदमयः ऋग्यजुस्सामादिसर्ववेदप्रचुरः न साक्षाद्धर्मे भगवान् प्रमाणमपितु साक्षात्प्रमाणभूतसर्ववेदाविष्कारद्वारेतिभावः । तदाविष्कारकारकत्वं च तस्य श्रूयते "तस्यहवाएतस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदः" इत्यादि. किञ्च हे राजन् ! तद्विदां वेदविदां स्मृतिश्च तद्धर्ममूलमित्यर्थः तद्विदामित्यनेन स्मृतीनां स्वमूलभूतश्रुत्यनुमापनद्वारा धर्मप्रमापकत्वमिति सूचितम् तद्विदां स्मृतय इत्यनेनना तद्वेदनमूलकशाक्यादिस्मृतिव्यावृत्तिः । स्मृतिश्चेति च शब्देन शिष्टाचारादिसंग्रहः । तदुक्तं मनुना—

> "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
> आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति.

याज्ञवल्क्यश्च——

> "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
> सम्यक सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ इति.

धर्म्मं विशिनष्टि, येन धर्मेण स्वाराधनभूतेनात्मा परमात्मा प्रसीदति परमात्मप्रसादहेतुत्वादवश्यं तच्छ्रवणादिकर्त्तव्यम् इति भावः ॥ ७ ॥

एवं धर्मप्रमाणान्यभिधाय तावन्नृणां ये साधारणा धर्माः तानाह—सत्यमिति पञ्चभिः, । सत्यं भूतहितत्वं दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम्. तप अनशनादिरूपम्. शौचं स्नानादिजं शुचित्वम्. तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता. ईहा हेयोपादेयविवेकः, शमोऽन्तरिन्द्रियजयः दमो बाह्येन्द्रियजयः अहिंसा करणत्रयेणापि परपीडानिवृत्तिः । ब्रह्मचर्यमनुचितकालेषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीसङ्गराहित्यं त्यागो लोभराहित्यं स्वाध्यायो यथोचितमन्त्रजपः आर्जवं मनोवाक्कायानामैक्यरूप्यम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवद्भक्त्या यथावद्वीतवर्णाश्रमाचाराचरणेन समुत्पन्नाऽपरोक्षज्ञानेन प्रसन्नो हरिः स्वस्वयोग्यां मुक्तिं ददातीत्येतदर्थमुत्तरेषामध्यायानामारम्भः । तत्र वर्णाश्रमधर्मांञ्छ्रोतुकामो युधिष्ठिरो नारदं पृच्छतीत्याह—श्रुत्वेति । महत्तमानामग्रण्यस्य अग्र्यस्य उरुक्रमे हरावात्मा मनो यस्य स तथा तस्य दैत्यपतेः प्रह्लादस्य ईहितं चरितं साधुसभासु सभाजितं सम्भावितं महत्तमानां ब्रह्मादीनां उत्तमस्य दैत्यानामपि पत्युरुरुक्रमात्मनो नरसिंहस्येति वा ॥ १ ॥

धर्मं विशिनष्टि-वर्णेति । वर्णाश्रमाचारयुतं "यु मिश्रणे" इति धातुः ॥ २—५ ॥

पुरुषार्थोपयोगित्वाद्वक्तुमिच्छामीत्याह—यो वर्तीर्येति । दाक्षायण्यां नाम्ना मूर्तौ धर्मतो धर्मप्रवर्तनार्थम् "स्यादध्यधिक ईश्वरः" इत्यभिधानादीश्वरः तप उद्दिश्य बदरिकाश्रम मास्त इत्यन्वयः बदरिकाश्रमे तपोऽध्यास्त इति वा ॥ ६ ॥

तत्रानुष्ठानधर्मविषये ज्ञाते क्षिप्रप्रवृत्तिः स्यादधिकारिणामिति तमाह—धर्ममूलमिति । धर्ममूलं धर्मविषयः सर्ववेदमयः सर्ववेदप्रतिपाद्येषु प्रधानः अनेन रुद्रादयो निवृत्ता इति ज्ञातव्यं न केवलं धर्मविषय एव तत्प्रतिष्ठापकश्चेत्यतो धर्ममूलमित्यत्र प्रमाणं सर्ववेदमय इति, प्रमाणान्तरं चास्तीत्याह—स्मृतिरिति, प्रमाणमिति शेषः । भगवत्प्रसादहेतुत्वात्प्रमाणमित्याह—येनेति । अनेन भगवत्तत्त्वज्ञैः स्मृतो धर्मो न कपिलादिभिरित्युक्तम् भवति ॥ ७ ॥

त्रिपयं निरूप्य सर्वसाधारणं सर्वधर्मसाधनमाह—सत्यमिति । सत्यादिचतुष्टयमन्तरङ्गं तितिक्षादिकमुपाङ्गमिति ज्ञातव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हतसन्देहत्वान्मुदा युतः । अत एव राज्याऽनुकूल्यैरधर्मकथामकरोदित्याह, पप्रच्छेति ॥ १ ॥

तामपि लोकहितायैव परमार्थमाश्रित्यैव श्रीनारदेन सममेव वाकरोदित्याह—पद पुमानिति ॥ २ ॥ ३ ॥

ननु, मन्वादयो नारायणपरा एव तत्राह-गुह्यमिति । गुह्यत्वादेऽपि न प्रकाशयन्तीत्यर्थः ॥ ४ ॥

धर्महेतव इति । धर्मोऽत्र ज्ञानभक्तिजनको धर्मविशेषो ज्ञेयः ॥ ५ ॥

आत्मवतामनुकम्पया तपोऽव्यक्त गतिश्चरतीति पञ्चमस्कन्धात् आत्मनोंऽशेन नरेण ॥ ६ ॥

तस्य प्रमाणं—आज्ञ्यां तदूवहिर्मुखधर्मस्य अपार्थत्वं भगवद्धर्मस्यैवावश्यकत्वं चोक्तम् अत एव "वेदोऽखिलोधर्ममूलम्" इत्यादि मनुस्मृतिवाक्यादप्यत्र विशिष्टतयोपदिष्टं तच्च युक्तं "धर्मःप्रोज्झित कैतवोऽत्र परमो निर्मत्सराणां सताम्" इत्याद्युक्तत्वात् येनैव धर्मेण मनः प्रसीदतीत्यनेन ययात्मा सुप्रसीदतीतिवत् सुशब्द विशिष्टतया अनुकृत्वात्तच्छूत्रणलक्षणं साक्षाद्भक्तेरेव प्रशस्तत्वञ्च बोधितं येन चात्मेत्यात्मतोषोऽपि प्रमाणमित्यर्थः ॥ ७ ॥

सत्यमित्यादि सार्द्धपञ्चकम् ॥ ८—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वासनाभगवद्भक्तसङ्गात् साध्वी निरूपिता ।
दशभिः पञ्चभिश्चाथ सत्कर्म प्रभवोच्यते ॥
नृणां साधारणान् धर्मान् विप्रादीनां विशेषतः ।
स्त्रीणां सङ्करजातीनां चोवाचैकादशे मुनिः ॥

तदेवं निर्गुणभक्तिवासनायाः कारणत्वेन महत्कृपां दशभिरध्यायैरुक्त्वा सगुणभक्तिवासनायाः कारणं निष्कामकर्मयोगं पञ्चभिरध्यायैर्वक्तुमारभते—श्रुत्वेति । साधूनां सभासु समाजितं सत्कृतं महत्तमानामग्रण्यो मुख्यस्य प्रह्लादस्य ॥ १ ॥

सनातनं फलप्राप्तावपिस्थास्नु भक्तियोगमित्यर्थः । वर्णाश्रमाचारयुतमिति वर्णाश्रमाचारधर्मं च श्रोतुमिच्छामीत्यर्थः ॥२॥३॥

नन्वन्ये मुनयः स्मार्त्ताः पृच्छ्यन्तामित्यत आह, नारायणेति ॥४॥

अजाय श्रीकृष्णाय ॥ ५—६ ॥

धर्मस्य मूलं कारणं प्रमाणं च हि निश्चितं भगवानेव यतः सर्ववेदेति तद्भक्त्या विना धर्मा नैव सिद्ध्यन्तीति भावः । स्मृतं स्मृतिः तद्विदां सर्ववेदमयभगवद्विदां तेन प्रायमिकविष्णुपूजाविरहितश्राद्धादिकसप्तमीविद्धरोहिण्यष्टमीव्रतादिविधायिकाः स्मृतयो व्यावृत्ताः येन च आत्मा मनः प्रसीदतीति.

"सवै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययाऽऽत्मा सुप्रसीदति" ॥

इतिवत्सुशब्दाप्रयोगात् यथा केवलया भक्त्या न तथा कर्मादिमिश्रया भक्तिमिश्रकर्मणा वा मनः प्रसीदतीति ज्ञापितं भक्तिरहितो धर्मस्त्वग्राह्य एव तेन—

"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्" ॥

इति याज्ञवल्क्योक्तेः

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चापि साधूनामात्मन स्तुष्टिरेवच" ॥

इतिमनूक्तेरपि सकाशात् धर्ममूलं हि भगवानिति नारदोक्तिरेव श्रेयसी यदुक्तं नारसिंहे—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

"सनकादयो निवृत्ताख्ये ते च धर्मे नियोजिताः।
प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्"

इति नारदस्यैव तेभ्य उभयेभ्यः श्रेष्ठ्यं सर्वधर्मसारविज्ञत्वं च ध्वनितम् ॥ ७ ॥

तत्र तावन्नरमात्रसाधारणं सनातनं भक्तियोगं धर्ममाह, सत्यमिति, पञ्चभिः। तत्र सत्याद्या एकविंशतिभक्त्युपकरणीभूताः श्रवणाद्या नव तु साक्षाद्भक्तिरेवेति ज्ञेयं तप एकादश्युपवासादिः शमो मनसो निग्रहः दमो बाह्येन्द्रियाणां स्वाध्यायो यथोचितजपः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमतिक्रान्तेन ग्रन्थेन भगवत्प्रियो भक्तियोगो ज्ञानयोगश्च वर्णितः अथ तत्प्रियः कर्मयोगः पञ्चभिरध्यायैर्वर्ण्यते तत्रैकादशेनाध्यायेन सर्वेषामधिकारिणां साधारणा धर्माः विशेषतश्च वर्णानां स्त्रीणां च धर्मा वर्ण्यन्ते। युधिष्ठिरः, महत्तमा हरिध्याननिष्ठास्तेषामग्रं हरिध्यानं नयति वहतीति महत्तमाग्रणीस्तस्य महत्तमाग्रयः यतः उरुक्रमे हरौ आत्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुसभासु सभाजितं प्रशंसितमीहितं हरिज्ञानभक्तिगर्भं सुचरितं श्रुत्वा पुनर्ज्ञानभक्तिसाधनभूतकर्मयोगज्ञानार्थं स्वयंभुवस्तनयं नारदं पप्रच्छ ॥ १ ॥

सनातनं नित्यसिद्धवेदप्रोक्तम् यतो धर्मात् ज्ञानभक्तिद्वारा परं परमेश्वरं विन्दते प्राप्नोति ॥ २ ॥

परमेष्ठिनः साक्षात्सुतः सुतानां मरीच्यादीनां मध्ये तपआदिनिमित्तैः सम्मतः प्रीतिविषयश्च ॥ ३ ॥

भवद्विधा नारायणपरा एव धर्मं जानन्ति ते एवोपदेष्टुं कुशलाः नान्ये इत्याह-नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय ॥ ५ ॥

यः धर्मस्तद्धार्यायां दाक्षायण्यां मूर्त्तौ आत्मना स्वेच्छया अंशेन स्वांशेन नरेण सह अवतीर्य लोकानां क्षेमाय तपोऽध्यास्ते ६ ॥

धर्मे प्रमाणमाह-धर्ममूलमिति। आत्मा परमात्मा प्रसीदति तस्य धर्मस्य सर्ववेदमयो वेदमूर्तिः भगवान् मूलं प्रवर्तकः प्रमाणमित्यर्थः। तद्विदां वेदविदां स्मृतं स्मृतिश्च धर्ममूलम् ॥ ७ ॥

प्रथमं सर्वसाधारणं धर्ममाह-सत्यमिति, पञ्चभिः। सत्यं सार्वत्रिकं याथार्थ्यं तप एकादश्युपवासादिः ईचा हेयोपादेयविवेकः शमोऽन्तरिन्द्रियसंयमः दमो बाह्येन्द्रियसंयमः त्यागो दानम् स्वाध्यायो यथाधिकारं गुरुवाक्यसाधारणम् ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीप्राणनाथाय नमः ॥

श्रीशुक उवाच।

श्रीशुकदेवजी बोले, कि—हे परीक्षित! महत्तमों में अग्र गण्य श्रीहरि में लगाचित्त दैत्यपति ऐसे श्रीप्रह्लादके साधु समामें संश्लाघनीय चरितों को सुनकर हर्षमें निमग्न हुए२ युधिष्ठिरजी ब्रह्मपुत्र श्रीनारदजीसे फिरपूँछने लगे ॥ १ ॥

युधिष्ठिर उवाच।

युधिष्ठिरजी बोले, कि-हे भगवन्! हे श्रीनारद जी! मैं वर्णाश्रम के आचार सहित मनुष्यों के सनातन धर्मों के श्रवण करने की इच्छा करता हूं जिनसे पुरुष परमात्माको प्राप्त होता है ॥ २ ॥

हे ब्रह्मन् आप परमेष्ठी श्रीब्रह्माजीके पुत्र हैं तपयोगसमाधि से सब पुत्रों में सम्मत हैं ॥ ३ ॥

कारुणिक साधु शान्त आप सदृश नारायणपरायण विप्रजनही उत्कृष्ट ऐसा गुप्त जो सनातन धर्म है तिसको जानते हैं ऐसा और हरिविमुख जन नहीं जानते हैं ॥ ४ ॥

नारद उवाच।

नारद जी बोले, कि—भगवान् अजन्मा श्रीनारायण को नमस्कार करके उनही श्रीनारायण के मुख से सुने हुए सनातन धर्मों को कहता हूं ॥ ५ ॥

जो साक्षात् अपने अंश से दक्षपुत्री श्रीमूर्ति मातामें धर्मसे अवतार लेकर लोकों के स्वस्ति (कल्याण) के लिये श्रीबदरिका आश्रम में तप आचरण करते हैं ॥ ६ ॥

धर्मका मूलतो हे राजन्! सर्व देवमय भगवान श्रीहरी ही हैं, और वेदार्थ साक्षात्कार करनेवाले महर्षियों की स्मृतियें हैं कि जिनके आचरण से मन सन्तुष्ट होताहै ॥ ७ ॥

सत्य दया तप शौच (शुद्धि) तितिक्षा (सहन स्वभाव) शम दम अहिंसा ब्रह्मचर्य त्याग स्वाध्याय आर्जव ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सन्तोषो दैवलब्धेनालम्बुद्धिः समदृशां महतां सेवा. ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः, विपर्ययेहेक्षा निष्फलक्रियाणामीक्षणम्. मौनं वृथालापनिवृत्तिः, आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसन्धानम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथाऽर्हतः ।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ! ॥ १० ॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्या ऽवनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।
त्रिंशल्लक्षणवान् राजन् ! सर्वात्मा येन तुष्यति ॥ १२ ॥
संस्कारा यदविच्छिन्नाः स द्विजो ऽजो जगाद यम् ।
इज्याऽध्ययनदानानि विहितानि द्विजन्मनाम् ।
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥
विप्रस्याध्ययनादीनि षडन्यस्याऽप्रतिग्रहः ।
राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥
वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ।
शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥
वार्ता विचित्रा शालीनं यायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मेति देवतेपि च बुद्धिः ॥ १० ॥

अस्य श्रीकृष्णस्य श्रवणादयो नव इज्या ऽर्चनम् ॥ ११ ॥

एवं त्रिंशल्लक्षणवान् ॥ १२ ॥

इदानीं वर्णधर्मान्वक्तुं द्विजानां लक्षणमाह-संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः तर्हि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्तत्राऽऽह-अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद न चोपनयनवन्तमतो नासौ द्विजः तथाच स्मृतिः "विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा । न केनचित्समसृजच्छन्दसा तं प्रजापतिः" इति. श्रुतिश्च "गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वादुपनयनस्य तु सर्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः । पाठान्तरे वैदिकादय इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान्धर्मानाह-इज्येति । जन्मना विशुद्धेन कुलेन कर्मणा चाचारेण अवदातानां शुद्धानां दुष्कुलानां दुराचाराणाञ्च नैतानि विहितानीत्यर्थः । ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषाभावात् ॥ १३ ॥

ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह-विप्रस्येति सार्द्धैः सप्तभिः । विप्रस्य षट् कर्माणि विहितानीत्यनुषङ्गः । तत्र स्वध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" इति. अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुजानाति वक्ष्यति चानन्तरमेव ऋते राजन्यमिति । श्रूयते चाश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालने ऽधिकृतस्य क्षत्रियस्य वृत्त्यन्तरमाह-राज्ञ इति, आदिशब्देन दण्डशुल्कादि ॥ १४ ॥

वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य शूद्रस्य द्विजानां शुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषावृत्तिश्च भवेत् ॥ १५ ॥

विप्रस्य मुख्याऽनुकल्पभेदेन वृत्त्यन्तराण्याह—वार्तेति । वार्ता विचित्रा कृष्यादिरूपा. शालीनं धाष्टर्यं विनैव प्राप्तमयाचितम्. यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनमापणादिपतितकणोपादानं शिलोञ्छनद्वयमेकीकृत्य चतुर्धेत्युक्तं श्रेयसी उत्तमा ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्तोषो दैवाल्लब्धेनालम्बुद्धिः समदर्कसेवा समदर्शां महतां सेवा ग्राम्येहाभ्यः प्रवृत्तिकर्मचेष्टाभ्य उपरमो निवृत्तिः नृणां

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विपर्ययेहेक्षा निष्फलचेष्टानिरूपणं मौनं मितभाषणम् आत्मविमर्शनं देहविलक्षणात्मयाथात्म्यपरिशीलनम् ॥ ९ ॥

भूतेभ्यो यथायोग्यमन्नाद्यमन्नभक्षणं तदादेः संविभागः विभज्य प्रदानं तेषु भूतेष्वात्मदेवताबुद्धिः आत्मेति च देवतेति च बुद्धिः आत्मनः स्वस्य देवता दैवतं परमात्मा तद्बुद्धिः ब्रह्मात्मकत्वबुद्धिरिति वा स्वात्मतुल्यता बुद्धिः देवताबुद्धिश्चेति वा. इष्टदेवताबुद्धिः । हे पाण्डव ! भूतानांमध्ये नृषु मनुष्येषु तु सुतरामतीवात्मदेवताबुद्धिरित्यर्थः ॥ १० ॥

महतां गतेः भक्तानां शरण्यस्य भगवतः श्रवणं गुणश्रवणं कीर्त्तनं गुणप्रतिपादकनामादिकीर्त्तनम्. स्मरणं स्वरूपरूपगुणविभूतिस्मरणम्. सेवा पादपीडनादिरूपा. इज्याऽर्घ्यपाद्यादिनिवेदनरूपा. अवनतिः नमस्कृतिः प्रह्वीभावो वा. सख्यं सर्वात्मना आनुकूल्यम्. आत्मसमर्पणं स्वात्मनस्तदनुबन्धिनश्च तदायत्तसत्तादिमत्त्वानुसन्धानं चेत्ययं त्रिंशल्लक्षणवान् सर्वेषां नृणां साधारणः पर उत्कृष्टो धर्मः उदाहृतः प्रदर्शितः येन धर्मेण सर्वान्तरात्मा भगवान् तुष्यति प्रसन्नो भवति सोऽयं त्रिंशल्लक्षणवानित्यर्थः ॥ ११ ॥ १२ ॥

एवं नृणां साधारणं धर्ममभिधायाथ नरविशेषाणां ब्राह्मणादीनां वर्णानां त्रयाणामावश्यकान् धर्मानिवक्षुस्तावत् त्रैवर्णिकसाधारण्येन द्विजत्वलक्षणमाह—संस्कार इति। यत्र संस्काराः गर्भाधानादयः षोडश अविच्छिन्नाः स द्विजः। ननु, शूद्रस्यापि तदविच्छेदे द्विजत्वं स्यात्तत्राह, अजो ब्रह्मा यमेव संस्कारयुक्तं जगाद श्रुतिस्मृतिमुखेन स द्विजः, शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद. न चोपनयनवन्तमतो नाऽसौ द्विजः। तथा च स्मृतिः——

"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा।
न केन चित्समसृजच्छन्दसा तं प्रजापतिः" ॥ इति.

श्रुतिश्च—गायत्र्या ब्राह्मणमसृजतत्रिष्टुभा राजन्यं जगत्या वैश्यं न केनाचिच्छूद्रम्"इति। अतो विवाहव्यतिरिक्तसंस्कारस्याभावात् उपनयनस्य निषेधात्तस्य द्विजत्वमुच्यते इति व्याचक्षते । वस्तुतस्तु, द्विजत्वादिकमदृष्टविशेषसम्बन्धरूपं न जातिरूपं न ब्राह्मणादेर्ब्राह्मण्यादिषूत्पत्तिमात्ररूपं केवलसंस्कारमात्रवत्त्वं वा अन्यथाऽऽदिकाले ब्रह्मणो मुखबाहूरुपदप्रभवानांपश्चाद्विश्वामित्रप्रभृतीनां च ब्राह्मण्याद्यभावप्रसङ्गात् सन्तानविशेषप्रसूतत्वादिकं च तादृगदृष्टविशेषवत्त्वसूचकं सन्तानविशेषोत्पत्तेस्तन्मूलकसंस्कारादेश्च प्रकृष्टादृष्टकार्यत्वाल्लौकिकप्रकर्षविशेषकारणत्वाच्च। एवं च "कार्येण कारणानुमानम्"इति न्यायेन यत्र कार्यभूताः संस्काराः अविच्छिन्नाः पित्रादिपरम्परयाऽविच्छिन्ना दृष्टाः स द्विज इत्यर्थः। सन्तानविशेषप्रभवत्वतन्मूलकसंस्कारादिमत्त्वानुमितादृष्टसम्बन्धविशेषवान् द्विज इति यावत् संस्काराश्च ब्राह्मणादेर्ब्राह्मण्यादिषु प्रसूतस्यैव कर्त्तव्यत्वेन प्रजापतिना"अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिश्रुतिस्मृत्यादिमुखेन प्रगदिताः तथा च यत्सन्तानविशेषप्रभवं संस्कारमजो जगाद तत्सन्तानप्रभवत्वानुमितादृष्टविशेषसम्बन्धवान् द्विज इति फलितोर्थः। त्रैवर्णिकानामावश्यकान् धर्मानाह—इज्येति। जन्मना कुलेन कर्मणा चावदातानां शुद्धानां द्विजानां त्रैवर्णिकानामिज्यादीनि स्वाश्रमचोदिताः ब्रह्मचर्याद्याश्रमेषु विहिताः क्रियाः चोदितानि विहितानि एषामकरणे प्रत्यवाय इति भावः। तुर्य्याश्रमिणामनग्नित्वेनेज्याया अभावात्तदभिप्रायेण स्वाश्रमचोदिताः क्रिया इत्युक्तम्. साग्नित्वे इज्यादीनि त्रीणि स्वाश्रमचोदिताः क्रियाः चेत्येतानि विहितानि अनग्नित्वेत्वाश्रमचोदिताः क्रियाविहिता इत्यर्थः। अनाश्रमिणां विधुरादीनां तु पूर्वोक्तत्रिंशल्लक्षणवान् धर्म इति भावः ॥ १३ ॥

एवं त्रैवर्णिकानामावश्यकान् धर्मानभिधायाऽथ तत्र विप्रस्य जीविकाधर्मानाह—विप्रस्याध्यापनादीनीति। आदि शब्देन याजनप्रतिग्रहौ विवक्षितौ याजनाध्यापनप्रतिग्रहाः जीविकाधर्माः इज्याऽध्ययनदानादीनि त्वावश्यकाधर्मा इत्यर्थः। एवं संभूय विप्रस्य षट् धर्माः तथा चोक्तं मनुना—

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

अथ क्षत्रियस्य जीविकाधर्मानाह—अन्यस्याऽप्रतिग्रह इति, अत्रान्यस्य क्षत्रियस्याऽप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चानुजानाति, वक्ष्यति चानन्तरमेव "ऋतेराजन्यम्"इति. श्रूयते च अश्वपतिकैकयप्रभृतीनांक्षत्रियाणामुपदेष्टृत्वादिप्रजापालनेऽधिकृतस्यक्षत्रियस्य वृत्त्यन्तरमाह—राज्ञ इतीति व्याचक्षते तच्चिन्त्यम्. "प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्"इति द्वादशाध्यायान्त्याधिकरणे क्षत्रियादेर्याजनाध्यापनयोः प्रतिषिद्धत्वात्। तत्र हि दर्शपौर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभिरार्त्विज्यं कारयितव्यमुत ब्राह्मणैरेवेति संशय्य तत्र त्रयोऽप्यार्त्विज्यमर्हन्ति विद्वत्त्वादूवरणं पुनः पुरुषार्थमतः कर्मवैगुण्यं नास्ति । किञ्च याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपाया इति नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वन्तौ नियमाऽतिक्रमात्कामं स्वयमौत्प्रत्यवेयातां न क्रतोः कदाचिद्गुणहानिः तस्मात् त्रिभिरप्यार्त्विज्यं कारयितव्यमिति पूर्वपक्षं प्राप्य "द्विजोत्तमानामार्त्विज्यं ननु क्षत्रियवैश्ययोः ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापिहि स्मृतः" यथं व्याख्यास्याम इत्युपक्रम्य "ब्राह्मणानामार्त्विज्यम्"इति यज्ञसूत्रकाराः क्रत्वर्थत्वेन स्मरन्तीति स्पष्टमेतत्. तथा च भगवद्रामायणेऽपि—

"क्षत्रियो याजको यस्य चण्डालस्य विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः" ॥ इति.

सुरा देवता ऋषयश्च ऋत्विग्भूता इति देवताहविर्भागनिराकरणात् क्रतुवैगुण्यमेवदर्शितम् "राजयाजकयाज्यस्य विनश्यति यथा हविः" इति ब्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः लिङ्गानि च दर्शितानि "ब्राह्मणानामिदंहविः"इत्येवमादीनि तस्माद्ब्राह्मणानामेवार्त्विज्यं सिद्धमिति राद्धान्तितम्. तस्माच्च राजन्यवैश्ययोर्याजनाध्यापनाभिकारः अश्वपतिकैकयप्रभृतीनां यद्वेदान्तेषूपदेष्टृत्वमवगतम् नतदध्यापनरूपं किन्तु सूतादीनामिव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ब्रह्मस्वरूपतदुपासनाद्युपदेष्टृत्वरूपम्. अध्यापनंनाम स्वोच्चारणानूच्चारणाय शिष्योद्देशेन भागद्वयात्मकवेदराशेः साङ्गस्य स्वरवर्णाद्यनपभ्रंशपूर्वकमुच्चारणम् तस्माद्प्रतिग्रह इत्यस्यायमर्थः। प्रतिग्रहग्रहणं याजनाध्यापनयोरप्युपलक्षणम्. ये ब्राह्मणानां याजनाध्यापनप्रतिग्रहरूपा वार्तारूपा धर्माः न ते राजन्यादेर्जीविका धर्मा इति. का तर्हि राजन्यादेर्वृत्तिरित्याह—राज्ञ इति. तत्र राजन्यो द्विविधः प्रजापालनाधिकृतस्तदनधिकृतश्चेति. तावदाद्यस्य वृत्तिरनेनो च्यते द्वितीयस्य तु ऋतामृताभ्यामित्यनेन वक्ष्यति प्रजागोप्तुः प्रजापालनाधिकृतस्य राज्ञो राजन्यस्याऽविप्राद्विप्रेतरात् करादिभिर्वृत्तिः स्वामिग्राह्यभागः करः तदादिभिरादिशब्देन दण्डशुल्कादिकं विवक्षितं वा शब्देन प्रजापालनानधिकृतस्य तु वृत्त्यन्तरमेवेति सूचयति ॥ १४ ॥

अथ वैश्यस्याह—वैश्य इति। नित्यं ब्रह्मकुलं विप्रकुलमनुगच्छत्यनुवर्त्तते इति अनुगः तादृशस्सन् वार्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य स भवेत् । अथ शूद्रस्याऽवश्यकं धर्मं वृत्तिरूपंचाह—शूद्रस्येति। तत्र द्विजशुश्रूषा शूद्रस्यावश्यको धर्मः स्वामिनो वृत्तिश्च भवेत्स्वामिदत्तेनान्नादिना जीवनं भवेदित्यर्थः ॥ १५ ॥

एवं चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानभिधायऽथतेषामेवोक्तवृत्त्यलाभे वृत्त्यन्तराणि विवक्षुस्तावद्ब्राह्मणस्य मुख्यानुकल्पभेदेन वृत्त्यन्तराण्याह—वार्त्तेति। विचित्रावार्त्ता कृषिगोरक्षादिरूपा शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितमित्यर्थः।"शालीन कौपीने धृष्टा कार्ययोः"इति निपातितः शालीनशब्दः। इदं द्वितीयं यायावर्यं यायावरः प्रवासी तस्य कर्म यायावर्यं प्रवासादिना याञ्चापूर्वकमर्जनं तृतीयं शिलोञ्छनम् "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्" तदुभयमेकीकृत्य चतुर्थ्यं विप्रस्य वृत्तिरित्युक्तम् आसां चतसृणां वृत्तीनां पूर्वपूर्वापेक्षयोत्तरोत्तरा श्रेयसी ज्यायसी उत्तमेति यावत् । यद्यपि पूर्वं विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रह इति विप्रस्य प्रतिग्रहवृत्तेः कथितत्वात् अत्र शालीनं यायावर्गमिति च न कथनीयम्; तथापि स एव प्रतिग्रहो याञ्चापूर्वकस्तदपूर्वकश्चेति द्विविध इति वक्तुं शालीनं यायावर्यंचेत्युक्तम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शान्तेहोपरमः विषयभोगेच्छानिवृत्तिः विषयविपर्ययेहेच्छा प्राणिनां स्वत एव निषिद्धकर्मचेष्टा ईहा तस्याः पर्यालोचनं मोक्षविपरीतप्रवृत्तिदर्शनं वा मौनं मन्त्रार्थचिन्तनं प्रलापवर्जनं वा आत्मविमर्शनमात्मविचारः ॥ ९ ॥

तेषु नृषु आत्मदेवताबुद्धिः परमात्माऽस्थित इति ज्ञानम् सुतरामित्यनेन नृषु विशेषतः कर्त्तव्यमिति सूचयति—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः।
दमः क्षमार्जवं दानं सर्वेषां धर्मसाधनम्" ॥

इति स्मृतत्वादेषां धर्माङ्गत्वं नतु धर्मत्वमिति ज्ञातव्यम् ॥ १० ॥

ननु, तर्हि कोऽयं धर्मो नामेत्याशङ्क्य सर्वसाधारणं धर्ममाह—भवणमिति। महतां या गतिः स्थितिस्तस्याः सेवा सङ्गतेः सेवेति वा दास्यात्मसमर्पणयोरेकार्थत्वात् कथं पृथग्ग्रहणं कृतमित्याशङ्का—

अनाद्यनन्तकालेषु मुक्तौ संसार एव च।
मयिस्थश्चोदयत्येको विष्णुर्मां सर्वदैव तु ॥
इति सम्प्रीतिकं ज्ञानं विद्यादात्मसमर्पणम्।
वह्निश्चेश्वरदासत्वं दास्यमित्युच्यते बुधैः ॥

इत्यनेन परिहरणीया, अनाद्यनन्तकालं मयि स्थित्वा विष्णुः सर्वत्र मां प्रेरयतीति प्रीतिपूर्वकज्ञानमात्मसमर्पणं प्रतिमादिसन्निहितभगवद्दासत्वज्ञानं दास्यम् ॥ ११ ॥

तारतम्यज्ञानार्थं ब्रह्मादिविषयश्रवणादिरपि धर्मः स्यादतो विशिष्योच्यत इत्यत उक्तं पर इति, "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः" इति वचनात्समुदाहृत इति समीचीनत्वं कुतोऽत्राह—त्रिशल्लक्षणेति। अनन्तलक्षणस्य हरेस्त्रिंशल्लक्षणायुक्तत्वं "तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे" इति वचनात् भक्तप्रकाश्याकारविषयविवक्षया "सप्तपादश्चतुर्हस्तः" इत्यादिशास्त्रेषु पुरुषलक्षणस्य निरूपितत्वात् इदं च भक्तिप्रचयाय प्रोक्तमिति ज्ञायते अनेन भगवत्तोषकरो धर्मो नान्य इत्युक्तं भवति ॥ १२ ॥

एवं धर्मस्वरूपं निरूप्य तदधिकारिणं निरूपयति—संस्कारा इति। निषेकादिश्मशानान्ता ये संस्कारास्ते यस्याविच्छिन्ना अखण्डिताः स द्विजः स एवाधिकार्यत्रेति शेषः। अविच्छेद्यत्वेन कर्तव्यत्वे कोहेतुरिति तत्राह—वैदिकेति । वेदप्रतिपाद्यत्वेन प्रामाणिकत्वेन कर्तव्या इत्यर्थः। नन्विदं द्विजमात्रसामान्यं किमेत्याह—आद्य इति स्त्रीणां ब्राह्मणजातित्वेपि मन्त्रेण क्रिया एता इति यदतः शिष्टाचारत्वेन संगृहीतत्वात् इदं वैदिकत्वेपि कर्तव्यत्वं नतु स्त्रीणां वैदिकसंस्काराभावे यागानधिकारित्वमित्यस्येदमेवोत्तरं वैदिकाद्य इति वैदिका अवैदिकाश्च सन्तीत्यर्थः तदुक्तम्—

"निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः।
गर्भाधानमृतौ पुंसवनं च स्यन्दनात्पुरा ॥
षष्ठेऽष्टमे वा सीमन्तो मासतो जातकर्म च।
अह्न्येकादशे नाम चतुर्थे मासि निष्क्रमः ॥
षष्ठेऽन्नप्राशनं मासे चूडा कार्या यथाकुलम्।
एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।

इत्यादि—

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति।
या न ऊरू उशती विश्रयाते यस्यामुशन्तःप्रहराम शेपं ॥
उपोपमे परामृश मा मे दभ्राणि मन्यथाः।
सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥

इत्यादि संस्कारमन्त्राः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चत्वारः वर्णास्तेषां आद्यास्त्रयो द्विजाः तेषां साधारणं धर्ममाह इज्येति "ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः" इति स्मृतेः"इज्याध्ययनदानानि विप्रस्य क्षत्रियस्य च" इत्यादेः एतान्यपि द्विजमात्रस्य न किन्तु विशिष्टानामित्याशयेनाह—जन्मेति। जन्मना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्मणा वाऽवदातानां "कारीर्या यजेत वृष्टिकामः, मलवद्वाससा न सम्वदेत्" इत्यादिवेदोदिताः क्रियाश्च विहिता इत्याह, क्रिया इति ॥ १३ ॥

विशेषधर्ममाह—विप्रस्येति । अध्यापनयाजनप्रतिग्रहाः ततो ब्राह्मणादन्यस्य क्षत्रियादेरप्रतिग्रहः "प्रतिग्रहाधिको विप्रो याजनाध्यापने तथा" इति वचनात् प्रतिग्रहादिनापि प्रवृत्तिमभिप्रेत्य राजादिवृत्तिमाह—राज्ञ इति । आदिशब्देन न्यायतो दण्डाद्यागतं धनं गृह्यते प्रजागोप्तुरित्यनेन प्रजागुप्त्यैव ततो धनमाहर्तव्यम् अन्यथा दुष्कृतमेवादत्त इति सूचयति, वाशब्देन देवा गृह्यन्ते देवविप्रैर्विनेत्यर्थः दण्डार्हविप्रमन्तरेण चेति॥१४॥

वार्ता कृषिगोरक्षवाणिज्यलक्षणा स्वामिनः सकाशाज्जीवनं चेति शेषः । भृत्यानां स्वामिनः शुश्रूषा च वृत्तिरिति वा ॥ १५॥

विप्रवृत्तिं कण्ठोक्त्याह—वार्तेति । अत्र वार्तादिकमापदीति ग्राह्यं विप्राऽनुज्ञया क्षत्रियवैश्ययोस्तत्त्वविज्ञापनं धर्म इत्युच्यते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संस्कारा इत्यर्द्धकम्. ननु, शूद्रस्यापि तेषु संस्कारेषु कृतेषु द्विजत्वं स्यात्तत्राह—अजो यं सृष्ट्वा द्विजं जगाद द्विजत्वेन निर्दिदेश तज्जातिक एव संस्कारेषु लब्धेषु द्विजः स्यादित्यर्थः ॥ १३ ॥

अविप्राद्वेति वाशब्दात् क्वचिद्विप्रादपीत्यर्थः । वपनं द्रविणादानमित्यादेः ॥ १४ ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

समदृशां महतां सेवा विपर्ययेहा निष्फलक्रियास्तासां पर्यालोचनं मौनं वृथा वाक्यनिवृत्तिः आत्मविमर्शनमात्मनो देहभिन्नत्वभावना ॥ ९ ॥

अन्नाद्यादेः अन्नमोदनं आद्यं मोदकादि तत्तदादेर्वस्त्रस्रक्चन्दनादेर्यथोचितं विभज्यैव ग्रहणम् आत्मवत् देवतावच्च बुद्धिर्भावना ॥ १०—१२ ॥

इदानीं वर्णधर्मान् वक्तुं द्विजानां लक्षणमाह—संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन् स वा स द्विजः विच्छिन्नसंस्कारो द्विजबन्धुरित्यर्थः । अजो ब्रह्मा यं जगादेति ब्रह्मसृष्ट्यारम्भत एव प्रवृत्तायां द्विजजातौ विशुद्धमातापितृकं जन्मैव मुख्यं लक्षणमित्यर्थः ॥ १३ ॥

ब्राह्मणादीनां चतुर्णां वृत्तिरूपान् धर्मानाह—विप्रस्येति सार्द्धैः सप्तभिः । षट् विहितानीत्यनुषङ्गः । तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका । तथा च मनुः—

"षण्णान्तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति

अन्यस्य क्षत्रियस्य अप्रतिग्रह इति याजनाध्यापने आपद्वृत्तौ प्रतिग्रहस्तस्यापद्यपि निषिद्धः प्रजागोप्तुरिति पाल्यमानाभिः प्रजाभिर्दत्तं प्रणत्युपायनमेव वृत्तिरित्यर्थः । विप्रभिन्नात् लोकात् करदण्डशुल्कादिभिर्वा ॥ १४ ॥

वार्ता कृषिवाणिज्यादयो वृत्तिर्यस्य सः द्विजशुश्रूषा धर्मः स्वामिनो द्विजस्य शुश्रूषा सेवा वृत्तिश्च ॥ १५ ॥

विप्रस्य वृत्त्यन्तराण्याह—वार्ता विचित्रा विविधा तत्र शालीनमयाचितं यायावरं प्रत्यहं धान्यमात्रयाञ्चा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनं आपणादिपतितकणोपादानम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ः

सन्तोषो न्यायागतेनान्नादिना ऽलंबुद्धिः ग्राम्येहोपरमः अधार्मिकजनचेष्टात्यागः विपर्ययेहेच्छा विपरीतफलासु चेष्टासु हेयदृष्टिः मौनं निष्फलभाषणत्यागः आत्मविमर्शनं देहेन्द्रियमनोबुद्धिभ्यः पृथक्भूतस्यात्मनो ऽनुसन्धानम् ॥ ९ ॥

तेषु भूतेषु आत्मवत् मानार्हत्वात् देवतावद्भगवद्वत् भगवदंशत्वात् बुद्धिर्भावना ॥ १० ॥

अस्य श्रीकृष्णस्य सेवा परिचर्या इज्याऽर्चनम् ॥ ११ ॥

नृणामित्युपलक्षणं तत्कलत्रस्यापि त्रिंशल्लक्षणवान् सत्यत्वादित्रिंशद्विभागवान् येन सर्वात्मा भगवान् तुष्टो भवति ॥१२॥

इदानीं वर्णधर्मान् वक्तुं द्विजलक्षणमाह—यमजो ब्रह्मा गायत्र्यादिना सृष्ट्वा जगाद द्विजकुलत्वेनोक्तवान् यत्रैव गर्भाधानादयः संस्काराः अविच्छिन्नाः स द्विजः ब्रह्मप्रवर्तितकुलजः संस्कारवान् द्विज इत्यर्थः । "गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति श्रुतिरत्रानुसन्धेया शूद्रकुलं मंत्रपूर्वकं ब्राह्मणानप्रवर्तितमत एव शूद्रस्य द्विजातिसंस्काराभावान्न द्विजत्वं "विवाहमात्रसंस्कारं शूद्रोऽपिलभतां सदा" "न केनचित् समसृजच्छन्दसा तं प्रजापतिः" इति श्रुतिः द्विजावश्यकान् धर्मानाह—इज्येति । जन्मना ब्रह्मप्रवर्तितकुलोत्पत्त्या कर्मणा संस्कारेण चावदातनां शुद्धानाम् आश्रमचोदिताः ब्रह्मचर्याद्याश्रमविहिताः ॥ १३ ॥

चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानाह—विप्रस्येति, सार्द्धैः सप्तभिः । अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाः इत्यध्ययनादीनि षट् कर्माणि विप्रस्य, तत्राध्यापनयाजनप्रतिग्रहाश्च जीविकाः

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविकाः ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

मनुवचनात् अन्यस्य क्षत्रियस्य अप्रतिग्रहः प्रतिग्रहाभावः अर्थात्प्रतिग्रहातिरिक्तानि अध्ययनाध्यापनयजनयाजनदानानीत्यर्थः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ।
ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।
सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथञ्चन ॥ १८ ॥
ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ।
मृतं तु नित्ययाञ्चा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥
सत्याऽनृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ।
वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृषिवाणिज्यादिरूपा वार्त्ता वृत्तिर्यस्य सः शूद्रस्य द्विज-शुश्रूषा आवश्यको धर्म इत्यर्थः । स्वामिन अन्नादिदानेन नियत-कैंकर्यकारवितुस्तु द्विजस्य शुश्रूषा वृत्तिर्जीविका भवेदित्यर्थः ॥१५॥

विप्रस्य जीविकान्तरमाह—वार्तेति । विचित्रा वार्त्ता कृष्यादि-रूपा शालीनमयाचितग्रहणम् यायावरं भिक्षाटनम् शिलोञ्छनं चेति चतुर्धा ॥ १६ ॥

भाषा टीका ।

सन्तोष, समदर्शियों की सेवा, धीरे धीरे ग्राम्य चेष्टाओं से विराम, मनुष्यों की लौकिक चेष्टाओं को निष्फल देखना, मौन और आत्मा का विचार ॥ ९ ॥

हे पाण्डव ! और यथा योग्य प्राणी मात्र को अन्नादिका अच्छी तरह विभाग करना उन अतिथि प्रभृति प्राणियों में और मनुष्यों में निरन्तर दैवत बुद्धि करना ॥ १० ॥

आपने दैवत श्रीहरिके गुणोंका श्रवणऔर कीर्तन तथा महज्जनों के प्राप्य श्रीगोविन्दकी सेवा पूजा साष्टांगप्रणाम, दास भाव सख्य भाव, और आत्मसमर्पण, अर्थात् पञ्चरात्र शास्त्रोक्त भगवत्-शरणागतिः ॥ ११ ॥

हे राजन् ! यह सर्व मनुष्यों का साधारण तीस (३०) लक्षण वाला धर्म कहा गया है सर्वात्मा श्रीमन्नारायण इसी के आचारण से सन्तुष्ट होते है ॥ १२ ॥

और अविच्छिन्न अर्थात् परम्परासे संस्कार गर्भाधानादि निरन्तर जिनके यहां चले आते हैं और ये संस्कार ब्रह्माने जिस व्यक्तिके कहे हैं वेही द्विजहै । और द्विजन्माओं को अर्थात् ब्राह्मण क्षत्रिय और वैश्यको जोकि जन्मकर्म से शुद्ध हैं उनको इज्या (यज्ञ करना) अध्ययन (वेदपढना) दान (दान देना) यह तीन कर्म वेद विदित हैं, और आश्रम के उचित जो किया है वो भी विहित हैं ॥ १३ ॥

और ब्राह्मण को अध्ययनादिक छै (६) कर्म विहित हैं, वो छै ये हैं कि (यजन याजन अध्ययन अध्यापन, दान प्रतिग्रह) ब्राह्मण से अन्य को प्रतिग्रह (दानलेना) निषिद्ध है प्रजा-पालक राजा की जीविका यह है कि विप्र को छोडकर और लोगों से षष्ठांश कर लेवे ॥ १४ ॥

वैश्य की जीविका वार्त्ता (खेती, गोरक्षा, व्यापार, ब्याज) है । और सदा ब्राह्मण कुलके अनुगामी रहना यह वैश्य का धर्म है शूद्र को तीन वर्णों की शुश्रूषा करके जीविका करना यही शूद्र का धर्म है ॥ १५ ॥

खेती, १ ढिठाईके विना, विना मागें मिलजावे; २ प्रतिदिन अन्न की भिक्षा, ३ (शिल) खेत में शिला बीनले, ऊंछ बाजार में दाना बीनले, ४ बस यह चार प्रकार की वृत्ति ब्राह्मण की हैं, इसमें उत्तरोत्तर श्रेष्ठ हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्तिष्वेव व्यवस्थां दर्शयन्नापद्वृत्तीराह—जघन्यो नीचः उत्त-मामध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥

चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह—ऋतामृता-भ्यामिति ॥ १८ ॥

श्लोकं व्याचष्टे ऋतमिति ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्ववेदमय इति ॥ २० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
ज्ञानं दया ऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥
शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।
ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥ २२ ॥
देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ।
आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २३ ॥
शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ।
अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वर्णानामभिव्यञ्जकरूपान्धर्मानाह–शम इति, चतुर्भिः । अच्युतात्मत्वं श्रीविष्णुपरत्वम् ॥ २१ ॥

शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागो दानं आत्मनो मनसो जयः ॥ २२ ॥ २३ ॥

अमन्त्रयज्ञः नमस्कारेणैव पञ्चयज्ञानुष्ठानं तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापहेत्"इति ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एव ।विप्रस्य याजनाद्यलाभे वार्तादिरूपा वृत्तिस्तत्राप्युत्तरोत्तरोत्तमत्वं चोक्तम् अथोत्तरोत्तरवर्णस्य स्वस्ववृत्त्यलाभरूपापदिपूर्वपूर्ववर्णस्य चोत्तरोत्तरस्य वा वृत्त्याश्रयणं वक्तुं तावदनापदितदाश्रयणं निषेधति—जघन्य इति । जघन्यवर्णो नरः अनापदि स्वस्ववृत्त्यलाभरूपापदभावे उत्तमां पूर्वपूर्ववर्णसम्बन्धिनीं वृत्तिं न भजेन्नाश्रयेत् आपत्सु तु राजन्यं विना राजन्यव्यतिरिक्तानां सर्वेषामपि यथालाभं सर्वा अपि वृत्तय आश्रयणीया भवन्ति सर्वेषां सर्वेश्च इत्येतावत्युक्ते राजन्यस्य प्रजापालनप्रयुक्तकरादानरूपस्ववृत्त्यलाभरूपापदि याजनाध्यापनप्रतिग्रहादिरूपपूर्ववर्णवृत्त्याश्रयणं वार्ताशुश्रूषयोरुत्तरवर्णवृत्त्योश्चाश्रयणं प्रसक्तमृतेराजन्यमिति निषिध्यते ॥ १७ ॥

अथ विप्रराजन्ययोः स्वस्ववृत्त्यलाभरूपापद्युपादेयां वृत्तिं निष्कृष्य दर्शयन्नुत्तरोत्तरवर्णसेवारूपां वृत्तिं प्रतिषेधति–ऋतामृताभ्यामिति । ऋताद्यन्यतमेन जीवेत श्ववृत्त्या तु कथञ्चन न जीवेत सर्वथा श्ववृत्तिं नाश्रयेदित्यर्थः ॥ १८ ॥

ऋतादिपदार्थानाह—सार्द्धेन ऋतमिति । स्पष्टोर्थः ॥ १९ ॥

न कथञ्चनेति व्याचष्टे—वर्जयेदिति । विप्रो राजन्यश्च तां नीचसेवां स्वोत्तरवर्णसेवां जुगुप्सितां निन्दितां परिवर्जयेत् जुगुप्सितत्वमेव वदन्विप्रराजन्यौ विशिनष्टि—सर्ववेदमय इति । प्रभुर्वै मयद् पूज्ययोः पूजकसेवानिन्दितेति भावः ॥ २० ॥

अथवर्णानामभिव्यञ्जकान् धर्मानाह–शम इति चतुर्भिः । शमादिपदार्थानामर्थास्त्रिशल्लक्षणधर्मव्याख्यायामुक्ताः । तत्र क्षान्तिरक्रोधः अच्युतात्मत्वमच्युतप्रवणचित्तत्वम् । शमादिकं ब्रह्मलक्षणं ब्राह्मणकुलाभिव्यञ्जकमित्यर्थः ॥ २१ ॥

शौर्यमिति । शौर्यादिक्षत्रलक्षणं क्षत्रियत्वाभिव्यञ्जकं तत्र शौर्यं स्वगृह इव युद्धे प्रवेशसामर्थ्यं वीर्यं परैरनभिभाव्यत्वं धृतिः धैर्य्यमापद्यदुःखित्वं तेजः पराभिभवसामर्थ्यं त्यागः लोभराहित्यदानशीलता आत्मजयो देहजयः देहधर्मैरनभिभाव्यत्वं क्षमा सहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादोऽनुग्रहः रक्षा प्रजापालनम् ॥ २२ ॥

एवं देवादिभक्त्यादिकं वैश्यलक्षणं तत्र देवगुर्वाच्युतगोभक्तिः देवाश्च गुरवश्चार्या ज्ञानवृद्धागावश्चैषां भक्तिः त्रिवर्गेण धर्मादिपुरुषार्थत्रयेण परितोषणं परितुष्टिः अस्ति परलोक इति मतिर्यस्य सः आस्तिकस्तस्य भाव आस्तिक्यं नित्यमुद्यमः अर्थार्जने प्रयत्नः तत्र नैपुण्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकं लक्षणमित्यनुषङ्गः । सन्नतिः पूर्ववर्णविषये नम्रता. शौचं स्नानादिजं स्वस्वामिन्यमायया निष्कपटभावेन सेवा. अमन्त्रयज्ञः नमस्कारेणैवच यज्ञानुष्ठानम्. तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्च यज्ञान्नहापयेत्" इति. अस्तेयमचौर्यं सत्यमनृतावदनं गवां विप्राणाञ्च रक्षणम् ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदभावे शूद्रस्य कथमिति तत्राह—जघन्य इति । जघन्यो नरः शूद्रोऽनापदि तत्सद्भावे उत्तमां वृत्तिं तत्त्वज्ञानलक्षणां न भजेन्न कुर्यादित्यन्वयः । आपदि तदभावे तदनुज्ञया कुर्यादित्यतो नापदीति विशेषणं पालनादि वृत्तिं वा । ननु, वर्णहीनस्य कथमित्यस्येदमेवोत्तरं जघन्यो वर्णहीनो नापद्यप्युत्तमां वृत्तिं न भजेत "वर्णेष्वज्ञेषु वर्णस्तु न ज्ञानी स्यात् कथञ्चन" इति श्रुतिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजानं विना सर्वेषां विप्रादीनामापद्युक्तसर्ववृत्तिभिर्जीवने दोषो नास्तीत्याह—ऋते राजन्यमिति ॥ १७ ॥

ऋतादीनामप्रतीतार्थत्वाद्व्याचष्टे—ऋतमित्यादिना । कर्षणम् कृषिः ॥ १८ ॥ १९ ॥

श्ववृत्तिवर्जनेहेतुमाह-सर्वेति । "सर्वा देवता वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः नाविष्णुः पृथिवीपतिरित्यादेश्च ॥ २० ॥

विप्रादीनां विविच्य ज्ञाने प्रथमं लक्षणमाह—शम इत्यादिना । अच्युतात्मत्वमच्युतमनस्कत्वम् ॥ २१ ॥

त्यागो दातव्ये मुक्तहस्तता आत्मजयो मनोजयः ॥ २२ ॥

त्रिवर्गैर्धर्मार्थकामैः ईश्वरपरितोषणं त्रयो वर्गा येषां ते त्रिवर्गाः तेषां द्रव्याविना परितोषणम् ॥ २३ ॥

शूद्रस्यांततः सकृत्स्पृष्टाभिरद्भिराचमनलक्षणं शौचं "हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः" इति वचनात् केशश्मश्रुनखाद्यधारणं मौढ्येन ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आपद्वृत्तीराह—जघन्यो नीचः उत्तमां अध्ययनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥

विप्रवृत्तीर्वैश्यवृत्तीश्च काश्चित् सर्वेषामप्यापद्यनुजानीते ऋतामृताभ्यामिति ॥ १८ ॥

श्लोकमिमं व्याचष्टे ऋतमिति सार्द्धेन ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्वेति । तेन वैश्यशूद्रयोः नीचसेवाप्यापदि न तावान् दोष इति भावः ॥ २० ॥

वर्णानामभिव्यंजकानि लक्षणान्याह-शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जघन्यः कनिष्ठवर्णः उत्तमां श्रेष्ठवर्णोचितामनापदि न भजेत् ऋते राजन्यं स तु अनापद्यपि उत्तमामपि याजनरूपामध्यापनरूपां च भजत्वित्यर्थः आपत्सु तु यथोक्तवृत्त्यलाभे सर्वेषां सर्वशो वृत्तयः ॥ १७ ॥

पूर्वोक्ताश्चतुर्विधा विप्रवृत्तयो ऽन्यैरपि ग्राह्याः स्वापेक्षया नीचसेवा तु न कर्त्तव्या विप्रराजन्याभ्यां तु विशेषतो नीचसेवा वर्ज्येत्याह-ऋतामृताभ्यामित्यादि सार्द्धैस्त्रिभिः ॥१८—२०॥

वर्णानां लक्षणान्याह शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१ ॥

शौर्यं न्यायप्राप्तयुद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागः उदारत्वम् आत्मजयो जितमनस्कत्वम् प्रसादः प्रसन्नता ॥ २२ ॥

आस्तिक्यं श्रद्धा उद्यमो ऽनालस्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकम् लक्षणमिति शेषः अमायया निष्कापट्येन अमन्त्रयज्ञः नमस्कारेण पञ्चयज्ञानुष्ठानम् तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापयेत्" इति ॥ २४ ॥

भाषा टीका ।

नीचवर्ण ऊंचे वर्ण की वृत्तिको अनापदकाल में न करे एक क्षत्रिय को छोडकर अध्ययनादिमात्र ब्राह्मण की वृत्ति करले, आपद के विनादूसरेकी वृत्ति न करे यह तात्पर्य है सो आपदमेंभी ग्रह को छोडकर सब कोई सब की वृत्ति करे ॥ १७ ॥

ऋत अमृत मृत प्रमृत इन चारो से अपना जीवन करे अथवा सत्याऽनृत से जीवै परञ्च श्ववृत्ति से कदापि जीवन् न करे ॥ १८ ॥

ऋत, यह उंछ शिल का नाम है । अमृत, वह विना मागे जो मिले उसकानाम है । मृत, यह नित्य भीख मागे से जो प्रमृत, यह खेती से प्राप्त किये का नाम है ॥ १९ ॥

सत्या नृत, यह वाणिज्य का नाम है । श्ववृत्ति, यह नीच सेवा का नाम है। ब्राह्मण और क्षत्रिय इस निन्दित वृत्ति को सर्वदा वर्जन करे क्योंकि ? वि सर्वदेव मय है, और राजा सर्व देव मय है ॥ २० ॥

शम, दम, तप, शौच, संन्तोष, क्षान्ति, (सीधापन) ज्ञान, दया, और गोविन्द में चित्त लगाना, सत्य. बोलना, ये ब्राह्मण के लक्षण हैं ॥ २१ ॥

शूरता, धीरता, धृति, तेज, त्याग, मनका जीतना, क्षमा, ब्राह्मणोंकी भक्ति, प्रसन्नता, और सर्व वर्ण कीरक्षा यह क्षत्रिय का लक्षण हैं ॥ २२ ॥

देव गुरु गोविन्द में भक्ति, अर्थ धर्म काम की पुष्टि आस्तिक होना, नित्य उद्यम करना, और निपुणता यह वैश्य का लक्षण हैं, ॥ २३ ॥

नम्ररहना, शुद्ध रहना, निष्कपट स्वामिकी सेवा करना, विना मंत्र के यज्ञ करना चोरी न करना सत्य बोलना, गोविप्र की रक्षा करना ये शूद्रके लक्षण हैं ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्त्रीणां च पतिदेवानां तच्छुश्रूषा ऽनुकूलता ।
तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २५ ॥
सम्मार्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ।
स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥ २६ ॥
कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ।
वाक्यैः सत्यैः प्रियैः प्रेम्णा कालेकाले भजेत् पतिम् ॥ २७ ॥
सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।
अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥ २८ ॥
या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥
वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत् ।
अचौराणामपापानामन्त्यजान्तेऽवसायिनाम् ॥ ३० ॥
प्रायः स्वभावविहितो नृणां धर्मो युगेयुगे ।
वेददृग्भिः स्मृतो राजन् ! प्रेत्य चेह च शर्मकृत् ॥ ३१ ॥
वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत् ।
हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्त्रीधर्मानाह—स्त्रीणामिति, पञ्चभिः । पतिरेव देवो यासाम् तस्य पत्युरेव शुश्रूषा पादसंवाहनादिभिः तदनुकूलता च हिताचरणं तस्य यद्व्रतं नियमस्तस्य धारणमाचरणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ॥ २५ ॥

किञ्च सम्मार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः परिमृष्टा उद्वर्तनादिना निर्मलीकृताः परिच्छदा गृहोपकरणानि यया ॥ २६ ॥ २७ ॥

किञ्च सन्तुष्टा यथालाभेन तावन्मात्रभोगे ऽप्यलोलुपा दक्षा अनलसा प्रिया सत्या च वाग्यस्याः सर्वत्राप्यप्रमत्ता ऽवहिता अपतितं महापातकशून्यम्, यथाह, याज्ञवल्क्यः"आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

तत्परा सती भजेत् श्रीर्हरिमिव हर्यात्मना पत्या सह ॥ २९ ॥

प्रतिलोमजानुलोमजानां वृत्तिमाह—वृत्तिरिति । तत्तत्कुलकृता कुलपरम्पराप्राप्ता परम्पराप्राप्तमपि चौर्यं हिंसादिकं च प्रतिषेधति, अचौराणामपापानां चेति तत्तत्प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह—अन्त्यजेति"रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चण्डालपुल्कसमातङ्गादयः तेषां परम्पराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥

श्रेष्ठादपि परधर्मात् नीचोऽपि स्वधर्म एव श्रेयानित्याह-प्राय इति, स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्मकृत्सुखहेतुः स्मृतः कैः वेदा एव दृक् चक्षुर्येषां तैः भगवता चोक्तम्"श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति ॥ ३१ ॥

ननु, स्वाभाविकस्य कर्मणो बन्धहेतुत्वात्कथं सुखहेतुत्वं तत्राऽऽह—वृत्त्येति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ स्त्रीणां धर्मानाह—स्त्रीणामिति । पतिरेव देवो दैवतं यासां तासां स्त्रीणाम्. तस्य पत्युः शुश्रूषा परिचर्या तदनुकूलता च तस्य पत्युर्बन्धुषु पितृभ्रात्रादिषु अनुवृत्तिः तस्य तु यद्व्रतं पत्यर्थं यो नियमस्तस्य धारणमेतच्चतुष्टयं पतिदेवतानां पतिव्रतानां स्त्रीणां लक्षणं धर्मश्चेत्यर्थः ॥ २५ ॥

किञ्च संमार्जनोपलेपाभ्यां गृहस्येति शेषः । गृहसंमार्जनादिभिः पतिं भजेदित्युत्तरेणान्वयः । सेकः जलविक्षेपः मण्डनं पिष्टैरलङ्कारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वर्त्तनं नित्यं स्वगृह एवावस्थानम् एतैः कथंभूता स्वयं मण्डिता अलंकृता परिसृष्टाः विशोधिताः परिच्छदाः पात्रवस्त्राभूषणादयो यया तादृशी ॥ २६ ॥

उच्चावचैर्नानाविधैः पत्युरपेक्षितैः कामैः प्रश्रयेण विनयेन दमेन उपशान्त्या सत्यैः प्रियैश्च वाक्यैः प्रेम्णा च कालेकाले उचितसमये उचितकामेषु सन्तुष्टा यथालाभेन तावन्मात्रभोगेऽप्यलोलुपा दक्षाऽनलसा धर्मज्ञा भर्तृशुश्रूषणमेव परं धर्मं जानातीति प्रिया तथोक्ता सत्या च वाग्यस्याः सा वाक्यैः सत्यैरिति पतिविषये सत्यवाक्त्वमुक्तम् प्रियसत्यवागित्यनेन तदितरविषये ऽपीत्यतो न पौनरुक्त्यम् ॥ २७ ॥

सर्वत्राप्यप्रमत्ता अवहिता शुचिः परिशुद्धा स्निग्धा अनुरक्ता पतिं भजेदपतितं महापातकरहितं पतिं भजेत् तु शब्देन पतितं न भजेदिति सूचितम्. यदाह, याज्ञवल्क्यः "आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

एवंविधस्य भर्तृभजनस्य फलमाह-येति । श्रीर्लक्ष्मीर्हरिमिव या स्त्री हरिभावेन तत्परा स पतिरेव परो दैवतं यस्याः सा पतिं भजेत् सा हर्य्यात्मना हरिरूपेण हरिसमानरूपेण पत्यासह श्रीर्हरिणा सहैव हरेर्लोके मोदते शनैः पत्या सह मुक्ता भवेदित्यर्थः ॥ २९ ॥

अथ सङ्करजातीनां वृत्तिमाह-वृत्तिरिति । सङ्करजातयः प्रतिलोमजाः अनुलोमजाश्चेति द्विविधाः तत्रोत्तरवर्णात्पूर्ववर्णायां स्त्रियां जाताः प्रतिलोमजाः पूर्ववर्णादुत्तरवर्णायां जातास्त्वनुलोमजाः तेषां तत्कुलकृता कुलपरम्पराप्राप्तैव वृत्तिर्भवेदिति. कुलक्रमागतमपि चौर्य्यहिंसादिकं निषेधन् तान्विशिनष्टि-अचौराणामपापानाश्चेति । तत्र प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह-अन्त्यजाश्चान्तेवसायिनश्च तेषां सङ्करजातीनामित्यन्वयः तत्र—

"रजकश्चर्मकारश्च नटोबुरुडएव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजातयः" ॥

अन्तेऽवसायिनस्तु चण्डालपुल्कसमातङ्गादयः तेषां परम्पराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्" इति भगवदुक्तमर्थमाह-प्रायइति, व्रज्याम् । हे राजन् ! नृणां ब्रह्मक्षत्रादिरूपेणावस्थितानां सर्वेषामपि प्रायशः स्वभावविहितः सात्त्विकादिस्वभावानुसारेण विहितः । यद्वा भावः प्रकारः वर्णाश्रमादिरूपः स्वस्ववर्णाश्रमोद्देशेन विहित इत्यर्थः । इज्याऽध्ययनादिरूपः स एव धर्म इह लोके प्रेत्याऽमुत्र च लोके शर्मकृत् सुखकृद्वेदविद्भिर्मन्वादिभिः स्मृतः कथितः ॥ ३१ ॥

एवं वृत्तिरपि प्रातिस्विकीज्यायसीति वदन्नेवंवर्त्तमानस्य फलमाह-वृत्त्येति. स्वभावकृतया वर्णाश्रमादिस्वभावकृतया वृत्त्या अध्यापनादिरूपया जीविकया स्वकर्मणीज्यादिरूपे वर्त्तमानः स्वस्वकर्मानुतिष्ठन् स्वभावजं सात्त्विकादिस्वभावप्रयुक्तं प्राकृतसत्त्वादिगुणत्रयवत्ताप्रयुक्तं बन्धकं पुण्यपापात्मकं कर्म हित्वा "धर्मेण पापमपनुदत्यविद्यया मृत्युं तीर्त्वा" इत्यादि श्रुत्यर्थोऽत्राभिसंहितः शनैर्निर्गुणतां सत्त्वादिगुणराहित्यं प्रकृतिसम्बन्धराहित्यं मुक्तिमितियावत् इयात् प्राप्नुयादिति शनैरित्यस्य भगवदुपासननिर्वृत्तिद्वारा प्राप्नुयादित्याशयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्त्रीणां सामान्यलक्षणमाह-स्त्रीणामिति । अनुकूलतोक्तकारित्वं "यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्रवर्द्धते । स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियः" इतिवचनात् तद्बन्धुषु भर्तृबन्धुषु भागिनेयादिषु तद्व्रतधारणं पातिव्रत्यं तस्य यद्व्रतं तदेवास्या व्रतमिति वा ॥२५॥

गृहमण्डनवर्तनैर्गृहालङ्कारकरणैः ॥ २६ ॥

कामैर्विषयैः ॥ २७ ॥

अलोलुपा अयोग्याऽभिलाषरहिता अपतितं ब्रह्महत्यादिपातकरहितम् ॥ २८ ॥

अस्मिन् पत्यौ हरिः सन्निहित इति या बुद्धिः स हरिभावः "हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना । शिष्याणाञ्च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु ॥ भृत्यानां स्वामिनि तथा हरिभाव इतीरितः" इतिवचनात्तयोरैक्यार्थः हर्यात्मना हरेर्विशेषसन्निधानवता पत्या सह ॥ २९ ॥

क्षत्रियाद्विप्रस्त्रीसुतानां विप्रात् क्षत्रियस्त्रीजातानां क्षत्रियाद्वैश्यस्त्रीसुतानां वैश्याच्छूद्रस्त्रीसुतानामित्येवं जातानां का वृत्तिरिति तत्राह,येषां जातिविशेषाः अम्बष्ठनिषादपारशवादिनाम्ना ज्ञातव्याः तदुक्तं विप्रान्मूर्द्धावसिक्ताख्यो राज्ञोऽम्बष्ठविशोऽङ्गना"इत्यादि अध्ययनमन्तरेणाम्बष्ठादीनां संस्कारादिकं तत्कुलानुकूल्येन तेषां गुणमाह, अचौराणामिति. यद्यस्याविहितं तत्करणं चौर्यं तद्रहितं शूद्राद्ब्राह्मण्यां जाता अन्त्यजाः रजकादिसप्त कारवस्ततो जाता अन्तेऽवसायिनः पुल्कसमातङ्गादयः येषां तत्कुलविहित एव धर्मः "ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चण्डालः सर्ववर्णविगर्हितः" इति च ॥ ३० ॥

तत्तद्वर्णैस्तत्तत्स्वभावेनानुष्ठितस्य धर्मस्य फलमाह-प्रायइति, सात्त्विकादिस्वभावानुसारेण ब्राह्मणानां विहितः अत्रप्रमाणमाह, वेदेति स्मृतो अन्यस्वरूपेण कृतः प्रेत्य परलोके "नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ॥ अतो यदात्मानः पथ्यं परस्य न तदा चरेत्॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज"इत्यादिवचनात् भक्त्युपबृंहितस्य धर्मस्यापेक्षिताशेषपुरुषार्थहेतुत्वं न केवलस्येत्यभिप्रायेण प्राय इत्युक्तम्. तत्र तत्तद्विशेषणवर्णने अन्यबाहुल्यं स्यादित्युपरम्यते ॥ ३१ ॥

न केवलमनेन धर्मेण स्वर्गादिप्राप्तिरपि तु भक्त्यादिसाधनपूर्वेण मुक्तिरपि स्यादित्याह-वृत्त्येति । स्वभावेन स्वात्मना कृतया प्रेरितया सात्त्विकादिस्वभावपूर्वया वा वृत्त्या जडलक्षणया भक्त्या वा योग्यतया स्वविहितकर्मणि वर्तमानः पुरुषः शनैःशनैर्बहूनां जन्मनामन्ते स्वभावजं कर्म पुण्यपापलक्षणं मुक्त्वा निर्गुणतां मुक्तिम्. "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भवति" इति श्रुतेः। ज्ञानपूर्वकमनुष्ठितो नित्यानन्दाविर्भावलक्षणपुरुषार्थस्य हेतुः यदप्यनेवंविन्महत्पुण्यं कर्मकरोति "तद्धस्यान्ततः क्षीयत एव" इति श्रुतेः तत्त्वज्ञानपूर्वकं भगवद्भक्तप्रद्वेषोपरक्तः प्रवृद्धो धर्मो नित्यदुःखाविर्भावलक्षणपुरुषार्थस्य त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्त इत्यादि नित्यं प्रार्थनादिगुणोपरक्तो नित्यसत्त्वगुणानिमित्तसुखलक्षणस्येत्यादि ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

साध्वीनां लक्षणानि धर्मांश्चाह—स्त्रीणामिति, पञ्चभिः। पतिरेव देवः पूज्यो यासाम् ॥ २५—२८ ॥

हर्ष्यात्मना पत्या सह ॥ २९ ॥

अनुलोमप्रतिलोमजानां वृत्तिमाह—वृत्तिरिति। कुलकृता कुलपरम्पराप्राप्ता यथा नापितरजकादीनां मुण्डनवस्त्रनिर्णेजनादिका अपापानामिति कुलपरम्पराप्राप्तमदिरापानविधवाविवाहादिपापवतां पापाभाव उक्तः। चौर्ये तु तेषामपि प्रतिषिद्धमित्याह—अचौराणामिति। अचौरत्वे सत्त्वे सत्येव वृत्तिः कुलकृता विहिता पापाभावश्चोक्त इति भावः। तत्र प्रदर्शनार्थं कांश्चित् प्रतिलोमजविशेषानाह-अन्त्यजेति—

"रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः"॥

अन्तेऽवसायिनस्तु चाण्डालादयः ॥ ३० ॥

अष्टादपि परधर्मान्नीचोऽपि स्वधर्मः श्रेयानित्याह—प्राय इति। वेददृग्भिर्वेदज्ञैः शर्मकृत् सुखहेतुः स्मृतः भगवता चोक्तम् "श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् इति प्रायग्रहणात् दुर्जातीनां दुराचारत्यागस्तु नाशर्मकृत् ॥ ३१ ॥

शनैर्बहुजन्मान्त एव। यदुक्तम् "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति" इत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ स्त्रीधर्मानाह—स्त्रीणामिति, पञ्चभिः। पतिरेव देवः पूज्यो यासां तासाम् तस्य पत्युः शुश्रूषा सेवा अनुकूलता तच्चित्तानुसारित्वं तस्य यद्व्रतं नियमस्तस्यनित्यं धारणमिति लक्षणमिति शेषः ॥ २५ ॥

किञ्च संमार्जनादिभिः पतिं भजेदिति त्रिभिरेवाऽन्वयः ॥२६-२७॥

किञ्च अलोलुपेति छेदः स्निग्धा प्रीतिमती अपतितं भजेत् महापातकी तु आशुद्धेः परीक्ष्यः तथाह—याज्ञवल्क्यः "आशुद्धेः संपरीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

हरिरात्मा आश्रयो यस्य तेन पत्या सह ॥ २९ ॥

अन्त्यजान्तेवसायिनाम् अन्त्यजान्तेऽवसायिप्रभृतीनां सङ्करजातीनां प्रतिलोमजानां तत्तत्कुलकृता तत्तत्परम्पराप्राप्ता वस्त्रनिर्णेजनादिरूपा वृत्तिर्भवेदिति परम्पराप्राप्तमपि चौर्यहिंसादिकं त्याज्यमित्याशयेनाह—अचौराणामपापानामिति। तत्रान्त्यजाः "रजकश्चर्मकारश्च नटो वरुड एव च। कैवर्त्तो मेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चाण्डालपुल्कसमातङ्गादयः ॥ ३० ॥

वेददृग्भिः वेदविद्भिः मन्वादिभिः स्वभावतः वर्णादिभावानुसारेण विहितो ऽनुष्ठातः नृणां धर्मः इह प्रेत्य च शर्मकृत्सुखदः स्मृतः तथा च स्मृतिः "श्रेयान्स्वधर्मो विगुणः परधर्मो भयावहः", इति ॥ ३१ ॥

निर्गुणतां गुणातीततताम् ॥ ३२ ॥

भाषा टीका।

और स्त्रियों के लक्षण (धर्म) यही हैं कि पति को देवता के सदृश माने, और उसकी शुश्रूषा करे, पति के अनुकूल रहे और पति के बन्धुवर्गों का अनुवर्त्तन करे, तथा नित्य पति ही के व्रत को धारण करे ॥ २५ ॥

सम्मार्जन (झाडूलगाना) उपलेप (लीपनापोतना) और से मण्डलवर्त्तन (चौकपूरने) से गृह को मण्डित (भूषित) रखे और नित्य आप भी अपने उपकरणों से स्वयं भूषित रहे ॥ २६ ॥

सुशीला स्त्री घर के ऊंचे नीचे सर्व कामों से नम्रता से इन्द्रियों के जीतने से तथा सत्य और प्रिय वाक्यों से प्रेम से समय २ पर पति की सेवा करे ॥ २७ ॥

सदा सन्तोष राखे भोगों मे लोलुपता छोडे, चतुराई रखे साची मीठी वाणी बोले, प्रमाद छोडकर शुद्धरहे और स्नेहवाली होकर पति को भजे यदि पति पतित न होवे तौ ॥२८॥

जो स्त्री लक्ष्मी के नाई पति को हरि की भावना से भजती है, वह हरिलोक में हरि स्वरूप अपने पति के साथ लक्ष्मी के तरह मोद को प्राप्त होती है ॥ २९ ॥

रजक आदि सङ्कर जाति लोग, तथा अन्त्यज वर्ण वाह्य लोग अपने२ कुलोचित जीविका करे चोरी और हिंसा को छोड कर, ॥ ३० ॥

प्राय करके मनुष्यों का युग २ में वेद दृष्टाओं ने स्वभाव विहित धर्म ही कहा है वही इस लोक और परलोक में सुख करने वाला है ॥ ३१ ॥

अपने स्वभाव से प्राप्तवृत्ति से अपने कर्म को करता हुआ वर्त्तमान रहे, कालांतर में धीरे२ स्वभाव से जायमान कर्म को भी छोडकर, अर्थात् कर्म करता हुआ भी परमात्मा में समर्पण कर निर्गुणता को प्राप्त हो जावे, अर्थात् गुणकर्म कृत बन्धन से छूट जावे ॥ ३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उप्यमानं बहु क्षेत्रं स्वयं निर्वीर्यतामियात् ।
न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥ ३३ ॥
एवं कामाशयं चित्तं कामानामतिसेवया ।
विरज्येत तथा राजन्नाग्निवत्कामबिन्दुभिः ॥ ३४ ॥
यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे सदाचारनिर्णयोनाम
एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, काम्यानि कर्माणि कुर्वतस्तत्फलभोगपरस्य कथं नैर्गुण्यं स्यात्? तदुक्तं प्रह्लादेन "औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः" इत्यादि तत्राधिकारिभेदेन व्यवस्थां सदृष्टान्तमाह— उप्यमानमिति द्वाभ्याम्. पुनः सूत्यै सस्यप्रसवाय ॥ ३३ ॥

कामा आशेरते वासनारूपेण यस्मिंस्तत् । अयम्भावः उत्कटवासनाविष्टस्य सहसैव कामत्यागासम्भवाद्वेदोक्तनियमेन बहुशः कामान् भुञ्जानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो भवति यथा स वीर्ये क्षेत्रं शनैर्निर्वीर्यं भवति यथाच प्रज्वलितोऽग्निर्न घृतबिन्दुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव तद्वत् महादकृतस्तुतौ कौमार एव निवृत्त्युपदेशो मन्दवासनानामधिकारेण । तदुक्तं तत्रैव "बालानदूषितधियो द्वन्द्वारामैरितेहितैः" इति अतः सर्वमनवद्यम् ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह-यस्येति । यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणेनिमित्तेनैव वर्णेन विनिर्दिशेत् न तज्जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु स्वभावकृतया वृत्त्या स्वकर्मणि वर्त्तमानस्य पुनःकाम क्रोधादिवर्द्धकपन्धककर्मसम्भावनया कथं नैर्गुण्यप्राप्तिरिति शङ्कां निराकर्तुं गृहस्थस्य ज्ञानवैराग्यवतः शास्त्राविरुद्धान्नपानादिसेवया रागवर्द्धकत्वासवे तावद्दृष्टान्तमाह-उप्यमानामिति । यथा मुहुर्मुहुरुप्यमानं क्षेत्रं निर्वीर्यतामसारतां प्राप्नुयात्पुनः सूत्यै सस्यप्रसवाय न कल्पते न समर्थमत एव उप्तं बीजं च नश्यति ॥ ३३ ॥

तथा कामानामाशयमाश्रयं चित्तं पुनः कामानामतीव सेवया विरज्येत नाग्निवदिति घृतबिन्दुभिरग्निरिव न वर्द्धत इत्यर्थः यथा प्रज्वलितोऽग्निः घृतबिन्दुभिर्न शाम्यति किन्तु महता घृतपूरेण. तथा चित्तं कामलेशैर्न शाम्यति महद्भिः कामैरित्यर्थः ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह—यस्येति । यस्य पुंसो यल्लक्षणं वर्णाभिव्यञ्जकं प्रोक्तं "शमो दमस्तपः" इत्यादिना तद्यत् यद्यन्यत्रापि वर्णान्तरेऽपि दृश्येत तर्हि तद्वर्णान्तरं तेनैव लक्षणनिमित्तेनैव वर्णेन निर्दिशेत् न जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु सगुणो धर्मः सगुणपुरुषार्थहेतुर्भवत्यनुकूलत्वान्निर्गुणपुरुषार्थस्य कथं विरुद्धत्वादित्याशंक्य गतो हि पुरुषार्थकारणं तद्विपर्ययोपरक्तं दुःखोदर्कविषयसुखाच स्यात्तदेव विषयाणां क्षणभङ्गुराणां दुःखोदर्काणां दुःसाधनत्वचिन्तया वैराग्यानलमर्जितं पुनस्तदंकुरीभावासमर्थं भगवच्चरणारविन्दमकरन्दसलिलसिक्तं चेत् तज्ज्ञानांकुरीकरणनिदानं भवतीत्येतमर्थं सदृष्टान्तमाह—उप्यमानमिति यथा बीजैरुप्यमानं पुनः सेतुरसाधनहीनं क्षेत्रं केदारलक्षणं निर्वीर्यतां सस्यजननशक्तिराहित्यमेति तदेव स्फुटयति पुनरिति सूत्यै उत्पत्त्यै न केवलमुत्पादनासमर्थं किन्तु बीजनाशहेतुश्च ॥ ३३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एवं यथा कामाशयं कामाशाविश्रमं चित्तं विषयसेवासमये दुःखस्य तदभावे सुखस्य च स्मरणसमर्थं मनः कामानां विषयाणामतिसेवया क्षयरोगादिहेतुभूतया द्रव्यादिनाशकारणानित्यसुखाय विरज्येत विरक्तं भवति असारतावुद्धिं प्राप्नोति इदं च योग्यानामेव नायोग्यानामिति. किञ्चिद्विषयसेवया किं स्यादिति तत्राह–यथेति। कामानां बिन्दुभिः किञ्चित्सेवितैः मनो यथावत्पुरुषार्थहेतुतया न विरज्यते विरक्तं न भवति पुनः तृष्णातिशयः स्यात् कथमिव सुखकान्तिहेतुत्वात्कामः आज्यं तद्बिन्दुभिर्यथा अग्निर्वर्धते तथेति भावः॥ ३४॥

नन्वत्र वर्णादिज्ञानं यथा तारतम्यतत्पूजापि यद्योग्यस्य निःश्रेयसी यस्य एतदभावे तद्विहितकरणाद्यभीष्टा सिद्धिः स्यादिति तत्राह–यस्येति. यस्य ब्राह्मणादेः ब्राह्मणत्वादिव्यञ्जकं शमदमादिलक्षणं प्रोक्तं शास्त्र इति शेषः। तल्लक्षणं यद्यन्यत्र व्यक्तं दृश्येत अपिशब्देनाव्याप्त्यादिदोषाभावं सूचयति-तर्हीतरलक्षणेनैव तद्वस्तु ब्राह्मणादिकमिति निर्दिशेत् उपदिशेत्. गोः किं लक्षणमिति पृष्टः सास्नादिमान् गौरिति उपदिशति. यदा तदा पुच्छवत्त्वश‍ृङ्गवत्वादि व्यभिचार्यं विहाय यं गोपिण्डं सास्नादिमन्तं पश्यति. यथा प्रश्लेति तत्प्रयुक्तं व्यवहारं करोति आप्तायोपदिशति एव तथाऽत्रापि विरक्तिबलभक्तिरेव ब्राह्मणादेः मुक्तिसाधनं लक्षणमिति सकलशास्त्रतात्पर्यार्थः ततः सैव मुमुक्षुभिः सम्पादनीयेति भावः॥ ३५॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः॥ ११॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकादशोऽध्यायः॥ ११॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्युत्कटवासनाविशिष्टानां तु वेदोक्तनियमेन कामत्यागासम्भवात् बहुशः कामान् निषिद्धेतरान् ययातिसौभरिप्रमुखानामिव भुञ्जानानामकुटिलचित्तानां विरागः स्यादिति सदृष्टान्तमाह-उपमानमिति, द्वाभ्याम्। निर्वीर्यतामेवाह, क्वचित् सूत्यै सस्य प्रसवाय न कल्पते क्वचित् उप्तमेव बीजं नश्यति ज्वलति कामा आसम्यगेव शेरते वासनारूपेण यत्र तत् नाग्निवदिति यथा प्रज्वलितोऽग्निर्न घृतबिन्दुभिः शाम्यति किन्तु महता घृतपूरेण शाम्यत्येव तद्वत्॥ ३३॥ ३४॥

किञ्च यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं वर्णं ब्राह्मणादिजातिमभिव्यञ्जयति यत् तच्च सामान्यतो विहितमेव शमदमादिकं नतु विशेषतो विहितं सन्ध्योपास्त्यादिकं यद्यन्यत्र जात्यन्तरेऽपि दृश्येत तज्जात्यन्तरमपि तेनैव ब्राह्मणादिशब्देनैव विनिर्दिशेदिति ब्राह्मणादितुल्यादरं लक्षयति न च "परधर्मो भयावहः" इति वाच्यं शमदमादीनां परधर्मत्वाभावादिति भावः॥ ३५॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकादशः सप्तमस्य सङ्गतः सङ्गतस्सताम्॥ ११॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सूत्यै प्रसवाय॥ ३३॥

उत्तमाधिकारिपक्षे"कौमारे आचरेत्प्राज्ञः" इत्यादिना सर्वभोगत्यागपूर्वकं भजनमुक्तम् मन्दाधिकारिपक्षे"गृही भूत्वा वनी भवेत्" "कुर्वन्नेवेह कर्माणि, जिजीविषेच्छतं समाः" इत्याद्युक्तदृशः आश्रमादाश्रमान्तरगमनं यावज्जीवं तावत्कर्मानुष्ठानं च बहुभोगेन विषयेभ्यो निर्वेदोदयार्थमाह– यथोक्तकर्मस्वपादितबहुभोगेन मनः शाम्यति न स्वल्पभोगेन बहुघृतेनाग्निरिव शाम्यति न घृतबिन्दुभिरित्याह–एवमिति। कामाः विषयाः आशेरते वासनारूपेण यस्मिन् तत् मतिसेवया बहुभोगेन विरज्यते विषयेभ्य उपरम्यते नतु कामबिन्दुभिः॥ ३४॥

यद्यपि प्रजापतिप्रवर्तिता वर्णा मुख्यास्तथापि कालकृतसङ्करादिदोषतस्तन्निश्चयाभावे सत्यादिलक्षणेन तत्तत्कुले ब्राह्मणादिनिश्चयः कर्तव्यः अन्यवर्णेऽपि यद्यन्यवर्णलक्षणं दृश्येत तर्हि तेन लक्षणेनापि तं वर्णितं विजानीयादित्याह—यस्येति। यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणादिनिमित्तेन विनिर्दिशेत्"न चयं विद्मो ब्राह्मणाःस्मोऽब्राह्मणा वा ये यजामहे"इति श्रुतिः"जातिरत्र महासर्पमनुष्यत्वे महामते! सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः॥ तस्माच्छीलं प्रधानेष्टं विदुर्वै तत्त्वदर्शिनः"इति स्मृतिश्चात्रानुसन्धेया॥ ३५॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः॥ ११॥

———

भाषा टीका।

जिस खेत में बहु अर्थात् (वारंवार) बीज बोया जाता है वह क्षेत्र निर्वीर्य आपही होजाता है, उसमें बोया हुआ बीज

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषा टीका।

फिर उत्पन्न होने को नहीं समर्थ होता किन्तु वहीं नष्ट होजाता है ॥ ३३ ॥

हे राजन्! ऐसेही जिस पुरुष का चित्त सदा कामनाओं से वासित हैं उसका चित्त वैदिक कर्म करते २ नियम पूर्वक बहुत काल भोग भोगने से जैसा धीरें २ आपही वैराग्य को प्राप्त होता है, तैसा शीघ्रता से नहीं। जैसे कि? घृत के विंदुओं से अग्नि नहीं शान्त होती है ॥ ३४ ॥

जिन पुरुषों के वर्ण का अभिव्यंजक (जानने वाला) जो लक्षण कहा है वह यदि वर्णान्तर में देख पडे तब उसको भी उसी निमित्त से निर्देश करे कुछ जाति के निमित्त से नही जाति तौ जिसकी जो है वही रहेगी ॥ ३५ ॥

इति श्रीमद्भागवत सप्तस्कन्ध में एकादश अध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ द्वादशोऽध्यायः ॥

नारद उवाच ।

ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितम् ।
आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥
सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ।
उभे सन्ध्ये च यतवाग्जपन्ब्रह्म समाहितः ॥ २ ॥
छन्दांस्यधीयीत गुरोराहूतश्चेत्सुयन्त्रितः ।
उपक्रमे ऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥
मेखलाऽजिनवासांसि जटादण्डकमण्डलून् ।
बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥
सायं प्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत् ।
भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥ ५ ॥
सुशीलो मितभुग्दक्षः श्रद्दधानो जितेन्द्रियः ।
यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥
वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ७ ॥
केशप्रसाधनोन्मर्दस्नपनाऽभ्यञ्जनादिकम् ।
गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः ।
चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥ १ ॥

वर्णादीनां धर्मा उक्ताः इदानीम् आश्रमधर्मा उच्यन्ते. तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवानप्रस्थयोरसाधारणाश्चतुर्णाम्—साधारणाश्चोच्यन्ते. त्रयोदशे यतेर्धर्माः, चतुर्दशे गृहस्थस्य पञ्चदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ १ ॥

तानाह–सायमिति। ब्रह्म गायत्रीं जपन् सन्ध्यात्रयमुपासीत उभे सन्ध्ये तु यतवाक् सायं प्रातः सन्ध्याकालनिमित्तं मौनं कुर्यादित्यर्थः ॥ २ ॥

उपक्रमे आदाववसाने अन्ते गुरोश्चरणौ नमेत् ॥ ३ ॥

यथोदितमिति, "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य, जटाधारणं तु केशप्रसाधनाभावमात्रम् ॥ ४ ॥ ५ ॥

यावदर्थं यथोपयोगमात्रमेव ॥ ६ ॥

बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोऽपि प्रमदागाथां वर्जयेत् तत्र हेतुः इन्द्रियाणि बलवन्ति संयतस्यापि मनो हरन्तीति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं चातुर्वर्ण्यादिधर्मानभिधायाऽथ चातुराश्रम्यधर्मान्विवक्षुस्तावद्ब्रह्मचर्याश्रमधर्मानाह-ब्रह्मचारीति।ब्रह्मचर्यं द्विविधमौपकुर्वाणं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैष्ठिकश्चेति । तत्र गार्हस्थ्यादिवर्णाश्रमिकमप्यौपकुर्वाणपूर्वकमेवेति-दर्शयितुं तावदौपकुर्वाणब्रह्मचर्यधर्मा उच्यन्ते. यो गुरुकुले वसन् स ब्रह्मचारी उपकुर्वन् ब्रह्मचारीत्यर्थः । कथम्भूतो वसन् दान्त उपशान्तः दासवन्नीचः स्वनैच्यमनुसन्दधत् गुरोर्हितमाचरन् गुरौ सुदृढं सौहार्दं यस्य तादृशः ॥ १ ॥

किञ्च सायम्प्रातश्च गुरुमग्निमर्कं सूर्यं सुरोत्तमं भगवन्तञ्च उपासीत उभे सन्ध्ये प्रातः सायं च यतवाङ्मौनी समाहितचित्तो ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेत्यन्वयः ॥ २ ॥

आहूतश्चेत्सुयन्त्रितः समाहितो गुरोः छन्दांसि वेदानधीयीत नित्यमध्ययनोपक्रमसमाप्त्योर्गुरोश्चरणौ शिरसा नमेत् ॥ ३ ॥

यथा विहितं मेखलादीनि बिभृयात् जटाधारणं तु केशप्रसाधनाभावमात्रं दर्भं पवित्रं पाणौ यस्य सः ॥ ४ ॥

सायं प्रातश्च भैक्षं भिक्षाकर्म चरेत्कुर्यात् तद्भिक्षया लब्धमन्नं गुरवे निवेदयेत् गुरोः पुरतो निदध्यात् ततो यदि गुरुणाऽप्यनुज्ञातश्चेत् तदन्नं भुञ्जीत नोचेत् कदाचिदुपवसेत् कदाचिदित्यनेन तन्मनः परीक्षार्थं कदाचिद्गुरुर्नाज्ञापयेदिति सूच्यते ॥ ५ ॥

मितं भुङ्क्ते इति तथा सुशीलः सुस्वभावः सदाचारो वा दक्षोऽनलसः श्रद्दधानः गुरूपदिष्टार्थेषु विश्वासयुक्तः जितानीन्द्रियाणि येन स्त्रीषु स्त्रीभिर्निर्जिता ये स्त्रीवश्यास्तेषु च यावदर्थं यावत्प्रयोजनं व्यवहरेन्नाधिकं ताभिस्तैश्च सम्भाषेतेत्यर्थः ॥ ६ ॥

प्रमदागाथां स्त्रीविषयां वार्तां वर्जयेत् यतः स्वयमगृहस्थो वृहद्व्रतः ब्रह्मचर्यवान् स्त्रीसङ्गादिरहितः । ननु, तद्वाधामात्रेण को दोषस्तत्राह—इन्द्रियाणीति । प्रमाथीनि बलवन्ति. अतः संयतचित्तस्यापि मनः प्रमदागाथाश्रवणकथनादिना स्ववशङ्कुर्वन्ति अतस्तां परिवर्जयेत् इत्यर्थः ॥ ७ ॥

गुरुस्त्रीभिर्गुरुपत्नीभिरन्याभिश्च युवतिभिः केशप्रसाधनादिकं न कारयेत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नीचः प्रश्रितः हितं हिताचरणं । मनोवाक्कायकर्मभिरिति शेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

कचिदपराधे सति । एकाशादनवर्जनार्थमुपवसेदित्युक्तम् ॥५॥

स्वार्थमात्रासिद्धिः तन्मात्रं यावदिति ॥ ६ ॥

वृहद्व्रतो ब्रह्मचारी स्त्र्यादिव्यवहारवर्जननिमित्तमाह—इन्द्रियाणीति । निर्जितेन्द्रियग्रामो यतिः । "ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते" इत्यभिधानात् ॥ ७ ॥

प्रसाधनं संस्करणम्—

"मधुमांसोच्छूनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्" ॥

इत्यपव्याख्यानं न कर्तव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—४ ॥

नोचेदिति, गुरोरन्यत्र गमनादौ ॥ ५—१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वादशे वर्णिनो धर्मो वनस्थस्याऽपिवर्ण्यते ।
साधारणाश्चाश्रमाणां देहत्यागविधिस्तथा ॥

ब्रह्मचारी गुर्वादीनुपासीतेत्युत्तरेणान्वयः ब्रह्म गायत्रीम् ॥ १—५ ॥

यावदर्थं गुरुसेवार्थं गुरुगृहे भिक्षार्थं गृहस्थगृहेषु च यथोपयोगमेव च ॥ ६ ॥

अगृहस्थो गृहस्थभिन्नः सर्वोपि वृहद्व्रतो ब्रह्मचारी ॥ ७ ॥

कारयेदिति गुरुपत्न्यो हि शिष्यमपि पुत्रमिव वात्सल्येन पश्यन्त्यो यदि केशप्रसाधनादिकं स्वेच्छयैव कुर्वन्ति तदपि न कारयेदित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मचारी वनस्थयोर्धर्मः सर्वाश्रमसाधारणाश्च कश्चन धर्मो द्वादशेनाऽध्यायेन वर्ण्यते. ब्रह्मचारी गुरुकुले वसन् गुरोर्हितमाचरन् उभे सन्ध्ये ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेति द्वयोः अन्वयः ॥ १ ॥ २ ॥ ३ ॥

जटाधारणं केशप्रसाधनाभावमात्रं यथोदितं "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य दर्भपाणिः कुशहस्तः ॥ ४ ॥ ५ ॥

यावदर्थं भिक्षाद्यर्थम् ॥ ६ ॥

वृहद्व्रतः नैष्ठिकब्रह्मचर्यवान् अगृहस्थो वानप्रस्थादिश्च प्रमाथीनि बलवन्ति यतः जितेन्द्रियस्यापि ॥ ७ ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीप्रियवल्लभाय नमः ॥

नारद उवाच ।

नारदजी बोले, कि—ब्रह्मचारी दमन शील होकर गुरुकुल में वास करता हुआ, गुरु का हित आचरण करे और दास के नाईं नीचाऽनुसंधान कर गुरु में दृढ सौहृद राखे ॥ १ ॥

प्रातःकाल और सायंकाल में गुरु अग्नि सूर्य और देवताओं की उपासना करे, और दोनों संध्याओं में मौन होकर सावधानी से गायत्री का जप करे ॥ २ ॥

गुरुजी के बुलाने से बड़ी नम्रता पूर्वक वेद का अध्ययन करे पढने के प्रथम और पश्चात् (अन्तमें) गुरुजी के चरणों को शिरसे प्रणाम करे ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वग्निः प्रमदानाम घृतकुम्भमयः पुमान् ।
सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥
* कल्पयित्वाऽऽत्मना यावदाभासमिदमीश्वरः ।
द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥ १० ॥
एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि ।
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥
अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेखामिषं मधु ।
स्रग्गन्धलेपालङ्कारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥
उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च ।
त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ॥ १३ ॥
दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ।
गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥ १४ ॥
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् ।
भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥
एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ।
चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥

भाषा टीका ।

जैसा शास्त्र में कहा है उसरीत से मेखला मृगचर्म वस्त्र जटा दंड कमंडलु और दर्भों को धारण करे ॥ ४ ॥

सांझ सवेरें भिक्षाटन करके गुरुजी के अर्पण करे, जो गुरुजी आज्ञा देवें तो भोजन करे नहीं तो कभी उपवास भी करजावे ॥ ५ ॥

सुशील मितभोजी चतुर श्रद्धावान् और जितेन्द्रिय रह कर, स्त्रियों में और स्त्रीनिर्जित अर्थात् लंपटों में जितना प्रयोजन उतना ही व्यवहार राखे ॥ ६ ॥

बृहद्व्रत (बडे व्रत वाला) विरक्त पुरुष स्त्रियों के गीत को न सुनें, क्योंकि ? इन्द्रियें बडी मथन करने वाली है बलात्कार से मन को हरलेतीं हैं ॥ ७ ॥

यदि आप युवा अवस्था वाला हो तो युवा अवस्था वाली गुरु पत्नियों से केशप्रसाधन, (केस सम्हारना) उन्मर्दन (उवटन) स्नान, अभ्यंजन, (तेल लगावना) इत्यादिक कार्य न करावै ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न कारयेदित्यत्र हेतुः—नन्विति । रहः एकान्ते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरे वा यावदर्थं तदुक्तं कुर्यात् ॥ ९ ॥

ननु, मिथ्यात्वात् अतिकश्मलत्वाच्च स्वयं त्यक्तप्रायं कस्मादि जह्यादिति कोऽयमतिनिर्बन्धः ? तत्राह—कल्पयित्वेति । आत्मना स्वरूपसाक्षात्कारेणेदं देहेन्द्रियादिकम् आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतन्त्रो न भवेत् तावत् द्वैतम् अहं पुमानियं स्त्रीति भेदो न विरमेत्. ततः किमत आह, ततो हि द्वैताद्विपर्ययः गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः ॥ १० ॥

एतत् सर्वं सुशील इत्याद्युक्तं गृहस्थस्य विशेषमाह—गुरुवृत्तिरिति ॥ ११ ॥

अञ्जनादीनामामिषान्तानां द्वन्द्वैक्यम् अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियश्चावलेखाश्च चित्रकर्म स्त्रीणां कुड्यादौ लेखनं वा तन्निरीक्षणं वा अत्राऽभ्यञ्जादि स्वरूपतो निषिध्यते पूर्वन्तु कथञ्चिदापदि प्राप्तमपि स्त्रीकर्तृकं निषिद्धमिति भेदः ॥ १२ ॥

* कल्पमत्याऽऽत्मना इति वीर० पाठः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थंश्च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥

यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्त्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात्तत्रैव वा वसेत् नैष्ठिकः स्यादित्यर्थः ॥ १४ ॥

स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तं नियन्तृतया ॥ १५ ॥

चरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं येन सः ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कुतस्तन्मात्रकरणेदोषः? तत्राह—नन्विति । अग्निः अग्निसदृशी प्रमदा यथाचातीवाग्निसहचरितं घृतकुम्भं क्षरति तथा पुमानपि प्रमदासहचारी संमुह्येदित्यर्थः । अतः सुतामपि पुत्रीमपि पुमान् रह एकान्ते जह्यात् त्यजेत् अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनैकान्तावसरे वा यावत्तदुक्तमर्थं प्रयोजनं तावन्मात्रं करोतीति तादृशो भवेत् ॥ ९ ॥

एवं ब्रह्मचारिणो धर्मानभिधाय यदुक्तं "सुशीलो मितभुक्" इत्यादि तद्यतिगृहस्थयोरपि ब्रह्मोपासननिष्ठयोरतिदिक्ष्यन् तावद्यावच्छरीरावसानमेवं धर्मा अनुष्ठेया इत्याह–कल्पयतीति । ईश्वरो भगवान् यावदिदमात्मन आभासं दृश्यं शरीरं कल्पयति प्रवृत्तिः समर्थं करोति तावद्द्वैतं देवत्वमनुष्यत्वब्राह्मणत्वाद्यभिमानरूपं भेदज्ञानमनुवर्त्तेत इति शेषः । नन्वनुवर्त्ततां ततः किं तत्राह, अस्य पुंसस्ततोऽध्यासाद्विपर्ययः उत्तरोत्तरविपर्य्ययः देहात्मभ्रमः पुरुषार्थविपर्य्ययो वा भवति तस्माद्यावद्द्वैतानुवृत्तिः स्वधर्मेभ्यो न विरमेत् । कल्पयित्वेति पाठान्तरम् तत्र यावदिदमाभासं शरीरं तावदीश्वरः प्रभुः समर्थः स्वधर्मानुष्ठानशक्तस्सन् आत्मनः स्वस्य द्वैतं मनुष्यत्वब्राह्मणत्वादिभेदं कल्पयित्वा स्थित इति शेषः । देहात्माभिमानयुक्त इत्यर्थः । अत एव तावन्न विरमेद्धर्मादितिशेषः । विरामे बाधकमाह—हि यस्मादध्यासाद्विरामाद्वाऽस्य विपर्ययः उत्तरोत्तरदेहात्मभ्रमः यद्वा यावदिदं शरीरमनुवर्त्तते तावदिदं द्वैतं मनुष्यत्वादिकमात्मन आभासमात्रं कल्पयित्वा द्वैतं देहाकारो न त्वात्माकार इति कल्पयित्वा देहविलक्षणमात्मानमनुसन्धायेत्यर्थः । ईश्वरः कर्त्तुं समर्थः न विरमेत् स्वधर्मान्नविरमेदित्यर्थः ॥ १० ॥

उक्तं यतिगृहस्थयोरप्यतिदिशति–एतदिति । एतत्सुशील इत्यादिनोक्तं सर्वं वनस्थस्य ब्रह्मोपासनरूपव्रतनिष्ठस्य यतेस्तुर्याश्रमिणः अपि शब्दाद्गृहस्थस्यापि समाम्नातं तत्र गृहस्थस्य किञ्चिद्विशेषमाह–गुरुवृत्तिरिति । गुर्वी वृत्तिर्गुर्वनुवृत्तिः स्त्रीसङ्गराहित्यादिरूपा ब्रह्मचर्यवृत्तिः गृहस्थस्य तु विकल्पेन कदाचिद्भवेत् कदाचिन्न स्यात् । कदा न भवेत् ? इत्यपेक्षायां तं कालं निर्दिशन्विकल्पे हेतुं वदन् गृहस्थं विशिनष्टि—ऋतुगामिन इति । ऋतुगामित्वाद्गुरुवृत्तिविकल्प इति भावः । ऋतुकालेषु गुरुवृत्तिर्नास्तीति च भावः अस्या वृत्तेर्दुष्करत्वाभिप्रायेण गुर्विति विशेषणमुपात्तम् ॥ ११ ॥

किञ्च ये धृतव्रताः गृहस्थास्ते अञ्जनादीन् त्यजेयुः अञ्जनाद्यामिषांतानां द्वन्द्वैक्यं तत्राञ्जनं शरीरस्य तैलाद्यञ्जनम् शिरस अभ्यञ्जनमवशिष्टदेहस्य उन्मर्दः उद्वर्तः स्त्र्यवलेखा कुड्यादिषु स्त्रीप्रतिकृतिलेखनमामिषं मांसं मधु मद्यमिदं क्षत्रियाद्यभिप्रायकं स्रक् च गन्धलेपश्चाऽलङ्कारश्च तान् ॥ १२ ॥

एवं ब्रह्मचर्याश्रमधर्मानभिधायाथाश्रमान्तरधर्मान्विवक्षुस्तावदाश्रमन्तराणामुक्तविधब्रह्मचर्याश्रमपूर्वकत्वमाह. उषित्वैवमिति, द्वाभ्याम् । द्विजस्त्रैवर्णिकः एवमित्थं गुरुकुले. उषित्वा साङ्गोपनिषदं सांगसशिरस्कां त्रयीं यथाबुद्धिबलं यावत्स्वापेक्षितमधीत्याऽवबुध्य तदर्थं ज्ञात्वा अवबध्येति पाठस्तूचितः "वेदमधीत्याभिसमावृत्य कुटुम्बे शुचौ देशे" इति श्रुत्यर्थस्याऽत्र प्रत्यभिज्ञानादनवध्य समावर्त्तनं कृत्वा ॥ १३ ॥

यदीश्वरः शक्तश्चेत्तर्हि गुरोः काममपेक्षितं वरं दत्वा गुरुणा ऽभ्यनुज्ञातः गृहं वनं वा प्रविशेद्गृहस्थाश्रमं संन्यासाश्रमं वा स्वीकुर्यादित्यर्थः । वनशब्दः शुचिदेशोपलक्षकः कुटुम्बे शुचौ देशे इति श्रुत्यनुरोधान्न तु वानप्रस्थाश्रमोपलक्षकः ब्रह्मचर्यानन्तरं तत्परिग्रहानुपपत्तेः सहि गार्हस्थ्यानन्तरभावि "ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनीभूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वानाद्वा" इति जाबालिश्रुतेः गार्हस्थ्यानन्तरं प्रव्रजेत् प्रव्रजनन्तु सन्यासाश्रमपरिग्रहो वानप्रस्थाश्रमपरिग्रहश्चेत्युभयविधं विवक्षितं यथेष्टं संन्यसेद्वनं वा प्रतिष्ठतेत्यर्थः । तत्र वा वसेत् तत्र शब्देन ब्रह्मचर्यं गार्हस्थञ्च विवक्षितं ब्रह्मचर्य एव निष्ठितो भवेत् गृहं प्रविश्य तत्रैव वा स्थितो भवेदित्यर्थः ॥ १४ ॥

एवं यथेष्टं परिगृहीतानां सर्वाश्रमाणामनुगतं धर्मं तत्फलं चाह—द्वाभ्याम्, अग्नाविति । अग्नाविति तुर्याश्रमव्यतिरिक्ताश्रमाभिप्रायकं तस्यानग्नित्वात् गुरावग्नावात्मनि स्वस्मिन् सर्वभूतेषु चान्तःप्रविश्यानियमनपूर्वकं धारकतयास्थितमितिशेषः । स्थितम् अधोक्षजं भगवन्तं पश्येत् अधोक्षजो धामाऽऽधारो येषां तैर्भूतैरप्रविष्टं पश्येत् व्याप्यवस्तुगतदोषासंस्पृष्टं पश्येत् प्रविष्टञ्च पश्येत् अन्तर्बहिश्च व्याप्यस्थितत्वादितिभावः ॥ १५ ॥

एवंविधदर्शी ब्रह्मचर्याद्यन्यतमश्चरन्नाश्रमधर्माननुतिष्ठन्विदितं विज्ञानं विज्ञेयं स्वात्मपरमात्मयाथात्म्यं येन तादृशः परं ब्रह्माधिगच्छति आप्नोति ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुतो न कार्यमत्राह—नन्विति । अन्यदा व्यवहारयोग्यसमये ॥ ९ ॥

ननु, बन्धनिवृत्यर्थं भगवदर्पणबुद्ध्या धर्मोऽनुष्ठेय इति विधीयते तस्य मिथ्यात्वेन स्वत एव निवृत्युपपत्तेर्न तद्विधानमत्रावश्यकमित्याशङ्क्येश्वरकल्पितस्य मिथ्यात्वासम्भवेन यद्बुद्ध्या यस्य श्रृङ्खलाबन्धस्तस्य तत्प्रसादेन तन्निवृत्तिर्नदी-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्वरप्रसादजनकधर्मग्रामो विधेयो ऽन्यथा बन्धानुत्थितिरित्याशयवांस्तस्येश्वरकल्पिततत्वमाह-कल्पयेदिति । यावंतं कालमीश्वरः आत्मनो जीवस्य ज्ञानलक्षणारहितं ज्ञानवदवभासमानमिदमाभासमज्ञानं कल्पयेत्तावंतं कालं द्वैतमयथार्थज्ञानं न विरमेन्नापगच्छेत् ततोऽज्ञानादस्य विपर्ययो बन्धोऽनुवर्तेत इति शेषः तदुक्तम्—

(१) "वहुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते।
अद्वैतज्ञानमित्येव द्वैतज्ञानं तदन्यथा ॥
(२) यथा ज्ञानं तथा वस्तु यथा वस्तु तथा मतिः।
नैव ज्ञानार्थयोर्भेदस्तत एकत्ववेदनम्"इति च ।

ननु, वर्णादेर्विहितो धर्मग्रामः कियन्तं कालमनुष्ठेयो बहुसमयसाध्यत्वे दुःखप्रयासत्वेनाशक्त्या विरक्त्यानधिकारिकः स्यादित्याशङ्क्याह—कल्पयेदिति । यावादीश्वर इदमाभासं मिथ्याभूतं जगत्कल्पयेत् तावद् द्वैतं वर्णाश्रमादिधर्मलक्षणं न विरमेत् नापगच्छेत् ततोऽधिष्ठानं ज्ञानं स्यात्ततो विहितधर्मग्रामस्य विपर्ययो निवृत्तिरित्ययमर्थो हिशब्दसूचितया "सत्यसृष्टावशक्ता हि मायासृष्टिं वितन्वत" इति स्मृत्या विरुद्धत्वेनानुपपन्नः ईश्वर इत्यनेन सत्यसृष्टिसामर्थ्यं सूचयति तात्पर्येण विधानं चानुपपन्नं यत उक्त एवार्थः ॥ १० ॥

नन्वयं धर्मो ब्रह्मचारिणो भवेदुतान्यस्यापि सम्भवति ? नाद्यः अतिव्याप्तेः न द्वितीयः पृथग्विधानानुपपत्तिरित्यतोऽतिदेशन्यायेन यथासम्भवमन्यस्यापीत्याह-एतदिति । अन्यद्वक्ष्यमाणं न केवलं गृहस्थस्यैव किन्तु यतेरपीत्याह—यतेरपीति । यथासम्भमित्युक्तं विवृणोति-गुरुवृत्तिरिति । गुरुवृत्तिर्गुरौ वासः ब्रह्मचर्यं भिक्षावृत्तिरित्येतत्सर्वं गृहस्थस्य निवर्तेत इत्यर्थः । विकल्पेन व्यवस्थितविकल्पेनोदितानुदितहोमवदित्यर्थः । कुतो निवर्तेत इति तत्राह-ऋतुगामिन इति ॥ ११ ॥

पञ्चयज्ञाद्याचरणावसेन कालायापनं कुर्वतो गृहस्थस्यापि व्रतधारणे ब्रह्मचारिवदभ्यंजनादिकं वर्जनीयमित्याह—अञ्जनेति । अवलेपं दर्पम् ॥ १२ ॥

अवबुध्य अर्थविचारं कृत्वा तत्त्वं ज्ञात्वा ॥ १३ ॥

गार्हस्थ्यधर्मस्य वानप्रस्थधर्मस्य यतिधर्मस्य चानुष्ठानेन समर्थश्चेदेवमभीष्टं कुर्यादित्याह—यदिति—

"नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ।
तदभावे * स्यतनये पत्न्यां वैश्वानरेऽपि च" ॥

(१) वस्तूनांबहुत्वेन बहुत्वप्रकारकवस्तुविषयकत्वेन यथार्थज्ञानमेवाद्वैतज्ञानमित्युच्युते । वस्त्वैक्यविषयकं तु द्वैतज्ञानमित्युच्यते नन्वेतद्विरुद्धम् ॥

(२) अद्वैतज्ञानस्यैव वस्त्वैक्यज्ञानत्वेन वक्तव्यत्वादित्याशङ्क्य तद्घटयति-यथेति । ज्ञानार्थयोः सादृश्यलक्षणमैक्यमादायाऽद्वैतज्ञानं भेदज्ञानमित्युच्यते नतु वस्त्वैक्यविषयम् ॥

* गुरुपुत्रे गुरुपत्न्यांचेति

इति वचनात्. एतादृशस्य गुरौ वासोऽनुज्ञायते अन्यस्य गुरोराज्ञया दूरं गत्वा गृहाश्रम इति तदुक्तं "गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेत्" इति चेति ॥ १४ ॥

भगवदर्पणबुद्ध्याऽग्न्यादौ क्रियमाणं कर्म तस्य बुद्ध्या कर्तव्यं नतु तदैक्यबुद्ध्येत्याशयेनाह अग्नाविति—

"सगुरुर्यः क्रियाः कृत्वा वेदमस्मै ददाति च ।
उपनीय ददेद्वेदमाचार्यः स उदाहृतः ॥
एकदेश उपाध्याय ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्वमेभ्यो मातागरीयसि" ॥

इति वचनात् गुरुशब्देन सर्वे एते विवक्ष्यन्ते स्वधामभिरावासस्थानभूतैरप्राविष्टं सर्वगतं प्रविष्टवत्स्थितं अनुरूपवन्तं अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् "एवं द्विरूपो भगवान्हरिरेको जनार्दनः" इतिवचनात् ॥ १५ ॥

एवमाकारेण क्रियमाणस्य कर्मणः फलमाह एवं विध इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुरुवृत्तिरिति, गुर्वनुवृत्तिः ॥ ११ ॥

अञ्जनेत्यस्य टीकायां स्त्रीकर्तृकं निषिद्धमिति विचार्यम् अभ्यञ्जनेनाति विशेषात् ॥ १२ ॥

उषित्वेति युग्मकम् ॥ १३—३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्र हेतुः—नन्वग्नि रिति । रहः रहसि एकान्ते अन्यदा अन्यत्र अनेकान्तेपि यावदर्थंकृत् यावताऽवस्थानेनार्थःप्रयोजनं सिद्ध्येत्तावदेवस्थितिं कुर्यादित्यर्थः ॥ ९ ॥

ननु, निवृत्ताभिमानस्य विजितेन्द्रियज्ञानिनो युवतयः किमपकर्तुं प्रभवेयुः ? तत्राह—कल्पयित्वेति । ईश्वरोज्ञानसमर्थोऽपि इदं देहदैहिकविषयाभिमानादिकं बाधितानुवृत्तिन्यायेनाभासं कल्पयित्वा तत्त्वज्ञानेन विजितं नाममात्रेणैव स्थितमकिञ्चित्करं कृत्वाऽपि यावदात्मना मनसा सह वर्त्तेत. तावत् द्वैतं अहं पुमान् इयं स्त्री इदं मे प्रियमिदमप्रियमिति भेदबुद्धिर्न विरमेत्. ततश्च विपर्ययः पूर्ववत् संसारावृत्तिः। यद्वा ननु,त्यक्तसुतभगिन्यादिबन्धुवर्गस्य जितेन्द्रियस्य किमस्माद्भयं? तत्राह-कल्पयित्वेति। व्यवहारं व्यावहारिकं वस्तु च त्यक्त्वापि आत्मना मनसा यावत् यत् प्रमाणकम् इदम् आभासं इयं मे भगिन्येव इयं माता इयं सुतेत्यादिसम्बन्धाभासं कल्पयित्वा ईश्वरः तत्तत्कृतस्नेहोत्थसुखेन ईशीतः तावत् तत्प्रमाणकं द्वैतं भेदो न विरमेत् नरत्वस्य स्तोकत्वात् कल्पितत्वाच्च न काचिच्चिन्ता तत्राह—ततो हीति ॥ १० ॥

सर्वं सुशीलं इत्याद्युक्तं विकल्पेन कर्त्तव्यमेवेत्यर्थः ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियं च अवलेखां चित्र कर्म च अत्राभ्यङ्गादिकं स्वरूपत एव निषिद्ध्यते पूर्वन्तु कथञ्चिदापदि प्राप्तमपि स्वीकर्तृकं निषिद्धमिति भेदः ॥ १२—१३ ॥

यदीश्वरः शक्तस्तदा गुरोः काममपेक्षितं वरं दत्वा गृहं प्रविशेत् गृहस्थो भवेदित्यर्थः । तत्रैव वा वसेत् नैष्ठिकब्रह्मचारी स्यात् ॥ १४ ॥

स्वधामभिः स्वाश्रयैर्जीवैः सह तन्नियन्तृतया ॥ १५—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यदा अनैकान्ते यावदर्थं यथोपयोगं तल्लालनादिकम् कुर्यात् ॥ ९ ॥

सुतायां एव का कथा सर्वोऽपि लोकवेदप्रसिद्धः ग्राह्याऽग्राह्यभेदः यावन्महाप्रलयस्तावदनिवार्य एव यस्तु सर्वं प्राकृतमिदमेकमेव किमत्राग्राह्यं वाति साहसेन ग्राह्याभेदं न स्वीकरोति तस्य विपर्ययः स्यादित्याह—कल्पयित्वेति । ईश्वरः सर्वात्मा जगद्धेतुरिदं स्वशक्तिविकारभूतमाभासं आ समन्ततः ग्राह्याग्राह्यादितया भासमानम् आत्मना कल्पयित्वा यावद्वर्तेते तावत् द्वैतमिदं ग्राह्यमिदमग्राह्यमिति भेदो न विरमेत् अङ्गीकार्य्य एव भवेत् हि यस्तु नाङ्गीकरोति ततो अनङ्गीकारात् अस्यानङ्गीकर्तुः अमृतवद्विषोदकपानेन जलवदग्निस्नानेन विपर्ययः शरीरनाश एव स्यादित्यर्थः ॥ १० ॥

एतत्सर्वं सुशील इत्यादिनोक्तं गृहस्थस्य यतेस्तुर्य्याश्रमिण उपलक्षणं यतेरित्युक्तिर्वानप्रस्थस्यापि समाम्नातम् गृहस्थस्य गुरुशुश्रूषायां विकल्पं वदन् ब्रह्मचारिप्रभृतिभिर्नित्यं गुरुशुश्रूषा यथोपयोगं कार्येति द्योतयति गुरुवृत्तिरिति गुरौ वृत्तिर्वर्तनं तच्छुश्रूषेत्यर्थः गृहस्थस्य विकल्पेन बोध्या तत्र हेतुगर्भं विशेषणम् ऋतुगामिन इति आवश्यकर्तुगमनादिपरवशस्य नित्यं गुरुशुश्रूषायामावकाशाभावादित्यर्थः ॥ ११ ॥

अञ्जनं नेत्रयोः अभ्यञ्जनं शिरसः उन्मर्दश्च उन्मर्दनं शरीरस्य स्त्री च अवलेखा च स्त्र्यादिप्रतिकृतिश्च आमिषं च तेषां द्वन्द्वैक्यम् मधु मद्यं स्रगादिकान् च ये धृतव्रतास्ते त्यजेयुः ॥ १२ ॥

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां त्रयीं वेदत्रयीम् द्विज त्रैवर्णिकः अधीत्य तदर्थं चावबुध्य ॥ १३ ॥

यदीश्वरः समर्थस्तर्हि गुरोः कामं यथेष्टं वरं दत्वा यथेष्टां दक्षिणां दत्वा गृहं प्रविशेत् गृही भवेत् विषयेभ्यो विरक्तश्चेद्वनं वनोपलक्षितं जितेन्द्रियवासयोग्यं स्थानं प्रविशेत् तत्र द्वैविध्यमाह—प्रव्रजेत् सन्यासी भवेत् तत्र वा वसेत् तत्रैव ब्रह्मचर्याश्रमे वसेत् नैष्ठिको भवेदित्यर्थः ॥ १४ ॥

भूतैः चेतनाचेतनरूपैरधोक्षजशक्तिमयैः स्वधामभिः अधोक्षजाधिष्ठितैः सहाधोक्षजं सर्वभूतेषु अप्रविष्टमपि विभुत्वरूपस्य शक्तिद्वयं वितत्य संस्थितस्य प्रवेशाभोगात् प्राविष्टवत्पश्यत् एकैकस्मिन् भूते चराचरभगवद्रूपाणि पश्येत् तथोक्तम्—

"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषः स्त्वन्यः परमात्मेत्युदाहृतः ॥
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः" ।

अग्नौ गुरौ च तदभेदेनोपासनार्थं पश्येत् आत्मनि चोपासके आवि कृतमङ्गलमूर्त्तिं पश्येदित्यग्न्यादिपृथक् निर्देशाभाप्रायः ॥ १५ ॥

एवंविधः विदितं विज्ञानं तत्वत्रयज्ञानं येन सः ब्रह्मचारी वानप्रस्थो वा यतिर्वा गृही वा चरन् प्रारब्धकर्मफलं भक्षयन् परमधोक्षजं ब्रह्माधिगच्छति भगवत्प्राप्तिरूपा मुक्तिस्तत्वत्रयज्ञानपूर्वकभगवद्ध्याननिष्ठा यस्मिन्नाश्रमे भवेत्तस्मै वाश्रमिण स्यादिति फलितोर्थः ॥ १६ ॥

भाषा टीका ।

क्योंकि ? यह निश्चित और प्रसिद्ध है, कि—स्त्री अग्नि रूप है और पुरुष घृत कुंभमय (घीके कुप्पे के समान) है, इस लिये प्रयोजन से अधिक अपनी पुत्री को भी एकांत में त्यागदे ॥ ९ ॥

ज्ञान समर्थ होकर भी भान होने वाले इस जगत को जवतक अपने मनसे द्वैत भाव से अर्थात् स्त्री पुत्रादि रूप भेद भाव कल्पना करके वर्त्तमान है, तव तक विहित कर्मों से विराम को न प्राप्त होवे क्योंकि ? विराम को प्राप्त होने से ही इसको विपर्यय है अर्थात् उत्तरोत्तर संसार है ॥ १० ॥

ये जो सुशील मितभोजी इत्यादि षष्ठ श्लोक में कहे हुए धर्म हैं, सो गृहस्थ के और यति के भी हैं, और ऋतु गामी होने से गृहस्थ को गुरुकी वृत्ति में विकल्प है ॥ ११ ॥

जो अध्ययनादि व्रत धारण करने वाले हैं उनको अंजन (काजर) अभ्यंजन, उन्मर्दन, स्त्री चित्र दर्शन, आमिष मधु माला चंदनलेप और अलंकार ये सब वर्जित हैं ॥ १२ ॥

ब्राह्मण इस प्रकार गुरुकुल वासकर षट् अङ्ग और उपनिषदों सहित वेद का यावत्प्रयोजन और बुद्धि बलके अनुसार अध्ययनकर के गुरूजीको दक्षिणा देकर गुरुकी आज्ञापाकर यथेष्ट गृहमें प्रवेश करे, यदि समर्थ होय तो आज्ञालेकर वनमें जावे अथवा संन्यास ग्रहण करे, वा गुरु के समीप ही निवास करे ॥ १३ ॥ १४ ॥

अग्नि गुरु आत्मा तथा सर्वभूतों मे अपने आश्रयरूप भूतों सहित अप्रविष्ट भी ईश्वर को नियमन कर्तृत्व बुद्धिसे प्रविष्ट सरीका देखें ॥ १५ ॥

इस प्रकार का ब्रह्मचारी हो वानप्रस्थ हो यति हो वा गृहस्थ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसम्मतान् ।
यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहाञ्जसा ॥ १७ ॥
न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ।
अग्निपक्वमथाऽऽमं वा अर्कपक्वमुताहरेत् ॥ १८ ॥
वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ।
लब्धे नवेनवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥
अग्न्यर्थमेव शरणमुटजं वाऽऽद्रिकन्दरम् ।
श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥ २० ॥
केशरोमनखश्मश्रुमलानि जटिलो दधत् ।
कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ॥ २१ ॥
चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ।
द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥
यदा ऽकल्पः स्वक्रियायां व्याधिभिर्जरया ऽथवा ।
आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥
आत्मन्यग्नीन्समारोप्य सन्न्यस्याहंममात्मताम् ।
कारणेषु न्यसेत्सम्यक्सङ्घातं तु यथाऽर्हतः ॥ २४ ॥

भाषा टीका ।

हो ऐसे आचरण करता हुआ विद्वान को प्राप्त होकर परब्रह्म को प्राप्त होताहै ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऋषिलोकं महर्लोकम् ॥ १७ ॥

अकृष्टमकृष्टपच्यम् अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः । अर्कपक्वं फलादि आहरेदश्नीयात् ॥ १८ ॥

वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितानित्यान् पुराणं पूर्वसञ्चितम् ॥ १९ ॥

हिमादीन्सहत इति तथा ॥ २० ॥

केशादीन्मलं चाप्रक्षालनेन धारयन् कमण्डल्वादींश्च दधत् ॥ २१ ॥

कृच्छ्रतस्तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तथा चरेत् ॥ २२ ॥

द्वादशाब्दाद्यनन्तरमपि यदि स्वधर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् यदि तु ज्ञानाभ्यासे योग्यस्तर्हि संन्यसेदित्युत्तराध्याये वक्ष्यति तदुभयरहितस्य तु यत्कृत्यं तदाह, यदाऽकल्पोऽसमर्थः आन्वीक्षिक्यां विद्यायां ज्ञानाभ्यासे ॥ २३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत्समाप्ति । यथाऽर्हतो यथायोग्यं स्वकारणेष्वाकाशादिषु संघातं देहं न्यसेत्प्रविलापयेत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावद्वानप्रस्थधर्मान् वक्तुं प्रतिजानीते—वानप्रस्थस्येति । मुनीनां सम्मतान् वानप्रस्थस्य नियमान् धर्मान् वक्ष्यामि. नियमान् विशिनष्टि—यान्नियमानिह लोके ऽनुतिष्ठन् मुनिरञ्जसा ऋषीणां लोकं महर्लोकं प्राप्यं भगवल्लोकं वा गच्छेत् ॥ १७ ॥

नियमानाह—नेति । कृष्टपच्यं कृष्याद्युपायैर्निष्पन्नं शाल्यन्नादिकं नाश्नीयाद्वनस्थ इति शेषः । अकृष्टपच्यमपि फलमूलादिकमकालतः पाककालात् पूर्वमेव परिपाकावस्थायाः पूर्वमेव तथाग्निपक्वमामञ्च नाश्नीयात् उतापितु अर्कपक्वं सूर्यकिरणपक्वं फलादिकमेवाहरेदश्नीयात् ॥ १८ ॥

एवं वानस्थो धर्म उक्त अथावश्यकान् नियमानाह-वन्यैरिति । वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितान्नित्यान्निर्वपेत् नीवारादिनिष्पन्नैरेव चरुपुरोडाशैर्यथोदितधर्मान् कुर्यादित्यर्थः । नवेनवे नूतनेनूतनेऽन्नाद्येऽन्ने लब्धे पुराणं पूर्वसञ्चितमन्नाद्यं परित्यजेत्॥१९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अग्न्यर्थमग्नीनां रक्षणार्थमेव उटजं पर्णशालात्मकं शरणं स्वगृहं कुर्यादथवाद्रिकन्दरं पर्वतगुहां वा श्रयेत स्वयन्तु हिमं च वायुश्चाग्निश्च वर्षश्च सूर्यातपश्च तान्सहत इति हिमवाय्वग्निवर्षार्कातपषाट् ॥ २० ॥

जटाः सन्त्वस्येति तादृशः केशादीन् देहमलञ्चाघमर्षणेन धारयन् कमण्डल्वादींश्च दधदग्निपरिच्छदाः स्रुक्स्रुवाद्युपकरणानि च दधत् ॥ २१ ॥

कृच्छ्रतः क्लेशाद्यथा बुद्धिर्न विपद्येत न नश्येत् तथा द्वादशाब्दान् संवत्सरानष्टौ वा चतुरो वाब्दौ द्वौ वा एकं वा चरेन्नियमानिति शेषः ॥ २२ ॥

यदा द्वादशाब्दाद्यनन्तरं व्याध्यादिभिरुत जरया वा स्वक्रियायां स्वकीयधर्माचरणे आन्वीक्षिक्यामात्मविचाररूपायां विद्यायां तुरीयाश्रमधर्मे चाशक्तस्तदाऽनशनादिकमादिशब्देनाग्न्यारोपणादिकं वक्ष्यमाणं विवक्षितं तत्कुर्यात् ॥ २३ ॥

तदेवाह—आत्मनीति । अग्निनात्मनि समारोप्याहङ्कारममकारौ संन्यस्य त्यक्त्वा यथायोग्यं स्वस्वकारणे संघातं भूतसंघातरूपं शरीरेन्द्रियजातादिकं सम्यक् न्यसेल्लीनमनुसन्दधीत ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मचारिवानप्रस्थनियमानां कृच्छ्रसाध्यत्वेन साम्यात्प्रथमाश्रमधर्मकथनानन्तरं वानप्रस्थधर्मानाह—वानप्रस्थस्येति । ऋषेः सर्वज्ञस्य लोकं वैकुंठं "त्वमग्ने प्रथमो अङ्गिरसः" इति श्रुतेः "ऋषिर्हरौ तापसे च ज्ञानवत्यपि कीर्तितः" इति ॥ १७ ॥

कृष्टपच्यं कर्षणादिना पक्वं व्रीह्यन्नं अकालतो विहितकालमुल्लङ्घ्य आममग्न्यादिनाऽनात्तपाकम् आमलकादि ॥ १८ ॥

वन्यैर्देवव्रीह्यादिभिः कालचोदितान् तत्तत्कालविहितान् ॥ १९ ॥

अग्न्यर्थमग्निरक्षार्थम् उटजं पर्णशालां शरणं गृहं अन्यदा हिमादिकं श्रयेत आतपनमातपः ॥ २० ॥

अग्निपरिच्छदा दर्भादयः ॥ २१ ॥

न विपद्येत क्लिष्टो न भवेत् ॥ २२ ॥

अकल्पोऽसमर्थः आन्वीक्षिक्यां आत्मविचारलक्षणायाम अनशनमशनत्यागः तत्राद्यको मासे गते पक्षे वा दिवसे वा ऽह्नीयादित्यादिकमादिपदेन गृहीतं यथाह, याज्ञवल्क्यः "पक्षे गते वा प्राश्नीयान्मासे वाऽहनि वागते" इति ॥ २३ ॥

म्रियमाणेन पुरुषेण ऽध्यात्मं कार्यकारणजातं यत्तत्वेदं कार्यमेतस्मिन्कारणे विलीयत इति ध्यानं कर्तव्यमित्यभिप्रायेणाह, कारणेष्विति । सङ्घातं कार्यजातं न्यासो ज्ञानपूर्वकं ध्यानं "कार्यस्य कारणलयज्ञानमात्रं विलापनम्" इति वचनात् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अकालतः पाककालात्पूर्वमेव पक्वमित्यर्थः ॥ १८ ॥

वन्यैः नीवारादिभिः निर्वपेत् दद्यात् कालचोदितान् विहितान् ॥ १९ ॥

हिमादीन् सहत इति सः ॥ २० ॥

मलानि दन्ताद्यधावनोत्थानि ॥ २१ ॥

यदा द्वादशाब्दादि मध्य एव अकल्प- असमर्थः आन्वीक्षिक्यां ज्ञानाभ्यासे ॥ २२—२३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत् समाप्ति । यथार्हतः यथायोग्यं स्वकारणेष्वाकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऋषिलोकं महरादिलोकं सकामश्चेद्व्रजेत् उत्कर्षेण अधोक्षजध्याननिष्ठस्य तु मुक्तिरुक्तैवेति विवेकः ॥ १७ ॥

कृष्टपच्यं कृष्या निष्पन्नं नाश्नीयात् अकृष्टमकृष्टपच्यमपि फलादिकमकालतः पक्वं नाश्नीयात् वन्यैर्वनोद्भवैः फलादिभिः कालचोदितान् कालिकाले विहितान् चरुपुरोडाशान् निर्वपेत् दद्यात् पुराणं पूर्वसञ्चितम् ॥ १८ ॥ १९ ॥

स्वयं हिमादीन् सहते इति तथा अग्न्यर्थं तु शरणं वृष्ट्यादिनिवारकं गृहमुटजम् पर्णादिनिर्मितमद्रिकन्दरम् वा श्रयेत् ॥ २० ॥

जटाः सन्त्यस्येति जटिलः केशादीन् मलं चोद्वर्तमाना द्यकरणेन कमण्डल्वादीन् अग्निपरिच्छदान् स्रुक्स्रुवादीन् दधत् चरेदित्युत्तरेणान्वयः ॥ २१ ॥

द्वादशाब्दान् अष्टौ वा चतुरो वा एकमब्दं वा यथा कृच्छ्रतः क्लेशाद्बुद्धिर्न विपद्येत नावसीदेत् तथा वने चरेत् विचरेत् ॥ २२ ॥

यदा स्वक्रियायां स्वनियमे अकल्पः असमर्थः स्यात्तदा आन्विक्षिक्यां ज्ञानाभ्यासे वर्तेत अनशनादिकं वा कुर्यात् ॥ २३ ॥

अनशनादिकं करिष्यतः पूर्वकृत्यमुपदिशति-आत्मनीत्यादिना । आत्मनि अग्नीन्समावेश्य प्रत्यहं पूज्यानग्नीन्परमपूज्ये आत्मनि परमात्मनि विसृज्य यथार्हतो यथायोग्यं स्वकारणेषु आकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् लीनं भावयेत् ॥ २४ ॥

भाषा टीका ।

नारदजी बोले, कि—अब हम मुनि संमत वानप्रस्थों के उन नियमों को कहते हैं, इहां पर मनन शील होकर जिन के अनुष्ठान करने से ऋषि लोक को प्राप्त होता है, ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खे खानि वायौ निश्वासांस्तेजस्यूष्माणमात्मवान् ।
अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥
वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि ।
पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥
मृत्यौ पायुं विसर्गं च यथा स्थानं विनिर्दिशेत् ।
दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥
रूपाणि चक्षुषा राजन् ! ज्योतिष्यभिनिवेशयेत् ।
अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥
मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ।
कर्माण्यध्यात्मना रुद्रे यदहम्ममता क्रिया ।
सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥
अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ।
कूटस्थे तच्च महति तदव्यक्ते ऽक्षरे च तत् ॥ ३० ॥
इत्यक्षरतया ऽऽत्मानं चिन्मात्रमवशेषितम् ।
ज्ञात्वा ऽद्वयो ऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे आश्रमधर्मो नाम द्वादशोऽध्यायः ॥ १२ ॥

भाषाटीका ।

वानप्रस्थ, जोतने बोने से पैदा हुए अन्न को न भोजन करे, और विना जोते बोये होने वाले को भी यदि विना समय का हो, तो वर्जन करे, अग्नि पक्व वा कच्चा वा सूर्य के तेज से पक्व हो उसका आहार करे, ॥ १८ ॥

वन में स्वयं उत्पन्न होने वाले नीवारादि धान्य से समय २ पर शास्त्र विहित पुरोडाशादि का निर्वाप करे, नये २ अन्नादि के प्राप्त होने पर पुराने संचय का त्याग करता जावे ॥ १९ ॥

अग्नि की रक्षा मात्र के लिये कुटी वा पर्वतादि की कंदरा (गुहा) का शरण ले, और आप तो स्वयं हिम वायु अग्नि वर्षा सूर्य का आतप (घाम) इन सबों को सहे ॥ २० ॥

केश मस्तक पर रोम शरीर पर, नख डाढी मूँछ, और शुद्ध स्नान से शरीर पर मैल, जटा कमण्डलु मृग-चर्म दण्ड वल्कल और अग्नि के उपकरण [दर्भादि] को धारण करे ॥ २१ ॥

इस प्रकार वानप्रस्थ द्वादशवर्ष आठ वर्ष चार वर्ष दो वर्ष वा एकही वर्ष वन में निवास करे जिस प्रकार अति दुःख से शरीर न नष्ट होजावे, ॥ २२ ॥

जब व्याधियों से वा जरा अवस्था से अपने क्रिया करने में असमर्थ होजावे, अथवा ज्ञानाभ्यास करने में भी अशक्त होजावे, तब अनशन व्रत को धारण करले, अर्थात भोजनादि का त्याग करदे ॥ २३ ॥

अहंकार ममकार का त्याग कर आत्मा में अग्नि का समारोपण करके भूत संघात शरीर को अपने २ कारणों में न्यास करे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव विभज्य दर्शयति, खे आकाशे खानि देहगतच्छिद्राणि आत्मवान्धीमान् शेषमस्थिमांसादिकाठिन्यम् ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीररूपस्याध्यात्मादित्रयस्य लयमाह—वाचमित्यादिना । तत्र यद्यपि यथोद्भवं लयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहङ्कारादिषु लयो वाच्यस्तथापीह तेषां लयभावने यमद्वितीयात्मप्रतिपत्तिपरेति यथाकथञ्चिल्लये भाव्ये देवतानां प्रवर्तकत्वेन प्राधान्यादिन्द्रियतद्विषययोर्देवतासु लयः कथ्यते वक्तव्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र पदानि पादौ वयसि विष्णौ ॥ २६ ॥

स्वनादेन शब्देन सह अध्यात्मनि वायौ अध्यात्मविदिति पाठे वायाविति ज्ञातव्यम् ॥ २७ ॥

ज्योतिष्यादित्ये रूपाणि रसगन्धयोस्त्विन्द्रियाद्याकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्येन्द्रियस्य विषये लयमाह, प्रचेतसा सह जिह्वां रसनमप्सु रसरूपासु घ्राणशब्देनाश्विनोरप्युपलक्षणं अश्विभ्यां सह घ्राणं ग्रैर्गन्धैरुपलक्षितायां क्षिताविस्यर्थः ॥ २८ ॥

परे कवौ ब्रह्मणि अध्यात्मनाऽहङ्कारेण अध्यात्मतामितिपाठे कर्मणयहङ्कारं चेत्यर्थः कथम्भूते रुद्रे यद्यस्मादहंममतापूर्विका क्रिया भवति तस्मिन् सत्त्वेन चेतनया गुणैर्गुणत्रयकार्यैः प्रागवशिष्टैर्देवैः सह । यद्वा सत्त्वादिभिर्गुणैर्हेतुभूतैः वैकारिकं भोक्तृत्वादिविकारवन्तं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥ २९ ॥

ननु, विकारवतः कथं परेऽविकारे लयः स्यात् ? विकारहेतूनां सर्वोपाधीनां लयद्वारेणाह—महीति । अदो ज्योतिः तच्च नभः कूटस्थेऽहन्तत्त्वे तच्च कूटस्थं महति महत्तत्त्वे तदव्यक्ते प्रधाने तच्चाव्यक्तमक्षरे परमात्मनि ॥ ३० ॥

इति सर्वोपाधिलयाद्धेतोरवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वाऽद्वयः सन्विरमेत् दग्धकाष्ठो यथाऽनलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव सविस्तरमाह—खइत्यादिना । खे आकाशे खानि शरीरगतच्छिद्राणि प्रलीनानि भावयेत् निश्वासान् देहगतानुच्छ्वासादीन् प्राणान् वायौ तथा ऊष्माणं तेजसि न्यसेत् आत्मवान् धीमान् असृग्रुधिरं च श्लेष्म च पूयं मूत्रादिकं चेत्येतान्यप्सु शेषमस्थिमांसादिकं कठिनांशं क्षितौ इत्येवं यथोद्भवं यद्यत उत्पन्नं तथा तदनतिक्रमेण स्वकारणेषु प्रलीनानि अनुसन्दधीत ॥२५॥

एवंभूतसङ्घातात्मकशरीरावयवानां यथोद्भवं स्वस्वकारणे लयाऽनुसन्धानमुक्तमथ सव्यापाराणां वागादीन्द्रियाणां स्वाऽधिदैवतेषु लयानुसन्धानप्रकारमाह—वाचामिति । यद्यप्यधिदैवतेभ्यो नेन्द्रियाणामुत्पत्तिरिति तत्र तेषां लयाऽनुसन्धानकथनमसङ्गतं तथापि तेषां तत्प्रवर्तकत्वेन प्रधान्यात्तैस्तावत्संश्लेषाऽनुसन्धानं तेषामपि स्वकारणे लयानुसन्धानाय कथ्यते——वक्तव्यमुक्तिः भावे तव्यः सवक्तव्यां सोक्तिकां वाचं वागिन्द्रियमग्नावधिदैवते विनिर्दिशेदित्युत्तरेणान्वयः । करौ शिल्पमादानादिरूपं व्यापारं चेन्द्रे तदधिदैवते गत्या सह पादौ वयसि कालात्मके विष्णौ—रत्या सहोपस्थमिन्द्रियं प्रजापतावधिदैवते ॥ २६ ॥

सोत्सर्गं पुरीषोत्सर्गादिव्यापारसहितं अपानं पायुमिन्द्रियं मृत्यावधिदैवते यथास्थानं यत् यस्याधिदैवतरूपं स्थानं तदनतिक्रमेण निर्दिशेत् संश्लिष्टमनुसन्दधीत एवं कर्मेन्द्रियाणां तदधिदैवते संश्लेषाऽनुसन्धाने क्रम उक्तः । अथ श्रोत्रादिज्ञानेन्द्रियाणामाह, दिक्ष्विति । श्रोत्रमिन्द्रियं नादेन शब्देन विषयभूतेन सह दिक्षु अधिदेवतासु त्वचमिन्द्रियं स्पर्शेन विषयेण सहाध्यात्मनि वायावधिदैवते; हे राजन् ! चक्षुरिन्द्रियेण सह रूपाणि तद्विषयभूतानि ज्योतिषि सूर्येऽधिदैवतेऽभिनिवेशयेदभिनिविष्टं संश्लिष्टं भावयेत् ॥ २७ ॥

जिह्वां रसनेन्द्रियमप्सु रसेषु विषयभूतेषु अप्शब्दो रसोपलक्षकः प्रचेतसा वरुणेनाऽधिदैवतेन सहाभिनिवेशयेदित्यनुषङ्गः त्रयाणां संश्लेषमात्रविवक्षया प्रचेतसेत्यप्रधाने तृतीया ग्रैर्गन्धैर्विषयैः सह घ्राणमिन्द्रियं क्षितौ क्षितिशब्दोपलक्षितयोरश्विनोर्न्यसेत् मनोरथैर्व्यापारैः सह मन इन्द्रियं चन्द्रेऽधिदैवत बोध्यैर्विषयैः सह बुद्धिं परे श्रेष्ठे कवौ चतुर्मुखेऽध्यात्मना आत्मनि देहवर्त्तमानेनाहङ्कारेण सह तत्कर्माणि देहात्माभिमानादिरूपाणि अहङ्काराधिदैवते रुद्रे विन्यसेत् अहङ्कारकर्माण्येव दर्शयति, यद्यस्मादहंकारात् अहंममताक्रियाः । देहेऽहंबुद्धिर्देहानुबन्धिषु ममकारस्तन्मूलाः क्रियाः प्रवृत्तयश्च भवन्ति चित्त चित्तावस्थमन्तःकरणं सत्त्वेन सत्त्वगुणकार्यभूतस्वच्छत्वप्रकाशत्वादिरूपचित्तवृत्त्या सह क्षेत्रज्ञेऽधिदैवते न्यसेत् ततो वैकारिकं सात्त्विकाहङ्कारं गुणैः स्वकार्यभूतैरिन्द्रियैः सह परे तत्कारणे महत्तत्त्वे न्यसेत् ॥ २८ ॥ २९ ॥

एवं वैकारिकाहङ्कारस्य महति लयाऽनुसन्धानमुक्तं पूर्वं खे खानीत्यादिना तत्तत्कार्यप्रलयानुसन्धानमुक्तम् अथ तत्त्वैः सह तत्कारणभूतस्य तामसाहङ्कारस्य महति लयाऽनुसन्धानप्रकारमाह—अद्भिरित्यादिना । तावत्क्षितिमप्सु आपो ज्योतिषि अदः ज्योतिर्वायावमुं वायुं नभसि आकाशे तच्च कूटस्थे तामसाहङ्कारे तच्च महति महत्तत्त्वे तच्च महत्तत्त्वम् अव्यक्ते चित्समष्टिसंसृष्टे अचित्समष्ट्यात्मके प्रधाने तच्चाक्षरे परमात्मात्मके जीवे न्यसेत् ॥ ३० ॥

अत एवमवशेषितं प्रत्यगात्मानमक्षरतया परमात्मशरीरात्मकत्वस्वाभाविकस्वरूपतया ज्ञात्वाऽद्वयः आत्मनि जातिगुणाद्यभिमानरहितः विरमेत् दग्धयोनिर्निर्दग्धकाष्ठोऽनलोऽग्निर्यथा विरमति तद्वत् धर्मानुष्ठाने ऽशक्तो वानप्रस्थ एवमनुसन्दधानो देहत्यागायानशनव्रतं कुर्यादित्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथार्हत इत्युक्तं विवृणोति—खे खानीति । खे आकाशे खानि शरीरावच्छिन्नाकाशानि श्वासं शरीरवायुबाह्यवायौ शारीरमूष्माणं कारणतेजसि आत्मवान् परमात्मज्ञानवान् वशीकृतमना वा श्लेष्मपूयासृक्कार्याण्यप्सु लीयन्त इति चिन्तयेत् शेषं गन्धं क्षितौ नन्वाकाशादेर्लाघवादीनामुत्पत्तेः कथमियतामेव लयश्चिन्त्यत इति तत्राह—यथोद्भवमिति—

"आकाशाल्लाघवं सौक्ष्मं शब्दं श्रोत्रं तथा बलम् ।
वायोस्तु प्रेरणा चेष्टा व्यूहनं सौक्ष्म्यमेव च ॥
अग्नेस्तु दर्शनं शक्तिरौष्ण्यं रूपप्रकाशकम् ।
रसेभ्यो रसनं शैत्यं स्नेहक्लेदनमार्दवम् ।
भूमेर्गन्धस्तथा घ्राणं गौरवं मूर्तिरेव च" ॥

इति वचनात् उत्पत्त्यनुसारेण लयश्चिन्तनीय इत्यर्थः ॥ २५ ॥

इदानीं वागादीन्द्रियाणां अग्न्यादिदेवताधीनत्वमपि चिन्तनीयमित्याह—वाचमिति । सवक्तव्यमिति क्रियाविशेषणं प्रजापतौ दक्षे ॥ २६ ॥

यथास्थानमित्यनेनाभिमानिनामभिमन्यमानानां तत्तदुत्पत्तिकारणमनुसृत्येत्युच्यते सनादेन श्रोतव्येन सह त्वचं त्वगिन्द्रियं स्पर्शेन सह वायाविति शेषः ॥ २७ ॥

ज्योतिष्याद्दित्ये निवेशयेत् निविशतीति चिन्तयेत् जिह्वां रसतेनेति शेषः परे कवौ बृहस्पतौ उशनसोऽपि कविशब्दवाच्यत्वात्तद्व्यावृत्त्यर्थं पर इति अध्यात्मनाऽहङ्कारेण सह कर्माणि रुद्रे तत्र हेतुर्यदहमिति क्रिया यत् अहं संमता अहङ्कारादुत्पन्नत्वेन संमता इति यत्तस्मादिति शेषः सत्त्वेन साधुपुण्यकर्मणा सह चित्तं क्षेत्रज्ञे हिरण्यगर्भे निवेश्य एतल्लक्षणं विलयं स्मृत्वा वैकारिकनामानं हिरण्यगर्भं गुणैः सह क्षेत्रज्ञाख्ये परे परमात्मनि लक्ष्मीद्वारा लयमार्गं चिन्तयेत्—

"चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि ॥
क्षेत्रज्ञाख्ये लापयेच्च ततोनान्यत्स्मरेद्बुधः"

इति चात्रमानम् ॥ २८ ॥ २९ ॥

इदानीमवादीनां लयप्रकारं निरूपयति—अप्स्विति । तच्च नभः कूटस्थे वैकारिकतैजसतामसकूटरूपे ऽहङ्कारतत्त्वे तदहङ्कारतत्त्वं महति महत्तत्त्वे तन्महत्तत्त्वमव्यक्ते तदव्यक्तमक्षरे हरौ विलयप्रकारं स्मरेत् जडस्य स्वकारणैक्यमभिमानिनो जीवस्य प्रवेशलक्षणं तत्तत्कार्यस्थहिरण्यगर्भस्योत्तररूपेणैक्यं हिरण्यगर्भस्थहरेरप्युत्तरोत्तररूपैकीकरणमिति लयभेदं तु शब्दो ज्ञापयति ॥ ३०

इति शब्दो लयसमाप्तिसूचकः "कूटस्थोऽक्षर उच्यते" इति वचनात् अक्षरनाम्न्यां चित्प्रकृतौ स्थित्वा ऽक्षरलक्षणानित्यत्वहेतुत्वादक्षरनामत्वेन स्थितमात्मानं परमात्मानं चिन्मात्रमवशेषितं सृष्ट्यादिव्यापारोदासीनं ज्ञात्वा ऽद्वयो हरिव्यतिरिक्तवस्तुस्वातन्त्र्यस्मरणरहितो ऽथ कृत्याद्विरमेदित्यन्वयः कृत्याद्विरमोक्तिरत्र कथमित्याह—दग्धयोनिरिति । दग्धयोनिरिन्धनलक्षणा येन स तथा यथाऽग्नेरिन्धनदहनात्परं कृत्यं नास्ति तथा श्रीनारायणोपासकस्य सविकासं तत्त्वज्ञानात्परं कृत्यं नेति भावः "न हरिस्मरतः कृत्यं दग्धेन्धनहुताशवत्" इति वचनात् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

खानि देहच्छिद्राणि अभिनिवेशयेदित्युत्तरेणैव सर्वेषामन्वयः शेषं अस्थिमांसादिकाठिनांशम् ॥ २५ ॥

स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीरलयमाह—वाचमिति । इन्द्रियाणां तद्विषयाणाञ्च प्रवर्त्तकत्वेन देवतास्वेवात्र लय उक्तः, वयसि विष्णौ यथास्थानं स्थानमनतिक्रम्य तत्तत् स्थानं स्पृष्ट्वा विनिर्दिशेत् प्रथमं इमं वाचमग्नौविलापयामीति प्रयुञ्जीत ततोऽभिनिवेशयेदित्यन्वयः ॥ २६ ॥

स ज्ञानी नादेन सहेत्यर्थः अध्यात्मनि वायौ ज्योतिषि सूर्ये ॥२७॥

प्रकृष्टं चेतो यत्र स प्रचोतोमधुरादिरसस्तेन सह जिह्वां अप्सु जलाधिष्ठातरि वरुणे घ्रेयैर्विविधगन्धैः सह घ्राणेन्द्रियं क्षितौ चीयते लीयते ऽत्रेति क्षितिस्तदधिष्ठातृदेवता तस्यामश्विनावित्यर्थः। मनोरथैर्मननीयैर्विषयैः बोध्यैर्बुद्धिविषयैः परे कवौ ब्रह्मणि अध्यात्मना अहङ्कारेण सहकर्माणि तद्बुद्धिपयान् रुद्रे यद्यस्मादहं ममता पूर्विका क्रिया भवति तस्मिन् रुद्रे सत्त्वेन चेतनया सहक्षेत्रज्ञेचित्ताधिष्ठातरि वासुदेवे गुणैर्गुणकार्यैर्देवैः सहेति वासुदेवस्य गुणकार्यत्वाभावात्तदितरैरित्यर्थः । वैकारिकं जीवं परे ब्रह्मणि ॥ २८—२९ ॥

ननु, तदपि कथमद्वयब्रह्मज्ञानं, स्यात् ? समष्टितत्त्वानां पृथिव्यादीनां वर्त्तमानत्वादिति चेत्तेषामपि यथोद्भवं लयं ज्ञातवत एवेत्याह—अप्स्विति । अदो ज्योतिः अमुं वायु तच्च नभः कूटस्थे ऽहङ्कारे तच्च कूटस्थं महति महत्तत्त्वे तदव्यक्तं प्रधाने तदक्षरे परमात्मनि ॥ ३०—३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे द्वादशोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं स्थूलदेहलयमुक्त्वा सूक्ष्मदेहावयवानां सविषयाणामिन्द्रियाणां तत्तत्प्रवर्त्तके तत्तदधिदैवते तत्तन्नियम्यतया सम्बन्धमात्रं सूचयन् तत्तत्कारणे लयमाह—वाचमिति त्रिभिः । वागादिकं वक्तव्यादिसहितमग्न्यादौ प्रवर्त्तके नियम्यतया विनिर्दिशेत् यथास्थानम् उत्पत्तिस्थानमनतिक्रम्याभिनिवेशयेच्च विलीनं भावयेदिति त्रयाणामन्वयः । अग्न्याद्युत्पत्तिस्थानं सात्त्विकाहंकारस्तेषां लयं तत्र भावयेत् वागादीनामुत्पत्तिस्थानं राजसाहंकारस्तेषां लयं तत्र भावयेत् अथ पदयोजना सवक्तव्यां वाचमग्नौ अधिदैवते नियम्यतया विनिर्दिशेत् यथास्थानमभिनिवेशयेच्च एवमग्रेपि पदानि पादौ वयसिविष्णौ ॥ २६ ॥

सनादेन शब्देन सह अध्यात्मनि अधिदैवते वायौ ॥ २७ ॥

ज्योतिषि आदित्ये अप्सु रसरूपां सलोलुपां जिह्वां रसनेन्द्रियं प्रचेतसा अधिदैवतेन प्रवर्त्यां यथास्थानं निवेशयेत् ग्रैवेगन्धैः सघ्राणम् अश्विदैवत्यं क्षितौ उत्पत्तिभूमौ राजसाहंकारे एव ॥ २८ ॥

अन्तःकरणस्य चतुर्विधस्य लयं सात्त्विकाहङ्कारे आह—मन इति । मनः मनोरथैः सह चन्द्रे बोध्यैः सह बुद्धिं परे कवौ ब्रह्मणि च कर्माणि अहङ्कारविषयाणि अध्यात्मना अहंकारेण सह यद्यस्माद्रुद्रात्प्रवर्तकादहंममतापूर्विकाक्रिया भवति तस्मिन् रुद्रे च चित्तं गुणैश्चित्तविषयभूतैः सह क्षेत्रज्ञे च नियमतया स्थितं विभावयेति शेषः सत्त्वेन वैकारिकाहंकारेण कारणेन योजयेदिति शेषः अन्तःकरणचतुष्टयं वैकारिके अभिनिवेशयेदित्यर्थः । वैकाविकं तु परे तत्कारणे महत्तत्वे योजयेदित्यर्थः ॥ २९ ॥

महाभूतानां तामसाहंकारे तस्य महत्तत्त्वे तस्य प्रकृतौ प्रकृतेः परमात्मनि च लयमाह—अप्सु इति । क्षित्यादिभूतानि अवादिषु न्यसेत् कूटस्थे तामसाहङ्कारे अव्यक्ते प्रकृतौ तत्तदव्यक्तमक्षरे परमात्मनि न्यसेत् चकारोऽनुक्तसमुच्चयार्थः ॥ ३० ॥

इत्येवं दग्धयोन्यनल इवाद्वयः देहेन्द्रियादिद्वयरहितोऽत एवावशेषितं चिन्मात्रं ज्ञानस्वरूपमात्मानं जीवं अक्षरतया परमात्मांशत्वेन तदपृथक्तयाज्ञात्वा विरमेत् मुक्तो भवेत् ॥ ३१ ॥

इतिश्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशोऽध्यायः ॥ १२ ॥

भाषा टीका ।

जैसे कि ! छिद्रों को आकाश में श्वासों को वायु में उष्णता को तेज में, रुधिर कफ पीवको जल में बाकी पृथिवी के विकार अस्थि आदि को पृथिवी में इस प्रकार जो जहां से उत्पन्न है उसको उसी तत्त्व में लीन होने का अनुसन्धान करता जाय ॥ २५ ॥

ऐसे ही वक्तृता सहित वाणी को अग्नि में शिल्प अर्थात् हस्तों के कर्म सहित हस्तों को इन्द्र में पाद के कर्म गति सहित पगों को पद के अधिष्ठातृ देवता विष्णु में, आनंद सहित उपस्थ इन्द्रिय को प्रजापति में निर्देश करे, ॥ २६ ॥

विसर्ग सहित पायु (गुदा) इन्द्रिय को मृत्यु में यथा स्थान निर्देश करे, शब्द सहित श्रोत्र इन्द्रिय को दिशाओं में स्पर्श सहित त्वचा को वायु में लीन होने का अनुसन्धान करे, ॥ २७ ॥

चक्षु इन्द्रिय सहित रूपको ज्योति में, प्रचेता सहित जिह्वा को जल में अश्विनी कुमार सहित नासिका को पृथिवी में लीन करे ॥ २८ ॥

मनोरथ सहित मनको चन्द्र में, ज्ञेय सहित बुद्धि को ब्रह्मा में, अध्यात्म सहित कर्मों को रुद्र में वे रुद्र कैसे हैं अहङ्कार ममकार जिनसे होता है, सत्त्व के सहित चित्त को क्षेत्रज्ञ में और क्षेत्रज्ञ जीवको परब्रह्म में लीन माने यहां लीन होना ऐसा समुझना चाहिये कि जैसे वृक्ष में पक्षी लीन होजाते हैं अर्थात् पृथिवी को जल में जलको तेज में तेज को वायु में वायु को आकाश में आकाश को अहङ्कार में अहङ्कार को महत्तत्त्व में महान् को प्रकृति में प्रकृति को परमेश्वर में लीन भावना करे ॥ ३० ॥

इस प्रकार चैतन्यमात्र अवशिष्ट अक्षर आत्मा को जानकर तदनंतर अद्वितीय आपही एक विराम को प्राप्त होजावे, जैसे कि ? काष्ठ के जलजाने से अग्नि आपही शांत होजाती है ॥ ३१ ॥

इति श्रीमद्भागवत महापुराण सप्तमऽस्कन्ध में
द्वादशअध्याय की भागवताचार्यकृत भाषाटीका
समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ त्रयोदशोऽध्यायः ॥

नारद उवाच।

कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः।
ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥
बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम्।
त्यक्तं न दण्डलिङ्गादेरन्यत्किञ्चिदनापदि ॥ २ ॥
एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः।
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥
पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये।
आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥
सुप्तप्रबोधयोः सन्धावात्मनो गतिमात्मदृक्।
पश्यन्बन्धं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥
नाभिनन्देद्ध्रुवं मृत्युमध्रुवं वाऽस्यजीवितम्।
कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥
नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम्।
वादवादांस्त्यजेत्तर्कान्पक्षं कं च न संश्रयेत् ॥ ७ ॥
न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून्।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत्क्वचित् ॥ ८ ॥
न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥
अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत्।
कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान्।
अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ १ ॥

एवं ध्यात्वा कल्पो नाशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवं ध्यात्वा परिव्रज्येति सम्बन्धः ? कियदत्रत्याज्यम् देहव्यतिरिक्तं सर्वमित्याह—देहमात्रेति। तस्य धर्मानाह ग्रामैकरात्रेति नवभिः ॥ १ ॥

कौपीनं गुह्यमाच्छाद्यते यावता तावन्मात्रं परं केवलमन्यदिति वा त्यक्तं प्रैषोच्चारणात्पूर्वमेव ॥ २ ॥ ३ ॥

सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः ? नहि बद्धमुक्तयोरैक्यं सम्भवति तत्राह—सुप्तेति । सुषुप्तौ हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृगात्मानं लक्षीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे—

"निद्रादौ जागरस्यान्ते यो भाव उपजायते ।
तं भावं भावयन्नित्यं मुच्यते नेतरो यतिः" ॥

इति ॥ ५ ॥

अस्य देहस्य प्रभवोऽप्ययश्च यस्मात्तं कालम् ॥ ६ ॥

असच्छास्त्रेष्वनात्मपरेषु जीविकां नक्षत्रविद्यादिवृत्तिम् वादवादान् जल्पवितंडादिनिष्ठान् कञ्च कमपि पक्षं निर्बन्धेन न संश्रयेत् ॥ ७ ॥

शिष्यान्नानुबध्नीत प्रलोभनादिना बलान्नापादयेत् आरम्भान् मठादिव्यापारान् ॥ ८ ॥

परमहंसस्य विशेषमाह—न यतेराश्रमो धर्मार्थः कथम्भूतस्य यतेः महात्मनः तस्य लक्षणं शान्तस्येत्यादि प्राय इत्यस्यार्थं भावः ज्ञानोत्पत्तिपर्यन्तं बहूदकादिलिङ्गमाश्रित्य सत्त्वशुद्धयर्थं यमान्नियमांश्चाचरन्नेव ज्ञानोत्पत्तौ यतेत उत्पन्ने तु ज्ञाने न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥

तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह—न बहिर्व्यक्तं लिंगं यस्य व्यक्तोऽर्थः प्रयोजनमात्मानुसन्धानं यस्य स मनीष्युन्मत्तवद्बालवच्च कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् ते यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत स्वदृष्ट्येति पाठे बाह्यानुसन्धानाभावेनेत्यर्थः ॥ १० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं स्वधर्मानुष्ठाने तुर्याश्रमधर्मे चाशक्तस्य वानप्रस्थस्यैवमनुसंधानपूर्वकानशनव्रतेन देहत्याग उक्तः अथ तच्छक्तस्य तुर्याश्रमपरिग्रहं वदंस्तद्धर्मानाह त्रयोदशेनाध्यायेन—कल्पइति । आश्रमान्तरधर्मानुष्ठानसमर्थश्चेदेवमनुसंदधत्परिव्रज्य संन्यस्य देहमात्रेणावशेषितः देहातिरिक्तं तदनुबन्धि सर्वं परित्यजेदित्यर्थः ग्रामैकरात्रविधिना एकस्मिन् ग्रामे एकैकरात्रनयनविधिना निरपेक्षो महीं चरेत् ॥ १ ॥

यद्यसौ परिव्राट् त्यक्तं देहाद्यतिरिक्तं किञ्चन विभृयाच्चेत्तर्हि कौपीनमाच्छाद्यते येन तच्च वासः परं केवलं विभृयात् दण्डकमण्डलुभ्यामन्यत्किञ्चिदप्यनापदि न विभृयात् दण्डपात्रग्रहणमुपवीतकटिसूत्रादेरप्यावश्यकस्योपलक्षणम् अनापदीत्यनेन शीताद्यसहिष्णुत्वरूपापदि तु किञ्चित्तन्निवारकं वासोऽन्तरादिकमपि विभृयादिति सूचितम् ॥ २ ॥

अनपाश्रयः परित्यक्तनियतनिवासदेशः एकोऽसहायः भिक्षुः भिक्षोपजीवी आत्मारामश्चरेत् सर्वेति सर्वभूतेषु तरतमेषु सुहृद्भगवदात्मकत्वानुसन्धानेन नितरामनुकूलः शान्तः क्रोधरहितः नारायणएव परायणं प्राप्यं प्रापकमाधारश्चेत्यध्यवसाययुक्त इत्यर्थः ॥ ३ ॥

सदसतः चिदचिद्भ्यां परे विलक्षणेऽतएवाव्यये स्वरूपतः स्वभावतश्च विकाररहिते आत्मनि परमात्मन्यदः इदं विश्वं पश्येत्तदायत्तसत्तास्थितिप्रवृत्तिमत्त्वेन तच्छरीरत्वेन च पश्येदित्यर्थः । तथा परं ब्रह्मात्मानं परमात्मानं सदसन्मये चिदचिदात्मके सर्वत्र जगति नियंतृतयात्मतया च स्थितं पश्येदेव वासुदेवशब्दार्थानुसन्धानमुक्तम् ॥ ४ ॥

सुप्तेति । सुप्तप्रबोधयोः सन्धौ सायंप्रातरित्यर्थः यद्वा तयोस्सन्धिर्मध्यमावस्थायामित्यर्थः स्वप्नावस्था तदानीं शयानदेहात्मनोर्व्यतिरेकः सुग्रहः परमात्मनो विचित्रसृष्टियोगश्च "न तत्र रथानरथयोगानपन्थानो भवन्त्यथ रथानरथयोगान्पथः सृजते" इति श्रुतिः एवं च सुप्तप्रबोधयोः सन्धौ स्वप्नावस्थायामात्मदृग्देहविलक्षणप्रत्यगात्मस्वरूपविमर्शनपरः आत्मनः परमात्मनो गतिं विचित्र पथरथयोगादिस्रष्टृत्वादिप्रकारं पश्येदनुसन्दधीत तथा बन्धं मोक्षं च मायामात्रं न वस्तुत इति पश्येत् सम्बन्धादिकमीश्वरसंकल्परूपज्ञानाधीनं नत्वात्मस्वरूपप्रयुक्तमिति पश्येदित्यर्थः । मायाशब्दश्च ज्ञानपर्यायः "माया च वयुनं ज्ञानम्" इति नैघण्टुकाः बन्धमोक्षयोश्च परमात्मसङ्कल्पाधीनत्वं सूचितम् "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" इति बन्धमोक्षयोः प्रकृत्यन्वयव्यतिरेकरूपत्वाच्च मायामात्रत्वं ननु कथंमोक्षस्य स्वरूपप्रयुक्तत्वाभावः ? बन्धप्रतियोगित्वादिति ब्रूमः नह्यबद्धस्य मोक्षसंभवः ॥ ५ ॥

ध्रुवं निश्चितं मृत्युमध्रुवमस्थिरं जीवितं च नाभिनंदेन्मृत्युमितिदृष्टान्तार्थम् वा यथा मृत्युं नाभिनन्दति तथाऽध्रुवं जीवतमपि नाभिनन्देदिति परं केवलं तु भूतानां प्रभवाप्ययौ यस्मात्तमुत्पत्तिप्रलयहेतुं कालमेव प्रतीक्षेत कालगतिमेवालोचयेदित्यर्थः ॥ ६ ॥

असच्छास्त्रेष्वनाध्यात्मशास्त्रेषु न सज्जेत न सक्तो भवेत् जीविकां जीवनोपायभूतां वृत्तिं नोपजीवेत् अतिवादान् जल्पवितण्डादिनिष्ठान् तर्कान् त्यजेत् कमपि पक्षमाग्रहेण नाश्रयेत् ॥ ७ ॥

शिष्याननुबध्नीत तद्वित्तलोभाभावादिति भावः बहून् ग्रन्थान्नैवाभ्यसेन्नैवपठेत व्याख्यां नोपयुञ्जीत न पाठयेदित्यर्थः चित्तस्यान्यपरत्वप्रसङ्गादिति भावः आरंभान् मठपत्याद्यारंभान् कचिदपि नारभेत् न कुर्यात् निग्रहानुग्रहादिवैषम्यप्रसङ्गादिति भावः यद्वा आरम्भान् गृहाद्यारंभान्नारभेदित्यर्थः ॥ ८ ॥

शान्तस्य समचित्तस्य महात्मनो यतेराश्रमः प्रायो न धर्महेतुः अपितु ज्ञानप्रयोजकः अतो धर्मं विभृयाद्वा त्यजेद्वा भरणत्यागौ व्यवस्थितविकल्पौ ज्ञानहीनः सन्यासाश्रमनिष्ठः धर्मं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्रयोजनत्वेन बिभृयात् ज्ञानवांस्तु धर्माख्यं फलं त्यजेदित्यर्थः। यद्वा उपवासादिदेहक्लेशकररूपधर्मः शरीरदौर्बल्यमुखेन योगविघातको न चेत् बिभृयात् विघातकश्चेत्तं त्यजेदित्यर्थः। यद्वा ननु, शिष्यानुबन्धनग्रन्थाभ्यासव्याख्योपयोजनादिभिः कश्चिद्धर्म एवार्जितः स्यादिति किमर्थं ते निषिध्यन्ते? इत्यत्राह—नेति। यदि यतेराश्रमो धर्मार्थः स्यात्तर्हि कर्तव्याः स्युः शिष्याऽनुबन्धनादयः स तु प्रायशो न धर्महेतुः यत्याश्रमस्य धर्महेतुत्वाभावे हेतुत्वं वदन् तं विशिनष्टि—शान्तस्येति। शान्तस्य जितेन्द्रियस्य धर्मसाध्यैहिकामुष्मिकशब्दादिविषयभोगादिरहितस्य समचित्तस्य अधर्मस्य इव धर्मस्यापि स्वफलजननद्वारा मुक्तिप्रतिबन्धकत्वज्ञानवत्त्वेन धर्माऽधर्मयोः समचित्तस्य प्राय इत्यनेन क्वचिद्यत्याश्रमस्यापि धर्महेतुत्वमस्त्येवेति सूचितम्। अतो यदि यतिधर्मप्रयोजनकयत्याश्रमनिष्ठश्चेच्छिष्याऽनुबन्धनादीन् बिभृयात् धर्महेतुत्वाभावे तु त्यजेदित्यर्थः॥ ९॥

ननु, शिष्याद्यनुबन्धनाद्यभावे स्वस्य ज्ञानित्वादिमाहात्म्यं न प्रकाशितं स्यादित आह—अव्यक्तलिङ्ग इति। अव्यक्तलिङ्गो अस्फुटचिह्नः स्वमाहात्म्यमनाविष्कुर्वन् वर्त्तेत यतिरिति भावः तथा च शारीरकं सूत्रम् "अनाविष्कुर्वन्नन्वयात्" इति. श्रुतिश्च "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति बालस्य कर्म स्वमाहात्म्याऽनाविष्काररूपं बाल्यं तेन तिष्ठासेदित्यर्थः। ज्ञानित्वाद्यनाविष्काराभिप्रायेण दृष्टान्तयति—उन्मत्तबालवदिति। उन्मत्तवद्बालवच्च किञ्चाव्यक्तार्थः परैरविदितप्रयोजनः मुनिरालम्बसंशीलनशीलश्च वर्त्तेताऽऽलम्बसंशीलनं शुभाश्रयपरिशीलनमेतदेव "बाल्यञ्च पाण्डित्यञ्च निर्विद्याऽथ मुनिर्भवति" इति मुनिशब्देन विहितं तद्विषयकं चेदं सूत्रम् "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्। ३। ४।४६।" इति. नत्वत्र बालवदिति दृष्टान्तेन बालस्य यत्कर्म कामचारादिकं तदभिप्रेतम् "नाविरतो दुश्चरितान्नाशान्तो नाऽसमाहितः नाऽशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" इति दुश्चरितस्य परिनिष्पन्नसाधनविरोधित्वश्रवणात् मनीष्युन्मत्तबालवदिति पाठे मनीषप्युन्मत्तादिवच्चरेदिति यथोक्त एवार्थः। कविर्विद्वानपि सुनिपुणं भाषितुं समर्थोऽपि स्वमात्मानं मूकमिव नृणां दृष्ट्या दर्शयेत् यथोन्मत्तादिरूपं मन्येरंस्तथा वर्त्तेत स्वदृष्ट्येति पाठे स्वदृष्ट्या देहविलक्षणया स्वात्मदृष्ट्येत्यर्थः॥ १०॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

क्रमप्राप्तं यतिधर्मं निरूपयति—कल्प इति। एवमुक्तं कृच्छ्रं सोढुं कल्पः अप्यर्थस्तुशब्दस्तर्हि परिव्रज्य सन्यस्य महीं चरेदित्यन्वयः। देहमात्रावशेषित इत्यनेन प्रव्रजनं विशिनष्टि—

"अधीतवेदो जपकृत्पुत्रवानाऽऽनन्ददोऽग्निमान्।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तुनान्यथा"॥ इति

नियमं तुशब्देन वारयति, "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति विशेषविधानात् ब्रह्मचारिणोऽपि तुर्याश्रमग्रहणोपपत्तेरत एव कल्प इत्युक्तं कामक्रोधादिसहजशत्रुजयसमर्थ इत्यर्थः—

"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।
वेदमध्यापयेत्पश्चाच्छौचाचारांश्च शिक्षयेत्"॥

इति वचनात् ब्रह्मचारिणो ऽध्ययनप्रारम्भेण ऽधीतवेदत्वं युज्यत इति वा सन्न्यासाश्रमश्चतुर्द्धाभिद्यते कुटीचको बहूदको हंसः परपरमहंस इति तत्र परमहंसधर्मः कथ्यत इत्यर्थद्योतको वा तुशब्दो निरपेक्षः अलोलुपः॥ १॥

देहमात्रावशेषित इत्यस्यापवादमाह—बिभृयादिति। यद्यसौ भिक्षुरप्सु त्यक्तं वासः परं पश्चात्प्रतिनिधिलक्षणं बिभृयाद्धर्तुमिच्छेत्तर्हि कौपीनलक्षणमाच्छादनं बिभृयादथवा कौपीनं शीतातपनिवारकमेकमाच्छादनं च बिभृयात् परं न बिभृयादित्यर्थः—

"शीतातपनिवारार्थमेकमाच्छादनं यतेः।
कौपीनात्परमित्याहुरेके नान्यद्विना वपुः" इति—

वचनात् कौपीनाच्छादनं चेत्येकवद्भावः। नन्वयं यतिरिति केन ज्ञातुं शक्यते तत्राह—न लिङ्गेति। लिङ्गदण्डाभ्यां विना किञ्चित् न बिभृयात् लिङ्गं चक्रशङ्खादिमुद्राधारणं कमण्डल्वादिकं वा "सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः" इति वचनात् वाक्कायचेतसां यमनं त्रिदण्डित्वं लिङ्गदण्डाभ्यामिति विशेषणादेक एव तु लक्षणो दण्डो ऽन्यथा परमहंसत्वं न स्यात् दण्डो वाग्देहचेतसामिति वक्ष्यति॥ २॥

अनपाश्रयः ग्रामाद्यावासविधुरः यथाह, याज्ञवल्क्यः—

"एकारामः परिव्रज्य भैक्षार्थं ग्राममाश्रयेत्।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने ऽनुपलक्षितः"॥

इति वचनात्॥ ३॥

नारायणपरत्वं दर्शयति—पश्येदिति। अदो विश्वमात्मनि पश्येत् तदाधारत्वेन स्थितमिति शेषः। आत्मनीति जीवः किं न स्यादिति तत्राह—पर इति। सदसतः परे उत्कर्षवाचित्वेन विकल्पात् सर्वनामसंज्ञा नास्ति जीवस्य संसारित्वेनाऽनुत्कृष्टत्वान्नैतादृशोऽन्यो स्तीत्याह—अद्वय इति। नैतावता पूर्यत इत्याह, आत्मानं चेति। सर्वत्र सदसन्मये जगति अवस्थितमात्मानं परं ब्रह्म पश्येदीदृशं नागचिन्तनम्॥ ४॥

सुप्तप्रबोधयोः सुप्तिजाग्रतोः सन्धौ अरुणोदयकाले शयनप्रारम्भकाले चात्मनः स्वस्य गतिं "सता सौम्य! तदा सम्पन्नो भवति" "अतः प्रबोधो ऽस्मात्" ३।२।८ इत्यादि प्रमाणबलात्परमात्माधीनलक्षणां स्थितिं हरेश्च स्वातन्त्र्यलक्षणां पश्यन् बन्धं मोक्षं मायामात्रमयं हरेरिच्छया निर्मितं ज्ञातं पश्यन्वस्तुतः स्वातन्त्र्येण नान्याधीनत्वेन पश्येत्॥ ५॥

मृत्युं ध्रुवमिति नाभिनन्देत् स्वजीवितं वाऽध्रुवमिति तर्हि कथं निश्चय इति तत्राह—कालमिति। भूतानां प्रभवाप्ययं कालाख्यभगवदधीनं प्रतीक्षेत किं बहुना सर्वं भगवदधीनमिति पश्येत्॥ ६॥

जीविकाश्वेतनादिलक्षणां वेदवादमतीत्य तर्कान्वैशेषिकादिशास्त्रनिष्ठितान् अप्रयोजकं पक्षं सिद्धान्तं "नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत्। न चोदासीनशास्त्राणि न विरुद्धानि चाभ्यसेत्"॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"न व्याख्ययोपजीवेत न निषिद्धान्समाचरेत् । एवंभूतो यतिर्याति तदेकशरणो हरिम्" इति निर्णीतमानं बहून् ग्रन्थान् वैष्णवाभासान् मोक्षविरुद्धान् वात्स्यायनादीन् ज्योतिःशास्त्रादीन् व्याख्ययोपजीवनं न कुर्यात् आरम्भान्निषिद्धान् कृष्यादीन् ॥ ८ ॥

कृष्यादिनोत्पन्नद्रव्येण दानादिधर्मसम्पादनोपपत्तेः कथमारम्भान्नारभेतेत्युच्यत इति तत्राह—न यतेरिति । प्रायो यतेराश्रमो धर्महेतुर्न भवति किन्तु निरन्तरोपासनया ज्ञानहेतुः ज्ञानाधिकारे प्रवृत्तस्य कर्माधिकारप्रवृत्तिरधःपातहेतुः स्यात् ईश्वराज्ञोल्लङ्घनदोषापातात् समे ब्रह्मणि चित्तं सततस्मरणसमर्थमन्तःकरणं यस्य स तथा तस्यैवम्विधस्य यतेः आश्रमलक्षणदण्डादि धारणं न चावश्यकमित्याह—बिभृयादिति । यदाह याज्ञवल्क्यः "नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः । अतो यदात्मनः पथ्यं परस्य न तदाचरेत्" ॥ ९ ॥

वाह्यलिङ्गाभावेऽभ्यान्तरं लिङ्गमस्तीत्याह—अव्यक्तेति । अव्यक्तं जनेनाज्ञातं मानसं क्लृप्तं लिङ्गं यस्य स तथा विद्या तप आदिभिरप्रकाटितस्वरूपो वा तर्ह्यस्य किं वक्तव्यमत्राह—व्यक्तार्थ इति । अपरोक्षीकृतभगवत्स्वरूपलक्षणपुरुषार्थः अनेन लिङ्गादिदण्डधारणमेवंविधस्य नावश्यकमन्यस्येत्युक्तं भवति मनीषी निरन्तरमननशीलः अव्यक्तस्वरूपं दर्शयति—अहश्यः प्राकृतजनाज्ञेयः कविरतिक्रान्तदर्शी ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रयोदशे यतेर्धर्मस्तस्य चाजगरी परा ।
दत्ताऽवधूतप्रह्लादसम्वादेनैववर्ण्यते ॥

एवं ध्यात्वाऽकल्पश्चेदनशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवन्ध्यात्वा परिव्रज्य चरेदिति सम्बन्धः तस्य धर्मानाह—ग्रामैकरात्रेति, त्रिभिः ॥ १ ॥

त्यक्तं व्यावहारिकजनसङ्गं न बिभृयात् लिङ्गदण्डादिकादन्यद्वस्त्वपि न अनापदीति आपदि तु देहरक्षार्थं त्यक्तमपि धारयेत् ॥ २—३ ॥

सदसतः परे कार्य्यकारणव्यतिरिक्ते ॥ ४ ॥

सुप्ते सुषुप्ते हि तमसा वृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृक् आत्मानं लक्ष्यीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे—

"निद्रादौ जागरस्याऽन्ते योभाव उपजायते
तं भावं भावयेन्नित्यं मुच्यते नेतरो यतिः"

इति ॥ ५ ॥

अस्य देहस्य ॥ ६ ॥

किञ्च कमपि पक्षं न संश्रयेत् ॥ ७ ॥

नानुबध्नीयात् प्रलोभनादिना बलान्नकुर्य्यादित्यर्थः । आरम्भान् मठादिव्यापरान् ॥ ८ ॥

संन्यासिनां मध्ये परमहंसस्य विशेषमाह—न यतेरिति । यतेराश्रमो न धर्मप्रयोजनकः तस्य लक्षणं शान्तस्येत्यादि प्रायइत्यनेन कथञ्चित् कश्चिदपरिपक्कज्ञानस्तु सत्त्वशुद्ध्यर्थं यमनियमधर्मांश्च चरेदपि ज्ञानपरिपाके तु न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेत् त्यजेद्वा इति ॥ ९ ॥

स च योगभ्रंशपरिहारार्थमेवंभूतो भवेदित्याह, न वहिर्व्यक्तं लिङ्गं यस्य स व्यक्तार्थः प्रयोजनमात्मानुसन्धानं यस्य सः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रयोदशे तुर्याश्रमधर्मानाह—कल्प इति । वानस्थप्रस्थनियमाचरणोऽकल्पोऽनशनादिकं कुर्यादित्युक्तं नियमान्समाप्यापिकल्पो दृढदेहेन्द्रियश्चेद्गृहे न गच्छेत्किन्तु परिव्रज्य तुर्याश्रमी भूत्वा ग्रामैकरात्रवासविधिना महीं चरेत् ॥ १ ॥

यद्यसौ वासो बिभृयात्तर्हि कौपीनमाच्छाद्यते येन तत्कौपीनाच्छादनं परं केवलं बिभृयात् लिङ्गभूतदण्डादेरन्यत् त्यक्तं परित्यक्तं वस्त्रादिकमन्यदनापदि न बिभृयात् ॥ २ ॥

नारायणपरायणः नारायण एव परमयनमाश्रयो यस्य सः ॥ ३ ॥

सदसतः क्षेत्रक्षेत्रज्ञतः परे पुरुषोत्तमे अदो विश्वमात्मानं च पश्येत् सर्वत्र सदसन्मये जडचेतनमये विश्वस्मिन् आत्मनि च परं ब्रह्म पुरुषोतमं च पश्येत् ॥ ४ ॥

सुप्तप्रबोधयोः सन्धौ सायं प्रातश्च आत्मदृक् देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणस्वस्वरूपदृक् आत्मनः स्वस्योपासकस्य गम्यते इति गतिर्भगवान् तं पश्यन् ध्यायन् माया त्रिगुणा प्रकृतिस्तया ऽनादितस्तत्सुखदुःखया गृहीतया बन्धः दुःखत्रयभयास्यक्तया मोक्षः एवं मायामात्रं न वस्तुतः केवलस्वरूपतः बन्धं मोक्षं च पश्यन् विचरेदिति शेषः ॥ ५ ॥

अस्य देहस्य ध्रुवमावश्यकं मृत्युम् अध्रुवमनित्यं जीवितं च नाभिनन्देत् प्रभवाप्ययौ जन्ममरणे यस्मात्तम् ॥ ६ ॥

असच्छास्त्रेषु कध्यानविरोधिषु जीविकां चिकित्सानक्षत्रादिविद्यावृत्तिं नोपजीवेत् वादवादान् ग्राम्यजनयोग्यान् वादप्रतिवादान् तर्कान् हेतुवादान् त्यजेत् किञ्च किमपि पक्षं न संश्रयेत् भगवद्ध्यानविच्छेदनं न कुर्यादिति भावः ॥ ७ ॥

शिष्यान्नानुबध्नीयात् प्रलोभनादिना आत्मसेवार्थं वश्यान्न कुर्यात् नाभ्यसेच्च पठेत् व्याख्यानं नोपयुञ्जीत न पाठयेत् आरम्भान् जीविकाव्यापारान् ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥
तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ।
रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥ १२ ॥
ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया ।
वृतो ऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥
कर्मणा कृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः ।
न विदन्ति जना यं वै सो ऽसाविति न वेति च ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शान्तस्य"शान्त उपासीत"इतिश्रुत्युक्तध्यानार्हशान्ति प्राप्तस्य समे भगवति चित्तं यस्य भगवद्ध्याननिष्ठस्य परमहंसभागवतनिष्ठां गतस्य महान् अतिविशुद्धः आत्मा चित्तं यस्य तस्य यतेः आश्रमः प्रायो धर्महेतुर्न भवति धर्मः प्रवर्तनीयतया हेतुर्निमित्तं फलं यस्य स तथा धर्मप्रवृत्त्यर्थो न भवति किन्तु मुक्त्यर्थं इत्यर्थः । अतः आश्रमसूचकलिङ्गादिभिः प्रयोजनाभावादाश्रमित्वाभिमानं त्यक्त्वा तानि धारयेत्त्यजेद्वेति सिद्धान्तः "मौनानीहानिलायामदण्डा वाग्देहचेतसाम् । न ह्येते यस्य सत्यङ्ग वेणुभिर्न भवेद्यतिः ।
ज्ञाननिष्ठो विरक्तोवामद्भक्तो वा नपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ।
इति वक्ष्यमाणत्वाच्च ॥ ९ ॥

अव्यक्तं लिङ्गमाश्रमचिह्नं यस्य सः व्यक्तोऽपरोक्षोऽर्थः परमपुरुषार्थः भगवत्प्रावण्यं यस्य सः मनीषी भगवदनुसन्धानपरः कविरपि स्वकीये ध्येये भगवति दृष्ट्या निमग्नचित्ततया मूकवदात्मानं दर्शयेत् ॥ १० ॥

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ॥

नारद उवाच ।

नारद जी बोले, कि—ये अनशनादिक तौ शरीर यात्रामें असमर्थ के कहे, और यदि समर्थ होवै तौ संन्यास लेकर सब का परित्याग करदे, एक देहमात्र अवशिष्ट रखे, और ग्रामैकरात्र विधिसे अर्थात् एक ग्राम में एक ही रात्रि रहना अधिक नहीं, इस प्रकार निरपेक्ष होकर पृथिवी पर विचरे ॥ १ ॥

यदि कुछ रखने की इच्छा हो तौ केवल एक लज्जांग ढाकने के लिये कौपीन रखे, और जास्ती इच्छा हो तो एक शरीर के आच्छादन (ओढने) के लिये वस्त्र रखे बस इससे जास्ती नहीं, और अनापद काल में दण्डऔर संन्यास के चिन्ह के सिवाय त्यागकिये हुए किसी पदार्थ को न ग्रहण करे, यदि कोई आपद (दुःखादि) आ पडे तौ उतने मात्र काल की चिन्ता नहीं ॥ २ ॥

आत्माराम होकर किसी का आश्रय न लेकर सर्व प्राणियो का सुहृद और शान्त होकर संन्यासी एकला ही विचरे, परञ्च सदा नारायण परायण होकर ॥ ३ ॥

इस विश्वको कार्य कारण से पर अव्यय पर ब्रह्म में देखे, और आत्मा जो पर ब्रह्म है उसको कार्य कारण मय समस्त विश्व मे अनुस्यूत अर्थात् व्याप्त देखे ॥ ४ ॥

और वह आत्मज्ञानी दोनो सन्ध्याओं में अपने आत्माकी गति का चिंतन करे, तथा बन्ध और मोक्षको माया मात्र जाने वास्तव में नहीं ॥ ५ ॥

ध्रुव (निश्चित) मृत्युका अभिनन्दन न करे, अथवा अध्रुव इसके जीवित को भी न चाहे, केवल भूतों के उत्पत्तिनाश का हेतु काल मात्र की प्रतीक्षा करै ॥ ६ ॥

असत् शास्त्र मे आसक्त न होवै, और किसी जीविका का उपजीवन न करे और शुष्कवाद विवाद को त्यागदे, और केवलतर्क में किसी का पक्ष न लेवे ॥ ७ ॥

और बहुत से शिष्य न करडाले और बहुत से ग्रन्थों का अभ्यास न करे, लोकप्रतिष्ठा के लिये बडी व्याख्या का उपयोग न करे, और बहुत से कार्यों का आरंभ न करे ॥ ८ ॥

प्राय करके यति का धर्महेतु कोई आश्रम नहीं है, शांत हो समचित्त हो तौ आश्रम को धारण करे वा त्यागदे कुछ चिंता नहीं ॥ ९ ॥

अव्यक्त चिन्हों वाला अप्रकट प्रयोजन वाला मनीषी व्याख्यान समर्थ होकर भी अपने को उन्मत्त और बालक के तरह, तथा ज्ञानी होकर मौनेको मूक सदृश जनावे, ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परमहंसधर्ममेवेतिहासेन स्फुटयति—अत्रापीति यावदध्यायसमाप्ति । आजगरव्रतस्य मुनेश्च ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तं नत्वाऽभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ।
विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥ १५ ॥
बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ।
वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ।
भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मादिभिर्जना यं न विदुस्तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः ॥ १४ ॥ १५ ॥

उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः उद्यमं विनैव मम भोगोऽस्तीति चेत्तत्राह, वित्तं चेति ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

आजगरव्रतस्य संन्यासाश्रमाऽनपेक्षित्वेऽपि यदृच्छयोपनतसन्तोषस्य मोक्षविरोधिप्रवृत्त्युपरत ज्ञानानाविष्कारस्य च तदपेक्षितत्वात् तदवगमनाय तदितिहासं प्रस्तौति—अत्रापीति । अत्र स्वमहात्म्यानाविष्कारादिना ज्ञानिनोऽवस्थाने इतिहासमपि दृष्टान्तत्वेन उदाहरन्ति निदर्शयन्ति इतिहासं विशिनष्टि–पुरातनं नत्वसमत्कपोलकल्पितं प्रह्लादस्याजगरस्याजगरव्रतधरस्य मुनेश्च संवादरूपम् ॥ ११ ॥

तमजगरव्रतस्थं सह्यपर्वतस्य सानुनि कावेर्य्यां कावेरीतटे धरोपस्थे भूपृष्ठे शयानं रजस्वलैर्धूलिभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढं प्रच्छन्नममलं तेजो देहकान्तिर्यस्य तं प्रह्लादो ददर्शेत्यन्वयः ॥ १२ ॥

कथम्भूतः भगवत्प्रियः कतिपयैरमात्यैः परिवृतो लोकानां तत्त्वस्य विवित्सया वेत्तुमिच्छया चरन् कर्मादिभिर्यं सोऽसौ भवति न भवति वेत्येवं जना न विदुः । तं पादयोः शिरसा स्पृशन् नत्वा विधिवदभ्यर्च्य, वेत्तुमिच्छुर्महाभागवतः प्रह्लाद इदं वक्ष्यमाणमप्राक्षीत् पृष्टवान् ॥ १३—१५ ॥

तदेवाह—बिभर्षीति सार्द्धैस्त्रिभिः, । उद्यम्युद्यमसहितः भोगवान् देहपोषणशीलो यथा तद्वत्त्वं पीवानं कायं देहं बिभर्षि इति सन्देहः । ननूद्यमं विनैव मम प्रारब्धवशादेव भोगः सम्प्राप्नोतीत्यत्राह— इह लोके तावदुद्यमवतामेव वित्तं धनं भवति वित्तवतामेव भोगः । त्वन्तु निरुद्यमः कुतस्तव वित्तं कुतस्तरां भोग इति भावः । अन्तरेणापि भोगं मम देहः पीवा इत्यत्राह—भोगिनां भोगवतामिव देहः पीवा भवति भागेन ऽयं पीवा भवत्यन्यथा तु कृशीभवति तत्कथमन्तरेणापि भोगं देहपुष्टिरिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्राऽपरोक्षज्ञानाय यत्याचारे इतिहासशब्दार्थमाह—पुरातनमिति । आजगरस्य अजगरव्रतधारिणः ॥ ११ ॥

सह्यसानुनि सह्याख्यपर्वततटे कावेर्यां कावेर्युत्पत्तिक्षेत्रे तनूदेशैः शरीरावयवैः ॥ १२ ॥

विवित्सया वेदितुमिच्छया ॥ १३ ॥

स एव देवदत्तो सौ न वेति नाविन्दत न ज्ञातवान् ॥१४॥१५॥

भोगवान् सम्पन्नः ननु परिणममानस्य देहस्य पीनत्वं विशेषः परिणामोऽपि कस्माच्चित् स्यान्मदिरासेव्यस्येव किमत्र चोद्यमत्राह–वित्तमिति । सत्यं कृष्याद्युद्योगवतो देहिनो व्रीह्यादिवित्तं भवतीहलोके तद्वतां भोगः खलु भोगिनामयं देहः पीनो भवति, हेत्वन्तरं नास्तीत्याह—नान्यथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तं शयानमिति युग्मकम्, तनू इत्यत्र त्वङ्ग इति पाठो बहुत्र ॥ १२ ॥ १३ ॥

कर्मणेति युग्मकम् ॥ १४ ॥ १५ ॥

बिभर्षीत्यर्द्धकम् ॥ १६ ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आजगरस्य अजगरवृत्तेः ॥ ११ ॥

सह्यनाम्नः तनूदेशैः तन्ववयवैः ॥ १२ ॥ १३ ॥

जनास्तज्जन्मभूमिनिवासिनोपि विवित्सुर्विविदिषुः महाभागवत इति महाभागवतत्वादेव तत्र सचित्ताकर्षणलिङ्गैनैव तं महानुभावं निश्चित्यैवेतिभावः ॥ १४ ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ।
अभोगिनो ऽयं तव विप्र ! देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥
कविः * कल्पो निपुणदृक् चित्रप्रियकथः समः ।
लोकस्य कुर्वतः कर्म शेषे तद्वीक्षिताऽपि वा ॥ १८ ॥

नारद उवाच ।

स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ।
स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥ १९ ॥

ब्राह्मण उवाच ।

वेदेदमसुरश्रेष्ठ ! भवान्नन्वार्यसम्मतः ।
ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पीवानं स्थूलं न च स्वभावेनैव मत्कायः पीवेति वाच्यमित्याह- उद्यमवतां वित्तं वित्तवतां भोगः भोगवतामेव देहः पीवेति पीवरत्वस्यादि कारणमुद्यम एव नतु स्वभाव इत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परमहंसभगवद्धर्ममेवेतिहासेन दर्शयति—अत्रापीत्यादिना । आजगरस्य अजगरवृत्तदंतस्य ॥ ११ ॥

धरोपस्थे भूपृष्ठे कावेर्यां तत्समीपे सह्यसानुनि सह्यगिरितटे रजोव्याप्तैस्तनूदेशैः शरीरावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मणा निवृत्तिप्रवृत्तिरूपेण आकृतिभिः अनाश्रकसुंयकत्वादिचेष्टावद्भिरङ्गैः तथा वागादिभिर्जना यं न विदन्ति पादयोः शिरसा स्पृशन् नत्वा अभ्यर्च्य च अप्राक्षीदित्युत्तरेणान्वयः ॥१४॥

अप्राक्षीत पृष्टवान् ॥ १५ ॥

सोद्यमो व्यापारपरो भोगवान् यथा पीवानं पुष्टं देहं बिभर्षि स देहो यतः पीवा तन्नो वदेत्यनेनान्वयः ॥ १६ ॥

भाषा टीका ।

इस प्रकरण में एक पुरातन इतिहास को उदाहरण करते हैं जिसमें और आजगर मुनि श्री दत्तात्रेय का संवाद है ॥ ११ ॥

एक समय की बात है कि—भगवत्प्रिय श्रीप्रह्लादजी कितने एक मन्त्रियों सहित लोकों के तत्त्व जानने की इच्छा से लोकों में विचरते हुए, श्री कावेरी गंगा के किनारेसह्य पर्वत की शिखर पर पृथिवी के ऊपर पड़े हुए, धूलि भरे हुए, शरीर से गूढतेजवाले एक मुनि को देखते हुए ॥ १२ ॥ १३ ॥

जिन को देखकर कर्म आकृति वाणी और वर्णाश्रमोंके चिन्हों से मनुष्य नहीं जान सके ये किये वही प्रसिद्ध दत्तात्रेय जी महाराज हैं ॥ १४ ॥

प्रह्लादजीने उनकोविधिवत् पूजन करके मस्तक से चरणों को छूकर नमस्कार किया, और महा भागवत असुर प्रह्लाद जी ज्ञान की इच्छा करके यों पूछने लगे ॥ १५ ॥

प्रह्लादजी बोले, कि आप शरीर को तो एसे पुष्टको धारण करते हो, कि जैसे वडा उद्यम वाला भोगों को भोगने वाला अपने शरीर को पुष्ट रखता है परन्तु भोग तो वित्त से होता है और वित्त (धन) से भोग प्राप्त होता है, यह देह तो भोग भोगने वालों का ही ऐसा पुष्ट होता है आपस दयों का और विना भोग भोगने के नहीं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नु इति निश्चये ह इति प्रसिद्धौ तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः । यतोऽर्थादेव यतो हेतोः पीवा क्षमं योग्यं चेत् ॥ १७ ॥

किञ्च वित्तार्जनाद्यसमर्थोऽप्यबं जनस्तदर्थमुद्यमं करोति त्वं तु समर्थोऽपि किमिति न करोषीत्याह—कविर्विद्वान् कल्पो दक्षः निपुणदृक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य तथाऽपि लोकस्य कर्म कुर्वतः सतः शेषे तद्वीक्षिताऽपि तत्सर्वं पश्य-

* कल्प इति पाठः वीर० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्य नारायणो देवो भगवान् हृद्गतः सदा ।
भक्त्या केवलया ऽज्ञानं धुनोति ध्वान्तमर्कवत् ॥ २१ ॥
अथापि ब्रूमहे प्रश्नांस्तव राजन् ! यथाश्रुतम् ।
सम्भावनीयो(१) हि भवानात्मनः शुद्धिमिच्छताम् ॥ २२ ॥
तृष्णया भववाहिन्या योग्यैः कामैरपूरया ।
कर्माणि कार्यमाणो ऽहं नानायोनिषु योजितः ॥ २३ ॥
यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ।
स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि पाठान्तरे न द्वेक्षि, तत्कर्म न द्वेक्षि, नौषि वा न च स्तौषीत्यर्थः ॥ १८ ॥

तस्य वागेवामृतं तेन यन्त्रितो वशीकृतः सन्प्राह ॥ १९ ॥

अध्यात्मचक्षुषाऽन्तर्दृष्ट्या भवान्वेदैव आर्याणां ज्ञानिनां सम्मतो ननु भवान् इदमिति यदुक्तं तदेवाह—नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्यर्थः ॥ २० ॥

वेदेत्यत्र हेतुः, यस्येति। हृदि प्रविष्टस्सन्नज्ञानं धुनोति नाशयतीति अर्को यथा बहिर्ध्वान्तम् ॥ २१ ॥

यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यदुक्तं तत्राऽऽह—तृष्णयेति, चतुर्भिः । भवप्रवाहकारिण्या यथोचितैरपि विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं पूर्वं नाना योनिषु प्रवेशितः ॥ २३ ॥

तयैव तृष्णयेमं लोकं मनुष्यदेहं यदृच्छया प्रापितः कथम्भूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनम् । अधर्मेण तिरश्चां श्वसूकरादियोनेर्द्वारं मिश्राभ्यां ताभ्यां पुनरप्यस्य मनुष्यत्वस्य द्वारं सर्वतो निवृत्याऽपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव विवृण्वन् पृच्छति—नेति । हे ब्रह्मन् ! शयानस्यात एव निरुद्यमस्य निर्व्यापारस्य तव । न ह्यऽर्थः नूनं वित्तं नास्ति हि तु इति निश्चयं ददाति प्रसिद्धौ तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतो वित्तादेव हेतोर्भोगाः देहपोषणादयो भवन्ति अतो भोगरहितस्य तव देहो हे विप्र ! यतो हेतोः पीवाऽभवत् तत्कारणं नोऽस्माकं श्रोतुमितिशेषः । क्षमं योग्यं चेत्तर्हि वद कथय अगोप्यं चेत्तर्हि वर्णयेत्यर्थः ॥ १७ ॥

किञ्च त्वं कविर्विद्वान् कल्यः दक्षः निपुणाद्दक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य स एवंभूतोऽपि लोकस्य कर्म व्यापारं कुर्वतः सतः तद्वीक्षिताऽपि सम उदासीनस्सन् तूष्णीं शेषे शयानोसि तत्कारणं च वदेति भावः ॥ १८ ॥

एवं दैत्यपतिना प्रह्लादेन पृष्टस्सन् महामुनिस्तस्य प्रह्लादस्य वागेवामृतं तेन यन्त्रितः चोदितः स्मयमानः तमभ्याहाऽभिमुख मुक्तवान् ॥ १९ ॥

तदेवाह—यावदध्यायम्समाप्ति, वेदेति । असुरश्रेष्ठ ! इदं किन्तन्नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि कारणानीति यत्तदिदं भवानध्यात्मचक्षुषा सर्वलोकमनोभिप्रायविषयकज्ञानेन वेद जानात्येव कुतः यतस्त्वमार्याणामतीन्द्रियार्थदर्शिनां सम्मतोऽग्रेसरः ॥ २० ॥

किञ्च भगवान् षाड्गुण्यपूर्णः स्वतेजसा दीप्यमानो नारायणो ऽनन्यप्रयोजनया भक्त्या तुष्टो यस्य त्वादृशस्य सदा हृद्गतः सन्नर्कवत् सूर्यवत् ध्वान्तमज्ञानरूपमन्धकारं धुनोति निरस्यति निःशेषनिरस्ताज्ञानानां सर्वज्ञानां भवादृशां किमविदितमस्तीति भावः ॥ २१ ॥

यद्यप्येवमथापि हे राजन् ! यथाश्रुतं तव प्रश्नान्प्रति ब्रूमहे प्रश्नानामुत्तराणि वदामहत्यर्थः । यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् आत्मनः स्वस्य शुद्धिमिच्छता पुंसा भवानवश्यंत्वं सम्भावनीयो हि ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यत्पृष्टं तत्र तावदुत्तरमाह-तृष्णयेति, चतुर्भिः । तावदहं योग्यैर्यथोचितैरपि कामैरपूरया पूरयितुमशक्यया भववाहिन्या जन्मपरम्पराकारिण्या तृष्णया विषयेच्छया कर्माणि पुण्यपापात्मकानि कार्यमाणः कर्मसु प्रवर्त्तमानः पूर्वं नानायोनिषु योजितः प्रवेशितः ॥ २३ ॥

तैरेव कर्मभिर्भ्रमन्यदृच्छया दैवादिमं लोकं मनुष्यजन्मप्रापितः लोकं विशिनष्टि स्वर्गमोक्षयोः तिरश्चां तिर्यक्त्वानां पुनरस्य मनुष्यत्वस्य च प्राप्तेर्द्वारं कारणम् । धर्मेण स्वर्गस्य द्वारं ज्ञानसम्पादनेन त्वपवर्गस्या ऽधर्मेण तिरश्चः तिर्यक्त्वस्य पूर्व-

(१) सम्भावनीय इति वीर० विज० पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वजातीयसुकृताऽऽचरणेन तु पुनर्मनुष्यत्वस्य च कारणमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रकृतेऽपि तथा स्यादिति तत्राह, न त इति. अर्थोवित्तं यतो विस्तारपीवेति यत्तस्मात् बत विस्मयो जायते लोके निमित्तान्तराभावे सति पीनत्वं भोगित्वेन दृष्टम् अत्र भोगित्वं न दृश्यते पीनत्वं तु दृश्यते तस्मिन्निमित्तान्तरमस्ति तदस्माकं श्रोतुं क्षमं चेद्वदेत्यन्वयः ॥१७॥

इतोऽपि निमित्तान्तरेण भाव्यमन्यथा कवित्वादयो भोगिगुणा न स्युरित्याह–कविरिति । न चेत्तर्हि वेदानुभवसि "अन्नमयं हि सौम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्"इति श्रुतेः

"यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति—
अक्रुष्टो परिक्रुष्टश्च समस्तस्य स तस्य च" इति श्रुतेः

सर्वस्य समः न द्वेक्षि न द्वेषं करोषि नौषि स्तुतिं करोषि अनेन समत्वं विवृतम् ॥ १८ ॥

इतरत्र विरक्त्या भक्त्या श्रीनारायणचरणारविन्दस्मरणमकरन्दपानमेव पीनत्वे निमित्तमिति परिहारमभिप्रेत्य प्रह्लादं प्रति ब्रूते इत्याह–नारद इति ॥ १९ ॥

ज्ञानिष्वेको भवानिदं वेदेत्यन्वयः । इदमिति किं केन साधनेन वेद अत्राह—वेदेति । भवानध्यात्मचक्षुषा परमात्माऽनुग्रहोत्पन्नज्ञानेन नृणामीहोपरमयोः प्रवृत्तिनिवृत्तिलक्षणयोर्मार्गयोः एवं निश्चितं विषयस्थानं वेदेति शेषः ॥ २० ॥

देहिनामज्ञानसम्भवात्तेष्वेकत्वात् ममाऽपि तद्विषयं ज्ञानं नास्तीति किं न स्यादित्याशङ्क्य सत्यं विशेषोऽस्ति तवेत्याह—यस्येति । ह्रद्गतत्वं सामान्यमिति मत्वा श्लिष्ट इत्युक्तं केवलया फलानामाकाङ्क्षया ध्वान्तमज्ञानलक्षणम् अन्यत्रान्धकारमज्ञानं तत्त्वाप्रतिपत्तौ कारणत्वेन दृष्टं यतस्तव नास्ति तस्माद्भवान् जानातीत्यर्थः ॥ २१ ॥

यद्यपि वक्तव्यांशो नास्त्यथापीदमप्राक्षीदित्यर्कविषयप्रश्नः कृतः परिहारे प्रश्नानित्याद्यनेकविषयः कथमयं सङ्गच्छत इति चेत्, निरुद्यमस्य वित्तं कथम् ? निर्वित्तस्य भोगः कथम् ? अभोगिनः पीनत्वं कथम् ? इति प्रश्नानामपि बहुत्वात् इदमित्यस्याव्ययत्वेन जातिविशेषत्वेन चोपपत्तेः तव प्रश्नान् ब्रूमह इत्यनेन तदनुवादः क्रियते उत परिहारः नाद्यो ऽदर्शनात् द्वितीयोऽपि तद्वाचकपदप्रयोगाभावादनुपपन्नः तव प्रश्नानुद्दिश्य परिहारान् ब्रूमह इति पक्षोऽपि गौरवादयुक्त इति चेदुच्यते "ब्रूञ् व्यक्तायां वाचि" इति धातोर्व्यक्तिर्नाम स्पष्टीकरणं तस्य परिहारार्थोपपत्तेः यथाश्रुतमित्यनेनापि स्पष्टीकरणप्रतीतेरिति. ननु, यदज्ञातज्ञापकं तदेवोपादेयं न चेदं तथा प्रह्लादस्य भगवदनुग्रहेण ज्ञाताऽशेषार्थत्वादतः कस्मै स्पष्टीक्रियत इत्याशङ्क्य तदज्ञानमस्माभिर्न वोच्यते किन्तु महत्सम्भाषणलक्षणार्थसेवयाऽन्तःकरणशुद्धिः स्यादिति मत्वा स्पष्टीक्रियत इत्याह—सम्भाषणीय इति । अनेन ब्रूमह इत्यात्मनेपदार्थो विवृत इति ज्ञायते ॥ २२ ॥

निवृत्तिमार्ग एव संसारोन्मूलनहेतुरिति वक्तुं प्रवृत्तिमार्गस्तु नानादुःखहेतुत्वेन हेयः प्रेक्षावतेत्येतत्स्वानुभवसिद्धमित्याह–तृष्णयेति । भववाहिन्या नदीवद्वर्तमानया संसारापादिकया वा इतरनदीनामृतुभेदेन पूर्त्यपूर्ती स्यातां नास्याः कदापि पूर्तिरित्याह–ग्राम्यैरिति ॥ २३ ॥

यदृच्छया दैवेच्छया लोकं शरीरम "अस्माल्लोकात्प्रेत्य"इति श्रुतेः न केवलं स्वर्गादेर्द्वारं किन्तु तिर्यगादिजन्मनोऽपि कारणमित्याह—तिरश्चामिति । अस्य मनुष्यशरीरस्याऽपि द्वारमिति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्वीक्षितापि इत्यत्र त्वं न द्वेक्षि नौषि वेति पाठः न द्वेषीति गौडपाठः ॥ १८—३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु,'पीनो देवदत्तो दिवा नभुङ्क्ते' इति वन्ममोद्यमादिकमनुमीयतामिति चेत्तत्राह–नेति । नुनिश्चये ह स्पष्टं हे विप्र ! इति ब्रह्मतेजसैव विप्रत्वस्यावगमात् ॥ १७ ॥

किमेवं ते विचारेणेति चेत् त्वद्देहे सामुद्रकसल्लक्षणदृष्ट्या कवित्वकल्पत्वादिकमनुमाय त्वया त्वं कृतार्थीकर्तुं कमप्यालापामृतमिच्छामीत्याह—कविरिति । कर्म कुर्वतः कर्मोद्यमवन्तं लोकमनादृत्य तमपश्यन्नेव शेषे शयनं करोषि तस्य वीक्षिता कौतुकेन तं पश्यन्नेव वा ॥ १८ ॥ १९ ॥

अध्यात्मचक्षुषा अन्तर्दृष्ट्या इदं भवान् वेदैव किम् ईहोपरमयोः सकामत्वनिष्कामत्वयोः पदानि स्थानानि फलानीत्यर्थः । भोगार्थमुद्यमैर्देहंपुष्टीकुर्वतां लोकानां दुःखं यद्यहं नाज्ञास्यं तदा उद्यममहमप्यकारिष्यमिति भावः ॥ २० ॥

वेदेत्यत्र हेतुः यस्येति केवलया ज्ञानकर्माद्यमिश्रया ॥ २१ ॥

अतो मया त्वं सम्माननीय एवेत्यतः सर्वत्र मौनवतापि त्वयि मौनमनादृत्यैवोच्यते इत्याह—अथापीति । यद्यपि भवान् वेदैव अथापीति यथाश्रुतं नतु स्वकपोलकल्पितम् ॥ २२ ॥

यदहं निरुद्यमोऽस्मि तत्र कारणं शृण्वित्याह–तृष्णयेति त्रिभिः । भवसंबन्धिन्या वाहिन्या नद्येति यथा नद्या अन्तो दुष्प्रापस्तथा तृष्णाया अपि किञ्च नदी इन्द्रेण वृष्यमाणैरम्बुभिः पूर्यते इयं तु ब्रह्मणापि वृष्यमाणैः कामैर्न पूर्यत इत्याह ग्राम्यैरिति यथा च नद्या वाहितोऽर्कतृणकाष्ठपाषाणकण्टकादिषु योजते तथैवाहमपि नानायोनिषु यथा च नद्या ग्राहकच्छपावर्त्तादिभिर्भीषयित्वा तत्परित्राणाय नानासाधनानि कार्यन्ते तथैवाहमपि कर्माणि ॥ २३ ॥

यथाच नद्या कदाचित् कश्चिच्चतुष्पथसैकतदेशमपि प्राप्यते तथैवाहमपि साम्प्रतमिमं लोकं नृशरीरं कीदृशं पुण्येन स्वर्गस्य द्वारं साधनं ज्ञानभक्तिभ्यामपवर्गस्य पापेन तिरश्चां सूकरादि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्रापि दम्पतीनां च सुखायाऽन्यापनुत्तये ।
कर्माणि कुर्वतां दृष्ट्वा निवृत्तो ऽस्मि विपर्ययम् ॥ २५ ॥
सुखमस्या ऽऽत्मनो रूपं सर्वेहोपरतिस्तनुः ।
मनःसंस्पर्शजान्दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥ २६ ॥
इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ।
विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥ २७ ॥
जलं तदुद्भवैश्छन्नं हित्वा ऽज्ञो जलकाम्यया ।
मृगतृष्णामुपाधावेद्यथा ऽन्यत्रार्थदृक्स्वतः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यानैरपि पुण्यपापाभ्यां चकारात्तद्भोगान्ते च पुनरप्यस्य नृजन्मनोऽपि द्वारम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमं श्रावयितुं च योग्यं चेत्तर्हि नोऽस्मभ्यं वद ॥ १७ ॥

त्वं कवित्वादिगुणयुक्तोऽपि लोकस्य कर्म कुर्वतः कुर्वन्तं न द्वेक्षि न स्तौषि स्वयं च शेषे अन्तर्वृत्तिरसि यतस्तद्वदेति पूर्वेणान्वयः कविः कान्तदर्शी दक्षः समर्थः निपुणदृक् स्वार्थे दृढदृष्टिः चित्राः अद्भुताः प्रियाः कथाः यस्य सः सर्वत्र तुल्यदृष्टिः ॥ १८ ॥

स्मयमानः मन्दस्मितयुक्तः तद्वागेवामृतं तेन यन्त्रितो वशीकृतः ॥ १९ ॥

हे असुरश्रेष्ठ ! नन्वहो भवानार्यसम्मतः नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि अध्यात्मचक्षुषा अन्तर्दृष्ट्या वेद ॥ २० ॥

केवलया तदेकविषयिण्या भक्त्या नारायणो देवः सदा हृद्गतः अज्ञानं धुनोति ध्वान्तं तिमिरमर्को यथा ॥ २१ ॥

यद्यपि भगवान् वेद तथापि ब्रूमहे यथाश्रुतमित्यनेनौद्धत्याभावः सूच्यते ॥ २२ ॥

भववाहिन्या जन्ममरणलक्षणसंसारवाहिन्या योग्यैरपि कामैर्विषयैरपूरया कर्माणि कार्यमाणः कर्मसु प्रवर्त्यमानः नानायोनिषु योजितः ॥ २३ ॥

इमं लोकं नरदेहम् ॥ २४ ॥

भाषा टीका ।

परंच हे ब्रह्मन् ! आप तौ विना उद्यमके सोये हुए हैं, आपको धन कहां से प्राप्त होसक्ता है, और विना धन के भोग कहां ? हे विप्र ! विना भोग के आपका यह देह जो पुष्ट होरहा है इसका क्या कारण है ? यदि हमारे कहने के योग्य हो तौ कहिये ॥ १७॥

आप तौ कवि (पंडित) समर्थ निपुणदृष्टि वाले और विचित्र प्रिय बोलने वाले हैं, और लोगों को कर्म करते हुए देखकर भी सोते रहते हैं ॥ १८ ॥

नारद उवाच ॥

नारदजी बोले कि,—उन महामुनि श्रीदत्तात्रेय को जब दैत्यपति प्रह्लादजी ने इस प्रकार पूँछा, तव प्रह्लाद की वाणी रूप अमृत के वश होकर किञ्चित् हँसतेहुए मुनि बोले ॥ १९ ॥

ब्राह्मण उवाच ॥

दत्तात्रेयजी बोले, कि—हे असुर श्रेष्ठ, हे प्रह्लाद ! आप श्रेष्ठ लोगों के सम्मत हौ और ज्ञानदृष्टि से, मनुष्यों की चेष्टा और उपराम से जो फल होता है उसको भी जानते हौ ॥ २० ॥

क्योंकि ? जिन तुमारे हृदय में केवल भक्ति से भगवान् श्री नारायण देव सदा स्थित हैं, और सूर्य जैसे तम को तैसे ही अज्ञान को नाश करते हैं ॥ २१ ॥

हे राजन् ! तथापि तुमारे प्रश्नों का उत्तर जैसा सुना है तैसा कहते हैं क्योंकि ? आप तौ आत्मा की शुद्धि की इच्छा वाले महाजनों के भी माननीय हौ वा संभाषणीय हौ ॥ २२ ॥

योग्य कार्यों से जिसका कभी पूरा न पडे ऐसी तृष्णा के वश होकर मैने ऊँचे नीचे बहुत प्रकार के कर्म किये फिर उन कर्मों से नाना योनियों में जोता गया ॥ २३ ॥

फिर हरीच्छा से भ्रमते २ इस मनुष्य देह को भी प्राप्त हुआ जो मनुष्य देह स्वर्ग और अपवर्ग (मोक्ष) का द्वार है, और इसी देह के कर्मों से जीव तिर्यक् योनि को तथा फिर भी इसी मनुष्य देह को प्राप्त होसक्ता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥

ननु प्रवृत्त्या कदाचित्सुखं स्यान्निवृत्त्या तु किंस्यादिति चेत्तत्राह—सुखमस्य जीवस्य स्वस्वरूपमेव, तर्हि किं न प्रकाशते ? तत्राऽऽह–सर्वेति । तनोतीति तनुः सर्वक्रियानिवृत्तौ स्वतएव प्रका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ।
दुःखात्ययं चाऽनीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥
आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ।
मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥
पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ।
भयादलब्धनिद्राणां सर्वतोऽभिविशङ्किनाम् ॥ ३१ ॥
राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः ।
अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शत इत्यर्थः । भोगांश्च मनःसंस्पर्शजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः । तर्हि कदाचित्कथं भुङ्क्षे ? तत्राऽऽह—संविशन् प्रारब्धभोगान्भुञ्जान इत्यर्थः ॥ २६ ॥

एवञ्चेत्कोपि संसारं न प्राप्नुयात्तत्राऽऽह—इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव सन्तं पुरुषार्थं विस्मृत्य असत्यपि द्वैते ॥ २७ ॥

तदेव दृष्टान्तेन स्पष्टयति—जलमिति । तदुद्भवैस्तृणशैवाला-दिभिः जलकाम्यया जलेच्छया स्वत आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥

एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति—देहादिभिरिति, पञ्चभिः । ईहत इच्छतः अनीशस्य निर्दैवस्य पुनःपुनः प्रारब्धाः क्रियाः मोघाः विफला एव भवन्ति ॥ २९ ॥

क्रियाणां सफलत्वेऽपि फलस्याऽनुपयोगमाह—आध्यात्मिका-दिभिरिति । मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ॥३०॥

कृच्छ्रं विनैव प्राप्तेष्यर्थे दुःखं तदवस्थमित्याह—पश्या-मीति ॥ ३१ ॥

भयं प्रपञ्चयति—राजत इति । स्वस्मान्मत्त एव कथञ्चित्त्याग-भोगविस्मरणादिना नाशः स्यादिति प्राणवतामर्थवतां च भयं नित्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्रापि अस्मिन्नपि मनुष्यजन्मनि स्वर्गापवर्गदेऽपि दम्पतीनां मन्मैथुनादिसुखं तदर्थमन्यापनुत्तये दुःखनिवृत्तये च कर्माणि कुर्वतां लोकानां विपर्ययं सुखार्थं कृतेभ्यः कर्मभ्यः दुःखप्राप्तिरूपं विपर्ययं दृष्ट्वा निवृत्तोस्मि ॥ २५ ॥

ननु, प्रवृत्त्या कदाचित्सुखं स्यादपि किं निवृत्त्या स्यादित्यत्राह—सुखमिति । सुखमस्यात्मनः प्रत्यगात्मनो रूपं स्वरूपमेवातो न तदर्थं यत्नः कार्य इति भावः । तर्हि स्वतः सुखरूप आत्मा तत्त्वेन किं नोपलभ्यते इति शङ्कां निराकरोति—सर्वासामीहानां देहगतव्यापाराणामुपरमः अभावोऽस्यात्मनस्तनुराकारः निष्क्रियं सुखमेव तस्य तनुरित्यर्थः । कात्स्न्र्येनेहोपरमपूर्वकं तद्याथात्म्य-विमर्शनेन सुखरूपतयोपलभ्यत इति भावः । यत एवमतोभोगान् शब्दादिविषयभोगान् मनसस्संस्पर्शजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा संविशन्नात्मयाथात्म्याऽवलोकने प्रविष्टोऽहं प्रारब्धानुभवे प्रविष्टो वा स्वप्स्यामि शयानोऽस्मि ॥ २६ ॥

तर्हि सर्वोपि लोकस्त्वमिव सुखरूपमात्मानं किन्नोपलप्स्यते इति शङ्कां निराकुर्वन् स्वाभाविकसुखरूपात्मस्वरूपाविमर्शनमू-लकदेहात्मभ्रमेण न शेते किन्तु संसरतीत्याह—इतीति । इत्येतदा-त्मनः सुखात्मकं रूपं स्वार्थं स्वस्य पुरुषार्थरूपं स्वत एव सन्तं विस्मृत्य स्वत एव सन्तमात्मनः सुखरूपं स्वरूपात्मकं स्वपुरुषार्थं विस्मृत्येत्यर्थः । पुमान् देही असति स्वत आत्मन्यविद्यमानेपि द्वैते देवमनुष्यादिभेदे देवोऽहं मनुष्योऽहमित्यभिमानरूपे द्वैते भेदेनि-मित्ते द्वैतेनेत्यर्थः । विचित्रां गर्भजन्मजरामरणादिरूपामत एव घोरां भयङ्करां संसृतिमाप्नोति ॥ २७ ॥

एतदेव दृष्टान्तमुखेनाह—जलमिति । जलं तदुद्भवैस्तृणशै-वालादिभिश्छन्नं जलं हित्वा अज्ञो यथा जलकाम्यया मृग-तृष्णां जलवत्प्रतीयमानामुपधावेत्तथा स्वतः सुखरूपमात्मनः स्वरूपं विस्मृत्याऽन्यत्र वैषयिकसुखेष्वर्थदृक् पुरुषार्थदृष्टिर्धावति लोकः स्वत आत्मनोऽन्यत्र देहादौ पुरुषार्थदृग्वा ॥ २८ ॥

विपर्ययं दृष्ट्वा निवृत्तोस्मीत्येतदेव विवृणोति—देहादिभिरिति, पञ्चभिः । दैवतन्त्रैः कर्मायत्तैर्देहेन्द्रियादिभिरात्मनः स्वस्य सुखं दुःखनिवृत्तिञ्चेहतः इच्छत अनीशस्य कर्मवशस्य पुंसः कर्त्तरि षष्ठी इच्छता कृता कृताः पुनःपुनरारब्धाः क्रियाः मोघाः व्यर्थाः न सुखजनका नाऽपि दुःखनिवर्त्तकाश्च दृष्टा इति भावः ॥ २९ ॥

कथञ्चित्क्रियाणाममोघत्वेपि तज्जन्यं सुखमनुभूयमानदुःखेभ्यो-ऽल्पमित्याह—आध्यात्मिकादिभिः । आदिशब्देनाधिदैविकाधिभौ-तिके ग्राह्ये तैर्दुःखैः कर्हिचित्कदाचिदपि अविमुक्तस्य मर्त्यस्य मरणशीलस्य कृच्छ्रोपनतैर्दुःखेनार्जितैरर्थैर्वित्तैस्साधितैः कामैश्च किं कियत्सुखं क्रियेत न किमपीत्यर्थः ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, धनार्जने हि दुःखं लब्धधनानां तु सुखमेवेत्यत्राह–पश्यामीति । धनिनां लब्धधनानामपि क्लेशं पश्यामि क्लेशित्वे हेतुं वदन् धनिनो विशिनष्टि—लुब्धानामिति । लुब्धानामलब्धधनलिप्सया लब्धधनव्ययभयेन च क्लिश्यतामिति भावः । अजितात्मनामजितेन्द्रियाणां कामानामपर्याप्त्या च क्लिश्यतामिति भावः । भयादलब्धा निद्रा यैस्तेषां चोरादयो धनमपहरेयुरिति भयाद्विगतनिद्राणामित्यर्थः । इतोऽपि क्लेश इति भावः । भये हेतुं वदन्विशिनष्टि–सर्वतः सर्वेभ्योऽप्यतीव विशङ्किनामपहरेयुरिति शङ्कां कुर्वताम् ॥ ३१ ॥

एतदेव विवृणोति—राजत इति । राजादिभ्यः पशुतः पशुभ्यः गजाश्वादिभ्यः पक्षितः पक्षिभ्यः सस्यादिभक्षणार्थं प्रवृत्तेभ्यः कालतः स्वस्माद्दानभोगयोः प्रवृत्तात् स्वस्माच्च प्राणास्तत्तुल्यमर्थश्चैषामस्तीति तथा तेषां नित्यं भयमनुवर्तते ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्याद्युद्योगवतो वित्तं स्यादित्यादिना यदुक्तं सुखं स्यादिति तत्परिहरति–अत्रापीति । अत्रापि मनुष्यशरीरेऽपि दम्पतीनां विपर्ययं दुःखं दृष्ट्वा निवृत्तिमार्गमाश्रितोऽस्मीत्यन्वयः । अन्यापनुत्तये सुखादन्यस्य दुःखस्य निरासाय "सुखाय कर्माणि करोति लोको न तैः सुखं नान्यदुपारमं वा"इति स्वोक्तेः ॥ २५ ॥

कर्मणो निवृत्तस्य दुःखस्य निरासाय सुखावाप्तौ किमन्तरङ्गमित्याशङ्क्य यदि सुखं स्वरूपाद्भिन्नं तर्हि तत्प्राप्तौ यत्नः कर्तव्यो न चैवं स्वरूपत्वात् सुखस्य तद्व्यक्तौ स्वरूपाच्छादकसर्वनिषिद्धकर्मनिवृत्त्याविर्भूतभगवत्प्रसाद एव मुख्यनिमित्तमित्याह–सुखमिति ।"बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः"इत्यादि हिशब्देन दर्शयति, अस्यात्मनो जीवस्य स्वरूपभूतं यत्सुखं तत्सर्वेहोपरतेः प्रसन्नात्सर्वा पूर्णेहा चेष्टा यस्य स सर्वेहः "को ह्येवान्यात्"इति श्रुतेः । उपाऽधिका ऽत्युद्रिक्तारतिरानन्दो यस्य स उपरतिः" यदेष आकाश आनन्दो न स्यात्"इति श्रुतेः । सर्वेहश्च उपरतिश्च सर्वेहोपरतिस्तस्माद्धरेराविर्भवतीति शेषः ।"उपोऽधिके" इति सूत्रात् । ततः किं तत्राह, मनःसंस्पर्शजानिति । मनोऽधिष्ठितेन्द्रियाणां विषयैः संस्पर्शनात्सम्बन्धात् जाताञ्छब्दान् स्रगादिभोगान्न सन्निवेशेत् न सेवेत बुद्धिमानिति शेषः ॥ २६ ॥

.एतदङ्गीकारविरुद्धस्य बाधकमाह–इतीति । आत्मन इत्येतदुक्तमित्येवं तव सिद्धमिति शेषः । इति शब्दः प्रकारवचनः तत्र पुमान्सन्तं सदातनं स्वार्थं पुरुषार्थं विस्मृत्य असति भगवत्प्रसादेन निवर्तमाने द्वैतेऽन्यथा ज्ञाने विषये विचित्रां सुरनरादिनानायोनिविषयां घोरां संसृतिमाप्नोतीत्यन्वयः ॥ २७ ॥

स्वतृष्णाया अनिवृत्तकरत्वात्संसारस्य घोरत्वमितीममर्थं सदृष्टान्तमाह—जलमिति । तदुद्भवैर्जलोद्भवैः शैवलादिभिरज्ञो ज्ञानरहितो ऽजितेन्द्रियो मृगतृष्णां सूर्यमरीचिसम्पृक्तसलिलं यथोपधावेत्तथा स्वतः स्वतन्त्राद्धरेरन्यत्र देवदत्तादावर्थदृक् पुरुषार्थदर्शी ॥ २८ ॥

ननु, पुरुषार्थसाधनत्वेन जातैर्देहादिभिरनुष्ठिताः क्रियाः सुखादिहेतवः स्युरित्याशङ्क्य भगवदर्पणबुद्धिचिकित्सारहिता व्यर्था इत्याह—देहादिभिरिति । या याः कृताः कृताः क्रियास्तास्ताः सर्वा अपि मोघाः तत्र हेतुगर्भं विशेषणम् अनीशस्येशविरुद्धस्य ॥ २९ ॥

इतोपि वित्तापादने न प्रयतनीयम. आध्यात्मिकादिक्लेशग्राहगृहीतत्वेन डुंडुभग्रस्तमण्डूकवत्समृद्धशारीरबलाभावात् कृतान्तपाशबद्धगलस्य पुरुषस्य पुरतो निहितक्षीरासववद्व्यर्थं वित्तमित्याह–आध्यात्मिकादिभिरिति । कामैः शब्दादिविषयैः ॥ ३० ॥

कस्याचिददृष्टबलादुपार्जितवित्तस्य समृद्धशारीरबलस्याऽपि लोभाभिभूतमनस्कत्वेनाऽपि भोगो दुर्घट इत्याह, पश्यामीति ॥३१॥

प्राणार्थवद्भयम् अर्थवतः प्राणभयं भवति प्राणवतोऽर्थवतश्चेति वा ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दुःखमेव दृष्ट्वा निवृत्तोस्मि कर्ममात्रेभ्य इत्यर्थः ॥ २५ ॥

कर्मणा कदाचित् सुखं स्यादपि सर्वकर्मनिवृत्या किं स्यादिति चेत्तत्राह—सुखमस्य जीवस्य मम स्वरूपमेव तर्हि किं नप्राकाशते तत्राह—सर्वेति । सर्वा ईहाः कर्माणि तद्धेतुः तृष्णाच तासाम् उपरत्तिरेव तनुः तनुं विना यथा सुखं नोपलभ्यते तथा तामपि विनेत्यर्थः । भोगांस्तु प्राकृतान् मनःस्पर्शजान् मनोरथमात्रजान् क्षणभङ्गुरान् दृष्ट्वा तत्रारुचिरेव संविशन् स्वाभाविकानश्वरात्मसुखमुपभुञ्जानः स्वप्स्यामि स्वापिमि-वैतृष्ण्यादिदिव्यकुसुमशय्यायामिति स्वस्य पीनत्वे सुखभोग एव हेतुरुक्तः "निवृत्तिः पुष्टीकराणानाम्"इति वैद्यकोक्तेः यद्वा स्वप्स्यामि संप्रत्यपि तृष्णाभासस्यानिवृत्त्या यद्यपि सम्यगात्मसुखानुपलम्भस्तथापि पञ्चषैर्दिनैस्तस्यापि निवृत्त्या सम्यक् संविशन् शयिष्य इत्यर्थः । "सम्वेशः स्वापस्त्रीरतबन्धयोः" इति मेदिन्युक्तेरत्र सामान्यत एवोपभोगवाची संवेशशब्दो-ज्ञेयः ॥ २६ ॥

एवं चेत् सर्वेप्येवं किमिति सुखिनो नस्युस्तत्राह—इत्येतदिति । स्वार्थं स्वीयं सुखरूपमर्थं विस्मृत्य द्वैते दुःखरूपे असति देहादौ वस्तुत आत्मनः अविद्यमानेऽपि यद्वा असति असार्वकालिके ॥ २७ ॥

एतदेव दृष्टान्तेन स्पष्टयति—जलमिति । तदुद्भवैर्जलएवोद्भूतैर्नतु जलादुद्भूतैस्तृणशैवालादिभिश्छन्नमिवात्मसुखं तत्रोद्भूतैर्मायिकतृणादिभिः छन्नंहित्वा स्वतोऽन्यत्र पुरुषार्थं पश्यन् ॥ २८॥

विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति–देहादिभिरिति पञ्चभिः । सुखं दुःखात्ययञ्च ईहत ईहमानस्य क्रिया मोघाः निष्फलाः ॥२९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदि कदाचित् सफलाः स्युस्तदपि फलभोगाऽसामर्थ्यमाह—अध्यात्मिकादिभिरिति। दुःखसहितः सुखभोगोऽपि नेत्याह-मर्त्यस्य अकस्मादेव सम्भावितमृत्योः ॥ ३० ॥

तदेवमर्थैर्न दुःखनिवृत्तिः प्रत्युत दुःखाधिक्यमेवेत्याह, पश्यामीति ॥ ३१ ॥

स्वस्मादिति मत्तएव कथञ्चिद्दानभोगविस्मरणादिना नाशः स्यादिति प्राणेषु अर्थेषु चासक्तिमतां भयं प्राणोऽत्र शारीरबलं सम्भोगादिप्रयोजकं ज्ञेयं जीवनमात्रन्तु विहितमेव "जीवस्य तत्त्वजिज्ञासा" इत्यादौ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत्रापि नरदेहे ऽपि सुखाय अन्यस्य दुःखस्यापनुत्तये कर्माणि कुर्वतां विपर्ययं सुखाभावं दुःखप्राप्तिञ्च दृष्ट्वा निवृत्तोऽस्मि तादृशकर्मत इति शेषः ॥ २५ ॥

सुखं तु अस्य हृदि दृश्यमानस्य भगवतः रूपं सर्वैः कुतो नाऽनुभूयते अत्राह—सर्वासामीहानामुपरतिर्यस्मात्समाधिः अस्याऽत्मनस्तनुः शरीरम् ध्यानसमाधिशून्यैर्जनेनाऽनुभूयते इतिफलितोऽर्थः अतः मनःसंस्पर्शजान् मनसा संस्पृश्यते विचार्यते इति मनःसंस्पर्शं प्रारब्धं कर्म तज्जान् भोगान् दृष्ट्वा आवश्यभोग्यतया विलोक्य संविशन् भुञ्जन् स्वप्स्यामि शयानो ऽस्मीत्यर्थः ॥ २६ ॥

इत्येतद्भगवद्ध्यानरूपम् आत्मनः स्वार्थं स्वपुरुषार्थं सन्तं साधुमङ्गलावहमित्यर्थः । विस्मृत्य असत्यमङ्गले द्वैते द्वाभ्यां चेतनाचेतनाभ्यां युतं द्वितं तदेवद्वैतं द्वयोर्भावो द्वितात्द्वितैव द्वैतं वा तस्मिन् चेतनाचेतनात्मके प्रपञ्चे जगति घोरां भयङ्करां संसृतिं जन्ममरणादिरूपामाप्नोति ॥ २७ ॥

यथा तद्धुद्भवैस्तृणादिभिः छन्नं जलं हित्वा मृगतृष्णामज्ञ एवोपधावेत् तद्वत्स्वतः स्वीयादीश्वरादन्यत्रार्थदृक् अज्ञ एव स्यात् ॥ २८ ॥

तस्यानीशस्य ईश्वरादन्यत्राऽर्थदृशः देहादिभिः सुखं दुःखाऽत्ययञ्च इच्छतः कृताः कृताः पुनः पुनः प्रवर्त्तिताः क्रिया मोघाः निष्फलाः स्युः ॥ २९ ॥

कर्हिचित् कदाचित्कृच्छ्रेण कष्टसाध्यया कयाचित् क्रियया उपनतैः प्राप्तैरपि अर्थैः धनैः कामैर्भोगैश्च मर्त्यस्य मरिष्यतः अध्यात्मिकादिभिर्दुःखैरमुक्तस्य किं न किमपि सुखमित्यर्थः ॥ ३० ॥

प्राप्तार्थस्य प्रत्युत दुःखं पश्यामीत्याह—पश्यामीति, द्वाभ्याम् ३१ ॥

राजादिभिः प्राणोपलक्षितदेहवतामर्थवतां च नित्यं भयं भवति ॥ ३२ ॥

भाषा टीका ।

इस योनि में भी सुख और दुःखनिवृत्ति के लिये कर्म करने वाले स्त्री पुरुषों के विपरीत फल को देखकर अब में सुखादि की कामनाओं से कर्म करने से निवृत्त भया हूं ॥ २५ ॥

सुख तो इस आत्मा का स्वरूप ही है, पर वह मन-को स्पर्शकरने वाले विषयों से जायमान भोगों को देख कर, सर्व चेष्टाओं से उपराम को प्राप्त होकर अनुभव करने से ज्ञात होता है, ऐसे ही प्रारब्ध से आनेवाले भोगों को भोगते हुए हम भी सो रहे हैं ॥ २६ ॥

पुरुष इस प्रकार के सत् स्वार्थ को विस्मरण करके देव मनुष्यादि द्वैत भाव को असत् होने पर भी विचित्र घोर संसृति को प्राप्त होता है ॥ २७ ॥

जल से उत्पन्न होने वाले शैवाल (सिमार) काई प्रभृति से छन्न (ढके हुए) जल को छोड़कर, अज्ञ पुरुष जल-की कामना से जैसे मृगतृष्णा को दौड़ता है । और फल-को नहीं प्राप्त होता, ऐसे ही अपने अन्तर्यामी से अन्यत्र अर्थ दृष्टि करने वाला भी निष्फल प्रयत्नवान् होता है ॥ २८॥

प्रारब्ध के परतन्त्र इन देहादिकों से स्वयं असमर्थ होकर भी सुख प्राप्ति और दुःख के छूटने की चेष्टा करने वाले पुरुष की करीहुई सब क्रियायें निष्फल होती हैं ॥ २९ ॥

कदाचित् बड़े कष्ट उठाने से द्रव्य प्राप्त भी होजावै तो-भी आध्यात्मिकादि दुःखों से नहीं छूटनेवाले पुरुष का द्रव्य से क्या स्वार्थ किया जायगा ॥ ३० ॥

और तुम कहते हो कि धन के विना भोग उपपन्न नहीं होता है, पर हम तो जिन लुब्धोंने धन जोड़२ कर इकट्ठा किया है, अजितेन्द्रिय ऐसे उन धनियों को भी मैं बड़ा दुःखी देखता हूं । भय से निद्रा उन को नहीं आती, सब ही लोगों से सदा शङ्का करते रहते हैं ॥ ३१ ॥

राज से चोरों से शत्रुओं से स्वजनों से पशु से पक्षियों से याचकों से द्रव्यवाले को भय रहता है । ऐसे ही प्राण वाले को भी ॥ ३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ।
यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥
मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ।
वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥
विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ।
कृच्छ्राप्तं मधुवद्वित्तं हत्वाऽप्यन्यो हरेत् पतिम् ॥ ३५ ॥
अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ।
नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥
क्वचिदल्पं क्वचिद्भूरि भुञ्जेऽन्नं (१) स्वाद्वस्वादु वा ।
क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥
श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ।
भुञ्जे भुक्त्वाऽथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥
क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ।
वसेऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ॥ ३९ ॥
क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ।
क्वचित्प्रासादपर्यङ्के कशिपौ वा परेच्छया ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽनर्थहेतुत्वात्प्राणे जीवनेऽर्थे च स्पृहा न कार्येत्याह–शोकेति ॥ ३३ ॥

नन्वेवमनर्थाननुभवन्तोऽपि न केचिद्विरज्यन्ते न च यथालाभेन तुष्यन्ति त्वं तु कथं वैराग्यादिकं प्राप्तोऽसि ? तत्राऽऽह, मधुकारेति. मधुमक्षिकाऽजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ॥३४॥

मधुकाराच्छिक्षितमाह–विराग इति । मिक्षपतिं हत्वाऽन्यो वित्तं हरेदित्येवम् ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । सत्त्ववान्धैर्यवान् ॥ ३६ ॥

पीनत्वे हेतुं यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—क्वचिदल्पमिति, षड्भिः ॥ ३७ ॥ ३८ ॥

चीरं जीर्णवस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धकर्मफलभोगी ॥ ३९ ॥

प्रासादमध्ये पर्यङ्के तत्रापि कशिपौ तूलिकायाम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं भयमेवापितु शोकमोहभयादयः सर्वे यन्मूलाः यदर्थमेव मूलं येषां ते नृणां स्युर्भवेयुः तस्माद्बुधः हेयोपादेयविवेकवान् तयोः प्राणार्थयोः स्पृहां जह्यात् त्यजेत् ॥ ३३ ॥

यदुपदेशात् त्वमीदृशं निवृत्तिधर्ममास्थितस्तं कथयेत्यत्राह–मधुकारेति । अस्मिन् लोके नोऽस्माकं गुरुश्रेष्ठौ मधुकार महासर्पौ मधुमक्षिकौ अजगरावेवेदृशधर्मशिक्षकौ भवतः तदेवाह—ययोर्मधुकारमहासर्पयोः शिक्षया वृत्तिपर्यालोचनया वयं वैराग्यं परितोषं दैवाल्लब्धात् सन्तोषं च प्राप्ताः तत्र मधुकाराद्वैराग्यं महासर्पात् परितोषं च प्राप्ता इत्यर्थः ॥ ३४ ॥

एतदुभयं विवृणोति—विराग इति, द्वाभ्याम् । तावत्सर्वेभ्यः विरागो मया मधुव्रताद्भ्रमराच्छिक्षितः तच्छिक्षया मम वैराग्योदय इत्यर्थः । किं तच्छिक्षितम् ? तदाह–यथा मधुव्रतैरितस्ततः पुष्पेभ्य आनीय कचिन्निवेशितं मधु तत्स्वामिनो मधुव्रतान् हत्वाऽन्यो हरति तथा मधुवत् दुःखेनार्जितं धनमन्यः पतिं धनस्यपतिं हत्वा हरेदित्येतन्मधुव्रताच्छिक्षितमित्यर्थः ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । महाहिरिवाऽहमनीहः निर्व्यापारः यदृच्छोपनताद्दैवाल्लब्धान्नादेः परितुष्टात्मा सन्तुष्टचित्तः नो चेत् यदृच्छोपनतं नो प्राप्तं चेत्तर्हि सत्त्ववान् धैर्यवान् बहून् अहानि शये शयानोऽस्मि ॥ ३६ ॥

पीनत्वे हेतुत्वेन यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—

(१) साध्वसाधु इति वीर० पा० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

क्वचिदल्पमिति। क्वचित् कदाचिदल्पं कदाचिच्च भूरि बहु क्वचिच्च साधु क्वचिच्चासाध्वसमीचीनमसृष्टं क्वचिच्च गुणवद्रसवत् कदाचिन्निर्गुणम् ॥ ३७ ॥

कदाचिच्छ्रद्धया नीतं कदाचिन्निन्दापूर्वकमानीतं वाऽन्नादिकं भुञ्जे अपि कदाचिद्दिवा नक्तं च यदृच्छया प्राप्तं भुञ्जे ॥ ३८ ॥

एवं वस्त्रमपि दुकूलाद्यन्यतममन्यद्वा दैवाल्लब्धं वसे आच्छादयामि परिदधे च चीरं जीर्णवस्त्रञ्च एवं दिष्टभुक् प्रारब्धभुक् सन्तुष्टचित्तश्चाहम् ॥ ३९ ॥

क्वचिद्भूपृष्ठेएव क्वचिच्च तृणादिषु शये क्वचिच्च प्रासादोपरि पर्यङ्के तत्रापि कशिपौ वा तस्य दौर्लभ्यशङ्कां निराह-परेषामिच्छयेति। इदमुत्तरत्राप्यनुषञ्जनीयः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ननु, सर्वोऽनर्थशमने किं कारणमित्याशङ्क्य स्पृहा सर्वापदो निदानमतस्तत्त्याग एव प्रथमतः कारणमित्याह-शोकेति। या स्पृहा मूलं येषां ते तथा प्राणे ऽर्थे च स्पृहां वैष्णवसिद्धान्ते तद्विरोधिनो जनात् प्राणसङ्कटे प्राप्ते प्राणरक्षणे स्पृहाऽपि न कार्या किमुतार्थे इति प्रदर्शनाय प्राणग्रहणम् ॥ ३३ ॥

वित्तवतः प्राणभयं वित्तस्पृहया शोकादिकं स्यादित्याद्युक्तमर्थं मधुकराजगरदृष्टान्तेन बोधयति—मधुकरेति। गुरुत्तमाया शिक्षा साऽऽभ्यामेवासेति गुरुत्तमावित्यूचे ॥ ३४ ॥

यथा च तं मधुव्रतं हत्वा ऽन्यो मधु हरति तथा वित्तपादकं हत्वा कृच्छ्रादर्जितं राजाद्यन्यतमो हरेत् मधुव्रतश्रियमिति दृष्ट्वा सर्वकामेभ्यो विरागः शिक्षितः ॥ ३५ ॥

उदरपोषणाद्यत्नशून्योऽनीहः नोचेद्यदृच्छया ऽप्राप्तं चेन्महाहिरजगरः ॥ ३६ ॥

भूरिगुणोपेतं कस्मिंश्चिद्दिवाऽह्न्येव भुक्त्वा नक्तं भुञ्जे कस्मिंश्चिद्दिने नक्तं भुक्त्वाऽह्नि भुञ्जे ॥ ३७ ॥ ३८ ॥

क्षौमं दुकूलमित्यादिकमेकस्मिञ्जन्मनि बहु जन्मनि चेति यथायोग्यमङ्गीकर्तव्यम् दैवलब्धेन भुञ्जे इति दिष्टभुक् क्षौमाद्याच्छादनं गजादिभिश्शयनं क्षत्रजन्मनि प्रासादादिशयनं भूपृष्ठशयनं च पश्वादिजन्मनि भस्मादौ शयनं श्वानादिजन्मनि वाल्ये च अजिनादि अजिनाद्याच्छादनमृष्यादिजन्मनि अस्मिन् जन्मनि जन्मान्तरे वा दिग्वासाः दिगम्बरः ॥ ३९ ॥ ४० ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

क्वचिदिति, सार्द्धकं। स्वाद्वस्वादु वेत्यत्र साध्वसाधु वेति क्वचित् पाठः ॥ ३७ ॥

भुञ्जे इत्यर्द्धकम् ॥ ३८—४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

"प्राणार्थयोः स्पृहां जह्यात्" इति शरीरबलाधिक्यार्थं धनाधिकार्थं च न यतेत स्वल्पेनापि बलेन स्वल्पेनापि धनेन पारमार्थिककृत्यसिद्धेरिति भावः ॥ ३३ ॥

ननु, कस्माद्गुरोरेतत्त्वया शिक्षितम्? तत्राह-मधुकारेति ॥ ३४ ॥

मधुमक्षिकातः शिक्षितमाह—वित्तपतिं हत्वाऽप्यन्यो वित्तं हरेदिति मे वित्ते विरागः ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति। शये स्वपिमि सत्त्ववान् धैर्यवान् ॥ ३६ ॥ ३७ ॥ ३८ ॥

वसे परिदधे ॥ ३९ ॥

धरोपस्थे धराक्रोड़े "उपस्थः शेफसि तथा क्रोड़े मदनमन्दिरे" इति मेदनी ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अतो नृणां शोकादयो यन्मूलाः स्युस्तां प्राणार्थयोः स्पृहां बुधो जह्यादेव ॥ ३३ ॥

यच्छिक्षया यद्वृत्तिपर्यालोचनया वैराग्यं परितोषं च वयं प्राप्ताः ॥ ३४ ॥

हत्वा पतिं वित्तपत्तिम् ॥ ३५ ॥

यदृच्छोपनतादन्नादितः नो चेदनुपनते अन्नाद्यै सत्त्ववान् धैर्यवान् शये स्वपिमि ॥ ३६-३७-३८ ॥

चीरं वस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धभुक् ॥३९-४०॥

भाषाटीका।

शोक मोह भय क्रोध राग दैन्य श्रम आदिक सबों का मूल कारण तो, प्राण और द्रव्य की स्पृहा है, अर्थात् चाहना है, बुद्धिमान उसे छोड़ देवें ॥ ३३ ॥

मधुकार और महासर्प ये दोनों इस लोक में हमारे उत्तम गुरू हैं, इनसे वैराग्य और सन्तोष नहीं की शिक्षा से पाया है ॥ ३४ ॥

सर्व कामों से वैराग्य हमने मधु की मांखी से सीखा है। जैसे कि? मधुमक्षिका मधु जोड़ती है, फिर फल को नहीं प्राप्त होती है, कोई दूसरा पुरुष पति को मारकर लेता है ऐसे ही धन की दशा है ॥ ३५ ॥

और अजगर से हमने यह सीखा है, कि विना चेष्टा किये हरीच्छा से जो प्राप्त हो जावे, उसी से सन्तोष करे, यदि कभी कुछ नहीं प्राप्त होवे। तब धैर्य को धारणकर अजगर के तरह सोते रहते हैं ॥ ३६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कचित्स्नातो ऽनुलिप्ताङ्गः सुवासाः स्रग्व्यलङ्कृतः ।
रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ! ॥ ४१ ॥
नाऽहं निन्दे नच स्तौमि स्वभावविषमं जनम् ।
एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥
विकल्पं जुहुया[१]च्चित्तौ तां मनस्यर्थविभ्रमे ।
मनो वैकारिके हुत्वा तं मायायां जहोत्यनु ॥ ४३ ॥
आत्मानुऽभूतौ तां मायां जुहुयात्सत्यदृङ् मुनिः ।
ततो निरीहो विरमेत् स्वानुभूत्या ऽऽत्मनि स्थितः ॥ ४४ ॥
स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ।
व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः ॥ ४५ ॥

नारद उवाच ।

धर्म्मं पारमहंस्यं वै मुनेः श्रुत्वा ऽसुरेश्वरः ।
पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे यतिधर्मे
त्रयोदशोऽध्यायः ॥ १३ ॥

भाषा टीका ।

कभी थोडा कभी बहुत स्वादु वा अस्वादु जैसा अन्न-मिले वैसा भोजन करलेते हैं, कभी बहुगुण वाला, कभी किसी जगह गुणहीन भी मिलता है, तौ उसी से सन्तुष्ट रहते हैं ॥३७॥

किसी समय श्रद्धा से लाया हुआ, कभी मानवर्जित, किसी समय दिन में, कभी रात में, यदृच्छा से भोजन करलेते हैं। कभी न भोजन करके भी रहजाते हैं ॥ ३८॥

बहुत उत्तम क्षौम (अतसीका वस्त्र) कभी रेशमी कभी मृग चर्म वा चीर अथवा वल्कल अथवा और जो कुछ प्राप्त होगया उसको पहिन लेते हैं। और प्रारब्ध को भोगते हुए उसी में बुद्धि-का सन्तोष करलेते हैं ॥ ३९ ॥

किसी समय पृथिवी के पृष्ठपर कभीतृण पर, कभी पत्तोंपर, कभी पत्थर पर, कभी धूलि वा भस्म में पडे रहते हैं, किसी समय दूसरे की इच्छा से महलों में पर्यंक के ऊपर, कभी खट्वा के ऊपर सो जाते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चरे विचरामि कचिद्ग्रहवद्दिगम्बरो विचरामि ॥ ४१ ॥

न च मानापमानकर्तृषु मम वैषम्यमित्याह—नाहमिति। नाहं निन्दामि नच स्तौमि महात्मनि विष्णौ ॥ ४२ ॥

एवंभूतत्वेन स्थितानुपायमाह-विकल्पमिति, द्वाभ्याम्। चित्तौ भेदग्राहकमनोवृत्तौ अर्थरूपो विभ्रमो यस्मिन्मनसि तन्मनो वैकारिके ऽहङ्कारे तमहङ्कारमन्वनन्तरं महत्तत्त्वद्वारेणेत्यर्थः ॥ ४३ ॥

सत्यमेव पश्यतीति तथा ॥ ४४ ॥

मन्ददृष्ट्या लोकशास्त्राभ्यां व्यपेतं ननु, तत्त्वदृष्ट्या यतो भवान्भगवत्परः ॥ ४५ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

(१) चित्तं तन्मनसि इति पाठः—वीर० विजय० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्नातमनुलिप्तं चन्दनेन चाङ्गं यस्य शोभनं वासो वस्त्रं यस्य स्रग्भिरलंकृतः रथादिभिर्यानैः चरे सञ्चरामि कचिच्च दिग्वासा दिगम्बरः ग्रहवच्चरे हे विभो ! ॥ ४१ ॥

न च मानावमानादिकर्तृषु मम वैषम्यमित्याह–नाहमिति । स्वभावत एव विषमं जनं स्तुतिनिन्दयोः कर्त्तारं न स्तौमि न निन्दे च किन्तु तेषां जनानां सर्वेषां श्रेयः धर्मादिरूपम् उताऽपि च महात्मनि भगवत्यैकात्म्यमेकचित्तत्वं चाशासे प्रार्थये ॥ ४२ ॥

इत्थमन्यस्याप्यवस्थितौ उपायमाह––विकल्पमिति । विकल्पं जातिरूपादिविकल्पं चित्ते मनोव्यापारे जुहुयात् प्रलीनं भावयेत्तच्चित्तमर्थविभ्रमे देहात्मभ्रमहेतौ मनसि मनश्च वैकारिके सात्त्विकाहंकारे तं च वैकारिकं मायायां मूलप्रकृतौ जुहुयात् सर्वत्र होमोनाम लयानुसन्धानरूपः ॥ ४३ ॥

तां च मायां स्वात्माऽनुभूतौ जुहुयात् ततः सत्यंस्वात्मशरीरकं परमात्मानं पश्यतीति सत्यदृक् मुनिः तन्मननशीलः निरीहो निश्चेष्टः स्वानुभूत्यात्मनि परमात्मात्मके परिशुद्धजीवस्वरूपे स्थितः तदनुसन्धानपरः विरमेत्प्रारब्धावसाने कलेवराद्विरमेत् ॥ ४४ ॥

उक्तं स्ववृत्तमुपसंहरति—स्वात्मवृत्तमिति । इत्थं मया गुप्तमपि स्वात्मनो मम वृत्तं मन्ददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या व्यपेतं बहिर्भूतं ते तुभ्यमुपवर्णितं हि यस्माद्भवान् भगवत्परोऽतो गुप्तमुपवर्णितमित्यर्थः ॥ ४५ ॥

एवं मुनिनोपवर्णितं पारमहंस्यं तुर्याश्रमनिष्ठानां गुणं श्रुत्वा ऽसुरेश्वरः प्रह्लादः तं यतिं प्रीतस्सन् पूजयित्वा आमन्त्र्य अनुज्ञाप्य स्वगृहं प्रति ययौ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्त्वादिगुणस्वभावेन विषमं सात्त्विकराजसतामसभेदं भिन्नं सर्वेभ्यो भयं मत्त इति यतिधर्मत्वात् भूतानां भद्रमेवाशासे तत्रापि भगवत्स्वामित्वं न विस्मरामीत्याह—आशास इति । उतेत्याशास इत्यनुवर्तते जगत एक एव स्वामीतिभावमैकात्म्यम् उताशासे कस्मिन्विषये महात्मनि भगवद्विषय इत्यर्थः ॥ ४२ ॥

तुर्यावस्थेन विहितोपासनानन्तरमिदं च कर्तव्यं ब्रह्मप्राप्तिमार्गत्वादित्याह—विकल्पमिति । विकल्पं जगच्चित्ते मनोवृत्त्यभिमानिनि न्यसेज्जुहुयात् जगच्चित्ताख्याग्न्यधीनमिति चिन्तयेत् चित्तमग्निमर्थेषु भ्रममाणे भगवत्युपाधावमाने मनसि मनो नामेन्द्राधीनतया तिष्ठतीति चिन्तयेत् मन इन्द्रं वैकारिके रुद्रे हुत्वा सन्निध्याप्य रुद्रं मायायां प्रकृतिविकारे महत्तत्त्वे विरिञ्चे सञ्चिन्त्य तां मायां तं विरिञ्चं वाऽऽत्मानुभूतौ चित्प्रकृतौ जुहुयात् चिन्तयेत् "चित्ताख्याऽग्नेरधीनं हि जगदेतद्विचिन्तयेत् । मनो नामेन्द्रवशगमग्निं च प्रतिचिन्तयेत्" इति वा वाक्यात्सर्वमवगन्तव्यम् । अत्र जडकार्यस्य जडकारणात्मकत्वं चेतनस्य चेतनाधीनत्वं चिन्तनीयमित्यर्थः । तामात्मानुभूतिं स्वानुभूतेर्लक्ष्म्या आत्मनि स्वामिनि पत्यौ निरन्तरं चिन्तयेत् ततो मुनिरनन्तरं कृतकृत्यो "वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृतः" इत्युत्पलमालावचनात्. किञ्च सत्यं साधुगुणपूर्णं विष्णुं पश्यतीति सत्यदृक् स्वानन्दानुभवात्मनि स्वमहिम्नि स्थितः "महिम्निस्वे महीयते" इति वचनात् स्वरूपानन्दज्ञानात्मनि ब्रह्मणि स्थित इति वा निरीहः अत एव निषिद्धचेष्टारहितो विरमेत् कृत्यादिति शेषः ॥ ४३ ॥ ४४ ॥

प्रतिपादितमर्थं निगमयति—स्वात्मेति । मया स्वात्मनो मम वृत्तं तुभ्यमनुवर्णितमित्यन्वयः । स्वात्मनो जीवस्य वा परमात्मनो वा कीदृशं मुखतो लोकशास्त्राभ्यां व्यपेतं रहितं आन्तरतो विपरीतत्वेन प्राप्तं शास्त्रसिद्धत्वाच्छास्त्रीयमित्यर्थः—

"अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः ।
शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयते" ॥

इति वचनादुक्त एवार्थः । इदं सिद्धमित्यभिप्रेत्याह—भवानिति ॥ ४५ ॥

ततः प्रह्लादेन किं कृतमित्यतस्तद्गमनमाह—नारद इति । पारमहंस्यं परमहंसानां निवृत्तिमार्गस्थानां विद्यमानम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवत्पर इति क्वचित् पाठः ॥ ४५ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रेयो भक्तियोगं तस्य भगवतः सकाशाद्दुर्लभत्वमाशंक्याह, उतेति । ऐकात्म्यं मोक्षं महात्मनि परमात्मनि ॥ ४२ ॥

एवंभूतत्वेन योगिनः स्थितावुपायमाह–विकल्पमिति, द्वाभ्याम् । विविधं कल्पत इति विकल्पो व्यवहारस्तं चित्ते मनोवृत्तौ तत एव तस्य प्रवृत्तेः तां मनसि अर्थानां विविधं भ्रमणं यातायातं यतस्तस्मिन् वैकारिकेऽहंकारे तं महति तच्च महान्तं मायायाम् अत्र तं महतीति पदद्वयमध्याहार्यम् ॥ ४३ ॥ ४४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लोकशास्त्राभ्यां व्यपेतं रहितमिति मन्ददृष्ट्या ननु तत्त्वदृष्ट्या किञ्च हीति हि यतो भवान् भगवत्प्रियो महाभागवतः तवाऽनेन प्रयोजनाभाव इति भावः ॥ ४५ ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप ।

चरे विचरामि ॥ ४१ ॥

श्रेयो मुमुक्षूणां मायामयमैश्वर्य्यम् महात्मनि भगवति मुमुक्षूणामैकात्म्यं तद्भावापत्तिलक्षणं मोक्षम् ॥ ४२ ॥

महात्मन्यैकात्म्यलक्षणस्य मोक्षस्योपायमाह—विकल्पमिति, द्वाभ्याम् । स्वानुभूत्या स्वीयस्य परमात्मनो ध्यानेन आत्मनि परमात्मनि स्थितः भगवद्ध्याननिष्ठो मुमुक्षुः विकल्पं चित्तं चित्तौ बुद्धौ जुहुयात्तां मनसि मनो वैकारिके सात्विकाहङ्कारे हुत्वा अनु अनन्तरं तं महत्तत्त्वद्वारा मायायां प्रकृतौ जुहोति जुहुयात् ॥ ४३ ॥

तां मायाम् आत्मानुभूतौ जगत्कारणे जुहुयात्तच्छक्तितया तास्मिन्प्रविलाप्य स्वयमात्मनि भगवति अंशिनि हग् द्रष्टैवस्थ सः विरमेत् संसारादिति शेषः । देवयानेन तत्पदं व्रजेदित्यर्थः ॥४४॥

भवान् भगवत्प्रियोऽतस्ते आत्मवृत्तं सुगुप्तमपि मया वर्णितम् कथम्भूतं लोकशास्त्राभ्यां लोकः प्रसिद्धः शिश्नोदरतृट्शास्त्रं तदनुरूपं कर्मादिप्रतिपादकं भगवच्छास्त्रविरुद्धं ताभ्यां व्यपेतं दूरीभूतम् ॥ ४५—४६ ॥

इति श्रीमद्भागवते महापुराणेसप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाऽध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

किसी समय किसी की इच्छा से स्नान कर चन्दन का लेपन कर सुन्दर वस्त्रों को धारण कर माला पहिन अलंकृत होकर, रथ हस्ती घोडाओं पर बैठकर चलते हैं । हे विभो! और कभी दिगम्बर (नग्न) होकर, जैसे कोई राहु केतु शनि आदि नवग्रहोंमें से कोई ग्रह आगया हो वा पिशाच हो,इस तरह विचरते रहते हैं ॥ ४१ ॥

जनतो स्वभाव से विषम हैं, कोई प्रतिकूल वर्त्तता है, कोई अनुकूल वर्त्तता है, परञ्च मैं तो किसी की निन्दा भी नही करता और किसी की बडाई भी नहीं करता हूं किन्तु इन सबों के श्रेय (मङ्गल) को मनाता हूं, और परमात्मामे एकता (निष्कपटता) चाहता हूँ ॥ ४२ ॥

मनके संकल्पविकल्पों को चित्त की वृत्तियों में हवन करे, उनको अर्थ के विभ्रम करने वाले मन में होमदें, मनको सात्विक अहंकार में, उसको महतत्त्व में, उसको प्रकृतिमें, हवन का अनुसंधान करे ॥ ४३ ॥

उस प्रकृति पद वाच्य माया को आत्मानुभव में हवन करे, फिर वह सत्य द्रष्टा मुनि निश्चेष्ट होकर विराम को प्राप्त हो जाय, और अपने अनुभव से परमात्मा में स्थित होरहे॥४४॥

हे प्रह्लाद ! अतिगुप्तभी अपना समाचार हमने तुमसें इस प्रकार वर्णन किया और यह लोक शास्त्रसे अविरुद्ध है और आप तो भगवत्प्रिय हो सब जानत ही हो ॥ ४५ ॥

नारद उवाच ॥

नारदजी बोले, । कि असुरेश्वर प्रह्लाद, इस प्रकार परमहंसों के धर्मोंको सुनकर बड़े प्रसन्न हुये , और मुनि की पूजकरा आज्ञा लेकर घर को सिधारे ॥ ४६ ॥

इति श्रीमद्भागवत सप्तस्कन्ध में त्रयोदश अध्याय की
भागवताचार्यकृत भाषा टीका समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ चतुर्दशोऽध्यायः ॥

युधिष्ठिर उवाच ।
गृहस्थ एतां पदवीं विधिना येन चाञ्जसा ।
याति देवऋषे ! ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥
नारद उवाच ।
* साधु पृष्टं महाराज ! लोकान्साध्वनुगृह्णता ।
एतत्तुभ्यं प्रवक्ष्यामि नैष्कर्म्यं कर्मणो यतः ॥ ० ॥
गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ।
वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥
शृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतम् ।
श्रद्दधानो यथाकालमुपशान्तजनाऽऽ(२)वृतः ॥ ३ ॥
सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ।
विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥
यावदर्थमुपासीनो देहे गेहे च पण्डितः ।
विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥
ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ।
यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥
दिव्यं भौमं चाऽऽन्तरिक्षं वित्तमच्युतनिर्मितम् ।
तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥
यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते ।
देशकालादिभेदेन पुनः श्रेयो विशेषकृत् ॥ १ ॥

गृहस्थमुल्लङ्घ्य मोक्षं प्रत्यन्तरङ्गत्वे प्रथमं वनस्थयतिधर्मेष्वभिहितेषु तर्हि गृहस्थस्य मोक्षो न स्यादिति शङ्कितचित्तः पृच्छति, गृहस्थ इति ॥ १ ॥

तस्य मोक्षधर्मानाह—गृहेष्वित्यादि, यावदध्यायसमाप्ति । साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत ॥ २ ॥ ३ ॥

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा स्वप्नादुत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

नन्वेवम्भूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युस्तत्राऽऽह—यावदर्थमिति । अन्तस्त्वनासक्तो बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

आग्रहं तु क्वापि न कुर्यादित्याह, ज्ञातय इति ॥ ६ ॥

नन्वेवं सर्वानुमोदने वित्तव्ययप्रसङ्गात्कुतो जीवनं कुतो वा कर्मकरणं तत्राह—दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौमं

* श्लोकोयमधिकः पठ्यते वीर० ॥　　(२) वृतमिति विज० पाठः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका।

निधानादि, आन्तरिक्षमकस्मादेव प्राप्तम्. एवं स्वत एवाऽच्युतनिर्मितं दैवलब्धं यत् एतत्पूर्वोक्तं कर्मादि ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि तत्राऽभिमानो न कार्य इत्याह—यावदिति। म्रियेत पूर्येत ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवमाश्रुताश्रमत्रयधर्मो गृहस्थाश्रमधर्मान् बुभुत्सुः पृच्छति, युधिष्ठिरः—गृहस्थ इति। हे देवऋषे! सन्ध्यभाव आर्षः गृहेष्वेव मूढा धीर्यस्य गृहासक्तचित्तो यादृशो गृहस्थाश्रमस्थः पुमान् येन विधिना एतां पदवीं तुर्याश्रमिगम्यां पदवीं मार्गं मुक्तिमित्यर्थः। यायात् प्राप्नुयात् तं विधिं ब्रूहि ॥ १ ॥

एवमापृष्टगार्हस्थ्यधर्मो देवर्षिस्तत्प्रश्नमभिनन्दंस्तान् धर्मान् वक्तुं प्रतिजानीते—साध्विति। हे महाराज! जानतापि त्वया लोकान् साधु यथा तथाऽनुगृह्णता साधु पृष्टमेतत्त्वत्पृष्टं गार्हस्थ्यव्रतमहं तुभ्यं प्रवक्ष्यामि यतः कर्मणः मया वक्ष्यमाणगार्हस्थ्यधर्मात् कर्मणां मुक्तिप्रतिबन्धकानां पुण्यपापात्मकानां निरासद्वारा नैष्कर्म्यं ज्ञानयोगलाभो भवेत् ॥ ० ॥

एवं प्रतिज्ञाय गार्हस्थ्यधर्मानाह—गृहेष्वित्यादिना यावदध्यायसमाप्ति। यद्यपि प्रथमाश्रमधर्मकथनानन्तरम् एवैतदाश्रमधर्मवर्णनं युक्तं क्रमप्राप्तत्वात्तथापि गार्हस्थ्यधर्माणां बाहुल्यान्महता प्रबन्धेन वर्णनीयत्वादाश्रमान्तरधर्मवर्णनानन्तरं ते कथ्यन्ते क्रमानादराद्वा। अत्र केचिद्वदन्ति मोक्षान्तरङ्गत्वेन प्रथमं वनस्थयतिधर्मानभिधाय पश्चाद्गृहस्थधर्मानभिदधातीति, तन्मन्दम् "अतस्त्वितरज्ज्यायो लिङ्गाच्च" ३।४।३९। इति शारीरकन्यायेन ब्रह्मविद्याऽनुग्राहकाल्पधर्माश्रमान्तरापेक्षया तदनुग्राहकबहुधर्मकगार्हस्थ्यस्यैवान्तरङ्गत्वादतो यथोक्त एवाशयः। हे राजन्! गृहेष्ववस्थितः गृहाश्रमस्थः गृहोचिता आश्रमाऽनुगुणाः क्रियाः कर्माणि सन्ध्योपासनपञ्चमहायज्ञादीन्यावश्यकानि साक्षाद्वासुदेवार्पणं यथा भवति तथा कुर्वन् फलसङ्गकर्तृत्वत्यागपूर्वकं कुर्वन् महामुनीनुपासीत भगवद्गुणमननशीलान्महाभागवतानुपासीत सेवतेत्यर्थः ॥ २ ॥

कथम्भूतः तेभ्यो भगवत अवतारकथामृतमभीक्ष्णं पुनः पुनः यथाकालमावश्यकधर्मानुष्ठानावशेषितं कालमुपशान्तजनैः सहितः श्रद्धापूर्वकं शृण्वन् ॥ ३ ॥

एवं सतां सङ्गात् देहदारपुत्रादिषु शनकैः सङ्गं विमुञ्चेत्तेष्वहंममताद्यभिमानं त्यजेदेवं मुच्यमानेषु मुक्ताऽभिमानविषयेषु सत्सु देहादिषु स्वप्नवदुत्थितो यथा स्वप्ने तद्विषये पुत्रादौ तस्मादुत्थितः तत्कालमात्राऽनुभाव्यतां भाव्यते ॥ ४ ॥

तथा देहे गेहे च चशब्दाद्दारादिषु च पण्डितः अस्थिरत्वाऽपुरुषार्थज्ञानवान् तत्र देहादौ स्वयं विरक्तोऽपि रक्तवदासक्तवद्यावदर्थं प्राणधारणाऽपेक्षितमर्थमुपासीनः स्वीकुर्वन् नृलोके नृशरीरे नरतां न्यसेदनुसन्दधीत नरत्वादिकं देहगतमनुसन्दधीत तत्त्वात्मन्यनुसन्दधीतेत्यर्थः ॥ ५ ॥

ज्ञात्यादयस्तेभ्यो ऽन्ये च यद्वदन्ति यदिच्छन्ति तत्स्वयं निर्ममः ममकाररहितो मोदेताऽनुमोदेत ॥ ६ ॥

यावदर्थपरिग्रह इत्येतदेव विवृणोति-यद्यद्भगवता निर्मितं प्रापितं दिव्यादिभेदभिन्नं वित्तं तत्र दिव्यं वित्तं वृष्ट्यादिभिर्जातं धान्यादि भौमं भूम्याज्जातं सुवर्णादिरूपम् आन्तरिक्षमकस्मादेव प्राप्तम् यद्वा दिव्यं वित्तमर्काऽऽलोकादि आन्तरिक्षं वर्षं भौमं तृणादि तथैतत्सर्वमुपयुञ्जानो विनियुञ्जान अबुधोऽविवेकी चेत् स्वतः स्वत्वेन कुर्यात् अबुधश्चेत्तदेतत्सर्वं स्वत्वेनाभिमन्येतेत्यर्थः। यद्वा बुध इत्येवच्छेदः विवेकी तत्सर्वमुपयुञ्जानः एतद्यथोपयुक्तं स्वतः कुर्यात् स्वत्वेन स्वीकुर्याद्देहधारणमात्रोपयुक्तमेव स्वीकुर्यादित्यर्थः॥७॥

अधिकं न स्वीकुर्यात् इत्यभिप्रयन्न तस्मिन् स्वत्वाभिमानं कुर्यादित्याह—यावदिति। हि यस्माद्यावज्जठरमुदरं म्रियेत पूर्येत तावदेव स्वत्वं देहिनामुदरभरणोपयुक्त एव हि वित्ते देहिनां स्वत्वाभिमान इत्यर्थः। एवं हि योऽधिकमपि स्वत्वेनाभिमन्येत स पुमांस्तेनश्चोर एव यत एवं ततो दण्डमेवार्हति इह दण्डाभावेऽप्यमुत्र दण्डमर्हत्येव यद्वा संसृतिरूपं दण्डमर्हतीति भावः ॥८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सर्ववर्णाश्रमाणां गृहाश्रममूलत्वात्सूचीकटाहन्यायेन वर्णाश्रमधर्मं निरूप्य गृहाश्रमधर्मं निरूपयत्यस्मिन्नध्याये, तत्र "नापृष्टः कस्यचिद्ब्रूयात्" इति न्यायात् युधिष्ठिरः पृच्छतीत्याह—युधिष्ठिर इति। एतां पदवीमन्याश्रमविषयां विधिना प्रकारेण ॥ १ ॥

* नैष्कर्म्यं मोक्षसाधनत्वम् ॥ ० ॥

गृहोचिताः क्रियाः पञ्चयज्ञलक्षणाः—

"पञ्चयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्।
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ॥
भूतपित्रमरब्रह्ममनुष्याणां महामखाः"—

इति याज्ञवल्क्यः। वासुदेवार्पणं कुर्वन्निति शेषः ॥ २ ॥

उपशान्तजनेन संन्यासिजनेनाहृतं कामितम् ॥ ३ ॥

स्वप्नं दृष्ट्वोत्थितः स्वप्नदृष्टपदार्थसङ्गं यथा जहाति तथा जायादिसङ्गं मुञ्चेदित्यन्वयः ॥ ४ ॥

यावदर्थो यावद्देहयात्राप्रयोजनो देहादावुदासीनो ऽवतिष्ठमानस्तत्र देहादौ रक्तवत् स्निग्धवन्नरतां नरत्वं न्यसेत्यजेत् यतिर्भवेदित्यर्थः ॥ ५ ॥ ६ ॥

अन्तरिक्षं द्यावापृथिव्योर्मध्यभवमच्युतेन निर्मितं यद्वित्तमुपयुञ्जीरन् लोका इति शेषः तत्सर्वं जानन् स्वकीयमिति न स्वीकुर्यात् ॥ ७ ॥

यावदर्थं इत्युक्तं विवृणोति—यावदिति। जठरं यावदन्नं म्रियेत गृह्णाति तावदन्नं स्वत्वं स्वकीयमिति स्वीकुर्यात् ततो ऽधिकादाने दण्डयोग्यमित्याह, अधिकमिति ॥ ८ ॥

---

* साधु पृष्टं महाभाग लोकानामनुगृह्णता। तत्त्वेन तदहं वक्ष्ये नैष्कर्म्यं येन कर्मणाम् ॥ इति मूलग्रन्थे ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गृहस्थ इति युग्मकम् ॥ १ ॥

साक्षादिति । तत्प्रीत्यर्थमेव न तु फलसाद्गुण्यार्थमित्यर्थः ॥ २—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निवृत्तं त्रिषु निर्वर्ण्य प्रवृत्तस्तु गृहाश्रमे ।
देशकालादिभेदेन धर्मं वक्ष्यत्युदेदेश ॥

तदेवं ब्रह्मचारिवानप्रस्थयतिषु त्रिष्वधिकारिषु निवृत्तधर्ममुक्त्वा प्रवृत्तधर्ममेकस्मिन् गृहस्थ एवाधिकारिणि वक्तुं प्रवर्त्तमानं मुनिं प्रत्यलं प्रवृत्तधर्मेण जन्ममृत्युप्रवाहानुकूलेन वक्तव्येन यदिच प्रवृत्तधर्मेणापि निवृत्तिधर्मफलं मोक्षः सिद्ध्येत्तर्हि तं ब्रूही त्याशयेनाह—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा कुर्वन् महामुनीन् उपासीत यथाकालं कालेकाले अपराह्लादौ उपशान्तजनावृतस्सन् कथामृतममीक्ष्णं शृण्वन् न तु कथाश्रवणकाले वार्त्तान्तरं शृण्वन्नित्यर्थः ॥ २—३ ॥

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः प्रबुद्धः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं मुञ्चति तद्वत् ॥ ४ ॥

उपासीनो भोग्यादिवस्तूनीति शेषः । देहे गेहे च विषये पण्डित इति तत्र तत्र औदासीन्येन वर्त्तमान इत्यर्थः । रक्तवत् अन्तर्विरक्तो बहिस्त्वासक्तवत् तत्र गृहमध्यवर्तिनि नरतां पुरुषत्वं न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

निर्ममः अनासक्त एव अनुमोदेत ॥ ६ ॥

दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौममाकराद्युत्थम् आन्तरिक्षमकस्मात् प्राप्तं तत्तद्रूपत्वेन सर्वमच्युतेनैव विनिर्मितमतो विचार्य नैव चिन्तां कुर्यादित्यर्थः । एतत् पूर्वोक्तं नित्यनैमित्तिकादि स्वतः स्वं वित्तं तेनेत्यर्थः ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि न तत्राभिमानो नापि यथेष्टोपभोगः कार्य्य इत्याह—यावत् यावता भ्रियेत पूर्य्येत ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गृहस्थधर्म्मो वर्ण्यते, चतुर्दशेऽध्याये तदेव पृच्छति—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा यथोचिताः क्रियाः कुर्वन् महामुनीन् वासुदेवावगन्तॄन् ॥ २ ॥ ३ ॥

स्वयमेवागमापायित्वेन मुच्यमानेषु आत्मा देहस्तदादिषु सङ्गं मुञ्चेत् यथा उत्थितः प्रबुद्धः स्वप्नवत् स्वप्नदृष्टेषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

पण्डितः कार्याऽकार्यवित् देहे गेहे लोके च यावदर्थं यथाप्रयोजनमुपासीत सङ्गं कुर्यात् हृदि विरक्तस्तत्र रक्तवद्वर्तेत नरतां नरत्वाभिमानं न्यसेत् अहन्तां परित्यजेदित्यर्थः ॥ ५ ॥

स्वानिर्बन्धं विहाय ज्ञात्यादीनामुक्तिमिच्छांत चानुमोदेत निर्ममो ममतारहितो भवेत् ॥ ६ ॥

बुधः अच्युतसामर्थ्यवित् दिव्यं देवप्रसादसिद्धं भौमं भूमिजं आन्तरिक्षमकस्मादागतं वित्तं सर्वमच्युतनिर्मितमिति मत्वा भुञ्जान एतत्प्रागुक्तं कुर्यात् ॥ ७ ॥

यावत् यावता जठरमुदरं भ्रियेत पूर्येत तावत्स्वत्वं देहिनः यस्तु अधिकमभिमन्येत स तु स्तेनश्चौरः अतो दण्डमर्हति ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीशो जयति ॥

युधिष्ठिर उवाच ।

युधिष्ठिरजी बोले, कि—हे देवर्षे ! इस आप की कही हुई पदवी (मोक्षोपयोगिदशा) को जिस विधि से मेरे सदृश मूढ बुद्धि गृहस्थ भी सुलभ से प्राप्त हो जावे, सो विधि आप कहिये ॥ १ ॥

नारद उवाच ।

नारदजी बोले, कि—हे राजन् ! गृह में स्थित रहकर ही पुरुष गृह के उचित क्रियाओं को करता हुआ भी ऐसा करे कि जिस में वे क्रियायें देवतान्तर के अद्वारक साक्षात् श्री वासुदेव के अर्पण होती जाय—ऐसा करता हुआ महा मुनि अर्थात् ज्ञानियों की उपासना करा करे ॥ २ ॥

और सदा शान्त जनों के सत्संग में रहकर श्रद्धा युत होकर, निरन्तर गोविन्द के अवतार कथा रूप अमृत को सुनता रहे ॥ ३ ॥

और अपने को आप ही छोडने वाले ऐसे पुत्र कलत्रादिकों में से, सन्त सङ्ग के प्रभाव से, धीरे२ सङ्ग को छोडता जाय, जैसे कि—स्वप्न से उठा हुआ पुरुष, स्वप्न के देखे हुए पदार्थों में से ममता को छोड देता है, ॥ ४ ॥

ज्ञानी पुरुष, प्रयोजन के अनुगुण देह गेहादिकों में उदासीन रहे, परञ्च विरक्त होकर भी, ऊपर से रागवान् के तरह कुछ उद्यमता करता रहे ॥ ५ ॥

अपने जाति के लोग माता पिता पुत्र भ्राता और सुहृद लोग, जो कुछ कहें और जो २ इच्छा करें, ममता शून्य होकर उसका अनु मोदन करता रहे ॥ ६ ॥

स्वर्ग भूमि और आकाश में होने वाले जो पदार्थ परमात्मा के बनाये हुए हैं, उन सबों को भोगता हुआ बुद्धिमान पुरुष आप से ऐसे ही (पूर्वोक्त शान्ति के कार्यों को ही) किया करे ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृगोष्ट्रखरमर्काखु सरीसृप्खगमक्षिकाः ।
आत्मनः पुत्रवत्पश्येत्तैरेषामन्तरं कियत् ॥ ९ ॥
त्रिवर्गं नाऽतिकृच्छ्रेण भजेत गृहमेध्यपि ।
यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥
आश्वाघान्तेऽवसायिभ्यः कामान्संविभजेद्यथा ।
अप्येकमात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥
जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुम् ।
तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥
कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ।
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥
सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ।
शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात् ॥ १४ ॥
देवानृषीन्नृभूतानि पितॄनात्मानमन्वहम् ।
स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥
यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसम्पदः ।
वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥

भाषा टीका ।

प्राणियों का उतना ही स्वत्व है, कि—जितने से जठर पूर्ण होता है, उतने से अधिक पदार्थ को जो अपना मानता है वही तस्कर है, और दण्ड के योग्य है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव यं कमपि स्वगृहं क्षेत्रं वा प्रविश्य भुञ्जानं न निवारयेदित्याह—मृगेति । मर्को मर्कटः सरीसृप् सर्पः माक्षिकाश्च तैः पुत्रैरेषां मृगादीनां कियदन्तरम् ॥ ९ ॥

अतिकृच्छ्रेणापाद्य न भजेत्किन्तु यावद्दैवप्रापितं तावदेव भजेत् ॥ १० ॥

श्वानश्च अघाश्च पतिताः अन्तेऽवसायिनश्चाण्डालादयः तानभिव्याप्य यथार्हं कामान् संविभजेत् स्वभोज्याद्विभज्य दद्यात् यद्यप्येकैवात्मनो दारा भार्या तस्यामतिथिशुश्रूषायां नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रहो ममैवेयमित्याग्रहस्तामेकामपि संविभजेत् अतिथिशुश्रूषायां नियुञ्जीतेत्यर्थः । नत्वन्यथा मन्तव्यम् यथार्हं विभजेदित्युक्तत्वात् ॥ ११ ॥

एवञ्चेत्तेनेश्वरो वशीकृतः स्यादित्याह—जह्यादिति । यदर्थे यन्निमित्तम् अन्यैरजितोऽपीश्वरस्तेन जित एव ॥ १२ ॥

ननु, कथमेवं तस्यां स्वत्वाऽभिमानो हातुं शक्यस्तत्त्वविचारेणेत्याह—कृमिविड्भस्मसु निष्ठा पर्यवसानमन्ते यस्य तदीया देहार्था रतिर्यस्यां सा स्वमहिम्ना नभो ऽपि छादयतीति तथा ॥ १३ ॥

किञ्च सिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैः पञ्चयज्ञशेषैरन्नादिभिः महतां निवृत्तानां परमहंसानाम् ॥ १४ ॥

एतन्निवृत्तपक्षाह—देवादीन्पञ्चयज्ञदेवताः आत्मानं च एवं पृथक् पुरुषमन्तर्यामिणमेव यजेत ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतोऽधिके स्वत्वाभिमानो दण्डहेतुरत एव तद्भरणे प्रवृत्तान्मृगोष्ट्रादीनात्मनः स्वस्य पुत्रवत्पश्येत् पुत्रानिव मन्येत नतु निगृह्णीयादित्यर्थः । तथाहि तैः पुत्रैः सह एषां मृगादीनां कियदन्तरं न किञ्चिदप्यन्तरं नाकिञ्चिदपि तारतम्यमस्तीत्यर्थः । तत्र मृगाः शुनकमार्जारादयः मर्को मर्कटः आखुः मूषकः सरीसृपा अन्ये सर्पा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्वभावा जन्तवः *त्रिमच्चिकाः विशब्दः पादपूरणार्थः विशिष्टम-च्चिका इति वा सरीसृप्खगेति वा पाठः ॥ ९ ॥

विवृतमर्थमुपसंहरति–त्रिवर्गमिति । स्वयं गृहस्थोऽप्यनेन तदुपयुक्तवर्गत्रयनिष्ठता सूच्यते. अतिकृच्छ्रेणाऽतिप्रयासेन त्रिवर्गं धर्मार्थकामांश्च भजेत न सेवेत. दैवात्प्राप्तैरेव तुष्येदित्यर्थः । तदेवाह—यावद्दैवेन देशकालाऽनुगुणयेन प्रापितं तदेव यथोपयुक्तम् भजेत ॥ १० ॥

धर्मान्तरमाह—श्वानश्वाघा अतिपाप्मानश्चाऽन्ते ऽवसायिनश्चण्डालादयश्च तानभिव्याप्य तेभ्यः यथोचितं कामान् संविभजेद्यथाशक्ति तदपेक्षितान् अन्नादीन्दद्यादित्यर्थः । सङ्गमात्मजायासुतादिषु विमुञ्चेदित्युक्तं जायासङ्गत्यागमुपपादयति-अपीति । आत्मनः स्वस्य दारान् भार्यामेकामपि जह्यात्तस्यां स्वत्वाऽभिमानं त्यजेदित्यर्थः । एतदेव वक्तुं तावत्तस्या दुस्त्यजत्वमाह–यतो यस्यां भार्यायां नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः ॥ ११ ॥

यदर्थं यद्भार्यार्थं स्वकीयान् प्राणान्पितरं गुरुं वा हन्यात् एवं दुस्त्यजा भार्येत्युक्तम् । एवंभूतायां तस्यां स्त्रियां भार्यायां स्वत्वं जह्यात्स्वत्वाभिमानं न कुर्यादित्यर्थः । यः पुमानेवं जह्यात्तेन पुंसा अजितः कैरप्यजितः परमात्मा जितः वशीकृतो भवति ॥ १२ ॥

कथमेवं तस्यां स्वत्वाभिमानस्त्यक्तुं शक्यः ? तत्त्वविचारेणेत्याह, कृमीति । कृमिविड्भस्मसु निष्ठा पर्यवसानमन्तो यस्य तदिदं कलेवरं क. तदीया देहार्था रतिर्यस्या सा भार्या क. नभश्छदः आकाशस्यापि छादयिता आकाशतुल्यो निर्लेप इत्यर्थः । ईदृश आत्मा क्वेत्येवं तत्त्वविचारेण जह्यादित्यर्थः ॥ १३ ॥

यावदर्थपरिग्रह इति दैवाल्लब्धेष्वपि प्राणमात्रोपयुक्तान्नादिपरिग्रह उक्तः इदानीं तैरपि यज्ञाऽवशिष्टैरेवार्थैरात्मनो वृत्तिं कल्पयेदित्याह—सिद्धैरिति । सिद्धैर्दैवाल्लब्धैः यज्ञावशिष्टैः पञ्चमहायज्ञादिभिरवशेषितैरेवार्थैरन्नादिभिरात्मनः स्वस्य वृत्तिं प्राणधारणरूपां कल्पयेत्. शेषे यज्ञाद्यनुपयुक्ते स्ववृत्त्यनुपयुक्ते च दैवाल्लब्धेऽप्यर्थे स्वत्वाभिमानं त्यजेत् प्राज्ञः एवंविधज्ञानवान् महतां पदवीं महद्भिर्गम्यां मुक्तिरूपां पदवीं प्राप्नुयात् ॥ १४ ॥

एतद्विवृणवन्नाह—देवानृषीन् नॄन् मनुष्यान् भूतानि पितॄंश्च पञ्च महायज्ञदेवता आत्मानं च स्ववृत्त्या याजनाध्यापनादिपूर्वोक्तवृत्त्या आगतेनार्जितेन वित्तेनाऽन्वहमहरहः पृथक् पुरुषं देवाद्यन्तरात्मानं परमपुरुषं यजेतएकमेव परमपुरुषं देवादिशरीरमेदेनान्तरात्मत्वेनाऽवस्थितमाराधयेदित्यर्थः ॥ १५ ॥

किञ्च यर्हि यदात्मनः स्वस्याधिकारः "अर्थी समर्थो विद्वांश्च"इत्युक्तोधिकारः स्यात्तदा सर्वा यज्ञसम्पदः स्युरेव यथाधिकारं सर्वे यज्ञाः कर्तव्या एवेत्यर्थः । वितानो यज्ञग्रन्थः श्रौतकल्पसूत्रादिरूपस्तदुक्तेन विधिनाऽग्निहोत्रादिकर्मणा परमपुरुषं यजेत ॥ १६ ॥

* सरीसृपविमच्चिका इति मूलपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"आखुभुक् वृषदंशश्च मार्जारो मर्क उच्यते" इत्यभिधानं वयः पक्षिणः अन्तरं भेदः कियान् कोपि पराधीनत्वाविशेषात् ॥९॥

अतिकृच्छ्रेण शास्त्राविहितमार्गेण शूद्रप्रतिग्रहादिलक्षणेन गृहमेधी गृहस्थो ऽपि . सर्वाश्रयत्वे पि दैवोपपादितं यवादिव्रीहिजातमयाचितोपपन्नं वा ॥ १० ॥

कर्माङ्गं चेद्दारग्रहणं प्रयोजनं न ग्राम्यभोगः तथात्वे तदाशापूरणस्य दुःसाध्यत्वेन तत्प्रयत्ने महान्दोष आपद्येत तदभिप्रायेणाह—आप्त्वेति । यदर्थे येषामर्थे कामपूरणार्थं स्वप्राणान् जह्यात् पितरं वा हन्यात् तद्विरोधे सतीति शेषः । किञ्च यतो येभ्यो नृणां सत्त्वग्रहो सत्त्वगुणग्राहो धैर्यनिग्रहो भवतीति शेषः । तानेतान्महतो दारानाप्त्वा कामान्यथायोग्यं संविभज्य श्रेयसे घटेतेति शेषः ॥ ११ ॥

यद्यङ्गना प्राणाद्यपहारिणी तर्हि तया श्रेयसे घटनं कथम् ? इत्याशङ्क्याह—तस्यामिति । सत्त्वग्रह इत्यादिकमुत्तरत्रापि सम्बध्यते अजितोऽपि यस्याः सत्त्वग्रहस्तस्यां स्त्रियां तेन सत्त्वेन जितो वशं गतः स पुमांस्तस्यां स्त्रियां सत्त्वं जह्यादित्यन्वयः । यदि स्वात्मानमुल्लङ्घ्य सा वर्तते तर्हि तस्यास्त्याग एव वरीयानिति इममर्थं हि शब्देन दर्शयति—

"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्" ॥

इति च—

"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तस्य वर्धते ।
मृते जीवति वा पत्यौ या नान्यमुप गच्छति ॥
सेह कीर्तिमवाप्नोति मोदते चोमया सह ।
स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियः" ॥

इति च ॥ १२ ॥

ग्राम्यधर्मेण शरीरमेवानित्यं क्षणिकं भयग्रस्तं भयमुपजायते नतु नित्यमतश्च नित्यदुःखं शरीरं च कृमिविड्भस्माऽवसायि न वरमनेनाकाशशरीरब्रह्मज्ञानं दुरुत्पादमेतत्करुणामन्तरेणाऽतो दुःखहेतुत्वाद् दुश्चरित्रस्त्रीत्याग एव श्रेयानित्याशयवानाह—कृमीति । तदीयदेहेन क्रियमाणा रतिर्यस्याः सा तथा आत्मा परमात्मा अत्रात्मा जीवः किं न स्याच्छरीरसङ्गादित्यत उक्तं नभश्छदिरिति नभसश्छदिराच्छादनं यस्य स तथा नभो व्याप्यावस्थित इत्यर्थः । "आकाशशरीरं ब्रह्म"इति श्रुतेः "अणुर्ह्येष आत्मा यं वा एते स नीतः पुण्यं च पापञ्च"इति श्रुतेर्जीवस्याणुपरिमाणत्वेन सिद्धत्वात् ॥ १३ ॥

"यज देवपूजासङ्गतिकरणदानेषु"इति धातोः यज्ञो नारायणाख्यदेवपूजा तत्करणावशेषितैः सिद्धैर्ज्ञानसाधनयोग्यैरर्थैः स्ववृत्तिं देहयात्रालक्षणां कल्पयेत् तथापि शेषे ऽवशिष्टे वस्तुनि स्वत्वं स्वकीयत्वं त्यजेद्यः स प्राज्ञो महतां संन्यासिनां पदवीमाप्नोतीत्यन्वयः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादियागेषु तदन्तर्यामित्वेन ततो भिन्नत्वेन भगवत्पूजैव विधेयेत्याशयेनाह—देवानिति ॥ १५ ॥

यर्हि यदाऽस्य यज्ञाधिकारोऽस्ति यदा वा सर्वा यज्ञसम्पदः स्युस्तदा वैतानिकाविधिनाऽग्निहोत्रविधिना वा यजेदित्यन्वयः ॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जह्यादिति, अजितवशीकारेणैव तादृशत्वं सिद्ध्यतीति भावः ॥ १२ ॥

आत्मा परमात्मा ॥ १३—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुत्रवदिति । यथा पुत्रेभ्यो भोज्यं विभजेत् तथैव यथोचित-मेभ्योऽपि विभजेदित्यर्थः ॥ ९ ॥

अतिकृच्छ्रेण सम्यक् संपाद्य न भजेत् किन्तु अल्पायासेनैव दैवप्रापितं यावत् तावदेव न तु भूरिसंसारमपेक्षेतेत्यर्थः । अपिकारादब्रह्मचर्य्यादिस्तु गुरुकृत्यादिषु किमुतेति भावः ॥ १० ॥

श्वानश्च अघाः पतिताश्च अन्तेऽवसायिनश्चण्डालादयश्च तानप्यभिव्याप्य यथार्हं कामान् स्वभोग्यान् दारामिति स्त्रीत्वैकत्वे आर्षे यद्यप्येकैवात्मनः सैव भार्य्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयते तदपि तामपि विभजेत् अतिथ्यादिशुश्रूषणे नियुञ्जीतैव. नत्वन्यथा मन्तव्यं यथार्हं संविभजेदित्युक्तत्वादिति श्रीस्वामिचरणाः अन्येत्वन्यथापि व्याचक्षते यतः यस्याम् ॥ ॥ ११ ॥

स्वभार्य्यायामभिमानत्यागोऽतिदुष्कर इत्याह, जह्यादिति ॥ १२ ॥

तस्यामभिमानत्यागे विवेकं दर्शयति—कृमिविड्भस्मसु निष्ठा पर्य्यवसानमन्ते यस्य तदीया रतिर्यस्यां सा क्व, आत्मा परमेश्वरः स्वमहिम्ना नभोऽपि छादयतीति स क्वेति. यदि तस्यामभिमानत्यागेनैव स प्राप्यते तर्हि कियदेतदिति भावः ॥ १३ ॥

यावता उदरभरणं स्यात्तावत्स्वेव वस्तुन्यभिमानं कुर्य्यादिति यत् पूर्वोक्तं तत्रापि व्यवस्थामाह—सिद्धैर्दिव्यभौमान्तरिक्षैर्यज्ञावशिष्टार्थैः पञ्च यज्ञशेषैरन्नादिभिः ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मर्को मर्कटः सरीसृप् सर्पः अन्तरं भेदः ॥ ९ ॥

गृहमेध्यपि त्रिवर्गं धर्ममर्थं कामं च यथादेशं यथाकालं यावद्दैवोपपादितं भजेत् अतिकृच्छ्रेण तु न भजेत् ॥ १० ॥

श्वा सारमेयः अघः पतितः अन्तेऽवसायी चाण्डालादिः तानभिव्याप्य यथायोग्यं कामान् अन्नादीन् विभजेत्. यतः यस्यां स्वत्वग्रहः आत्मीयत्वाग्रहस्तामेकां स्वगृहकुले जनान्तररहितामपि यथायोग्यं अतिथ्याद्यर्चने विभजेत् ॥ ११ ॥

जनो यदर्थं यस्याः प्रयोजनार्थं प्राणान् रणादौ स्वान् बन्धून् अन्नाद्यविभागेन जह्यात् पित्रादिकं च हन्यात् त्वङ्कारादिना. त्वस्यां यः स्वत्वं जह्यात्तेनाऽजितो ऽपि भगवान् जितः ॥ १२ ॥

अहो अत्यल्पे पदार्थे ममत्वत्यागेन परमपदार्थलाभः इत्याह, कृमीति । कृम्यादिषु निष्ठा पर्यवसानमन्ते यस्य तत्तुच्छं कलेवरं क्व. क्व पुनस्तदीया कलेवरार्था रतिर्यस्यां सा. क्व चाऽयमात्मा अजितः स्ववैभवेन नभो ऽपि छादयतीति तथा ॥ १३ ॥

सिद्धैर्दिव्यभौमान्तरिक्षैः यज्ञावशिष्टैः पञ्चयज्ञशेषैरर्थैरन्नादिभिरात्मनो वृत्तिं कल्पयेत् शेषे स्वनिर्वाहादधिके स्वत्वं त्यजन् महतां निवृत्तानां पदवीं मोक्षमार्गमियात् ॥ १४ ॥

एतदेव विवृण्वन्नाह—देवादीन्पञ्चयज्ञदेवताः आत्मानं च स्ववृत्त्यागतवित्तेन अन्वहं प्रतिदिनं पृथक् पुरुषमन्तर्यामिणमेव यजेत् अङ्गभूतेषु देवादिषु तदङ्गिनं भगवन्तं पूजयेदित्यर्थः ॥ १५ ॥

यर्हि आत्मनो ऽधिकाराद्याः अधिकारः यज्ञाद्यधिकारस्तदाद्याः अर्थित्वसमर्थत्वादिस्सर्वाः यज्ञसम्पदः स्युः तदा वैतानिकेन वितानः कर्मप्रतिपादको ग्रन्थस्तदुक्तेन विधिना अग्निहोत्रादिना यजेत पुरुषमित्यन्वयः ॥ १६ ॥

भाषाटीका ।

मृग, उष्ट्र, खर, मर्कट, मूषक, सर्प, खग, मक्षिका, इन सबों को अपने पुत्र सदृश देखे, क्योंकि ? इनसे और पुत्रादिकों से क्या अन्तर है ॥ ९ ॥

गृहमेधी पुरुष भी त्रिवर्ग को बहुत कष्ट से न सेवन करे, किंतु देश काल के अनुरूप जो प्रारब्ध से उत्पन्न होजावे, उसी से त्रिवर्ग को चलावे ॥ १० ॥

श्वान चांडाल पर्यंत यथायोग्य अन्नादि का सम्यक् विभाग कर दिया करे, और जिस स्त्री के विषें मनुष्यों का 'स्वत्वग्रह' नाम यह स्त्री केवल अनन्य होकर हमारी ही है, ऐसा ज्ञान है, उस अपनी स्त्री को भी अतिथि आदि की सेवा में उचित रीति से विभक्त कर दे ॥ ११ ॥

जिसके लिये पुरुष अपने प्राणों को त्याग देता है और पिता वा गुरु को मार डालता है उस स्त्री में जिसने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक्।
इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ १७ ॥
तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथाऽर्हतः।
तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं (१) ब्राह्मणाननु ॥ १८ ॥
कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः।
श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥ १९ ॥
अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये।
चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च ॥ २० ॥
तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २१ ॥
माघे च सितसप्तम्यां मघाराकासमागमे।
राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥ २२ ॥
द्वादश्यामनुराधा स्याच्छ्रवणास्तिस्र उत्तराः।
तिसृष्वेकादशीवासु जन्मर्क्षश्रोणायोगयुक् ॥ २३ ॥
त एते श्रेयसः काला नृणां श्रेयोविवर्द्धनाः।
कुर्यात्सर्वात्मनैतेषु श्रेयो ऽमोघं तदायुषः ॥ २४ ॥

भाषा टीका।

अपने स्वत्व का अभिमान छोड दिया है, उसने अजित (श्रीहरि) को भी जीत लिया अर्थात् वश कर लिया ॥ १२ ॥

अन्त में कृमि विष्ठा और भस्म भाव को प्राप्त होने वाला कहाँ ? यह तुच्छ कलेवर, और कहां इस की रति का साधन भार्या ? और आकाश के तरह निर्लेप और ज्ञानकृत विभुत्व से आकाश को भी आच्छादन करने वाला यह आत्मा कहाँ ? ॥ १३ ॥

और श्राद्ध, पंचमहायज्ञ, अथवा श्रीविष्णु के आराधन से अवशिष्ट जो सिद्ध पदार्थ, तिसी से अपना जीवन करे, और बाकी पदार्थों में से अपने स्वत्व को छोडता जावे, तौ पूर्वोक्त परम हंसों की पदवी को प्राप्त होता है ॥ १४ ॥

तथा देवों को ऋषियों को मनुष्यों को और भूत तथा पितृगणों को एवं आत्मा अन्तर्यामी पुरुष श्रीमन्नारायण कों अपनी वृत्ति से प्राप्त जो वित्त तिससे पृथक् यजन करे ॥ १५ ॥

यदि अपने को अधिकार से आदि लेकर सर्व संपदा यज्ञ की प्राप्त होवें, तौ वैतानिक विधि से अग्निहोत्रादि यज्ञ से भी यजन करे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न पुनरतिनिर्बन्धो यज्ञार्थे कार्य इत्याह—नहीति। विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न तथा ऽग्निमुखतो हविषा इज्येत ॥ १७ ॥

ब्राह्मणेषु च देवेषु पञ्चयज्ञदेवतासु च मर्त्यादिष्वन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमन्तर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मणयजनानन्तरमन्येषु यजस्व पठान्तरे ब्राह्मणा आननं यस्य तम् ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥ २० ॥

शुक्लेमासि वैशाखे शुक्लपक्षे अक्षय्यतृतीयायामित्यर्थः। हेमन्ते शिशिरे च मार्गशीर्षादिमासचतुष्टये ऽपि याश्चतस्रोऽष्टकास्तासु ॥ २१ ॥

सम्पूर्णचन्द्रा पौर्णमासी राका न्यूनचन्द्रा सैवानुमतिः तथा मासर्क्षाणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युस्तदा तदुक्तं त्रिकाण्डायाम्—

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" ॥

इति ॥ २२ ॥

(१) ब्राह्मणानामिति वीर० पा०।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुराधा श्रवणा उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात् आसूत्तरास्वेकादशी वा यदा स्यात्तदा च जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा तदा, योगमहत्त्वं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह— त एत इति, द्वाभ्याम्। तदेवाऽऽयुषः अमोघं साफल्यमित्यर्थः ॥२४॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अग्निमुखाराधनाद्विप्रमुखाराधनमतीव भगवतस्तोषकृदित्याह, नहीति । हे राजन् ! विप्रमुखे हुतैरन्नादिभिर्यथायं सर्वयज्ञभुग्भगवानिज्येनाऽऽराध्येत न तथाऽग्निमुखतो हविषाऽऽराध्येत ॥१७॥

तस्माद्ब्राह्मणेषु देवेषु पञ्चमहायज्ञदेवेषु मर्त्यादिषु च यथाशक्ति यथायोग्यं च तैस्तैः कामैरन्नादिभिर्ब्राह्मणाननं ब्राह्मणा एवाननं मुखं यस्य तमेनं क्षेत्रज्ञं परमात्मानं देवाद्यवस्यजीवशरीरकं वा यजस्वाऽऽराधय ब्राह्मणाननिति पाठे ब्राह्मणेषु यज तानन्तरमन्येषु मर्त्यादिषु यजस्वेत्यर्थः । युधिष्ठिरस्य गृहस्थत्वात्तवाप्येवमाराधनमवश्यं कर्तव्यमित्यभिप्रायेणाऽऽह यजस्वेति मध्यमपुरुषप्रयोगः ॥ १८ ॥

किञ्च प्रोष्ठपदे भाद्रपदे मासि द्विजः त्रैवर्णिको धनवांश्चेत् यथावित्तं वित्तानुसारेण पित्रोर्मातापित्रोस्तद्बन्धूनाञ्चापरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यं कुर्यात् ॥ १९ ॥

किञ्चायनादिषु कालेषु पित्रोः श्राद्धं कुर्यादित्यन्वयः तत्रायनं कर्कटसङ्क्रान्तिर्मकरसङ्क्रान्तिश्च मेषतुले विषुवसंज्ञिके तथा च वृद्धवसिष्ठः—

"मकरकर्कटसङ्क्रान्ती द्वेतूदग्दक्षिणायने ।
विषुवे तु तुलामेषे गोलमध्ये ततोऽपराः ॥ इति

कुहुर्नष्टेन्दुकला चन्द्रादित्ययोरुपरागो ग्रहः ॥ २० ॥

शुक्लपक्षे तृतीयायाम् अक्षयतृतीयायामित्यर्थः । कार्तिके मासि शुक्लपक्षे नवम्यां हेमन्तशिशिरे च ऋतौ चतसृष्वष्टकासु मार्गशीर्षादिमासचतुष्टयकृष्णाष्टमीषु ॥ २१ ॥

माघे मासि सितसप्तम्यां शुक्लसप्तम्यां मघानक्षत्रपौर्णमास्योस्संयोगकाले च सम्पूर्णचन्द्रा पौर्णमासी राका कलाहीनचन्द्रा पौर्णमासी सानुमती ताभ्यां युक्तानि यानि मासर्क्षाणि मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि तदुपलक्षितेषु च कालेषु ॥ २२ ॥

यद्वा द्वादश्यामनुराधाश्रवणामुत्तराफाल्गुनी उत्तराषाढोत्तराभाद्रेति तिस्र उत्तरा वा स्युः अनूत्तरासूक्तासु तिसृषु एकादशी वा यदा स्यात्तदा च जन्मर्क्षश्रोणायोगयुक्तजन्मनक्षत्रस्य श्रवणनक्षत्रस्य वा योगेन युक्तः कालः तदा च योगमहत्त्वं सम्बन्धबाहुल्यख्यापनायेति सूचितम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह—त इति, द्वाभ्याम् । त एते श्रवणादयः नृणां श्रेयसः श्रेयस्साधनधर्मानुष्ठानस्य योग्याः श्रेयो वर्द्धयन्तीति तथा तादृशाः कालाः तस्मात्सर्वात्मना करणत्रयैक्येन एषु कालेषु श्रेयः श्रेयस्साधनं वक्ष्यमाणं स्नानादिकमनुतिष्ठेत्तदेव ह्यायुषः अमोघममोघत्वं साफल्यमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, मुख्यं होमादिकरणं भगवत्प्रीतिजनकं किम् ? तत्राह, नहीति ॥ १७ ॥

उपसंहारमुखेनोक्तार्थं निर्धारयति—तस्मादिति। ब्राह्मणा आननं यस्य स तथा तम् ॥ १८ ॥

ननु, यज्ञसम्भारे सति विशिष्टफलप्रदः कालः क इति तत्राह, कुर्यादिति। प्रोष्ठपदे कन्याख्ये सिंहमासामावास्यामारभ्य कन्यामावास्यापर्यन्ते तत्रापरपक्षीयकाले श्राद्धं कुर्यादित्युपर्यन्वय्य न्वेतव्यं तद्बन्धूनां पितृमातृबन्धूनां पितामहमातामहादीनाम् ॥१९॥

अयने उत्तरदक्षिणसञ्ज्ञे विषुवे सम्वत्सरान्तसङ्क्रमणे कुहामावास्यायां श्रवणेषु श्रवणादित्रिषु चशब्दात्सप्तम्यादित्रिषु त्रयोदश्यां च तदुक्तम्—

"सप्तम्यादित्रयं चैव तथा चैव त्रयोदशी।
चतस्रस्त्वष्टकाः प्रोक्ताः कृष्णपक्षाद्विशेषतः"

इति ॥ २० ॥

वृश्चिकमासामावास्यामारभ्य मकरमासामावास्यापर्यन्तः कालो हेमन्तः तदुपरिकालः शिशिरः "हेमन्ते शिशिरे चैव नित्यश्राद्धे गुणोत्तरम्" इति वचनात् अयमपि विशिष्टकालः ॥२१॥

राकापौर्णमासी मघा पौर्णमास्योः सङ्गमे "शशिनि सिनीवाली स्यात्, दृष्टे नष्टे कुहूरमावास्या। अनुमतिरूने राका सम्पूर्णा पौर्णमासी च" इति हलायुधः राकया ऽनुमत्या युतानि मासनक्षत्राणि ॥ २२ ॥

यास्तिस्रः श्रवणादितारा आसु तारासु प्राप्तैकादशी पुण्यकालो ऽत्र श्राद्धकरणं च विकल्पः एकादश्यां श्राद्धकरणस्य निषिद्धत्वान्न वैष्णवसिद्धान्तिनस्तदाचरन्ति त्रैविद्याश्चरन्ति च वा यथैकादशी पुण्यदिनम् अत्र क्रियमाणं कर्म सफलं तथा तिसृष्वपि ताराखिति वा जन्मनक्षत्रं श्राद्धकाल इति शेषः । सौम्ययोगयुग् मृगशिरःसम्बन्धयुक्तं दिनं च ॥ २३—२७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अयने इति चतुष्कम् ॥ २०—२२ ॥

तिसृष्वेकादशी वाविति—तत्रोपवासाः प्राप्ताः वैष्णवानाम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र श्राद्धनिषेधात् तथाहि ब्रह्मयामले "श्राद्धञ्चैकादशीदिने" इति दीक्षासङ्कल्पनिषेधः । ब्रह्मवैवर्त्ते "ये कुर्वन्ति महीपाल श्राद्धञ्चैकादशीदिने । त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः" इति. पाद्मोत्तरखण्डे—एकादश्यास्तु प्राप्तायां मातापित्रोर्मृतेऽहनि । तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ पुष्करखण्डे-"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् । तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ २३-३४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

न पुनरतिनिर्बन्धो यज्ञार्थमेव कार्य्य इत्याह—नहीति । यथा विप्रमुखे हुतैरन्नादिभिरिज्येत तथा न अग्निमुखे इज्येत इत्यर्थः ॥ १७ ॥

ब्राह्मणा एव देवास्तेषु भोज्यदानैः क्षेत्रज्ञं परमेश्वरं यजस्व ब्राह्मणाननु ब्राह्मणपूजानन्तरं मर्त्यादिषु च, ब्राह्मणाननमितिपाठः स्पष्टः ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥

अयने विषुवे च कुर्यादिति श्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेपि ॥ २० ॥

शुक्लपक्षे अक्षयतृतीयायामित्यर्थः । हेमन्तशिशिरेषु च याश्चतस्रो ऽष्टका भवन्ति तासु ॥ २१ ॥

मासर्क्षाणि वैशाखादिमासेषु विशाखादीनि राकया पूर्णचन्द्रया पौर्णमास्या अनुमत्या न्यूनचन्द्रया वा तया यदि युक्तानि स्युस्तदा तेष्वित्यर्थः । "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इत्यमरः ॥ २२ ॥

अनुराधाश्रवणउत्तरफाल्गुनी उत्तराषाढे उत्तरभाद्रपदा वा यदि द्वादश्यां स्यात् आसु उत्तरासु तिसृषु एकादशी वा स्यादिति अत्रोपवासानर्हविद्धैकादश्येव ग्राह्या तत्र श्राद्धनिषेधात् यदुक्तम् ब्रह्मवैवर्त्ते—

"ये कुर्वन्ति महीपाल श्राद्धं चैकादशीदिने ।
त्रयस्ते नरकं यान्ति दाता भोक्ता च प्रेरकः" ॥ इति

उपवासानर्हायास्तस्या अप्राप्तौ तु परदिने, यदुक्तम्—

एकादश्यां तु प्राप्तायां मातापित्रोर्मृतेऽहनि ।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्" ॥

पुष्करखण्डे च—

एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् ।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्" ॥ इति

जन्मर्क्षं स्वीयजन्मनक्षत्रं तस्य श्रोणस्य श्रवणस्य वा योगेन युक्तं यदि दिनं स्यात्तदा तत्रापि योगग्रहणं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

श्रेयसो धर्ममात्रस्यैव न केवलं श्राद्धमात्रस्येत्यर्थः । तदेव आयुषः अमोघममोघत्वम् ॥ २४ ॥ २५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च यज्ञार्थमपि नाऽतिहठः कर्त्तव्य इत्याह—नहीति । अयम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति प्रसिद्धः सर्वयज्ञभुग्भगवान् यथा विप्रमुखे हुतैरन्नाद्यैरिज्येत तथा अग्निमुखतो हविषा नेज्येत ॥ १७ ॥

यस्मादेवं तस्माद्ब्राह्मणेषु पञ्चयज्ञदेवेषु ब्राह्मणाननु ब्राह्मणार्चनानन्तरं मर्त्यादिषु मनुष्यपश्वादिषु च तैस्तैः कामैरेनं क्षेत्रज्ञमन्तर्यामिणं यजस्व ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे मासि अत्रामावास्यापर्यन्तो मासो बोध्यः ॥ १९ ॥

अयने मकरकर्कसङ्क्रमणे मकरकर्कसङ्क्रान्ती "द्वे तूदग्दक्षिणायने" इति वृद्धवसिष्ठवचनात्. विषुवे मेषतुलासङ्क्रमणे "विषुवे तु तुलामेषे गोलमध्ये ततो ऽपरा" इति वृद्धवसिष्ठवचनात् "समरात्रिदिने काले विषुवद्विषुवं च तत्" इति कोशाच्च. कुर्याच्छ्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेऽपि दिनक्षये त्रिस्पृशातिथौ ॥ २० ॥

शुक्लपक्षे वैशाखे इति शेषः । तृतीयायामक्षयतृतीयाम् कार्तिके शुक्लपक्षे नवम्याम् हेमन्ते शिशिरे मार्गशीर्षादिमासचतुष्टये चतसृष्वष्टकासु अष्टमीषु ॥ २१ ॥

मघानक्षत्रसम्पूर्णचन्द्रयुक्तपौर्णमासी समागमे राका सम्पूर्णचन्द्रा पौर्णमासी सैव कलाहीनचन्द्रयुताऽनुमतिः "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इति कोशात् तथा मासर्क्षाणि तत्तन्मासनामनिर्वर्तकानि नक्षत्राणि युतानि यदा स्युः तदा च यदुक्तं नामलिङ्गानुशासने "पुष्पयुक्ता पौर्णमासी पौषीमासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" इति ॥ २२ ॥

यदा द्वादश्यामनुराधा श्रवणे वा उत्तराफाल्गुनी वा उत्तराषाढा वा उत्तराभाद्रपदा वा स्यात् आसूत्तरासु एकादशी वा स्यात् तदा स्नानदानादिकं विशेषतः कुर्यात् श्राद्धं तु तन्निमित्तं द्वादश्यां कुर्यात्—

"एकादश्यां यदा राम ! श्राद्धं नैमित्तिकं भवेत् ।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरे ॥

इति पुराणान्तरात् जन्मर्क्षश्रोणयोगयुक् स्वजन्मनक्षत्रयुक्तं श्रवणयुक्तं वा दिनं यदा तदाऽपि श्राद्धं कुर्यात् ॥ २३ ॥

तएते श्रेयसः पुण्यमात्रस्य कालाः न श्राद्धमात्रस्य अत एतेषु सर्वात्मना श्रेयः कुर्यात् तत्तः आयुषः अमोघमवैफल्यं स्यात् ॥२४॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ।
पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥ २५ ॥
संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ! ॥ २६ ॥
अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान् ।
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २७ ॥
बिम्बं भगवतो यत्र सर्वमेतच्चराचरम् ।
यत्र ह ब्राह्मणकुलं तपोविद्यादयाऽन्वितम् ॥ २८ ॥
यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥
सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ।
कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥
नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥ ३१ ॥
नारायणाश्रमो नन्दा सीतारामाऽऽश्रमादयः ।
सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! सर्व यज्ञों के भोक्ता ये भगवान् श्रीकृष्ण, जैसे ब्राह्मणों के मुख में प्रेम से हविष्यान्न के हवन करने से तृप्त होते हैं, वैसे अग्नि के मुख से नहीं तृप्त होते, ॥ १७ ॥

तस्मात् ब्राह्मण देव मनुष्य आदिकों में इन श्रीकृष्ण का यथा योग्य यजन करो, और ब्राह्मणों के पश्चात् अपने क्षेत्रज्ञ का भी यजन करो ॥ १८ ॥

ब्राह्मण, प्रौष्ठपद नाम (भाद्रपद) मास में कृष्णपक्ष में जैसा द्रव्य हो तैसा माता पिता का श्राद्ध करे, और वित्तवाला हो तो उनके बन्धुओं का भी महालय श्राद्ध करे, (यहां अमान्त-मास मान कर पितृपक्ष को भाद्रपद के कृष्ण पक्ष में जानना चाहिये) ॥ १९ ॥

अयन अर्थात् दक्षिणायन उत्तरायण के सूर्य की गती के समय में. जैसेकि कर्क और मकर के सूर्य में, और विषुव नाम तुला और मेष के सूर्य में, व्यतीपात में, क्षय तिथिमें, सूर्यग्रहण में, चन्द्रग्रहण में, और द्वादशी श्रवण नक्षत्र में, ॥ २० ॥

अक्षयतृतीया में, कार्तिक शुक्लनवमी में, और हेमन्त शिशिर ऋतुओं में चार अष्टका नाम तिथियों में ॥ २१ ॥

माघशुक्ल सप्तमी में, मघा और अमावास्या के संगम में, माघशुक्ल पूर्णमासी में, और अमावास्या वा पूर्णिमा से युक्त मास प्रधान नक्षत्रों में, (जैसे कि ? चैत्रमें चित्रायुत अमावास्या पूर्णिमा वैशाख में विशाखा युत इत्यादि) ॥ २२ ॥

जब द्वादशी में अनुराधा अथवा उत्तरा भाद्रपद नक्षत्र होवे, और तीनों उत्तराओं में यदि अनिषिद्ध एकादशीश्राद्ध प्राप्त होवे तो, श्राद्ध करे और जन्म नक्षत्र तथा श्रवण नक्षत्र में श्राद्ध करे ॥ २३ ॥

ये सब मांगलिक काल हैं, मनुष्यों के श्रेयकी वृद्धि करने वाले हैं, तस्मात् इनकालों में श्राद्धादि शुभकर्म करें तब आशुक अमोघ श्रेय होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संस्कारकाल इति, जायायाः पुंसवनादि अपत्यस्य जातकर्मादि. आत्मनो यज्ञदीक्षादि. प्रेतस्य संस्था दहनादि. मृताहश्च सांवत्सरिकं यदा अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

यत्र यस्मिन्नेतच्चराचरमाश्रित्य तस्य भगवतो बिम्बं रूपम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः ॥ २७ ॥ २८ ॥ २९ ॥

अर्हैरुत्तमैराश्रितानि ॥ ३० ॥ ३१ ॥

सीतायारामस्य चाश्रम आदिर्येषां द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एषु कालेषु कृतं यज्ञपादिकं यच्च पित्राद्युद्देशेन दत्तं 'भावेकः' दानं च तदूद्धनश्वरमक्षय्यफलसाधनम् ॥ २५ ॥

किञ्च हे नृप ! जायापत्यात्मनां संस्कारकाले । तत्र जायायाः संस्कारः पुंसवनादिः अपत्यस्य संस्कारो जातकर्मादिः आत्मनः स्वस्य संस्कारो यज्ञदीक्षादिः एतेषां कालेषु यदा प्रेतस्य संस्था दहनादि कर्म मृताहश्च तदाऽन्यस्मिन्नभ्युदयार्थे कर्मणि कृतं स्नानादिकमनश्वरमिति पूर्वेणान्वयः ॥ २६ ॥

एवं श्रेयस्कराः काला उक्ताः अथ देशान्वक्तुं प्रतिजानीते—अथेति । कर्मादि श्रेयस आवहानाभावकान् देशान् प्रवक्ष्यामि तावदयं मुख्यो देशः श्रेयस्कर इत्याह–स इति । यत्र देशे सत्पात्रं लभ्यते ॥ २७ ॥

यत्र यस्मिन् सर्वमेतच्चराचरमाधेयतया नियाम्यतया चाऽस्ति तस्य भगवतो बिम्बं यत्र च देशे वर्त्तते यत्र च देशे तपोविद्यादयाभियुक्तं ब्राह्मणकुलं वर्त्तते ॥ २८ ॥

यत्र यत्र देशे हरेर्भगवतोऽर्चा पूजा प्रवर्त्तते स सर्वोऽपि देशः पुण्यतमः श्रेयसां पदं श्रेयःसाधनधर्माऽनुष्ठानयोग्यं स्थानं किञ्च यत्र येषु देशेषु पुराणेषु प्रसिद्धाः गङ्गादयो नद्यः सन्ति ॥ २९ ॥

तथा पुष्करप्रभृतीनि सरांसि च यत्र सन्तीति पूर्वेण संबन्धः । उत किञ्च यानि चार्हाश्रितानि महात्मभिरधिष्ठितानि क्षेत्राणि सन्ति. तान्येव दर्शयति–कुरुक्षेत्रमिति । यद्वा कुरुक्षेत्रादिव्यतिरिक्तक्षेत्राभिप्रायेणोक्तमर्हाश्रितानीति । गयस्यासुरस्य शिरः तत्पतनस्थानं गयेत्यर्थः । प्रयागो गङ्गायमुनयोस्सङ्गमस्थानं पुलहाऽऽश्रमः सालग्रामक्षेत्रम् ॥ ३० ॥

फल्गुनी नदी गयायामेव तत्स्थानं फाल्गुनम् सेतुः रामसेतुः प्रभासः प्रत्यक्सरस्वतीसंगमस्थानं कुशस्थली द्वारवती पम्पा सरोवरम् बिन्दुसरः कर्दमाश्रमः ॥ ३१ ॥

नारायणाश्रमो बदरिकाश्रमः नन्दा अलकनन्दातटं सीतारामयोराश्रमश्चित्रकूटाद्रिः । एतत्प्रभृतयः । तथा हे राजन् महेन्द्रमलयादयः सर्वे कुलगिरयश्च ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्पात्रं विशिनष्टि–विश्वमिति । यस्मिन्देशे भागवतस्ताश्चराचरं सर्वं जगदस्तीति ज्ञातव्यम्—

"यतिर्यस्य गृहे भुङ्क्ते तत्र भुङ्क्ते हरिः स्वयम् ।
हरिर्यस्य गृहे भुङ्क्ते तत्र भुङ्क्ते जगत्त्रयम्" इति

वचनात् ॥ २८ ॥

अर्चाः, सालग्रामादिप्रतिमाः पुराणेषु, भागवतादिषु विश्रुताः ॥ २९ ॥

कृष्णावेण्यादयश्च क्षेत्राणि पुरुषोत्तमादीनि अर्हैः पूज्यैरगस्त्यादिभिराश्रितान्यधिष्ठितानि ॥ ३० ॥

फल्गुनं स्थानं हरपुरं कन्यातीर्थं वा "कन्यापुरं फल्गुनं स्यात्स्थानं हरपुरं च तत्"इत्यभिधानं वाराणसीपुरी काशी ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

संस्कारकाले जायायाः पुंसवनादि अपत्यस्य जातकर्मादि आत्मनो यज्ञदीक्षादि प्रेतसंस्था प्रेतस्य दाहनादि मृताहः पित्रादेः सांवत्सरिकं श्राद्धम् एतेषु अन्यस्मिन्नभ्युदये च श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

सन् साधुश्चासौपात्रञ्चेति सत्पात्रं तच्च कीदृशं ? यत्र चराचरमेतज्जगत् तस्य भगवतो बिम्बं बिम्बतुल्यमित्यर्थः । प्रतिमा हि प्रतिबिम्बरूपेति तस्याः सकाशादपि भक्तस्योत्कर्षः अत एव मद्भक्तः पूजाऽभ्यधिकेति—

"अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः" ॥

इति च वक्ष्यति अर्चा प्रतिमा सालग्रामादिरूपा ॥ २७ ॥ २८ ॥

अर्चा स्थिरप्रतिमा श्रीजगन्नाथादिस्तदाश्रिता उत्कलादयः ॥ २९—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनश्वरं बहुफलम् ॥ २५ ॥

जायायाः भार्यायाः संस्कारकाले पुंसवनादौ अपत्यस्य जातकर्मादौ आत्मनो यज्ञदीक्षादौ प्रेतस्य पित्रादेः संस्था दहनादिस्तत्र यदा पित्रादिमृताहस्तत्र साम्वत्सरिके अन्यस्मिन् अभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

तत्र सत्पात्रं "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्मृतः" इति भगवद्वचनात् सच्छब्दवाच्यस्य भगवतो भजनीयस्य वासस्थानं भगवद्भक्त इत्यर्थः । यत्र लभ्यते स पुण्यतमो देशः ॥ २७ ॥

यत्र सर्वमेतच्चराचरं तस्य भगवतो बिम्बं शब्दमयी वेदभागवतादिरूपा मूर्तिः । ब्राह्मणां कुलं च यत्र देशे स पुण्यतमो देश इति पूर्वेणान्वयः ॥ २८ ॥

अर्चा मूर्तिः ॥ २९ ॥

अर्हैः शिष्टैराश्रितानि ॥ ३०—३१—३२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ।
एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ।
धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥
पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ।
हरिरेवैक उर्वीश ! यन्मयं वै चराचरम् ॥ ३४ ॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ।
राजन्यदग्रपूजायां मतः पात्रतयाऽच्युतः ॥ ३५ ॥
जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान् ।
तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥ ३६ ॥
पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥

भाषा टीका ।

इन कालों में स्नान जप होम व्रत देवपूजा ब्राह्मण-पूजा, और पितृ देव मनुष्य भूत प्राणियों को जो दिया जाय वह नष्ट नहीं होता है ॥ २५ ॥

हे नृप ! स्त्री के पुंसवनादि काल मे, पुत्र के जातकर्मादि काल में, आप के यज्ञादि दीक्षा काल में, प्रेत के संस्था दहनादि काल में, और मृतक के वार्षिक काल मे, और अन्य कालों में भी अभ्युदय कर्मा में श्रेय करे ॥ २६ ॥

नारद जी बोले कि ? अब हम धर्मादिश्रेयों को प्राप्तकरने वाले देशों को कहते हैं, एक तो यही निश्चित है, कि वही अति पुण्य देश जानना जहां सत्पात्र पुरुष मिलते होवें ॥२७॥

और जिसमें यह सर्वचराचर स्थित है, ऐसे भगवान् की श्रीमूर्ति जहां पर विराजमान हैं, और जहां तप विद्या और दया सहित ब्राह्मण कुल विद्यमान है ॥ २८ ॥

और जहां २ श्री हरि की अर्चा (पूजा अथवा) विद्यमान है। और जहां पुराणों में विख्यात श्रीगंङ्गा आदि पुण्य नदीं विद्यमान हैं, वही देश श्रेयोंका स्थान है ॥ २९ ॥

और जहा पुष्करादि सरोवर हैं, । और महात्माओं से आश्रित जो क्षेत्र हैं, और कुरुक्षेत्र, गया, प्रयाग, पुलहाश्रम ॥ ३० ॥

नैमिषारण्य, फाल्गुनतीर्थ, सेतु, प्रभास, द्वारका, काशी, मधुपुरी, पंपासरोवर, विन्दुसरोवर ॥ ३१ ॥

श्रीबद्रीनारायणाश्रम अलकनन्दा, श्रीचित्रकूट से आदि लेकर हे राजन् ! महेन्द्र, मलय, प्रभृति सबपर्वत ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्चाश्रिताश्च स्थिरप्रतिमाश्रिताः पूर्वं तु शालिग्रामशिलाद्यर्चनदेश उक्त इत्यपौनरुक्त्यम्. अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथा ॥ ३३ ॥

अथ पात्रमाह, हरिरेव पात्रं निरुक्त निर्णीतम् ॥ ३४ ॥

तदेवाऽऽह, देवेषु च ऋषिषु चार्हत्सु च तपोयोगादिषु सिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्मादच्युत एव पात्रतया सम्मतः ॥ ३५ ॥

संमतत्वे हेतुमाह, जीवराशिभिर्व्याप्तो ब्रह्माण्डकोश एव योऽङ्घ्रिपः सर्वजीवानामात्मनश्च तर्पणम् ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या द्रढयति–पुराणीति । नृतिर्यगादिरूपाणि पुराणि शरीराणि तेष्वन्तर्यामिरूपेण प्रत्यगंशेन च यतः शेते अतः पुरुष इति प्रसिद्धः ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा ये हरेरर्चा स्थिरा पूजा प्रतिमावा तया आश्रिताः अधिष्ठितास्त एते सर्वे पुण्यतमा देशाः बिम्बं भगवतो यत्रेति सालग्रामशिलाद्यर्चन देश उक्तः । अत्र तु वेंकटाद्रिस्थानादीन्युच्यन्ते इत्यपौनरुक्त्यम् श्रेयस्कामः पुमानभीक्ष्णशः पुनः पुनरेतान् देशान्नितरां सेवेत ॥ ३३ ॥

पुंसां यत्फलसाधनत्वे यो धर्म उदितो विहितः स एषु देशेषु कृतः सहस्रगुणमधिकस्य फलस्य उदयो यस्मात्तादृशो भवेत । एवं देशकालौ उक्तौ. अथ पात्रमाह—पात्रंत्वित्यादिना । हे उर्वीश ! पात्रवित्तमैः सत्पात्रयाथात्म्यविद्भिः कविभिः हरिरेक एव. पात्रं निरुक्तं हरिरेक एव सत्पात्रमिति निर्णीतमित्यर्थः । पात्रं पूज्य समर्हणीयं वस्तु हरि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

विशिनष्टि—एतच्चराचरात्मकं जगद्यन्मयं यद्धरिप्रचुरमेतेन तत्समर्हणेन सर्वे समर्हिता भवन्तीति सूचितम् ॥ ३४ ॥

हरेरेव पात्रत्वं यतो राजसूये ऽधुना त्वयैव दृष्टमित्याह, देवेष्विति । हे राजन् ! देवेषु ऋषिषु अर्हत्सु तपोयोगादिसिद्धेषु ब्रह्मादिषु सनकादिष्वपि सत्सु तत्र त्वदीयराजसूये यद्यस्मादच्युत एवाग्रपूजायां पात्रतया मतो ज्ञातः ॥ ३५ ॥

हरेः समर्हणेन सर्वेषामर्हणं कृतप्रायमित्याह—जीवेति । जीवराशिभिराकीर्णो व्याप्तः ब्रह्माण्डकोश एव यो महानङ्घ्रिपो वृक्षस्तस्य मूलत्वात् कारणत्वादच्युतस्येज्या ऽऽराधनं सर्वेषां जीवात्मनां तर्पणं तृप्तिकरं यथाङ्घ्रिपस्य मूलेऽर्पितं जलं तच्छाखोपशाखानां वृद्धिकरं तथा ब्रह्माण्डकोशमूलभूतेऽच्युते कृते कृतमर्हणमण्डान्तरगतेषु सर्वेषु कृतप्रायमेवेत्यर्थः । अतः स एवोत्तमं पात्रमिति भावः । इतरत्रापि तदृदृष्ट्यैवाऽर्हणं कार्यमिति च ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या दृढयति—पुराणीति । मनुष्यतिर्यगृषिदेवतारूपाणि पुराणि शरीरात्मकान्यनेन भगवता सृष्टानि सृष्टेषु च पुरेषु यतो भगवान् जीवेन रूपेण जीवाख्येन शरीरेण "यस्यात्माशरीरम्" इति श्रुतेः । पुरे शेते अतो ऽसौ पुरुषः पुरुषशब्दः पुष्कलप्रवृत्तिनिमित्ताश्रयः । पुरे शेते इति पुरुषः शकारस्य सकारः अकारस्यैकारश्च व्यत्यात् "अन्येष्वपि दृश्यते" इति डश्च जीवेन रूपेणेत्यनेन केवलं सर्वकारणत्वादेव तदर्हणं तत्कार्यपर्यन्तं पर्यवसन्नमपि तु तत्तदन्तरात्मतया तत्तद्रूपेणा ऽवस्थितत्वाच्चेत्युक्तं भवति ॥ ३७ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरर्चाश्रिताः हरिक्षेत्रादयः पुनर्वचनं सर्वस्मात्तेषां श्रैष्ठ्यद्योतनाय ॥ ३३ ॥

एतद्देशनिषेवणेन किं विशेषफलमिति तत्राह—धर्म इति ।

"कृष्णातरङ्गसम्भूतपवनस्पर्शमात्रतः ।
निर्धूतपातकाः सर्वे जना विष्णुपदं ययुः ॥"

इत्यादिशास्त्रेषु सहस्राधिकफलोदयत्वेनोदितः पात्रेष्वपि तारतम्यमस्ति तत्र मुख्यपात्रं हरिरित्याह—पात्रमिति । पात्रतारतम्यवित्तमैः कविभिः पात्रं च निरुक्तं वै मुख्यत्वेन निर्णीतं हीत्यन्वयः, किं तत्? इत्यत उक्तं हरिरिति, चराचरं यन्मयं यत्स्वामिकं यद्व्याप्तं सर्वं यस्मात्तस्माद्धरिरेव मुख्यं पात्रमित्यन्वयः ॥ ३४ ॥

इदं भवतोऽपि सिद्धमित्याह—देवेति । ब्रह्मात्मजादिषु सत्सु देवाश्च ऋषयश्च देवर्षयस्त एवार्हन्तः पूजायोग्या येष्वपि सत्सु तत्र तत्र यज्ञशालायामच्युतो गुणतो वयतः स्वरूपतश्च च्युतिरहितत्वात् श्रीनारायणो ऽग्रपूजायां पात्रतयाभवत्त्वया ज्ञात इति यदतो मुख्यपात्रं हरिरित्यवधारणा युक्ता ॥ ३५ ॥

किञ्च प्रत्येकं पूजापि न विधेया भगवत्पूजया तत्तृप्ति-

सम्भवात्तन्मूलत्वात्तेषां तरुमूलनिषेचणं च शाखानामिवेति मुख्यवैष्णवसिद्धान्तमाह—जीवराशिभिरिति ॥ ३६ ॥

ननु, मुख्यपात्रालाभे विहितकर्मानुष्ठानविषयाभावेन तद्विधानं व्यर्थमित्याशङ्क्य तत्तद्योग्यपात्रं वक्तुं कञ्चन सृष्टिप्रकारमाह—पुराणीति । अनेन दयालुना हरिणा नृतिर्यगादिसंज्ञितानि पुराणि शरीराणि सृष्टानीत्यन्वयः । ततः किम् ? तत्राह, शेत इति । श्रीहरिरेषु पुरेषु भोगायतनेषु जीवेन रूपेण स्वप्रतिबिम्बेन सह शेते इति यत्तस्मादसौ पुरुष इत्युच्यते जीवोऽपि तन्नामेति शेषः । "पुरिशयनात्पुरुषः" इति श्रुतिं हिशब्देन सूचयति ॥ ३७ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवर्षीति–तत्र, राजसूये ॥ ३५ ॥

सर्वेषां जीवानामात्मनश्च तर्पणरूपा सैव भवतीत्यर्थः ॥ ३६ ॥

पुराणीति जीवेन जीवयित्रा जीवान्तर्यामिरूपेणेत्यर्थः ॥ ३७ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देशान्तरात्सहस्रगुणाधिकस्य फलस्य उदयो यस्मात् सः ॥ ३३ ॥

अत्र धर्मार्थं कस्मै देयमिति चेत् साक्षाद्धरये वैष्णवेभ्यो ब्राह्मणेभ्यः सर्वप्राणिभ्यश्चेति वक्तुं प्रथमं दानस्य पात्रं निर्वक्ति प्रात्रमिति ॥ ३४ ॥

हरेः प्रात्रत्वे निर्विवादत्वं तव राजसूययज्ञ एव सिद्धमित्याह । देवेषु ऋषिषु अर्हत्सु तपोयज्ञादिसिद्धेषु ब्रह्मादिषु तदात्मजादिषु सनकादिषु च अग्रपूजायां पात्रतया अच्युत एव मतः ॥ ३५ ॥

संमतत्वे हेतुमाह–जीवेति । य आण्डकोशस्तस्य मूलत्वात् ॥ ३६ ॥

अतस्तस्यावतारसमये साक्षात्तस्मा एव अन्यदातु तदुक्ताय सत्पात्रं यत्र लभ्यते बिम्बं भगवत इति पूर्वोक्तेः तदनन्तरं तु प्राणिमात्रेभ्य इत्याह–पुराण्यनेनेति ॥ ३७ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेरर्चाश्रिता इति पुनरुक्तिः अर्चाश्रितदेशस्याऽतिपुण्यतमत्वाभिप्राया हि यतः अत्र एषु देशेषु ईहितः कर्तुं वाञ्छितोऽपि धर्मः किमुताऽनुष्ठितः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथाभूतो भवति ॥ ३३ ॥

प्रसङ्गात्पात्रमाह–पात्रमिति । हे उर्वीश ! हरिरेवैकः पात्रं पूज्य इत्यर्थः ॥ ३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेष्वेषु भगवान्राजंस्तारतम्येन वर्त्तते ।
तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ॥ ३८ ॥
दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ! ।
त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥
ततोऽर्चायां हरिं केचि*त्संश्रद्धाय सपर्यया ।
उपासत उपास्तापि नाऽर्थदा पुरुषद्विषाम् ॥ ४० ॥
पुरुषेष्वपि राजेन्द्र ! सुपात्रं ब्राह्मणं विदुः ।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥ ४१ ॥
नन्वस्य ब्राह्मणा राजन् ! कृष्णस्य जगदात्मनः ।
पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे सदाचारनिर्णयो नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे राजन् ! तत्र त्वदीये राजसूये देवेषु ऋषिषु अर्हत्सु ब्रह्मशिवादिषु ब्रह्मात्मजादिषु अर्थात्पूज्येषु पूजकेषु सत्सु यत्र यः मयोक्तः अच्युत एव अग्रतः पूजायां पात्रतया मतः तथोक्तं राजसूयप्रकरणे

"कृष्णंकमलपत्राक्षं नार्चयिष्यन्ति ये जनाः ।
जीवन्मृतास्तु ते ज्ञेया न सम्भाष्या कदाचन"—

इत्यादि ॥ ३५ ॥

अच्युतपूजनेन सर्वपूजनं भवतीत्याह—जीवानां राशिभिः समूहैराकीर्णो व्याप्त आण्डकोश एवाङ्घ्रिपः तत्तस्याच्युतस्य मूलत्वादुक्ताङ्घ्रिपमूलदत्वाच्युतेज्या सर्वजीवानामात्मनश्च तर्पणं भवति ॥ ३६ ॥

तस्य सर्वत्र पूजार्थं सान्निहितत्वमाह-अनेन अच्युतेन नृतिर्यगाद्याख्यानि पुराणि सृष्टानि तेषु पुरेषु रूपेण अन्तर्यामिरूपेण शेते, किमर्थम् ? तत्राह-जीवेन पालनीयेन सह शेते जीवपालनार्थमित्यर्थः । अतो असौ पुरेषु शेते इति पुरुष इत्युच्यते ॥ ३७ ॥

भाषाटीका ।

ये सब पुण्यतम देश हैं । और जोर श्रीहरीकी अर्चाश्रित देश हैं वे बड़े पुण्यतम देश हैं श्रेय की कामना वाला-पुरुष इन देशों का निरन्तर सेवन करे, इन देशों धर्म की चेष्टा करने से पुरुषों को सहस्राधिक फल होता है ॥ ३३ ॥

हे राजन् ! अच्छे पात्र अपात्र जानने वाले लोगोंने तो, जिन से चराचर जगत व्याप्त हो रहा है, उन एक, श्रीहरि ही को पात्र कहा है ॥ ३४ ॥

क्योंकि ? हे राजन् ! देव, ऋषि, और ब्रह्मपुत्रादिकों में पूजनीयों के मध्य में भी, इनही की अग्र पूजा हुई । और बड बडे कविलोगों ने पूज्यत्वेन इन ही को पात्र बताया ॥३५॥

असंख्येयजीव राशियों से व्याप्त यह ब्रह्माण्डही एक महान् वृक्ष है, उस वृक्ष का मूल रूप होने से अच्युत (श्रीकृष्ण) की पूजा सर्वजीवात्माओं की तृप्ति करने वालीहै ॥ ३६ ॥

इन श्रीकृष्ण ने मनुष्य, तिर्यक् ऋषि, देवता, आदि रूप बहुत से पुरों की सृष्टि करी है, और जीव रूप से आप उनमे शयन करते हैं, इसी से इनका नाम पुरुष भी है ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तारतम्येन तिर्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्तते तस्मात्पुरुषः पात्रम् तत्रापि यावानात्मज्ञानांशो यथा यथा ईयते तप आदियोगेन यत्र यत्र प्रतीयते, तथा तथा ऽसौ पात्रमित्यर्थः । तथाच श्रुतिः"पुरुषत्वे चाविस्तरामात्मा"इत्यादि ॥३८॥

तर्हि प्रतिमादौ हरेः किमिति पूजां कुर्वन्ति ? तत्राह—दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानमसम्मानस्तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा क्रियायै पूजाद्यर्थम् ॥ ३९ ॥

* संश्रद्धया इति पाठः चिज० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरिमुपासते उपासिताऽप्यर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती साऽपि मन्दाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ॥ ४० ॥

पुरुषेष्वेव जात्या तप आदिभिश्च पुनर्विशेषान्तरमाह—पुरुषेष्वपीति । यो धत्ते तं सुपात्रं विदुः ॥ ४१ ॥

एतदेव कैमुत्यन्यायेन द्रढयति—नन्वस्येति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

चतुर्दशोऽध्यायः॥ १४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इतोऽपि पुरुषशब्दवाच्यः स्वसमर्हणेनान्येषां तदाधायकश्चेत्याह—तेष्विति । हे राजन् ! तिर्यगादिभ्यस्तेषु पुरुषेषु तारतम्येन स्वकीयज्ञानशक्त्यादिगुणाविर्भावतारतम्येन वर्त्तते भगवानतोऽसौ पुरुषः पुरु अधिकं पुरुषेषु शेत इति पुरुषः यत एवंभूतोऽतस्तद्दृष्ट्यैवार्हणमर्हणीयेषु सर्वेषु पुरुषेषु विधेयमिति भावः यतो देवमनुष्यादिपुरुषेष्वन्तर्यामितया जीवशरीरकतया च भगवान् वर्त्तते यतश्च सर्वे पुरुषा देवादयो भगवच्छरीरभूतास्तेन तारतम्यं व्याप्ताश्च तस्मादात्मा परमात्मा पुरुषः परमपुरुषो यावान्यावद्गुणाविर्भाववान् यथा यत्र यत्र ईयते प्रतीयते तत्तत्पात्रं यत्र यत्राधिकं भगवतो ज्ञानशक्त्यादिगुणाविर्भावस्तत्तदुत्तमम् पात्रं न्यूनाविर्भाववत्त्वमुक्तमिति भावः तदेवं भगवत एवोत्तमपात्रत्वमितरेषामपि तदात्मकत्वेनैवार्हणीयत्वं तदपि तदाविर्भावानुसारेण व्यवस्थितमिति चोक्तम् ॥ ३८ ॥

ननु, भगवतस्तदात्मकानां पुरुषाणामेवार्हणीयत्वे स्मृतिकारादिभिराराधनीयत्वे विहिता हरिप्रतिकृतिः पूजिता न फलदा स्यादिति चेद्भूतद्रोहिणां व्यर्थेत्याह—दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानं तिरस्कारः तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा हे नृप ! हरेः क्रियायै पूजार्थमर्चाप्रमाणां कविभिः त्रेतादिषु युगेषु कृता पूज्यत्वेन विहिता त्रेतादिष्वित्यनेन प्रायशः कृते सर्वात्मकब्रह्मोपासनमेव विहितमिति सूचितम् ॥ ३९ ॥

तत्रार्चायां पूजार्थप्रतिमायां केचिद्धरिं संश्रद्धाय श्रद्धापूर्वकमुपासते एवमुपास्ताशाधिताप्यर्चा पुरुषद्विषां भगवदात्मकान् पुरुषान्द्विषन्तीति पुरुषद्विषः तेषां नार्थदा न पुरुषार्थदा भवति पुरुषान् बहुमन्यमानानामेवार्चाराधनं फलवदित्यर्थः ॥ ४० ॥

यदुक्तं "तस्मात्पात्रं हि पुरुषः" इत्यादि, तद्विवृणोति—पुरुषेष्विति । हे राजेन्द्र ! पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः सुपात्रतयाऽध्यात्मविदः सुपात्रत्वे हेतुं वदन्विशिनष्टि, इदं ब्राह्मणात्मकं सुपात्रं तपसानशनेन विद्याऽऽत्मयाथात्म्यज्ञानपूर्वकभगवदुपासनरूपविद्यया तुष्ट्या दैवाल्लब्धसन्तोषेण चेदं स्वधर्मशमदमादीनामप्युपलक्षणम् एभिर्गुणैर्हरेस्तनुं धत्ते बिभर्ति चशब्दः पादपूरणार्थः एवकारार्थे वा हरेरेव तनुं धत्त इत्यर्थः ॥ ४१ ॥

एतदेव कैमुत्तिकन्यायेन द्रढयति—नन्वस्येति । हे राजन् ! न त्रिलोकीं पादरजसा पुनन्तः पवित्रीकुर्वन्तः जगदन्तरात्मनः श्रीकृष्णस्यापि ब्राह्मणा महद्दैवतं किमुतान्येषामस्मद्विधानां ब्राह्मणा दैवतमित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईशो भगवांस्तेषु पुरेषु स्थितः पुरुषनामसु जीवेषु च तारतम्येन तत्तद्भक्त्यादिगुणतारतम्यानुसारेण सन्निधानतारतम्येन वर्तत इति यस्मात्तस्मात्तत्तद्योग्यानुसारेण पुरुषो जीवराशिश्च पात्रं तदन्तर्यामिहरिस्मरणपूर्वकमिति शेषः अत्र सन्निधानतारतम्यमेव हरेर्न तु स्वरूपतारतम्यं तदुक्तं—

"ब्रह्मादिस्थावरान्तेषु न विशेषो परे क्वचित् ।
व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति च" इति.

अत्रापीत्थं भावमाह—यावानिति । पुरुषे तु आत्मा यावान् महिम्ना यथा येन प्रकारेण ज्ञायते तदानुकूल्येन जीवराशिः पात्रमित्यर्थः ॥ ३८ ॥

हरिप्रतिमापूजायाः पुरुषस्थितपुरुषनाम्नो हरेः पूजा सम्यक् फलवतीत्याशयेनाह—दृष्ट्वेति । कविभिस्तेषां नृणां मिथ आत्मनो हरेरवज्ञां दृष्ट्वा त्रेतायां सपर्याक्रियायै हरेरर्चा कृता यस्मात् ॥ ३९ ॥

ततः केचित्संश्रद्धया सपर्यया अर्चायां हरिमुपासते ये तेषां पुरुषस्थितहरिद्विषां सोपासैहिकफलमन्तरेण परमपुरुषार्थप्रदा न भवतीत्यन्वयः ॥ ४० ॥

मुख्यपात्रमाह–पुरुषेष्विति । कीदृशो ब्राह्मणो मुख्यं पात्रमित्यतस्तद्विशिनष्टि—तपसेति । तनुं प्रतिमास्थानं अत्र "शिलावत्प्रतिमाः सन्तो विप्राद्याश्च हरेः स्मृताः" इति वचनात् विप्रादिमात्रं हरिशिलास्थानीयं न किन्तु तप आदिगुणविशिष्टब्राह्मणकुलं अन्यथा हरेरर्चैषा सा पुरुषार्थप्रदा न स्यादिति तदुपासां विनिन्द्य सुपात्रं ब्राह्मणं विदुरिति कथनं व्यर्थं स्यादत एव ब्राह्मण इति तत्पदं प्रायोजि ॥ ४१ ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् ।

(पञ्चदशोऽध्यायः) श्रीधरटीका चतुर्दशः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेष्विति तस्मात् तारतम्यवर्तनात् पुरुषः प्रायो मनुष्यः पात्रं तत्र ज्ञानादिकं विशिष्टमिति भगवद्वर्त्तनस्याऽतिशयात् तत्राऽपि आत्मा यावान् यथा ज्ञानादिपरिमाणादिकः तथा पात्रमित्यर्थः ॥ ३८ ॥

एवं स्थितेऽपि कालेनोपासकदोषोत्पत्तौ सत्यां वेदद्दष्टया विशिष्टमधिष्ठानान्तरं प्रकाशितमित्याह—दृष्ट्वेति । क्रियायै पूजार्थम् अर्चा कृता तत्परिचर्यामार्गदर्शनाय सा प्रकाशितेत्यर्थः । एतेन तादृशदोषयुक्तेष्वपि कार्यसाधकत्वात् श्रीमदर्चाया आधिक्यमेव व्यञ्जितम् प्रतिमास्वल्पबुद्धीनामित्यत्राल्पबुद्धीनामपीत्यर्थः । श्रीनृसिंहपुराणादौ ब्रह्माम्बरीषादीनामपि तत्पूजाश्रवणात् ॥ ३९ ॥

ततः एवं प्रभावात् केचिदित्यधिष्ठानवैशिष्ट्येन पूर्वतोऽप्युत्तमसाधनतत्परा इत्यर्थः । नन्ववज्ञातुर्द्विषोऽपि सिद्धिः स्यादित्याशङ्क्याऽतिप्रसङ्गवारणेच्छया प्रस्तुतपुरुषरूपाधिष्ठानादरेच्छया च तं वारयति, उपास्तापीति ॥ ४० ॥ ४१ ॥

प्रथमपुरुषे पूर्वोक्तं ब्राह्मणरूपं पात्रमेव स्तौति–नन्वस्येति, जगदात्मनः जगति लोकसंग्रहधर्मादिप्रवर्त्तनेन तन्नियन्तुरित्यर्थः । दैवतं लीलया पूज्यत्वेन दर्शितम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तारतम्येन तिर्य्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्त्तते तस्मात् पुरुषः पात्रं तत्रापि यथायथा ज्ञानवैराग्यादिभिर्योग्यतात्मा जीवः उत्कृष्टो भवेत् यः स पात्रं तथाच श्रुतिः "पुरुषत्वेचाविस्तरामात्मा"इत्यादि ॥ ३८ ॥

सर्वप्राणिसंमाननासमर्थानामवज्ञा स्पर्द्धादिमतां तु भगवत्प्रतिमैव पात्रमित्याह—दृष्ट्वेति। मिथः परस्परमवज्ञाने एवात्माबुद्धिर्येषां तेषां भावस्तत्ता ताम् ॥ ३९ ॥

उपास्ता उपासितापि पुरुषद्विषां नार्थदेति अवज्ञादिभ्योऽपि द्वेषेऽपराधाधिक्यं सूचयति ॥ ४० ॥

पुरुषस्येव जात्या तपआदिभिश्च श्रैष्ठ्यमाह—पुरुषेष्वपीति । वेदं ब्रह्मशब्दवाच्यं यो धत्ते ज्ञानेन स ब्राह्मण इति तदधीते तद्वेदेत्यण ब्राह्मणपदव्युत्पत्तिर्दर्शिता ॥ ४१ ॥

कृष्णस्य महत् दैवतमिति तेनाप्याद्रियते ब्रह्मण्यत्वात् नच तद्दैवत्..त्र ब्राह्मणास्तस्मात् सकाशादपि वस्तुत एव पूज्या इति सिद्धान्त एवेति वाच्यं राजसूये बहुष्वपि ब्राह्मणेषु विद्यमानेषु कृष्णस्यैवाग्रपूजनात् ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

चतुर्दशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेष्वेषु नृतिर्यगादिषु भगवान् तारतम्येन वर्तते यस्माच्चस्मात् यावान् यथा ईयते तावान् यथा आत्मा तदन्तरात्मा पुरुषः पात्रम् नृतिर्यगादिषु यथा यथेयते तथा तथा पूज्य इत्यर्थः ॥ ३८ ॥

एवं नृतिर्यगादिषु प्राणिषु भगवदर्चनमुक्तम् । अथ तद्दृढीकरणार्थं महर्षिभिः संस्थापिता भगवत्प्रतिमा पूजा पुरुषार्थदाऽपि प्राणिद्रोहिणां नार्थदेत्याह—दृष्ट्वेति, द्वाभ्याम् । मिथोऽवज्ञानेऽन्योऽन्यतिरस्कारे आत्मा बुद्धिर्येषां तेषां भावस्तत्ता तां दृष्ट्वा क्रियायै भगवत्पूजार्थम् अर्चा प्रतिमा कविभिः त्रेतादिषु कृता प्रकटीकृता ॥ ३९ ॥

तत्रार्चायां प्रतिमायां केचिन्मुमुक्षवः हरिं संश्रद्धाय सपर्ययोपासते ततस्तान्प्रत्यर्थदा भवति. पुरुषद्विषां नृतिर्यगादिप्राणिपीडया परमेश्वरद्वेषिणां तु तदर्चनाग्रहणेनोपास्ताऽपि न भवति किमुतार्थदा न भवतीतिवाच्यम् ॥ ४० ॥

पुरुषेषु नृषु च ब्राह्मणं सुपात्रं विदुः यतस्तपआदिभिर्वेदं हरेस्तनुं मूर्तिं च धत्ते अध्ययनेन ध्यानेन च ॥ ४१ ॥

पादरजसा त्रिलोकीं पुनन्तः ब्राह्मणाः । ननु, अहो जगदात्मनः सर्वात्मनः श्रीकृष्णस्यापि महद्दैवतमादरविषयाः किमुतान्येषामित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

हे राजन् ! इन सर्व पुरों (देहों) में भगवान् तारतम्य से वर्त्तमान हैं, पर जिस कारण से पुरुष में अधिकता से वर्त्तमान हैं, तस्मात् पुरुष ही पात्र है, पुरुषों में भी ज्ञानी लोग और भी पात्र है ॥ ३८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषा टीका ।

असन्मान में अर्थात् अन्य के तिरस्कार में जिनों की बुद्धि लग्न रहती है, ऐसे मनुष्यों की भी जैसे श्री हरि में प्रीति होवै। हे राजन् ! इसी हेतु से वेदवेत्ताओं ने त्रेतादि युगों में क्रिया के अर्थ श्रीहरि की अर्चा प्रतिष्ठादि करी है, ॥ ३९ ॥

तिसी से कितने एक धन्य महात्मा जन सम्यक् श्रद्धाकर के अर्चा ही में श्रीहरि की पूजा करके उपासना करते हैं, परञ्च वह उपासित मूर्ति भी पुरुष द्वेषियों को अर्थदेने वाली नहीं होती है, अर्थात् भूतद्रोही का प्रतिमा पूजन व्यर्थ है ॥ ४० ॥

हे राजेन्द्र ! मनुष्यों में भी महाजन, ब्राह्मण को सुन्दर पात्र जानते हैं, क्यों कि ? वह, तप विद्या और सन्तोष से साक्षात् श्रीहरि के तनु रूप वेद को धारण करता है ॥ ४१ ॥

हे राजन् ! ये ब्राह्मण लोग इन जगदात्मा श्रीकृष्ण ही के प्रिय और परम दैवत अर्थात् पूजनीय हैं ॥ ४२ ॥

इति श्रीमद्भागवत सप्तमस्कन्ध में चतुर्दश अध्याय की भागवताचार्य कृत भाषा टीका समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ पञ्चदशोऽध्यायः ॥

नारद उवाच ।

कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे ।
स्वाध्याये ऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥ १ ॥
ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ।
दैवे च तदभावे स्यादितरेभ्यो यथा ऽर्हतः ॥ २ ॥
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥
देशकालोचितश्रद्धा द्रव्यपात्रार्हणानि च ।
सम्यग्भवन्ति नैतानि विस्तरात्स्वजनार्पणात् ॥ ४ ॥
देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतम् ।
श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयम् ॥ ५ ॥
देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ।
अन्नं संविभजन्पश्येत् सर्वं तत्पुरुषात्मकम् ॥ ६ ॥
न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ।
मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥
नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ।
न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः पञ्चदशे सर्ववर्णाश्रमनिबन्धनम् ।
सारतः सङ्ग्रहेणाऽथ वर्ण्यते मोक्षलक्षणम् ॥

सर्वेषामपि मोक्षधर्माणां सारसङ्ग्रहार्थमध्यायप्रारम्भः, तत्र आद्यगतान्विशेषानाह–कर्मनिष्ठा इति । स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥ १ ॥

कव्यानि पितृनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि यथार्हत इति सर्वत्र ज्ञानादितारतम्येन ॥ २ ॥ ३ ॥

ननु, [illegible] कुतः प्राप्तो येन निषिध्यते तत्राह, स्वजनानामर्पणात् जामाता चेन्निमन्त्र्यते तत्पित्रादयः कथं वर्ज्या इत्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

मुन्यन्नमारण्यं व्रीह्यादि हरिदैवतं हरये निवेदितं सत् ॥५॥
पुरुषात्मकमीश्वरस्वरूपम् ॥ ६ ॥ ७ ॥
दण्डस्य न्यासो हिंसायास्त्यागो य एतादृशो ऽन्यो धर्मो नास्ति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचान्द्रिका ।

तपसा विद्ययेत्यादिना ब्राह्मणेष्वपि तप आदिगुणतारतम्येन पात्रत्वं तारतम्येन व्यवस्थितमिति सूचितम् एतदेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

विवृण्वन्सुपात्रायैव श्राद्धादिष्वन्नादिकं दद्यादिति वदन्नन्यानपि श्राद्धीयनियमानाह, देवर्षिः—कर्मनिष्ठा इत्यादिना । हे नृप ! केचित् द्विजाः त्रैवर्णिकाः कर्मनिष्ठाः स्ववर्णाश्रमोचितकर्मनिष्ठाः केचिच्चाऽनशनादितपोनिष्ठाः केचित्स्वाध्याये प्रवचने अध्यापने च परिनिष्ठिताः केचिच्च ज्ञानयोगयोरुभयोरपि निष्ठिता इति शेषः । ज्ञानमात्मयाथात्म्यज्ञानपूर्वकभगवदुपासनात्मकम् योगोऽनभिसंहितफलकर्मयोगः ॥ १ ॥

तत्र ज्ञाननिष्ठाय ज्ञानकर्मयोगानुगृहीतभगवदुपासनात्मकज्ञानयोगनिष्ठाय पितॄनुद्दिश्य देयानि कव्यानि श्राद्धान्नादीनि आनन्त्यमपरिमितं फलं मोक्षरूपं फलमिच्छतां पुंसां देयानि तथा दैवे च कर्मणि हव्यान्यपि ज्ञाननिष्ठायैव देयानि तदभावे ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्योऽपि यथायोग्यं ज्ञानादितारतम्येन देयं स्यात् ॥ २ ॥

दैवे विश्वेदेवस्थाने द्वौ ब्राह्मणौ पितृकार्ये पितृप्रयोजने पित्रर्थमिति यावत् । त्रीन् ब्राह्मणानुभयत्र द्वयोरपि स्थानयोरेकैकं वा ब्राह्मणं भोजयेत्सुसमृद्धोऽपि धनाढ्योऽप्येवं ब्राह्मणान् भोजयेत् न तु श्राद्धे विस्तरं कुर्यात् ॥ ३ ॥

श्राद्धविस्ताराद्दोषमाह—देशेति । देशकालपात्राणि यथोक्तान्येव उचिता श्रद्धा विश्वासः कर्तव्यविषया त्वरा वा अर्हणं पूजासाधनं तानि समीचीनान्यपि स्वजनार्पणाद्विस्तराच्च सम्यग्भवन्ति विगुणान्येव स्युरित्यर्थः । ननु, कुतो विस्तरः प्राप्तः येन निषिध्यते इति शङ्कां वारयितुं स्वजनार्पणादित्युक्तं स्वजनानामर्पणाद्दौहित्रो निमन्त्रितश्चेत्तत्पुत्रादयः कथं वर्ज्या इत्याद्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

श्राद्धे विष्ण्वर्थमपि ब्राह्मणं भोजयेदित्याह—देश इति । देशे पूर्वोक्ते कालेऽपरपक्षादिरूपे मृताहादिरूपे च काले प्राप्ते कर्तव्यत्वेन प्राप्ते श्राद्धे पात्रे सत्पात्रे विधिवच्छ्रद्धया न्यस्तं मुन्यन्नमारण्यं व्रीह्यादिजमप्यर्पणं हरिदैवतं विष्णुदैवत्यं तस्मै निवेदितं तदुद्देश्येन च दत्तमन्नं कामधुक् कामदमक्षयफलदं मुक्तिसाधनं चेत्यर्थः ॥ ५ ॥

सर्वाश्रमसाधारणान् कांश्चिद्धर्मानाह—देवर्षीति । देवादिभ्य आत्मने स्वजनाय बन्धुजनाय चान्नं विभजेद्विभज्य दद्यात् तद्देवादिकं सर्वं प्राणिजातं पुरुषात्मकं भगवदात्मकं पश्येत् ॥६॥

आमिषं मांसं श्राद्धे पित्राद्युद्देशेन न दद्यात् इदं क्षत्रियाभिप्रायकं तथा धर्मयाथात्म्यवित्स्वयमप्यामिषं नाश्नीयात् यथा मुन्यन्नैरपि परोत्कृष्टा पित्रादीनां प्रीतिः स्यात्तथा पशुहिंसया न स्यात् ॥ ७ ॥

किञ्च सद्धर्ममिच्छतां नृणामेतादृशः एव परः उत्कृष्टो धर्मः कोऽसौ ? यो भूतेषु मनोवाक्कायजस्य दण्डस्य न्याससंत्यागः करणत्रयेण भूतद्रोहाभाव एव नृणां परो धर्म इत्यर्थः । एतादृशोऽन्यः परो धर्मो नास्तीति भावः । न दद्यादामिषमित्यनेन पशुमृगादिहिंसागर्भमांसादिद्रव्यकश्राद्धादेरपि मुन्यन्नेनापि कृतं श्राद्धादिकं नितरां पित्रादीनां प्रीतिकृदित्युक्तं नैतादृश इत्यनेन भूतहितमेवोत्कृष्टधर्म इत्युक्तम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्ममार्गो ज्ञानमार्गश्च कार्याणां कारणेषु लयः प्रवेशलक्षणं च तत्साधनं च प्रपञ्चस्वरूपं च निरूपयत्यस्मिन्नध्याये । तत्र प्रथमतो ब्राह्मणादपि ज्ञाननिष्ठमुत्तमं पात्रं दैवोपलक्षेण द्रव्येणैव नित्यनैमित्तिकक्रियाकरणं धर्माधर्मविवेकश्च कथ्यते. तत्र ब्राह्मणान्विवेचयति—कर्मेति । कर्मनिष्ठा गृहस्थाः तपोनिष्ठा वानप्रस्थाः स्वाध्यायनिष्ठा ब्रह्मचारिणः प्रवचननिष्ठाः कुटीचकाः बहूदकाश्च योगनिष्ठा हंसाः ज्ञाननिष्ठाः परमहंसाः ॥ १ ॥

तत्र सन्ततेरानन्त्यं मुक्तिं चेच्छता ज्ञाननिष्ठाय परमहंसाय कव्यानि पितृभ्यो दीयमानान्यन्नानि दातव्यानीति विधिरित्यन्वयः । दैवे कर्मणि च तस्मा इति शेषः । तदभावे परमहंसाभावे इतरेभ्यो हंसादिभ्यः श्राद्धादिदानं स्यात् तत्रापि यथार्हतः यथायोग्यम् ॥ २ ॥

अत्र भोक्तुः सङ्ख्या नियमानाह—द्वाविति, ॥ ३ ॥

कुतो विस्तारो न कर्तव्य इति तत्राह—देशेति । स्वजनार्पणात् आत्मीयार्पणलक्षणात् विस्तारादेतानि देशकालोचितश्राद्धादीनि सम्यक् न भवन्तीति यत्तस्माद्विस्तारं न कुर्यादिति पूर्वेणान्वयः ॥ ४ ॥ ५ ॥ ६ ॥

यतेः श्राद्धभोजने मुख्याधिकारित्वे मांसविधानं कथमुपपद्यत इति तदपवादत्वेन विधत्ते—न दद्यादिति । शास्त्रान्तरविधिमोहितेन केनचित्कामपरिमोक्षणेन मस्करिणा न भोक्तव्यमिति विधत्ते-नचेति । नच श्राद्धभङ्ग इत्याह, धर्मेति—

"विना मांसेन मधुना विना दक्षिणयाऽऽशिषा ।
अक्षयं भवति श्राद्धं यतिषु श्राद्धभोजिषु ॥
ग्रामे वा नगरेऽरण्ये ज्ञातभिक्षुर्वसेद्यदि ।
तमन्तरेण यच्छ्राद्धं तदासुरमथो भवेत्"

इत्यादि स्मृतेः । तद्विधायकशास्त्रमासुरजनमोहनार्थत्वेन देशकालविशेषविषयत्वेन वा योजनीयम् आमिषाभावे भोक्तुः सौहित्याभावेन पितॄणां सौहित्यं न स्यादिति तत्राह—मुनीनामिति, मुनीनां संयमिनां यथा मांसानदनेन परा प्रीतिः सौहित्यं स्यात्तथा पशुहिंसया जातमांसेन न स्यात्. यथा मुनीनां पितॄणां यतिभोजनेन परा प्रीतिस्तथा पशुहिंसाजातामिषभोजनेन न स्यादिति द्विरावृत्त्या योजनीयम् "वाचं यमे च सर्वज्ञे मुनिशब्दः पितृष्वपि" इत्यभिधानम्. मुनीनां सर्वज्ञानां वेधानां यथा परमा प्रीतिः तथा पशुहिंसालक्षणेन यागेन नेति वा ॥ ७ ॥

श्राद्धे चतुर्थाश्रम्यैव पूज्य इति नियमः प्रायिकः तद्धर्मो यस्याऽस्ति सोऽपि मान्य इत्याशयेनाह—नैतादृश इति । सद्धर्ममिच्छतां नृणां भूतेषु मनोवाक्कायकर्मजस्य दण्डस्य न्यासः सन्न्यासो य एतादृशो धर्मः परोऽन्यो नास्ति । अयमेव मुख्यो धर्मः तस्मादेतादृशधर्मोऽपि श्राद्धे मान्य इत्याशयः । "वेणुभिर्न भवेद्यतिः" इति वक्ष्यति न केवलं पञ्चालम्भनलक्षणहिंसाभावान्मुनीनां प्रीतिजनकोऽपि तु मनआदिना क्रियमाणदण्डलक्षणहिंसाभावोऽपीत्यतो वाह, नेति ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तेषु सर्वोत्कृष्टमाह—द्वाभ्याम्, कर्मनिष्ठा इत्यादयः। क्रमेण गृहस्थवानप्रस्थब्रह्मचारिसन्यासिनो ज्ञेयाः अनेन यथाऽत्र मुमुक्षुप्रभृतीनां ज्ञानिपूजैव मुख्या । पुरुषान्तरपूजा तु तदभाव एव, तथा प्रेमभक्तिकामानाम् प्रेमभक्तपूजापि ज्ञेया । ततः प्रेमभक्तानामपि यच्चित्रस्य परमाश्रयरूपं च तदभिव्यक्तेः सुतरामेवार्चाया आधिक्यमपि । एवं तदाश्रयरूपस्य विलक्षणप्रकाशत्वादेव श्रीविष्णोः व्यापकत्वेऽपि शालग्रामादिषु निर्धारणं तच्च पुरुषवन्नान्तर्यामिदृष्ट्यपेक्ष्यं किन्तु स्वभावनिर्देश्यः

"तत्र श्राद्धं जपो होमः सर्वं कोटिगुणं भवेत्" ।
"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ॥
कीकटोऽपि मृतो याति वैकुण्ठभवनं नरः" इति ।

तस्मादर्चाया आधिक्यमेव स्थितम् ॥ १—१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गृहस्थस्यैव धर्मान्तः सर्वधर्मनिरूपणम् ।
अत्र पञ्चदशे सारसङ्ग्रहाख्ये प्रदर्शितम् ॥

पूर्वत्र ब्राह्मणोत्कर्षः प्रतिपादितः तेषु ब्राह्मणेष्वपि तारतम्यमाह—कर्मनिष्ठा गृहस्था विप्राः तपोनिष्ठा वानप्रस्थाः अन्ये स्वाध्याये प्रवचने इति नैष्ठिकब्रह्मचारिणः केचित् ज्ञानयोगयोरिति संन्यासिनः समासान्तवर्त्तिना ऽपि निष्ठापदेनात्रानुवर्त्तितेन लक्षणया निष्ठावन्तो व्याख्येयाः ततश्चैषां यथोत्तरमेव श्रैष्ठ्यं दर्शितम् ॥ १ ॥

कव्यानि पित्रुद्देश्यकवस्तूनि दैवे च हव्यानि देवोद्देश्यकवस्तूनि च ज्ञाननिष्ठाय देयानि आनन्त्यं मोक्षं पितॄणां स्वस्यचेति मोक्षार्थिना गृहस्थेन संन्यासिन एवाधिक्येन भोजनीया इति पञ्चाध्याय्या अस्या मोक्षप्रकरणवत्त्वात् अत एव शुद्धभक्तानां कर्मानधिकारात् गृहस्था अपि ते अत्र कर्मज्ञानप्रकरणेन पठिताः तैस्तु सुप्रतिष्ठव्यवहाररक्षाभारताम्बरीषादिभिरिव स्वप्रतिनिधिद्वारा कर्मकरणेन भक्तिमार्गनिन्दावादाद्यनुत्थानार्थमेव क्रियत इत्युक्तं पञ्चमे. एकादशे च प्रतिपादयिष्यते तस्मान्मोक्षार्थिनां यथा ज्ञानिपूजैव मुख्या पुरुषान्तरपूजा तु तदभाव एव; तथा प्रेमभक्त्यर्थिनामैकान्तिकभक्तपूजैव मुख्येति ज्ञापितमत्रापि "स वै पुण्यतमो देशः" इति पद्यव्याख्यायाम्—

"मुक्तानामपि सिद्धानां नारायण परायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने !" ॥

इत्यादिना ज्ञानिभ्योऽपि तदुत्कर्षश्रवणात्—

"नमेऽभक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स हि पूज्यो यथाह्यहम्" ॥ इति

ब्राह्मणेतरस्यापि तस्य संप्रदानत्वश्रवणाच्च यथा च ज्ञानिनामर्चायां पूजा हि "दृष्ट्वा तेषां मिथो नृणाम्" इत्यनेन कनिष्ठाधिकारिणां व्याख्याता न तथा भक्तानां व्याख्येया तेषां हि मुख्याधिकारिणामपि अर्चायां पूजादिकं मुख्यमेव भक्त्यङ्गं यदुक्तमेकादशे—

"मल्लिङ्गमद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्यास्तुतिप्रह्वगुणकर्माऽनुकीर्त्तनम् ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्यचोद्यमः" ॥ इति।
"वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ।
अलङ्कुर्वीत सप्रेम मद्भक्तो मां यथोचितम्" ॥ इति

"प्रतिमास्वल्पबुद्धीनाम्" इत्यादिकं तु ज्ञानिपरमल्पबुद्धीनामपीति वा व्याख्येयम् । नृसिंहपुराणे ब्रह्माम्बरीषादीनामपि तत्पूजाश्रवणात् तस्याः महिमाधिक्यं विष्णुधर्मे च तामधिकृत्य अम्बरीषं प्रति श्रीविष्णुवाक्यम्—

"तस्यां चित्तं समावेश्य त्यजता ऽन्यान् व्यपाश्रयान् ।
पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥
गच्छंस्तिष्ठन् स्वपन् भुञ्जंस्तामेवाग्रे च पृष्ठतः ।
उपर्यधस्तथा पार्श्वेचिन्तयंस्तामथात्मनः" ॥ इत्यादि

स्कान्दे च "शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम्" इति पाद्मे च

"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः" ॥

इति ॥ २ ॥

विस्तरं भोक्तृबाहुल्यम् ॥ ३ ॥

स्वजनार्पणात् स्वजनेभ्योऽन्नदानात् जामाता चेन्निमन्त्र्यते तत्पित्रादयः कथमुपेक्षणीया इत्येवं प्रासात् विस्तरात् ॥ ४ ॥

मुन्यन्नम् आरण्यं व्रीह्यादि न्यायार्जितं वा हरिदैवतं प्रथमं हरये निवेदितं ततः तदेव पितृभ्यो दत्तं ततः पात्रे न्यस्तम् ॥ ५—७ ॥

दण्डस्य हिंसनस्य न्यासस्त्यागः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वधर्मसारः पञ्चदशे उच्यते, तत्रादौ श्राद्धगतान् विशेषानाह—कर्मनिष्ठा इत्यादिना । द्विजाः केचित्कर्मनिष्ठाः अपरे तपोनिष्ठा अन्ये स्वाध्याये वेदादिपाठे प्रवचने तदर्थव्याख्याने च परिनिष्ठिता इति शेषः । केचित्तु कर्मादिना निर्मलान्तःकरणा ज्ञानयोगयोः ज्ञानभक्त्योः परिनिष्ठिताः ज्ञाननिष्ठाय ज्ञानभक्त्योरत्यन्तभेदाभावादेकस्य निर्देशः ज्ञानभक्तिसम्पन्नायेत्यर्थः । कव्यानि पितृनुद्दिश्य देयानि दैवे हव्यानि च देयानि तदभावे इतरेभ्यः कर्मनिष्ठादिभ्यो यथार्हतो देयं स्यात् ॥ १—२ ॥

दैवे विश्वेदेवकार्ये द्वौ ब्राह्मणौ पितृकार्ये त्रीन् उभयत्रैकैकं वा भोजयेत्सुसमृद्धोऽपि धनाढ्योऽपि श्राद्धे विस्तरं न कुर्यात् ॥ ३ ॥

विस्तरे दोषमाह—देशेति। विस्तरात् स्वजनेभ्यो निमन्त्रितेभ्यो ऽन्नाद्यर्पणात् देशकालोचितानि श्रद्धादीनि सम्यक् न भवन्ति ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ।
आत्मसंयमने ऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥
द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ।
एष माऽकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥ १० ॥
तस्माद्दैवोपपन्नेन मुन्यन्नेनाऽपि धर्म्मवित् ।
सन्तुष्टो ऽहरहः कुर्य्यान्नित्यनैमित्तिकीः क्रियाः ॥ ११ ॥
विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्म्मज्ञो ऽधर्म्मवत्त्यजेत् ॥ १२ ॥
धर्मबाधो विधर्म्मः स्यात् परधर्म्मो ऽन्यचोदितः ।
उपधर्मस्तुपाखण्डो दम्भो वा शब्दभिच्छलः ॥ १३ ॥
यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात्पृथक् ।
स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिदैवतं हरये निवेदितं मुन्यन्नमारण्यं श्रीह्यादिकं श्रद्धयोक्तपात्रे न्यस्तमर्पितं सर्वकामधुगक्षयं च भवति ॥ ५ ॥

देवर्ष्यादिभ्यः सर्वत्राऽन्नं विभजन् तत्सर्वं देवर्ष्यादिकस्पुरुषात्मकं भगवदात्मकं पश्येत् ॥ ६ ॥

उत्तमाधिकारी हिंस्रं कर्म त्यजेदेवेत्याह—न दद्यादित्यादिना ॥ ७ ॥

भूतेषु मनोवाक्कायजस्य दण्डस्य हिंसनस्य न्यासस्त्यागो यः स सद्धर्मे भगवद्भक्तिलक्षणं समीचीनं धर्ममिच्छतां परोधर्मश्रेष्ठो भक्तिसाधन एतादृशोऽन्यो धर्मो नास्ति ॥ ८ ॥

भाषा टीका ।

॥ श्रीरुक्मिणीरमणचरणनखिनेभ्यो नमः ॥

॥ नारद उवाच ॥

नारद जी बोले, कि—हे राजन् ! कितने एक ब्राह्मण, कर्म निष्ठा वाले हैं, कोई तप में निष्ठा वाले हैं, बहुत स्वाध्याय में निष्ठा करते हैं, अन्य ब्राह्मण लोग प्रवचन (वेद पढाने) में निष्ठावाले हैं, कितने एक ज्ञान में कितने एक योग में निष्ठावाले ब्राह्मण लोग हैं ॥ १ ॥

परंच देव पितृ कार्य में कव्य (देवताओं के निमित्त प्रदेय अन्न) हव्य (पितरन के निमित्त प्रदेय अन्न) केवल ज्ञान निष्ठावाले ब्राह्मण को ही देना चाहिये, यदि ज्ञाननिष्ठ न मिले तौ यथा योग्य ज्ञान तारतम्य देखकर औरों को देवे ॥ २ ॥

देवकार्य में दो ब्राह्मण, पितृकार्य में तीन ब्राह्मण, अथवा दोनों कार्यों में बडा धनी भी एक ही एक ब्राह्मण को भोजन करावे, श्राद्ध में विस्तार कभी न करै ॥ ३ ॥

देश काल के उचित श्रद्धा, द्रव्य, पात्र, पूजन, इन सबके विस्तार से, और श्राद्ध में स्वजनों के अर्पण करने से, ये सब श्राद्धादिक कर्म समीचीन (अच्छे) नहीं होते हैं ॥ ४ ॥

श्राद्ध के देश काल प्राप्त होने पर, प्रथम श्रीहरि को निवेदन कराकर उसी निवेदित मुन्यन्न (मुनियों के अन्न, ओदनादि) को श्रद्धा से विधि पूर्वक सत्पात्र को भोजन करावे, तब वह कामनाओं को पूर्ण करने वाला और अक्षय होता है ॥ ५ ॥

देव, ऋषि, पितृ, भूत, (प्राणी) आत्मा, और स्वजनों को अन्न का विभाग करता हुआ सबों को भगवदात्मक देखे ॥ ६ ॥

धर्म के तत्त्व को जानने वाला श्राद्ध में मांस न देवे । और आप भी स्वयं मांस भक्षण न करे, जैसी पितृ लोगों को मुनि अन्न से परमप्रीति अर्थात् तृप्ति होती है, वैसी पशु हिंसा से नहीं होती है ॥ ७ ॥

बस समीचीन धर्म की इच्छा वाले मनुष्यों को इससे आगे बडा परमधर्म और कोई भी नहीं है, जो कि ? मन वाणी और शरीर से प्राणियों के दंडका त्याग, अर्थात् अपने मन,वाणी और शरीर से प्राणि मात्र को पीडा न देना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह, एक इति । अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमत्यात्मसंयमने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मार्थमपि नेहेत यात्रार्थं वा ऽधनो धनम् ।
अनीहा ऽनीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥
सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् ।
कुतस्तत्कामलोभेन धावतो ऽर्थेहया दिशः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जुह्वति मनो नियम्य तदन्तरायतया त्यजन्तीत्यर्थः । तदुक्तं सर्वज्ञसूक्तैः——

"प्रत्यक्स्फूर्तिरसत्स्फुर्तिस्तनुनिष्ठाविघातकम् ।
संलक्ष्य सन्त्यजेत्कर्म त्यजन्विघ्नहतो ऽन्यथा" ॥

इति ॥ ९ ॥

मा मामेष ध्रुवं हन्यादिति कुतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः तत्किम् अतज्ज्ञः आत्मतत्त्वाऽनभिज्ञः तथाच श्रुतिः—

"न तं विदाऽथ य इमा जजानाऽन्यद्युष्माकमन्तरं बभूव
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"

इति ॥ १० ॥

प्रस्तुतमनुवर्त्तयति—तस्मादिति ॥ ११ ॥

अधर्मवत्साक्षान्निषिद्धवत् ॥ १२ ॥

क्रममनादृत्य पञ्चापि व्याचष्टे—धर्मबाधो धर्मबुद्ध्याऽपि यस्मिन् क्रियमाणे स्वधर्मबाधः अन्यस्य चोदितो ऽन्यस्य परधर्मः उपमेति व्याचष्टे—उपधर्मस्त्विति । शब्दस्य भित् भेदो ऽन्यथा व्याख्यानं यस्मिन् यथा दशावरान्भोजयेदित्युक्ते दशभ्यो ऽवरानिति, शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोर्दानम् ॥ १३ ॥

स्वधर्मानुष्ठानाऽनन्तरं धर्मभूयस्त्वार्थमपि परधर्मो नाऽनुष्ठेयो ऽनुपयोगादित्याह—स्वभावविहित इति ॥ १४ ॥

किञ्च अधनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् यात्रार्थमपि नेहेतेत्येतत् प्रपञ्चयति—अनीहेति, सार्द्धैः षड्भिः ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एवमत एव केचिज्ज्ञाननिष्ठा हिंसागर्भद्रव्ययज्ञान् जहति ज्ञानयज्ञनिष्ठाश्च भवन्तीत्याह—एक इति । यज्ञवित्तमा यज्ञयाथात्म्यविदः अनीहा निष्कामाः केचिद् ज्ञानिनः पूर्वोक्तोत्कृष्टधर्मज्ञानवन्तः कर्ममयान् यज्ञान्पशुपुरोडाशादिद्रव्यकान्यज्ञान् ज्ञानदीपिते आत्मसंयमने जुह्वति. ज्ञानेन परमात्मोपासनात्मकेन दीपिते प्रज्वलिते आत्मनो मनसः संयमो नियमस्तस्मिन् योगाग्नावित्यर्थः । तत्र जुह्वति "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः" इत्यादि पुरुषविद्योक्तविधया क्रियामयान् यज्ञान् हित्वा ज्ञानमयान् यज्ञान् अनुतिष्ठन्तीत्यर्थः ॥ ९ ॥

एवं जुह्वतामयं भाव इत्याह—द्रव्ययज्ञा इति । द्रव्ययज्ञैः पशुपुरोडाशादिद्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि पश्वादीनि एष यक्ष्यमाणो निर्घृणोऽज्ञश्चासुतृप् अस्माकमसुभिः तृप्यतीति तादृशः मां ध्रुवं नूनं हन्यादिति बिभ्यतीत्याशयेन द्रव्ययज्ञान् हित्वा ज्ञानयज्ञाननुतिष्ठन्तीत्यर्थः ॥ १० ॥

तस्मात् पूर्वोक्तभूतसुहृत्स्वरूपोत्कृष्टधर्मवित् पुमान् दैवादुपनतेन मुन्यन्नेनाऽपि न तु मांसादिना ऽहरहः नित्यनैमित्तिकाश्च क्रियाः सन्तुष्टः कुर्यात् यद्यप्यत्र "मुन्यन्नैः स्यात्परा प्रीतिस्तथा न पशु हिंसया" इत्यनेन "द्रव्ययज्ञैर्यक्ष्यमाणम्" इत्यनेन च मांसश्राद्धाग्नीषोमीयादिकर्मणां हिंसागर्भत्वेन पापमिश्रत्वं प्रतीयते तच्च "अशुद्धमितिचेन्न शब्दात् ३।१।२५" इति शारीरकाधिकरणन्यायविरुद्धं तत्र ह्यग्नीषोमीयादिकर्मणां पशुहिंसादिरूपपापमिश्रत्वेनाऽशुद्धियुक्तत्वं परिचोद्य,नैतद्युक्तम् कुतः शब्दादग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात्पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति "हिरण्यशरीर ऊर्द्ध्वं स्वर्गं लोकमेति" इत्यादिकमतिशयिताऽभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा, प्रत्युत रक्षणमेव तथा च मन्त्रवर्णः "न वा उ वैतत्प्रयासेनरिष्यसि देवा ॐ इदेषी पथिभिः सुगेभिः यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्रत्वादेवः सविता दधातु" इति. चिकित्सकञ्च तादात्विकालपदुःखकारिणमपि रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञा इति हिंसात्वाभावः सिद्धान्तितः । तथाऽप्यत्र हिंसागर्भत्वमात्रे पश्वादिहिंसायाश्च सर्वभूतसुहृदां ज्ञानिनामननुरूपत्वे च तात्पर्यं नतु याशीयहिंसायाः पापत्वेऽपि,त एव केवलं भूतानि बिभ्यतीत्येतावदेवोक्तं नतु तद्धिंसायाः पापत्वमपीत्यतो न शारीरकन्यायविरोधः ॥ ११ ॥

तदेवं प्रातिस्विकान् साधरणांश्च वर्णाश्रमधर्मानभिधायाऽथ तेषां धर्माभासेभ्यो विविक्तत्वज्ञापनाय तान् सङ्गृह्य दर्शयन् तेषां त्याज्यत्वमाह—विधर्म इति । विधर्मादयः पञ्चेमे धर्माभासा अधर्मस्य वृक्षरूपस्य शाखाः शाखाभूताः ततस्तान् धर्मयाथात्म्यवित् अधर्मवत्त्यजेत् ॥ १२ ॥

विधर्मादीन् पञ्च व्याचष्टे—धर्मबाध इति । धर्मबुद्ध्या यस्मिन् क्रियमाणे स्वधर्मबाधः स्यात् स विधर्म इत्यर्थः । अन्यस्य क्षत्रियादेश्चोदितो विहितो धर्मः स ब्राह्मणादेः परधर्मः उपधर्म इति पाषण्डः वेदविरुद्धागमोक्तः दम्भो वा परवञ्चनार्थो वा उपधर्म इत्यर्थः । छलं व्याचष्टे—शब्दभिच्छल इति । शब्दस्य प्रमापकस्य भिदन्यथा व्याख्यानं यस्मिन् । यथा द्वादशावरान् भोजयेद्

Dr. Urmila Sharma Collection, Varanasi

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युक्ते द्वादशसंख्याकेऽब्दोऽवरानेकादश दश वेत्यादि. शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोदानमिति ॥ १३ ॥

आभासं व्याचष्टे-यस्त्विति। पुम्भिः स्वेच्छया पृथक् चतुर्भ्यःआश्रमेभ्यः पृथक्कल्पितः आश्रमो ऽवधूतादिः स्वधर्मानुष्ठानाऽनन्तरमपि धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयोऽनुपयोगादित्याह-स्वभावेति। स्वभावेन ब्राह्मणादिस्वभावा ऽनुगुणेना ऽभिहित इज्यादिरूपः स एवाऽस्योपशान्तये मनःप्रशान्तये कल्पतेऽतो न परधर्मस्योपयोग इत्यर्थः ॥ १४ ॥

एवं भगवदुपासनाङ्गभूता वर्णाश्रमधर्मा उक्ताः अथ प्रधानभूतभगवदुपासनात्मकाष्टांगयुक्तभक्तियोगानुष्ठानप्रकारं वक्ष्यंस्तावत्तद्विरोधिनां कामक्रोधलोभभयशोकमोहदम्भतापत्रयनिद्रादीनां जयोपायानाह—धर्मार्थमपीत्यादिना । पूर्त्तमिष्टं तथा स्व इत्यन्तेन तत्र तावदसन्तोषस्य लाभात्मकस्याऽनर्थावहत्वं तन्निमित्ताया धनलिप्सायास्त्याज्यत्वं च वक्तुं दैवादुपनतेनैव द्रव्येण स्वधर्मं देहधारणं च कुर्यान्न तु तदर्थं धनं कामयेतेत्याह-धर्मार्थमिति । अधनो निर्द्धनः पुमान् स्वधर्मार्थमपि यात्रार्थं देहधारणार्थमपि वा धनं वित्तं नेहेत न कामयेत यात्रार्थमपि नेहेतेत्येतत्प्रपञ्चयति-अनीहेति, सार्द्धैः षड्भिः । महाऽहेरिवाऽनीहमानस्य यात्रार्थं धनार्थमपि चेष्टामकुर्वतः दैवोपनतेन प्राणान् धारयमाणस्येत्यर्थः । अनीहाऽकामना एव वृत्तिदा जीवनावहा दैवादुपनतेन जीवतोऽकामयमानस्याकामनैव नितरां सुखजननद्वारा वृत्तिदेति भावः ॥ १५ ॥

तदेवाह—सन्तुष्टस्येति । निरीहस्य सन्तुष्टस्य दैवाल्लब्धेन सन्तुष्टस्य आत्मारामस्य स्वस्यात्माऽन्तरात्मा परमपुरुषस्तस्मिन् रममाणस्य स्वशरीरकब्रह्मानन्दाऽनुभवपरस्य यत्सुखं तत्कामलोभेन काम्यन्त इति कामाः शब्दादयो विषयास्तेषु लोभेन सङ्गेन निमित्तेनार्थेहया धनेच्छया कामलोभनिमित्तकधनेच्छया सर्वा दिशः प्रतिधावतो भ्राम्यमाणस्य पुंसः कुतो हेतोर्भवति अनीहया यत्सुखं तदीहया नास्तीत्यर्थः ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्राद्धादिकर्मग्रामो यत्यादिपात्रमुद्दिश्य कर्तव्यमित्यभिहितम् अधुना परमभागवतास्तदपि न कुर्वन्तीत्याशयेनाह—एक इति, "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज"इति शिक्षिताः एके भगवदर्कार्पितदेहयात्रा ज्ञानिनः कर्मभयान् श्राद्धादियज्ञानात्मसंयमे मनःसंयमनाग्नौ जुह्वति मानसयागं कुर्वन्तीत्यन्वयः । आत्मसंयमत्वं विशिनष्टि—ज्ञानेति । ज्ञानेन्धनदीपिते यज्ञवित्तमाः मानसयज्ञप्रयोगपटवः अनीहा इति हेतुगर्भविशेषणं निवृत्तमार्गप्रवृत्तत्वादित्यर्थः ॥ ९ ॥

ननु, द्रव्ययज्ञं सन्त्यज्य ज्ञानयज्ञकरणे किं कारणमित्याशङ्क्य भूतभयजनकहेतुत्वेन निरयहेतुरयमित्याशयेनाह—द्रव्येति, एष द्रव्ययज्ञकारिसमुदायो मा मां हन्यादिति भूतानि बिभ्यतीत्यन्वयः ।"अग्नीषोमीयं पशुमालभेत"इति विहितत्वात्तदुक्तं कुर्वतो दृष्ट्वा कथं भयं स्यात् ? इत्यत उक्तमतज्ज्ञ इति, विध्यभिप्रायमजानन् "ब्रह्मार्पणं ब्रह्महविः"इत्यादिविहितविधेरभिप्रायः । अत एवाऽकरुण इत्युक्तम् एतादृशो सुरदेश्य इत्याशयेनोक्तमसुतृबिति,"नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"इति श्रुतिर्हीत्यनेन गृह्यते. ध्रुवमित्ययं शब्दः श्रीहरिविमुखस्यानर्थं निश्चाययति।"असुन्वन्तं समं जहि दूणाशं यो न ते मयः"इति श्रुतेः । ते मयस्त्वत्प्रधानकः दूणाशं दुर्नाशम् असुन्वन्तं सुन्वद्विरोधिनम् अन्यथा "सुन्वन्तं वा पराचिच्छीर्षा ववृजुस्त इन्द्रा यज्वानो यज्वभिः स्पर्द्धमानाः" इति श्रुतेः ॥ १० ॥

ननु, तर्हि "नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया"इति विधानं व्यर्थमिति तदुपायमाह-तस्मादिति । दैवोपपन्नेनाऽयाचितादिविधिना प्राप्तेन नीवारादिना तदभावे उत्पन्नेन फलशाकादिना ॥११॥

धर्मवित्त्वं नाम तत्प्रतिपक्षधर्मभेदलक्षणे ज्ञाते शुद्धं स्यादित्यतस्तल्लक्षणा आह—विधर्म इति, ॥ १२ ॥

अधर्मवद्विधर्मादीनां स्वरूपं दर्शयति—धर्मेति। अधर्मवद्धर्मपीडनं विधर्मः अन्यस्य क्षत्रियादेश्चोदितो विहितो धर्मो ब्राह्मणेनानुष्ठीयमानः परधर्मः दम्भेन क्रियमाणो धर्मो दंभः स चोपधर्म इत्युच्यते धर्मशब्दार्थमिच्छतां धारको हि धर्मस्तमर्थं भिनत्तीति स छलधर्म इत्युच्यते ॥ १३ ॥

पुम्भिः काम्यफलेच्छया कृतो यो धर्मः स आभास इत्युच्यते हि शब्दः इयानेषां भेद इत्याह-धर्मप्रतिपक्षभेदस्वरूपमुक्त्वा धर्मप्रयोजनमाह-आश्रम इति । हि शब्द उत्तरत्रापि सम्बद्ध्यते तेन वर्णो लक्ष्यति—यो ब्राह्मणादिवर्णो यश्च ब्रह्मचर्याद्याश्रमः अत्र तत्तत्स्वभावानुसारेण भगवदर्पणबुद्ध्या पृथक् पृथग् विहितो यो धर्मः स जीवस्योपशान्तये संसारनिर्मूलनाय कल्प्यते समर्थ्यते शास्त्रेष्विति शेषः । स्वभावपदसामर्थ्यात्सात्त्विको धर्मो मुक्तिहेतुर्नान्यः । राजसतामसः स्वर्गनरकादिहेतुः—

"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत ! ।
पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरे ! " ॥

इति वचनात् अस्य जीवस्योपशान्तये मोक्षायेति वा ॥ १४ ॥

ननु, निष्कर्मणा पुरुषेण धर्मकरणं दुःसाध्यं अर्थाभावात्तस्मादधनेन तदर्थं कृष्यादिकं कर्म कर्तव्यमिति तत्राह-धर्मार्थमिति । तर्हि देहादियात्रार्थं कर्म कर्तव्यम् अन्यथा तन्नाशे न पुरुषार्थोऽनुदय इति तत्राह-यात्रार्थमिति। नन्वेवं चेत्कथं देहयात्रासिद्धिः ? इति तत्राह-अनीहेति । अत्रानीहा स्वदेहपोषणायासनिवृत्तिः महाहेरजगरस्य ॥ १५ ॥

निरन्तरं भगवदुपासनामृतपायिनो ऽनीहा परमानन्दकारणमित्याह-सन्तुष्टस्येति । यदृच्छया सन्तुष्टस्य यत्सुखं कामलोभेन कामभोगेच्छयार्थेहया धनयाचनप्रवृत्त्या च दिशो धावतः पुंसः कुतः कस्मात्कर्मणः स्तत्सुखं लभ्यते ? इत्यन्वयः ॥ १६ ॥

———

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्म्मबाध इति सार्द्धकम् । पाषण्डो वेदबाह्यः दम्भः सकपटः ॥ १३ ॥

स्वभाव इत्यर्द्धकम् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह—एक इति अनीहा निष्कामाः आत्मनो मनसो यत् संयमनं निग्रहः ज्ञानेन दीपितं तत्र कर्ममयान् यज्ञान् कर्माणि जुह्वति मनोनियमनस्यान्तरायतया त्यजन्तीत्यर्थः ॥ ९ ॥

एषः अकरुणो मा मां हन्यात् हनिष्यति अतज्ज्ञः आत्मतत्त्वाऽनभिज्ञः तथाच श्रुतिः "न तं विदाथ य इमा जजानाऽन्य द्युस्माकमन्तरम्बभूव नीहारेण प्रावृता जल्प्या (तार्किकाः मीमांसकाः कार्म्मिन्यः) श्चासुतृप उक्थशास(:कर्मिणः)श्चरन्तीति ॥१०॥

सर्वत्र सन्तुष्टः भूतान्यहिंसन्नित्यर्थः ॥ ११ ॥

अधर्म्मवत् निषिद्धमिव ॥ १२ ॥

क्रममनाहत्य पञ्चैमा व्याचष्टे—धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मबाधः स विधर्मः अन्यस्य चोदितो विहितो यः सोऽन्यस्य परधर्मः यः पाषण्डः जटाभस्मादिधारणामयः दम्भः स्वस्य धार्मिकत्वज्ञापनामयो वा स उपधर्मः उपमा धर्मस्योपमा न तु धर्म इत्यर्थः । शब्दस्य भित् भेदः प्रकारान्तरेण व्याख्यानं यत्र दशावरान् विप्रान् विभोजयेदित्यत्र बहुव्रीहिं त्यक्त्वा दशभ्योऽवरान् नवाष्टौ वा नन्वेकादशेति तत्पुरुषव्याख्यानेन यः शब्दभित् स छलः । शब्दभृदिति पाठे धर्मशास्त्रमात्रं बिभर्त्तीति तत् यथा गां दद्यादित्युक्ते मरिष्यन्त्यागोदानम् इच्छया कृतः कल्पितदेवतापूजादिमयो यः स आभासः ॥ १३ ॥

तस्मात् स्वस्य भावेन जन्मनैव ब्राह्मणादि—जात्यैव विहितः ॥ १४ ॥

अधनो निर्धनः यात्रार्थं देहनिर्वाहार्थं न ईहेत न वाञ्छेत् धनं प्रति न चेष्टेतेति वा अनीहमानस्य अवाञ्छतः अनीहा निष्कामत्वं निर्व्यापारत्वं वा महाहेरजगरस्य ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतदेव सदाचारेण दृढीकरोति—एके इति । एके उत्तमाधिकारिणः उत्तमत्वमाह—यज्ञवित्तमाः—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौंतेय ! तत्कुरुष्व मदर्पणम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" ॥

इति भगवदुक्तरीत्या यज्ञरहस्यज्ञाः ज्ञानिनः भगवद्विषयकज्ञानवन्तः अनीहा निष्कामाः कर्ममयान् ज्ञानभक्तिप्राधान्यरहितान् भगवदाराधनविरुद्धान् संसारफलकानित्यर्थः । आत्मनो मनसः संयमने भगवत्प्रावण्ये ज्ञानदीपिते भगवानेव सर्वात्मनाऽऽराधनीय इत्येवंभूतेन ज्ञानेनोद्दीपिते जुह्वति निःक्षिपन्ति न कुर्वन्तीत्यर्थः ॥ ९ ॥

तस्मात्सकामाधिकारिविषयानि भूतभयावहानि हित्वा निष्कामः सन् भगवदाराधनात्मकानि कर्माणि कुर्यादित्याह—द्रव्ययज्ञैरिति, द्वाभ्याम् । द्रव्ययज्ञैर्भूतभयावहपशुपुरोडाशादिसाध्यैः मा माम् ॥ १० ॥ ११ ॥

अधर्मो निषिद्धाचारः पापद्रुमस्तस्य शाखाः ॥ १२ ॥

धर्मस्य स्वधर्मस्य बाधो यस्माद्धर्मबुद्ध्या क्रियमाणात्स विधर्मः स्यात् अन्येनोदितः वनस्थादेर्विहितो गृहस्थादेः परधर्मः पाषण्डः वेदविरुद्धस्मृतिप्रोक्तः दम्भो वा स्वस्य धार्मिकत्वख्यापनाय प्रकाशितो वा उपधर्मः उपमा शब्दस्य भित् भेदनं दुराग्रहादिना मुख्यार्थाद्वियोजनं छलः ॥ १३ ॥

यस्तु आश्रमात्पृथक् स्वेच्छया कल्पितः स आभासः स्वधर्मं प्रशंसति—स्वभावेति । स्वभावविहितो वेदेन स्वभावतः स्वार्थं प्रामाययतो विहितो धर्मः प्रशान्तये कस्य नेष्टः सर्वस्येष्ट एव तस्मादधर्मशाखाः दूरतस्त्याज्या इति भावः ॥ १४ ॥

अधनो धर्मार्थं स्वभोगार्थं वा धनश्रमं न कुर्यात्किन्तु अजुयत्नेन धर्मरक्षणं कुर्यादित्याह——धर्मार्थमपीत्यादिना । अनीहोपरामः ॥ १५ ॥

स्वस्य क्षेत्रज्ञः स्वात्मान्तर्यामी तदारामस्यात एव सन्तुष्टस्यात एव निरीहस्य यत्सुखं तत् कामस्य भोगस्य लोभेन वा अर्थस्य धनस्येहा तया दिशो धावतः कुतो न कुतोऽपि ॥ १६ ॥

भाषा टीका ।

कितने एक यज्ञ के परमवेत्ता ज्ञानीलोग, ज्ञान से दीपित आत्मसंयम रूप अग्नि में कर्ममय यज्ञों को हवन करते हैं, अर्थात् मन का नियमन कर कर, उसके विघ्न रूप कर्म की खटपट छोड केवल श्रीहरि ही में चित्त लगाते हैं ॥ ९ ॥

द्रव्य यज्ञ से यजन करने वाले को देखकर सब जीव बडा भय करते हैं, कि अब यह प्राण पोषक, निर्दयी, धर्म के तत्त्व को न जानने वाला, इन विचारे दीन जीवों को मारेगा ॥ १० ॥

तस्मात् धर्म को जानने वाला, प्रारब्ध से प्राप्त जो मुनिअन्न उसी से सन्तुष्ट होकर दिन २ प्रति नित्य नैमित्तिक क्रियाओं को चलावै ॥ ११ ॥

विधर्म, परधर्म, आभास, उपमा, छल, ये पांच अधर्म की शाखायें हैं, इसलिये धर्मज्ञ पुरुष इन को अधर्म की तरह दूर से त्याग देवै ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः।
शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥ १७ ॥
सन्तुष्टः केन वा राजन्न वर्तेतापि वारिणा।
औपस्थ्यजैह्वयकार्पण्याद्गृहपालायते जनः ॥ १८ ॥
असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः।
स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवाऽव कीर्यते ॥ १९ ॥
कामस्याऽन्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात्।
जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥
पण्डिता बहवो राजन्! बहुज्ञाः संशयच्छिदः।
सदसस्पतयो ऽप्येके असन्तोषात्पतन्त्यधः ॥ २१ ॥
असङ्कल्पाज्जयेत्कामं क्रोधं कामविवर्जनात्।
अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥
आन्वीक्षिक्या शोकमोहौ दम्भं (१) महदुपासया।
योगान्तरायान्मौनेन हिंसां (२) कामाद्यनीहया ॥ २३ ॥
कृपया भूतजं दुःखं दैवं जह्यात्समाधिना।
आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ २४ ॥

भाषा टीका।

जो धर्म की बाधा करे वह विधर्म होता है, पराये को आचरण के लिये कहा हुआ धर्म परधर्म है। पाखण्ड अथवा दम्भ का नाम उपमा। है जिसको उपधर्म भी कहते हैं, जो शब्द के अर्थ का अनर्थ करने से सिद्ध हो, उसको छल कहते हैं ॥ १३ ॥

आभास उसे कहते हैं कि? जो आश्रमधर्मों से पृथक पुरुषों ने अपनी इच्छा से कल्पन किया हो ॥ भलाँ जिस जाति वर्ण वा आश्रम को उन के स्वभाव से जो शास्त्र विहित धर्म है, वह धर्म किस मनुष्य को शान्ति नही दे सक्ता है ॥ १४ ॥

निर्धन पुरुष धर्मार्थ भी धन की प्राप्ति के लिये चेष्टा (उपाय) न करे, एवं देह यात्रा के लिये भी धन प्राप्त्यर्थ चेष्टा (उपाय) न करे, यह चेष्टा का न करना ही उस पुरुष को अजगर के तरह वृत्ति (जीविका) देने वाला है ॥ १५ ॥

निश्चेष्ट सन्तुष्ट स्वात्मारामों को जो सुख है, काम के लोभ से धन की इच्छा से दशों दिशाओं को दौडने वाले पुरुष को वह सुख कहां से होगा! ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

उपानहौ पादयोर्यस्य स उपानत्पात्तस्य ॥ १७ ॥

गृहपालः श्वा तद्वदाचरति ॥ १८ ॥ १९ ॥

क्षुधा तृषा च जनः कामस्यान्तं याति अन्नोदकातिरिक्तकामान्तराभावात् क्रोधस्य वाऽन्तं याति एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः दिशो जित्वा ऽपि भुवां भुक्त्वा ऽपि लोभस्य नैवान्तं यातीत्यर्थः ॥ २० ॥ २१ ॥

इदानीं कामादिजयोपायानाह—सङ्कल्पादिति, चतुर्भिः। जयेदिति यथापेक्षमन्वेति अर्थे ऽनर्थदर्शनेन तत्त्वाऽवमर्शनादद्वैताऽनुसन्धानेन ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यान्तरायान् लोकवार्तादीन् ॥ २३ ॥

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दैवं दैवोपसर्गनिमित्तं वृथा मनःपीडादि तदुक्तं याज्ञवल्क्येन "विमना विफलारम्भः संसीदत्यनिमित्ततः" इति आत्मजं देहजम्। योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाहारादिना ॥ २४ ॥ २५ ॥

(१) महदुपाश्रयात् (२) कामाद्यनीहया इति विज० पा०।

[८०]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैवोपनतया यात्रयाऽर्थेच्छायास्त्याज्यत्वमुक्तम् अथाऽसन्तोषस्य दुःखहेतुत्वं वक्तुं तावत् सन्तोषस्य सुखहेतुत्वमाह, सदेति । सदा सन्तुष्टं दैवादुपनतेनैव सन्तुष्टं मनो यस्य तस्य पुंसः सर्वा दिशः सुखमयाः यत्र क्वापि गतस्य तस्य सुखमेवेत्यर्थः । यथा उपानहौ पादत्राणे पादयोर्यस्य स उपानत्पात् तस्योपानत्पदः शर्कराविभ्योऽपि शिवं सुखमेव तद्वत् ॥ १७ ॥

हे राजन् ! सन्तुष्टश्चेत्को नु पुमान् वारिणापि न वर्तेत सन्तुष्टस्तु वारिणापि यात्रां विधाय सुख्यतीत्यर्थः । असन्तुष्टश्चेज्जन औपस्थ्य-जैह्व्यकार्पण्यादुपस्थजिह्वासुखार्थदैन्यान्निमित्ताद् गृहपालायते गृहपालः श्वा तद्वत् आचरति ॥ १८ ॥

किञ्चा ऽसन्तुष्टस्य ब्राह्मणस्य तेज आदयः स्रवन्ति तेजो ब्रह्मवर्चसं विद्या शास्त्रजन्यं ज्ञानं तप अनशनादिरूपं यशः प्रथा तयेन्द्रियलौल्येनेन्द्रियार्थासक्त्या ज्ञानं विवेकादिजन्यमवकीर्यते च विक्षिप्यते च अपगच्छतीत्यर्थः ॥ १९ ॥

किञ्च कामक्रोधादयः सावधिकाः लोभस्त्वसन्तोषात्मको निरवधिक इत्याह—कामस्येति । जनः कामक्रोधलोभवान् जनः क्षुत्तृड्भ्याम् निवृत्ताभ्यामिति शेषः । निवृत्ताभ्यां क्षुत्तृड्भ्यां निमित्तभूताभ्यां कामस्यान्तं याति अन्नोदकादिना क्षुत्पिपासादौ निवृत्ते सति अन्नादिव्यतिरिक्तकामान्तराभावात्कामस्यान्तं गच्छतीति भावः । तथा क्रोधस्याप्यन्तं तत्फलोदयात् तस्य क्रोधस्य यत्फलं परपीडादिरूपं तस्योदयान्निष्पत्तेः हेतोर्याति लोभस्यान्तं तु भुवो दिशो जित्वा भुक्त्वाऽपि नैव याति ॥ २० ॥

अत एव हे राजन् ! बहवः पंडिताः शास्त्रजन्यज्ञानवन्तः बहुज्ञाः बहुविधलौकिकवैदिकन्यायाभिज्ञाः अत एव संशयाञ्छिन्दन्तीति तथा ऽत एव सदसः सभायाः पतयोऽप्येके जनाः असन्तोषाद्धेतोरधो नरके पतन्ति ॥ २१ ॥

एवमसन्तोषस्याऽनर्थावहत्वमुक्तम् अथ कामादीनां जयोपायानाह—असङ्कल्पादिति, चतुर्भिः । असङ्कल्पाद्भोगार्हताबुद्धिवर्जनात्कामं शब्दादिविषयस्पृहां जयेत् । क्रोधं तु कामविवर्जनाज्जयेदित्यनुषङ्गः । क्रोधः कामानुभावविरोधिविषयको ऽमर्षः लोभं त्वसन्तोषात्मकम् अर्थाऽनर्थेक्षयाअर्थे धने ऽनर्थेक्षयाऽनर्थहेतुत्वदर्शनेन जयेत् । भयं तु तत्त्वावमर्शनात् चिदचिदीश्वरयाथात्म्यरूपतत्त्वत्रयाऽनुसन्धानात् ॥ २२ ॥

आन्वीक्षिक्या—

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि" ॥ इत्यादि-

पर्यालोचनयेत्यर्थः । जातस्य विनाशो ध्रुव इति पर्यालोचनया शोक मोहौ, दम्भन्तु. महतामदाम्भिकानां ज्ञानिनामुपासनया सेवया. योगान्तरायान् योगस्यान्तरायभूतान्, लोकवार्तादींस्तु मौनेन. भूतहिंसां कायाद्यनीहया स्वदेहादिषु निस्पृहया जयेत् ॥ २३ ॥

भूतजं दुःखमाधिभौतिकं दुःखं कृपया येभ्यो भूतेभ्यः स्वस्य दुःखं तेष्वेव कृपया दैवमाधिदैविकं दुःखं समाधिना, इदं प्राप्तमेव किमस्माभिर्निषेध्यमित्येवं मनःसमाधानेन आत्मजं देहजमाध्यात्मिकं दुःखं योगवीर्येण योगबलेन प्राणायामादिना निद्रां सत्त्वनिषेवया सात्त्विकाहारसेवनेन जह्यात् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुस्त्यजेषु विषयेषु सर्वतो दिक्षु जाग्रत्सु निष्कर्मणः कथं सुखमुपलभ्यते ? इति तत्राह—सदेति "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः" इत्यादेः एतमर्थं निदर्शयति—शर्करेति । शिवं सुखमाप्नोतीति शेषः । शर्कराः पाषाणशकलानि ॥ १७ ॥

अन्नाद्यर्जनायासाभावे ऽपि प्राणधारणार्थं पानीयादिप्रयत्नः स्यादेव "आपोमयाः प्राणाः" इति श्रुतेः । इति तत्राह—सन्तुष्ट इति । केन वा येन केनापि प्रयत्नमन्तरेणोपनतेन द्रव्येण लोकविलक्षणेन परमात्मना वा सन्तुष्टः विषयालम्बुद्धिमान् वारिणा ऽपि न वर्तेतेत्यन्वयः । ननु, सर्वात्मना सर्वनिषेधस्य कोऽभिप्रायः ? इत्याशङ्क्य किञ्चिदभ्यनुज्ञाते महान्दोषः स्याज्जलस्यन्दनवत् विधि विना स्वतन्त्रजनस्य कार्पण्यदर्शनाच्चेत्याह—औपस्थ्येति । गृहं पालयते ऽसौ गृहपालः सारमेयस्तद्वच्चरति—

"कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ॥
क्षुधाक्रान्तो जीर्णो ह्यपि वरकपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः"

इत्यादेः ॥ १८ ॥

उक्तार्थाऽनङ्गीकारे बाधकमाह—असन्तुष्टस्येति । तेजः शापानुग्रहशक्तिः रेतोलक्षणं वा. विद्या शास्त्रविषया, ज्ञानं मनोरथमखण्डं शास्त्रानुपेक्षि दीपज्वालानिभमवकीर्यते विक्षिप्यते शिलानिक्षिप्तपांसुपिण्डवन्नश्यतीत्यर्थः । 'कॄ विक्षेपे' इति धातोः वृषभविषाणाहतसेतुवत् सुडागमाभावः छान्दसः "अवकीर्णी क्षतव्रतः" इत्यभिधानम् असन्तुष्टस्य विषयानलम्बुद्धेः ॥ १९ ॥

अत्रानलम्बुद्धिर्द्वेधा विषयाणामुपर्युपरिभोगतृष्णैका द्वितीया विभान्तत्रिभागाने तत्पर्याप्तं भवतीत्यतो न व्ययामि किन्तु राशीकरोमीत्याकाङ्क्षा तत्र प्रथमाया अलाभे कामः क्रोधश्च तयोरुभयोः शान्तिरनायाससाध्या द्वितीयाया लोभाऽपरपर्यायाया नाशो दुःसाध्य इत्याह—कामस्येति । जनोऽङ्कुरिताभ्यां क्षुत्तृड्भ्यां कामस्योपस्थादिविषयतृष्णापरपर्यायस्यान्तं नाशं याति कुत इत्यत उक्तं हीति "विषया विनिवर्तन्ते निराहारस्य देहिनः" इति स्मृतेः प्रसिद्धेः एतत्फलोदयात् एनयोः क्षुत्तृषोरशनपानलक्षणभोगाभ्यां तृप्तिलक्षणफलोत्पत्तेः तदलाभोत्पन्नस्य क्रोधस्य च शान्ति याति. दिशो जित्वा भुवो भुक्त्वा ऽपि लोभस्यान्तं यागाद्युपाधिना वित्तव्ययेच्छालक्षणं न यातीत्यन्वयः ॥ २० ॥

ननु, बहुत्यागेन वित्तव्ययेन स्वयं नष्टः स्यात्

"अल्पसारस्तु यो मोहाद्विस्तारं कर्तुमिच्छति
स विनश्यति दुर्मेधा नारिकेलाम्बुकं यथा"

इति वचनात् तस्माल्लोभो महान्गुणो देहयात्राहेतुत्वादित्यत्राह, पण्डिता इति । पाण्डित्यं नाम सभाकम्पादिदोषराहित्यं तत्पूर्णस्यापि किं न स्यादित्यत उक्तं, बहुज्ञा इति । सर्वज्ञं घटदीपप्रभावन्नेत्याह—संशयच्छिद इति । एवंविधधर्मवन्तः क इति तत्राह, सदस-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पतन्त्य इति। एतादृशाश्च केचनेत्याह–एक इति। एवंविधा अपि असन्तोषाल्लोभादधः कीटादियोनौ पतन्तीति यस्मात्तस्मादवैष्णवविषय एव लोभो गुणो न तु वैष्णवविषय इति भावः।एके असन्तोषादिति सन्धिकार्याभावो यदि तर्हि इति पदद्वयाध्याहारसूचनार्थः यद्येवंविधा असन्तोषाद्यथा योग्यं यथालब्धद्रव्यं यथापात्रं न नियुञ्जते तर्ह्यधः पतन्तीत्यभ्युपगमसिद्धान्तो ऽयं न केवलमसन्तुष्टस्य विद्यादि नाशो ऽपि स्वधः पातः स्यादित्यतो वाह–पण्डिता इति ॥ २१ ॥

इदानीं कामादिजयोपायमाह–असङ्कल्पादिति।अत्र सङ्कल्पो ऽपि द्विविधः पुण्यविषयःपापविषयश्चेति अत्रासङ्कल्पात्पापविरुद्धपुण्यविषयादित्यर्थः। कामान् निषिद्धान् क्रोधः कामितालाभकारणकः कारणनाशेन कार्यनाश इत्यर्थः। अनर्थकार्यस्य लोभस्य नाशः केनेति तत्राह–अर्थेति। अर्थेषु राजादिनिमित्तानर्थदर्शनेनासद्व्ययो नश्वरफलहेतुरिति निरीक्षणेन च तत्त्वावमर्शनात् तत्त्वज्ञानाद्भयं वैष्णवसिद्धान्तसञ्चलनम्"भी भयसञ्चलनयोः"इति धातुः ॥ २२ ॥

शोकमोहौ देहगताऽन्तःकरणस्यैव नान्यस्य ज्ञानचिदानन्दस्वरूपस्या ऽसम्भवात् इत्यादिकया आन्वीक्षिक्या अनुकूलतर्कोपेतव्याप्तिज्ञानेन आत्मन्यविद्यमानमहिमारोपो दम्भः महतां प्रावण्यादिगुणाकाराणां आत्मस्तुतिलज्जितानां पुरुषाणां निरन्तरनिषेवया सद्गुणाभ्यास लक्षणया योगान्तरायान् भगवदुपासनाविघ्नान्मौनेन सम्भाषणवर्जनेन जयेदिति शेषः। कामाद्यनीहया कामादिनिषिद्धेच्छाराहित्येन विवादलक्षणां हिंसां जयेद् इत्यन्वयः ॥ २३ ॥

भूतजं भौतिकं दुःखमुन्मादादिकं वा कृपया मन्त्रौषधसामर्थ्येन 'कृपू सामर्थ्ये' इति धातुः अनुक्रोशलक्षणगुणेन वा दैवमाधिदैविकं दुःखं समाधिनेन्द्रादिदेवताध्यानेन"यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन्, "कारीर्य्या यजेत वृष्टिकामः"इति श्रुतेः। अनावृष्ट्यादिदुःखं जह्यात् क्षीरसागरतरङ्गसीकराप्लुतश्रीनारायणध्यानेन वा आत्मजमाध्यात्मिकं दुःखं योगवीर्येण अष्टाङ्गसामर्थ्येन पवनवशीकरणेनेत्यर्थः। सत्त्वनिषेवया सात्त्विकपुरुषनिषेवया निद्रामज्ञानम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सन्तुष्ट इति। केन वा न वर्त्तेत अपितु वारिणाऽपि वर्त्तेतेत्यर्थः ॥ १८–२१ ॥

असङ्कल्पादिति युग्मकम्। तत्त्वावमर्शेन परमेश्वराधीनताविचारेण. कृपयेति सार्द्धकम् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

उपानहौ पादयोर्यस्य स उपानत्पात् तस्य ॥ १७ ॥

केन वा न वर्त्तेत अपितु वारिणापि वर्त्तेतेत्यर्थः। उपस्थस्य कर्म औपस्थ्यं तत्र कार्पण्यात् गृहपालः श्वा ॥ १८ ॥

अवकीर्य्यते अधः क्षिप्तं भवति ॥ १९ ॥

असन्तोषो हि लोभमूलको भवति लोभस्य तु दुर्जयत्वादसन्तोषो दुर्वार इत्याह–कामस्येति, द्वाभ्याम्। क्षुत्तृड्भ्यामिति भोज्यस्यालाभे क्षुत्तृषोरतिदीप्तत्वे धातुदाहप्रवृत्तेरिति भावः। एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः दिशो जित्वाऽपि भुवो भुक्त्वापि लोभस्य वासनात्मकस्यान्तं न प्राप्नोति भक्ष्यविषयकलोभस्य तूदरपूर्त्त्यैव शान्तिरिति दुरुपशमत्वाभावान्नासौ पृथङ्निर्दिष्टः ॥ २० ॥

लोभप्राबल्ये गुणानां वैयर्थ्यमाह—पण्डिता इति ॥ २१ ॥

तर्हि कथमेतान् जयेत् ? इत्यपेक्षायामाह—असङ्कल्पात् स्त्रीस्मरणादिना कामोत्पत्तावपि नैव स्त्री मया सम्भोक्तव्येति सङ्कल्पसदृशान्निश्चयात् कामं जयेत् सादृश्ये नञ् यथाद्य न भोक्तव्यमिति निश्चये सत्युपवासादौ क्षुत्पिपासाजयः कामविवर्जनात् काम इच्छाविषयः कोऽपि न हिंसनीय इति (जिघांसा नैव कार्येति) हिंसेच्छावर्जनात् क्रोधं जयेत्. अर्थे लोभ्ये वस्तुनि आयत्यामनर्थदर्शनाभ्यासाल्लोभं तत्त्वावमर्शनात् प्रारब्धफलस्यावश्यभोग्यत्वेन कः कस्य दुःखहेतुरित्यादितत्त्वविचारात् आन्वीक्षिक्या आत्मानात्मविचारेण ॥ २२ ॥ २३ ॥

येभ्यो भूतेभ्यो दुःखं जायेत तेष्वेव कृपया हिताचरणेनेत्यर्थः। दैवं दैवोपसर्गनिमित्तवृथामनःपीडादि। तदुक्तं याज्ञवल्क्येन "विमना विफलारम्भः संसीदत्यनिमित्ततः" इति समाधिना भगवति चित्तैकाग्र्येण आत्मजं देहोत्थं दुःखं योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाल्पाहारादिना प्राणिमात्रपरिचर्य्यया वा रजस्तमसी सत्त्वेन सत्त्वाभिवर्धनेन सत्त्वं च उपशमेन तत्कार्यगुणौदासीन्येन ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

उपानहौ पादयोर्यस्य सः उपानत्पात्तस्य शिवमयाः कल्याणप्रचुराः ॥ १७ ॥

सन्तुष्टः वारिणा अपिशब्दाच्छाकादिना केन वा"कं ब्रह्म"इति श्रुतेः। विश्वंभरेण भगवता वा न वर्तेत न जीवेत अपितु जीवेतैवेत्यर्थः। असन्तुष्टो जनस्त्वौपस्थ्यजैह्व्ययोः शिश्नरसनसुखयोः कार्पण्यात् गृहपालायते गृहपालः श्वा तद्वदाचरति ॥ १८—१९ ॥

अन्नोदकातिरिक्त कामान्तरा ऽभावात् एतत्फलोदयात्क्रोधस्य यत्फलं जयपराजयादि तदुदयात् ॥ २०—२१ ॥

कामादिजयोपायं दर्शयति–असङ्कल्पादित्यादिना। भयं संसारभयं तत्त्वावमर्शनात् तन्निवर्त्तकभगवद्ध्यानावृत्तेः ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन योगस्य ध्यानस्य अन्तरायान् निष्फलवादादीन् ॥ २३ ॥

कृपया भूतहिताचरणेन दैवं समाधिना परदेवाभिनिवेशेन आत्मजं मनो भवं योगवीर्येण चित्तैकाग्र्यबलेन ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi.

CC0. In Public Domain, Digitizagtion by eGangotri

रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ।
एतत्सर्वं गुरौ भक्त्या पुरुषो (१) ह्यञ्जसा जयेत् ॥ २५ ॥
यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ।
मर्त्याऽसद्धीः श्रुतं (२) तस्य सर्वं कुञ्जरशौचवत् ॥ २६ ॥
एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोको (३) वै मन्यते नरम् ॥ २७ ॥
षड्वर्गसंयमैकान्ताः सर्वा (४) नियमचोदनाः ।
तदन्ता यदि नो योगानावहेयुः श्रमावहाः ॥ २८ ॥
यथा वार्त्तादयो (५) ह्यर्था योगस्यार्थं न बिभ्रति ।
अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथाऽसतः ॥ २९ ॥
यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः ।
एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥ ३० ॥
देशे शुचौ समे राजन् ! संस्थाप्यासनमात्मनः ।
स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ॥ ३१ ॥
प्राणापानौ सन्निरुन्ध्यात्पूरकुम्भकरेचकैः ।
यावन्मनस्त्यजेत्कामान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥

भाषा टीका ।

सदा ही सन्तुष्ट मन वाले को सब दिशायें आनन्द से भरी हुई हैं । जैसे कि ? पगरखी (जोडी) पहिरने वाले को काँकर कंटक आदि से कभी कुछ भी दुःख नहीं ॥१७॥

हे राजन् ! संतोषी पुरुष तौ जलमात्र से भी संतोष कर कर रहसका है, और उपस्थ इन्द्रिय और जिह्वा की दीनता से पुरुष श्वान के समान घर २ से अपमान का पात्र होता है ॥ १८ ॥

असन्तुष्ट ब्राह्मण के इन्द्रियों की चपलता से, तेज, विद्या, तप, यश, और ज्ञान, ये सब अवकीर्ण (नष्ट) हो जाते हैं ॥१९॥

काम का अंत अर्थात् नाश तौ भूख प्यास से होजाता है, जिसके लिये क्रोध किया जाय उस फल के होने पर क्रोध भी नष्ट हो जाता है, परञ्च मनुष्य दशों दिशाओं को जीतकर सब पृथिवी का राज्य भोगकर भी लोभ के अंत को नहीं पहुंचता है ॥२०॥

हे राजन् ! बडे २ पंडित लोग बहुज्ञ और संशय के छेदन करने वाले कितने एक सभापति लोग भी सन्तोष के न होने से अधः पात को प्राप्त होते हैं ॥ २१ ॥

मन में सकल्प के न करने से काम को जीते, और काम के वर्जन से क्रोध को जीते, धन में अनर्थपने की दृष्टि से लोभ को जीते, और तत्त्व विचार करने से भय को जीत लेवै ॥ २२ ॥

ब्रह्मविद्या के विचार से शोक और मोह को, महात्माओं की सेवा करने से दम्भ को, योग के विघ्नों को मौन धारण करने से, और शरीर की चेष्टा न करने से हिंसा को जीत लेवै ॥ २३ ॥

जिनप्राणियों से अपने को दुःख होता हो, उनपर कृपाकरे, अर्थात् यों विचारले कि ? ये गरीब आपही दैवी माया के वश होकर हमको दुःख देतेहैं, ये क्या स्वाधीन थोड़े हैं, बस इस विचार से भूतज दुःखको जीतलेवै, समाधि से दैविक दुःखको जीतलेवे, और अपने से होनेवाले दुःख को योग के बल से जीत लेवे, तथा सत्त्व के सेवन से निद्रा को जीतलेवे, अर्थात् सात्त्विक भोजनादि से निद्रा न्यून हो जावेगी ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कथं गुरौ भक्त्या सर्वस्य जयः स्यात् ? तस्याऽपि मनुष्यत्वेन तदवस्थत्वात्तत्राह–यस्येति । मर्त्योऽसद्धीर्मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणं कुञ्जरस्नानवद्व्यर्थम् ॥ २६ ॥

ननु, गुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते ऽत आह—एष गुरुः

(१) ...नसा (२) असिसन्धिः श्रुतः (३) यंमन्यते (४) निगमचोदनाः (५) विद्या इत्येवं विजयध्वजपाठाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरस्वामिकृतभावार्थदीपिका।

साक्षाद्भगवानेव भवेत् लोकस्य नरो ऽस्माविति बुद्धिर्भ्रान्तिरित्यर्थः। यद्वा नहि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानो ऽपि गुरुर्भगवान् भवेत् यथैष श्रीकृष्ण इत्यर्थः॥ २७॥

एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेन्द्रियो भूत्वा ध्यानपरो भवेत् अन्यथा तं प्रतिसर्वशास्त्रवैफल्यं स्यादित्याह—षड्वर्गेति। सर्वे ऽपि नियमचोदना इष्टापूर्त्तादिविधयः षडिन्द्रियवर्गस्य यः संयमस्तद्वेकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः। नच तावता ऽप्युपशमो इत्याह—तदन्ताः सन्तो ऽपि यदि योगान्धारणाध्यानसमाधीन् आवहेयुर्न साधयेयुस्तर्हि केवलं श्रमावहा एवेत्यर्थः॥ २८॥

एतदेव दृष्टान्तेनाह—यथा वार्त्तादयः कृष्यादयो ऽर्थास्तत्फलानि च योगस्यार्थं मोक्षं न साधयन्ति प्रत्युतानर्थाय संसारायैव असतो बहिर्मुखस्येष्टापूर्त्तादयपि तथा॥ २९॥

एवं योगं युञ्जतो ऽपि यस्य कुटुम्बादिसङ्गेन चित्तं विक्षिप्येत तस्य कृत्यमाह—यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात् सन्न्यसेत् तथाच स्मृतिः—

"द्वन्द्वाहतस्य गार्हस्थ्यं ध्यानभङ्गादिकारणम्।
लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्"॥ इति

भिक्षया प्राप्तं मितमशनं यस्य सः॥ ३०॥

ऋजुसममङ्गं यस्य सः सुखं यथाभवत्येवमासीत ओमित्युच्चारयन्निति शेषः॥ ३१॥ ३२॥ ३३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

रजस्तमश्च सत्त्वेन सात्त्विकाहाराद्युपजातसत्त्वगुणवृद्ध्यासत्त्वमन्तःकरणमुपशमेन हर्षाजननमुखेन एतदुक्तं कामादिरूपं सर्वं पुरुषो गुरौ भक्त्या त्वञ्जसा सुखेनैव जयेत्॥ २५॥

गुरुभक्त्यभावे सर्वं कामादिजयात्मकं व्यर्थमित्याह—यस्येति। साक्षाद्भगवति"आचार्यं मां विजानीयात्"इत्युक्तरीत्या भगवदभिन्नत्वेन दर्शनीये ज्ञानमेव दीपस्तत्प्रदे महोपकर्त्तरि गुरौ यस्य पुंसो मर्त्यबुद्धिः 'सोऽपि माहश एव कश्चिन्मर्त्यः' इति बुद्धिस्तस्य श्रुतमध्ययनं सर्वं कामादिजयादिकञ्च कुञ्जरशौचतुल्यं यथा कुञ्जरस्य स्नानं पुनर्धूलिप्रक्षेपेण कृतमप्यकृतं तद्वत् इत्यर्थः॥ २६॥

गुरोर्भगवत्त्वं श्रीकृष्णदृष्टान्तेनाह—एष इति। एष श्रीकृष्णः साक्षात्प्रकृतिपुरुषयोरीश्वरो ऽत एव योगेश्वरैरस्मदादिभिः विमृग्यौ ध्येयौ अङ्घ्री पादौ यस्य स भगवानेव नात्र सन्देहः एवं भूतमपि यं श्रीकृष्णं नरं मन्यते तत्स्वरूपानभिज्ञो लोकस्तथा गुरुयाथात्म्यानभिज्ञस्तं नरं मन्यते तद्याथात्म्यवित्तु साक्षाद्भगवन्तं मन्यत इत्यर्थः॥ २७॥

एवं गुरुभक्त्यभावे सर्वं विफलमित्युक्तम् अथावश्यकानां सर्वेषां वर्णधर्माणामाश्रमधर्माणां चेन्द्रियजयार्थत्वं तदभावे तद्वैयर्थ्यमिन्द्रियपर्यन्तानामपि तेषां भगवदुपासनात्मकयोगनिष्पादकत्व एव साफल्यमन्यथा वैफल्यं चाह—षड्वर्गेति। सर्वा नियमचोदनाः वर्णाश्रमानुगुणाऽऽवश्यकधर्मनियमविधयः चोदनाशब्देन चोद्यमुपलक्ष्यते चोदिता धर्मा इत्यर्थः। यद्वा नियमस्य चोदनाः येषु ते धर्माः। षड्वर्गः मनः पर्यन्तषडिन्द्रियवर्गः तस्य संयमो नियमः तदेकान्ताः तदेकप्रयोजना इत्यर्थः। अन्यथा तेषां वैफल्यमेवेति भावः। तदन्ताः षड्वर्गनियमपर्यन्ता अपि यदि योगान् योगावयवान् धारणाध्यानसमाधीन्नावहेयुर्न साधयेयुस्तर्हि केवलं श्रमाऽऽवहा एवेत्यर्थः॥ २८॥

एवमावश्यकधर्माणामिन्द्रियजयद्वारा योगावहत्वमेव साफल्यमन्यथा केवलश्रमफलकत्वञ्चोक्तम् अथ वृत्तिधर्माणामपि योगप्रयोजकत्वाभावे वैयर्थ्यं प्रत्युतानर्थावहत्वं तैः सहावश्यकानामपि वैयर्थ्यं चाह—यथेति। वार्त्तादयो ह्यर्था वृत्तेर्जीवनस्येमे वार्त्ता अर्था याजनादयः यदा योगस्यार्थं न बिभ्रति योगानुष्ठानैकप्रयोजनं जीवनं न बिभ्रति न पुष्णन्ति न कुर्वन्ति तदाऽनर्थाय नैरर्थक्याय भवेयुः असदर्थव्ययरूपानर्थाय भवेयुरिति वा तथासतस्तथा वर्त्तमानस्य वार्त्तानर्थान्योगैकप्रयोजनजीवनमात्रोपयुक्तान्कुर्वतः पुरुषस्य पूर्त्तं स्मार्त्तं कर्म इष्टं यागादिकं वैदिकं कर्म चानर्थकयाय भवेताम्॥ २९॥

अथेन्द्रियजयपर्यन्तस्ववर्णाश्रमधर्मकामादिजयनिष्ठस्य भगवद्भक्तियोगानुष्ठानप्रकारमाह—य इत्यादिना। यः पुमान् चित्तस्य विजये यत्त आयत्तो दत्तः स्यात् तर्हि निःसङ्गस्त्यक्तकलत्रपुत्रादिसङ्गोऽपरिग्रहः शरीरमात्रावशेषितः भिक्षुस्तुर्याश्रमी भूयात् भिक्षुर्भूत्वा चैकोऽसहायः विविक्तशरणः निर्जनदेशोऽवस्थितः भैक्षं भिक्षया लब्धं मितं चाशनमन्नं यस्य भैक्षं मितं चाश्नातीति वा कर्त्तरि ल्युः॥ ३०॥

शुचौ परिशुद्धे समेऽनिम्नोन्नते च देशे हे राजन्! आत्मनः स्वस्यासनं "चैलाजिनकुशोत्तरम्"इत्युक्तविधमास्थाप्य स्थिरं चाञ्चलरहितं सुखं च यथा भवति तथा तस्मिन्नासने आसीत उपविशेत् ऋज्वङ्गः ऋज्ववक्रमङ्गं यस्य ऋजुकायः सन्नोम् इत्यनुसन्दधदिति शेषः॥ ३१॥

पूरकुम्भकरेचकैः प्राणापानौ वायू सम्यङ्निरुन्ध्यादपानेन प्राणाभिभवो रेचकः प्राणेनाऽपानाभिभवः पूरकः उभयोः समानः कुम्भकः यावन्मनः कामान् शब्दादिविषयांस्त्यजेत् नाऽनुसन्दधीत तावत् स्वस्य नासाग्रं निरीक्षत इति निरीक्षणः कर्त्तरि ल्युः॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्त्वगुणेन रजस्तमसी उपशमेन भगवन्निष्ठया सर्वत्राऽपि भगवद्भक्तिरेव प्रयोजिकेत्याशयेनाह—एतदिति॥ २५॥

विपक्षे बाधकमाह—यस्येति। अभिसन्धिरतिक्रमणं भक्त्यनुसन्धानराहित्यं अवज्ञेति यावत्॥ २६॥

कथमवज्ञाप्रकारः? इति तत्राह—एष इति। एष पर्वतेश्वरमाहात्म्यो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येतो लोको * यं नरं सुखदुःखभोक्तारं मन्यत इत्येवमवज्ञाप्रकार इत्यर्थः ॥ २७ ॥

ननु, हरेः प्रकृतिनिलीनत्वेन नरत्वं सम्भाव्यते "तुच्छ्येनाभ्वपिहितं यदासीत्प्रकृतौ लीनः संसारमेति स च स्वच्छाभवत्" इति श्रुतेः । इति तत्राह–षड्वर्गेति । सर्वा निगमचोदनाः "सन्ध्यामुपासीत" इत्यादिवेदविधयाऽपि हरौ भक्तियोगं न कुर्युस्तर्हि श्रमावहाः क्लेशहेतव एवेत्यन्वयः । आवहन्ति चेत्कथंकारमित्यत उक्तं षडिति, षडिन्द्रियाणां संयमो विषयादाहृत्य हर्येकविषयीकरणलक्षणः तस्मिन्नैवैकान्तो निश्चयेन तात्पर्यं यासां ताः तथाऽन्यत्तात्पर्यं किञ्च स्यादिति तत्राह–तदन्ता इति । तस्य भक्तियोगस्यान्तो निष्ठा यो यासां तास्तथा यथा षड्वर्गसंयमैकान्ताः सर्वा । निगमचोदनाः तदन्ता निगमा यदि योगं नो आवहेयुरिति वा ॥ २८ ॥

इष्टापूर्तादिना पुरुषस्य पुरुषार्थसम्भवेन तद्विधायिवेदः पूर्णार्थो लभत इत्यतो वेदस्य श्रमावहत्वं कथम् ? अत्राह–यथेति । यस्य पुंसो या वार्तादयो विद्यास्ता अर्थं न बिभ्रति प्रत्युतानर्थाय भवेयुश्च तथा ऽसतस्तस्य पूर्तमिष्टं चार्थं न विभृत इत्यन्वयः पूर्तादेरनित्यफलहेतुत्वेन निन्दितत्वात् तदर्थविधायित्वं वेदस्य जुगुप्सितम् अतस्तद्विधाने श्रमावहत्वं प्रकटमित्यर्थः । "इष्टापूर्त्तं मन्यमाना वरिष्ठम्" इत्यादिश्रुतेः ॥ २९ ॥

* यदि नो योगमित्यत्र योगशब्देन ध्यानं चोच्यते तदा तद्ध्यानं ध्येये मनो निधायोपासनापरपर्यायं भवेत्तत्र जलचरस्येवान स्थानस्य मनसो जयेन सफलं स्यादतस्तदुपायमाह–यश्चित्तेति । यश्चित्तविजयेच्छुः स्यात्स ओमिति मन्त्रमुच्चार्य तस्मिन्नासीतेत्यन्वयः । तद्विजयोपायमाह–निःसङ्ग इति । निःसङ्गत्वं कथम् ? अत्राह-निष्परिग्रह इति । तत्फलमेक इति एकस्यापि स्वजनरहितस्य जनतामध्यस्थितस्य नानावार्ताश्रवणेन विक्षिप्तस्य पुंसो मनोजयः कथमुपपद्यते ? इत्यत उक्तं विविक्ते एतदपि गृहस्थस्य न घटत इत्यत उक्तं, भिक्षुरिति । तस्याप्यशनचिन्तया द्वितीयापेक्षमोक्तं न युक्तमित्यत उक्तं, भैक्ष्येति । भैक्ष्यमपि बहुसम्पन्नं न भोगोपयोगि स्यादित्यत उक्तं मितेति ॥ ३० ॥

ऋज्वङ्गः समीकृतकायशिरोग्रीवः ॥ ३१—३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उपशमेन निवृत्त्यात्मकेन सत्त्वेन एतदित्यर्द्धकम् । श्रुतिश्च । "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति । अतो ब्रह्मवैवर्त्ते "गुरुभक्त्या स मिलति स्मरणात् सेव्यते बुधैः । मिलितोऽपि न लभ्येत जीवैरहमिकापरैः" इति । पाद्मे देवद्युतिस्तुतौ "भक्तिर्यथा हरौ मेऽस्ति तद्वरिष्ठा गुरौ यदि । ममाऽस्ति तेन सत्येन स्वं दर्शयतु मे हरिः" इति ॥ २५ ॥

मर्त्योऽसद्धीरिति । अत एवोक्तं प्राचीनैः । "अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः । शुद्धं तन्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णौ सर्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः" इति ॥ २६ ॥

न चेदं लोकेष्वाश्चर्यं साक्षाद्भगवति तथा मननादित्याह, एष इति ॥ २७—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जसा शीघ्रमायासाभावेन सर्वं जयेत् सर्वरोगोपशमनमुख्यमेकमेव महौषधमिवेत्यर्थः । अत्र कामादिजयो ज्ञानिनां गुरुभक्तेरनुसंहितं फलं शुद्धभक्तानां त्वानुषङ्गिकमिति विशेषो द्रष्टव्यः ॥ २५ ॥

किञ्च सत्यां भूयस्यामपि भक्तौ गुरौ मनुष्यबुद्धित्वे सर्वमेव व्यर्थं भवतीत्याह—यस्येति । साक्षाद्भगवतीति भगवदंशबुद्धिरपि गुरौ न कार्येति भावः । यद्वा उपास्ये भगवत्येव साक्षाद्विद्यमाने मर्त्योऽसद्धीः मर्त्य इति दुर्बुद्धिस्तस्य श्रुतं मगवन्मन्त्रादिकं शास्त्रादिकं श्रवणमननादिकं च व्यर्थमित्यर्थः ॥ २६ ॥

ननु, गुरोः पितृपुत्रादयः प्रतिवेशिनश्च तं नरमेव मन्यन्ते कथमेक एवायं शिष्यस्तं परमेश्वरं मन्यताम् ? अत आह–एष इति, भगवान् यदुनन्दनो रघुनन्दनो वा वै निश्चितमेव प्रधानपुरुषयोरीश्वरः यं लोकस्तदवतारकालोत्पन्नो जनः नरं मन्यते तेन किं स नरो भवति ? अपितु परमेश्वर एवेत्ययं गुरुरपीति भावः ॥ २७ ॥

किञ्चः य कामादिजयो गुरुभक्त्या साध्यते स एव सर्वशास्त्रोक्तनानासाधनानामपि वास्तवं फलमित्याह—षड्वर्गेति–सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य यः संयमः स्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः । ननु, च यथा गुरुभक्त्या कामादयो जीयन्ते भगवानपि प्राप्यते "तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया" इति "तरन्त्यञ्जो भवार्णवम्" इति च भगवदुक्तेः तथा नियमचोदनाभिः षड्वर्गसंयमः साध्यते । भगवान् लभ्यते न वा तत्राह—तदन्तास्तदेकपरत्वादेव योगान् भगवद्ध्यानादीन् न आवहेयुः न साधयेयुः कुतो भगवन्तं प्रापयेयुरित्यर्थः । यदि च नावहेयुस्तर्हि श्रमावहा एवाऽत्र कः सन्देह इति भावः ॥ २८ ॥

एतदेव दृष्टान्तेनाह—यथा वार्त्तादयः कृष्यादयोऽर्थो भोग्यानर्थान् साधयन्तोऽपि योगस्यार्थं मोक्षं न साधयन्ति यदि च मोक्षं न साधयन्ति तदा ते अनर्थाय प्रयोजनाभावायैव भवेयुस्तथैव असतो भगवदभक्तस्य इष्टापूर्तादि विफलायैव ॥ २९ ॥

तदेवं गृहस्थस्यापि कामादिजयो मोक्षप्रकारश्चोक्तः यस्य तु कुटुम्बादिसङ्गदोषेण कामादिजयो यतमानस्याऽपि न स्यात् स तु निःसङ्गो भिक्षुरेव स्यादित्याह—य इति । यत्नो यत्नवान् स भिक्षुः स्यात् तथा च स्मृतिः—

* हरिम् । * अष्टाविंशश्लोकस्यप्रतीकम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

"द्वन्द्वाहतस्य गार्हस्थ्ये ध्यानभङ्गादिकारणम् ।
लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्" ॥

इति ऋजु सममङ्गं यस्य सः ओमिति समुच्चारयन्निति शेषः ३०-३३॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपशमेनोपशान्त्या एतत्कामादिकं सर्वं गुरौ भक्त्या ॥ २५ ॥

उक्तार्थे सम्भावनादिदोषनिवृत्तये श्रीगुरौ मानुषभाववतः सर्वशास्त्रश्रवणादि निरर्थकमेवेति वदन् श्रीगुरोर्माहात्म्यमाह-यस्येति, द्वाभ्याम् । अयं मर्त्यो मनुष्य इत्यसद्धीर्यस्य तस्य श्रुतमित्युपलक्षणम् जपतप आदि कुञ्जरशौचवन्निष्फलं भवति २६

एष श्रीगुरुरूपी साक्षात् भगवान् श्रीकृष्ण एव लोकः अज्ञो जनः नरं मन्यते तस्याभाग्यमिति भावः ॥ २७ ॥

अथ सर्वे उपायाः भगवत्प्राप्तिसाधनानां ज्ञानभक्त्यादीनां योगानामुत्पादका यदि न स्युस्तर्हि कृष्यादिवज्जीवनोपायतया संसारपर्यवसायिन एव न मुक्तिपर्यवसायिन इत्याह—षड्वर्गेति, द्वाभ्याम् । सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैके साध्यभूते साधनतयाऽन्तः पर्यवसानं यासां ताः तदन्ताः स षड्वर्गः अन्ते अग्रे यासां ताः स्वफलेन षड्वर्गसंयमेन सहिता इत्यर्थः । यदि योगान् मुक्त्युपायान् नावहेयुर्न साधयेयुस्तर्हि श्रमावहाः संसारप्रदा एव ॥ २८ ॥

यथा वार्त्तादयः कृष्यादयः अर्थास्तत्फलानि च योगस्य ज्ञानवैराग्यभक्तिरूपस्य अर्थं मोक्षं न बिभ्रति ज्ञानाद्युत्पादनद्वारा मोक्षं न साधयन्ति, प्रत्युत अनर्थाय शिश्नोदरपर्यवसायितया संसाराय भवेयुः तथा असतो हरिविमुखस्य पूर्त्तादिकम् ॥ २९ ॥

मुमुक्षुर्गृहे तिष्ठन्नुक्तरीत्या कामादिविजयेन नानानियमसाध्यषड्वर्गसंयमेन साधितैर्ज्ञानभक्त्यादियोगैर्मुक्तः स्याद्यदि कुटुम्बादिसङ्गेन सर्वसाधनमूलभूतमनोनिग्रहो दुष्करस्तर्हि गृहात्परिव्रज्येद् कुर्यादित्याह—य इति, षड्भिः । यश्चित्तविजये यत्तः उद्युक्तः भिक्षया प्राप्तं मितमल्पमशनं यस्य सः दण्डादिलिङ्गयुक्तया—

"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ॥

इति भगवदाज्ञया आश्रमलिङ्गादिपरित्यागेन वा भागवतो भिक्षुः स्यात् यतिर्भवतु ॥ ३० ॥

हे राजन् ! शुचौ देशे पवित्रस्थाने आसनमास्थाय ऋज्वङ्गः समकायशिरोग्रीवः सुखं यथा भवत्येवमासीत ओमित्युच्चारयन्निति शेषः । प्राणापानौ सन्निरुन्ध्यादित्यग्रिमेन सम्बन्धः ॥३१॥

पूरकादिभिः प्राणापानौ संनिरुन्ध्यात् प्राणायामं कुर्यात् तदवधिमाह—यावन्मनः कामान् त्यजेदिति ॥ ३२ ॥

———

भाषा टीका ।

रज और तम को सत्व से जीते, उपशांति से सत्व को भी जीते. और पुरुष इन सबों को गुरुके विषैं भक्ति करने से तो अनायास ही जीत सक्ता है ॥ २५ ॥

जिस पुरुष की साक्षात् भगवत् स्वरूप ऐसे, ज्ञानदीपप्रद गुरु में खोटी मनुष्यपने की बुद्धि है, उस्का सर्व श्रुत (वेदादिका सुनना) कुञ्जर शौचवत्, है अर्थात् हाथी के नहान तुल्य है ॥२६॥

नारद जी सभा में बैठे हुए श्रीकृष्ण को लक्ष्य कर गुरु के विषैं दृष्टान्त देने को बोले, कि हे राजन् ! ये जो तुमारी सभा में मनुष्याकार से बैठे हुए श्रीकृष्ण हैं, ये मनुष्य नहीं है, किंतु साक्षात् प्रधान (प्रकृति) और पुरुष (जीव) के नियंता है. और बडे२ योगेश्वरों के ढूंढने योग्य चरण कमल वाले हैं, तो भी लोक इनको नर अर्थात् मनुष्य मानता है, इसीप्रकार गुरु भी मनुष्य नहीं हैं किंतु साक्षात् भगवान ही हैं ॥ २७ ॥

षट् इन्द्रियों के जीतने में परम उपयोगी सम्पूर्ण नियम और शास्त्रीय विधियों का उन श्रीकृष्णमें ही पर्यवसान है, यदि सर्व नियम विधि आदि के अनुष्ठान से भी इनमें प्रीति न हुई, तो ये नियमादि सब श्रम मात्र देने वाले जानों ॥ २८ ॥

जैसे कि—कृषि वाणिज्य आदि वृत्ति योग के अर्थ को नही सिद्ध करसक्ती है, ऐसे ही इनमें जिसकी प्रीति नहीं एसे असत् पुरुष के इष्ट, आपूर्त्त, आदि सब कर्म अनर्थ के ही करने वाले होंगे ॥ २९ ॥

जो पुरुष चित्त के जीतने का उद्योग वाला हो तो संन्यास लेकर सर्व सङ्ग और परिग्रहों (उपकरणों) को छोडकर एकला ही एकान्त स्थल का आश्रय लेकर भिक्षा से मित भोजन करता हुआ ॥ ३० ॥

हे राजन् ! सम और शुद्ध प्रदेश में स्थिर सम और सुखदाई ऐसे अपने आसन को बिछाकर, उस पर ऋजु (सीधा) अंग कर कर प्रणव (ॐकार) का उच्चारण करता हुआ बैठे ॥ ३१ ॥

पूरक कुंभक रेचक प्राणायामों से प्राण और अपान का अच्छे प्रकार निरोध करे जब तक कि अपना मन कामनाओं को न छोड देवे, और अपने नासिका के अग्र भाग का निरीक्षण भी करता जावे ॥ ३२ ॥

———

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यतो यतो निःसरति मनः कामहतं भ्रमत् ।
ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥ ३३ ॥
एवमभ्यस्यतश्चित्तं कालेनाल्पीयसा यतेः ।
अनिशं तस्य (१)निर्वाणं यात्यनिन्धनवह्निवत् ॥ ३४ ॥
कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ।
चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥
यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गाऽऽवपनात्पुनः ।
यदि सेवेत तान्भिक्षुः स(२) वै वान्ताश्यपत्रपः ॥ ३६ ॥
यैः स्वदेहः(३) स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् ।
त एन मात्मसात्कृत्वा श्लाघयन्ति ह्यसत्तमाः ॥ ३७ ॥
गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि ।
तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलौल्यता ॥ ३८ ॥
आश्रमापसदा ह्येते खल्वाश्रम(४)विडम्बकाः ।
देवमायाविमूढांस्तानुपेक्षेताऽनुकम्पया ॥ ३९ ॥
आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ।
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लम्पटः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमनिशमभ्यस्यतस्तस्य यतेश्चित्तं निर्वाणं शान्तिं याति ॥ ३४ ॥

नच पुनर्विक्षिप्येतेत्याह—कामादिभिरक्षुभितं यच्चित्तं तन्नोत्तिष्ठेत् यतः प्रशान्ता अखिला वृत्तयो यस्य कुतः ब्रह्मसुखेन स्पृष्टम् ॥ ३५ ॥

यस्तु प्रव्रज्यां कृत्वा ऽपि भोगमभिलिप्सुः स्यात्तं निन्दति, य इति । त्रयाणां धर्मादीनां वर्ग आसमन्तादुप्यते यस्मिंस्तस्माद् गृहात् तान्धर्मादीन् वान्ताशी छर्दिंनभोजी निर्लज्जश्च ॥ ३६ ॥

नचेदमघटितं दृष्टत्वादित्याह—यैः पूर्वं स्वदेहो ऽनात्माऽविरूपः स्मृतश्चिन्तितस्त एव पुनरेनमात्मेति मत्वा श्लाघयन्ति स्तावयन्ति हि ॥ ३७ ॥

यतिमुपलक्षणीकृत्याऽन्यानपि स्वधर्मत्यागिनो निन्दति—गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥ ३९ ॥

नन्वात्मतत्त्वज्ञस्य भिक्षो रिन्द्रियलौल्येऽपि को दोषस्तत्राऽऽह, आत्मानं परं ब्रह्म चेज्जानीयात् ज्ञानेन धुता निरस्ता आशया वासना यस्य तस्य ज्ञानिनो लौल्यमेव न सम्भवतीत्यर्थः । तथाच श्रुतिः—

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीमनुसञ्ज्वरे" ॥

इति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कामैः शब्दादिविषयध्यानैर्हतं विक्षिप्तं सन्मनो भ्रमद्यतो यतः यं यं विषयं निःसरति विषयीकरोति ततस्ततो विषयात् तन्मनः उपाहृत्य प्रत्याहृत्य बुधस्तत्प्रत्याहारविद्धृदि हृदयस्थे शुभाश्रये शनैर्निरुन्ध्याच्छुभाश्रयचिन्ताप्रवणं कुर्यात् अत्र नियमोऽर्थसिद्धः चित्तविजय इति नियम उक्तः स्थिरं सुखमासीतेत्यासनम् । प्राणापानावित्यादिना प्राणायामः यावन्मन इत्यादिना ततस्तत उपाहृत्य इत्यन्तेन प्रत्याहारः निरुन्ध्याच्छनैर्बुध इत्यनेन ध्यानधारणे चोक्ते ॥ ३३ ॥

अथ समाधिमाह—एवमिति, द्वाभ्याम् । एवमनिशम् अहरहः सर्वदा वाऽभ्यसतः तस्य यतेश्चित्तमल्पीयसैव कालेन निर्वाणं याति बहिर्वृत्तिविनाशं याति अनिन्धनवह्निवत् यथाऽनिन्धनः ज्वालाधूमादिरहितो दाहरहितो ऽङ्गाररूपेणाऽ वशेषितोऽग्निस्तद्वत् इत्यर्थः ॥ ३४ ॥

(१) अविषयताञ्च (२) सपापो निरपत्रपः (३) यस्यदेहः । इति विज० पाठ० (४) विडम्बिनः । इति विज० वीर० पाठ० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न तु विच्छित्तिंरुम्भवतीत्याह—कामेति । यद्यस्मात् कामाद्याभः शब्दादिविषयानुध्यानादिभिरनाविद्धमसंक्रान्तं प्रशान्ता अपगता अखिला वृत्तयो व्यापारात्मका यस्य तादृशं चित्तमभूत् तस्मात्तच्चित्तं ब्रह्मसुखस्पृष्टं ब्रह्माऽनुभवसुखाविद्धं सत् कर्हिचिदपि नैवोत्तिष्ठेत शुभाश्रयान्न प्रच्युतं भवति, अयमेव समाधिर्यद् ब्रह्माऽनुभवमग्नचित्ततेति ॥ ३५ ॥

एवमष्टाङ्गयुक्तभगवद्भक्तियोगनिष्ठं तत्फलत्वेन त्रिवर्गं कामयमानं यतिं निन्दति—य इति । त्रिवर्गस्य धर्मार्थकामरूपस्यावपनात् क्षेत्रभूताद् गृहात्प्रव्रज्य पुनर्यः पुमांस्तान् धर्मादीनेवं सेवेत सवै भिक्षुर्निरपत्रपो निर्लज्जो वान्ताशी छर्दितान्नभक्षी उद्गीर्णान्नभक्षयितृतुल्य इत्यर्थः । यद्वा प्रव्रज्यापि पुनर्भोगासक्तं यतिं निन्दति—य इति ॥ ३६ ॥

न चेदमघटितं दृष्टत्वादित्याह—यैरिति । यैः परिव्राड्भिः पूर्वं स्वदेहो नात्मा स्मृत आत्मत्वेन न निश्चितः किन्त्वात्मनः व्यतिरिक्तो मर्त्यः मरणशीलः विट्क्रिमिभस्मसात्त्वान्ततः क्रिम्याद्यवस्थामापत्स्यमानश्चिन्तितः त एव पुनस्तमेनं देहमेव आत्मसात्कृत्वाऽऽत्माऽभिन्नं कृत्वा श्लाघयन्ति हि, केचिदसत्तमाः परिव्राज इत्यर्थः ॥ ३७ ॥

भोगाऽऽसक्तयतिनिन्दाप्रसङ्गात्तेन सहाऽऽश्रमान्तरस्थानपि स्वधर्मादित्यागिनो निन्दति—गृहस्थस्येति । क्रियात्यागः स्ववर्णाश्रमोचितक्रियात्यागः वटोर्ब्रह्मचारिणो व्रतत्यागः गुरुकुलवासादिव्रतत्यागः तपस्विनो वानप्रस्थस्य ग्रामसेवा पुनर्ग्रामवासः भिक्षोः सन्यासिन इन्द्रियलोलता ॥ ३८ ॥

एते आश्रमापसदा येषां गृहस्थादीनां सुवर्णा क्रियात्यागादयस्त एते आश्रमेषु आश्रमस्थेषु अपसदा निकृष्टा इत्यर्थः एते ह्याश्रमान् विडम्बयन्त्यनुकुर्वन्तीत्याश्रमविडम्बिनः विडम्बनमात्रमेवैषां नत्वाश्रमसिद्धिरित्यर्थः । अतस्तान् भगवन्मायया विमूढान् अनेन नित्यनिरतिशयाऽऽनन्दरूपपरमात्मप्राप्तिसाधनभूततदुपासनतदङ्गधर्माऽनुष्ठानोपयुक्तमनुष्यजन्मवर्णाऽऽश्रमादिरूपसामग्रीं लब्ध्वापि ये स्वधर्मादित्यागिनस्ते नूनं देवमाया मोहिता इत्युक्तम् भवति । अनुकम्पया अहो इमे उच्चपतिताः किं विधेयमित्येवमनुकम्पापूर्वकचिन्तया तानुपेक्षेत नानुवर्तेतेत्यर्थः ॥ ३९ ॥

स्वात्मपरमात्मतत्त्वज्ञस्य ब्रह्माऽनुभवसुखतृप्तस्य तु यतेरिन्द्रियलौल्यमेवासम्भावितं तस्य देवमायया मोहाभावादित्याह—आत्मानमिति । परं प्रकृतिपुरुषविलक्षणमात्मानम् यद्वा आत्मानं परं परमपुरुषं च विजानीयाच्चेत् तज्ज्ञानेन निर्धूतवासनः कस्य कामाय इष्टसम्पत्तये लम्पटः किमिच्छन्देहं पुष्णाति देहपोषणेन स्वात्मनः परमपुरुषस्य च नेष्टं सम्पद्यतेऽनस्त्यजत्येवेत्यर्थः । यद्वा इच्छन् शब्दादिविषयान्कामयमानः कस्य स्वपरयोरन्यतरस्य कस्य कामायेष्टार्थं देहं पुष्णाति किम्? न पुष्णात्येवेत्यर्थः । कस्य कामायेत्यनेन देहपोषणं न स्वात्मनो नाऽपिपरमात्मनश्च सुखाधायकं तयोः स्वत एव निरतिशयसुखरूपत्वादिति सूच्यते, निरतिशयानन्दपरमात्मोपासनात्मकतदनुभवतृप्तो निरीहो देहपोषणजसुखार्थं न यतत एव, किन्तु परमात्मप्राप्तय एव यतत इति सूचितम् । देवमायाविमूढानित्यनेन परमाऽऽनन्दरूपपरमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तशरीरेन्द्रियादिसामग्रीं लब्ध्वाऽपि ये न यतन्ते ते देवमाया विमूढा इति चोक्तम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपाहृत्य हृदि स्थिते हरौ ॥ ३३ ॥

इन्धनरहितो वह्निर्यथा निर्वाणं नाशं याति तथा चित्तं प्राकृतं नाशमेति अप्राकृतं स्वरूपभूतं शरीराभिमानरहितं ब्रह्म यातीत्यन्वयः । "बाणं शरीरं सम्प्रोक्तं बाणो बलिसुते शरः" इत्यभिधानम् "निर्वाणममृतमक्षरं ब्रह्म" इत्यभिधानम् ॥ ३४ ॥

एवं विषयीकृतब्रह्मणोऽप्राकृतस्य चित्तस्य स्वभावफलमाह, कामादिभिरिति । यच्चित्तं कामादिभिरनाविद्धत्वात् प्रशान्ताखिलवृत्तित्वाच्च ब्रह्म पूर्णसुखरूपं स्पृष्टं विषयीकुर्वत् तत्कर्हिचित्तो नोत्तिष्ठेत ततोऽन्यत्र न गच्छतीत्यर्थः ॥ ३५ ॥

ननु, कस्यचिच्चेतोऽन्यत्र गच्छति चेत्किन्दूषणमित्याशंक्य तस्य पापकरणत्वेन सर्वहास्यत्वं दूषणमित्याशयेनाह—यःप्रव्रज्येति । त्रिवर्गावपनाद्धर्मार्थकामबीजानामावपनक्षेत्रभूतात् तान् कामादीन् यदा सेवेत तर्हीति शेषः ॥ ३६ ॥

एवं विधा असुरजातय इत्यभिप्रायेणाह—यस्येति । यस्य देहिनः अनात्मा देहो विट्क्रिमिभस्मवत्स्मृतः तस्य तमेव देहं तत्सदृशमेव भोगायतनं स्वात्मसात्कृत्वाऽहमेवात्मेति कृत्वा ये देहं श्लाघयन्ति ते असत्तमा असुरा इत्यन्वयः । "आत्मैव ह्ययान्" इति श्रुतिं हिशब्देन सूचयति—यैः स्वदेह इति पाठे यैर्मर्त्यैरनात्मा स्वदेहो विट्क्रिमिभस्मवत्स्मृतः ते तमेव स्वात्मसात्कृत्वा श्लाघयन्ति तर्हि असत्तमा इत्यन्वयः ॥ ३७ ॥

न केवलं यतेराश्रमत्यागे दूषणमपि तु गृहस्थानामपि स्वधर्मत्यागे दोषः स्यादित्याह—गृहस्थस्येति । यत्यादेः कस्य कस्य धर्मत्यागे दोषः स्यादित्यतो वाऽऽह—गृहस्थस्येति । बटोर्ब्रह्मचारिणः यदि गृहस्थादीनां क्रियात्यागादयः सन्ति तर्ह्येते आश्रमापसदा हीत्यन्वयः ॥ ३८ ॥

नन्वेतावताऽपि फलं स्यात्किं नेत्याह—खल्विति । आश्रमान्विडम्बयन्ति अनुकुर्वन्तीत्याश्रमविडम्बिनः खलु आश्रमफलाहेतुत्वादित्यर्थः । निषेधवाक्यालङ्कारादौ खलुशब्दप्रयोगात् न चैत पुण्याशया मान्या इत्याह—देवेति । अतो भगवन्महिमेति भगवद्विषयैवाऽनुकम्पा प्रेमविशेषः ॥ ३९ ॥

यतः स्वधर्मत्यागी निन्द्योऽतो विहितातिरेकेण देहपोषो न युक्त इत्याह—आत्मानमिति । विवेकज्ञानेन धृताशयः वशीकृतान्तःकरणः पुरुषः आत्मानं स्वस्वरूपं परमात्मानं च विजानीयात् चेत्तर्हि स किं सुखमिच्छन् कस्य हेतोः सुखस्यार्थे वा लम्पटो रागी-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इन्द्रियलोलुपो भूत्वा देहं पुष्णातीत्यन्वयः "सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा सुखं त्यजेत्" इति वचनात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निर्वाणं शान्तिं याति ॥ ३४—३५ ॥

त्रिवर्ग आ उद्यते यस्मिन् तस्मात् गृहात् पूर्वं प्रव्रज्य पुनः पश्चात् तानेव गृहस्थधर्मान् सेवेत वान्ताशी छर्दितभोजी निर्लज्जः ॥ ३६ ॥

अनात्मा देह आत्मा न भवतीति चिन्तितः विट्कृमिभस्मवदित्यन्ते विट्कृमिभस्मरूपो भविष्यतीत्यतोऽधुनापि विट्कृमिभस्मतुल्य इत्यर्थः । त एव एनं देहम् आत्मसात्कृत्वा आत्मानमेव मत्वेत्यर्थः ॥ ३७ ॥

लौल्यता लौल्यम् अनुकम्पया सह उपेक्षेत अनुकम्पया तदन्तिकमुपेत्य तत्त्वोपदेशादिकं न कुर्यात् तस्य तेषु वैयर्थ्यादिति भावः ॥ ३८ ॥

तेष्वपि मध्ये भिक्षुं विशेषतो निन्दति–आत्मानमिति। अत्र विजानीयादिति विधिलिङ् तेन चायमर्थ आक्षेपलभ्यो भवति ज्ञानधुताशयः सन् आत्मानं विजानीयादिति विधेर्विषयीभूतः स्याश्चेत्तदा किमिच्छन्नित्यादि देहं पुष्णातीति जिह्वेन्द्रियलौल्यं लम्पट इत्युपस्थलौल्यञ्च व्यञ्जितं परं देहात् पृथग्भूतम् ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भ्रमदनवस्थितम् यतो यतो यत्र यत्र विचरेत् ॥ ३३ ॥

अनिशं निरन्तरमेवम् अभ्यसतस्तस्य यतेश्चित्तं निर्वाणं नैश्चल्यम् ॥ ३४ ॥

मनाविद्धमक्षुभितम् अत एव प्रशान्ता अखिला वृत्तयो यस्य तत् ब्रह्मणः चिन्तनीयस्य भगवतः सुखेन स्पृष्टं यत् यर्हि भवेत्तदा कर्हिचिदपि नोत्तिष्ठति ॥ ३५ ॥

ब्रह्मसुखस्पर्शाऽभावे तूत्तिष्ठति विषयेषु यतेश्चित्तमतः स निन्द्यो भवतीत्याह—त्रयाणां धर्मार्थकामानां वर्ग आ समन्तादुद्यते यत्र ततो गृहात्प्रव्रज्य यदि तान् गृहस्थोचितान् धर्मादीन् पुनः सेवेत स वान्ताशी छर्दितभोजी अपत्रपो निर्लज्जश्च भवति ॥ ३६ ॥

आत्मविदोऽपि अनात्मानं देहं ये श्लाघयन्ति ते निन्द्या एवेत्याह—यैरिति । यैः स्वदेहः अनात्मा आत्मभिन्नः मर्त्यो मरणधर्मा कृमिविड्भस्मसात् च स्मृतः चिन्तितः पुनरेनमात्मसात् कृत्वा श्लाघयन्ति त असत्तमाः ॥ ३७ ॥

गतिमुपलक्षीकृत्यान्यानपि स्वधर्मत्यागिनस्तच्छद्मेद्दढीकरणार्थं निन्दति—गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥

अनुकम्पया उपेक्षेत नतु दुरुक्त्या पीडयेत् ॥ ३९ ॥

"आत्मानं चेद्विजानीयादयमस्मीति पुरुषः ।
किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत्" ॥

इति श्रुत्यर्थमुपबृंहयन् जाते आत्मज्ञानेऽपि देहासक्तं निन्दति—आत्मानमिति । परं देहादन्यम् ॥ ४० ॥

भाषा टीका ।

कामनाओं की ताडना से भ्रमता हुआ मन जहां २ से निकले तहां २ से रोक कर बुद्धिमान् धीरे से हृदय में रोके ॥ ३३ ॥

इस प्रकार निरंतर अभ्यास करने वाले यति का चित्त थोडे ही काल में शांति को प्राप्त होजाता है, जैसे, कि—विना इन्धन का अग्नि ॥ ३४ ॥

कामादिकों से क्षोभ को नहीं प्राप्त होने वाला शान्त होगई सर्व वृत्ति जिसकी और ब्रह्म सुख का स्पर्श करने वाला एसा यति का चित्त फिर कभी कामनाओं की तरफ नहीं उठता है ३५

जो पुरुष त्रिवर्ग के क्षेत्र रूप अपने गृह से सन्यास लेकर त्यागी होकर यदि फिर उन विषयों का सेवन करे, तौ वह निर्लज्ज वान्ताशी है, अर्थात् वमन करे हुए का भक्षण करने वाला है ॥ ३६ ॥

क्योंकि, जिनोंने पहले इस देह को अनात्मा और विष्ठा कृमि भस्म रूप समझा फिर वे ही इसको आत्मा मानकर श्लाघा करें और पालन पोषण करें तौ उनके सदृश असत्तम निन्दनीय और कौन है ॥ ३७ ॥

गृहस्थ होकर क्रियाओं का त्याग, ब्रह्मचारी होकर व्रतों का त्याग तपस्वी होकर ग्राम सेवा और भिक्षु होकर इन्द्रियों की चंचलता जिनकी है॥ ३८ ॥

ये लोग आश्रम धारियों में नीच हैं, और आश्रम का विडंबन करने वाले हैं, श्रीहरि की माया से मोहित एसे मूढों को कृपा करके दूरसे उपेक्षा करे अर्थात् उनके समीप न बैठे ॥ ३९ ॥

जिसने ज्ञान से वासनाओं का निरास किया है, एसा आत्मज्ञानी यति किस इच्छा से और कौन से हेतु से देह का पोषण करेगा, और वह लंपट ही क्यों होगा अर्थात् ज्ञानी एसा कर ही नहीं सक्ता है ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आहुः शरीरं रथमिन्द्रियाणि हयानभीषून्मन इन्द्रियेशम् ।
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुर[1]मीशसृष्टम् ॥ ४१ ॥
अक्षं दशप्राणमधर्मधर्मौ चक्रे ऽभिमानं रथिनं च जीवम् ।
धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥ ४२ ॥
रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ।
मानो ऽवमानो ऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥
रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ।
रजस्तमः प्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥
यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ।
ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशान्त इदं विजह्यात् ॥ ४५ ॥
नो चेत्प्रमत्तमसदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति ।
ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति ॥ ४६ ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।
आवर्तते प्रवृत्तेन निवृत्तेनाऽश्नुते ऽमृतम् ॥ ४७ ॥
हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् ।
दर्शश्च पूर्णमासश्च चातुर्मास्यं[2] पशुः सुतः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्रस्य तु लौल्येन नरकपातापसंरम्भसत्तेन सदा तत्तज्ञाने यतितव्यमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकद्वारेणाह—आहुरिति, षड्भिः । इन्द्रियेशं मनोऽभीषून् रश्मीनाहुः मात्रा शब्दादीन्वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्त बृहद्बृहद्व्यापि बन्धुरं बन्धनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति ईशसृष्टमिति बन्धनकर्त्ता त्वीश एवेत्यर्थः॥४१॥

प्राणादयः पञ्च "नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः" इत्येवं दशविधं प्राणमक्षम् अभिमानं साहङ्कारं जीवं रथिनं शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥ ४२ ॥

रागादयो जेतव्याः शत्रवः ॥ ४३ ॥

तत्र रजोऽभिनिवेशः क्वचिदारूढसमाधेः सत्त्वप्रकृतयोऽपि परोपकारादिप्रवृत्तयः शत्रवः ॥ ४४ ॥

नृकायरूपं रथमात्मवशः उपकल्प इन्द्रियादिपरिकरो यस्मिंस्तथाभूतं यावत् धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रदच्युताश्रयः सन्निरस्तशत्रुरुपशान्तः स्वानन्देन तुष्टो भूत्वेदं रथादिकमुपेक्षेतेत्यर्थः ॥ ४५ ॥

अच्युताश्रयाभावे बाधकमाह—नोचेदिति । असन्तो बहिर्मुखा ये इन्द्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपन्ति हयैः सूतेन च सह वर्तमानं तमोऽन्धे तमसा व्याप्ते उरु मृत्युभयं यस्मिन् ॥ ४६ ॥

ननु, वेदविहितेष्टापूर्तादिकारिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशङ्क्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन्फलभेदमाह—प्रवृत्तं चेति, दशभिः ॥ ४७ ॥

हिंस्रं श्येनादि कर्म अशान्तिदमत्यासक्तियुक्तम् आदिशब्दार्थविवरणं दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं मयैव शरीरेन्द्रियादेः परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामर्थ्यात्वमुच्यते, अपि तूपनिषद्वाक्यान्यपि—

"आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" ॥

(१ मीशधाम (२) पशुः पुन इति विज० पा० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यादीनि संसाराध्वनः पारं वैष्णवं पदं प्रेप्सुस्तमात्मानं रथित्वेन तच्छरीरादीनि रथरथाङ्गत्वेन रूपयित्वा तदाहुरित्याह—आहुरिति । शरीरादीन् रथादिभावेन रूपयन्तस्तेषां परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामग्रीत्वमभीष्टदेशप्रेप्सोर्विजिगीषोश्च प्रसिद्धरथादीनां साधनत्वमित्याहुर्वेदान्ता इत्यर्थः । शरीरं रथं रथस्थानीयमिन्द्रियाणि हयानश्वानिन्द्रियाणामश्वस्थानीयानामीशं मुख्यं मनः अभीशून् रश्मीन् रज्जूरिति यावत् मात्राः शब्दादीन् वर्त्मानि मार्गस्थानीयान् धिषणां बुद्धिं सूतं सारथिं सत्त्वं बलं बृहद् दृढं बन्धुरं देहादीनां बन्धनम् ईशसृष्टमिति यथायोग्यं विभक्तिविपरिणामेन शरीरादीनां विशेषणम् ईशेन परमात्मना सृष्टमीशसृष्टम् ॥ ४१ ॥

दशानां प्राणानां समाहारो दशप्राणं प्राणादिपञ्चकं नागकूर्मकृकलदेवदत्तधनंजयाख्योपप्राणपञ्चकात्मकम् अक्षमक्षस्थानीयम् अधर्मधर्मौ पुण्यपापे चक्रे पुण्यपापात्मकयोः कर्मणोरेव रथत्वरूपितशरीरप्रवृत्तिहेतुत्वात्तदायत्तत्वेन च चक्रत्वेन रूपणम् अभिमानिनं देहाभिमानं जीवं रथिनमाहुः तस्य रथिनः प्रणवमोङ्कारं धनुः पठन्त्याहुः शरं तु जीवं परं परमात्मानं तु लक्ष्यं पठन्ति "प्रणवो धनुः शरो ह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेत्" इति ह्यन्यत्राप्युक्तं विप्रकृष्टयोः शरलक्ष्ययोरिव जीवपरयोः सम्बन्धज्ञापनहेतुत्वात्प्रणवो धनुरुक्तम् ॥ ४२ ॥

रथित्वेन रूपितजीव एव शरत्वेनापि रूप्यते तत्र जेतव्यानाह—राग इति । रागः शब्दादि विषयाऽऽसक्तिः द्वेषः तद्विरोधिविषयाऽप्रीतिः लोभोऽसन्तोषः मोहः कार्याऽकार्याऽविवेकः भयमागामिदुःखदर्शनजं प्रतिकूलज्ञानं मदो गर्वः मानो बहुमानः अवमानस्तिरस्कारः असूया गुणेषु सत्स्वपि दोषाविष्कारः माया वञ्चनं हिंसा भूतद्रोहः मत्सरः परकृतद्रोहचिन्ता ॥ ४३ ॥

रजः क्रोधः स चामर्षः प्रमादो ऽनवधानता एवमादयः एतत्प्रभृतयः शत्रवो जेतव्यास्त एते रजस्तमःप्रकृतयः कचित्सत्त्वप्रकृतयश्च रजस्तमसी प्रकृती कारणे येषां ते सत्त्वं प्रकृतिः कारणं येषां ते चेति बहुव्रीहिः रजस्तमसोरन्यतरमिश्रसत्त्वप्रकृतय इत्यर्थः ॥ ४४ ॥

तदेवं शरीरेन्द्रियमनोविषयबुद्धिबलप्राणधर्माधर्मजीवाः रथरथाङ्गादि रथ्यादिभावेन परमात्मप्राप्त्युपायसाधनाऽनुष्ठानोपयुक्तत्वज्ञापनाय रूपिताः प्रणवजीवेशास्तु जीवपरयोः सम्बन्धज्ञानजनकत्वपरमात्मैकशेषत्वप्राप्यत्वज्ञापनाय धनुःशरलक्ष्यभावेन रूपिताः हेयत्वज्ञापनाय रागादयः शत्रुत्वेन रूपिताः अथ यस्यैते रथादयो वशे तिष्ठन्ति स एवाध्वनः पारं वैष्णवपदमाप्नोतीति "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतेरर्थमभिप्रयन् रथादिकमपि उपेक्ष्येन इत्याह—यावदिति । यावच्छरीरं मनीहितसाधने दत्तं स्ववशं च तावदेव ज्ञानासिना जितरागादिशत्रुर्मुक्तिसाधनमनुतिष्ठन् शरीरादिषु निःस्पृहो भवेदित्याह—यावदिति । नृकायरथं नरशरीररूपं रथं यावदात्मवशोपक्लृप्तं स्वाधीनतयो पक्लृप्तं यथा भवति तथा धत्ते तावदेव गरिष्ठानां महतां चरणार्चनयालब्धं निशातं ज्ञानरूपं खङ्गं दधद् बिभ्राणः अस्ता निरस्ताः शत्रवो रागादयो येन अच्युतः स्वाश्रितान्नच्यावयतीत्युच्यतो भगवानेव बलं यस्य तादृश उपशान्तः रागाद्यकलुषितचित्तः स्वाराज्यतुष्टः स्वराडकर्मवश्यः तस्य भावः स्वाराज्यं मुक्तैश्वर्यं तेन तुष्टः अवश्यमच्युतः स्वाराज्यं दास्यतीति सन्तुष्ट इदं नृकायरथादिकं विजह्यादुपेक्षेत तेषु स्पृहारहितो भवेदित्यर्थः । इदमेतद्धि संसारकं फलं वा विवक्षितम् ॥ ४५ ॥

यद्युक्तविधो न स्यात्तदा तस्यानर्थमाह—नेति । नोचेदुक्तविधो न भवेत्तदा प्रमत्तमिमं देहिनमसन्तो बहिर्मुखा इन्द्रियवाजिन इन्द्रियाण्येवाश्वाः सूतो बुद्धिश्चैते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु निक्षिपन्ति ते विषयाख्या दस्यवः हयैः सूतेन च सह वर्त्तमानममुं प्रमत्तं देहिनमुत्त्राधिकं मृत्युभयं यस्मिन्नन्धे तमस्यन्धतामिश्रनरकतुल्ये संसारकूपे क्षिपन्ति ॥ ४६ ॥

तदेवं वर्णाश्रमधर्मान् तदनुग्राह्यं भक्तियोगं शरीरेन्द्रियादीनां तदनुष्ठानोपयुक्तत्वं तैरनुष्ठितेन वर्णाश्रमधर्मानुग्रहीतेन भक्तियोगेन स्वाराज्यप्राप्तिं सांसारिकफललिप्सयाऽनुष्ठितानां तु धर्माणां संसृतिरूपानर्थावहत्वं चाभिधायाऽथ तेषामेव धर्माणामिष्टापूर्तभेदेन द्वैविध्यं सांसारिकफलसाधनत्वेन कृतानां प्रवृत्तकर्माख्यत्वं पुनरावृत्तिहेतुत्वमुपासनानुग्राहकतया कृतानां तु निवृत्तकर्माख्यत्वं तस्याऽपुनरावृत्तिहेतुत्वं चाह—प्रवृत्तमिति । वैदिकं वेदविहितं कर्म प्रवृत्तं निवृत्तमिति द्विविधं तत्र प्रवृत्तेन कर्मणा आवर्त्तते फलाऽनुभवाय लोकान्तरं प्राप्य तत्र तदनुभूयाऽवशिष्टेन कर्मणा ततः पुनरिहावर्त्तते निवृत्तेन त्वमृतमश्नुते तत्फलरूपममृतं मुक्तिं प्राप्य ततः पुनर्नावर्त्तते ॥ ४७ ॥

प्रवृत्तनिवृत्तभेदभिन्नस्य वैदिकस्यैव कर्मणस्तत् स्वरूपमिष्टसंज्ञकत्वं च वक्तुं तद्विशिषंस्तदवान्तरभेदान्दर्शयति—हिंस्रमिति । अग्निहोत्रनामधेयकं कर्म आदिर्यस्य तदग्निहोत्रादि आदिशब्दग्राह्यान्दर्शयति—दर्शश्चेति । दर्शादयः शब्दाः कर्मनामधेयानि पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वयं देहो हेयश्चेत्किमनेनार्थं इत्याशङ्क्य महाप्रयोजनमस्त्येवं कृतं चेदित्याशयेनाह—आहुरिति । अभीषुं प्रग्रहं इन्द्रियेशं श्रोत्रादीन्द्रियनेतारं मात्राः विषयाः धिषणा बुद्धिः ईशस्य धाम गृहस्थानीयं सत्त्वंमन्तःकरणविशेषम् ॥ ४१ ॥

दशप्राणं प्राणदशकमत्रमाहुरिति सर्वत्र योज्यं प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधञ्जयनामानो दश प्राणाः अधर्मधर्मौ पापपुण्यलक्षणे चक्रे शकटपदस्थानीये अभिमानमहङ्कारलक्षणं जीवं रथिनं पठन्तीत्यन्वयः । शरं तु जीवमित्यत्र तु शब्देनैतत्प्रवृत्तिविशेषभेदं सूचयति—नतु स्वरूपभेदम् "प्रणवो धनुः शरो ह्यात्मा"इति श्रुतेः । अथ देवरथस्तस्य वाग्बुद्धिरिति च परं ब्रह्म ॥ ४२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्य रथिनो जेतव्यानाह–राग इत्यादिना "अपूज्ये पूज्यबुद्धिस्तु मानः सद्भिरुदाहृतः" इति "मानो अभिमानोऽवज्ञे च परिमाणे च पूजने" इति च "अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः" इति च माया कैतवं रागादय आन्तरीयाः शत्रवः बाह्याः शत्रवः सहोदरादयः आदिशब्देन दुन्दुभ्यादयः सुग्रीववाल्यादयः ते सर्वे शत्रवो रागादय उपायेन परिहर्तव्या इति शेषः ॥४३॥४४

एवं वर्णनोपयोगमाह–यावदिति । नृकायरथं मनुष्यशरीराख्यरथं "रथ गतौ" इति धातोर्ज्ञानसाधनत्वात्तच्छब्दशब्दितं यावदात्मवशोपकल्पं स्ववशत्वेन कल्पितं धत्ते तावद्गरिष्ठचरणार्चनया महापुरुषश्रीपादपूजनेन निशातं धौतं ज्ञानासिं दधदच्युतो बलं यस्य स तथा अक्षरितं बलं यस्य स तथेति वा अस्तशत्रुः निरस्तरागादिशत्रुः स्वाराज्येनैश्वर्येण हृष्टेन तुष्टो विषयालस्बुद्धिमानुपशान्तः पूर्वस्मादाधिक्येनोपात्तभगवन्निष्ठः पुरुष इदं संसाराख्यं हेयत्वेन सर्पनिर्मोकवत् क्लृप्तं वस्तु जह्यादित्यन्वयः ॥ ४५ ॥

इतोऽन्यथाऽस्य मुक्तिरेव न सेत्स्यतीत्याह–नोचेदिति । नोचेदिन्द्रियग्राममात्मवशं कृत्वा ज्ञानासिना संसाराऽनुच्छेदः शब्दादिविषयाभिलाषश्चेद्यदि तर्हि असन्तोषिता इन्द्रियहयबुद्धिसूताः प्रमत्तं रागान्धीभूतचक्षुषममुं रथिनं उत्पथमशास्त्रमार्गं नीत्वा शब्दादिविषयलक्षणेषु दस्युषु दुःखाकारेषु चौरेषु निक्षिपन्ति ते विषयचौराः सहयसूतं इन्द्रियबुद्धिसूतमिमं रथमुरुमृत्युभये तमोलक्षणाज्ञानान्धे चक्षुरविषये संसारकूपे क्षिपन्तीत्यन्वयः॥४६॥

ननु, स्वर्गकामो यजेत" इत्यादिशक्यार्थश्रवणसमनन्तरं तदुक्तकर्मणि प्रवर्तमानदुष्प्रापापारसंसारकूपे पातयन्तीति कथमुच्यते तस्यापि वैदिकत्वेनाङ्गीकार्यत्वादन्यस्य सर्वधर्मपरित्यागस्यावैदिकस्यापि संसारोच्छेदकत्वं च कथं सर्वधर्मान्परित्यज्येति स्मृतेरिति तत्राह—प्रवृत्तं चेति । चः समुच्चये द्विविधमित्यनेनात्यन्तभिन्नविषयत्वं दर्शयति—यद्यप्यनेवंविद् महापुण्यं कर्म करोति "तद्धास्यान्ततः क्षीयते' 'नारायणोऽसौ परमो विचिन्त्यः" इत्यादिना वैदिकत्वाच्च ॥ ४७ ॥

कीदृशं तत्प्रवृत्तं येनाऽनुष्ठितेन पुनरावृत्तिः स्यादिति तत्राह, हिंस्रमित्यादिना । अश्वत्थादिद्रव्यच्छेदनात्मकत्वाद्धिंस्रमशान्तिदं मुक्तिविपरीतफलप्रदम् ॥ ॥ ४८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आहुरिति युग्मकम् । अधर्मोऽत्र धर्मपरित्यागरूपः सन्न्यासः । तदेवं सर्वस्यां रथसामग्र्यां सत्यामपि धनुरादिकं विना वैयर्थ्यमेवेत्याह–धनुर्हीति ॥ ४१—४७ ॥

हिंस्रमिति युग्मकम् । सुरालयादिलक्षणां पूर्तञ्च प्रवृत्ताख्यामित्यर्थः ॥ ४८—५६ ॥

———

[८३]

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदेव देहेन्द्रियादिकं प्रमत्तस्यानर्थहेतुस्तदेवाप्रमत्तस्य योगिनस्त्विष्टसाधनमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकद्वारेणाह–आहुरिति, षड्भिः। इन्द्रियेशं मनोऽभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्तं वृहत् देहव्यापि बन्धुरं बन्धनमाहुः चित्तं विना शरीरमनिबद्धं भवतीति भावः । ईशसृष्टमिति बन्धनकर्त्ता त्वीश इति भावः । ईशसृष्टमिति रथादीनां सर्वेषामेव विशेषणं दशविधं प्राणमक्षम् अभिमानमभिमानमयं जीवं रथिनं पठन्ति. प्रणवं गुरुप्रसादरूपमहामूल्यप्राप्तं धनुः शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः । ननु, तर्हि रथादिरूपकसाहचर्यात् परब्रह्मणोऽपि लक्ष्यत्वेन शत्रुरूपकत्वमायातं शत्रुरेव रथमारुह्य शरेण भिद्यते युज्यते च तस्य जीवशत्रुत्वम् स्वमायाशक्त्या जीवबन्धकत्वात् सत्यम् । "निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन् मुनय उपासते तदरयोऽपि ययुः स्मरणात्" इत्यस्मिन्नुच्चर्येण मुनीनां मुक्तिरिव साधर्म्यं व्यनक्ति उभयेषामपि परमेश्वरं शरनिःक्षेपकत्वात् परमेश्वरस्तु स्वीयवीररससुखोपकारं ज्ञानान्तर्वर्त्तिगुणीभूतस्वभक्तिकलाश्चाऽऽलक्ष्य उभयेभ्य एव तेभ्यो मोक्षं ददातीति केचित् । अन्ये तु परमात्मनो लक्ष्यत्वेऽपि द्रौपद्यादिस्वयंवरस्थमाधारचक्रवर्तिमीनायमानत्वमेव नत्वन्यथा यथा चार्जुनाद्यास्तं स्वबाहुबलेनैव शरेण भित्वा द्रौपद्यादिकां प्रापुस्तथैव ज्ञानिनोऽपि भक्तिबलेनैव मुक्तिमित्याचक्षते ॥ ४१ ॥ ४२ ॥

यथा च स्वयंवरकन्याप्राप्तिप्रतिबन्धकदुष्टराजन्या बलिष्ठेन हन्यन्ते तथैव भगवद्भक्तिबलेन यतिना ज्ञानासिमादाय रागद्वेषाद्या हन्तव्या इत्याह—राग इति, त्रिभिः । रागद्वेषादयो रजस्तमःप्रकृतयः क्वचित् परोपकारादयः सत्त्वप्रकृतयः ॥४३॥४४॥

नृकायरूपं रथम् आत्मवश उपकल्प इन्द्रियादिपरिकरो यस्मिन् तथाभूतं यावद्धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रत् अच्युतभक्तिबलः सन्नेव निरस्तशत्रुर्भूत्वा स्वाराज्यस्य स्वाऽऽनन्दस्य प्राप्त्या तुष्टो भवन्निदं रथादिकं त्यजेदुपयोगाभावादेवेत्यर्थः । अत्र यथासाध्यस्य शत्रुजयस्य स्वाराज्यलाभस्य च सिद्धौ रथादिकात् धनुःशरादिकाच्च पुरुषो वियुज्यते तथा बलात् शरीराच्च वियुज्यते । एवमेव ज्ञानी प्राधानिकादुपाधेर्मुक्तिसाधनाज्ज्ञानाच्च वियुज्य ज्ञानान्तर्भूतया केवलया भक्तिकलया सहित एव परमात्मनि सायुज्यं लभते नतु ततो वियुज्यते तस्याः स्वरूपशक्तिवृत्तित्वेन परमात्मैक्यात् ज्ञानाऽज्ञानयोस्तु मायाशक्तिवृत्तित्वात्तद्द्वयोपेक्षासमुचितैव. अत एव "धनुर्हि तस्य प्रणवं पठन्ति. शरं तु जीवं परमेव लक्ष्यम्" इत्यत्रापि यथा रथादिभ्यो धनुषश्च वियुज्यापि शरः पुरुषबलेन वेगरूपतामापन्नेन सहैव तत्प्रभावादेव लक्ष्यं प्रविशति; तथैव शुद्धजीव देहेन्द्रियाधिकमशुद्धजीवं चाज्ञानस्वरूपामविद्यां त्यक्त्वा मुक्तिसाधनज्ञानकारणप्रणवस्वरूपां विद्यां च त्यक्त्वा अशुद्धजीववर्तिन्या भक्तिकलयैव केवलया सहितस्तद्-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आवादेव परमात्मानं ज्ञात्वा तत्र सायुज्यं लभते । यदुक्तम् भगवता

"ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" ॥

इत्यस्य पद्यद्वयस्यायमर्थः भक्तिमिश्रज्ञानपरिपाकेनोपाध्यपगमे ब्रह्मभूतः अनावृतचैतन्यत्वेन ब्रह्मरूप इत्यर्थः । गुणमालिन्यापगमात् प्रसन्नश्चासावात्मा चेति स ततश्च पूर्वदशायामिव नष्टं न शोचति न चाप्राप्तं काङ्क्षति देहाद्यभिमानाभावादिति भावः । भूतेषु भद्राऽभद्रेषु समः बाह्यानुसन्धानाभावादिति भावः । ततश्च निरिन्धनाग्नाविव ज्ञाने शान्तेऽप्यनश्वरां ज्ञानान्तर्भूतां मद्भक्तिं लभते तस्या मत्स्वरूपशक्तिवृत्तित्वेन मायाशक्तिभिन्नत्वात् अविद्याविद्ययोरपगमेऽप्यनपगमात् अत एव परां निष्कामकर्मज्ञानाद्युर्वरितत्वेन केवलां लभत इति । पूर्वं ज्ञानवैराग्यादिषु मोक्षसिद्ध्यर्थं कलया वर्त्तमानाया अपि सर्वभूतेष्वन्तर्यामिण इव तस्य स्पष्टोपलब्धिर्नासीदिति भावः । अत एव कुरुते इत्यनुक्त्वा लभत इति प्रयोगः । माषमुद्गादिषु मिलितां कालेन तेषु नष्टेष्वप्यनष्टां काञ्चनमणिकामिव तेभ्यः पृथक्तया केवलां लभत इति वत् सम्पूर्णाया: प्रेमभक्तेस्तु तदानीं लाभसम्भावना नैवास्ति नापि तस्या फलं सायुज्यमित्यतःपरांप्रेमलक्षणामिति न व्याख्येयं ननु तया लब्धया भक्त्यातस्य किं स्यादित्यतोऽर्थान्तरोपन्यासेनाह-भक्त्येति । अहं यावान् यश्चास्मि तम्मां तत्पदार्थं ज्ञानी वा नानाविधो भक्तो वा भक्त्यैव तत्त्वतोऽभिजानाति"भक्त्याऽहमेकया ग्राह्यः"इत्यादिमदुक्तेः।यस्मादेवं तस्मात्ततस्तया भक्त्यैव तदनन्तरं विद्योपरमादुत्तरकाल एव मां ज्ञात्वा मां विशते मत्सायुज्यसुखमनुभवति मम मायातीतत्वात् विद्यायाश्च मायात्वात् विद्ययाऽप्यहमगम्य इति भावः यत्तु—

"साङ्ख्ययोगौ च वैराग्यं तपोभक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत्" ॥

इति विद्यावृत्तित्वेन भक्तिःश्रूयते मत्सायुज्य सुखमनु तत् खलु ह्लादिनीशक्तिवृत्तेरेव कला काचिद्विद्यासाफल्यार्थं विद्यायां प्रविष्टा यथा कर्मसाफल्यार्थं कर्मयोगेऽपि प्रविशति तया विना कर्मज्ञानयोगादीनां श्रममात्रत्वोक्तेरतो निर्गुणा भक्तिः सत्त्वगुणमय्या विद्याया वृत्तिर्वस्तुतो न भवतीति किञ्च "सत्त्वात् सञ्जायते ज्ञानम्" इति स्मृतेः । सत्त्वजं ज्ञानं विद्यैव यथा तथा भक्त्युत्थं ज्ञानं भक्तिरेवेति ज्ञानमपि द्विविधं द्रष्टव्यम् ॥ ४५ ॥

अच्युतबलत्वाभावे साध्यं न सिद्ध्येत् प्रत्युताधःपातश्चेत्याह—नोचेत् यदि रथिनो बलं न स्यात् पक्षे जीवस्य यदि भक्तिर्न स्यादित्यर्थः । प्रमत्तं जीवं बलाभावेऽपि लक्ष्यवेधार्थं रथारोहणमेव प्रमादः पक्षे भक्त्यभावे मुमुक्षैव प्रमादः ते दस्यवः रागद्वेषाद्याः ॥ ४६ ॥

ननु, विषयभोगोऽपि शास्त्रेण विहितो न केवलं निषिद्ध एव सत्यम्,अधिकारिभेदात् फलभेदाश्च तत्र व्यवस्थाद्रष्टव्येत्याह-प्रवृत्तमिति, दशभिः । मावर्त्तते गृहस्थः अमृतमश्नुते यतिः ॥ ४७ ॥

हिंस्रं श्येनादिकर्म अशान्तिदं अत्यासक्तिप्रदम् । आदिशब्दार्थं विवृणोति—दर्शश्चेति । पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"आत्मानं रथिनं विद्धि शरीरं रथमेव च"इत्यादि श्रुत्यर्थमुपबृंहयन् श्रीगुरुप्रसादलब्धज्ञानभक्तिभ्यां सुदृढदेहादिसम्पन्नो मुक्तो भवेदिति उपदिशति—आहुरिति, पञ्चभिः । शरीरं रथमिन्द्रियाणि हयान् इन्द्रियेशं मनोऽभीषून् रश्मीन् मात्राः शब्दादिविषयान् वर्त्माणि उल्लङ्घनीयान् देशान् धिषणां बुद्धिं सूतं सत्त्वं चित्तं ईशेन जीवकर्मानुसारिणा सृष्टं बृहद्बन्धुरं पूर्णं बन्धनमाहुः ॥ ४१ ॥

प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयाऽभिधं दशप्राणमक्षम् धर्माधर्मौ चक्रे अभितो देहादौ मानो यस्य तं साधनावस्थावन्तं जीवं रथिनम् प्रणवं भगवन्मन्त्रं धनुः प्रापकं जीवं विमुक्ताभिमानं सिद्धावस्थावन्तं शरं गन्तारं परं पुरुषोत्तमं लक्ष्यं गम्यं पठन्ति. प्रणवादिभगवन्मन्त्रजपभावितो जीवो भगवन्तं प्राप्नोतीति फलितोऽर्थः ॥ ४२ ॥

शत्रूनाह—राग इति । द्वाभ्याम् ॥ ४३ ॥

रजोऽभिनिवेशः सत्त्वप्रकृतयोऽपि बहुपुण्यकर्मप्रवृत्तिकारिण्यो हि साधनावस्थायां हिता अपि ध्याननिष्ठस्य शत्रव एवात आह—सत्त्वप्रकृतयः क्वचिदिति ॥ ४४ ॥

आत्मवशः स्वायत्तः उपकल्प इन्द्रियादिनामकाश्वादिपरिकरो यस्य तथा भूतं नृकायरथं यावद्धत्ते तावदेव गरिष्ठस्य गुरोश्चरणसेवया निशितं ज्ञानखड्गं दधत् अच्युतबलः भगवदनन्यभक्तः जितरागादिः सन् स्वाराज्यतुष्टः भगवद्ध्यानानन्देन तुष्ट इदं संसारं विजह्यात् मुक्तो भवेदित्यर्थः ॥ ४५ ॥

गुरुचरणसेवालब्धज्ञानभक्त्यभावे संसारनिवृत्तिर्न स्यादित्याह—नोचेदिति । असन्तो भगवद्ज्ञानभक्त्यनुपयुक्ताः ये इन्द्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयदस्युषु निक्षिपन्ति ते दस्यवस्तु अमुं रथिनम् उरु मृत्युभयं यत्र तस्मिन् तमोऽन्धे तमसा व्याप्ते संसारकूपे क्षिपन्ति ॥ ४६ ॥

एवं भगवद्ज्ञानभक्तिसम्पन्नो मुक्तो भवेत्तदसम्पन्नः संसारं प्राप्नोतीत्युक्तम् । अथ प्रवृत्तकर्मनिष्ठतया तस्यैव भगवज्ज्ञानभक्तिहीनस्य धूममार्गेणावृत्त्या संसारं निवृत्तकर्मनिष्ठतया तस्यैव भगवज्ज्ञानभक्तिसम्पन्नस्यार्चिरादिमार्गेणमुक्तिं चाह—प्रवृत्तमिति, दशभिः । अमृतं मोक्षम् ॥ ४७ ॥

प्रवृत्तं कर्माह—हिंस्रमिति, द्वाभ्याम् । हिंस्रं श्येनादिकर्म पशुशब्दः पशुयागपरः सुतः सोमयागः ॥ ४८ ॥

भाषा टीका ।

बुधजन इस शरीर को ईश्वर का बनाया हुआ रथ कहते हैं, इसमें इन्द्रियें घोडे हैं, इन्द्रियों का ईश अर्थात् नियन्ता एसा मन वागडोर है, विषयों की वासनायें गमन के मार्ग हैं, अथवा प्रदेश हैं बुद्धि सारथी है और चित्त इसका बन्धन है ॥ ४१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ।
पूर्त्तं सुरालयाऽऽरामकूपाऽऽजीव्यादिलक्षणम् ॥ ४९ ॥
द्रव्यसूक्ष्मविपाकश्च[१] धूमो रात्रिरपक्षयः ।
अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥
अन्नं रेत इति क्ष्मेश ! पितृयानं पुनर्भवः ।
एकैकश्येनानुपूर्वं[२] भूत्वा भूत्वेह जायते ॥ ५१ ॥
निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ।
इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥
इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ।
वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ।
ओङ्कारं बिन्दौ नादे[३] तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥
अग्निः सूर्यो दिवा प्राह्णः[४] शुक्लो राकोत्तरं स्वराट् ।
विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥

भाषा टीका ।

और दशों प्राण अक्ष अर्थात् धुरी हैं अधर्म और धर्म ये दोनों चक्र (पहिये) हैं, उसमें अभिमानी जीव चढने वाला रथी है, इसका प्रणव (ओंकार) ही धनुष है और शुद्ध जीवस्वरूप ही बाण है, और लक्ष्य (निशाना) परमेश्वर है अर्थात् जैसे बाण निशाने में लगता है ऐसे ही जीव को परमेश्वर में लगना चाहिये ॥ ४२ ॥

राग, द्वेष, लोभ, शोक, मोह, भय, मद, मान, अवमान, असूया, माया, हिंसा, मत्सर, ॥ ४३ ॥

रजोगुण, प्रमाद, क्षुधा, निद्रा, ये सब जीतने के योग्य इसके शत्रु हैं। और रजोगुणी तमोगुणी प्रकृति तथा कचित् सतोगुणी प्रकृति भी शत्रु है ॥ ४४ ॥

जब तक मनुष्य देह रूप रथ अपने वश का और समर्थ है तब तक ही गुरुजनों के चरणों की सेवा से तीक्ष्ण ज्ञानरूप खड्ग को धारण कर परमेश्वर के बलका आश्रय लेकर सर्व शत्रुओं का अस्त (नाश) कर उपशांत होकर ब्रह्मानन्द में मग्न होकर इस रथादिक की उपेक्षा कर देवै ॥ ४५ ॥

यदि अच्युत अर्थात् अपने भक्त के कार्य से कभी न चूकने वाले श्रीगोविन्द के बल का आश्रय न लेवेगा तो दुष्ट इन्द्रियरूप-घोडे और बुद्धि रूप सारथि ये सब इस रथी को उत्पथ अर्थात् कुमार्ग में लेजाकर बिषयरूप चोरों में छोड देते हैं। वे चोर, घोडा और सारथि सहित इस रथी को बडे मृत्यु के भय वाले संसार रूप घोर अंधकूप में डाल देते हैं ॥ ४६ ॥

वैदिक कर्म दोप्रकार का है एकप्रवृत्तकम, दूसरा निवृत्तकर्म तहां प्रवृत्तकर्म के आचरण से फिर पुनरावृत्ति होती है, और निवृत्ति प्रधान कर्म के आचरण से अपुनरावृत्ति पूर्वक अमृत (मोक्ष) को प्राप्त होता है ॥ ४७ ॥

हिंसा प्रधान श्येनयागादि द्रव्यमय काम्य अग्नि होत्रादि ये अशांतिप्रद है, और दर्श, पौर्णमास, चातुर्मास्य पशुयोग सोमयाग ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

हुतं वैश्वदेवम् प्रहुतं बलिहरणम् एतत्सर्वमिष्टमुच्यते एतदेव यदि काम्यमशान्तिदञ्च तर्हि प्रवृत्ताख्यमपीत्यर्थः । आजीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह, द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहान्तरारम्भको येन-सम्परिष्वक्तो गच्छति य एव श्रुतौ अप्शब्देनोक्तः "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति पाठान्तरे द्रव्य-शब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः तथा च श्रुतिः "स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्वक्रामदिति तथा तस्य हैतस्य हृदयाग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभिमा-

(१) द्रव्यमूष्मविपाकश्च (२) एकैकश्याऽनुपूर्व्यांच (४) दिवा वायुरिति विज० पा०। (३) बिन्दुनादं तु. इति विज० वीर० पा०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवयानामिदं प्राहुर्भूत्वा भूत्वाऽनुपूर्वशः ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्त्तते ॥ ५५ ॥
य एते पितृदेवानामयने वेदनिर्म्मिते ।
शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऽभिन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारमाह—दर्श इत्यादि, विपरीत लक्षणया विशिष्टभोगक्षयशोकाग्निना देहलयेनादर्शनमुच्यते एतदुक्तं भवति भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधिवीरुधादिसाम्यापत्तिक्रमेण जायते एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ॥ ५० ॥

क्षमेश, हे भूपते ! पुनर्भवमेवाऽऽह—एकैकश्येन प्रत्येकं क्रमेण भूत्वा तत्तत्सान्निध्यं प्राप्येह भूमौ जायते ॥ ५१ ॥

तत्राधिकारिणमाह—निषेकादीति । अन्यत्त्विष्टादिकार्येष्वेवं जन्म लभत इत्यर्थः । निवृत्तकर्मनिष्ठस्योपासनादिविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह—इन्द्रियेष्वित्यादिना । यद्वा द्रव्ययज्ञेषु हिंसाया दुर्निवारत्वादतिमुख्यं निवृत्तं कर्मैव दर्शयन्नाह—ज्ञानेन दीप्यन्त इति तथा तेषु इन्द्रियव्यापारणामिष्टापूर्त्तादीनामिन्द्रियतावन्मात्रतां भावयन्तीत्यर्थः । एवमुत्तरत्रापि ॥ ५२ ॥

ऊर्मौ दर्शनादिसङ्कल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विद्यादिलक्षणया वाचा हि मनः कर्तृत्वादिविकारं भजति. वर्णानां समाम्नाये समुदाये तद्विशेषत्वाद्वाचः स्वरे अकारादिस्वरत्रयात्मके ओङ्कारं विन्दौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि ॥ ५३ ॥

अग्निरिति तत्तदभिमानिन्यो देवतास्ताः प्राप्नोतीति पूर्ववत् दिवाऽहः प्राह्णस्तस्यैवान्तः राका शुक्लपक्षस्यान्तः यद्वा प्राह्णो राका इति च पुराणमतम् उत्तरं त्वयनम् स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह—विश्व इति । विश्वः स्थूलोपाधिः सस्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति तेषां च व्यभिचारिणां साक्ष्याणां लये शुद्ध आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

यथेतरो भूत्वा निवर्तते तथा न निवर्तत इत्यर्थः ॥ ५५ ॥

वेदेन निर्मिते "ते धूममभिसम्भवन्ति" इत्यादिना "ते अर्चिरभिसम्भवन्ति" इत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः । जनस्थोऽपि देहस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हुतं वैश्वदेवं प्रहुतं बलिहरणं तदेतत्सर्वं वैदिकं कर्म इष्टमिष्टाख्यम् यद्यतदेव कर्म हिंस्रद्रव्यमयं हिंसा विषयद्रव्यप्रचुरम् । हिंस्रामिति पाठे पश्वादिहिंसागर्भं पुरोडाशादिद्रव्यप्रचुरं च काम्यं स्वर्गादिकामार्थमशान्तिदं पूर्वोक्तरागाद्यनिवृत्तिदं स्यात्तदा प्रवृत्ताख्यमकाम्यं शान्तिदं स्यात्तदा निवृत्ताख्यमित्यर्थः । अथ पूर्त्तसंज्ञकं कर्माह—पूर्त्तमिति । देवालयादिनिर्माणरूपं कर्मपूर्त्तम् आजीव्यमाजीविका ॥ ४९ ॥

तत्र प्रवृत्तिधर्मपरायणस्य त्रैवर्णिकस्य तत्फलानुभवाय लोकान्तरारोहणमार्गं फलानुभवाऽवसाने ततः पुनरवरोहणमार्गमेवं सञ्चरतो भूतसूक्ष्मपरिष्वक्तत्वं चाह—द्रव्येत्यादिना, सार्द्धद्वयेन। निषेकादिश्मशानान्तैः गर्भाधानादि श्मशानान्तैः संस्कारैः संस्कृतो द्विजस्त्रैवर्णिकः इष्टापूर्त्तदत्तकारी देहत्यागानन्तरं द्रव्यसूक्ष्मविपाकः द्रव्याणां पृथिव्यादिभूतानां सूक्ष्मा विपाकाः सूक्ष्मावस्थाः यस्य सूक्ष्मावस्थपृथिव्यादिभूतयुक्तः भूतसूक्ष्मपरिष्वक्त इति यावत् हे क्षमेश, पृथिवीपते ! धूमादयः शब्दास्तदभिमानिदेवतापरा तत्र अपक्षयः अपरपक्षः अयनं दक्षिणं दक्षिणायनं सोमश्चन्द्र इति शब्दः प्रत्येकमन्वेति । धूम इति रात्रिरिति तानेकैकश आनुपूर्व्येण भूत्वा भूत्वा । भूप्राप्तावात्मनेपदीति भवतिरत्र प्राप्त्यर्थकः प्राप्य प्राप्येत्यर्थः । धूमादिक्रमेण चन्द्रं प्राप्य तत्रामृतमयशरीरयुक्त इष्टादिकर्मफलमनुभूय ततः दर्शः दर्शस्य चन्द्रकलाक्षयहेतुत्वादिना दर्शशब्देन चन्द्रं प्राप्तस्याऽमृतमयशरीरनाशो लक्ष्यते विनष्टामृतमयशरीर इत्यर्थः । चन्द्रमसः स्थानात् क्रमेणौषध्यादीन् प्राप्येह लोके जायते एतच्च पितृयानं पुनर्भवहेतुरित्यर्थः । यद्वा चन्द्रपर्यन्तं पितृयानं ततो रेतः पर्यन्तं पुनर्भवयानमित्यर्थः । तत्र दक्षिणायनसोमयोर्मध्ये पितृलोकः आकाशश्च द्रष्टव्यः ओषधेः पूर्वं क्रमेणाकाशवायुधूमाभ्रमेघवर्षाणि द्रष्टव्यानि तत्रारोहणं धूमराज्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण, अवरोहणन्तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघवर्षौषधिवीरुदन्यतरान्नरेतःक्रमेणेत्यर्थः । तथा च श्रूयते छान्दोग्ये "अथ य इमे ग्रामे इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणेति मासांस्तानेवैते सम्वत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवाभक्षयन्ति तस्मिन् यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इह व्रीहियवा ओषधिवनस्पतयास्तिलमाषा जायन्तेऽतो वै खलुदुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिंवा चण्डालयोनिंवा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिंवा चाण्डालयोनिं वा" इति. तत्रारोहणदशायां धूमाद्यभिमानिदेवतालोकगमनमेव धूमादिभावः,अवरोहणे त्वाकाशवायुधूमाभ्रमेघवर्षेषु तद्भावोनाम तत्संसर्गकृततत्साहश्यापत्तिरेव "तस्वाभाव्यापत्तिरुपपत्तेः३।१।२२। इति शारीरकन्यायात् व्रीह्यादिभावोनाम जीवान्तराधिष्ठितव्रीह्यादिसंश्लेषमात्रम् "अन्याधिष्ठिते पूर्ववदभिलापात्३।१।२४। इति न्यायात् एवंवान्वयः। द्रव्यसूक्ष्म विपाक इनि. द्रव्यसूक्ष्मविपाकादय इत्येते सोमपर्यन्ताः पितृयानं दर्शादयो रेतःपर्यन्ताः पुनर्भवः गर्भाधानादिश्मशानान्तैः संस्कृत इष्टाधिकारी आनुपूर्व्यात्क्रमेण भूत्वाभूत्वा रात्र्यादीन् प्राप्य प्राप्य पुनरिह जायते इति ॥ ५० ॥ ५१ ॥

अथापुनर्भवं देवायानं वक्तुं तेन जिगमिषोर्निवृत्तधर्मनिष्ठस्य तावत् कृत्यमनुसन्धानमाह-इन्द्रियेष्विति द्वाभ्याम्।ज्ञानदीपेषु ज्ञानदीपकेषु चक्षुरादीन्द्रियेषु क्रियायज्ञान्कर्मेन्द्रियव्यापारान् जुहति देवयानेन जिगमिषव इति शेषः। चक्षुरादिभिर्ज्ञानेन्द्रियैः पाणिपादादिकर्मेन्द्रियाणि नियच्छेयुरित्यर्थः। इन्द्रियाणि चक्षुरादीनि ज्ञानेन्द्रियाणि सङ्कल्पविकल्पादिरूपोर्मिमति मनसि जुहति मनसा तानि नियच्छेयुरित्यर्थः। वैकारिकं सत्त्वोत्तरं वाचि शास्त्रात्मिकायां मनः मनसः उच्छास्त्रप्रवर्त्ति निरुंध्यादित्यर्थः। वाचं वर्णसमाम्नाये पञ्चाशदक्षरात्मिकामनुसन्दधीरन् वर्णसमाम्नायमोङ्कारेऽन्तर्गतं विदुः तमोकारं विंदुनादे चतुर्थ्यां मात्रायां बिन्दुनादञ्च प्राणे प्राणसहचारिणि मकारवाच्ये जीवे वाचकत्वेनान्तर्भावयेयुः। अमुं जीवं महति महदात्मनि परब्रह्मणि समर्पयेयुरिति मुमुक्षोरनुसन्धानप्रकारउक्तः ॥ ५२ ॥ ५३ ॥

अथ तस्य गतिहेतुभूतमर्चिरादिमार्गमंशतो दर्शयति-अग्निरिति। अग्न्यादिशब्दास्तदभिमानिदेवतापराः अत्र न क्रमविवक्षा श्रौतक्रमविरोधात् ननु सूर्योऽग्नेरनन्तरं दिवसादिभ्यः पूर्वं श्रूयते किन्त्वेवम् "तद्यइत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यः संवत्सरं सम्वत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो ऽमानवः स एनान् ब्रह्मगमयत्येष देवयानः पन्थाः" इति। अत्र सम्वत्सरादनन्तरं वायुं विद्युतोऽनन्तरं वरुणेन्द्रौ च जानीयात् कौषीतकिब्राह्मणे "एतं देवायानं पन्थानमापद्याऽग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकम्" इति श्रवणात्. स्वराडत्रामानवः प्रजापतिर्वा अयं च सकलश्रुत्यविरोधेन निर्णीतः क्रमो वरदगुरुभिरभिहितः "अग्निरहःसितपक्षात् उदगयनाब्दमरुदर्कैन्दून्। अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः" इति. पूर्वान्होराका चानधीतशाखान्तरेष्वामन्तव्यौ उत्तरम् उत्तरायणम् एवं मुक्तप्राप्यभगवल्लोकमार्गो दर्शितः तत्र प्राप्यस्य भगवतश्चतुर्व्यूहविशिष्टतामाह—विश्व इति। यथा सर्वज्ञसंहितायाम् "सृष्टिस्थित्यन्तकारिण्यः शक्तयस्तत्र ऊर्जिताः" इत्युपक्रम्य—

"अकारशक्तिर्विश्वाख्या उकाराख्या तु तैजसी।
मकारशक्तिः प्रज्ञाख्या तासां रूपं पुनःशृणु"॥

इत्यादिना जाग्रदाद्यवस्थान्वयादिकमुक्त्वा—

"एतास्तिस्रो दशास्तिस्रः शक्तीः संप्रीणयन्ति ताः।
अनिरुद्धादिरूपास्ताः भोक्तुः शक्तीर्विचिन्तयेत्॥
अर्द्धमात्राऽधिया दिव्याऽप्रकाशार्थप्रकाशिका।
वासुदेवमयीं शक्तिं विद्धि तामनुपस्कृताम्"॥ इत्युक्तम्।

अतः सृष्ट्यधिष्ठाता जाग्रदवस्थानिर्वाहकोऽनिरुद्धो विश्वः स्थित्यधिष्ठाता स्वप्ननिर्वाहकः प्रद्युम्नस्तैजसः संहृतिशक्त्यधिष्ठाता सुषुप्तिनिर्वाहकः संकर्षणः प्राज्ञः एते चाऽकारोकारमकारवाच्याः। सर्वकारणभूतः सर्वशक्तिर्मोक्षप्रदः प्रणवार्थमात्रावाच्यो वासुदेवस्तुर्यश्चतुर्थमात्रासहितप्रणवस्य पूर्वमनुसन्धेयतया प्रकृतत्वादेवं तस्यार्थः फलदशायां प्राप्यतयोक्तः। इदं प्रदर्शनार्थमुक्तम्। परव्यूहविभवादिसर्वाऽवस्थाविशिष्टो भगवान् मुक्तप्राप्य इत्यर्थः। समन्वयात्सर्वेषां व्यूहादीनां प्राप्यान्तर्भावादित्यर्थः ॥ ५४ ॥

इदं देवायानं प्राहुर्वेदान्ता इति शेषः। आत्मयाजी परमात्मोपासकः अनुपूर्वशः क्रमेणाऽर्चिरादीन् प्राप्य उपशान्तः निःशेषनिवृत्त आत्मा प्रकृतिर्यस्य तादृशः आत्मनि परमात्मनि स्थितः आधेयतया स्थितः आत्मन्याविर्भूतापहतपाप्मत्वादिगुणाष्टकयुक्त ब्रह्मात्मके स्वस्वरूपे स्थितः उक्तविधब्रह्मशेषत्वेनात्मानमनुभवन्नित्यर्थः। पुनस्ततो न निवर्त्तते एवं देवयानपथगोभूत्वा न निवर्त्तते जन्ममरणादिकं तद्धेतुभूतपुनरावृत्तिं च न प्राप्नोतीत्यर्थः ॥ ५५ ॥

"नैते सृती पार्थजानन्योगी मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जन!"॥

इति श्रीभगवदुक्तमार्गद्वयचिन्ताफलमाह-य एत इति। यः पुमान्मुमुक्षुर्वेदनिर्मिते वेदबोधिते एते पितृदेवानां अयने वर्त्मनी देवयानपितृयाने शास्त्रात्मकेन चक्षुषा वेद सोऽपि पुमान्नमुह्यति जनस्थोपीऽति पाठे, देहस्थोऽपीत्यर्थः। स्वानुष्ठेयभगवद्भक्तियोगेन मोहं न प्राप्नोतीत्यर्थः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

हुतं वैश्वदेवं प्रहुतं हुत्वा बलिहरणमेतद्द्वयमिष्टं सुरालयादिविपाकान्ताः पूर्तम् आजीव्याः सर्वसेव्याः कुट्टिममूला विस्तृतशाखाः तरवः ॥ ४९ ॥

द्रव्यसूक्ष्मविपाकः पुरोडाशादिद्रव्यजनितापूर्वं फलं धूम इत्यादिना धूमादिशब्दवाच्यादेवताश्चाऽत्र गृह्यन्ते इति ज्ञातव्यम् अपक्षयः कृष्णपक्षः सोमश्चन्द्रः पर्वदर्शशब्देन तत्प्रयुक्तकर्मविशेषो ऽत्र तु तदभिमानिदेवा उच्यन्ते. अनेन मार्गेण गतस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गतिप्रकारमाह—ओषधीति । पितृयानं गतः अम्बुवृष्ट्यादिद्वारेण भुवं प्राप्तः ओषध्यादिर्भवति ॥ ५० ॥

अन्नरूपेण पितरं प्रविश्य रेतोरूपेण मातरं चेति पुनः पुनर्भवतीति पुनर्भवः, स्यादिति शेषः । न केवलमोषध्यादिभावोऽस्य, किन्तु धूमादिभावोऽप्यस्तीति भावेनोक्तं विशदयति—एकैकस्येति । अत्रानुपूर्व्यात्क्रमात् । "अथ इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति"इत्युपक्रम्य 'यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्रूप एव भवत्यन्ते" अनेनायमर्थः प्रपञ्च्यते ॥५१॥

अत्र च "त इह रमणीयचरणाभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा" इत्यादेरभिप्रायं दर्शयति—निषेकादीति । निषेको रेतःसेकः अनेनापि पुनर्भव इत्यस्य भावो विवृत इति ज्ञायते देवयानापरपर्यायार्चिरादिमार्गाभिमानिदेवचक्रं वदिष्यंस्तन्मार्गगतावित्थंभूतसाधनमाह—इन्द्रियेष्विति । क्रियायज्ञान् क्रियात्मकयज्ञाभिमानिदेवान् ज्ञानं दीपयन्ति जनयन्तीति ज्ञानदीपानि ज्ञानमेव दीपो येषां तानि तथा तेष्विन्द्रियेष्विन्द्रियाभिमानिदेवेषु जुह्वति हवनं नाम तत्तद्वशत्वेन स्मरणं, तदुक्तम्—

"यज्ञाभिमानिनो देवान् स्मरन्तीन्द्रियमानिनम् ।
वशगांस्तान्मनो मानिसुरेन्द्रस्य वशे स्थितान् ॥
वेदात्मिकायाः पार्वत्यास्तं तां रुद्रवशे स्थिताम् ।
वर्णत्रयात्मकं रुद्रं शेषे तु प्रणवात्मके ॥
विन्दुरूपे सरस्वत्यां तं तां तस्यां पुनर्न्यसेत् ।
मूलस्थनादरूपायां तां वायौ तं जनार्दने ।
प्रकृत्यामथवा प्राणं तामेव पुरुषोत्तमे" ॥

इति ॥ ५२ ॥

इन्द्रियाणि तदभिमानिदेवान्मनसि मनोभिमानीन्द्रवशे तानेवं पूर्ववत्स्मरन्तीति शेषः । विशिष्टाकारपराक्रमलक्षणां कर्मास्यास्तीति वैकारिकं मनो ऽभिमानिनमिन्द्रं वाचि वेदाभिमानिन्यां पार्वत्यां तामुमां वर्णसमाम्नाये पदवर्णस्वरक्रमाणां सम्यगाम्नायः सम्प्रदायो ऽनन्यथापाठलक्षणो यस्मिन् स तथा अकारोकारमकाराणां त्रयाणां वर्णानां समाम्नायो मेलनं यस्मिन् ओंकारे स तथा तस्मिन् तदभिमानिनि रुद्रे स्थितामिति शेषः । तुशब्देन भार्याभर्तृभावं पूर्वस्माद्विशिनष्टि; तं रुद्रम् ओङ्काराभिमानिनि स्वं परमात्मानं रमयतीति स्वरः शेषः तस्मिन् स्थितं न्यसेत् मनस्तद्विषयं करोति ॥ ५३ ॥

तमोङ्कारं शेषं विन्दुनादे विन्दुनादरूपसरस्वत्यां तदाधारत्वेन स्थितं तुशब्देन पूर्वयोरेकत्र त्वमत्र स्वस्वामिभावं सूचयति–तां विन्दुरूपां मूलाधारस्थनादरूपायां प्रकृतिनाम्न्यां सरस्वत्यामेकीभूय स्थितिशब्देन तयोरेकत्वं दर्शयति—तं तां नादरूपां प्राणं प्रकृष्टानन्दरूपे वायौ स्थिताम् अत्रापि तुना भार्याभर्तृभावमाह—मधुं वायुं महति जनार्दने स्थितं स्मरेत् अथवा प्राणनामानं, वायुं महति प्रधाने प्रकृतिशब्दवाच्ये स्थितं अमुमक्षरं प्रकृतिनामानं महति पुरुषोत्तमे स्थितमिति महति शब्दो द्विरावृत्त्या व्याख्येयः एतत्सर्वं विन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत् इत्यादिपूर्वोक्तेन मानेन सविस्तरमुक्तम्. इदानीमर्चिरादिमार्गे देहादुत्क्रान्तस्य ज्ञानिनः प्राप्यान् देवानाह—अग्निरिति । दिवा दिवसाभिमानी शुक्लः शुक्लपक्षाभिमानी राका पूर्णमास्यभिमानिनी उत्तरमुत्तरायणाभिमानिनी स्वराडिन्द्रः ॥ ५४ ॥

अत्र न केवलमग्न्यादय एव प्राप्याः, अपि तु विश्वाद्या अनिरुद्धाद्या भगवतो मूर्तिविशेषाश्च प्राप्या इत्याशयेनाह—विश्व इति । अथशब्देनाऽनिरुद्धादिग्रहणं तेषामुभयेषां विष्णुरूपत्वं सूचयति,

"विश्वाद्या अनिरुद्धाद्यास्त द्विधा संप्रकीर्तिताः ।
विष्णुरूपास्तदन्ये च तान्सर्वान्याति मोक्षगः" इत्युक्तेः

किञ्चान्ये च दिवस्पुत्रास्तन्निकटवर्त्तिनः सन्ति ते ऽप्यथशब्देन सूचिताः—

"तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः ।
ते दिवं प्रापयन्त्येनं स वायुं स हरिं पृथक् ॥
विश्वादिरूपं तुर्यश्च वासुदेवश्च नापरः" ।

इत्युक्तेः गतिक्रमोऽप्यनेन ज्ञातव्यः । न परं विश्वादिकमेवाप्तव्यं किन्तु तन्मूलरूपो हरिराप्तव्य इत्याह—आत्मेति । आत्मा विश्वादिरूपो हरिः सम्यगन्वीयते अनेन ज्ञानेनेति समन्वयः तदुक्तं स हरिं पृथग्विश्वादिरूपमिति वासुदेवो तुर्यादन्यो नेत्याह—तुर्य इति । तुर्य आत्मा वासुदेवः "अत सातत्यगमने" इति धातोः सततगमनं व्याप्तिः "यश्चाऽस्य सततोभावः" इति श्रुतेः सर्वत्र वसनशीलत्वात् क्रीडारूपत्वात् जपाकुसुमाद्युपाध्यनाविद्धस्फटिकवन्निर्मलज्ञानरूपत्वाद्वासुदेवः—

"शुद्धस्फटिकसंकाशं वासुदेवं निरञ्जनम्" इति स्मृतिः ।
ऐकात्म्यप्रत्ययं सारं प्रपञ्चोपशमं शिवम् ।
अद्वैतं तुर्यं मन्यन्ते स आत्मा स विज्ञेयः" ॥ इति स्मृतेः

तुर्यश्च वासुदेवश्च नापर इति च किञ्च मार्गस्थानां सर्वेषां देवानामपि परमात्मनि समन्वयो ऽस्तीति ज्ञापनाय समन्वय इत्युक्तम् एतस्य नाम निर्दिशति । देवयानमिति । "संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च' इत्यारभ्य 'एतस्मान्न पुनरावर्तन्त इत्येष निरोधः" इत्यन्तं वेदान्ताः प्राहुरित्यन्वयः । अस्यफलमाह भूत्वेति । अनुपूर्वशः क्रमेणोपर्युपरि सुखादिभिरधिको भूत्वात्मशो मुक्तो न निवर्तत इत्यन्वयः कुत आत्मयाजी परमात्मपूजकत्वात् पुनरावृत्तीच्छापि तस्य नास्तीति भावेनाह, उपशान्तात्मेति पूर्णानन्दस्वरूपः धूमादिमार्गवदस्यापि पुनरावृत्तिभीरस्ति किमित्यतो भूत्वेति ॥ ५५ ॥

ननु, किमेतज्ज्ञानेन प्रयोजनम् ? येनावश्यं वक्तव्यतामियादिति तत्राह–य एत इति । अनस्थो देहस्थः "तद्य इत्थं विदुर्ये चामरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति"इत्यादिना शास्त्रेण न केवलं मोहं प्राप्नोति नीचां गतिमपि न यातीत्यतोऽपीत्युक्तं "भक्तिरान्मार्गविन्नैव नीचां गतिमवाप्नुयात्"इतिस्मृतेः ॥ ५६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हुतं वैश्वदेवं प्रहुतं बलिहरणम् एतत् सर्वमिष्टमुच्यते आजीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह—द्रव्येति। सोमपर्य्यन्तम् आरोहणे सोपानानि दर्शयति—प्रथमं द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामः देहान्तरारम्भकः येन परित्यक्तां गच्छति य एव श्रुतावपशब्देनोक्तस्तं प्रथमं प्राप्नोति तथा हि "इह तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति. द्रव्यसूक्ष्मविपाकश्चेति पाठे द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः तदाच स्वकर्मसाध्य । तानीन्द्रियाणि प्रथमं प्राप्नोति ततो निर्याणकाले हृदयाग्रप्रद्योतं प्राप्नोति ततो धूममित्येव क्रमः । तथा च श्रुतिः "य इमास्तेजो मात्राः समभ्याददानो हृदयमेवानुचंक्रमति" तथा च इति तस्य "हैतस्य हृदयस्याग्रं प्रद्योतते तेनैवात्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभिमानिन्यो देवता उच्यन्ते ततो धूमाभिमानिनीं देवतां प्राप्नोति ततो रात्र्यभिमानिनीमित्येवं अपक्षयः कृष्णपक्षः सोमः चन्द्रलोकः धूमाद्यातिवाहिकदेवताभिः सोमं लोकं प्रापितो भोगान् भुङ्क्त इत्यर्थः । तत्र भुक्तभोगस्य तस्यावरोहप्रकारमाह—दर्श इति। चन्द्रक्षयवत्या अमावास्यया भोगदेहक्षयो लक्षितः ततो वृष्ट्यादिद्वारेण ओषधिवीरुधादिः ॥ ५० ॥

ततोऽन्नं तदेव भुक्तं रेतः हे क्ष्मेश ! उक्तमवरोहप्रकारं व्याचष्टे—एकैकश्येनेति। क्रमेणौषध्यादिकं भूत्वेत्यर्थः ॥ ५१ ॥

तत्र मुख्यं कर्माधिकारिणमाह—निषेकादिष्विति। प्रवृत्तकर्मनिष्ठमुक्त्वा निवृत्तिकर्मनिष्ठस्यार्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह, इन्द्रियेषु ज्ञानेन दीप्यन्ते इति तेषु क्रियायज्ञान् जुहोति इष्टापूर्त्तादीनां क्रियायज्ञानाम् इन्द्रियव्यापारमयत्वादिन्द्रियतावन्मात्रतां भावयतीत्यर्थः। एवमुत्तरत्रापि ऊर्मौ शोकमोहादितरङ्गात्मके तादृशं मनो वाचि विध्यवाद्यादिलक्षणायां तयैव मनः कर्त्तृत्वादिविकारवद्भवतीत्यर्थः। वर्णानां समाम्नाये समूहे तद्विशेषत्वाद्वाचः स्वरे स्वरत्रयात्मके तञ्च विन्दुं नादे तञ्च नादं प्राणे सूत्रात्मनि अमुं प्राणं महति ब्रह्मणि ॥ ५२ ॥ ५३ ॥

अग्निरिति तत्तदभिमानिन्यो देवताः ताः प्राप्नोतीति पूर्ववत् दिवा अहः अन्हः तस्यैवान्तः शुक्लः शुक्लपक्षः राका तस्यैवान्तः उत्तरमुत्तरायणं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य तस्य भोगावसाने मोक्षप्रकारमाह—विश्वः स्थूलोपाधिः स्थूलं सूक्ष्मं प्रविलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं च कारणे प्रविलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात् साक्षिस्वरूपे विलाप्य तुर्य्यं आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

अर्चिरादिमार्गस्थो भूत्वा अनुपूर्वशः आनुपूर्व्यक्रमेण ॥५५॥

वेदेन निर्मिते "तेऽर्चिषमभिसम्भवन्ति" इत्यादिना "तेऽर्चिरभिसम्भवन्ति" इत्यादिना च जनस्थोऽपि देहस्थोऽपि ॥ ५६ ॥

——- —

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हुत वैश्वदेव प्रहुतं बलिहरणमितीष्टम् पूर्त्तन्तु सुरालयादि तत्राजीव्यं जलान्नदानादि एतत् प्रवृत्ताख्यम् भवति ॥ ४९ ॥

प्रवृत्तकर्मफलं जन्ममरणलक्षणं संसारं धूममार्गारोहावरोहाभ्यां दर्शयति—द्रव्येत्यादिद्वाभ्याम् । द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देवादिदेहारम्भको भूतसूक्ष्मात्मकस्तेन तदावृतो जीवो लक्ष्यते धूमादिशब्दैस्तत्तदभिमानिन्यो देवताः बोध्याः अपक्षयः कृष्णपक्षः सोमः सोमलोकः भूतसूक्ष्मावृतो जीवः धूमाद्यातिवाहिकदेवताभिः सोमलोकं नीतो भोगान्भुङ्क्ते स पुनर्भोगावसाने यथेह देहं प्राप्नोति तथा ऽवरोहप्रकारं सूचयति, दर्श इति। दर्शे चन्द्रो यथा अदृश्यो भवति तथा अदृश्यः विलीनदेवदेह इत्यर्थः। उपमादीनां लोपादत्र लुप्तोपमालङ्कारः ततो मेघादिद्वारा ओषधिवीरुधः ओषध्याद्याश्लिष्टो भवति ॥ ५० ॥

ततोऽन्नं भवति अन्नसंश्लिष्टो भवति ततो रेतो भवति अन्ने पितृभुक्ते तद्वीर्यसंश्लिष्टो भवति एवमेकैकस्यैव प्रत्येकं क्रमेणाऽनुपूर्वं भूत्वा भूत्वा तत्तत्संश्लेषं प्राप्य इह मातृयोनौ जायते हे क्ष्मेश ! इति पितृयानं पुनर्भवोपलक्षितजन्ममरणप्रवाहलक्षणसंसारहेतुरित्यर्थः ॥ ५१ ॥

तदधिकारिणमाह—निषेकादीत्यर्द्धेन। अथ निवृत्तकर्मनिष्ठा देवयानेन परब्रह्मभावापत्तिलक्षणं मोक्षं प्राप्नुवन्तीति वक्तुं तेषां स्थूलदेहत्यागवेलायां यत्कृत्यं तदाह—इन्द्रियेष्विति, द्वाभ्याम् । ज्ञानेन जीवेन दीप्यन्ते इति तथा आत्मप्रकाशितेषु इत्यर्थः। क्रियायज्ञान् क्रिया मुमुक्षुयोग्यं प्रत्यहमनुष्ठेयं निवृत्तं कर्म तद्रूपान् यज्ञान् भगवदाराधनात्मकान् जुहोति इन्द्रियायत्तान् भावयन्ति ॥ ५२ ॥

इन्द्रियाणि ऊर्मौ इन्द्रियाणां प्रवर्त्तकं ऊर्मिरूपं तत्तत्सङ्कल्परूपं यन्मनस्तस्मिन् वैकारिकम् ऊर्मिरूपं मनः वाचि उपदेशविधौ मनसो नियोजकायां च वर्णसमाम्नाये वेदे तं स्वरे ओङ्कारे ओंकारं विन्दौ तन्नादे तं प्राणे भगवन्निश्वासे ऽमुं प्राणं वेदस्य पूर्वरूपं महति "एतस्यैव महतो भूतस्य निश्वसितं यदृग्वेदः" इत्यादिश्रुतिप्रोक्ते परे ब्रह्मणि जुहतीत्यन्वयः ॥ ५३ ॥

अथैवंविधा येन मार्गेण भगवन्तं प्राप्नुवन्ति तमेकदेशकथनतः सूचयति—अग्निरित्यर्द्धेन। अग्निः सूर्यः दिवा दिनाभिमानी देवः प्राह्णस्तस्यैवान्तस्तदन्तर्गत एव बोध्यः शुक्लपक्षः राका तस्यैवान्तर्भूता सम्पूर्णचन्द्रा पूर्णमासी प्राधान्यविवक्षया पृथङ्निर्देशः उत्तरमुत्तरायणम् स्वराट् प्रजापतिः एवं मार्गं सूचयित्वा गन्तुः स्वरूपं सर्वावस्थासाक्षित्वेन दर्शयति—विश्व इत्यर्द्धेन । विश्वो जाग्रदवस्थासाक्षी स एव तैजसः स्वप्नाऽवस्थासाक्षी स एव प्राज्ञः सुषुप्त्यवस्थासाक्षी अत एव तिसृषु अवस्थासु समन्वयात् अनुगतत्वात् तुर्यः अवस्थात्रयभिन्नः आत्मा जीवात्मेत्यन्वयः। अग्न्याद्यवयवान् मार्गः सर्वावस्थासाक्षी ज्ञानस्वरूपो गन्ता इति फलितोऽर्थः। क्रमस्तु विद्वान् स्थूलशरीरान्मूर्द्धन्यनाड्या निष्क्रम्य सूर्यरश्मीनारुह्य यदा परं पदं गन्तुमिच्छति तदार्चिषाभिमानिनाऽऽतिवाहिकेन सुसत्कृत्य दिनाभिमानिनं नीतस्तथैव तेन पक्षाभिमानिनं तेन च षण्मासाभिमानिनं तेन संवत्सराभिमानिनं तेन वायुं

Dr. Urmila Sharma Collection, Varanasi

आदावन्ते * जनानां सद्बहिरन्तः परावरम् ।
ज्ञानं ज्ञेयं वचो वाच्यं तमो (१) ज्योतिस्त्वयं स्वयम् ॥ ५७ ॥
(२) आबाधितो ऽपि ह्याभासो यथा वस्तुतया स्मृतः ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेन स्वास्मिन् छिद्रं दत्वाऽऽदित्यं तथैव तेन चन्द्रमसं तेन विद्युदभिमानिनं देवताविशेषं नीतस्ततश्च वरुणेन्द्रप्रजापतीन् प्राप्य प्राकृतमण्डलं निर्भिद्य विरजां प्राप्नोति तदा परास्मिन् लिङ्गशरीरं हित्वा तां नदीन्तीर्त्वा परब्रह्मलोकं प्रविश्य परब्रह्मसाधर्म्यं प्राप्नोतीति ॥ ५४ ॥

आत्मयाजी परमात्मनि तदंशत्वेनात्मनिक्षेपकारी पूर्वोक्तलक्षणो गन्ता अग्न्यादिकमनुपूर्वशो भूत्वा भूत्वा येनात्मस्थः मुक्तगम्य परमात्मस्थः सन् न निवर्त्तते तदिदं देवयानं प्राहुरित्यन्वयः ॥ ५५ ॥

अनयोर्मार्गयोर्हेयोपादेययोर्ज्ञानमात्रेण बद्धो ऽपि विगतमोहो भवति किमुत हेयं विहायोपादेयेन मोक्षं लब्ध्वा न विमुह्यतीत्याह, य इति। "ते धूममभिसम्भवन्ति" इत्यादिना "ते ऽर्चिषमभिसम्भवन्ति" इत्यादिना च वेदेन निर्मिते निर्णीते पितृदेवानां अयनेमार्गौ यो वेद स जनस्थो जनानां मध्येवर्त्तमानो ऽपि बद्धावस्थायामपीत्यर्थः। न विमुह्यति पितृयाने रुचिं देवयाने रुचिं च न करोति किमुत मुक्तः ॥ ५६ ॥

भाषा टीका ।

हुत प्रहुत अर्थात् वैश्वदेव, बलिहरण, ये सब कर्म इष्ट नाम से प्रसिद्ध है, और मंदिर वगीचा कूप तडागादि कर्मों को आपूर्त कहते हैं और यही सब कर्म कामना से किया जाय तौ प्रवृत्तकर्म कहाते हैं ॥ ४६ ॥

द्रव्ययज्ञका फल यही है कि—याज्ञिकपुरुष चरुपुरोडाशादि के सूक्ष्म विपाक अर्थात् शरीरान्तर से धूमाभिमानी देवके लोक को जाताहै, वहांसे कृष्णपक्ष के अभिमानी देवके लोक को जाता है, वहां से दक्षिणायन के अभिमानी देवलोक को जाताहै, वहांसे सोमलोक को जाताहै, इस प्रकार भोग भोगने के पश्चात् विलीनदेह होकर वृष्टिद्वारा औषधि वीरुधाद के साम्यको प्राप्तहोकर, हे राजन्! अन्न वीर्य आदि क्रमसे फिर इस्वी संसार में उत्पन्न होताहै बस इसी प्रकार प्रवृत्तकर्म के आचरण से इसी प्रकार हो होकर फिरफिर जन्म लेताहै ५० ५१।

निषेकसे आदि लेकर श्मनान्त संस्कारो से संस्कृत द्विज लोग ज्ञान के प्रकाशक इन्द्रियों में क्रिया यज्ञों को हवन करते हैं अर्थात् ज्ञानेन्द्रियों से कर्मेन्द्रियों के व्यापारों का नियमन करते हैं ॥ ५२ ॥

और ज्ञान इन्द्रियों संकल्पात्ममक मन में और सात्विक मन को शास्त्ररूप वाणी में और वाणी को पश्चाशत् अक्षरात्मक वर्ण समुदाय में उसको अक्षरात्मक ओंकार में उसको चतुर्थी मात्रा विन्दुनादमें उसको प्राण सहचारी जीवमें न्यास करै अर्थात् अनुसन्धान करै ॥ ५३ ॥

इस प्रकार निवृत्त कर्मानुष्टानी ज्ञानी पुरुष अर्चिरादि मार्ग से जाने समय प्रथम अग्नि लोक को जाता है फिर सूर्य लोक को पश्चात् दिवसाभिमानी देव के लोक को फिर शुक्ल पक्षाभिमानी देव के लोक को अनंतर उत्तरायणाभिमानी देव के लोक को, इत्यादि क्रम से मोक्ष में प्राप्त होकर स्वराट् होता है ॥ । अर्थात् उत्तरायणाभिमानी देव लोक से वर्षाभिमानी देव लोक में वहां से वायु लोक में वहां से सूर्य लोक में वहां से चंद्र लोक में वहां से विद्युत लोक में वहां से वरुण लोक में वहां से इन्द्र लोक में वहां से प्रजापति साक्षात् ब्रह्मा के लोक में पूजित होकर आतिवाहि कों के द्वारा सीमांत में विरजा स्नान कर श्रीवैकुंठ में प्राप्त होकर नित्य सेवा पात्र को होता है, वहां पर भी अनिरुद्ध, प्रद्युम्न, संकर्षण रूप से आप पर ब्रह्म विराजते हैं और इन सबों का जिनमें समन्वय ऐसे पूर्ण पुर्ण पुरुषोत्तम श्रीवासुदेव भगवान सपरिकर विराजते हैं उन को प्राप्त होता ॥ ५४ ॥

सकल वेदांत इसको देवयान कहते हैं। आत्मायाजी अर्थात् परमात्मो पासक पुरुष क्रम से इस देवयान को प्राप्त होकर आविर्भूत गुणाष्टक होकर परमात्मा में आधेय विधेय रूप से स्थित होकर सर्व विधसे वा परायण होकर फिर इस संसार के दुःखों को कभी नहीं प्राप्त होता है ॥ ५५ ॥

जो पुरुष ईश्वर निर्मित इन दोनों पितृयान देवयानों को शास्त्र रूप चक्षु से जानता है वह संपूर्णजनों में स्थित रह कर भी मोह को प्राप्त नहीं होता है ॥ ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र हेतुमाह—आदाविति। जनानां देहनामादौ कारणत्वेनान्ते चाऽवधित्वेन यत्सत्तथा वहिर्भोग्यमन्तर्भोक्तपरमवरं वोच्चनीचम्

---

* जनानाशम. इति विज० जनानां यो इति वीर०
(२) अवाधित इति. विज०:वीर० पाठा दृश्यते
(१) ज्योतिश्च सत्स्वयम्—इति वीज० ज्योतिश्च यस्स्वपम्—इति वीर०

CC0. In Public Domain, Digitizagtion by eGangotri

क्षित्यादीनामिहार्थानां छाया न कतमा ऽपि हि ।
न सङ्घातो विकारो ऽपि न पृथङ् नान्वितो मृषा ॥ ५९ ॥
धातवो ऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यसन्नवयवो ऽन्ततः ॥ ६० ॥
स्यात्सादृश्यभ्रमस्तावद्विकल्पे ऽसति वस्तुनः ।
जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥
भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः ।
वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ६२ ॥
कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥
यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणम् ।
मनोवाक्तनुभिः पार्थ ! क्रियाद्वैतं तदुच्यते ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमो ऽप्रकाशः ज्योतिः प्रकाशः तत्तु सर्वमयं ज्ञानी स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किञ्चिदस्ति येन मुह्येदित्यर्थः ॥ ५७ ॥

ननु तर्हि कथं पृथगर्थस्तथा ऽपि प्रतीयते तत्रा ऽऽह—आबाधितस्तर्कविरोधेन सर्वतो बाधितो ऽप्याभासः प्रतिबिम्बादिर्वस्तुतया यथा स्मृतस्तद्वदैन्द्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ॥ ५८ ॥

तदेवाऽऽह—क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्यालम्बनरूपं देहादिसङ्घातारम्भपरिणामानां मध्ये कतमाप्यन्यतमापि न भवति न तावत्तेषां सङ्घातो वृक्षाणामिव वनम् एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः न ह्येकस्मिन्वृक्ष आकृष्टे सर्वं वनमाकृष्यते न च विकार आरब्धो ऽवयवी अपिशब्दान्न परिणामोपि कुतः स किं स्वावयवेभ्यः परिणतेभ्यो वा पृथक् तदन्वितो वा न तावदत्यन्तं पृथक् तथा ऽप्रतीतेः नचान्वितः स किं प्रत्यवयवं सर्वो ऽप्यन्वेत्यंशेन वा आद्ये अङ्गुलिमात्रेपि देहबुद्धिः स्यात् द्वितीये तस्याप्यंशांगीकारे सत्यनवस्था स्यादतो मृषैवेत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य इति चेत्तत्राऽऽह, उक्तप्रकारेणावयविन्यसत्यवयवोऽप्यन्ततोऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः । तदुक्तं पञ्चमस्कन्धे "एवं निरुक्तं क्षितिशब्दवृत्तम्" इत्यादि ॥ ६० ॥

नन्ववयविनोभावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्तः इति प्रत्यभिज्ञानं न स्यात् तदुक्तं भट्टैः "आविर्भावतिरोभावधर्मकेष्वनपायि यत् तद्धर्मी"इति तत्राह–स्यादिति।वस्तुनः परमात्मनो विकल्पे भेदे ऽसति यद्वा वस्तुनो ऽविद्यया विकल्पे सति पूर्वपूर्वारोपसादृश्यात्स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः । ननु, सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधकता कथम् ? तत्राह–स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥ ६१ ॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति–भावाद्वैतमिति चतुर्भिः । वर्तयन्नालोचयन् स्वानुभूत्या आत्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रय आवसथास्त्रयः स्वप्न इति श्रुतेः यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान्धुनुते निवर्तयति ॥ ६२ ॥

कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तन्तुरेव न पट इति ॥ ६३ ॥

मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभेदे हेतुः ईश्वरार्पणे च तदभावात्क्रियाणामद्वैतम् ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ प्राप्यतया प्रकृतस्य भगवतः सर्वात्मकत्वमाह—अदाविति।आदौ सृष्ट्यादौ अन्ते प्रलये च मध्यस्थानां जनानामन्तर्बहिश्च सन्नवर्तमानः । किञ्च यत्परावरमुत्कृष्टापकृष्टं वा तत्रोत्कृष्टमाह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ज्ञानं ज्ञानात्मकं जीवस्वरूपं ज्ञेयमचिद्वस्तु परं वचोनाम वाच्यं रूपं नामरूपात्मकं चिदचिदात्मकं सर्वं वस्तु इत्यर्थः । तमो मूलप्रकृतिः ज्योतिः समष्टिजीवश्चेत्येतत्सर्वं साक्षादयमेव परमात्मैव परमात्मात्मात्मकमेवेत्यर्थः ॥ ५७ ॥

एवं सर्वात्मकत्वमभिधाय तस्यैव प्राप्यस्य ब्रह्मणो निरतिशयपुरुषार्थत्वज्ञापनाय प्राकृतदेहस्य तदनुभाव्यशब्दादिविषयाणाञ्चापुरुषार्थत्वमाह—अबाधित इति । आभासो दृश्यो देहः स अबाधितोऽपि अविनष्टोऽप्यनुवर्त्तमानोऽपि अवस्तुतया अपुरुषार्थतया स्मृतः एवं शब्दाद्यर्थरूपेण विकल्पतमैन्द्रियकवस्तुजातमप्यवस्तु अपुरुषार्थं यद्वा अहङ्कारगोचरं शरीरं यथाऽनित्यं हेयं तथा ममकारगोचरः शब्दादिरप्यपुरुषार्थः न स्थिरः तस्यानित्यपुरुषार्थतया दुर्घटत्वादित्यर्थः । यद्वा आभासः स्वप्नदेहः स तदानीमनिवृत्तोऽपि प्रबोधवेलायामवस्तुतयाऽनात्मतया स्मृतः जाग्रदादिविकल्पितजाग्रच्छरीरमपि तद्वदनात्मा आत्मधर्माणां नित्यत्वादीनां तत्र दुर्घटत्वादित्यर्थः ॥ ५८ ॥

शरीरस्य सर्वत्र सर्वकाले सर्वस्मिन्नप्यात्मनाविनाभिस्थित्यभावाच्छरीरमप्यात्मा स्यादिति शङ्कानिरासार्थमाह—क्षित्यादीनामिति । क्षित्यादीनां पृथिव्यादिपरिणामरूपाणां वृक्षाणां छाया संघातादिष्वर्थेषु न कतमोऽपि सङ्घाततद्विकारपृथग्भूतया यावद्द्रव्यभाविषु नकश्चित्तदपीत्यर्थः । तदेव विवृणोति—न सङ्घात इति । वृक्षसङ्घातो न छाया नापि वृक्षविकारः नापि वृक्षात्पृथक् वृक्षं हित्वा स्थातुं न योग्यः नान्वितः नाविनाभूतः यावद्वृक्षसत्ताकं नान्वितोऽप्यर्थाभिप्रायः पुल्लिङ्गनिर्देशः मृषा अनित्या एवं शरीरमप्यात्मनाविनाभिस्थत्यभावात्प्रतिच्छाया सदृशं नचात्मसङ्घातः शरीरं नचात्मविकारः नचात्मानं हित्वा तिष्ठति न यावदात्मभावी अनित्यत्वात् अतो नात्मा शरीरमित्यर्थः ॥ ५९ ॥

शरीरस्यानित्यत्वादात्मप्रतिपत्त्यर्थं तत्तुल्यन्यायेषु पृथिव्यादिष्वनित्यत्वमुपपादयति—धातव इति । पृथिव्यादयो धातव अवयवित्वात्सङ्घातरूपत्वात्तन्मात्रावयवैर्विना न स्युरवयवविनाशे सङ्घातो नश्यतीत्यर्थः । सङ्घातरूपत्वमेव प्रतिपादयति—असतीति । यतोऽवयवसंघातरूपोऽवयवी अतएवावयविन्यसति विनष्टे अतन्तोऽवयवोऽसन्नेव अवयविन्यनुपलभ्यमानेऽवयवा एव धातवो नह्युपलभ्यन्ते एवमवयवित्वादनित्यं शरीरं नित्यमात्मा न भवतीत्यर्थः ॥ ६० ॥

तर्हि स्थूलोहमितिप्रतीतिः कथमित्यपेक्षायां भ्रान्तिरित्याह—। स्यात्सादृश्यमिति । तत्रसंसर्गनिमित्ता भ्रान्तिरिति प्रतिपत्त्यर्थं सादृश्यनिमित्तत्वं प्रतिक्षिपति—स्यादिति—द्वयोरप्यर्थयोर्ज्ञानादिगुणाविकल्पे सति कस्यचिद्वस्तुनः केनचित्सादृश्यं भ्रमभेदनिमित्तं स्यात् । देहात्मनोस्तु समानजातिगुणाद्यभावात्सादृश्यमनुपपन्नम् उभाज्ञमिति संसर्गभ्रम इत्यर्थसिद्धम् एवमात्मविषयकज्ञानाभावेपि जानामि न जानामीति विभागप्रतिपत्तौ दृष्टान्तमाह—जाग्रत्स्वप्नाविति । कश्चित्सुप्तिवेलायामेव सुप्तं प्रबुद्धञ्चात्मानं पश्यति यदा प्रबुध्यते तदा स्वप्नदृष्टप्रबोधो न वास्तव इति बुध्यते एवमनात्मविदः संसारिणां कदाचिदहं ज्ञानामीति ज्ञानं [illegible] यात्म्यज्ञानानुवृत्तावेव भवत इति विधिनिषेधौ [illegible] स्वप्नदृष्टस्वापप्रबोधतुल्यावित्यथः संसारिणामात्मज्ञानाभावाद्बाह्यार्थविषयज्ञानमप्यज्ञानतुल्यमित्युक्तं भवति यथा "तज्ज्ञानमज्ञानमतोन्यदुक्तम्" इति । शास्त्रविरुद्धार्थविषयज्ञानभ्रान्तिरियं ज्ञानिनां नास्तीत्याह—भावाद्वैतमिति । यद्वा एवं देहविलक्षणात्मज्ञानिनामपि यावत् स्थूलोहं ब्राह्मणोऽहमिति देहात्मभ्रमानुवृत्तिराप्रयाणं तावद्विधिनिषेधात्मकशास्त्रवश्यतेत्याह—जाग्रत्स्वप्नाविति । यथा स्वप्ने जाग्रत् स्वप्नौ स्वाप्नजाग्रत्स्वप्नावस्थे स्वप्नपर्यन्तावेव प्रबुद्धस्य तु तावुभौ निवर्त्तेते तद्वदित्यर्थः ॥ ६१ ॥

एवं यावद्देहात्मभ्रमानुवृत्तिस्तावद्विधिनिषेधता स्थूलोऽहं ब्राह्मणोऽहमिति प्रतीतेर्देहात्मनोरभेदे भ्रममूलकत्वेन प्रतिषिद्धे किमेवमेव सर्वमद्वैतं भ्रमविषयम् ? उतकिञ्चित्प्रमितिविषयमस्तीत्याशंकायां यच्छास्त्रानुगतमद्वैतं तत्प्रमाविषयं तन्मुमुक्षोरनुसन्धेयमेवेति वक्तुं तदनुमतं त्रिविधमद्वैतं दर्शयन् तदनुसन्धानस्य भ्रममूलकद्वैतत्रयनिरासकत्वमाह—भावाद्वैतमिति । यथा देहात्मनोर्भेदः शास्त्रानुमतोनुसन्धेयः तथा भावाद्वैतादिरूपं त्रिविधमद्वैतमात्मनः स्वस्य वर्त्तयन् यद्वा आत्मनो मनसो वर्त्तयन् मनसि प्रतिष्ठितं कुर्वन्नध्यवस्यन्निति यावत् इह मुनिः परमात्मोपासकः स्वानुभूत्या देहविलक्षणब्रह्मात्मकस्वात्मयाथात्म्यानुभवेन त्रीन् स्वप्नान् भावाद्वैतकर्माद्वैतद्रव्याद्वैतज्ञानानि भ्रमात्मकानि धुनते निरस्यति ॥ ६२ ॥

भावाद्वैतादिस्वरूपं विवृण्वन् त्रिविधभ्रान्तिनिरासं श्लोकत्रयेण विवृणोति—कार्येति । तत्रोपादानस्य कार्यस्य चानन्यत्वपरोभावाद्वैतविषयः श्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद्भावाद्वैतं कार्यकारणयोरैक्यं पटतन्तुवदिति दृष्टान्तः यथा तन्तूनामेव व्यतिषङ्गविशेषभाजां नामरूपात्मकावस्थान्तरापत्त्या पटावस्थत्वमिति पटस्य तेभ्योऽनन्यत्वं तद्वत्कृत्स्नं जगच्चिदचिदीश्वरात्मकं सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणोऽनन्यदित्येतद्भावाद्वैतं भावयोः कार्यकारणवस्तुनोरद्वैतं भावाद्वैतं अवस्तुत्वाद्विकल्पस्येत्यनेन भावद्वैतं निरस्यति विकल्पस्योपादानातिरिक्तद्रव्यकल्पनरूपाज्ञानस्यावस्तुत्वाद्वस्तुशून्यत्वान्न भावयोर्द्वैतं किन्त्वद्वैतमेवेत्यर्थः । एवमसत्कार्यवादभ्रमो निरस्तः ॥ ६३ ॥

क्रियाद्वैतं विवृणोति—यदिति । हे पार्थ ! साक्षात्परे ब्रह्मणि यत्करणत्रयेण सर्वकर्मणां समर्पणं तत्क्रियाणामद्वैतं भगवदाराधनत्वेन सर्वकर्मणामेकफलावच्छेदः क्रियाद्वैतम् अनेन कर्मणामीश्वरप्रीतिमनपेक्ष्य स्वातन्त्र्येण फलवत्त्वभ्रमो निरस्तः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जाग्रदाद्यवस्थाप्रवर्तकान्विश्वादीन् कल्पितानतिक्रम्य प्रपञ्चोपशमं तुर्यात्मा भूत्वा निर्द्वन्द्व आस्ते इति केचिद्व्याचक्षते तन्मत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दूषणायाह-आदाविति । आदावुत्पत्तिकाले मुक्तिकाले च यज्जनानां जननं विनाशं च "जनी प्रादुर्भावे" इत्यस्मात् टापि कृते जनेतिरूपं सिध्यति वध्यघातकभावो मार्जारमूषकवत् यश्च बहिरन्तर्विद्यमानं परावरमुत्तमाधमं भूतं भविष्यद्वा यश्च ज्ञानादिकं सर्वस्य ग्लापकत्वात् ग्लानिजनकत्वात्तमः प्रकृतिर्ज्योतिस्तद्वभासकः स्वप्रकाशश्च यस्तदेतत्सर्वं स्वयं तुर्यात्मा श्रीहरिस्तत्सत्ताया अपि तदधीनत्वात्स इत्युच्यते ननु तदात्मकत्वात् "पुरुष एवेदं सर्वम्" इति श्रुतेः आदौ यथा तदधीनत्वं तथान्तेपि श्रीनारायणाधीनत्वमित्यतो वाह आदाविति उक्तार्थः श्लोकः निरुपचरितापराधीनत्वं हरेरेव न मुक्तस्यापीत्यतो वाह आदाविति, आदावन्ते उत्पत्तेः प्रागूर्ध्वम् अयं परमात्मा वर्तत इति शेषः । कथङ्कारमत्राह-जनेति । जनकत्वेन नाशकत्वेनेत्यादिरूपेण सर्वकर्तृत्वस्वातन्त्र्येण तच्छब्दवाच्यत्वं हरेरप्युक्तं तमःशब्दस्य ग्लापकत्वादिति णिच् प्रत्ययान्तत्वेन विवरणादयमर्थो ज्ञायत इति ॥ ५७ ॥

ननु, सत्तायास्तदधीनत्वं प्रामाणिकञ्चेत् ब्रह्मत्वेनोक्तिर्घटेत ततः कात्र युक्तिरित्याशङ्क्योपपादयति-अबाधित इति । प्राकृतवैकृतलक्षणकार्येषु विशिष्टकान्तिमत्तया भासते विद्योतत इत्याभासो देहः प्रतिबिम्बलक्षणो यथावस्तुतया "वसनाद्वासयेद्वस्तु नित्याप्रतिहतत्वतः" इति स्मृतेर्वस्तुपरमात्मा तत्त्वेन स्मृतः "इदं हि विश्वं भगवा.निवेतरः" इन्द्रो मायाभिः"इत्यादिना ननु देहस्य सत्वे तत्सत्ताया भगवदधीनत्वेन तद्वक्तुं युक्तं तस्य दग्धपटाभासवदर्थक्रियानर्हत्वादिति तत्राह, अबाधित इति. शुक्तिकायां प्रतिभासितं रजतं वलयकरणाद्यर्थक्रियानर्हत्वेन नेदं रजतमिति बाधितं स्याद्यथा न तथाऽयं बाधितः हानोपादानाद्यर्थक्रियायोग्यत्वात् अपिशब्दोऽत्र स्वातन्त्र्यशंकां सूचयति, हिशब्देन प्रत्यक्षसिद्धत्वेन ·दग्धपटाभासवैलक्षण्यं दर्शयति, ·तद्वत्तथैन्द्रियकमिन्द्रियविषयं घटपटादिकम् अर्थशब्दो भावप्रधानः अर्थत्वेनार्थक्रियाख्यं प्रयोजनतया कल्पितं समर्थितं, परमात्मनेति शेषः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैव च । विष्णवधीनं यतः" इति वचनादर्थक्रियासामर्थ्यस्य भगवदधीनत्वेन"सर्वं खल्विदं ब्रह्म"इति सर्वस्य तत्त्वं युक्तमिति भावः । एवमनङ्गीकारे बाधकमाह— दुर्घटत्वादिति । ईश्वरान्येन कर्तुमशक्यत्वात् ॥ ५८ ॥

दुर्घटत्वमेव दर्शयति-क्षित्यादीनामिति । क्षित्यादीनामर्थानां पदार्थानां कतमापि छाया कतमोऽपि प्रकारो विचार्यमाणे सति न घटत इति शेषः "छाया रीतिः प्रकाशश्च भावश्चेत्यभिधीयते" इत्यभिधानम्. इह कार्यप्रपञ्चे हिशब्दो हेत्वर्थः निर्धारणार्थवाचिना तमप्प्रत्ययेन कस्यापि प्रकारस्यासंभवोक्तेः परमेश्वरकल्पितत्वेनैतत्कार्यं सत् इतिवक्तुं युक्तं प्रकारभावमुपपादयति-न सङ्घात इति । परमेश्वरकल्पनामन्तरेण कार्यं भवतीति वदन् प्रष्टव्यो भवति क्षितिलक्षणं कार्यं केवलमपां पुञ्जः तद्विकारो वा तद्व्यतिरेकेणोत्पन्नं वा वृक्षद्वयसंयोगवदुभयोः संयोगमात्रं वा ? न प्रथम इत्याह—नेति । अयं संघातो न असम्भवात्. क्षितेः कठिनावयवारब्धत्वात्केवलमपां द्रवत्वेन तत्कार्ये पर्वतादीनां मज्जनापत्त्याक्षितेः स्वरूपलयप्राप्तेः आधाराभावेन सर्वप्राणिप्राणनाशप्रसङ्गात् न द्वितीय इत्याह—विकार इति । अत्र नञः अध्याहारः कर्तव्यः अपां विकारोपि नोपपद्यते कालुष्यादिलक्षणविकारमात्रेण क्षितित्वानुपपत्तेः न तृतीय इत्याह—न पृथगिति । अद्भ्यः क्षितेः पृथक्स्थित्यदर्शनात् नापि चतुर्थ इत्याह—नान्वित इति । सहावस्थानमात्रेण कार्योत्पत्त्यदर्शनात् क्षित्यादीनामर्थानां पदार्थानां मध्ये कतमापि छाया कतमोऽपि भावः पदार्थः कार्यजननशक्तिमान् न घटते विचारासहत्वात्. तथाहि, "अद्भ्यः पृथिवी"इति श्रूयते तत्र प्रस्तुतात्मशक्तिमन्तरेण केवलानामपां पृथिवीजनकत्वं कथमिति वा शेषं पूर्ववत् ॥ ५९ ॥

ननु, विश्लिष्टानां पदार्थानामन्योन्यं महत्कार्योत्पत्तावसामर्थ्यमस्तु । संश्लिष्टानां नेयमनुपपत्तिरित्याशंक्य श्रीनारायणकटाक्षवीजमन्तरेणावयवावयविनोरप्यनुपपत्तिः स्यादेवेत्याह—धातव इति । धातवः क्षित्यादिप्रपञ्चभूतादिपदार्थाः तन्मात्रावयवैर्विना गन्धादिव्यतिरेकेण सुरभिगन्धवती पृथिवी शुक्लभास्वरं सलिलमित्यादिव्यावर्तकधर्माभावे स्वरूपाभावप्राप्तिरेव स्यादित्यर्थः अवयवित्वादिति नह्यवयविनोऽवयवाभावे अवयविव्यवहारो युक्तस्तस्मात् चशब्द एवार्थे समुच्चयार्थे वा प्रत्यक्षसिद्धत्वादवयवित्वाच्चेति अयं निर्णयः कुत्र दृष्ट इति तत्राह—असतीति इव यथा आसमन्तात्सन्नावयवाः सर्वात्मना तन्तुलक्षणा । अवयवा नष्टा यदि तर्ह्यसदवयविनि तन्तुरहिते पटे पटव्यवहारोऽपि नष्ट इति शेषः तन्तुव्यतिरेकेण पटाभावात् यथावयवाभावो अवयवी नास्ति तथा अवयविनि निवृत्ते अवयवा अपि निवृत्ताः स्युरित्यतो वाह—आसन्नावयवा अपि नष्टाः स्युरित्यर्थः यथाऽऽसन्नावयवा आतानवितानावयवत्वसंसर्गम् प्राप्तास्तन्तुलक्षणा अवयवाः प्रागसत्यवयविनि पटे पटव्यवहारं न जनयन्ति तथा गन्धाद्यवयवाः प्रागसत्सु क्षित्यादिषु पश्चात्क्षित्यादिव्यवहारं न जनयन्तीत्यनस्तदभावे तदभावः स्पष्ट इत्यन्वयव्यतिरेकौ दर्शिताविति ज्ञातव्यमिति एवं दुर्घटत्वेनाविद्याकल्पितप्रपञ्चस्याविद्याबाधानन्तरमनुवृत्तस्यापि न वस्तुतत्वमिति कल्पनमनुपपन्नं "विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं" "वा यद्वियुक्त्या विरुध्येत तदीशक्तंनमेव हि"इति श्रुतिस्मृतिप्रसिद्धां युक्तिशब्देन दर्शयति असत्त्वयावयविन्यासन्नावयवा न चेतिकेचित्पठन्ति अयमर्थः गन्धावयवव्यतिरेकेण पृथिव्याद्यवयविनो न स्युश्चेत् किं नाऽश्छन्नमिति तत्राह—असतीति । क्षित्यामवयविन्यसति गन्धाद्यवयवा एव नासन्नित्यन्वयः अन्यथाभावे ऽवयव्यभावेन कारणाभावापत्त्या सर्वासत्त्वगसङ्गलक्षणोच्छेद इति भावः ॥ ६० ॥

नन्ववयवावयविनोः सादृश्यमात्रेण तस्यायमवयव इति व्यवहारस्तस्मात्तद्व्यतिरेकेण सोपि नास्तीति कथमापद्यत इति तत्राह—स्यादिति । सत्यं सादृश्यभ्रमः स्यात्तात्कस्मिन् सतीति तत्राह—विकल्प इति । वस्तुनो विकल्पे भेदे सतीत्यन्वयः यथा पट्टणादिषु रूप्यमवलोक्य तत्संस्कारवतः सदसक्तिरणासम्पर्केण चकाशमानं क्वापि शुक्तिकाशकलं संदृश्य द्वयोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साहश्यमात्रादिदं रजतमिति भ्रमो दृश्यते, तथाक्षित्यादेर्गन्धादेर्भेदं वस्तुसाहश्यमात्रेण व्यवहारः स्यात् नचात्रभेदो युज्यते स्वरूपहानेरतो वयवाभावे ऽवयव्यभाव आपद्यते स्वरूपत्वादिति भावः पटस्य प्रत्येकं तन्तुना भेदेऽपि समुदायरूपेणाभेदादुक्तं युक्तमिति नन्ववयविपदार्थसद्भावे इयं चिन्ता स एव नास्ति परमाणव एव पुञ्जीभूय कार्यं जनयन्तीत्यङ्गीकार्यत्वात्प्रतिक्षणं विनाशाच्च अभेदग्राहिप्रत्यभिज्ञायाश्च संस्कारजनितसाहश्यमात्रविषयतया भ्रान्तित्वादित्यतो वाह–स्यादिति । वस्तुनां भेदे सति तदुक्तं सत्यं स्यात्तदेव नास्ति एकत्वस्य साक्षिप्रत्यक्षेणानुभूयमानत्वात् साक्षिणो भ्रान्तित्वे सर्वस्य विनाशसाधकस्यापि व्याप्तिग्राहकप्रमाणप्रामाण्यस्य सास्पात्परमाणुपुञ्जपक्षेपि निगदितदोषानिस्तारात् परमाणुभिर्विना पुञ्जाभावेन स्वरूपं न स्यादतो दुर्घटघटकेन केनचिद्भवितव्यं स चाहष्टकर्मणोश्चेतनाश्रयत्वेन पृथक् सामर्थ्याभावाच्चेतन एव भवेत् चेतनसामान्यस्याहिताकरणादिना पारतन्त्र्यप्रतीतेर्निरवयवत्वेन प्रवृत्त्यनुपपत्तेश्च तत्प्रवर्तकत्वेनाघटितघटकत्वेन महात्म्याकरपरमचेतनपरिकल्पनयैव शरीरपदार्थोपादानभूतपृथिव्यादियोगो दृश्यत इति सिद्धम्—

"कार्यकारणवस्तूनां विशेषो न निरूपितः ।
तथापीशेच्छयैवासौ दृश्यते नियतो पि च" इतिस्मृतेः

एताहशो विशेषः कुत्र दृष्ट इति तत्राह—जाग्रदिति । यथा स्वप्ने जाग्रदिदमयं स्वप्न इतिविशेष ईश्वरेच्छया दृश्यते "स एष स्वप्नान्दर्शयति"इति श्रुतेः न तत्र "रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजतः" इत्यादेः स्वप्ने प्रतीयमानं सर्वमीश्वरेच्छाकर्तृकमिति ज्ञायते तथा विधिनिषेधविशेषोपीश्वरकल्पनयैव प्रवर्तत इत्याह–तथेति । "अग्निष्टोमेन स्वर्गकामो यजेत"इत्यादि. महाविधित्वं अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणातीत्याद्यवान्तरविधित्वं । तथा ब्राह्मणो न हन्तव्य इत्यादि महानिषेधत्वं न मृषा वदेदित्याद्यवान्तरनिषेधत्वं चेश्वरेच्छाक्लृप्तमित्यन्वयः "स इदं सर्वमसृजत"इत्यादेः संकोचेकारणाभावान्मुख्यार्थ एवाङ्गीकर्तव्यः । अत्र तत्तद्विशेषस्य परमेश्वरक्लृप्तत्वनिश्चयाय मिथ्याभूतजाग्रत्त्वग्रहणं न तु तद्वत्स्वप्नस्यापि मिथ्यात्वनिश्चयाय तस्यार्थक्रियाकारित्वेन सत्यत्वनिश्चयात् अनेन सर्वस्य मिथ्यात्वे रज्जुसर्पस्य मिथ्यात्वं रज्जुखण्डं सत्यमितीयं व्यवस्था कुत इत्याशङ्क्य मिथ्याभूतस्वप्ने ऽपि जाग्रत्स्वप्नव्यवहारवत् व्यवहारमात्रमत्र चेत्यादि श्रुत्योच्यत इति ॥ ६१ ॥

एवं सर्वस्मादात्मन उपकारकत्वेन प्रेष्ठत्वाद्येन विना तत्प्रसादो न भवेद्यस्मिन्सति सञ्जाघटीति भगवति तत्समर्पणसमये तं भवानाप्रकारं दर्शयति–भावेति । मुनिः शास्त्रतत्त्वज्ञानी आत्मनः भावाद्वैतं क्रियाद्वैतं तथा द्रव्याद्वैतञ्चैव वर्तयन् स्मरणं कुर्वन् स्वानुभूत्याविर्भूतस्वरूपज्ञानेन ! इह जगति सतत्त्वीन् स्वप्नान् जाग्रदाद्यवस्थानुभवनिमित्ताज्ञानशब्दवाच्यानर्थान् धुनुते निरस्यतीत्यन्वयः ॥ ६२ ॥

किं तद्भावाद्वैतादिकं येन तदवश्यमनुध्येयमिति तदाह । कार्यकारणेति । महदादिकार्येषु प्रकृतितद्गुणाख्यकारणेषु च स्थितस्य वस्तुनो नित्याप्रतिहतस्य हरेरेकत्वदर्शनं तत्कथमिव पटतन्तुवत् पटस्य तन्तूनां चाभेदलक्षणैकत्वं यथा प्रामाणिकं तथेत्यर्थः । "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः" इत्यादेः मृद्घट इति सामानाधिकरण्येन कार्यकारणयोरभेदोक्त्या श्रीहरिसम्बन्धप्रतीतेः प्रकृतासङ्गतं स्यान्निदर्शनं चैकत्वप्रदर्शनपरमित्युक्त एवार्थः प्रतीतार्थं परित्यज्याप्रतीतार्थकथने किं कारणमत्राह अवस्तुत्वादिति । घटादिप्रपञ्चस्यानित्यत्वेन प्रतिहतत्वात्स्वत एव कार्योत्पादनसामर्थ्याभावादवस्तुत्वादसामर्थ्यत्वाद्विशिष्टत्वान्मिलितत्वात्कार्यजननशक्त्यभावाद्वा, इदं च भगवन्माहात्म्यप्रकटनं गणं युगपदाविशदिति श्लोक्तेः कार्यकारणानुविष्टानां भगवद्रूपाणामत्यैक्यमेकत्वं "तत्सृष्ट्वा तदेवानु प्राविशत्" "समाधिगतो हिमविधूनभेदमोहः"इत्यादिश्रुतिस्मृतिभिरुच्यत इति ज्ञानपूर्वमुपासनं कार्यमिति शेषः ॥ ६३ ॥

न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवं चित्रमर्चेति क्रियाद्वैतम् ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मोहाभावकारणं सर्व्वस्य परमात्मानन्यत्वं विवृणोति । आदाविति । यत् परमात्मलक्षणं वस्तु तत् सत् वर्त्तमानं तदेव स्वयं वहिर्भोग्यम् । ज्योतिः प्रकाशश्च स्फुरति नान्यत् । अन्यस्य तद्विना स्वतः स्फुरणानिरूप्यत्वादिति भावः ॥ ५७ ॥

ननु, कथं तर्हि तस्मादत्यन्तपृथगिवार्थजातं प्रतीयते तत्राह–आवाधितः स्वातन्त्र्यसत्तायाः सकाशान्निरस्तोपि यथा आभासः सूर्य्यादिप्रतिरश्मिः वालादिभिः पृथक् प्रकाशमानादर्शनाद्वस्तुतया स्वतन्त्रपदार्थतया स्मृतः कल्पितः । तद्वदैन्द्रियकं सर्व्वं मूढैः स्वतन्त्रार्थत्वेन विविधं कल्पितम् । तत्तु न तत्त्वदृष्ट्या स्वातन्त्र्यनिरूपणस्य दुर्घटत्वादित्यर्थः ॥ ५८ ॥

क्षित्यादीनामिति, तैः तत्र कुत इत्यन्ते स किम् अवयवेभ्यः पृथगारभ्यते परिणमते च तदन्वितो वेत्यूह्यम् । अतो मृषेवेत्यत्र अतो देहादेः स्वातन्त्र्येणावस्थितिर्मृषैवेत्यर्थः इति ज्ञेयम् ॥ ५९ ॥

एवं देहादेः स्वातन्त्र्येणानिरूप्यत्वमुक्त्वा तद्धेतूनाम् क्षित्यादीनामपि तथैवानिरूप्यत्वमाह–धातव इति । तर्ह्यवयव एव स्वतन्त्र इति चेत्तत्राह, उक्तप्रकारेणावयविनि निरूपयितुमसति अवयवोप्यन्ततो निरूपयितुमसन्नेव स्यात् तस्मादैक्यबुद्ध्यालम्बनरूपम् यत् प्रतीयते तत् सर्वत्र परमात्मलक्षणं सर्वकारणं वस्त्वेवेति साधूक्तः आद्यावन्ते जनानाम् सदित्यादिना एवमेव तृतीयेप्युक्तम् "इति तासां स्वशक्तीनां सतीनामसमेत्य सः । प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ कालसंज्ञां ततो देवीं विभ्रच्छक्तिमुरुक्रमः । त्रयोविंशतितत्त्वानां गणं युगपदाविशत्॥सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तम् गणम्।भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन्"इति अत एव "यस्य पृथिवी शरीरम्"इत्यादौ श्रुतौ परमात्मशरीरत्वेन प्रसिद्धि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

परमात्मनस्तु शरीरित्वेन तदेवमवयवरूपेण प्रधानपरिणामः सर्वत्रावयवीतु परमात्मवस्त्वेवेति सिद्धं ततोऽप्यमिथ्यात्वमेव जगत उपपद्येत् ॥ ६० ॥

ननु, यदि परमात्मवस्त्वेव सर्वत्रावयवी देहः स्यात । ततश्चात्रैव ब्राह्मणत्वादि संज्ञा प्राप्तेर्गुणदोषहेतुविधिनिषेधावपि स्यातां तौ च न सम्भवतः । तस्मादन्यत्र वावयवी युज्यते इत्याशङ्क्याह–स्यादिति । वस्तुनः परमात्मनः विकल्पे संशये सतीति तस्य तादृशत्वेन निर्णयो यावन्न स्यादित्यर्थः । तावदेव तस्मात् सर्वैक्यबुद्धिनिदानात् पृथग्देहैक्यनिदानबुद्धिः सादृश्यभ्रमः स्यात् । पुर्वापरावयवानुसंज्ञाने सति परस्परमासज्यैकत्र स्थितत्वेनावयवत्वसाधारण्येन चैक्यसादृश्यात् । यतो प्रत्यवयवमेकतया प्रतीतेः सोऽयं देह इति भ्रम एव भवतीत्यर्थः । प्रतिवृत्तं तदिदं वनमिनिवत् यथोक्तं स्वयं भगवता "सोऽयं दीपोर्च्चिषां यद्वत् स्रोतसां तदिदं जलम् । सोऽयं पुमानिति नृणां मृषाधीर्गीर्मृषायुषाम्" इति । ततश्च तत्रैव ब्राह्मणत्वाद्यभिमाने सति स्वप्नविषयकौ जाग्रत्स्वप्नाविव तद्विषयकौ विधिनिषेधौ स्यातामित्याह । तथा तेन प्रकारेण विधेर्विधिता निषेधस्य निषेधनेत्यर्थः । एवं "परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् । विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च" इत्यादिरेकादशाष्टाविंशतितमाध्यायोपि ज्ञेयः । तत्र "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियान्" इत्यादिकं स्यात् सादृश्य भ्रम इत्याद्यानुसारेणैव व्याख्येयम् । अवस्तु यत् द्वैतं तस्येत्यर्थः । तस्मात् स्वातन्त्र्येण निरूपणाशक्त्या परमात्मनोऽनन्यदेव सर्वमिति प्रकरणार्थः ॥ ६१—६३ ॥

असिद्धज्ञानत्वात्तथापि स्वधर्म्यमेव कुर्यादित्याह—यदीति । ॥ ६४—६५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्र सर्वं ब्रह्मेति भावनैव मोहाभावे नैव हेतुरित्याह–आदाविति जनानां देहादीनां आदौ कारणत्वेन अन्ते चावधित्वेन यत् सत् स्वयंब्रह्म तदेव बहिर्भोगं मायिकं वस्तु अन्तर्भोक्तृजीववृन्दं परावरं उत्कृष्टनिकृष्टात्मकं ज्ञानमिन्द्रियं ज्ञेयं शब्दादिवचो घटपटादिवाच्यं जात्यादि तमो जीवस्याविद्या ज्योतिर्विद्या तस्माद्व्यतिरिक्तं वस्तु किमपि नास्ति येन मुह्यादिति भावः ॥ ५७ ॥

ननु कथं तर्हि तस्मादत्यन्त पृथगिवार्थ प्रतीयते तत्राह—ननु भोक्तृभोग्यादिवस्तूनां सर्वजनैरेव पृथक्तया प्रतीयमानत्वात् कथमेको यतिरेव सर्वं ब्रह्मैवेदमिति प्रत्येतु तत्राह—आबाधित इति । अत्र अद्वयं ज्ञानमेव ब्रह्मोपासनायां पद्धतिः साच विविधशक्तिवैचित्रीमयस्य विश्वस्य सत्यत्वप्रतीतौ नसिद्ध्येदतस्तदर्थं ज्ञानिनमधिकारिणं विश्वस्य मिथ्यात्वं प्रत्याययितुं विवर्त्तवादो-यमष्टाभिः प्रस्तूयते यथा भक्तिमते "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्युक्तं तथैव ज्ञानिमतेऽप्युपायो ज्ञानिमनो ब्रह्ममात्रग्रहणार्थः विश्वस्य सत्यत्वे मनसा निश्चिते तेन निरालंबेन मनसा विश्वस्याग्रहणं निषेधकोटिभिरपि दुर्घटमित्यतोऽत्रविवर्त्तवादेपि शास्त्रस्य तात्पर्यमित्यवसेयं विश्वदेव भगवद्धामनामरूपादेरसत्यत्वमननेतु ज्ञानिनोऽप्यधः पात इति प्राक्प्रतिपादितं प्रतिपादयिष्यते च यथास्थानमुपरिष्टादपि श्रीभरतेनापि रघुगणप्रबोधनार्थम् "अयं जनो नाम चलन्पृथिव्याम्" इत्यादिना विश्वमिथ्यात्वमुक्त्वा तर्हि किमित्यपेक्षायां भगवच्छब्दसंज्ञं "यद्वासुदेवं कवयो वदन्ति" इत्युपसंहृतम् अथ प्रकृतमनुसरामः आभासो हि चन्द्रादिर्मिथ्याभूतोपि यथा बालैर्वस्तुतया स्मृतः तद्वदैन्द्रियकं सर्वमर्थत्वेन कल्पितमेव नतु वस्तुतः दुर्घटत्वात् ॥ ५८ ॥

एतदेवाह–क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्या आलम्बनं देहादिकं संघातादं तु परिणामानां मध्ये कतमापि न भवति न तावत् पञ्चभूतानां सङ्घातः वृक्षाणामिव वनम् एकदेशाकर्षणेन सर्वाकर्षणानुपपत्तेः नह्येकस्मिन् वृक्षे आकृष्टे सर्वं वनमाकृष्यते न च पञ्चभूतानां विकारः पञ्चभूतैरारब्धो ऽवयवीत्यर्थः । कुत इति चेत् तत्राह–न पृथङ्नान्वित इति । अवयवेभ्यो ऽवयवी नतावदत्यन्तं प्रथक् तथाऽप्रतीतेः अवयवात्पृथगवयविवादिनां मते दोषान्तरमपि द्रष्टव्यं तद्यथा स्वर्णघटमहं ददे इति वाक्यपूर्वकस्वर्णघटदानानन्तरं तद्घटावयवस्य कपालादेर्ग्रहणे न ब्राह्मणस्य स्वर्णस्तेयजन्यं पातित्यं स्यात् दातृतस्तदनुनाशकस्य दान कर्मत्वाद्दत्तस्य घटपदार्थे घटएव सत्वे न घटस्यैव स्वत्वनाशात् कपालादेस्तस्य घटपदार्थभिन्नत्वात् प्रकारान्तरस्वीकारस्य गौरवसहस्रपरहतत्वादेतन्मतमनुपादेयमेव न च तेष्वन्वितः स किम्प्रत्यवयवमवयवी सर्वं एवान्वेति अंशेन वा आद्यप्रायौ पाणघुल्यादौ वा देहबुद्धौ तन्नाशे देहो नष्ट इति प्रतीतिरापद्येत द्वितीये अंशस्याप्यंशङ्गीकारे अनवस्था स्यात् अपिकारात् पञ्चभूतानां परिणामोपि यतो न पञ्चभूतेभ्यः स पृथक् नापि तेष्वन्वितइत्यतो मृषैव मिथ्यैवेति विवर्त्तवादएवोपादेय इत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धातवइति । धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य इति चेत्तत्राह उक्तप्रकारेणावयविन्यसति अवयवो ऽप्यन्ततो ऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः तदुक्तं पञ्चमे "एवं निरुक्तं क्षितिशब्दवृत्तम्", इत्यादि ॥ ६० ॥

ननु, तदपि क्षित्यादीनां सत्यत्वेन प्रतीतिः कुतो भवतीत्यत आह–स्यादिति । विकल्पे क्षित्यादावसति मिथ्याभुतेपि वस्तुनः सत्यभूतस्य भगवन्नित्यधामस्थक्षित्यादीनां सादृश्येन भ्रमः सत्यस्य जलस्य मरीचिकायामिवेत्यर्थः । यथैव सत्य एव तेजसि सत्यस्यैव जलस्य भ्रान्तिमूलके आरोपे सति मरीचिका जलं भवेत् तथैव सत्य एव ब्रह्मणि सत्यस्यैव भगवद्धामस्थक्षित्यादेरज्ञानमूलके आरोपे सति जगदिदं भवेदित्यर्थः । न च भगवद्धामन्यपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विवर्त्तः प्रवर्तत इति तदप्यसत्यमिति वाच्यं भूगोलचक्रे सप्त पूर्य्यो भवन्ति तासां मध्ये साक्षाक्षाद्ब्रह्मगोपालपुरीहीति गोपालतापिनीश्रुत्या गोपालपुर्या ब्रह्मस्वरूपभूतत्वप्रतिपादनात्तासामितिनिर्द्धारणषष्ठ्यासाक्षादिति ब्रह्मेति पदयोश्च वैयर्थ्यादन्यवस्तूनामिव ब्रह्मणि गोपालपुर्य्यारोपितत्वमिति व्याख्यातुमशक्यत्वात् । किञ्च अर्वाचीना अद्वैतवादिनस्तु मायाशक्त्या तत्वनप विनोप्य भावे आगमापायिषु बाल्यादिषु सोयं देवदत्त इति प्रत्यभिज्ञानं नस्यात् तदुक्तं भट्टैः "आविर्भावतिरोभाव धर्मकेष्वनमापियत् तद्धर्मीति" तत्राह—स्यादिति । वस्तुतः परमात्मनो कल्पभेदो प्रसतिय इव वस्तुनो विकल्पे सति पूर्वपूर्वारोप साहश्यात् एवेति भ्रमः स्यात्सत्वतादेवविद्यानिवृत्तिः ननु, सर्गमिथ्यात्वे शास्त्रस्य विधिनिषेधता कथ्यते तत्राह—स्वप्नमध्ये जाग्रत्स्वप्नं यथायथेति इतिस्वामिचरणातिरिक्तामंतरङ्गाह्लादिन्यादिशक्तिं तद्विलासान् भगवन्नित्यधामात्वित्यादींश्च मन्यमाना अन्धपरंपरयैव विवर्त्तो मिथ्याभूतस्यैव साहश्यभ्रममाचक्षाणा विगीयन्त एव नन्वेवं जगतो मिथ्यात्वे सर्वज्ञेनापि वेदेन विधिनिषेधौ कथमुच्येते नहि मरीचिका जलस्य गुणदोषौ विज्ञेनोपदिश्येते इत्यत आह—जाग्रत्स्वप्नाविति। स्वप्नमध्ये यथा जाग्रत्स्वप्नव्यवस्था तथैव मिथ्याभूतो जगति तावपि मिथ्याभूतावेवेत्यर्थः । अविद्वदधिकारित्वादिति "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" इत्यादेः ॥ ६१ ॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति—भावाद्वैतमिति चतुर्भिः । वर्त्तयन्नालोचयन् स्वानुभूत्या आत्मतत्वानुभवेन वस्तु भेदबुद्धिरेकः स्वप्नः ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान् धुनुते निवर्त्तयति ॥ ६२ ॥

कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तंतुरेव न पटे इत्येव जगत्प्रकृत्योः कार्य्यकारणयोरैक्यम् ॥ ६३ ॥

मनोवाक्तनुभिः कृतानां कर्मणां ब्रह्मण्यर्पणमिति उद्देश्यफलभेदो हि क्रियाभेदहेतुः ईश्वरार्पणेच तदभावात् क्रियाणामद्वैतम् ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुकप्राप्तस्य भगवतो मार्गविशेषगम्यत्ववर्णनेन प्राप्तमेकदेशित्वं निराकरोति—आदाविति । आदौ उत्पादकरूपेण अन्ते प्रवेशस्थानत्वेन वहिर्धारकत्वेन अन्तः प्रेरकत्वेन सत् सर्वदा सत्ताप्रदत्वेन जनानां स्वयं साक्षादयमेव भगवान् अस्ति परं कारणमवरं कार्यं चायमेव ज्ञानं च ज्ञानतत्वं ज्ञेयमचेतनत्वं चायमेव तयोः परावरभगवच्छक्तित्वेन भगवत्पृथगवस्थानाभावात् वचो वाच्यं शब्दार्थौ चायमेव तमो ज्योतिः प्रकाश्यं प्रकाशकं वस्तु अयमेव सर्वात्मत्वात् ॥ ५७ ॥

शरीरादुत्क्रम्य पितृयानेन सोमलोकं देवयानेन परं पदमात्मा यातीत्युक्तं तत्र देहेन्द्रियादिविलक्षणमात्मतत्वं प्रतिपादयन् भूतसंघात एवात्मेति पक्षं बहुपदार्थसंयोगे मद्यशक्तिर्यथोत्पद्यते तद्वद्भूतसंयाते शरीरे विज्ञानमुत्पद्यते इति पक्षं च तथा चक्षुराद्यात्मवादं च बाह्याभिमतं निराकरोति—अबाधित इत्यादिचतुर्भिः । आभासं मृगादिरूपेणाभासमानः स्वप्नदेहो यथा अवस्तुतया अवस्तुमृगादिरूपेऽहंभूतमात्मतत्वं तद्भिन्नतया स्मृतः अपि निश्चये हि हेतौ यतो हेतोः निश्चयेन आबाधितः प्रबोधसमये नाहं मृगादिरूप इत्येवं निराकृतः तद्वत् ऐन्द्रियकं शरीरं अर्थविकल्पितम् अर्थात् आत्मस्वरूपाद्विकल्पेन भेदेन निर्णीतम् कुतः दुर्घटत्वात् तस्मिन् आत्मत्वासम्भवादित्यर्थः ॥ ५८ ॥

इह वस्तुनि जीवे क्षित्यादीनां भूतानां तथा ऽन्येषामिन्द्रियाद्यर्थानामचेतनपदार्थानां कतमा छायापि नास्ति न संघातः न विकारः तेषामचेतनानां मध्ये पृथगेकतमः अन्वितः द्वित्वरूपो वा पदार्थस्तत्र नास्तीति किमु वक्तव्यम् तस्माद्भूतसंघातात्मवादः बहुपदार्थसंयोगजतद्विकारभूतमद्यशक्तिवत् भूतसंघातोत्थितविज्ञानात्मवादश्च मृषेत्यर्थः ॥ ५९ ॥

भूतभौतिकानामनात्मत्वदर्शनाय तेषामनित्यतां दर्शयति—धारयन्ति नाना अवयवान् इति धातवो देहाः अवयवित्वात् पांचभौतिकत्वात् तन्मात्रावयवैर्देहसंस्थानमात्रावयवैर्भूतलेशैर्विनष्टा न भवन्तीत्यर्थः । एवं अवयविनि देहे असति नष्टे अन्ततः स्वकारणे भूते लयात् अवयवः भूतलेशः असद्भवति कारणाकारं सूक्ष्मभावं प्राप्नोतीत्यर्थः ॥ ६० ॥

तर्हि देहे मृते तद्भिन्न आत्मा नैवास्तीति वा ह्यपक्षो वरीयान् अत्राह—स्यादिति । लोहपिंडे अग्नौ सति अग्निसाहश्यभ्रमो भवति यथा, एवं विकल्पे आत्मभिन्ने देहे यावत्कालपर्य्यन्तं वस्तुनि सति तावदेव वस्तुनः साहश्यभ्रमश्चेतनत्वभ्रमः स्यात् तस्मिन् असति न तु स्यात् तद्वस्तुदेहविलक्षणं नित्यमित्यर्थः । तर्हि देहविभिन्न आत्मा देहो नात्मेति आत्मानात्मविधानप्रतिषेधौ कदा स्याताम्? जाते ज्ञाने भवत, इत्याह—जाग्रत्स्वापाविति । यथा अयं जागरः नायं स्वापः इत्येवं विहितप्रतिषिद्धौ जाग्रत्स्वापौ अस्वप्ने प्रबोधे एव भवतः एवं जाते आत्मानात्मज्ञाने ज्ञानस्वरूपोऽ हमात्मा जडवर्गो देहेन्द्रियादिरूपो नात्मेत्युभयोर्विधिनिषेधता स्यादित्यर्थः ॥ ६१ ॥

एवमात्मस्वरूपज्ञानदाढर्यार्थं नास्तिकानां संघाताद्यात्मभ्रान्तिवादा निराकृताः अथ तार्किकमीमांसकादिभ्रान्तिवादाननन्तशक्तिगत्सर्वात्मभूतपरमात्मज्ञानदाढर्यार्थं निराकरोति—भावाद्वैतमिति चतुर्भिः । भावयोर्जगत्परमात्मनोरद्वैतं क्रियाणां परमात्मांशभूतजीवकृतानां परमात्मन्यर्पणात्मकमद्वैतं द्रव्याणां भोक्तृभोग्यपदार्थानां परमेश्वरात्मकत्वरूपमद्वैतं स्वानुभूत्या वेदान्तश्रवणजन्येन स्वानुभावेन वर्त्तयन् चिन्तयन् आत्मनः त्रीन् स्वप्नान् स्वप्नवदागन्तुकान् दोषान् तार्किकाः जगत्परमात्मनोरत्यन्तं भेदमाहुः तच्छास्त्रश्रवणाद्देकः मीमांसकाः जीवकृताः क्रियास्तत्तज्जीवभो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नार्थो ननु पुरमेश्वरेऽर्पयन्ति तच्छास्त्रश्रवणात् द्वितीयः उभयपक्षेऽपि भोक्तृभोग्यपदार्थानामत्यन्तभेदः स तृतीयः आगन्तुको दोषः एवं विधान् दोषान् इहास्मिन् लोके मुनिर्वेदान्तोक्ततत्त्वावज्ञता धुनुते निराकरोति ॥ ६२ ॥

कार्यकारणयोर्जगत्परमात्मनोर्वस्तुनोः कार्यत्वकारणत्वाभ्यां भिन्नयोरपि पटतन्तुवदैक्यस्य मननमनुसन्धानं तद्भावाऽद्वैतमुच्यते श्रुतिभिः "ब्रह्मैवेदमग्र आसीत् सदेव सौम्येदमग्र आसीत् सर्वं खल्विदं ब्रह्म" इत्यादिभिः परमात्मनो ऽत्यन्तं भिन्नं जगत् परमाणुमयत्वादिति विकल्पस्य अत्यन्तभेदस्य अवस्तुत्वात् पटतन्तुवदिति दृष्टान्तेन ब्रह्म सत्यं जगन्मिथ्येति प्रच्छन्नबौद्धानां पक्षोऽपि निरस्तो वेदितव्यः। तन्तूनां मिथ्यात्वे नपटमिथ्यात्वस्यासंभवात् यद्यध्यासवादनिराकरणदर्शने कौतूहलं तर्हि अध्यासगिरिवज्राख्यो ग्रन्थो द्रष्टव्यः। पटस्य तन्त्वभिन्नत्वं दृष्टान्ते दार्ष्टान्ते तु जगतश्चेतनाचेतनरूपपरमात्मशक्तिद्वाराऽभिन्नत्वमिति विवेकः ॥ ६३ ॥

साक्षाद्ब्रह्मणि परे श्रीपुरुषोत्तमे सर्वकर्मणां कारयितरि फलदातरि मनोवाक्तनुभिः सर्वकर्मसमर्पणं यत्तत् क्रियाद्वैतम् ॥ ६४ ॥

भाषा टीका।

जनों के आदि अन्त में तथा बाहर और भीतर और जगत् में जो पर, अवर, ज्ञान, ज्ञेय, वचन, वाच्य, तम, और ज्योति अर्थात् समष्टि जीव हैं वे सबही स्वयं भगवानही हैं तस्मात् पूर्वोक्तज्ञानी को सर्ववस्तुके भगवदात्मक समुझने से कुछ मोहका कारण ही नहीं है ॥ ५७ ॥

भावहोनेवाला जात्यादि के विकल्पास्पद यहदेह सत्यहोकर भी शास्त्र में अवस्तुत्वेन अर्थात् अपुरुषार्थत्वेन कहाहै, क्योंकि—इसमें आत्मधर्म दुर्घट है इसदेह के तरह जितने इन्द्रियों के विषय हैं वे भी अपुरुषार्थ रूपही है ॥ ५८ ॥

इहाँपर पृथिवी के परिणाम रूप वृक्षादिकों की छाया जैसे न वृक्षों का समुदायरूपहै, न वृक्षोंका विकाररूप है, न वृक्षो के बिना स्थिति के योग्य, है और न वृक्षोके अन्वित अर्थात् सदा वृक्षों के साथ रहनेवाली है, क्योंकि अनातप समयपर नहीं रहती है, इसी प्रकार यह शरीर भी न आत्मा का संघात न विकार न पृथक्स्थिति योग्य और न अन्वित तस्मात् मृषा अर्थात् अनित्य है, इसी से आत्मा शरीर नहीं हो सक्ता है ॥ ५९ ॥

ऐसेही पृथिव्यादि धातुओं को भी अवयवि होने से नित्य नहीं कहसक्ते हैं क्योंकि? वे अवयवों के विना नहीं रहसक्ती है, और अवयवि के असत् काल में अर्थात नाश होने पर अन्त में अवयवों की भी उपलब्धि नहीं होती है, इस प्रकार अवयवि होने से अनित्य शरीर नित्य आत्मा नहीं हो सक्ता है ॥ ६० ॥

यदि कहो कि शरीर आत्मा नहीं है तब स्थूलोहं अर्थात् मैं स्थूलहूं इस प्रकार की आत्मा को विषय करने वाली अहंप्रतीति इस देह में क्यों होती है? तहां पर कहते है कि—वस्तु के विकल्प (संशय) होने पर तो सादृश्य और भ्रम हुआ करते हैं तहां जड और चेतन का सादृश्य न होने से सादृश्य से तो ब्राह्मणोहं अर्थात् (मैं ब्राह्मण हूं) इत्यादि प्रतीति हो नहीं सक्ती। किन्तु अग्नि के संसर्ग से जैसे उष्णं जलं (जल उष्ण है) ऐसा ज्ञान होता है, ऐसे ही शरीर और आत्मा का संसर्ग (सम्बन्ध) होने से शरीर गत स्थूलत्व आदि धर्मों का आत्मा में भ्रम होता है, भलाँ यदि आत्मा शरीर नहीं है? तो विहित और निषिद्ध का अनुष्ठान तो शरीर ही से होता दीखते हैं फिर शास्त्र आत्मा के लिये क्यों विधि निषेध कहता है? तहाँ कहते हैं कि—जैसे सोते हुए पुरुष को स्वप्नावस्था में भी स्वप्नावस्था और जाग्रत् अवस्था का अनुभव होता है, और जागने पर सोते समय की दोनो अवस्थाओं के अनुभव का उस को सम्बन्ध नहीं रहता, इसी प्रकार आत्मा को भी प्रकृति सम्बन्ध तक ही अज्ञानकी शय्या पर सोने से विधि निषेध का सम्बन्ध है, और ज्ञान दशा होने पर (मुनयोऽपि न नह्यमानाः) अर्थात् मुनि लोग भी बन्धन से छूट जाते हैं ॥ इस उक्त प्रकार से स्वस्वरूपादि का पूर्ण ज्ञान होने से विधि निषेध का पात्र नहीं होता है। और आविर्भूत गुणाष्टक होकर मुक्त होने पर भी केवल आत्मा को विधि निषेध से कुछ प्रयोजन ही नहीं रहता ॥ ६१ ॥

आत्मा का यह तीन प्रकार का अद्वैत है एक भावाद्वैत, दूसरा क्रियाद्वैत, तीसरा द्रव्याद्वैत, तहां मनन शील ज्ञानी लोग आलोचना करते हुए जाग्रदादितीनों अवस्थाओं को निवृत्त कर देते हैं, ॥ ६२ ॥

तीन प्रकार के अद्वैत में भावाद्वैत यह है, कि पट तन्तु (वस्त्र सूत) के तरह विकल्प (देव मनुष्यादि अवस्था) को कुछ वस्तु न होने से अर्थात स्थिर न होने से कार्य कारण वस्तु का जो ऐक्य विचार है, ॥ ६३ ॥

हे युधिष्ठिर ! जो कि साक्षात्। पर ब्रह्म परमात्मा में मन वाणी और शरीर से कर्मों का समर्पण है उस को क्रिया द्वैत कहते हैं ॥ ६४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ! ।
यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥
यद्यस्य वा ऽनिषिद्धं स्याद्येन यत्र यतो नृप ।
स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥
एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ।
गृहे ऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥ ६७ ॥
यथा हि यूयं नृपदेव ! दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ।
यत्पादपङ्केरुहसेवया * भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥
अहं पुरा ऽभवं कश्चिद्गन्धर्व उपबर्हणः ।
नाम्ना ऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६९ ॥
रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः ।
स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ॥ ७० ॥
एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः ।
उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥
अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः ।
ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ।
याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः देहादीनां पञ्चभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्वैक्यदर्शनमित्यर्थः ॥ ६५ ॥

उक्तानाश्रमधर्मान्संक्षिप्याह–यदिति । यद्वृत्यम् येनोपायेन यतः सकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति—एतैरिति । अस्य श्रीकृष्णस्य गतिम् तद्भक्तिभाक् तस्य भक्तः ॥ ६७ ॥

एतत्सर्वसाधारणमुक्तम् भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह–यथाहीति । हे नृपदेव ! नृपैर्देवैश्च सहायैर्दुस्त्यजादिति वा आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः अङ्गभाव आर्षः उत्कर्षेणातरतेत्यर्थः यथा यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णास्त्वम् यथा च क्रतूनहार्षीस्तथा श्रीकृष्णादेव तारकात्संसारादप्युत्तरतेत्यर्थः ॥ ६८ ॥

श्रीकृष्णसेवा महतामवज्ञया भ्रश्यति तत्कृपया च सिध्यतीति दर्शयन्पूर्ववृत्तमाह—अहमिति सार्द्धैः पञ्चभिः । नाम्ना उपबर्हणः ॥ ६९ ३

पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥ ७० ॥ ७१ ॥

तदाह्वानं विद्वान् उन्मत्तः सन् गायंश्चैव गतः ॥ ७२ ॥—७४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रव्याद्वैतं विवृणोति—आत्मेति । अर्थशब्दो धनपरः कामशब्दः काम्यस्रक्चन्दनादिभोग्यवस्तुविषयः सच भोगोपकरणभोगस्थानादि प्रदर्शनार्थः यदर्थकामयोरात्मजायादि सर्वदेहिनामैक्यं तद्द्रव्याद्वैतं वित्तगृहक्षेत्रपात्रस्रक्चन्दनादीनामात्मजायाद्यनेकभोक्तृवर्गसाधारणत्वं द्रव्याद्वैतमित्यर्थः । ते एतेन गृहादीनां स्वासाधारणत्वभ्रमो निरस्तः यद्वा द्रव्ययोश्चिदचिद्द्रव्ययोरद्वैतं द्रव्याद्वैतं तत्र चिदचिद्द्वैतंदर्शयति·आत्मजायेति । आत्मादीनां सर्वदेहिनां जीवानां ज्ञानैकाकारत्वेनैकरूपेण दर्शनं चिदद्वैतं प्रकाराद्वैतम् अर्थकामादीनामचिदन्यपरिणामरूपत्वभ्रमश्च निरस्तः ज्ञानाद्वैतमितिपाठेऽप्येवंविधदर्शनं ज्ञानाद्वैतमित्यर्थः ॥ ६५ ॥

न केवलं त्रिविधमेवाद्वैतमनुसन्धेयमपितु अन्यदपि शास्त्रानुमतं चेत्तदपीत्याह–यदिति । हे नृप ! येन शास्त्रेण अस्य पुंसः

* भगवान्महर्षिभिर्निर्जितदिग्जनः इति पाठः–वीर० ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्य वस्तुनो यतो यस्माद्वस्तुनः सकाशाद्यदद्वैतमनिषिद्धं किन्त्वनुमतं स पुमान् तेनाद्वैतेनाऽनुसन्धीयमानेनेति शेषः । तदनुसन्धानपूर्वकमेव कर्माणि कर्त्तव्यानीहेत कुर्यादन्यैः शास्त्रप्रतिषिद्धैस्तु न कुर्यात् यतोऽयमनापदि न विद्यते आपत्संसारो यतस्तस्यां ज्ञाननिष्ठायां वर्त्तमानः यथा "वाचारम्भणं विकारो नामधेयम्" "व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन !" इत्यादिशास्त्रेण भावाद्वैतादिकं प्रतिपाद्यते न तथा प्रकाराद्वैतप्रकार्यद्वैतगुरुदेवताद्वैतादिकमपि शास्त्रैः प्रतिपाद्यत इति तदप्युपपाद्येयमेवेत्यभिप्रायेणाऽयं श्लोकः प्रवृत्तः तत्र प्रकार्यद्वैतं नाम ब्रह्माद्वैतं "सर्वं खल्विदं ब्रह्म" इत्यादिब्रह्मप्रकरणे सामानाधिकरण्येन ब्रह्माद्वैतप्रतिपादनात्सामानाधिकरण्यस्य च प्रकारभेदविशिष्टप्रकारैकत्वपरत्वाच्च ब्रह्माद्वैतमेव प्रकार्यद्वैतं "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुतिभिर्जीवस्वरूपभेदप्रतिपादनेन स्वरूपेणाभेदानुपपत्तेः बद्धमुक्तादिव्यवस्थाऽनुपपत्तेः सुखादिव्यवस्थाऽनुपपत्तेश्च कश्चिज्जीवैकत्वप्रतिपादनं प्रकारैक्याभिप्रायकमेवेति तदद्वैतमेव प्रकाराद्वैतम् "आचार्यं मां विजानीयात् "आचार्यदेवो भव" "आचार्यः स हरिः साक्षाच्चररूपी न संशयः" इत्यादिभिर्गुरुदैवतादीनामद्वैतं प्रतिपाद्यत एव ॥ ६६ ॥

यत्पृष्टं "गृहस्थ एतां पदवीं विधिना येन चाञ्जसा । यायाद्देवऋषे ब्रूहि" इति यस्योत्तरमुक्तमुपसंहरति-एतैरिति । हे राजन् ! वेदोक्तैरिति वेदशब्दस्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः वेदादिभिरुक्तैः कर्त्तव्यत्वेनोक्तैरेतैर्भावाद्वैताद्यनुसन्धानादिभिरित्यन्यैर्देहात्मजीवेश्वरादिभेदाऽनुसन्धानैः स्ववर्णाश्रमोचितकर्मभिश्च तस्य भगवतो भक्तिमार्गभक्तिंकुर्वन् गृहेऽपिजनः गृहस्थोऽपि जनोऽस्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ॥ ६७ ॥

"मादृशो गृहमूढधीः" इत्यनेनाभिप्रेतां स्वस्य मुक्तिदौर्लभ्यशङ्कां किम्पुनर्न्यायेन निराकरिष्यमाणः तावच्छ्रीकृष्णसेवयैव तरिष्यसीत्याह-यूयमिति । हे नृप देव ! यथा प्रभोः सर्वशक्तेरात्मनोऽन्तरात्मनः श्रीकृष्णादेव हेतोर्यूयं दुस्त्यजादापदां गणादुत्तरत अडभावः अन्तादेशाभाव आत्मनेपदञ्चार्षाणि उदतरत उत्तीर्णाः यथा च भवान् यस्य श्रीकृष्णस्य पादपङ्कजयोः सेवया हेतुभूतया निर्जिता दिग्जनादिक्पालकाः येन तादृशः सन् महर्षिभिः सह क्रतूनकार्षीदिति शेषः तथा तस्यैव सेवया मोक्ष्यस इत्यध्याहारः ॥ ६८ ॥

स्वस्य तदीयसेवामात्रेण हेतुना मादृशानां मुक्तिसम्भवे किं पुनः साक्षाल्लब्धतत्सेवानां तादृशामिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तान्तमाह—अहमिति । अतीते ब्रह्मकल्पे पूर्वजन्मन्यहं नाम्नोपबर्हणा इति प्रसिद्धः कश्चिद्गन्धर्व अभूवम् आत्मानं विशिनष्टि--गन्धर्वाणां सुसम्मतः ॥ ६९ ॥

रूपादिभिः प्रियदर्शनः प्रियं यथा भवति तथा दृश्यत इति तथा रूपं सौन्दर्यं पेशलं सौकुमार्यं हृद्विचित्तापहारित्वेन रसावहत्वं सौगन्ध्यं स्रक्चन्दनादिगन्धवत्त्वं रूपादिभिः प्रियं दर्शनं यस्येति वा स्त्रीणां नित्यं सदा प्रियतमः मत्तः उर्वधिकं लम्पटः विषयलालसः एवं भूतोऽहं दियतः ॥ ७० ॥

तत्रैकदा देवसत्रे हरिगुणाऽनुभवात्मकब्रह्मसत्रे विश्वसृग्भिः प्रजापतिभिः हरिकथागायने निमित्ते तदर्थमप्सरसां गणा उपहूताः ॥ ७१ ॥

तथाऽहमपि तद्गन्धर्वाह्वानं जानन् स्त्रीभिः परिवृतः गायन् हरीतरगाथा गायन् तत्र गतः अगायन्निति पाठे अगायन्नेव गत इत्यर्थः तत् मे मम हेलनमपराधं ज्ञात्वा विश्वसृजः ओजसा तपोबलेन शेपुः ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मजायादीनामन्येषां च देवदत्तादीनां भगवदधीनत्वदर्शनं यद्धर्मार्थकामयोरैक्यं भगवद्विषयत्वदर्शनं तत्सर्वं द्रव्याद्वैतं "मन्ये तदर्पितमनोवचनात्मगेहप्राणाः पुनाति" इत्यादिनोच्यत इत्यन्वयः अनेन जीवस्य श्रीहरिणा द्वैतमुच्यते तत्रैव चाद्वैतशब्दार्थग्रहणं नतु स्वरूपैक्यमिति शिक्षाप्राप्तेति ज्ञायत इति ॥ ६५ ॥

उपासनाप्रकारं निरूप्याधुनार्चनादिप्रकारं दर्शयति—यस्येति । यस्य पुरुषस्य येन द्रव्येण यत्र यस्मिन्देशे काले वा यतो यस्मादुपात्तमनिषिद्धं श्रुतिस्मृतिलोकविहितं स नरस्तेन तस्मिन् देशे काले वा तस्मात्पुरुषादाप्तेन कर्माणि पूजाद्यनुष्ठानीहेत कुर्यात् अन्यैर्निषिद्धैर्न कुर्यादित्यन्वयः । नन्वेवं तर्ह्यापद्यपरम एव प्राप्त इति तत्राह—अनापदीति ॥ ६६ ॥

एतैरनापदि विहितैरन्यैरापदि विहितैः अस्य हरेर्गतिं ज्ञानं स्थानं वा यायादिति लडर्थे लिङ् आप्नोतीत्यर्थः ॥ ६७ ॥

उक्तमर्थमनुभवसिद्धं करोति—यथेति । दिग्गजशब्देन दिक्पालानुपलक्षयति तस्य सेवा कर्तव्येति शेषः ॥ ६८ ॥

ममाप्यनुभवसिद्धं दर्शयितुं स्वचरितमाह—अहमिति । कश्चिदित्यात्मानं निन्दयत्यथ नाम्नोपबर्हणो गन्धर्व इति । पूर्वे अतीते महाकल्पे अतीतब्रह्मकाले "ब्राह्मकालः परश्चेति महाकल्पश्च कीर्तितः" इति ॥ ६९ ॥

तत्पुरलम्पटः तासां पुरे गृहे लम्पटः स्यादुत्सुकमनाः ॥ ७० ॥

गन्धर्वादिगणा अगायन् ॥ ७१ ॥

तद्विदित्वा गतः स्त्रीभिः परिवृतोऽगायं हेलनं विश्वसृजां पुरतः स्त्रीभिः सम्भूय मद्योपरक्तगानलक्षणम् ॥ ७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा येन भक्तिमात्रप्रकारेण आत्मनः स्वस्य वः प्रभुः श्रीकृष्णः तस्मादेव हेतोर्यूयमापद्गणात् उत्तरत उत्तरिष्यथ तदेव प्रत्याययति । यदिति ॥ —६८ ॥

तत्र स्वमपि दृष्टान्तयति—अहमित्यादिना । तत्राहमिति युग्मकम् । येनैव भक्तिमात्रप्रकारेण नारदत्वमपि लब्धवानहमिति प्रकरणार्थः ॥ ६९-७८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आत्मनः स्वस्य जायादीनाञ्च अन्येषाञ्च स्वसम्बन्धरहितानां स्वीयोर्थसाधनं कामश्च तत्प्राप्यं यद्वेत्यन्तयोः साधनसाध्ययोरैक्यादैक्यभावनेति यावेर्थार्थकामौ स्वस्य तावेव सर्वेषामेव देहादीनां पञ्चभूतात्मकत्वेनैक्यात् सर्वेषामेव जीवात्मनां भोक्तृत्वेनैक्याद्भेदाभावादिति भावः ॥ ६५ ॥

उक्तानाश्रमधर्मान् संक्षिप्याह-यद्यद्दर्त्यं येनोपायेन यतः संकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति-एतैरिति । अस्य श्रीकृष्णस्य गतिं गृहे गृहस्थोऽपि यदि तद्भक्तिभाक् स्यादित्यर्थः ॥ ६७ ॥

एवा च पञ्चाध्यायी सर्वसाधारण्येनैवोक्ता ऐकान्तिकभक्तानां तु सिद्धानां साधकानां च भगवानेव गतिः तत्र च सिद्धान् स्वयमपरोक्षीभूत एव भगवान् स्वप्रेमतरङ्गे नर्त्तयितुं सम्पद्विपदावर्त्तगमितांस्तान् यथावदेव कारयति तथैव ते कुर्वन्ति तदभिप्रेताचरणमेव तेषां भजनमिति तत्र पाण्डवानेव प्रमाणीकुर्वन्नाह—यथा हीति । नृपदैवैश्च सहायैः दुस्त्यजाद् आपदाङ्गणात् स्वप्रभोर्ध्यानादिलक्षणाचरणसेवयैवात्तरेत उत्तरथेत्यर्थः । यत् यथा च भवांस्तयैव क्रतून् अहार्षीत् तथैवान्ये उग्रसेनादयोपि तं सेवते इति शेषः । तेन माद्दशो गृहस्थमूढधीरित्युक्त्वा स्वेषां गृहस्थाकर्मनिष्ठान्तर्भावो न भाव्य इति भावः ॥ ६८ ॥

याद‍ृच्छिकसाधुसङ्गलब्धभक्तीन् साधकांश्च "धर्मान् सन्त्यज्य यः सर्वान्मां भजेत् स च सत्तमः" इत्यादि श्रीभागवतशास्त्रस्वरूपेण स एव भगवान् यथादिशति तथैव ते कुर्वन्ति "स्वलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" इति भगवदुक्तं विधिवाक्यमेव प्रमाणीकुर्वन्तो वर्णाश्रमाचारादिकं नापेक्षन्ते तत्र पूर्वजन्मनि स्वमेव प्रमाणीकुर्वन्नाह-अहमिति, सार्द्धैः पञ्चभिः । पेशलश्चातुर्य्यम् ॥ ६९ ॥ ७० ॥

तदाह्वानं विद्वान् उन्मत्तः सन् गायन्नेव गतः ॥ ७१ ॥ ७२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मनः स्वस्य जायादीनां च स्वार्थस्य स्वरूपस्य कर्मफलभोक्तुः काम्यते इति कामः भोग्यवस्तुजातं तस्य चैक्यं सर्वार्थभूतेन भगवता सह अपृथक्त्वं यत्तद्‍द्रव्ययोर्भोक्तृभोग्ययोरद्वैतम् "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मेतद्" इति श्रुतिरत्राऽनुसन्धेया ॥ ६५ ॥

अनापदि द्रव्यदेशकालाद्यनुसारेण कार्याणि कुर्यादित्युपदिशन् प्रस्तुतमुपसंहरति-यद्यस्येत्यादिना । हे नृप ! यस्य कर्त्तुः यत्कार्यजातम् येन द्रव्येण यतः सकाशाच्च यस्मिन् देशे काले च भनिषिद्धं स्यात् स कर्त्ता तान्येव कार्याणि तेन द्रव्येण तस्मादेव तस्मिन्देशे काले च समीहेत नान्यत्कुर्यादित्यर्थः ॥ ६६ ॥

एतैरुक्तप्रकारैरन्यैरप्युक्तैर्वेदोक्तकर्मभिर्हेतुभूतैः तस्य श्रीकृष्णस्य भक्तिभाङ्नरः गृहेऽपि वर्त्तमानः अस्य श्रीकृष्णस्य गतिं पदवीं यायात् मुक्तो भवतीत्यर्थः । अत्रेदं बोध्यं कर्मणामन्तःकरणशुद्ध्युपास्योपासकस्वरूपज्ञानद्वारा प्रेमलक्षणा भक्तिः साधनं जातायां तस्यां प्रेमगृहगृहीतस्य सिद्धभक्तस्य कर्मण्यवकाशाभावात्कर्मत्यागः "धर्मान्सन्त्यज्य यः सर्वान्मां भजेत्स च सत्तमः" इत्यस्मिन् शास्त्रे एव सत्तमशब्देन सिद्धभक्तो निर्दिष्टः साधकस्य तु कर्माभावेऽन्तःकरणशुद्ध्यभावाच्च ज्ञानभक्तिसम्भवः तदभावे मुक्त्यभाव इति दिक् ॥ ६७ ॥

हे नृपदेव ! यथा यूयं आत्मनः स्वकीयासुपास्यभूतात्प्रभोः श्रीकृष्णादेव हेतुभूतात् आपद्‍गणाद्दुस्तरात् अञ्जसा आर्षः उत्कर्षेणातरतेत्यर्थः । यथा च भवान् यत्पादपंकेरुहसेवया क्रतून् अहार्षीत् तथा असौ प्रसिद्धोऽन्योऽपि गृहे वर्त्तमानः तद्भक्त्या कृतार्थः स्यादिति भावः ॥ ६८ ॥

श्रीकृष्णभक्तिमाहात्म्यं सूचयितुं स्ववृत्तान्तमाह-अहमिति सार्द्धैः पञ्चभिः । नाम्ना उपवर्हणः ॥ ६९ ॥

रूपादिभिः प्रियं दर्शनं यस्य सः तत्र पेशलं चातुर्य्यम् ॥ ७०—७१ ॥

अहञ्च तदाह्वानं विद्वान् स्त्रीभिः परिवृतः उन्मत्तः सन् गायन्नेव गतः ॥ ७२—७३—७४ ॥

भाषा टीका।

अपनी स्त्री पुत्रादिकों का तथा अन्य सर्व प्राणिओं का, जो अपने अर्थ और काम के निमित्त एकता होनी है इसी को द्रव्याद्वैत कहते हैं ॥ ६५ ॥

जिस मनुष्य को जिस शास्त्र से जिस विषय में जिस उपाय से जिस कार्य का निषेध नहीं किया है, हे नृप ! वह पुरुष अनापद काल में उसी उपाय से अपने कार्यों को चलावै और से नहीं ॥ ६६ ॥

हे राजन् ! वेदोक्त इन कर्मों का अथवा और अन्य वेदोक्त स्वकर्मों का आचारण करता हुआ श्रीहरि में भक्ति वाला पुरुष अपने गृह में रहकर भी श्रीकृष्ण की गति को प्राप्त होता है, अर्थात् मोक्ष को प्राप्त होता है ॥६७॥

हे राजन् ! बड़े २ राजाओं से और दैवों से दुस्त्यज ऐसे आपदगणों से आप को जैसे प्रभु ने छुड़ाये है एसे ही संसार के भी पार उतारेंगे क्योंकि इनही के चरण कमल की सेवा से आपने दिग्विजय करके उत्तम यज्ञ किये गये हैं ॥ ६८ ॥

अब नारद जी अपनी पहिली कथा कहने लगे । नारदजी बोले, कि—अतीत कल्प में मैं गन्धर्वों का मान्य उपवर्हण नामक एक गन्धर्व भया रहा ॥ ६९ ॥

सौन्दर्य सौकुमार्य सौगन्ध्य गुण वाला और अति प्रियदर्शन वाला सदा स्त्रियों को बड़ा प्रिय और उन्मत्त और बड़ा लम्पट रहा ॥ ७० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम् ।
शुश्रूषया ऽनुषङ्गेण प्राप्तो ऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥
धर्मस्ते गृहमधीयो वर्णितः पापनाशनः ।
गृहस्थो येन पदवीमञ्जसा न्यासिनामियात् ॥ ७४ ॥
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ७५ ॥
स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखाऽनुभूतिः ।
प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुततयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥
श्रीशुक उवाच ।
इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ।
पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥
कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः ।
श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥
इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ।
देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां प्रह्लादाऽनुचरिते युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम
पञ्चदशोऽध्यायः ॥ १५ ॥
समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥
हरिः ॐ तत्सत् ॥

भाषा टीका ।

एक समय देवताओं के यज्ञ में विश्व सृष्टाओं ने हरि गाथा गान के लिये बहुत से गन्धर्व और अप्सराओं को बुलाये रहे ॥ ७१ ॥

उस समय उन के आह्वान को जानता हुआ स्त्रियों के झुंड सहित उन्मत्त की तरह गाता हुआ मैं भी गया, विश्व सृष्टाओं ने मेरे अपराध को जान कर एका एकी मुझे शाप दे दिया ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तु कृतार्थ एवेति हर्षेण पुनः पूर्वश्लोकानेव पठति यूयमिति शेषं स्पष्टम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥

सप्तमस्कन्धगूढार्थपदभावार्थदीपिका ।
संसेव्यतां सदा सद्भिर्यतिश्रीधरनिर्मिता ॥
इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीधरस्वामि-
विरचितायां भागवतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥
समाप्तोयं सप्तमस्कन्धः ॥ ७ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शापमेवाह—याहीति । कृतं हेलनं येन स त्वं नष्टा श्रीः गन्धर्वशोभा यस्य स तादृशः आशु शूद्रत्वं याहि शूद्रयोनिं प्राप्नुहीति तावत्तदाहं दास्यां शूद्र्यां जज्ञे जातः तत्रापि शूद्रजन्मन्यपि ब्रह्मवादिनां शुश्रूषयाऽनुषङ्गेण तत्सङ्गेन च हेतुना ऽस्मिन्कल्पे ब्रह्मणश्चतुर्मुखस्य पुत्रतां प्राप्तः ॥ ७३ ॥

अध्यायद्वयोक्तार्थमुपसंहरन् तच्छ्रवणतदनुष्ठानफलमाह—धर्म इति । ते तुभ्यं गृहमेधीयो धर्मो वर्णितः कथंभूतः पापनाशनः येन गृहमेधीयेन धर्मेण श्रुतेनाऽनुष्ठितेन च गृहस्थः सन्यासिनां भगवति संन्यस्तात्मनां पदवीं मुक्तिरूपामियात्प्राप्नुयादित्यर्थः ॥ ७४ ॥

त्वंतु कृतार्थ एव इति हर्षेण पूर्वश्लोकानेव पुनः पठति यूयमिति । श्लोकाः पुरस्तादेव व्याख्याताः कैवल्यनिर्वाणसुखाऽनुभूतिः निर्दोषनिर्दुःखसुखरूपविज्ञानमयः विधिकृन्नियोगकारी वस्तुयया इदन्तश ॥ ७५ ॥ ७६ ॥ ७७ ॥

स्कन्धादावुपक्रान्तम् "अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा" इति नारदयुधिष्ठिरसम्वादमुपसंहरति भगवान् शुकः—इतीति । इत्थं देवर्षिणा प्रोक्तं निशम्याकर्ण्य भरतर्षभो युधिष्ठिरः सुशान्तः कृष्णं श्रवणवेलायां पार्श्वे स्थितं चशब्दाद्देवर्षिं च प्रेम्णा विह्वलः पूजयामास ॥ ७८ ॥

ततः पूजितो देवर्षिः कृष्णपार्थावुपामन्त्र्य अनुज्ञाप्य ताभ्यामनुज्ञातः प्रययौ पार्थो युधिष्ठिरः कृष्णं परब्रह्माभिन्नं श्रुत्वा परमविस्मितः [illegible] बभूव ॥ ७९ ॥

यत्[illegible]दौ "देवासुरनृणां सर्गो नागानां मृग[illegible]" [illegible]त्तरं ततःप्रभृत्येतावत्पर्यन्तेन उक्तम् [illegible]दानाय उपसंहरति–इतीति । इत्थं दाक्षाय[illegible]णीनां वंशाः पृथक् तत्तत्परम्परापूर्व्या प्रकीर्तिताः [illegible]येषु देवादयश्चराचरात्मकाः जाता इति शेषः । [illegible]यणीवंशवर्णनोपसंहारः षष्ठान्तएवकर्तव्यस्तत्रैव [illegible]पि तद्वंशान्तर्भूतदितिजप्रसङ्गानुप्रसक्तशङ्कापरि[illegible]प्रसक्तवर्णनात्मकत्वादस्य स्कन्धस्यैतदन्त एव दाक्षा[illegible]यवर्णनमुपसंहृतमित्यवगन्तव्यम् ॥८०॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीविष्णुवदासेन श्रीवात्स्यश्रीवीरराघवविदुषा विरचितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां श्रीभागवतव्याख्यायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमते रामानुजाय नमः ॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तावत्तदानीमेव अनुषङ्गेण निरन्तरसेवालक्षणसङ्गेन भक्त्या वा "तीव्रस्नेहो ऽनुषङ्गो ऽथ नैरन्तर्यानुसेवनम्" इत्याभिधानात् ॥ ७३ ॥

अत इत्येतदपास्तं निगमयति—धर्म इति । न्यासिनां पदवीं निवृत्तिमार्गम् अर्चिरादिमार्गेण वैकुण्ठं वा ॥ ७४ ॥

यूयमित्यादिपद्यमुक्तार्थम् ॥ ७५ ॥

कैवल्येन प्रकृतिप्राकृतमिश्रराहित्येनाप्तं यन्निर्वाणसुखं स्वरूपसुखं तदनुभूतिरनुभवो यस्य स तथा ॥ ७६ ॥ ७७ ॥

यत्र यस्य प्रेमरसस्तत्र स स्नातः ॥७७॥७८॥

परमप्रमेयमुपसंहरति—इतीति । दाक्षायणीवंशस्य शाखोपशाखाभेदेन वर्णितत्वात्—इतिशब्दः समाप्तिवचनः यत्र येषु वंशेषु ज्ञानमात्रं विहाय स्थावरसंग्रहणाय चराचरा इति ७९।८०॥

भुजविलसितशौर्यं भुजङ्गमजितं विष्णुम् ।
वन्दे भुजगशयनं भुजयुगकलिपतश्रीवम् ॥
पदरत्नावलिह्येषा सप्तमस्कन्धसङ्गता ।
तुलसीव हरेः प्रीत्यै भूयाच्छ्रिमवधारिधेः ॥

इतिश्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थमुनीन्द्रकृतायाम् पदरत्नावल्याम् श्रीभागवतटीकायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः (विजयध्वजरीत्याषोडशः) ॥ १५ ॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कृष्णपार्थाविति पूर्वं तावद्बृहत्त्व ज्ञानेन विस्मृत आसीदेव । अधुनातु परमबृहत्त्वज्ञानेन परम विस्मितमासीदित्यर्थः ॥ ७९—८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्रापि शूद्रजन्मन्यपि यद्वा तादृशाऽभिशापे सति अत्र तादृशेतिहासकथनं भक्तेः प्रागभावशापनार्थम् अनुषङ्गेण पुनः पुनः सङ्गेन अनुकूलेन संगेन वा ॥ ७३ ॥ ७४ ॥

यूयन्तु प्रह्लादादिसर्वेभ्यःकेभ्यो यथा श्रेष्ठास्तथा विप्रादिवर्णेभ्यो ब्रह्मचर्याद्याश्रमेभ्यश्च परमश्रेष्ठा इति व्यञ्जयन् पूर्वोक्तामेव श्लोकत्रयीं पुनराह—यूयमिति ॥ ७५ ॥ ७६ ॥ ७७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi